
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 936. विषय वेदान्त

नाव. श्रीमद्भगवद्गीता भाष्यम् (सानंदगिरीय टिप्पणम्).

लेखक/लिपीकार — mss.

पृष्ठ 411 काळ — पूर्ण/अपूर्ण

॥ अथश्रीमद्भगवद्गीताभाष्यंसानंदगिरीयटिप्पणप्रारभ्यते॥ ॥

गीताभाष्य आ॰
१

॥श्रीगणेशाय नमः॥श्रीपरमात्मने नमः॥ दृष्टिं मयि विशिष्टार्थां कृपापीयूषवर्षिणीं॥ हेरंबदेहि प्रत्यूहक्ष्वेडव्यूहनिवारिणीं॥१॥ यद्वक्त्रपंकेरुहसंप्रसूतं निष्ठामृतं विश्वविभागनिष्ठं॥ साध्येतराभ्यां परिनिष्ठितां तं तं वासुदेवं सततं नतोस्मि॥२॥ प्रत्यंचमच्युतं नत्वा गुरून् अपि गरीयसः॥ क्रियते शिष्यशिक्षायै गीताभाष्यविवेचनं॥३॥ कर्मनिष्ठाज्ञाननिष्ठे त्युपायोपेयभूतं निष्ठाद्वयमधिकृत्य प्रवृत्तं गीताशास्त्रं व्याचिख्यासुर्भगवान् भाष्यकारो विघ्नोपप्लवोपशमनादि प्रयोजनप्रसिद्धये प्रामाणिकव्यवहारप्रमाणकमिष्टदेवतातत्त्वानुस्मरणं मंगलाचरणं संपादयन्ननवशेषेणेतिहासपुराणयोर्व्याचिख्यासितगीताशास्त्रेणैकवाक्यतामभिप्रेत्य पौराणिक

॥ॐ नमः श्रीरामाय परमात्मने नमः॥ नारायणः परोव्यक्तादंडमव्यक्तसंभवं॥ अंडस्यांतरिमे लोकाः सप्तद्वीपा च मेदिनी॥१॥ श्रीरामाय नमः॥ ॥

मेवश्लोकमंतर्यामिविषयमुदाहरति॥ नारायण इति॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः॥ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति स्मृतिसिद्धः स्थूलदर्शिनां नारायणशब्दार्थः॥ सूक्ष्मदर्शिनः पुनराचक्षते॥ नरशब्देन चराचरात्मकं शरीरजातमुच्यते तत्र नित्यसन्निहिताश्चिदाभासा जीवा नारा इत्युच्यंते तेषां अयनमाश्रयो नियामकोंतर्यामी नारायण इति॥ यमधिकृत्यांतर्यामिब्राह्मणं श्रीनारायणाख्यं मंत्राम्नायं चाधीयते॥ तदनेन शास्त्रप्रतिपाद्यं विशिष्टं तत्त्वमादिष्टं भवति॥ ॥श्रीः॥ ॥

आनंदगीरी
अ॰ १

शिव
१

ननुपरस्यात्मनोमायासंबंधादंतर्यामित्वंशास्त्रप्रतिपाद्यत्वंचवक्तव्यं। अन्यथाकूटस्थासंगाविषयाद्वितीयस्यतदयोगा
त्तथात्वसुद्दृताऽसिद्धौकथंयथोक्तपरदेवताशास्त्रादावनुस्मर्यतेशुद्धस्यहितत्वस्यानुस्मरणंअभीष्टफलवदभीष्टंतत्रा
ह।परोव्यक्तादिति।अव्यक्तमव्याकृतंमायेत्यनर्थांतरंतस्मात्परोव्यतिरिक्तस्तेनासंसृष्टोयंपरः अक्षरात्परतःपरइति
श्रुतेः गृहीतस्तत्वतोमायासंबंधाभावेपिकल्पनयातदीयसंगतिमंगीकृत्यांतर्यामित्वादिकमुन्नेयं।यस्मादीश्व
रस्यव्यतिरेकोविवक्षितः।तस्मिन्नव्यक्तेसाक्षिसिद्धेपिकार्यलिंगकमनुमानमुपन्यस्यति।अंडमिति।अपंचीकृ
तपंचमहाभूतात्मकंहैरण्यगर्भंतत्वमंडमित्यभिलक्ष्यतेतदव्यक्तात्पूर्वोक्तादुत्पद्यते।प्रसिद्धाहिश्रुतिस्मृतिवादे
षुहिरण्यगर्भस्यमूलकारणादुत्पत्तिः।तथाचकार्यलिंगादव्यक्ताऽभिव्यक्तिरित्यर्थः।हिरण्यगर्भेश्रुतिस्मृतिसम
धिगतेपिकार्यलिंगकमनुमानमस्तीतिमन्वानोविराडुत्पत्तिमुपदर्शयति।अंडस्येति।उक्तस्यांडस्यहिरण्यगर्भाभि
धानीयस्यांतरेभूरादयोलोकाविराडात्मकावर्त्ततेकार्यंहिकारणस्यांतर्भवतितेनहिरण्यगर्भांतर्भूरादयोलोकावि
राडात्मानस्तेनसृष्टाइति।तल्लिंगाद्धिरण्यगर्भसिद्धिरित्यर्थः।लोकानेवपंचीकृतपंचमहाभूतात्मकविराडात्मकत्वेनव्यु
त्पादयति।सप्तद्वीपेति।सापृथिव्यभवदितिश्रुतौविराजोजन्मसंकीर्तितमित्यंगीकारादशेषद्वीपोपेतापृथिवीत्य
नेनसर्वलोकात्मकोविराडेवोच्यतेचशब्देनविराजोहिरण्यगर्भेपूर्वोक्तांडात्मन्यंतर्भावात्ततःसंभवोऽनुकृष्यते
परमात्माहिस्वात्मानद्वाराजगदशेषमुत्पाद्यस्वात्मन्येवांतर्भाव्याखंडैकरसस्सच्चिदानंदात्मनास्वेमहिम्निति
ष्ठतीत्यर्थः॥

अत्र च नारायणशब्देनाभिधेयमुक्तं नराएव नाराः जीवास्तत्त्वंपदवाच्यास्तेषामयनमधिष्ठानं तत्पदवाच्यं परं ब्रह्म तथा च कल्पितस्याधिष्ठानातिरिक्तस्वरूपाभावाद्वाच्यस्य कल्पितत्वेपि लक्ष्यस्य ब्रह्ममात्रत्वाद्ब्रह्मात्मैक्यविषयोत्र सूच्यते तेनार्थाद्विषयविषयिभावः संबंधो ध्वनितः परोक्ष्यक्तादिस्य नेनमायासंस्पर्शाभावोक्त्या सर्वानर्थनिवृत्त्या परमानंदाविर्भावलक्षणो मोक्षोपि विवक्षितस्तेन च तत्कामस्याधिकारो द्योतितः परिशिष्टेन तु वस्तुनो वास्तवमद्वितीयत्वमावेदितं तेन च वस्तुद्वारा परमविषयत्वं तद्ज्ञाननिष्ठायास्तदुपायभूतकर्मनिष्ठायाश्चावांतरविषयत्वं इत्यर्थादुक्तमिस्यवधेयं ननु नैव साध्यसाधनभूतं निष्ठाद्वयमत्र भगवता प्रतिपाद्यते ॥ भूमिप्रार्थितेन ब्रह्मणाभ्यर्थितस्य भगवतो भूमिभारापहारार्थं वसुदेवेन देवक्यामाविर्भूतस्य तादर्थ्येन मध्यमं पथ्यासुतं प्रथितमहिमानं प्रेरयितुं धर्मद्वयस्येहानु

सभगवान्स्रष्ट्वेदंजगत्॥

घमानत्वादतो नास्य शास्त्रस्य निष्ठाद्वयं परापरविषयभावमनुभवितुमलमिति ॥ तत्र भगवतो धर्मसंस्थापनस्वाभाव्यध्रौव्याद्धर्मद्वयस्थापनार्थमेव प्रादुर्भावाभ्युपगमाद्भूभारपरिहारस्य चार्थिकत्वादर्जुनं निमित्तीकृत्याधिकारिणां स्वधर्मप्रवृत्तिद्वारा ज्ञाननिष्ठायामवतारयितुं गीताशास्त्रस्य प्रणीतत्वादुचितमस्य निष्ठाद्वयविषयत्वमिति परिहरति ॥ सभगवानित्यादिना धर्मद्वयमर्जुनायोपदिदेशेत्यंतेन भाष्येण तत्र नेदं गीताशास्त्रं व्याख्यातुमुचितं आप्तप्रणीतत्वानिर्द्धारणात् तथाविधशास्त्रांतरवदित्याशंक्य मंगलाचरणस्योद्देश्यं दर्शयित्वा दौशास्त्रप्रणेतुराप्तत्वनिर्द्धारणार्थं सर्वज्ञत्वादि प्रतिज्ञापूर्वकं सर्वजगज्जनयितृत्वमाह ॥ सभगवानिति ॥ प्रकृतो नारायणाख्यो देवः सर्वज्ञः सर्वेश्वरः समस्तमपि प्रपंचमुत्पाद्य व्यवस्थितः न च तस्याना

ननुभगवतासृष्टमपिचातुर्वर्ण्यादिविशिष्टहिरण्यगर्भादिलक्षणंजगन्नव्यवस्थितिमास्थातुंशक्यतेव्यवस्थापकाभावान्नच
परस्यैवेश्वरस्यव्यवस्थापकत्वंवैषम्यप्रसंगात्तत्राह तस्यचेति सृष्टस्यजगतोमर्यादाविरहित्वेशंकितेतदीयांव्यवस्थांकर्त्तुंदृष्ट्वान्य
वस्थापकमालोच्यक्षत्रस्यापिक्षत्रत्वेनप्रसिद्धंधर्मंतथाविधमधिगम्यसृष्ट्वानित्यर्थः सृष्टस्यधर्मस्यसाध्यस्वभावतयासा
धयितारमंतरेणासंभवात्तस्यैवतदनुष्ठातृत्वानभ्युपगमात्प्राणिप्रभेदानामधर्मप्रायाणांतद्योगात् अतस्तदीयासृष्टिरफलेत्या

तस्यचस्थितिंचिकीर्षुर्मरीच्यादीनग्रेसृष्ट्वाप्रजापतीन्प्रवृत्तिलक्षणंधर्मंग्राहयामासवेदोक्तंततोऽन्यांश्चस
नकसनंदनादीनुत्पाद्यनिवृत्तिलक्षणंधर्मंज्ञानवैराग्यलक्षणंग्राहयामास॥ ॥

शंकयाह मरीच्यादीनिति तेषांभगवतासृष्टानांप्रजासृष्टिहेतूनांयागदानादिप्रवृत्तिसाध्यंधर्मंअनुष्ठातुमधिकृतानांस्वकीयत्वेनतदुपादा
नमुपपन्नमित्यर्थः चैत्यवंदनादिभ्योविशेषार्थंधर्मंविशिनष्टि वेदोक्तमिति ननुनैतावताजगदशेषमपिव्यवस्थापयितुंशक्यतेप्रवृत्तिमा
र्गस्यपूर्वोक्तंधर्मंप्रतिनियंतृत्वेपिनिवृत्तिमार्गस्यतेनव्यवस्थापनायोग्यत्वात्तत्राह ततोऽन्यांश्चेति निवृत्तिरूपस्यधर्मस्यशमदमाद्या
त्मनोंगमेकमाह ज्ञानेति विवेकवैराग्यातिशयेशमाद्यतिशयोगम्यते ततोविवेकादितस्यगमकमित्यर्थः॥ ॥

बोधक

धर्मेबहुविदांवाददर्शनाज्जगतस्तेनकारणीभूतधर्मांतरमपिसम्भव्यमस्तीत्याशंक्याह द्विविधो हीति अतिप्रसंगव्यावृत्तये प्रकृतंधर्मंलक्षयति प्राणिनामिति प्रवृत्तिलक्षणो धर्मोभ्युदयार्थिनांसाक्षादभ्युदयहेतुर्निःश्रेयसार्थिनांपरंपरयानिःश्रेयसहेतुर्निवृत्तिलक्षणस्तुधर्मःसाक्षादेवनिःश्रेयसहेतुरितिविभागः ज्ञानस्यैवनिःश्रेयसहेतुत्वेपिशमादीनांतद्द्वारातद्धेतुत्वात्ज्ञानातिरिक्तव्यवधानाभावाच्चसाक्षादित्युक्तं यद्येवंधर्मोलक्ष्यतेतर्हिवर्णित्वमाश्रमित्वंचोपेक्ष्यसर्वैरेवपुरुषार्थार्थिभिर्द्वावपिधर्मावय

तु

द्विविधोहिवेदोक्तोधर्मःप्रवृत्तिलक्षणोनिवृत्तिलक्षणश्चजगतःस्थितिकारणंप्राणिनामभ्युदयनिःश्रेयसहेतुर्यःसाक्षात्सधर्मोब्राह्मणाद्यैर्वर्णिभिराश्रमिभिःनिःश्रेयसार्थिभिश्चानुष्ठीयमानोदीर्घेणकालेन।

यायोग्यमनुष्ठेयावितिअनुष्ठातृनियमासिद्धिरित्याशंक्याह ब्राह्मणाद्यैरिति अर्थित्वाविशेषेपिश्रुतिस्मृतिपर्यालोचनयानुष्ठातृनियमसिद्धिरित्यर्थः॥ नित्यनैमित्तिकेषुयावज्जीवमनुष्ठानंकाम्येषुकरणांशेरागाधीनाप्रवृत्तिरितिकर्त्तव्यतांशेवैधीतिविभागेपिकदाचिदेवानुष्ठानमितिविभागमभिप्रेत्याह दीर्घेणेति॥

अथयथोक्तधर्मवशादेवजगतोविवक्षितस्थितिसिद्धेर्भगवतोनारायणस्यादिकर्तुरनेकानर्थकलुषितशरीरपरिग्रहासंभवादन्यस्येवक
स्यविदनात्मस्यवैषम्यनैर्घृण्यवतोविग्रहपरिग्रहद्वारेणगीताशास्त्रप्रणयनमितिकुतोस्यात्मप्रणीतत्वंतत्राह ॥ अनुष्ठातॄणामिति ॥ अथवाय
थोक्ताशंकायांदीर्घेणेत्यारभ्योत्तरंमहताकालेनकृतत्रेतायेद्वापरावसानेसाधकानांकामक्रोधादिपूर्विकाविवेकाधर्मबाहु
ल्याद्धर्माभिभवादधर्मोतिवृद्धेश्चजगतोमर्यादाभेदेतदीयांमर्यादामात्मनिर्मितांपालयितुमिच्छन्नकृतोभगवानेतदर्थेनचातु
र्वर्ण्यसंरक्षणार्थेलीलामयमायाशक्तिप्रयुक्तंस्वेच्छाविग्रहंजग्राहेत्यर्थः भौमस्यब्रह्मणोगुप्त्यैवसुदेवाद्दजीजनदितिस्मृतिम

॥ ऽनुष्ठातॄणांकामोद्भवाद्धीयमानविवेकविज्ञानहेतुनाऽधर्मेणाभिभूयमानेधर्मेप्रवर्द्धमानेचाधर्मेजगतःस्थितिंप
रिपिपालयिषुःसआदिकर्त्तानारायणाख्योविष्णुःभौमस्यब्रह्मणोब्राह्मणत्वस्यरक्षणार्थंदेवक्यांवसुदेवादंशेनकि
लसंबभूवब्राह्मणत्वस्यहिरक्षणेरक्षितःस्याद्वैदिकोधर्मस्तदधीनत्वाद्वर्णाश्रमभेदानां ॥ ॥

नुसृत्यपदद्वयमनूद्यव्याचष्टे ॥ भौमस्येति ॥ अंशेनेतिस्वेच्छानिर्मितेनमायामयेनरूपेणेत्यर्थः ॥ किलेत्यस्मिन्नर्थेपौराणिकीप्रसि
द्धिरनूद्यतेनहिभगवतोव्यतिरिक्तस्येदंजन्मेतियुज्यतेबहुविधागमविरोधादितिभावः ननुवैदिकधर्मसंरक्षणार्थंभगवतोजन्मय
दायदाहिधर्मस्येत्यादिदर्शनात्किमिदंब्राह्मणत्वस्यरक्षणार्थमितितत्राह ॥ ब्राह्मणत्वस्येति ॥ तथापिवर्णाश्रमभेदव्यवस्थाप
नंविनाकथंयथोक्तधर्मरक्षणमित्याशंक्याह ॥ तदधीनत्वादिति ॥ ब्राह्मणंहिपुरोधायक्षत्रादिप्रतिष्ठांप्रतिपद्यते ॥ याजना
ध्यापनयोस्तद्धर्मत्वात्तद्द्वाराचवर्णाश्रमभेदव्यवस्थापनादतोब्राह्मण्येरक्षितेसर्वमपिसुरक्षितंभवतीत्यर्थः ॥

नन्वेवमपि भगवतो नारायणस्य शरीरादिमत्त्वे सत्यस्मदादिभिरविशेषादनीश्वरत्वप्रसक्तिरित्याशंक्य ज्ञानादिकृतं विशेषमा
ह स चेति ॥ ज्ञानं ज्ञप्तिरर्थपरिच्छित्तिः ॥ ऐश्वर्यमीश्वरत्वं स्वातंत्र्यं ॥ शक्तिस्तदर्थानिर्वर्तनसामर्थ्यं ॥ बलं सहायसंपत्तिः वीर्यंप
राक्रमत्वं तेजस्तु प्रागल्भ्यमधृष्यत्वं एते च षड्गुणाः सर्वविषयाः सर्वदा भगवति वर्तंते ॥ तथा च तस्य शरीरादिमत्त्वेपि नास्मदा
दिसाम्यमित्यर्थः ॥ अथैवमपि कथमीश्वरस्यानादिनिधनस्य नित्यशुद्धबुद्धमुक्तस्वभावस्य स्वभावविपरीतं जन्मादि संभ
वति ॥ न हि भूतानामीशिता स्वतंत्रः स्वात्मनोऽनर्थं स्वयमेव संपादयितुमर्हति ॥ न चास्य देहादिग्रहे किमपि फलमुपल

स च भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा संपन्नस्त्रिगुणात्मिकां वैष्णवीं स्वां मा
यां मूलप्रकृतिं वशीकृत्याजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोपि ॥ ॥

भ्यते तत्राह त्रिगुणात्मिकामिति ॥ सिसृक्षितदेहादिगतवैरूप्यसिद्ध्यर्थमिदं विशेषणं तस्याऽव्यापकत्वं वक्तुं वैष्णवीमित्युक्तं
ईश्वरपारवश्यं तस्या दर्शयति स्वामिति ॥ तस्याश्च प्रतिभासमात्रशरीरत्वमेव न तु वस्तुत्वमित्याह मायामिति ॥ तस्या
नानाविधकार्याकारेण परिणामित्वं सूचयति मूलप्रकृतिमिति ॥ ईश्वरस्य प्रकृत्याधीनत्वं वारयति वशीकृत्येति ॥ नि
त्यत्वं कार्याकारेण विरहितत्वं शुद्धत्वमकारणत्वं बुद्धत्वमजडत्वं मुक्तत्वमविद्याकामकर्मपारतंत्र्यराहित्यं ॥ न च नित्यत्वा
दयः संसारावस्थायामसंतो मोक्षावस्थायां संभवंतीति युक्तमित्याह स्वभाव इति ॥ ॥

देहग्रहेप्राधान्यंमायायादर्शयितुंपुनःस्वमाययेत्युक्तंसवाअयंपुरुषोजायमानःशरीरमभिसंपद्यमानइतिश्रुतिमाश्रित्या
ह देहवानिति इवकाराभ्यांदेहादेःस्वस्त्वेनकल्पितत्वंद्योत्यते ॥ धर्मद्वयोपदेशद्वाराप्राणिवर्गस्याभ्युदयनिःश्रेयसप्रवणत्वाप
दानेनलोकानुग्रहस्यद्यपिकूटस्थःस्वतंत्रोनित्यत्वादिलक्षणश्चायमीश्वरःस्वतोदृश्यतेतथापियथोक्तमायाशक्त्यादेहादि
गृहीत्वाप्राणिनामनुग्रहमादधानोनस्वभावविपर्ययंपर्यैतीत्यर्थः ॥ ननुप्रयोजनमनुद्दिश्यनमंदोपिप्रवर्त्ततइतिन्यायादी
श्वरस्याप्तकामतयाकृतकृत्यस्यप्रयोजनाभावादनुग्राह्याणांचाद्वैतवादेव्यतिरिक्तानामसत्वान्नधर्मद्वयमुपदेष्टुमुचित
मितितत्राह स्वप्रयोजनेति ॥ कल्पितभेदभांजिभूतान्युपादायतदनुग्रहेछयाचैत्यवंदनादिविलक्षणंधर्मद्वयमर्जुनंनि

सन्स्वमाययादेहवानिवजातइवचलोकानुग्रहंकुर्वंल्लक्ष्यतेस्वप्रयोजनाभावेपिभूतानुजिघृक्षयावै
दिकंहिधर्मद्वयमर्जुनायशोकमोहोदधौनिमग्नायोपदिदेशगुणाधिकैर्हिगृहीतोनुष्ठीयमानश्चधर्मः
प्रचयंगमिष्यतीतितंतुधर्मंभगवतायथोपदिष्टंभगवान्वेदव्यासःसर्वज्ञोगीताख्यैःसप्तभिःश्लोकशतैरुप
निबबंध ॥

मित्तीकृत्याप्तकामोपिभगवानुपदिष्टवानित्यर्थः ॥ अर्जुनस्योपदेशापेक्षास्तीतिदर्शयितुंविशिनष्टि ॥ शोकेति
ननुभूतानुग्रहेकर्त्तव्येकिमित्यर्जुनायधर्मद्वयंभगवतोपदिश्यतेतत्राह गुणाधिकैरिति ॥ प्रचयंगमिष्यतीतिमत्वाधर्मद्वयम
र्जुनायोपदिदेशेतिसंबंधः ॥ अथतथापिसुगतोपदिष्टधर्मवद्यमपिभगवदुपदिष्टोधर्मोनप्रामाणिकोपादेयतामुपगच्छेदित्याशं
क्यवेदोक्तत्वान्नास्यतत्तुल्यत्वमित्युक्तमित्यभिप्रेत्यशिष्टपरिगृहीतत्वाच्चमैवमित्याह तंतुधर्ममिति ॥ अधर्मेधर्मबुद्धिर्वेदव्यासस्य
जातेत्याशंक्याह सर्वज्ञइति ॥ कृष्णद्वैपायनंविद्धिव्यासंनारायणंप्रभुमितिस्मृतेःसज्जनोपकारकभगवदवतारत्वाद्वेदव्यासस्यना

…वुद्धिरित्याह भगवानिति

गीताशास्त्रस्यानाप्तप्रणीतत्वम् ॥ पहृत्य व्याख्येयत्वमुपपादितमुपसंहरति ॥ तदिदमिति ॥ पौरुषेयस्य वचसो मूलप्रमाणाभावेना-
प्रामाण्यमिति मत्वा विशिनष्टि ॥ समस्तेति ॥ शास्त्राक्षरैरेव तदर्थप्रतिपत्तिसंभवे किमिति व्याख्यानमित्याशंक्याह ॥ दुर्विज्ञेयार्थमिति
॥ पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ॥ आक्षेपस्य समाधानं व्याख्यानं पंचलक्षणमित्यादिक्रमेणास्य शास्त्रस्य ॥ पूर्वाचार्यै-
र्व्याख्यातत्वात्किमर्थमिदमारभ्यते गतार्थत्वात्तत्राह ॥ तदर्थेति ॥ गीताशास्त्रार्थप्रकटीकरणार्थं पदविभागस्तदर्थोक्तिः समा-
सद्वारा वाक्यार्थनिर्देशस्तत्रापेक्षितो न्यायश्चाक्षेपसमाधानलक्षणो वृत्तिकारैर्दर्शितस्तथापि तथाविधमेव शास्त्रं शा-

तदिदं गीताशास्त्रं समस्तवेदार्थसारसंग्रहभूतं दुर्विज्ञेयार्थं तदर्थाविःकरणायानेकैर्विवृतपदपदार्थवाक्यार्थन्या-
यमप्यत्यंतविरुद्धानेकार्थत्वेन लौकिकैर्गृह्यमाणमुपलभ्याहं विवेकतोऽर्थनिर्द्धारणार्थं संक्षेपतो विवरणं करिष्या-
मि ॥

स्त्रपरिचयशून्यैः समुच्चयासमुच्चयवादिभिर्विरुद्धार्थत्वेनानेकार्थत्वेन च गृहीतमालक्ष्य तद्बुद्धिमनुरोद्धुमिदमारभ्य ॥ मि-
त्यर्थः ॥ येषां प्राचीनव्याख्याने बुद्धिरप्रविष्टा तेषां संप्रति तनेऽस्मिन्नसौ प्रवेक्ष्यतीति कुतो नियमस्तत्राह ॥ विवेकत इति ॥ पूर्व-
व्याख्याने तत्तत्पदार्थनिर्द्धारणार्थन्यायः संकीर्णवद्भातीति न तत्र केषांचिन्मनीषा समुन्मिषति प्रकृते त्वसंकीर्णतया तत्त-
त्पदार्थनिर्णयोपयोगी न्यायो विविच्य तेनेनात्र मंदमध्यमयोरपि बुद्धिरवतरतीत्यर्थः ॥ किंचानपेक्षिताधिकग्रंथसद्भा-
वान्न प्राचीने व्याख्याने श्रोतॄणां प्रवृत्तिरत्र तु विवक्षितात्यग्रंथविवरणे प्रायशः सर्वेषां प्रवृत्तिः ॥ स्यादिति मत्वाह ॥ संक्षेप-

नन्वनाप्तप्रणीतत्वाद्यभावेपिनेदंशास्त्रंव्याख्येयंविषयाद्यनुबंधस्यानभिहितत्वेनाभावादित्याशंक्यसर्वव्यापाराणांप्रयोजना
र्थत्वादादौप्रयोजनमाह तस्येति प्रसाधितप्रामाण्यस्यव्याख्येयत्वेनमनसिसन्निहितस्यगीताशास्त्रस्यसंक्षेपःसंग्रहः संपि
डितत्वमेकवाक्यत्वंतेनेदंपरमफलंयन्निश्चितंश्रेयोनिःश्रेयसंकैवल्यमवांतरफलंतुतत्रतत्रावांतरवाक्यभेदेनमनोनिग्रहादिव
क्ष्यते निःश्रेयसंचद्विविधंनिरतिशयसुखाविर्भावोनिःशेषानर्थोच्छित्तिश्चतत्राद्यमुदाहरति परंइति द्वितीयंदर्शयति स
हेतुकस्येति संसारोपरमस्यात्यंतिकत्वंप्रतियोगिनःसंसारस्यपुनरुत्पत्त्ययोग्यत्वं तेनचस्वापमूर्छादिव्यवच्छेदार्थंविशेषणं
तदेवसाधयितुंसहेतुकस्येत्युक्तंफलंसमुच्चितादेकाकिनोवाकर्मणःस्यादितितस्यैवशास्त्रप्रतिपाद्यतेत्याशंक्याभिधेय

आत्यंतिकत्वं

तस्यास्यशास्त्रस्यसंक्षेपतःप्रयोजनंपरंनिःश्रेयसंसहेतुकस्यसंसारस्यात्यंतोपरमलक्षणंतच्चसर्वकर्मसंन्यासपूर्व
कादात्मज्ञाननिष्ठारूपात्धर्माद्भवति तथेममेवगीतार्थंधर्ममुद्दिश्यभगवतैवचोक्तंसहिधर्मःसुपर्याप्तोब्रह्म
णःपदवेदनइत्यनुगीतासु

मभिधित्समानःसमाधत्ते तच्चेति आत्मज्ञाननिष्ठाशेषत्वेनकर्मनिष्ठात्रोच्यतेप्राधान्ये
नज्ञाननिष्ठैवात्रप्रतिपाद्येत्यर्थः ननुशेषिणीनिष्ठाकुतोभवति नसंन्यासात्कर्मनिष्ठायाःशेषत्वात्तत्राह सर्वेति॥ संन्या
सद्वारेणासकृदनुष्ठितश्रवणादेःशेषिणीनिष्ठासिद्ध्यतिशेषत्वंचकर्मणस्तत्रपरंपरयेत्यर्थः ननुयज्ञदानतपःकर्म
नत्याज्यंकार्यमेवतदितिवाक्यशेषादसमुच्चितमात्मज्ञानमत्रनप्रतिपाद्यतेनेत्याह तथेति सर्वकर्मसंन्यासपूर्वकमात्म
ज्ञाननिष्ठारूपंधर्मंनिःश्रेयससाधनंप्रागुक्तंपरामृशति इममेवेति वक्तृभेदादभिप्रायभेदाशंकांवारयति भगवतैवेति
उक्तमनुगीतास्विति संबंधः ब्रह्मणःपदंपूर्वोक्तंनिःश्रेयसंतस्यवेदनंलाभःतत्रविशिष्टोज्ञाननिष्ठारूपोधर्मःसमर्थोभवती

यत्तदानादिवाक्यस्य तु तद्व्याख्यानावसरे तात्पर्यं वक्ष्यते कर्मत्यागस्य भगवतोऽभिप्रेतत्वे वाक्यांतरमनुगीतागतमेवोदाहरति तत्रैवेति धर्माऽधर्माऽपूर्वाऽसंसर्गत्वे हेतुमाह नैवेति क्रियाद्वयसंबंधाभावात्तन्निर्वर्त्यापूर्वाभ्यामसंबंधे प्राप्तमर्थमाह यः स्यादिति वागादिबाह्यकरणव्यापारविरहित्वं तूष्णीमित्युच्यते किंचिदचिंतयन्निति अंतःकरणव्यापाराभावोऽभिप्रेतः द्विविधकरणव्यापारविरही सन् प्रागुक्तो योऽधिकारी केवलमेकस्मिन्नद्वितीये ब्रह्मण्यासनमवस्थानं तत्र लीनस्तस्मिन्नेव समाप्तिभागी स्यात्तस्यासंप्रज्ञातसमाधिनिष्ठस्य सर्वकर्मत्यागहेतुकं ज्ञानं मुक्तिहेतुर्भवतीत्यर्थः न केवलमनुगीतास्वेव यथो

तत्रैव चोक्तं नैव धर्मी न चाधर्मी न चैव हि शुभाशुभी यः स्यादेकासने लीनस्तूष्णीं किंचिदचिंतयन् ज्ञानं संन्यासलक्षणमिति च इहापि चांते कृतमर्जुनाय सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति अभ्युदयार्थोऽपि प्रवृत्तिलक्षणो धर्मो वर्णानाश्रमांश्चोद्दिश्य विहितः स च देवादिस्थानप्राप्तिहेतुरपि सन्नीश्वरार्पणबुद्ध्यानुष्ठीयमानः सत्त्वशुद्धये भवति फलाभिसंधिवर्जितः

क्तं ज्ञानमुक्तं किंतु प्रकृतेऽपि शास्त्रे समास्यवसरे दर्शितमित्याह इहापीति नन्वत्र निवृत्तिलक्षणधर्मात्मकं संन्यासात्मज्ञानमेव न प्रतिपाद्यते कुरु कर्मैव तस्मात्त्वमित्यादौ प्रवृत्तिलक्षणस्यापि धर्मस्य वक्ष्यमाणत्वात् द्वयोश्च प्रकृतत्वाविशेषात्तत्राह अभ्युदयार्थोऽपीति ननु वर्णिभिराश्रमिभिश्चानुष्ठेयत्वेनान्यत्र विहितस्यापि तस्य न युक्तं मोक्षसाधनत्वाधिकारे विधानं देवादिस्थानप्राप्तिहेतुत्वेन मोक्षप्रतिपक्षत्वात् सत्यं तथापि फलाभिलाषमंतरेणेश्वरार्पणधि

याकारसबुद्धिशुद्धिहेतुत्वात्तस्यैव तत्रमित्याह समत्र
इति फलाभिसंधिहानात्कृताः समिति चेष्टः

प्रवृत्तिलक्षणधर्मस्योक्तरीत्या चित्तशुद्धिहेतुत्वेऽपि मोक्षाहेतुत्वेन कुतो मोक्षाधिकारे निर्देशः स्यादित्याशंक्याह ॥ शुद्धेति ॥ प्रति
पद्यते प्रागुक्तो धर्म इति शेषः ॥ यदुक्तं फलाभिसंधिवर्जितमीश्वरार्पणबुद्ध्यानुष्ठितं कर्म बुद्धिशुद्धये भवतीति तत्र वाक्यशेषमनु
कूलयति ॥ तथा चेति ॥ शास्त्रस्य प्रयोजनं ससाधनमुक्तमनूद्य विषयं दर्शयति ॥ इममिति ॥ दर्शितेन फलेन शास्त्रस्य निष्ठा
द्वयद्वारा साध्यसाधनभावसंबंधो विशेषेण विषयविषयित्वमिति विवक्षित्वाह ॥ विशेषत इति ॥ एवमनुबंधत्रयवि

॥ शुद्धसत्त्वस्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसहेतुत्वमपि
प्रतिपद्यते ॥ तथा च वक्ष्यति ॥ ब्रह्मण्याधाय कर्माणि योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धय इ
ति ॥ इमं द्विःप्रकारं धर्मं निःश्रेयसप्रयोजनं परमार्थतत्त्वं च वासुदेवाख्यं परं ब्रह्माभिधेयभूतं विशे
षतोऽभिव्यंजयद्विशिष्टप्रयोजनसंबंधाभिधेयवद्गीताशास्त्रं यतस्तदर्थविज्ञाने समस्तपु
रुषार्थसिद्धिरिति ॥ अतस्तद्विवरणे यत्नः क्रियते मया ॥ अत्र च ॥ ॥

शिष्टं शास्त्रं व्याख्यानमर्हतीत्युपसंहरति ॥ विशिष्टेति ॥ सिद्धे व्याख्यायोग्यत्वे व्याख्येयत्वं फलितमाह ॥ यत इति ॥ एवं गी
ताशास्त्रस्य साध्यसाधनभूतनिष्ठाद्वयविषयस्य परंपराभिधेयप्रयोजनवतो व्याख्येयत्वं प्रतिपाद्य व्याख्यातुका
मः शास्त्रं तदेकदेशस्य प्रथमाध्यायस्य द्वितीयाध्यायैकदेशसहितस्य तात्पर्यमाह ॥ अत्र चेति ॥ गीताशास्त्रे प्रथमेऽ
ध्याये प्रथमश्लोके कथासंबंधप्रदर्शनपरे स्थिते सतीति यावत् ॥

तत्रैवमक्षरयोजना धृतराष्ट्रो हि प्रज्ञाचक्षुर्बाह्यचक्षुरभावाद्बाह्यमर्थं प्रत्यक्षयितुमनीशः सन्नभ्यासवर्त्तिनं संजयमात्मनो हितोपदेष्टारं पृच्छति धर्मक्षेत्र इति धर्मस्य तद्वृद्धेश्च क्षेत्रमभिवृद्धिकारणं यदुच्यते कुरुक्षेत्रमिति तत्र समवेताः संगता युयुत्सवो योद्धुकामास्ते केचिन्मदीया दुर्योधनप्रभृतयः पांडवाश्चापरे युधिष्ठिरादयस्ते च सर्वे युद्धभूमौ संगता भूत्वा किं कृतवंतः किमस्मदीयं बलं बलं प्रतिलक्ष्य वीरपुरुषैर्भीष्मादिभिरधिष्ठितं परेषां भयमाविरभूत् यद्वा पक्षद्वयहिंसानिमित्ताद्धर्मात् भयमासीद्येनैते युद्धादुपरमेरन्निति १ एवं पुत्रपरवशस्य पुत्रस्नेहाभिनिविष्टस्य धृतराष्ट्रस्य प्रश्ने संजयप्रतिवचनं दृष्ट्वेत्यादि पांडवानां

॥धृतराष्ट्र उवाच॥ धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः॥ मामकाः पांडवाश्चैव किमकुर्वत संजय॥१॥ संजय उवाच॥ दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा॥ आचार्यमुपसंगम्य राजा वचनमब्रवीत्॥२॥

भयप्रसंगो नास्तीत्येतत्तु शब्देन द्योत्यते प्रस्तुत दुर्योधनस्यैव राज्ञो भयं प्रादुर्बभूव पांडवानां पांडुसुतानां युधिष्ठिरादीनामनीकं सैन्यं धृष्टद्युम्नादिभिरतिधृष्टैर्व्यूढं अधिष्ठितं प्रत्यक्षेण प्रतीत्य त्रस्तो दुर्योधनो राजा तदा तस्यां संग्रामोद्योगावस्थायामाचार्यं द्रोणनामानमात्मनः शिक्षितारं रक्षितारं च श्लाघयन्नुपसंगम्य तदीयसमीपं विनयेन प्राप्य भयोद्विग्नहृदयत्वेपि राजसत्वादेव वचनमर्थसहितं वाक्यमुक्तवानित्यर्थः २॥

तदेववचनमुदाहरति॥पश्येति॥एतामस्मदभ्यासेमहापुरुषानपिभवत्प्रमुखानपरिगणय्यभयलेशशून्यामवस्थितांचमूमिमां
सेनांपांडुपुत्रैर्युधिष्ठिरादिभिरानीतांमहतीमनेकाक्षौहिणीसहितामक्षोभ्यांपश्येत्याचार्यंदुर्योधनोनियुंक्ते॥नियोगद्वाराच
तस्मिन्परेषामवज्ञांविज्ञापयन्क्रोधातिरेकमुत्पादयितुमुत्सहते॥परकीयसेनायांवैशिष्ट्याभिधानद्वारापरपक्षेपित्वदीयमे
वबलमितिसूचयन्नाचार्यस्यतन्निरसनंसुकरमितिमन्वानःसन्नाह॥व्यूढामिति॥राज्ञोद्रुपदस्यपुत्रस्तवचशिष्योधृष्टद्युम्नो
लोकेख्यातिमुपगतःस्वयंचशस्त्रविद्यासंपन्नोमहामहिमातेनव्यूहमापाद्याधिष्ठितामिमांचमूमितिनप्रतिपद्यसेकिमि

पश्यैतांपांडुपुत्राणामाचार्यमहतींचमूं॥व्यूढांद्रुपदपुत्रेणतवशिष्येणधीमता॥३॥अत्रशूरामहेष्वासा
भीमार्जुनसमायुधि॥युयुधानोविराटश्चद्रुपदश्चमहारथः॥४॥धृष्टकेतुश्चेकितानःकाशिराजश्च
वीर्यवान्॥पुरुजित्कुंतिभोजश्चशैव्यश्चनरपुंगवः॥५॥

तिवामृश्यसीत्यर्थः॥३॥अन्येपिप्रतिपक्षेपराक्रमभाजोबहवःसंतीत्यनुपेक्षणीयत्वंपरपक्षस्यविवक्षन्नाह॥अत्रेति॥अस्यांप्र
तिपक्षभूतायांसेनायांशूराःस्वयमभीरवःशस्त्रास्त्रकुशलाःभीमार्जुनाभ्यांसर्वसंप्रतिपन्नशौर्याभ्यांतुल्यायुद्धभूमावुप
लभ्यंतेतेषांयुद्धशौंडीर्यंविशदीकर्तुंविशिनष्टि॥महेष्वासाइति॥इषुस्यतेऽस्मिन्नितिव्युत्पत्त्याधनुस्तथोच्यतेतच्चमहदन्यैर
प्रधृष्यंतद्येषांतेराजानस्तथाविवक्ष्यंतेतानेवपरसेनामध्यमध्यासीनान्परपक्षानुरागिणोराज्ञोविज्ञापयति॥युयुधानइत्या

द्रौपदेयाश्चेत्यंतेन तेषां सर्वेषामपि महाबलपराक्रमभास्कारनुपेक्ष्यत्वं पुनर्विवक्षति सर्व एवेति ॥६॥ यद्येवं परकीयं बलमतिप्रभूतं प्रतीत्याति भीतवं भिद धासि हंत संधिरेव परैरिष्यतामलं विग्रहाग्रहेणेत्याचार्याभिप्रायमाशंक्याब्रवीति अस्माकमिति तु शब्देनांतरुत्पन्नमपि स्वकीयं भयं तिरोदधानो धृष्टतामात्मनो द्योतयति येखल्वस्मस सैन्यव्यवस्थिताः सर्वेभ्यः समुत्कर्षजुषस्तान्मयोच्यमानान्निबोधनिश्चयेन मद्वचनादवधारयेत्यर्थः यद्यपि त्वमेव त्रैवर्णिकेषु त्रैविद्यवृद्धेषु प्रधानत्वात्तान्प्रतिपत्तुं प्रभुरसि तथापि मदीयसैन्यस्य ये मुख्यास्तानहं ते तुभ्यं संज्ञार्थे असंख्येषु तेषु मध्ये कतिचिन्नामभिर्गृहीत्वा परिशिष्टा नुपलक्षयितुं

युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥६॥ अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ॥ नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥७॥ भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥८॥ अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ॥ नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥९॥ ॥

विज्ञापनं करोमि न त्वज्ञातं किंचित्त्वज्ञापयामीति मत्वाह द्विजोत्तमेति ॥७॥ तानेव स्वसेनाविशिष्टान्पुरुषधौरेयानात्मीयभयपरिहारार्थं परिगणयति ॥ भवानित्यादिना ॥८॥ द्रोणादिपरिगणनस्य परिशिष्टपरिसंख्यार्थत्वं व्यावर्त्तयति अन्ये चेति सर्वेपि भवंतमारभ्य मदीय एतनायां प्रविष्टाः स्वजीवितादपि मद्यं स्पृहयंतीत्याह मदर्थ इति यत्तु तेषां शूरत्वमुक्तं तदिदानीं विशदयति नानेति नानाविधान्यनेकप्रकाराणि शस्त्राण्यायुधानि प्रहरणसाधनानि येषां ते तथा बहुविधायुधसंपत्तावपि तत्प्रयोगनैपुण्याभावे तद्वैफल्यं इति नेत्याह सर्व इति ॥९॥

राजापुनरपिस्वकीयभयाभावेहेतुत्वंतरमाचार्यंप्रत्यावेदयति॥ अपर्याप्तमिति॥ अस्माकंबलंत्विदमेकादशसंख्याकाक्षौहिणीपरिमितं बलंभीष्मेणचप्रथितमहामहिम्नासूक्ष्मबुद्धिनासर्वतोरक्षितंपर्याप्तंपरेषांपरिभवेसमर्थमेतेषांपुनस्तदल्पंसप्तसंख्याकाऽक्षौहिणीपरिमितंबलंभीमेनचंचलबुद्धिनाकुशलताविकलेनपरिपालितमपर्याप्तमस्मानभिभवितुमसमर्थमित्यर्थः॥ अथवातदिदमस्माकंबलंभीष्माधिष्ठितमपर्याप्तमपरिमितमप्रधृष्यमक्षोभ्यमितरेषांतुपांडवानांबलंभीमेनरक्षितंपर्याप्तंपरिमितंसोढुंशक्यमित्यर्थः॥ अथवातत्पांडवानांबलंअपर्याप्तंनालमस्माकंअस्मभ्यंभीष्माभिरक्षितंभीष्मोऽभिरक्षितोऽस्मैपरबलनिवृत्त्यर्थमितितदेवतथोच्यतेइदंपुनरस्मदीयंबलमेतेषांपांडवानांपर्याप्तंपरिभवेसमर्थंभीमाभिरक्षितं॥ भीमोदुर्बलहृदयोयस्मा

अपर्याप्तंतदस्माकंबलंभीष्माभिरक्षितं॥ पर्याप्तंत्विदमेतेषांबलंभीमाभिरक्षितं॥१०॥ अयनेषुचसर्वेषुयथाभागमवस्थिताः॥ भीष्ममेवाभिरक्षंतुभवंतःसर्वएवहि॥११॥

दस्मैपरबलनिवृत्त्यर्थमभिरक्षितस्तस्मादस्माकंनकिंचिदपिभयकारणमस्तीत्यर्थः॥१०॥ स्वकीयबलस्यभीष्माधिष्ठितत्वेनबलिष्ठत्वमुक्त्वाभीष्मशेषत्वेनतदनुगुणत्वंद्रोणादीनांप्रार्थयते॥ अयनेष्विति॥ कर्त्तव्यविशेषद्योतीचशब्दः समरसमारंभसमयेयोधानांयथाप्रधानंयुद्धभूमौपूर्वापरादिदिग्विभागेनावस्थितिस्थानानियानिनियम्यंतेतान्यत्रायनान्युच्यंतेसेनापतिश्चसर्वसैन्यमधिष्ठायमध्येतिष्ठतितेषुसर्वेषुत्वक्तविभागंअपरित्यज्यभवानश्वत्थामाकर्णश्चेत्येवमादयःभवंतःसर्वेऽवस्थिताःसंतोभीष्ममेवसेनापतिंसर्वतोरक्षंतुतस्यहिरक्षणेसर्वमस्मदीयंबलंरक्षितंस्यात्परबलनिवृत्त्यर्थत्वेनतस्यास्माभिरक्षितत्वादित्य

गी० टी०

तमेवमाचार्यंप्रतिसंवादं कुर्वंतं भयाविष्टं राजानं दृष्ट्वा तदभ्याशवर्ती पितामहस्तद्बुद्ध्यनुरोधार्थमित्थं कृतवानित्याह तस्येति राज्ञो दुर्योधनस्य हर्षबुद्धिगतमुल्लासविशेषं परपरिभवद्वारा स्वकीयविजयद्वारकं सम्यगुत्पादयन्भयं तदीयमपनिनीषुरुच्चैः सिंहनादं कृत्वा शंखमापूरितवान्किमिति दुर्योधनस्य हर्षमुत्पादयितुं पितामहो यतते कुरुवृद्धत्वात्तस्य कुरुराजत्वाच्चास्य दुर्योधनभयापनयनार्था प्रवृत्तिरुचिता तदुपजीवितया तद्दृशत्वाच्च तस्य सिंहनादे शंखशब्दे च परेषां हृदयव्यथा संभाव्यते दूरादेवारिनिवहं प्रति भयजननलक्षणप्रतापत्वादित्यर्थः ॥१२॥ राजाभिप्रायं प्रतीत्य भीष्मप्रवृत्त्यनंतरं तत्पक्षे

तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः ॥ सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् ॥१२॥
ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः ॥ सहसैवाभ्यहन्यंत स शब्दस्तुमुलोऽभवत् ॥१३॥
ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ ॥ माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः ॥१४॥ पांचजन्यं हृषीकेशो देवदत्तं धनंजयः ॥ पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः ॥१५॥ ॥

तैस्तै राजभिः शंखादयो वाद्यविशेषाः प्रकटितशब्दवंतः संवादिताः स च शंखादिप्रयुक्तः शब्दस्तुमुलो बहुलभयं परेषां परिद्योतयन्नासीदित्याह ततइति ॥१३॥ एवं दुर्योधनपक्षे प्रवृत्तिमालक्ष्य परिसरवर्तिनौ केशवार्जुनौ श्वेतैरतिवलपराक्रमैर्युक्ते महत्यप्रधृष्ये रथे व्यवस्थितावप्राकृतौ शंखौ पूरितवंतावित्याह ततः श्वेतैरिति ॥१४॥ तयोः शंखयोर्दिव्यत्वमेवावेदयति पांचजन्यमिति केशवार्जुनयोर्युद्धाभिमुख्यं दृष्ट्वा संहृष्टः स्वारस्येन समररसिको भीमसेनोऽपि युद्धाभिमुखोऽभूदित्याह पौंड्रमिति ॥१५॥

एतेषामीदृशीं प्रवृत्तिं प्रतीत्य परिपालनावकाशमासाद्य राज्ञो युधिष्ठिरस्यापि प्रवृत्तिं दर्शयति॥ अनंतेति॥ ज्यायसां भ्रातॄ
णामनुसरणमावश्यकमिति मत्वा नयोर्यवीयसो र्भ्रात्रोरपि प्रवृत्तिमाह॥ नकुल इति॥ १६॥ अन्येषामपि तत्पक्षीयानां रा
ज्ञामैकमत्यं विज्ञापयन् धृतराष्ट्रस्य दुराशां संजयो व्युदस्यति काश्यश्चेत्यादिना॥ १७॥ परमेष्वासादि विशेषणचतुष्ट
यं प्रत्येकं संबध्यते तैस्तै राजभिः शंखानापूरयद्भिरापादितो महान् घोषस्तुमुलोति भैरवो नभश्चांतरिक्षं पृथिवीं च
भुवनं लोकत्रयं सर्वमेव विशेषेणानुक्रमेण नादयन्नादयुक्तं कुर्वन् धार्त्तराष्ट्राणां दुर्योधनादीनां हृदयान्यंतःकरणानि

अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः॥ नकुलः सहदेवश्च सुघोषमणिपुष्पकौ॥ १६॥ काश्यश्च परमेष्वासः शिखं
डी च महारथः॥ धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः॥ १७॥ द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते॥ सौभद्रश्च म
हाबाहुः शंखान्दध्मुः पृथक्पृथक्॥ १८॥ स घोषो धार्त्तराष्ट्राणां हृदयानि व्यदारयत्॥ नभश्च पृथिवीं चैव तुमुलो व्य
नुनादयन्॥ १९॥ अथ व्यवस्थितान्दृष्ट्वा धार्त्तराष्ट्रान्कपिध्वजः॥ प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः॥ २०॥ श्रीः

व्यदारयत् विदारितवान्॥ युज्यते हि तत्प्रेरितशंखघोषश्रवणात् त्रैलोक्याक्रोशितमुपशृण्वतां तेषां हृदये क्षुद्रो धूयमान
त्वं तदाह॥ स घोष इति॥ १९॥ दुर्योधनादीनां धार्त्तराष्ट्राणामेवं भयप्राप्तिं प्रदर्श्य पार्थादीनां पांडवानां तद्वैपरीत्यमिदानीमु
दाहरति॥ अथेत्यादिना॥ भीतिप्रत्युपस्थिते स्वनंतरं पलायने प्राप्तेपि वैपरीत्याद्व्यवस्थितानप्रचलितान्त्रत्यक्षेणोपल
भ्य हनूमंतं वानरवरं ध्वजलक्षणत्वेनादायावस्थितोर्ज्जुनो भगवंतमाहेति संबंधः॥ २०॥

किमाहेत्यपेक्षायामिदंवक्ष्यमाणंहेतुमद्वचनमित्याह वाक्यमिदमिति कस्यामवस्थायामिदमुक्तवानितितत्राह प्र
वृत्तेति शस्त्राणामिषुपाशप्रभृतीनां संपातःसमुदायस्तस्मिन्प्रवृत्तेप्रयोगाभिमुखेसतीतियावत् किंकृत्वाभगवंतं
प्रयुक्तवानिति तदाह धनुरिति महीपति शब्देनराजाप्रज्ञाचक्षुःसंजयेनसंबोध्यते तदेवगांडीवधन्विनोवाक्यम
नुक्रामति सेनयोरिति उभयोरपिसेनयोःसन्निहितयोर्मध्येमदीयरथंस्थापयेति अर्जुनेनसारथ्येसर्वेश्वरोनियु
ज्यते किंहिभक्तानामशक्यंयद्भगवानपितंनियोगमनुति ष्ठति युक्तंहिभगवतोभक्तपारवश्यंअच्युतेतिसंबोध

हृषीकेशंतदावाक्यमिदमाहमहीपते॥ सेनयोरुभयोर्मध्येरथंस्थापयमेच्युत २१॥ ॥
यावदेतान्निरीक्षेहंयोद्धुकामानवस्थितान् कैर्मयासहयोद्धव्यमस्मिन्रणसमुद्यमे २२॥

नतयाभगवतःस्वरूपंनकदाचिदपिप्रच्युतिंप्राप्नोतीत्युच्यते २१ मध्येरथंस्थापयेत्युक्तंतदेवरथस्थापनं
निधरियति यावदिति एतान्प्रतिपक्षेप्रतिष्ठितान् भीष्मद्रोणादीनस्माभिःसार्द्धंयोद्धुमपेक्षावतोयावदहं
त्वानिरीक्षितुमहंक्षमःस्यांतावत्तद्देशेरथस्यस्थापनंकर्त्तव्यमित्यर्थः किंचप्रवृत्तेयुद्धप्रारंभेवहवोराजानोमु
ख्यायुद्धभूमावुपलभ्यंतेतेषांमध्येकैःसहमयायोद्धव्यंनहिकश्चिदपिममगतिप्रतिहतिरस्तीत्याह कैरिति

प्रतियोगिनामभावेकथंतवयुद्धोत्सुकत्वंफलवद्भवेदितितत्राह। योत्स्यमानानिति। येकेचिदेतेराजानोनानादेशेभ्योऽत्रकु
रुक्षेत्रेसमवेतास्तानहंयोत्स्यमानान्परिगृहीतप्रहरणोपायानतितरांसंग्रामसमुत्सुकानुपलभेतेनप्रतियोगिनांबा
हुल्यमित्यर्थः। तेषामस्माभिःसहपूर्ववैराभावेकथंप्रतियोगित्वंप्रकल्प्यतेतत्राह। धार्तराष्ट्रस्येति। धृतराष्ट्रपुत्रस्यदु
र्योधनस्यदुर्बुद्धेःस्वरक्षणोपायमप्रतिपद्यमानस्ययुद्धायसंरंभंकुर्वतोयुद्धेयुद्धभूमौस्थित्वाप्रियंकर्त्तुमिच्छवोराजानः
समागतादृश्यंतेतेनतेषामौपाधिकमस्मत्प्रतियोगित्वमुपपन्नमित्यर्थः। २३। एवमर्जुनेनप्रेरितोभगवानहिंसारूपंधर्ममाश्रि

योत्स्यमानानवेक्ष्येहंयएतेत्रसमागताः। धार्त्तराष्ट्रस्यदुर्बुद्धेर्युद्धेप्रियचिकीर्षवः। २३। संजयउ
वाच। । एवमुक्तोहृषीकेशोगुडाकेशेनभारत। सेनयोरुभयोर्मध्येस्थापयित्वारथोत्तमं।
२४ भीष्मद्रोणप्रमुखतःसर्वेषांचमहीक्षितां। उवाचपार्थपश्यैतान्समवेतान्कुरूनिति। २५

त्यप्रायशोयुद्धात्तंव्यावर्त्तयिष्यतीतिधृतराष्ट्रस्यमनीषांदिदूषयिषुःसंजयोराजानंप्रत्युक्तवानित्याह। संजयइति। भगवतो
हिभूभारापहारार्थेप्रवृत्तस्यार्जुनाभिप्रायप्रतिपत्तिद्वारेणस्वाभिसंधिंप्रतिलभमानस्यपरोक्तिमनुसृत्यचाभिप्रायानुकू स
लमनुष्ठानमादर्शयति। एवमिति। २४। भीष्मद्रोणादीनामन्येषांचराज्ञामंतिकेरथंस्थापयित्वाभगवान्किंकृतवानितितदाह
उवाचेति। एतानभ्याशेवर्त्तमानान्कुरून्कुरुवंशप्रसूतान्भवद्भिःसार्द्धंयुद्धार्थंसंगतान्पश्यदृष्ट्वाचयैःसहात्रयुयुत्सातवोपा
वर्त्ततैःसाकंयुद्धंकुरु। नोखलुएतेषांशस्त्रशिक्षावतांमहीक्षितामुपेक्षोपपद्यते। सारथ्येतुनमनःखेदनीयमित्यर्थः। २५।

एवंस्थितेमहानधर्मोहिंसेतिविपरीतबुद्ध्यायुद्धादुपरिरंसापार्थस्यसंवृत्तेति । तत्रेत्यादिना सन्नम्याभगवदभ्यनुज्ञानेसमरसमारं
भायसंवृत्तेसतीतिउच्यते । सेनयोरुभयोरपिस्थितान्पार्थोपश्यदितिसंबंधः २६ अथशब्दस्तथाशब्दपर्यायः श्वशुराभार्या
णांजनयितारः सुहृदोमित्राणिकृतवर्मप्रभृतयः सेनाद्वयेव्यवस्थितान्यथोक्तान्पितामहादीनालोक्यपरमकृपयापरवशः स
न्नर्जुनोभगवंतमुक्तवानित्याह तानिति २७ विषीदन्यथोक्तानांपित्रादीनांहिंसासंरंभनिबंधनंविषादमुपतापंकुर्वन्नि

तत्रापश्यत्स्थितान्पार्थः पितॄनथपितामहान् आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा
२६ श्वशुरान्सुहृदश्चैवसेनयोरुभयोरपि तान्समीक्ष्यसकौंतेयः सर्वान्बंधूनवस्थितान् २७ कृ
पयापरयाविष्टोविषीदन्निदमब्रवीत् । अर्जुनउवाच ॥ दृष्ट्वेमंस्वजनंकृष्णयुयुत्सुंसमुपस्थितं २८
सीदंतिममगात्राणिमुखंचपरिशुष्यति वेपथुश्चशरीरेमेरोमहर्षश्चजायते २९ ॥

त्यर्थः तदेवेदंशब्दवाच्यंवचनमुदाहरति दृष्ट्वेति २८ आत्मीयंबंधुवर्गंयुद्धेच्छयायुद्धभूमावुपस्थितमुपलभ्यशोकप्रवृत्तिंदर्शयति
सीदंतीति देवोशस्यैवार्जुनस्यानात्मविदः स्वपरदेहेआत्मात्मीयाभिमानवतस्त्रियस्ययुद्धारंभेतन्मृत्युप्रसंगदर्शिनः शोकोम
हानासीदित्यर्थः अंगेषुव्यथामुखेशोषश्चेत्युभयंशोकलिंगमुक्तंसंप्रतिवेपथुप्रभृतीनिलिंगान्युपन्यस्यति वेपथुश्चेति रोमहर्षोरोम्णां

[illegible]

किंचाऽधैर्यमपिसंहत्तमित्याह नचेति मोहोपिमहानुद्भवतीत्याह भ्रमतीवेति ३० विपरीतनिमित्तप्रतीतेरपिमोहोभवती
त्याह निमित्तानीति तानिविपरीतानिनिमित्तानिवामनेत्रस्फुरणादीनियुद्धेस्वजनहिंसयाफलानुपलंभादपितस्मादुपरिरं
साजायतइत्याह नचेति ३१ प्राप्तानांयुयुत्सूनांहिंसयाविजयोराज्यंसुखानिचलब्धुंशक्यानीतिकुतोयुद्धादुपरतिरित्या
शंक्याह नकांक्षइति किमितिराज्यादिकंसर्वाकांक्षितंनकांक्षसेतेनपुत्रभ्रात्रादीनांस्वास्थ्यमाधातुंशक्यमित्याशंक्या
ह किमिति ३२ राज्यादीनामकांक्षणेहेतुमाह येषामिति ३३ तानेवविशिनष्टि आचार्याइति श्यालाभार्याणांभ्रात

धुं

गांडीवंस्रंसतेहस्तात्त्वक्चैवपरिदह्यते नचशक्नोम्यवस्थातुंभ्रमतीवचमेमनः ३० निमित्तानिचपश्यामिविपरी
तानिकेशव नचश्रेयोनुपश्यामिहत्वास्वजनमाहवे ३१ नकांक्षेविजयंकृष्णनचराज्यंसुखानिच किंनोराज्येन
गोविंदकिंभोगैर्जीवितेनवा ३२ येषामर्थेकांक्षितंनोराज्यंभोगाःसुखानिच तइमेवस्थितायुद्धेप्राणांस्त्यक्त्वाधना
निच ३३ आचार्याःपितरःपुत्रास्तथैवचपितामहाः मातुलाःश्वशुराःपौत्राःश्यालाःसंबंधिनस्तथा ३४ एता
न्नहंतुमिच्छामिघ्नतोपिमधुसूदन अपित्रैलोक्यराज्यस्यहेतोःकिंनुमहीकृते ३५

रोधृष्टद्युम्नप्रभृतयः ३४ वध्येष्वपिस्वराज्यपरिपंथिषुआततायिषुकृपाबुद्ध्यास्वधर्माद्युद्धात्पूर्वोक्तमोहादिवशात्सच्युतिंद
र्शयति एतानिति जिघांसंतंजिघांसीयादितिन्यायादेतेषांहिंसानदोषायेत्याशंक्याह घ्नतोपीति पृथिवीप्राप्त्यर्थेहिंसन
मेतेषामिष्यते नचतस्मात्त्रिःसमीहितेतिकैमुतिकन्यायेनदर्शयति अपीति नहिमहदपित्रैलोक्यलक्षणंराज्यंलब्धुं
स्वजनहिंसायैमनोमदीयंस्पृहयति पृथिवीप्राप्त्यर्थंपुनर्वैध्रुवधंनश्रद्दधामीतिकिंवक्तव्यमित्यर्थः ३५

खिता २

दुर्योधनादीनां शत्रूणां निग्रहे प्रीतिप्राप्तिसंभवाद्युद्धं कर्त्तव्यमित्याशंक्याह ॥ निहत्येति ॥ यदि पुनरमी दुर्योधनादयो न निग्रह्येर-
न् भवंतस्तर्हि तैर्निगृहीता दुःशीलैः स्युरित्याशंक्याह पापमेवेति ॥ यदीमे दुर्योधनादयो निर्द्दोषानेवास्मानकस्माद्युद्धभूमौ
हन्युस्तदैतानग्निदो गरदश्चेत्यादिलक्षणोपेतानाततायिनो निर्द्दोषस्वजनहिंसाप्रयुक्तं पापं पूर्वमेव पापिनः समाश्रयेदित्य-
र्थः ॥ अथवा यद्यप्येते भवंत्याततायिनस्तथाप्येताननतिशोच्यान् दुर्योधनादीन् हिंसित्वा हिंसाकृतं पापमस्मानेवाश्रयेद-
तो नास्माभिरेते हंतव्या इत्यर्थः ॥ अथवा गुरुभ्रातृसुहृत्प्रभृतीनेतान्हत्वा वयमाततायिनः स्यामः ॥ ततश्चैतान्हत्वा तत्कृतं

निहत्य धार्त्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ॥ पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६ ॥
तस्मान्नार्हा वयं हंतुं धार्त्तराष्ट्रान्सबांधवान् ॥ स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७ ॥
यद्यप्येते न पश्यंति लोभोपहतचेतसः ॥ कुलक्षयकृतं दोषं मित्रद्रोहे च पातकं ॥ ३८ ॥

पापमाततायिनोऽस्मानेव संश्रयेदिति युद्धादुपरमणमस्माकं श्रेयस्करमित्यर्थः ॥ ३६ ॥ फलाभावादनर्थसंभवाच्च पर-
हिंसा न कर्त्तव्येत्युपसंहरति ॥ तस्मादिति ॥ किंच राज्यसुखमुद्दिश्य युद्धमुपक्रम्यते न च स्वजनपरिक्षये सुखमुपप-
द्यते तेन न कर्त्तव्यं युद्धमित्याह ॥ स्वजनं हीति ॥ ३७ ॥ कथं तर्हि परेषां कुलक्षये स्वजनहिंसायां प्रवृत्तिस्तत्राह ॥ यद्यपीति ॥ लो-
भोपहतबुद्धित्वात्तेषां कुलक्षयादिप्रयुक्तदोषप्रतीत्यभावात्प्रवृत्तिविस्रंभः संभवतीत्यर्थः ॥ ३८ ॥ ॥

परेषामिवास्माकमपि प्रवृत्ति विलंभः संभवेदितिचेत्तत्राह कथमिति कुलक्षये मित्रद्रोहे दोषं प्रपश्यद्भिरस्माभिस्तद्दोषाद्धितं पापं कथं नज्ञा
तव्यं तद्ज्ञाने तत्परिहारासंभवात् अतोऽस्मात्पापान्निवृत्त्यर्थं तज्ज्ञानमपेक्षितमिति पापपरिहारार्थिनामस्माकं युक्तायुद्धेऽप्रवृत्तिरित्यर्थः
३९ कोसौ कुलक्षये दोषो यद्दर्शनाद्युष्माकं युद्धादुपरतिरपेक्ष्यते तत्राह कुलेति कुलस्य हिंसायां कुलसंबंधिनश्चिरंतना धर्मास्तत्तदग्नि
होत्रादिक्रियासाध्या नाशमुपयांति कर्तुरभावादित्यर्थः धर्मनाशेपि किं स्यादिति चेत्तत्राह धर्मइति कुलप्रयुक्ते धर्मे कुलनाशादेव नष्टे कु
लक्षयकरस्य कुलं परिशिष्टमखिलमपि तदीयोऽधर्मोभिभवति अधर्मभूयिष्ठं तस्य कुलं भवतीत्यर्थः ४० कुलक्षयकृतोऽवशिष्ट

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुं कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ३९ कुलक्षये प्रणश्यंति कुलधर्माः सना
तनाः धर्मे नष्टे कुलं कृत्स्नमधर्मोभिभवत्युत ४० अधर्माभिभवात्कृष्ण प्रदुष्यंति कुलस्त्रियः स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः
४१ संकरो नरकायैव कुलघ्नानां कुलस्य च पतंति पितरो ह्येषां लुप्तपिंडोदकक्रियाः ४२ दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः
उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः ४३

कुलस्याधर्मप्रवणत्वे को दोषः स्यादिति तत्राह अधर्मेति पापप्रचुरे कुले
प्रसूतानां स्त्रीणां प्रदुष्टत्वे किं दुष्यतीति तत्राह स्त्रीष्विति ४१ वर्णसंकरस्य दोषपर्यवसायितामादर्शयति संकरइति कुलक्षयक
रणे दोषांतरं समुच्चिनोति पतंतीति कुलक्षये कृते पितरो निरयगामिनो भवंतीत्यत्र हेतुमाह लुप्तेति पुत्रादीनां कर्तॄणामभावात्
भावात् लुप्ता पिंडस्योदकस्य च क्रिया येषां ते तथा ततश्च प्रेतत्वपरावृत्तिकारणाभावान्नरकपतनमेवावश्यकमापतेदित्य
र्थः ४२ कुलक्षयकृतामेतैरुदाहृतैर्दोषैर्वर्णसंकरहेतुभिर्जातिप्रयुक्ता वंशप्रयुक्ताश्च धर्माः सर्वे समुत्साद्यंते तेन कुलक्षय
कारणाद्युद्धादुपरतिरेव श्रेयसीत्याह दोषैरेतैरिति ४३

किंच। जातिधर्मेषु कुलधर्मेषु चोत्सन्नेषु तत्तद्धर्मवर्जितानां मनुष्याणामनधिकृतानां नरकपतनध्रौव्यादनर्थकरमिदमवहेयमित्याह। उत्सन्नेति। यथोक्तानां मनुष्याणां नरकपातस्यावश्यकत्वे प्रमाणमाह। इत्यनुशुश्रुमेति ४४ राज्यप्राप्तिप्रयुक्तसुखोपभोगलुब्धतया स्वजनहिंसायां प्रवृत्तिरस्माकं गुणदोषविभागविज्ञानवतां अतिकष्टेति परिभ्रष्टहृदयः सन्नाह। अहो बतेति ४५ यद्येवं युद्धविमुखः सन्परपरिभवप्रतीकाररहितो वर्त्तेथास्तर्हि त्वां शस्त्रपरिग्रहरहितं शत्रुं शस्त्रपाणयो धार्त्तराष्ट्रा निगृह्णी

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन। नरके नियतं वासो भवतीत्यनुशुश्रुम ॥४४॥ अहो बत महत्पापं कर्तुं व्यवसिता वयं। यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यताः ॥४५॥ यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः। धार्त्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ४६। संजय उवाच। एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत्। विसृज्य सशरं चापं शोकसंविग्नमानसः ४७॥ इति श्रीभगवद्गीतायां प्रथमोऽध्यायः॥१

युरित्याशंक्याह। यदीति। प्राणादपि प्रकृष्टो धर्मः प्राणभृतामहिंसेति भावः ४६। यथोक्तमर्जुनस्य वृत्तांतं संजयो धृतराष्ट्रं राजानं प्रति प्रवेदितवानतमेव प्रवेदनप्रकारं प्रवेदयति। एवं इति। प्रदर्शितेन प्रकारेण भगवंतं प्रति विज्ञापनं कृत्वा शोकमोहाभ्यां परिभूतमानसः सन्नर्जुनः संख्ये युद्धमध्ये शरेण सहितं गांडीवं त्यक्त्वा न योत्स्येहमिति ब्रुवन्मध्ये रथस्य संन्यासमेव श्रेयस्करं मत्वोपविष्टवानित्यर्थः॥४७॥ इति श्री भगवद्गीताटीकायां प्रथमोऽध्यायः॥१॥

अहिंसापरमो धर्मो भिक्षाशनंचेत्येवंलक्षणयाबुद्ध्यायुद्धवैमुख्यमर्जुनस्यश्रुत्वास्वपुत्राणांराज्यैश्वर्यमप्रचलितमवधार्यसुस्थ
हृदयंधृतराष्ट्रं दृष्ट्वातस्यदुराशामपनेष्यामीतिमनीषयासंजयस्तंप्रत्युक्तवानित्याह संजयउवाचेति॥परमेश्वरेणस्मार्यमाणो पि
कृत्याकृत्येसहसानार्जुनःसस्मारविपर्ययप्रयुक्तस्यशोकस्यदृढतरमोहहेतुत्वात्तथापिभगवान्नोपेक्षितवानित्याह॥तंतथे
ति॥तंप्रकृतंपार्थंतथास्वजनमरणप्रसंगदर्शनेनकृपयाकरुणयाविष्टमधिष्ठितमश्रुभिः पूर्णेसमाकुलेईक्षणेयस्यतमश्रु

संजयउवाच॥ तंतथाकृपयाविष्टमश्रुपूर्णाकुलेक्षणं॥ विषीदंतमिदंवाक्यमुवाचमधुसू
दनः॥१॥ श्रीभगवानुवाच॥ ॥कुतस्त्वाकश्मलमिदंविषमेसमुपस्थितं॥ अनार्य
जुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन॥२॥

व्याप्ततरलाक्षंविषीदंतंशोचंतमिदंवक्ष्यमाणंवाक्यंसोपपत्तिकंवचनंमधुनामानमसुरंसूदितवानितिमधुसूदनोभगवा
नुक्तवान्नतुयथोक्तमर्जुनमुपेक्षितवानित्यर्थः॥१॥ किंतद्वाक्यं इत्यपेक्षायामाह॥श्रीभगवानिति॥कुतोहेतोस्त्वात्वांसर्वक्षत्रियप्रव
रंकश्मलंमलिनंशिष्टगर्हितंयुद्धात्पराङ्मुखत्वंविषमेसभयेस्थानेसमुपस्थितंप्राप्तंअनार्यैःशास्त्रार्थमविद्वद्भिर्जुष्टंसेवितं
अस्वर्ग्यंस्वर्गानर्हंप्रत्यवायकारणमिहचाकीर्त्तिकरमयशस्यमर्जुननाम्नाप्रख्यातस्यतवनैतद्युक्तमित्यर्थः॥२॥ ॥

पुनरपि भगवानर्जुनं प्रत्याह क्लैब्यमिति क्लैब्यं क्लीबभावमधैर्यं मास्मगमः मागाः पार्थ पृथातनय न हि त्वयि महेश्वरेणापि कृ
ताहवे प्रख्यातपौरुषे महामहिमन्येतदुपपद्यते क्षुद्रं क्षुद्रत्वकारणं हृदयदौर्बल्यं मनसो दुर्बलत्वमधैर्यं त्यक्त्वोत्तिष्ठ युद्धायोपक्रमं
कुरु परंतप परं शत्रुं तापयतीति तथा संबोध्यते ३ एवं भगवता प्रतिबोध्यमानोऽपि शोकाभिभूतचेतस्त्वादप्रतिबुद्ध्यमानः सन्नर्जु
नः स्वाभिप्रायमेव प्रकृतं भगवंतं प्रत्युक्त्वा निस्याह कथमित्यादिना भीष्मं पितामहं द्रोणं चाचार्यं संख्ये रणे हे मधुसूदन इषु
भिः यत्र वाचापि योत्स्यामि इति वक्तुमनुचितं तत्र कथं बाणैर्योत्स्यामीति भावः सायकैस्तौ कथं प्रतियोत्स्यामि योत्स्ये तौ हि
पूजार्हौ कुसुमादिभिरर्चनयोग्यौ सर्वानेवारीन्सूदितवानिति भगवानेव संबोध्यते ४ एवं धर्म्येऽपि युद्धे गुर्वादिवधे हेतुमात्र

क्लैब्यं मास्मगमः पार्थ नैतत्त्वय्युपपद्यते क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ३ ॥ अर्जुन उवाच ॥ कथं भीष्ममहं संख्ये
द्रोणं च मधुसूदन ॥ इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ४ ॥ गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपी
हलोके ॥ हत्वार्थकामांस्तु गुरूनिहैव भुंजीय भोगान्रुधिरप्रदिग्धान् ५ ॥ श्रीरामचंद्राय नमः ॥ ॥

फलत्वं गृहीत्वा पापमारोप्य ब्रूते ॥ गुरूनिति गुरून् भीष्मद्रोणादीन् भ्रात्रादींश्चात्र प्राप्तान हिंसित्वा महानुभावान्महामाहात्म्यान्
श्रुताध्ययनसंपन्नान् श्रेयः प्रशस्यतरं युक्तं भोक्तुमभ्यवहर्तुं भैक्ष्यं भिक्षाणां समूहं भिक्षाशनं नृपादीनां निषिद्धम
पि इह लोके व्यवहारभूमौ न हि गुर्वादिहिंसया राज्यभोगोऽपेक्ष्यते किं च हत्वा गुर्वादीनर्थकामानेव भुंजीय न मोक्ष
मनुभवेयं इहैव च भोगो न स्वर्गे अर्थकामानेव विशिनष्टि ॥ भोगानिति ॥ भुज्यंत इति भोगास्तान्रुधिरप्रदिग्धान् लोहि
तलिप्तानिवात्यंतगर्हितानतो भोगान्गुरुवधादिसाध्यान्परित्यज्य भिक्षाशनमेव युक्तमित्यर्थः ५ ॥ ॥

क्षत्रियाणां स्वधर्मत्वाद्युद्धमेव श्रेयस्करमित्याशंक्याह न चैतदिति। एतदपि न जानीमो भैक्ष्ययुद्धयोः कतरन्नोऽस्माकं गरीयः श्रेष्ठं किं भैक्षं हिंसाशून्यत्वादुत युद्धं स्ववृत्तित्वादिति संदिग्धा च जयस्थितिः किं साम्यमेवोभयेषां यद्वा वयं जयेम हि यदि वा नोऽस्मान् धार्त्तराष्ट्रा दुर्योधनादयो जयेयुः जातोऽपि जयो न फलवान्। यतो यानेव बंधून्हत्वा न जिजीविषामो जीवितुं नेच्छामस्त एवावस्थिताः प्रमुखे संमुखे धार्त्तराष्ट्रा धृतराष्ट्रस्यापत्यानि तस्मादुभैक्ष्यान्न युद्धस्य श्रेष्ठत्वं न सिद्धमित्यर्थः। ६। समधिगतसंसारदोषजातस्याति तरां निर्विण्णस्य मुमुक्षोरुपपन्नस्यात्मोपदेशग्रहणेऽधिकारं सूचयति कार्पण्येति। यो स्वल्पामपि स्वक्षतिं न क्षमते स

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः॥ यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्त्तराष्ट्राः॥ ६॥ कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः॥ यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नं॥ ७॥ ॥

कृपणस्तद्विधत्वादखिलोऽनात्मविद्प्राप्तपरमपुरुषार्थतया कृपणो भवति। यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेस्तस्य भावः कार्पण्यं दैन्यं तेन दोषेणोपहतो दूषितः स्वभावश्चित्तमस्येति विग्रहः सोऽहं पृच्छाम्यनुयुंजे त्वां धर्मसंमूढचेताः धर्मो धारयतीति परं ब्रह्म तस्मिन्संमूढमविवेकतां गतं चेतो यस्य ममेति तथाहमुक्तः किं पृच्छसि यन्निश्चितमैकांतिकमनापेक्षिकं श्रेयः स्यात् रोगनिवृत्तिवदनैकांतिकमनात्यंतिकं स्वर्गवदापेक्षिकं वा तत्त्विः श्रेयसं मे मह्यं ब्रूहि नापुत्रशिष्यायेति निषेधान्न प्रवक्तव्यमिति मा मंस्थाः यतः शिष्यस्तेऽहं भवामि शाध्यनुशाधि मां निःश्रेयसं त्वामहं प्रप

कुतो निःश्रेयसमेवेच्छसित्याह ॥ नहीति ॥ यस्मान्न पश्यामि किं न प्रपश्यसि ममापनुद्याद्पनयेद्यच्छोकमुच्छोषणं प्रतपनमिंद्रियाणां तन्न पश्यामि ॥ ननु शत्रून्निहत्य राज्ये प्राप्ते शोकनिवृत्तिस्ते भविष्यतिनेत्याह ॥ अवाप्येति ॥ अविद्यमानः सपत्नः शत्रुर्यस्य तदृद्धं राज्यं राज्ञः कर्म प्रजारक्षणं प्रशासनादि तदिदमस्यां भूमाववाप्यापि शोकापनयकारणं न पश्यामीत्यर्थः ॥ तर्हि देवेंद्रादिप्राप्त्या शोकापनयस्ते भविष्यतिनेत्याह ॥ सुराणामपीति ॥ तेषामाधिपत्यमधिपतित्वं स्वाम्यमिंद्रत्वं ब्रह्मत्वं तदवाप्यापि मम शोको नापगच्छतीत्यर्थः ॥ एवमर्जुनेन स्वाभिप्रायं भगवंतं प्रति प्रकाशितं संजयो राजानमावेदितवानित्याह ॥ संजय इति ॥ एवं प्रागुक्तप्रकारेण भगवंतं प्रत्युक्त्वा परंतपोऽर्जुनो न योत्स्येन प्रहरिष्ये अत्यंतासह्यशोकप्रसंगादिति गोविंदमुक्त्वा तूष्णीमब्रुवन्नवभूव किलेत्यर्थः ॥९॥ तमर्जुनं सेनयोर्वाहिन्योरुभयोर्मध्ये विषीदंतं विषादं कुर्वंतमतिदुःखितं शोकमोहाभ्यां अभिभूतं स्वधर्मात्प्रच्युतप्रायं प्रतीत्य प्रहसन्निवोपहासं कुर्वन्निव तदाश्वासार्थं भरतान्वये त्वेवं संबोध्य भगवानिदं दृष्टोत्तरं निःश्रेयसंऽधिगमसाधनं वचनमूचिवानित्याह ॥ तमुवाचेति ॥१०॥

॥ नहि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणां ॥ अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यं ॥८॥ संजय उवाच ॥ एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः ॥ न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह ॥९॥ तमुवाच हृषीकेशः प्रहसन्निव भारत ॥ सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः ॥१०॥

तदेव वचनमुदाहरति ॥ भगवानिति ॥ अतीतसंदर्भस्येयमर्थौ विवक्षितातस्मिन्नेव वाक्यविभागमवगमयति ॥ दृष्ट्वा त्विति ॥ धर्मक्षेत्रे कुरुक्षेत्र इत्यादिराद्यश्लोकस्तावदेकं वाक्यं शास्त्रस्य कथासंबंधपरत्वेन पर्यवसानात् ॥ दृष्ट्वेत्यारभ्य यावत्तूष्णीं बभूव हेति तावच्चैकं वाक्यं इत ॥ आरभ्येदं वचः इत्यंतो ग्रंथो भवत्यपरं वाक्यमिति विभागः ॥ नन्वाद्यश्लोकस्य युक्तमेकवाक्यत्वं प्रकृतशास्त्रस्य महाभारते अवतारावद्योतित्वात् दंतिमस्यापि संभवत्येकवाक्यत्वं अर्जुनाश्वासार्थतया प्रवृत्तत्वान्मध्यमस्य तु कथमेकवाक्यत्वमित्याशंक्यार्थैकत्वादित्याह ॥ प्राणिनामिति ॥ शोको मानसस्तापो मोहो विवेकाभावः आदिशब्दस्तदवांतरभेदार्थः स एव संसारस्य दुःखात्मनो बीजभूतो दोषस्तस्योद्भवे कारणमहंकारो ममकारस्तद्धेतुरविद्या च तत्प्रदर्शनार्थत्वेनेति योजना ॥

नार्थ

दृष्ट्वा तु पांडवानीकमित्यारभ्य यावन्न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव हेत्येतदंतः प्राणिनां शोकमोहादिसंसारबीजभूतदोषोद्भवकारणहेतुप्रदर्शनत्वेन व्याख्येयो ग्रंथः तथाह्यर्जुनेन राज्यगुरुपुत्रमित्रसुहृत्स्वजनसंबंधिबांधवेषु अहमेषां ममैत इत्येवं प्रत्ययनिमित्तस्नेहविच्छेदादिनिमित्तौ आत्मनः शोकमोहौ प्रदर्शितौ कथं भीष्ममहं संख्य इत्यादिना ॥

संगृहीतमर्थं विवृणोति ॥ तथाहीति ॥ राज्यं राज्ञः कर्म परिपालनादि पूजार्हा गुरवो भीष्मद्रोणादयः पुत्राः स्वयमुत्पादिताः सौभद्रादयः संबंधांतरमंतरेण स्नेहगोचरा गुरुपुत्रप्रभृतयो मित्रशब्देनोच्यंते ॥ उपकारनिरपेक्षतया स्वयमुपकारिणो हृदयानुरागभाजो भगवत्प्रमुखाः सुहृदः स्वजना ज्ञातयो दुर्योधनादयः ॥ संबंधिनः श्वशुरश्यालप्रभृतयो द्रुपदधृष्टद्युम्नप्रभृतयः परंपरया पितृपितामहादिष्वनुरागभाजो राजानो बांधवास्तेषु यथोक्तं प्रत्ययं निमित्तीकृत्य यः स्नेहो यश्चैतैः सह विच्छेदो यत्तेषामुपघाते पातकं या च लोकगर्हा सर्वं निमित्तं ययोरात्मनः शोकमोहयोस्तावनेन संसारबीजभूतौ कथमित्या

कथंपुनरनयोः संसारबीजयोरर्जुने संभावनोपपद्यते। नहिप्रथितमहामहिम्नो विवेकज्ञानवतः स्वधर्मे प्रवृत्तस्य शोकमो
हावनर्थहेतू संभावितौ विद्याशंक्य विवेकतिरस्कारेण तयोर्विहिताकरणप्रतिषिद्धाचरणकारणत्वादनर्थाधायकयोर
स्तिसंभावनेत्याह। शोकमोहाभ्यामिति। भिक्षया जीवनं प्राणधारणमादिशब्दादशेषकर्मसंन्यासलक्षणं पारिव्राज्य
मात्माभिध्यानमित्यादिगृह्यते। किंचअर्जुने दृश्यमानौ शोकमोहौ संसारबीजं शोकमोहत्वादस्मदादिनिष्ठशोक

शोकमोहाभ्यां ह्यभिभूतविवेकविज्ञानः स्वयमेव क्षात्रधर्मे युद्धे प्रवृत्तोपि तस्माद्युद्धादुपरराम परधर्मं च भिक्षा
जीवनादिकं कर्तुं प्रवृत्तः। तथा च सर्वप्राणिनां शोकमोहादिदोषाविष्टचेतसां स्वभावत एव स्वधर्मपरित्यागः प्र
तिषिद्धसेवा च स्यात्। स्वधर्मे प्रवृत्तानामपि तेषां वाङ्मनःकायादीनां प्रवृत्तिः फलाभिसंधिपूर्विकैव साहंकारा च
भवति॥

मोहवदिति। उपलब्धौ शोकमोहौ प्रत्येकं पक्षीकृत्यानुमातव्यमित्याह। तथाचेति। मोहादीत्यादिशब्देन मिथ्याभिमा
नस्नेहगर्हादियोगृह्यंते। स्वभावतश्चित्तदोषसामर्थ्यादित्यर्थः। अस्मदादीनामपि स्वधर्मे प्रवृत्तानां विहिताकरणाद्य
भावान्नशोकादेः संसारबीजतेति दृष्टांतस्य साध्यविकलतेति चेत्तत्राह। स्वधर्मइति। कायादीनामित्यादिशब्दादवशि
ष्टानींद्रियाण्यादीयंते फलाभिसंधिस्तद्विषयाभिलाषः कर्तृत्वभोक्तृत्वाभिमानोऽहंकारः॥

प्रागुक्तप्रकारेण रागादिव्यापारे सति किं सिद्ध्यतीति तत्राह तत्रेति ॥ शुभकर्मानुष्ठानेन धर्मोपचयादिष्टं देवादिजन्म ततः सुखप्राप्तिः ॥ अशुभकर्मानुष्ठानेनाधर्मोपचयादनिष्टं तिर्यगादिजन्म ततो दुःखप्राप्तिः व्यामिश्रकर्मानुष्ठानादुभाभ्यां धर्माधर्माभ्यां मनुष्यजन्म ततो सुखदुःखे संभवतः ॥ एवमात्मकः संसारः संततो वर्त्तत इत्यर्थः ॥ अर्जुनस्यान्येषां च शोकमोहयोः संसारबीजत्वमुपपादितमुपसंहरति ॥ इत्यत इति ॥ तदेवं प्रथमाध्यायस्य द्वितीयाध्यायैकदेशसहितस्यात्मज्ञाननिर्वर्त्तनी

॥ तत्रैवं सति धर्माधर्मोपचयादिष्टानिष्टजन्मसुखदुःखप्राप्तिलक्षणः संसारोनुपरतो भवतीति ॥ अतः संसारबीजभूतौ शोकमोहौ तयोश्च सर्वसंन्यासात्मज्ञानान्नान्यतो निवृत्तिरिति ॥ तदुपदिदिक्षुः सर्वलोकानुग्रहार्थमर्जुनं निमित्तीकृत्याह भगवान्वासुदेवोऽशोच्यानित्यादि ॥ ॥

यशोकमोहाख्यसंसारबीजप्रदर्शनपरत्वं दर्शयित्वा वक्ष्यमाणसंदर्भस्य सहेतुसंसारनिवर्त्तकसम्यग्ज्ञानोपन्यासे तात्पर्यं दर्शयति ॥ तयोश्चेति ॥ तद्यथोक्तं ज्ञानमुपदिदिक्षुरुपदेष्टुमिच्छन् भगवानाहेति संबंधः ॥ सर्वलोकानुग्रहार्थं यथोक्तं ज्ञानं भगवानुपदिदिक्षतीति ॥ अयुक्तमर्जुनं प्रत्येवोपदेशादित्याशंक्याह ॥ अर्जुनमिति ॥ नहि तस्यामवस्थायामर्जुनस्य भगवता यथोक्तं ज्ञानमुपदेष्टुमिष्टं किंतु स्वधर्मानुष्ठानाद्बुद्धिशुद्ध्युत्तरकालमित्यभिप्रेत्योक्तं निमित्तीकृत्येति ॥ ॥

॥गीताभाष्य॥
॥१७॥

सर्वकर्मसंन्यासपूर्वकादात्मज्ञानादेवकेवलात्कैवल्यप्राप्तिरितिगीताशास्त्रार्थःस्वाभिप्रेतोव्याख्यातःसंप्रति वृत्तिकृताम
भिमतंनिरसितुमनुवदति तत्रेति निर्द्धारितःशास्त्रार्थःसतिसप्तम्यापरामृश्यते तेषामुक्तिमेवविवृण्वन्नाहैसैद्धांतिकमप्यु
पगमंप्रस्तादिशति सर्वकर्मेति वैदिकेनकर्मणासमुच्चयंव्युदसितुंमात्रपदंस्मार्त्तेनकर्मणासमुच्चयंनिरसितुमवधारणं अ
भ्याससंबंधंधुनीते केवलादिति नैवेत्येवकारःसंबध्यते केनतर्हिप्रकारेणज्ञानंकैवल्यप्राप्तिकारणमित्याशंक्याह किं
तर्हीति किंतत्रप्रमापकमित्याशंक्य इदमेवशास्त्रमित्याह इतिसर्वास्विति यथाप्रयाजानुयाजोपकृतदर्शपूर्णमासादि

तत्रकेचिदाहुःसर्वकर्मसंन्यासपूर्वकादात्मज्ञाननिष्ठामात्रादेवकेवलात्कैवल्यंनप्राप्यतएवकिंतर्हिअग्निहोत्रा
दिश्रौतस्मार्त्तकर्मसहितज्ञानात्कैवल्यप्राप्तिरिति सर्वासुगीतासुनिश्चितोर्थइति ज्ञापकंचाहुरस्यार्थस्याथचे
त्वमिमंधर्म्यंसंग्रामंनकरिष्यसिकर्मण्येवाधिकारस्तेकुरुकर्मैवतस्मात्त्वमित्यादि ॥

स्वर्गसाधनंतथाश्रौतस्मार्त्तकर्मोपकृतमेवब्रह्मज्ञानंकैवल्यंसाधयति विमतंसेतिकर्त्तव्यताकमेवस्वफलसाधकंकर
णत्वाद्दर्शपूर्णमासादिवत्तदेवंज्ञानकर्मसमुच्चयपरंशास्त्रमित्यर्थः इतिपदमाहुरित्यनेनपूर्वेणसंबध्यते पौर्वापर्यालोच
नायांशास्त्रस्यसमुच्चयपरत्वंननिर्द्धारितमित्याशंक्याह ज्ञापकंचेति नकेवलज्ञानंमुक्तिहेतुरपितुसमुच्चितमित्यस्या
र्थस्यस्वधर्माननुष्ठानेपापप्राप्तिवचनसामर्थ्यलक्षणंलिंगंगमकमित्यर्थः शास्त्रस्यसमुच्चयपरत्वेलिंगवद्वाक्यमपि
प्रमाणमित्याह कर्मण्येवेति तत्रैववाक्यांतरमुदाहरति कुरुकर्मैवेति ॥

आनंदगीरि
अ०२

॥शिव॥
॥१७॥

ननु न हिंस्यात्सर्वभूतानीत्यादिना प्रतिषिद्धत्वेन हिंसादेरनर्थहेतुत्वावगमात्तदुपेतं वैदिकं कर्माधर्मायेति नानुष्ठातुं शक्यते तथा च
तस्य मोक्षे ज्ञानेन समुच्चयो न सिध्यतीति सांख्यमतमाशंक्य परिहरति हिंसादीति आदिशब्दादुच्छिष्टभक्षणं गृह्यते यथोक्ताशं
कानकर्त्तव्येत्यत्राकांक्षापूर्वकं हेतुमाह कथमित्यादिना स्वशब्देन क्षत्रिया विवक्ष्यंते युद्धाकरणे क्षत्रियस्य प्रत्यवायश्रव
णात्तस्य तं प्रति नित्यत्वेनावश्यकर्त्तव्यत्वप्रतीतेर्गुर्वादिहिंसायुक्तमतिक्रूरमपि कर्मनाधर्मायेति हेत्वंतरमाह तदकर
णे चेति आचार्य्यादिहिंसायुक्तमतिक्रूरमपि युद्धं नाधर्मायेति ब्रुवता भगवता श्रौतानां हिंसायुक्तानामपि कर्मणां दूरतो ना

हिंसादियुक्तत्वाद्वैदिकं कर्म अधर्मायेतीद्यमप्याशंका न कार्या कथं क्षात्रं कर्म युद्धलक्षणं गुरुभ्रातृपु
त्रादिहिंसालक्षणं अत्यंतक्रूरमपि स्वधर्म इत्युक्त्वा नाधर्माय तदकरणे च ततः स्वधर्मं कीर्त्तिं च हित्वा
पापमवाप्स्यसि इति ब्रुवता नारायणेन यावत्जीवश्रुतिचोदितानां स्वकर्मणां पश्वादिहिंसालक्षणानां
च कर्मणां प्रागेव नाधर्मत्वमिति सुनिश्चितमुक्तं भवतीति तदसत्

धर्मत्वमिति स्पष्टमुपदिष्टं भवति सामान्यशास्त्रस्य व्यर्थहिंसानिषेधार्थत्वात्क्रतुविधिनोदितहिंसायास्तदविषयत्वात्कु
तो वैदिककर्मानुष्ठानानुपपत्तिरित्यर्थः ज्ञानकर्मसमुच्चयात्कैवल्यसिद्धिरित्युपसंहर्त्तुमितिशब्द इत्यर्थः यत्तावद्ब्रह्मज्ञानं
सेतिकर्त्तव्यताकं स्वफलसाधकं करणत्वादिति दूषयति तदसदिति न हि शुक्तिकादिज्ञानमज्ञाननिवृत्तौ स्वफले सहका
रि किंचिदपेक्षते तथा च व्यभिचारादसाधकं करणत्वमित्यर्थः

यत्तु गीताशास्त्रे समुच्चयस्यैव प्रतिपाद्यते इति प्रतिज्ञातं तदपि विभागवचनविरुद्धमित्याह ज्ञानेति सांख्यबुद्धिर्योगबुद्धिश्चेति बुद्धिद्वयं
तत्र सांख्यबुद्ध्याश्रयां ज्ञाननिष्ठां व्याख्यातुं सांख्यशब्दार्थमाह अशोच्यानित्यादिनेति अशोच्यानित्याद्यावेक्ष्येत्येतदंतं वाक्यं यावता भ
विष्यतीतावता ग्रंथेन यत्परमार्थभूतात्मतत्त्वं भगवता निरूपितं तद्यथा सम्यक्ख्यायते प्रकाश्यते सा वैदिकी सम्यग्बुद्धिः संख्या तया प्र
काश्यत्वेन संबंधि प्रकृतं तत्त्वं सांख्यमित्यर्थः सांख्यशब्दार्थमुक्त्वा तत्प्रकाशिकां बुद्धिं तद्वतश्च सांख्याननुव्याकरोति तद्विषयेति त
द्विषया बुद्धिः सांख्यबुद्धिरिति संबंधः तामेव प्रकटयति आत्मन इति न जायते म्रियते वेत्यादिप्रकरणार्थनिरूपणद्वारेणात्मनः षड्भा

ज्ञानकर्मनिष्ठयोर्विभागवचनाद्बुद्धिद्वयाश्रययोरशोच्यानित्यादिना ग्रंथेन भगवता यावत्स्वधर्ममपि चावे
क्ष्येत्येतदंतेन ग्रंथेन यत्परमार्थात्मतत्त्वनिरूपणं कृतं तत्सांख्यं तद्विषया बुद्धिः आत्मनो जन्मादिविक्रियाऽ
भावात् अकर्तात्मेति प्रकरणार्थनिरूपणात् या जायते सा सांख्यबुद्धिः सा येषां ज्ञानिनामुचिता भवतीति ते
सांख्याः एतस्या बुद्धेर्जन्मनः प्रागात्मनो देहादिव्यतिरिक्तत्वकर्तृत्वभोक्तृत्वाद्यपेक्षो धर्माधर्मविवेकपू
र्वको मोक्षसाधनानुष्ठाननिरूपणलक्षणो योगः॥

वविक्रियाऽसंभवात्कूटस्थोऽसाविति या बुद्धिरुत्पद्यते सा सांख्यबुद्धिस्तत्पराः संन्यासिनः सांख्या इत्यर्थः संप्रति योगबुद्ध्याश्रयां कर्मनि
ष्ठां व्याख्यातुकामो योगशब्दार्थमाह एतस्या इति यथोक्तबुद्ध्युत्पत्तौ विरोधादेवानुष्ठानायोगात्तस्यास्तन्निवर्तकत्वात्पूर्वमेव तदुत्प
त्तेरात्मनो देहादिव्यतिरिक्तत्वाद्यपेक्षोऽधर्मादिर्मे निकृष्यते नेश्वराराधनरूपेण कर्मणा पुरुषो मोक्षाय युज्यते योऽन्यः संपद्यते
तेन मोक्षसिद्धये परंपरया साधनीभूतप्रागुक्तधर्मानुष्ठानात्मको योग इत्यर्थः॥

अथ योगे बुद्धिं विभजन्योगिनो विभजते तद्विषयेति उक्ते बुद्धिद्वये भगवतोऽभिमतिं दर्शयति तथा चेति सांख्यबुद्ध्याश्रया
ज्ञाननिष्ठेत्येतदपि भगवतः संमतमित्याह तयोश्चेति ज्ञानमेव योगः ज्ञानयोगस्तेन हि ब्रह्मणा युज्यते तादात्म्यमापद्यते तेन सं
न्यासिनां निष्ठा निश्चयेन स्थितिस्तात्पर्येण परिसमाप्तिस्तां कर्मनिष्ठातो व्यतिरिक्तां निष्ठयोर्मध्ये निष्कृष्य भगवान्वक्ष्यती
तियोजना लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ज्ञानयोगेन सांख्यानामित्येतद्वाक्यमुक्तार्थविषयमर्थतोनुवद
ति पुरेति योगबुद्ध्याश्रया कर्मनिष्ठेत्यत्रापि भगवदनुमतिमावेदयति तथा चेति कर्मैव योगः कर्मयोगस्तेन हि बुद्धिशुद्धिद्वा

तद्विषया बुद्धिर्योगबुद्धिः सा येषां कर्मिणां उचिता भवति ते योगिनः तथा च भगवता विविक्ते द्वे बुद्धी निर्दिष्टे एषा ते
भिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु इति तयोश्च सांख्यबुद्ध्याश्रयां ज्ञानयोगेन निष्ठां सांख्यानां विभक्तां वक्ष्यति पु
रा वेदात्मना मया प्रोक्ता ज्ञानयोगेन सांख्यानां इति तथा च योगबुद्ध्याश्रयां कर्मयोगेन निष्ठां विभक्तां च वक्ष्यति क
र्मयोगेन योगिनामित्येवं सांख्ये बुद्धिं योगे बुद्धिं चाश्रित्य द्वे निष्ठे विभक्ते भगवतैवोक्ते ज्ञानकर्मणोः कर्तृत्वाकर्तृत्वा
नेकत्वैकत्वबुद्ध्याश्रययोरेकपुरुषाश्रयत्वासंभवं पश्यता ॥

रा मोक्षहेतु ज्ञानाय पुमान्युज्यते तेन निष्ठां कर्मिणां ज्ञाननिष्ठातो विलक्षणां कर्मयोगेनेत्यादिना वक्ष्यति भगवानिति योज
ना निष्ठाद्वयं बुद्धिद्वयाश्रयं भगवता विभज्योक्तमुपसंहरति एवमिति कया पुनरनुपपत्त्या भगवता निष्ठाद्वयं विभज्यो
क्तमित्याशंक्याह ज्ञानकर्मणोरिति कर्म हि कर्तृत्वाद्यनेकत्वबुद्ध्याश्रयं ज्ञानं पुनरकर्तृत्वैकत्वबुद्ध्याश्रयं तदुभयमित्यंवि
रुद्धसाधनसाध्यत्वान्नैकावस्थस्यैव पुरुषस्य संभवत्यतो युक्तमेव भगवतो विभागवचनमित्यर्थः ॥

गीताभाष्य॰
लोकत्रयरूपे
॥१९॥

भगवदुक्तविभागवचनस्य मूलत्वेन श्रुतिमुदाहरति ॥ यथेति ॥ तत्र ज्ञाननिष्ठाविषयं वाक्यं पठति ॥ एतमेवेति ॥ प्रकृतमात्मानं नित्यज्ञ
प्तिस्वभावं वेदितुमिच्छंतस्त्रिविधेपि कर्मफले वैतृष्ण्यभाजः सर्वाणि कर्माणि परित्यज्य ज्ञाननिष्ठा भवंतीति पंचमलकारस्वीका
रेण संन्यासविधिं विवक्षितत्वात्तस्यैव विधेः शेषेणार्थवादेन किं प्रजयेत्यादिना मोक्षफलं ज्ञानमुक्तमित्यर्थः ॥ ननु फलभावा
त्प्रजाऽऽक्षेपो नोपपद्यते ॥ पुत्रेणैतल्लोकजयस्य वाक्यांतरसिद्धत्वादित्याशंक्याविदुषां प्रजासाध्यमनुष्यलोकस्यात्मव्यतिरेकेणा

यथैतद्विभागवचनं तथैव दर्शितं शातपथीये ब्राह्मणे ॥ एतमेव प्रव्राजिनो लोकमिच्छंतो ब्राह्मणाः प्रव्रजंतीति सर्वक
र्मसंन्यासं विधाय तत्शेषेण किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति ॥ तत्रैव च प्राग्दारपरिग्रहात्पुरुष
आत्मा प्राकृतो धर्मजिज्ञासोत्तरकालं लोकत्रयसाधनं पुत्रं द्विप्रकारं च वित्तं ॥ ॥

भावादात्मनश्चासाध्यत्वादाक्षेपो युक्तिमानिति विवक्षित्वाह ॥ येषामिति ॥ इति ज्ञानं दर्शितमिति शेषः ॥ तस्मिन्नेव ब्राह्मणे क
र्मनिष्ठाविषयं वाक्यं दर्शयति ॥ तत्रैव चेति ॥ प्राकृतत्वमतत्त्वदर्शित्वेनात्मत्वं स च ब्रह्मचारी सन् गुरुसमीपे यथाविधि वेदमधी
त्यात्म ज्ञानार्थं धर्मजिज्ञासां कृत्वा तदुत्तरकालं लोकत्रयप्राप्तिसाधनं पुत्रादित्रयं सोऽकामयत जाया मे स्यादित्यादिना
कामितवानिति श्रुतमित्यर्थः ॥ वित्तं विभजते ॥ द्विप्रकारमिति ॥

र्थे

आनंदगीरी
॥अ॰२॥

॥शिव॥
॥१९॥

तदेव प्रकारद्वैरूप्यमाह मानुषमिति मानुषंवित्तंव्याचष्टे कर्मरूपमिति तस्यफलपर्यवसायित्वमाह पितृलोकेति दैवंविभजते विद्याचेति तस्यापिफलनिष्ठत्वमाह देवेति कर्मनिष्ठात्वेनोदाहृतश्रुतेस्तात्पर्यमाह अविद्येति अज्ञस्यकामनाविशिष्टस्यैवकर्माणि सोकामयतेत्यादिना दर्शितानीत्यर्थः ज्ञाननिष्ठाविषयत्वेनदर्शितश्रुतेरपितात्पर्यंदर्शयति तेभ्यइति कर्मसुविरक्तस्येवसंन्यासपूर्विकाज्ञाननिष्ठाप्रागुदाहृतश्रुत्यादर्शितेत्यर्थः अवस्थाभेदेनज्ञानकर्मणोर्भिन्नाधिकारत्वस्यश्रुतत्वात्तन्मूलेनभगवतोविभागवचनेनशास्त्रस्यसमुच्चयपरत्वंप्रतिज्ञातमपिबाधितमितिसाधितं किंचसमुच्चयोज्ञानस्यश्रौतेनस्मार्तेन

मानुषंदैवंचतत्रमानुषंवित्तंकर्मरूपंपितृलोकप्राप्तिसाधनंविद्याचदैवंवित्तंदेवलोकप्राप्तिसाधनंसोऽकामयतेत्यविद्याकामवतएवकर्माणिश्रौतादीनिदर्शितानि तेभ्योव्युत्थायप्रव्रजंतीतिव्युत्थानमात्मानमेवलोकमिच्छतोऽकामस्यविहितंतदेतद्विभागवचनमनुपपन्नंस्याद्यदिश्रौतकर्मज्ञानयोः समुच्चयोभिप्रेतःस्याद्भगवतः नचार्जुनस्यप्रश्नउपपन्नोभवतिज्यायसीचेत्कर्मणस्तइत्यादि एकपुरुषानुष्ठेयत्वासंभवंबुद्धिकर्मणोर्भगवतापूर्वमनुक्तं ॥ ॥

नवाकर्मणाविवक्ष्यतेयदिप्रथमस्तत्राह तदेतदिति समुच्चयेऽभिप्रेतेप्रश्नानुपपत्तिंदोषांतरमाह नचेति तामेवानुपपत्तिंप्रकटयति एकपुरुषेति यदिसमुच्चयःशास्त्रार्थोभगवताविवक्षितस्तदाज्ञानकर्मणोरेकेनपुरुषेणानुष्ठेयत्वमेवतेनोक्तमर्जुनेनचश्रुतंतत्कथंतदसंभवमनुक्तमश्रुतंचमिथ्यैवश्रोताभगवत्यारोपयेत् नचतदारोपादृतेकिमितिमांकर्मण्यतिक्रूरेयुद्धलक्षणेनियोजयसीतिप्रश्नोऽवकल्प्यते तथाचप्रश्नालोचनयाप्रष्टुप्रतिवक्त्रोःशास्त्रार्थतयासमुच्चयोऽभिप्रेतोनभवतीतिप्र

भगीताटी ३ ॥

किंच समुच्चयपक्षे कर्मापेक्षया बुद्धेर्ज्यायस्त्वं भगवता पूर्वमनुक्तमर्जुनेन चाश्रुतं कथमसौ तस्मिन्नारोपयितुमर्हतीति ततश्चा
नुवादवचनं श्रोतुरनुचितमित्याह बुद्धेश्चेति इतश्च समुच्चयः शास्त्रार्थो न भवत्यन्यथा पंचमादावर्जुनस्य प्रश्नानुपपत्तेरित्याह किंचे
ति ननु सर्वान्प्रत्युक्तेपि समुच्चये नार्जुनं प्रत्युक्तोसाविति तदीयप्रश्नोपपत्तिरित्याशंक्याह यदीति एतयोः कर्मतत्त्यागयोरि
तियावत् ननु कर्मापेक्षया कर्मत्यागपूर्वकस्य ज्ञानस्य प्राधान्यात्तस्य श्रेयस्त्वात्तद्विषयप्रश्नोपपत्तिरितिचेन्नेत्याह नहीति त

कथमर्जुनोऽश्रुतं बुद्धेश्च कर्मणो ज्यायस्त्वं भगवत्यध्यारोपयेन्मृषैव ज्यायसी चेत्कर्मणस्ते मता बुद्धिरिति
किंच यदि बुद्धिकर्मणोः सर्वेषां समुच्चय उक्तः स्यादर्जुनस्यापि स उक्त एवेति यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनि
श्चितमिति कथमुभयोपदेशे सति अन्यतरविषय एव प्रश्नः स्यात् नहि पित्तप्रशमार्थिनो वैद्येन मधुरं शीतं
च भोक्तव्यमित्युपदिष्टे एतयोरन्यतरत् पित्तप्रशमनकारणं ब्रूहीति प्रश्नः संभवत्यथार्जुनस्य भगवदुक्त
वचनार्थविवेकानवधारणनिमित्तः प्रश्नः कल्प्येत तथापि भगवता प्रश्नानुरूपं प्रतिवचनं देयं मया बुद्धिक
र्मणोः समुच्चय उक्तः किमर्थमित्थं त्वं भ्रांतोसीति

थैवं समुच्चये पुरुषार्थसाधने भगवता दर्शिते सत्यन्यतरगोचरः प्रश्नो न भवतीति शेषः समुच्चये भगवतोक्तेपि तदज्ञानादर्जु
नस्य प्रश्नोपपत्तिरिति शंक्यते अथेति अज्ञाननिमित्तं प्रश्नमंगीकृत्यापि प्रत्याचष्टे तथापीति भगवतो भ्रांत्यभावेन पूर्वा
परानुसंधानसंभवादित्यर्थः प्रश्नानुरूपत्वमेव प्रतिवचनस्य प्रकटयति मयेति

व्यावर्त्यमंशमादर्शयति नत्विति प्रतिवचनस्य प्रश्नाननुरूपत्वमेव स्पष्टयति दृष्टादिति श्रौतेन कर्मणा समुच्चयो ज्ञानस्येति प
क्षं प्रतिक्षिप्य पक्षांतरं प्रतिक्षिपति नापीति स्मृतिस्मृत्योर्ज्ञानकर्मणोर्विभागवचनमादिशब्दगृहीतं बुद्धेर्ज्यायस्त्वं पंचमादौ
प्रश्नो भगवत्प्रतिवचनं सर्वमिदं श्रौतेनेव स्मार्तेनापि कर्मणा बुद्धेः समुच्चये विरुद्धं स्यादित्यर्थः द्वितीयपक्षासंभवे हेत्वंतरमा
ह किंचेति समुच्चयपक्षे प्रश्नप्रतिवचनयोरसंभवान्नेदं गीताशास्त्रं तत्परमित्युपसंहरति तस्मादिति विशुद्धब्रह्मात्मज्ञानं
स्वफलसिद्धौ न सहकारि सापेक्षमज्ञाननिवृत्तिफलत्वाद्रज्ज्वादितत्त्वज्ञानवत् अथवा बंधः सहायानपेक्षेण ज्ञानेन निवर्त्य

नतु पुनः प्रतिवचनमननुरूपं यत्श्रेयः स्यादेवद्विनिष्ठेमया पुरोक्तेइतिवक्तुंयुक्तं नापिस्मार्तेनैव कर्मणा बुद्धेः समुच्चयेऽ
भिप्रेते विभागवचनादि सर्वमुपपन्नं किंच क्षत्रियस्य युद्धंस्मार्तं स्वधर्मंमभिजानतः तत्किं कर्मणि घोरे मां नियोजय
सीत्युपालंभोनुपपन्नस्तस्माद्गीताशास्त्रे ईषन्मात्रेणापि श्रौतेन स्मार्तेन वा कर्मणात्मज्ञानस्य समुच्चयो न केनचिद्द
र्शयितुं शक्यः यस्य त्वज्ञानात्रागादिदोषाद्वा कर्मणि प्रवृत्तस्य यज्ञेन दानेन तपसा वा विशुद्धसत्त्वस्य ज्ञानमुत्प
न्नं

ते अज्ञानात्मकत्वाद्रज्ज्वसर्पवदिति भावः ननु कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहमिति वक्ष्यमा
णत्वात्कथं गीताशास्त्रे समुच्चयो नास्ति तत्राह यस्य त्विति चोदनासूत्रानुसारेण विधिनानुष्ठेयस्य कर्मणो धर्मत्वाद्व्या
पारमात्रस्य तथात्वाभावात्तत्वविदश्च वर्णाश्रमाभिमानशून्यस्याधिकारप्रतिपत्यभावाद्यागादिप्रवृत्तीनामविद्या
लेशतो जायमानानां कर्माभासत्वात् कुर्याद्विद्वानित्यादिवाक्यं न समुच्चयप्रापकमिति भावः वाशब्दश्चार्थे द्वि
यस्तु विविदिषावाक्यस्य साधनांतरसंग्रहार्थः ॥

सांसारिकज्ञानं व्यावर्त्तयति परमार्थेति तदेवाभिनयति एकमिति प्रवृत्तिरूपमितिरूपग्रहणमाभासत्वप्रदर्शनार्थं कर्माभाससमुच्चयस्य याहृच्छिकत्वान्न मोक्षं फलतीति शेषः किंच ज्ञानिनो यागादिप्रवृत्तिर्न ज्ञानेन फले समुच्चीयते फलाभिसंधिविकलप्रवृत्तित्वादहंकारविधुरप्रवृत्तित्वाद्वा भगवत्प्रवृत्तिवदित्याह यथेति हेतुद्वयस्यासिद्धिमाशंक्य परिहरति त

परमार्थतत्त्वविषयमेकमेवेदं सर्वं ब्रह्माकर्तृ चेति तस्य कर्मणि कर्मप्रयोजने च निवृत्तेपि लोकसंग्रहार्थं यत्र पूर्वं यथा प्रवृत्तस्य यत्प्रवृत्तिरूपं दृश्यते न तत्कर्म येन बुद्धेः समुच्चयः स्यात् यथा भगवतो वासुदेवस्य क्षत्रधर्मचेष्टितं न ज्ञानेन समुच्चीयते पुरुषार्थसिद्धये तद्वत्फलाभिसंध्यहंकाराभावस्य तुल्यत्वाद्विदुषः तत्त्वविद्धि नाहं करोमीति मन्यते न च तत्फलमभिसंधत्ते

तु

त्त्वविदिति कूटस्थं ब्रह्मैवाहमिति मन्वानो विद्वान्प्रवृत्तिं तत्फलं वा नैवस्वगतत्वेन पश्यति रूपादिव दृश्यस्य द्रष्टृधर्मत्वायोगात् किंतु कार्यकरणसंघातगतत्वेनैव प्रवृत्त्यादि प्रतिपद्यते अतस्तत्त्वविदो व्याख्यान भिक्षाटनादावहंकारस्य तृष्णादिफलाभिसंधेश्चाभासत्वान्नासिद्धं हेतुद्वयमित्यर्थः

ननु ज्ञानोदयात्त्यागावस्थायामिवोत्तरकालेऽपि प्रतिनियतप्रवृत्त्यादिदर्शनान्न तत्त्वदर्शिनि प्रवृत्त्यादेराभासत्वमिति तत्राह
यथा चेति स्वर्गादिरेव काम्यमानत्वात्कामः तदर्थिनः स्वर्गादिकामस्याग्निहोत्रादेरपेक्षितस्वर्गादिसाधनस्यानुष्ठानार्थम
ग्निमाधाय व्यवस्थितस्य तस्मिन्नेव काम्ये कर्मणि प्रवृत्तस्यार्धकृते केनापि हेतुना कामे विनष्टे तदेवाग्निहोत्रादि निर्व
र्त्यतो न तत्काम्यं भवति नित्यकाम्यविभागस्य स्वाभाविकत्वाभावात् कामोपबंधानुपबंधकृतत्वात् तथा विदुषोऽपि
विध्यधिकाराभावाद्यागादिप्रवृत्तीनां कर्माभासतेत्यर्थः विद्वत्प्रवृत्तीनां कर्माभासत्वमित्यत्र भगवदनुमतिमुपन्य

यथा च स्वर्गादिकामार्थिनो अग्निहोत्रादिकर्म कामसाधनानुष्ठानायाहिताग्नेः काम्य एवाग्निहोत्रादौ प्रवृत्त
स्यासमाप्तीकृते विनष्टेऽपि कामे तदेवाग्निहोत्राद्यनुतिष्ठतोऽपि न तत्काम्यमग्निहोत्रादि अनुष्ठितं भवेत् तथा दर्शयि
ष्यति च भगवान् कुर्वन्नपि न करोति न लिप्यत इति तत्र तत्र यच्च पूर्वैः पूर्वतरं कृतं कर्मणैव हि संसिद्धिमास्थिता जन
कादय इति तत्तु प्रविभज्य विज्ञेयं तत्कथं यदि तावत्पूर्वे जनकादयस्तत्त्वविदोऽपि प्रवृत्तकर्माणः स्युस्ते लोकसं
ग्रहार्थं

स्यति दर्शयिष्यति चेति ननु विद्वद्व्यापारेऽपि कर्मशब्दप्रयोगदर्शनात्तद्व्यापारस्य कर्माभासत्वानुपपत्तेः
समुच्चयसिद्धिरिति तत्राह यच्चेति ज्ञानकर्मणोः समुच्चित्यैव संसिद्धिहेतुत्वे प्रतिपन्ने कुतो विभज्यात्र ज्ञानमिति
पृच्छति तत्कथमिति तत्र किं जनकादयस्तत्त्वविदोऽपि प्रवृत्तकर्माणः स्युराहोस्विदतत्त्वविद इति विकल्प्य प्रथमं प्र
त्याह यदीति तत्त्ववित्त्वे कथं प्रवृत्तकर्मत्वं कर्मणश्चाकिंचित्करत्वादित्याशंक्याह ते लोकेति

तेषामुक्तप्रयोजनार्थमपि न प्रवृत्तिर्युक्ता सर्वत्रोदासीनत्वादित्याशंक्याह गुणा इति इंद्रियाणां विषयेषु प्रवृत्तिद्वारा तत्त्व
विदां प्रवृत्तकर्मत्वेपि ज्ञानेनैव तेषां संसिद्धिरित्याह ज्ञानेनेति उक्तमेवार्थं संक्षिप्य दर्शयति कर्मेति कर्मणेत्यादौ वाधितानुवृ
त्याभासो गृह्यते द्वितीयमनुवदति अथेति तत्र वाक्यार्थं कथयति ईश्वरेति विभज्य विज्ञेयत्वं वाक्यार्थस्योक्तमुपसंहरति
इति व्याख्येयमिति कर्मणां चित्तशुद्धिद्वारा ज्ञानहेतुत्वमित्युक्तेर्थे वाक्यशेषं प्रमाणयति एतमेवेति योगिनः कर्म

गुणा गुणेषु वर्त्तंत इति ज्ञानेनैव संसिद्धिमास्थिताः कर्मसंन्यासे प्राप्तेपि कर्मणा सहैव संसिद्धिमास्थिताः
न कर्मसंन्यासं कृतवंत इत्यर्थः अथ न ते तत्त्वविदः ईश्वरसमर्पितेन कर्मणा साधनभूतेन संसिद्धिं सत्त्वशु
द्धिं ज्ञानोत्पत्तिलक्षणां वा संसिद्धिमास्थिता जनकादय इति व्याख्येयमेतमेवार्थं वक्ष्यति भगवान् सत्त्वशुद्ध
ये कर्म कुर्वंतीति स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इत्युक्त्वा सिद्धिं प्राप्तस्य पुनर्ज्ञाननिष्ठां वक्ष्यति
सिद्धिं प्राप्तो यथा ब्रह्मेत्यादिना तस्माद्गीतासु केवलादेव तत्त्वज्ञानान्मोक्षप्राप्तिर्न कर्मसमुच्चिता
दिति निश्चितोर्थः

कुर्वंतीत्यादिवाक्यमर्थतोनुवदति सत्त्वेति स्वकर्मणेत्यादौ साक्षादेव मोक्षहेतुत्वं कर्मणां वक्ष्यतीत्याशंक्याह स्वक
र्मणेति कर्मानुष्ठानादीश्वरप्रसादद्वारा ज्ञाननिष्ठायोग्यता लभ्यते ततो ज्ञाननिष्ठया मुक्तिस्तेन न साक्षात्कर्मणो मु
क्तिहेतुतेत्यग्रे स्फुटीभविष्यतीत्यर्थः तत्त्वज्ञानोत्तरकालं कर्मासंभवे फलितमुपसंहरति तस्मादिति

ननु यद्यपि गीताशास्त्रं तत्त्वज्ञानप्रधानमेकं वाक्यं तथापि तन्मध्ये श्रूयमाणं कर्मतदंगमंगीकर्त्तव्यं प्रकरणप्रामाण्यादिति समु
च्चयसिद्धिस्तत्राह यथा चेति ॥ अर्थशब्देनात्मज्ञानमेव केवलं कैवल्यहेतुरितिगृह्यते ॥ इत्तिकृतामभिप्रायं प्रत्याख्याय स्वाभि
प्रायः शास्त्रार्थः समर्थितः संप्रति अशोच्यानित्यस्मात्प्राक्तनग्रंथसंदर्भस्य प्रागुक्तं तात्पर्यार्थमनूद्याशोच्यानित्यादेः
स्वधर्ममपि चावेक्ष्येत्येतदंतस्य समुदायस्य तात्पर्यमाह ॥ तत्रेति ॥ अत्र हि शास्त्रे त्रीणि कांडान्यष्टादशसंख्यानामध्याया
नां षट्कत्रितयमुपादाय त्रैविध्यात्तत्र पूर्वषट्कात्मकं पूर्वकांडं त्वंपदार्थं विषयीकरोति मध्यमषट्करूपं मध्यमं कांडं तत्पदा
र्थं गोचरयति ॥ अंतिमषट्कलक्षणमंतिमं कांडं पदार्थयोरैक्यं वाक्यार्थमधिकरोति तत्तज्ज्ञानसाधनानि च तत्र तत्र प्रसंगा

यथा चायमर्थस्तथा प्रकरणशो विभज्य तत्र तत्र प्रदर्शयिष्यामः ॥ तत्र धर्मसंमूढचेतसो म
हति शोकसागरे निमग्नस्यार्जुनस्यान्यत्रात्मज्ञानादुद्धरणमपश्यन् भगवान्वासुदेवस्ततो
ऽर्जुनमुद्दिधारयिषुरात्मज्ञानायावतारयन्नाह ॥ अशोच्यानित्यादि ॥

दुपन्यस्यंते तत्तज्ज्ञानस्य तदधीनत्वात्तत्त्वज्ञानमेव केवलं कैवल्यसाधनमिति च सर्वत्राविगीतमेवं पूर्वोक्तरीत्या शास्त्रा
र्थे परिनिश्चिते सतीति यावत् ॥ धर्मे संमूढं कर्त्तव्याकर्त्तव्यविवेकविकलं चेतो यस्य तस्य मिथ्याज्ञानवतोऽहंकारममकारव
तः शोकाख्यसागरे दुस्तरे प्रविश्य क्लिश्यतो ब्रह्मात्मैक्यलक्षणवाक्यार्थज्ञानमात्मज्ञानं तदतिरेकेणोद्धरणासिद्धेस्तम
तिभक्तमतिस्निग्धं शोकाब्धेरुद्धर्तुमिच्छन् भगवान्यथोक्तज्ञानार्थं तमवतारयन् पदार्थपरिशोधने प्रवर्त्तयन्नादौ त्वंप
दार्थं शोधयितुमशोच्यानित्यादिवाक्यमाहेति योजना ॥

ब्रह्मवेद ब्रह्मैव भवतीत्यत्र ब्रह्मभावकामो ब्रह्मवेदनं कुर्यादिति विधिः परिणम्यत इतिवत् नानुशोचंति पंडिता इत्यत्र शोकाभावकामवतः तत्त्वज्ञानं कृतिसाध्यत्वेन विधीयते तथा च शोकाभावहेतुत्वात् तत्त्वज्ञानं अवश्यं संपादनीयमिति इष्यविधिवाक्यार्थः भगवतोऽभिप्रेतः इति पूर्वतंत्राऽभिप्रायेण शंकते यत्त्विति २८

यस्याज्ञानं तस्य भ्रमो यस्य भ्रमः तस्य पदार्थपरिशोधनपूर्वकं सम्यग्ज्ञानं वाक्यादुदेतीति ज्ञानाधिकारिणमभिप्रेत्याह अशोच्यानिति यत्तु कैश्चिद् आत्मा वा अरे द्रष्टव्य इत्यादावात्मयाथात्म्यदर्शनविधिवाक्यार्थमनेन श्लोकेन व्याचष्टे स्वयं हरिरित्युक्तं तदयुक्तं कृतियोग्यैकार्थसमवेतश्रेयःसाधनतायाः पराभिमतनियोगस्य वा विध्यर्थस्यात्राप्रतीयमानस्य कल्पनाहेत्वभावान्न च दर्शने पुरुषतंत्रत्वरहिते विधेययागादिविलक्षणे विधिरुपपद्यते कृत्यंतर्भूतस्याहार्थत्वात् व्याचष्टे व्यनविधिमधिकरोतीति अभि

न शोच्या अशोच्या भीष्मद्रोणादयः सद्वृत्तत्वात्परमार्थरूपेण च नित्यत्वात् न शोच्याः तान् शो

॥ श्रीभगवानुवाच ॥ अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ॥ श्रीरामायनमः ॥

च्यानन्वनुशोचितवानसि ते म्रियंते मन्निमित्तमहं तैर्विनाभूतः किं करिष्यामि राज्यसुखादिनेति ॥

प्रेत्य व्याचष्टे न शोच्या इति कथं तेषामशोच्यत्वमित्युक्ते भीष्मादिशब्दवाच्यानां वा शोच्यत्वं तत्पदलक्ष्याणां वेति विकल्प्याद्यं दूषयति सद्वृत्तत्वादिति ये भीष्मादिशब्दैरुच्यंते ते श्रुतिस्मृत्युदीरितविगीताचारत्वान्न शोच्यता मर्हंतीत्यर्थः द्वितीयं प्रत्याह परमार्थेति अरजतेरजतबुद्धिवदशोच्येषु शोच्यबुद्ध्या भ्रांतोसीत्याह तानिति अनुशोचनप्रकारमभिनयन् भ्रांतिमेव प्रकटयति ते म्रियंत इति अत्र भार्यादिप्रयुक्तं सुखमादिशब्देन गृह्यते इत्यनुशोचितवानसीति संबंधः ॥

विरुद्धार्थाभिधायित्वेनापि भ्रांतत्वमर्जुनस्य साधयति ॥ त्वं प्रज्ञावतामिति ॥ उत्सन्नकुलधर्माणामित्यादीनि वचनानि ॥ किमेतावता
फलितमिति तदाह ॥ तदेतदिति ॥ तन्मौढ्यमशोच्येषु शोच्यदृष्टित्वं एतत्पांडित्यं बुद्धिमतां वचनभाषित्वमिति यावत् ॥ अर्जुनस्य पूर्वोक्त
भ्रांतिभाक्त्वे निमित्तमात्माऽज्ञानमित्याह ॥ यस्मादिति ॥ ननु सूक्ष्मबुद्धिभाक्त्वमेव पांडित्यं न त्वात्मज्ञानं हेत्वभावादित्याशंक्या

त्वं प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि च भाषसे ॥ तदेतन्मौढ्यं पांडित्यं च विरुद्धमात्मनि दर्शयसि उन्मत्त इवेत्य
भिप्रायः ॥ यस्माद्गतासून् गतप्राणान्मृतान् ॥ अगताऽसून् गतप्राणान् जीवतश्च नानुशोचंति ये आत्मज्ञास्ते हि

गतासूनगतासूंश्च नानुशोचंति पंडिताः ॥ ११ ॥

पंडिताः पांडित्यं निर्विद्येति श्रुतेः ॥ परमार्थतस्तु त्वं नित्यान् अशोच्यान् अनुशोचसि अतो मूढोसीत्येतत् ॥ ११ ॥

ह ॥ आत्मज्ञा इति ॥ पांडित्यं पंडितभावमात्मज्ञानं निर्विद्य निश्चयेन लब्ध्वा बाल्येन तिष्ठासेदिति बृहदारण्यश्रुतिमुक्तार्थो
मुदाहरति ॥ पांडित्यमिति ॥ यथोक्तपांडित्यराहित्यं कथं ममावगतमित्याशंक्य कार्यदर्शनादित्याह ॥ परमार्थतस्त्विति ॥ य
स्मादित्यस्यापेक्षितं दर्शयति ॥ अत इति ॥ ११ ॥

नित्यत्वमशोच्यत्वे कारणमिति सूचितं विवेचयितुं प्रश्नपूर्वकं प्रतिजानीते कुत इत्यादिना। नित्यत्वमसिद्धं प्रमाणाभावादिति चोदयति कथमिति आत्मा न जायते प्रागभावशून्यत्वान्नरविषाणवदिति परिहरति न त्वेवेति किं चात्मा नित्यो भावत्वे सत्यजत्वाद्व्यतिरेकेण घटवदिति अनुमानांतरमाह न चैवेति यत्तु कैश्चिदात्मयाथार्थ्यं जिज्ञासितं भगवानुपदिशति नत्वित्यादिना श्लोकचतुष्टयेनेत्यादि इष्टं तदसद्विशेषवचने हेत्वभावात्सर्वत्रैवात्मयाथार्थ्यप्रतिपादनाविशेषादित्याशयेन। पदच्छेदः पदार्थोक्ति

कुतस्ते अशोच्या यतो नित्याः कथं। न तु एव जातु कदाचिदहं नासं किं त्वा

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।

समेव अतीतेषु देहोत्पत्तिविनाशेषु नित्य एवाहमासमित्यभिप्रायः।

र्विग्रहो वाक्ययोजनेति त्रितयमपि व्याख्यानांगं संपादयति न त्वित्यादिना। ननु आत्मनो देहोत्पत्तिविनाशप्रसिद्धेरुक्तमनुमानद्वयं प्रसिद्धिविरुद्धतया कालात्ययापदिष्टमिति नेत्याह अतीतेष्विति। चराचरव्यपाश्रयस्तु स्यादिति न्याये नात्मनो जननविनाशप्रसिद्धेरौपाधिकजन्मविनाशविषयत्वान्निरुपाधिकस्य तस्य जन्मादिराहित्यमिति भावः॥

यद्यपितवेश्वरस्यजन्मराहित्यंतथापिकथंममेत्याशंक्याह॥ तथेति॥ तथापिभीष्मादीनांकथंजन्माभावस्तत्राह॥ तथानेति॥
द्वितीयमनुमानंप्रपंचयन्नुत्तरार्द्धंव्याचष्टे॥ तथेत्यादिना॥ ननुदेहोत्पत्तिविनाशयोरात्मनोजन्मविनाशभावेपिमहासर्गमहा

तथानत्वंनासीः किंत्वासीरेव तथानेमेजनाधिपाः नासन् किंत्वासन्नेवतथानचनभविष्यामः किंतुभविष्यामएव

नचैवनभविष्यामः सर्वेवयमतःपरं १२॥

सर्वेवयमतोऽस्माद्देहविनाशात्परमुत्तरकालेपित्रिष्वपिकालेषुनित्याआत्मस्वरूपेणेत्यर्थः॥
॥ ॥देहभेदानुवृत्त्याबहुवचनंनात्मभेदाभिप्रायेण ॥१॥

प्रलययोरस्याग्निविस्फुलिंगदृष्टांतश्रुत्याजन्मविनाशवित्याशंक्यनात्माऽश्रुतेरितिन्यायेनपरिहरति॥ त्रिष्विति॥ या
वद्विकारंतुविभागोलोकवदितिन्यायेनभिन्नत्वाद्विकारित्वमात्मनोऽनुमीयतेभिन्नत्वेबहुवचनप्रयोगप्रमाणमित्याशं

गीताटी॰ ॥ २४

ननुपूर्वंदेहंविहायापूर्वंदेहमुपाददानस्यविक्रियावत्वेनोत्पत्तिविनाशवत्वविभ्रमःसमुद्भवेदितिशंक्यते तत्रेति अशोच्य
त्वप्रतिज्ञायांनित्यत्वेहेतुंकृतेसतीतियावत् अवस्थाभेदेसत्यपिवस्तुतोविक्रियाऽभावादात्मनोनित्यत्वमुपपन्नमित्युत्त
रश्लोकेनदृष्टांतावष्टंभेनप्रतिपादयतीत्याह दृष्टांतमिति नकेवलमागमादेवात्मनोनित्यत्वंकिंत्ववस्थांतरव्यभिचारात

तत्रकथमिवनित्यआत्मेतिदृष्टांतमाह देहिनोदेहोस्यास्तीतिदेही तस्यदेहिनोदेहवत आत्मनोऽस्मिन्वर्त्तमाने
देहेयथायेनप्रकारेणकौमारंकुमारभावोबाल्यावस्थायौवनंयूनोभावोमध्यमावस्थाजरावयोहानिर्जीर्णा
वस्थेत्येतास्तिस्रोवस्थाअन्योन्यविलक्षणास्तासांप्रथमावस्थानाशेननाशोद्वितीयावस्थोपजननेनोपजननं

देहिनोऽस्मिन्यथादेहेकौमारंयौवनंजरा॥ तथादेहांतरप्राप्तिर्धीरस्तत्रनमुह्यति॥१३॥श्रीरामाय॰॥

आत्मनःकिंतर्ह्यविक्रियस्यैवएकस्यद्वितीयतृतीयावस्थाप्राप्तिरात्मनोदृष्टा तथातद्वदेवदेहादन्योदेहोदेहांतरं
तस्यप्राप्तिर्देहांतरप्राप्तिरविक्रियस्यैवात्मनइत्यर्थः॥धीरोधीमांस्तत्रैवंसतिनमुह्यति॥नमोहमापद्यते॥१३॥

रेपूर्वसंस्कारानुवृत्तेश्चेत्याह देहिनइति देहित्वंतस्मिन्नहंममाभिमानभाक्त्वंतासामितिनिर्द्धारणेषष्ठीआत्मनःश्रुति
स्मृत्युपपत्तिभिर्नित्यत्वज्ञानंधीमानित्यत्रधीर्विवक्ष्यते एवंसतीति तत्वतोविक्रियाभावान्नित्यत्वेसमधिगतेस

आत्मनः श्रुत्यादिप्रमितेनित्यत्वेतदुत्पत्तिविनाशप्रयुक्तशोकमोहाभावेपिप्रकारांतरेणशोकमोहौस्यातामितिशंकामनूद्यो
त्तरत्वेनश्लोकमवतारयति॥ यदीत्यादिना॥ शीतोष्णयोस्ताभ्यांसुखदुःखयोश्चप्राप्तिंनिमित्तीकृत्ययोमोहादिर्दृश्यते॥ त
स्मादन्वयव्यतिरेकाभ्यांदृश्यमानत्वमाश्रित्यलौकिकविशेषणं॥ अशोच्यानित्यत्रयोविद्याधिकारीसूचितःतस्यतितिक्षुःसमाहि

यद्यप्यात्मनोनाशनिमित्तोमोहोनसंभवतिनित्यआत्मेतिविजानतस्तथापिशीतोष्णसुखदुःखप्राप्तिनिमित्तोमोहो
लौकिकोदृश्यतेसुखवियोगनिमित्तोदुःखसंयोगनिमित्तश्चशोकइत्येतदर्जुनस्यवचनमाशंक्याह॥ मात्राऽऽ

मात्रास्पर्शास्तुकौंतेयशीतोष्णसुखदुःखदाः॥

भिर्मीयंतेशब्दादयइतिमात्राःश्रोत्रादीनींद्रियाणि॥ मात्राणांस्पर्शाःशब्दा
दिभिःसंयोगास्तेशीतोष्णसुखदुःखदाःशीतं॥ उष्णंसुखंदुःखंप्रयच्छंति॥ ॥

तोभूत्वेतिश्रुतेस्तितिक्षुत्वंविशेषणमिहोपदिश्यते॥ व्याख्येयंपदमुपादायकरणव्युत्पत्यातस्येंद्रियविषयत्वंदर्शयति॥ मा
त्राइत्यादिना॥ षष्ठीसमासंदर्शयन्भावव्युत्पत्यास्पर्शशब्दार्थमाह॥ मात्राणामिति॥ तेषामर्थक्रियामादर्शयति॥ शीतंइति॥

संप्रतिशब्दद्वयस्यकर्मव्युत्पत्त्याशब्दादिविषयत्वमुपेत्यसमासांतरंदर्शयन्विषयाणांकार्यंकथयति ॥ अथवेति ॥ ननुशीतोष्णप्रदत्वेसु
खदुःखप्रदत्वस्यसिद्धत्वात् ॥ किमितिशीतोष्णयोःसुखदुःखाभ्यांपृथग्ग्रहणमितितत्राह ॥ शीतमिति ॥ विषयेभ्यस्तत्पृथक्कथनंतदं
तर्भूतयोरेवतयोःसुखदुःखहेत्वोरानुकूल्यप्रातिकूल्ययोरुपलक्षणार्थंअध्यात्मंहिशीतमुष्णंवाअनुकूलंप्रतिकूलंवासंपाद्यवाह्य

अथवास्पृश्यंतइतिस्पर्शाःविषयाःमात्राश्चस्पर्शाश्चशीतोष्णसुखदुःखदाःशीतंकदाचित्सुखंकदाचित्दुःखंतथोष्णम
प्यनियतरूपंसुखदुःखेपुनर्नियतरूपेऽतोनव्यभिचरतोऽतस्ताभ्यांपृथक्शीतोष्णयोर्ग्रहणंयस्मात्तेमात्रास्पर्शादयःआग

आगमापायिनोऽनित्यास्तांस्तितिक्षस्वभारत ॥ १४ ॥

मापायिनःआगमापायशीलास्तस्मादनित्याःअस्थिरस्वरूपत्वात् ॥ अतस्तान्शीतोष्णादीन्
तितिक्षस्वसहस्वतेषुहर्षविषादंचमाकार्षीरित्यर्थः ॥ १४ ॥ ॥

विषयाःसुखादिजनयंति ॥ ननुविषयेंद्रियसंयोगस्यात्मनिसदासत्वात्तत्प्रयुक्तशीतादेरपितथात्वात्तन्निमित्तौहर्षविषादौत
थैवतस्मिन्नापन्नाविसाशंक्योत्तरार्द्धंव्याचष्टे ॥ यस्मादित्यादिना ॥ अत्रचकौंतेयभारतेतिसंबोधनाभ्यामुभयकुलशुद्धस्यैव

विद्याधिकारिमिश्रितस्वधर्मोपतते २४

अधिकारिविशेषणं तितिक्षुत्वं नोपयुक्तं केवलस्य तस्य पुमर्थाहेतुत्वादिति शंकते शीतेति विवेकवैराग्यादिसहितं तन्मो
क्षहेतुत्वानद्वारा तदर्थमिति परिहरति शृण्विति तितिक्षमाणस्य विवक्षितलाभमुपलंभयति यंहीति हर्षविषादरहित

शीतोष्णादीन्सहतः किंस्यादिति शृणु यंहिपुरुषं समदुःखसुखं समेदुःखसुखे यस्य तं समदुःखसुखं दुःखसुंप्राप्तौ
हर्षविषादरहितं धीरं धीमंतं न व्यथयंति न चालयंति नित्यात्मदर्शनादेते यथोक्ताः शीतोष्णसुखदुःखादयः

यं हि न व्यथयंत्येते पुरुषं पुरुषर्षभ समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५ ॥

सनित्यात्मस्वरूपदर्शननिष्ठो द्वंद्वसहिष्णुरमृतत्वाय अमृतभावाय मोक्षायेत्यर्थः कल्यते समर्थो भवति १५

मिसत्त्रशमादिसाधनसंपन्नत्वमुच्यते धीमंतमिति नित्यानित्यविवेकभागित्वमेतच्चोभयं वैराग्यादेरुपलक्षणं नित्या
त्मदर्शनं त्वमर्थज्ञानं साधनचतुष्टयवंतमधिकारिणमनूद्यपदार्थज्ञानवतस्तस्य मोक्षौपयिकवाक्यार्थज्ञाने योग्यता

ख

वस्तुतत्त्वस्य वस्तुनि धर्मतया विद्यमानत्वात् शीतोष्णाद्युपलक्षितं द्वैताख्यं वस्तुजातं धर्मीत्युच्यते तद्ग्राहकप्रत्यक्षादिप्रमाणस्य धर्मिग्रहणसमकालावच्छेदेन त्वाख्य
धर्मग्राहकत्वं न संभवति तत्र हेतुः द्वैताख्यस्य विषयस्य सत्त्वेन असत्त्वेन वा तत्काले वर्णयितुमशक्यत्वादिति अतोऽनिर्वाच्यत्वं फलितं॥ तथा च प्रातिभासिकीं सत्तामु
पादाय प्रसक्तिसत्त्वेनाऽप्रसक्तप्रतिषेधप्रसक्तिरिति भावः॥५=

अधिकारिविशेषणे तितिक्षुत्वे हेत्वंतरपरत्वेनोत्तरश्लोकमवतारयति इतश्चेति इतः शब्दार्थमेव स्फुटयति यस्मादिति यतः शीता
देः शोकादिहेतोरनात्मनो नास्ति वस्तुत्वं वस्तुनश्चात्मनो निर्विकारत्वेनैकरूपत्वमतो मुमुक्षोर्विशेषणं तितिक्षुत्वं युक्तमित्याह
नेत्यादिना कार्यस्यासत्त्वेपि कारणस्य सत्त्वेनात्यंतासत्त्वासिद्धिरित्याशंक्य विशिनष्टि सकारणस्येति नासतइत्युपादाय पुन

इतश्च शोकमोहावहत्वात् शीतोष्णादि सहनं युक्तं यस्मात् नासतोऽविद्यमानस्य शीतो
ष्णादेः सकारणस्य न विद्यते नास्ति भावो भवनमस्तिता न हि शीतोष्णादि सकारणं प्र
माणैर्निरूप्यमाणं वस्तु संभवति विकारो हि सः॥

र्नकारानुकर्षणमन्वयार्थं असतः शून्यस्यास्तित्वप्रसंगाभावादप्रसक्तप्रतिषेधप्रसक्तिरित्याशंक्याह नहीति विमतमतात्त्वि
कमप्रामाणिकत्वाद्रज्जुसर्पवत् नहि धर्मिग्राहकस्य प्रत्यक्षादेस्तत्त्वावेदनं प्रामाण्यं प्रकल्प्यते विषयस्य दुर्निरूप्यत्वादतोऽ
निर्वाच्यं द्वैतमित्यर्थः॥ कथं पुनरध्यक्षादिविषयस्य शीतोष्णादिद्वैतस्य दुर्निरूपत्वेनानिर्वाच्यत्वं तत्राह विकारो हीति॥ ॥

ततश्चविमतंमिथ्याआगमापायित्वात्संप्रतिपन्नवदितिफलितमाह।विकारश्चेति।वाचारंभणश्रुतेर्द्वैतमिथ्यात्वेऽनुग्राहकत्वं
दर्शयितुंचकारः।किंचकार्यंकारणाद्भिन्नंनवेतिविकल्प्याद्यंदूषयति।यथेति।निरूप्यमाणमंतर्वहिश्चेतिशेषः।विमतंकारणान्नतत्त्व
तोभिद्यतेकार्यत्वात्घटवदित्यर्थः।इतोपिकारणाद्भेदेननास्तिकार्यमादावंतेचयन्नास्तिवर्त्तमानेपितत्तथेतिन्यायादित्याह।ज
न्मेति।यदिकार्यंकारणादभिन्नंतदातस्यभेदेनासत्वेपूर्वस्मादविशेषः।तादात्म्येनावस्थानंतुनयुक्तं।तस्यापिकारणव्यतिरेके

कारणात्मना

विकारश्चव्यभिचरतियथाघटादिसंस्थानंचक्षुषानिरूप्यमाणंमृद्व्यतिरेकेणानुपलब्धेरसत्तथासर्वोविकारःका
रणव्यतिरेकेणानुपलब्धेरसत्।जन्मप्रध्वंसाभ्यांप्रागूर्ध्वंचानुपलब्धेर्मृदादिकारणस्यचतत्कारणव्यतिरेकेणानु
पलब्धेरसत्वंतदसत्वेचसर्वाभावप्रसंगइतिचेन्नसर्वत्रबुद्धिद्वयोपलब्धेःसद्बुद्धिरसद्बुद्धिरिति॥ ॥

धु

णाभावात्कार्यकारणविभागविकारेवस्तुनिकार्यकारणपरंपरायाविभ्रमादित्यभिप्रेत्याह।मृदादीति।कार्यकारणविभागही
नंवस्त्वेवनास्तीतिमन्वानश्चोदयति।तत्सत्वइति।अनुवृत्तव्यावृत्तबुद्धिद्वयदर्शनादनुवृत्तेचव्यावृत्तानांकल्पितत्वादकल्पि
तंसर्वभेदविकल्पाधिष्ठानमकार्यकारणंवस्तुसिद्ध्यतीतिपरिहरति।नसर्वत्रेति॥ ॥

संप्रतिसतोवस्तुत्वेप्रमाणमनुमानमुपन्यस्यति ॥ यद्विषयेति ॥ यद्व्यावृत्तेष्वनुवृत्तंतत्परमार्थसद्यथासर्पधारादिष्वनुगतोरज्ज्वादेरि
दमंशः विमतंसत्यमव्यभिचारित्वात्संप्रतिपन्नवदित्यर्थः ॥ व्यावृत्तस्यकल्पितत्वेप्रमाणमाह ॥ यद्विषयेत्यादि ॥ यद्व्यावृत्तंतन्मिथ्याय
थासर्पधारादिविमतंमिथ्याव्यभिचारित्वात्संप्रतिपन्नवदित्यर्थः ॥ इत्यनुमानद्वयमनुसृत्यसतोऽकल्पितत्वमसतश्चकल्पित
त्वंस्थितमितिशेषः ॥ ननुनेदमनुमानद्वयमुपपद्यते ॥ समस्तद्वैतवैतथ्यवादिनोविभागाभावादनुमानादिव्यवहारानुपपत्ते

मिथ्यात्व

स्तत्राह ॥ सदसदिति ॥ उक्तेविभागेबुद्धिद्वयाधीनेस्थितेसत्यनुमानादिव्यवहारोनिर्वहतिप्रातिभासिकविभागेनतद्योगात्परमार्थ

यद्विषयाबुद्धिर्नव्यभिचरतितत्सत्यद्विषयाव्यभिचरतितदसदितिसदसद्विभागेबुद्धितं
त्रेस्थितेसर्वत्रद्वेबुद्धीसर्वैरुपलभ्येतेसमानाधिकरणे ॥

स्यैवतद्धेतुत्वेकेवलेव्यतिरेकाभावादित्यर्थः ॥ कुतःसदसद्विभागस्यबुद्धिद्वयाधीनत्वंबुद्धिविभागस्यापितत्त्वाभावात्त

सत्यत्वाभावात्

त्राह सर्वत्रेति ॥ व्यवहारभूमिःसप्तम्यर्थःबुद्धिविभागस्यापिकल्पितस्यैवबोध्यविभागप्रतिभासहेतुतेतिभावःबुद्धिद्वयम

राम

नुरुध्यसदसद्विभागेसतःसामान्यरूपतयाविशेषाकांक्षायांसामान्यविशेषौद्वेवस्तुनीवस्तुभूतेस्यातामितिचेन्नेत्याह

॥२८॥

॥ समानाधिकरणे इति ॥ पदयोःसामानाधिकरण्यंबुद्ध्योरुपचर्यतेसोयमितिसामानाधिकरण्यवत् ॥ घटःसन्नित्यादि
सामानाधिकरण्यस्यमुख्यत्वान्नवस्त्वैक्यविषयमितिचेन्नेत्याह ॥ मेकवस्तुनिष्ठंवस्तुभेदेघटपटयोरिवतदयोगादिस

ऐक्यायोगात्

सामानाधिकरण्यभावः ॥२ ॥२ उक्तं च रह द्वार्तिके सत्तातोपि नभेदः स्याद्द्रव्यत्वादेः कुतोन्यतः एकाकारा हि संवित्तिः सद्द्रव्यं सन्गुणस्तथा ॥२

नीलमुत्पलमितिवद्धर्मधर्मिविषयतया सामानाधिकरण्यस्य सुवचत्वान्न वस्त्वैक्यविषयमिति चेन्नेत्याह न नीलेति नहि सामान्यविशेषयोर्भेदेऽभेदे वा तद्भावो भेदाभेदौ च विरुद्धाविति जातिव्यक्त्योः सामानाधिकरण्यं नीलोत्पलयोरिव न गौणं किंतु व्यावृत्तमनुवृत्ते कल्पितमित्येकनिष्ठमित्यर्थः सामान्यविशेषयोरुक्तन्यायं गुणगुण्यादावतिदिशति एवमिति तुल्यो हि तत्रापि विकल्पदोषाविति भावः सामानाधिकरण्यानुपपत्त्या द्वैवस्तुनी सामान्यविशेषाविति पक्षं प्रतिक्षिप्य विशेषा एव वस्त्विति पक्षं प्रतिक्षिपति तयोरिति बुद्धिव्यभिचाराद्धो ध्यव्यभिचारेपि कथं व्यावृत्तानां विशेषाणामवस्तुत्वमित्याशं

घटादिरूपविशेषाव ४ ना ५

ननीलोत्पलवत्सन्घटः सन्पटः सन्हस्तीत्येवं सर्वत्र तयोर्बुद्ध्योर्घटादिबुद्धिर्व्यभिचरति तथा च दर्शितं न तु सद्बुद्धिस्तस्मात् घटादिबुद्धिविषयोऽसत्व्यभिचारात् न तु सद्बुद्धिविषयोऽव्यभिचारात् ॥

क्याह तथा चेति विकारो हि सदित्यादावितिशेषः न चैकं वस्तु सामान्यविशेषात्मकं एकस्य द्वैरूप्यविरोधादित्यभिप्रेत्य सामान्यमेकमेव वस्तु तद्बुद्धेरव्यभिचाराद्बोध्यस्यापि सतस्तथात्वादित्याह न त्विति न व्यभिचरतीति पूर्वेणैव संबंधः विशेषाणां व्यभिचारे सतश्चाव्यभिचारे फलितमुपसंहरति तस्मादित्यादिना असत्त्वं कल्पितत्वं तच्छब्दार्थमेव स्फुटयति व्यभिचारादिति सद्बुद्धिविषयस्य सतोऽकल्पितत्वे तच्छब्दोपात्तमेव हेतुमाह अव्यभिचारादिति ।

बुद्धिव्यभिचारद्वारा बोध्येपि व्यभिचारात्तदव्यभिचारित्वहेतोरसिद्धिरितिशंकते घटेविनष्टइति सद्बुद्धेर्घटबुद्धिवद्विषयत्वाऽभावान्नघटनाशेव्यभिचारोस्तीतिपरिहरति नपटादाविति सद्बुद्धेरघटविषयत्वेनिरालंबनत्वायोगाद्विषयांतरंवक्तव्यमित्याशंक्याह विशेषणेति सतोऽकल्पितत्वहेतोरव्यभिचारस्यासिद्धिमुद्दृश्य विशेषाणांकल्पितत्वहेतोर्व्यभिचारस्यासिद्धिंशंकते सदिति यथासद्बुद्धिर्घटेनष्टेपटादौदृष्टत्वादव्यभिचारिणीत्यव्यभिचारःसतोदर्शितः तथाघटबुद्धिरपिघटेनष्टेघटांतरेदृष्टेत्यव्यभिचारात् घटव्यभिचारासिद्धौविशेषांतरेष्वपिकल्पितत्वहेतोर्व्यभिचारोनसिध्यतीत्यर्थः घटबुद्धेर्घटांतरेदृष्टत्वेपिपटादाव

घटेविनष्टेघटबुद्धौव्यभिचरंत्यांसद्बुद्धिरपिव्यभिचरतीतिचेन्नपटादावपिसद्बुद्धिदर्शनाद्विशेषणविषयैवसा सद्बुद्धिः सद्बुद्धिवत्घटबुद्धिरपिघटांतरेदृश्यतइतिचेन्नपटादावदर्शनात्सद्बुद्धिरपिनष्टेघटेनदृश्यतइतिचेन्न विशेष्याभावात् सद्बुद्धिर्विशेषणविषयासतीविशेष्याभावेविशेषणानुपपत्तौकिंविषयास्यात् नतुपुनःसद्बुद्धिविषयाभावात्॥

दृष्टत्वेनव्यभिचारात् घटादिविशेषेष्वपिव्यभिचारित्वसिद्धिरित्युत्तरमाह पटादाविति विशेषाणामेवंव्यभिचारित्वेसतोपितदुपपत्तेरव्यभिचारित्वहेत्वसिद्धितादवस्थ्यमितिशंकते सद्बुद्धिरिति घटादिनाशदेशेतैर्दुपरक्ताकारेणसत्वाभावेपिनासत्वंपटाद्यधिष्ठानतयाभानादित्याह नविशेष्येति यथासर्वगताजातिरित्यत्रखंडमुंडादिव्यक्त्यभावदेशेगोत्वंव्यंजकाभावान्नव्यज्यतेनगोत्वाभावात्तथासत्वमपिघटादिनाशेव्यंजकाभावान्नभातिनस्वरूपाभावादित्युक्तमेवप्रपंचयति सदित्यादिना सत्प्रतियोगिकविशेषणत्वव्यभिचारेपिस्वरूपाव्यभिचाराद्युक्तंसतःसत्यत्वमितिभावः ॥

घटाद्युपरक्ताकारेण

॥२९॥

द्वयोः सतोरेव विशेषणविशेष्यत्वदर्शनात् घटसतोरपि विशेषणविशेष्यत्वे द्वयोः सत्वध्रौव्यात् घटादिकल्पितत्वानुमानं सामानाधिकरण्यधीबाधितमिति चोदयति । एकेति अनुभवमनुसृत्य बाधितविषयत्वमुक्त्वानुमानस्य निरस्यति नेत्यादिना घटादेः सतिकल्पितत्वानुमानस्य दोषराहित्ये फलितमुपसंहरति तस्मादिति प्रथमपादव्याख्यानपरिसमाप्ताविति शब्दः नन्विदं व्याख्यानं न भाष्यकाराभिप्रेतं सर्वद्वैतशून्यत्वविवक्षायां शास्त्रतद्भाष्यविरोधात्केनापि पुनर्दुर्विदग्धेन स्वमनीषिकयोत्प्रेक्षितमिति चे नैवं किमिदं द्वैतप्रपंचस्य शून्यत्वं किं तुच्छत्वं किं वा सद्विलक्षणत्वं नाद्यः अनभ्युपगमात् द्वितीयानभ्युपगमे तु तवैव शास्त्रविरो

एकाधिकरणत्वं घटादिविशेष्याभावेन युक्तमिति चेन्न सदिदमुदकमिति मरीच्यादौ अन्यतराभावेपि सामानाधिकर

नासतो विद्यते भावो नाभावो विद्यते सतः

ण्यदर्शनात्तस्माद्देहादेर्द्वंद्वस्य च सकारणस्यासतो न विद्यते भाव इति तथा सत आत्मनोऽ
भावोऽविद्यमानता न विद्यते सर्वत्राव्यभिचारादित्यवोचाम ॥

धो भाष्यविरोधश्च सर्वं हि शास्त्रं तद्भाष्यं च द्वैतस्य सत्त्वानधिकरणत्वसाधनेनाद्वैतसत्यत्वे पर्यवसितमिति त्रैविद्यवृद्धैस्तत्र तत्र प्रतिष्ठापितं तथा च प्रक्षेपाशंकासंप्रदायपरिचयाभावादिति द्रष्टव्यं अनात्मजातस्य कल्पितत्वेनावस्तुत्वप्रतिपादनपरतया प्रथमपादं व्याख्याय द्वितीयपादमात्मनः सर्वकल्पनाधिष्ठानस्याकल्पितत्वेन वस्तुत्वप्रसाधनपरतया व्याकरोति तथेति नन्वात्मनः सदात्मनो विशेषेषु विनाशिषु तदुपरक्तस्य विनाशः स्यादित्याशंक्य विशिष्टनाशेपि स्वरूपानाशस्यो

सत्ताया

संता

ण्यालौकिकमित्याह सर्वत्रेति ॥

गी·भा·
॥३०॥

असत्वनिवृत्याच्चसत्वप्राप्तिः उभयमपिनसिध्येत् ॥

ननुकदाचिदसदेवपुनः सत्वमापद्यते प्रागसतोघटस्यजन्मनासत्वाभ्युपगमात् सच्चकदाचिदसत्वंप्रतिपद्यते स्थितिकालेसतो घटस्यपुनर्नाशेनासत्वांगीकारादेवंसदसतोरव्यवस्थितत्वाविशेषादुभयोरपिहेयत्वमादेयत्वंवातुल्यंस्यादितितत्राह एवमिति तुशब्दोदृष्टशब्देनसंबध्यमानोदृष्टमवधारयति नहिप्रागसतोघटस्यसत्वमसत्वेस्थितेसत्वप्राप्तिविरोधादसत्वनिवृत्तिश्चसत्वप्राप्त्याचेत्वात्मनमितरेतराश्रयत्वमंतरेणैवसत्वापत्तिमसत्वनिवृत्त्यावसत्वमनवकाशिभवेत् एतेनसतोऽसत्वाप

एवमात्मानात्मनोः सदसतोरुभयोरपिदृष्टउपलब्धोंतोनिर्णयः सत्सदेवासदसदेवेतितुअनयोर्यथोक्तयोस्तत्वदर्शिभिः ॥ तदितिसर्वनामसर्वंचब्रह्मतस्यनामतदितितद्भावस्तत्वंब्रह्मणोयाथात्म्यंतत् द्रष्टुंशीलंयेषांते ॥ ॥

उभयोरपिदृष्टोंतस्त्वनयोस्तत्वदर्शिभिः १६

तत्वदर्शिनस्तेस्तत्वदर्शिभिस्त्वमपितत्वदर्शिनांदृष्टिमाश्रित्यशोकंमोहंचहित्वाशीतोष्णादींस्तितिक्षस्वेत्यभिप्रायः १६

नीते

त्तिरपिप्रतिभासैतिभावः कथंतर्हिसतोऽसत्वमसतश्चसत्वंप्रतिभातीत्याशंक्यतत्वदर्शनाभावादित्याह तत्वेति तस्यभावस्तत्वंनखतच्छब्देनपरामर्शयोग्यंकिंचिदस्तिप्रकृतंप्रतिनियतमित्याशंक्यव्याचष्टे तदित्यादिना ननुसदसतोरन्यथात्वंकेचित्प्रतिपद्यंतेकेचित्तुतयोरुक्तंनिर्णयमनुसृत्यतथात्वमेवाधिगच्छंतिततत्रकेषांमतमेषितव्यमितितत्राह तत्वमपीति १६

आ·गी·
॥२॥

शिव
३०

ननु सदिति सामान्यं स्वरूपं वा प्रथमे तस्य विशेषसापेक्षतया प्रलयदशायामशेषविशेषनाशः स्यात्॥ न चाकाशादयो विशेषा स्तदापि संतीति वाच्यं॥ आत्मातिरिक्तानां विशेषाणां कार्यत्वांगीकारात्प्रलयावस्थायामनवस्थानाद्दात्मनस्तु सामान्यात्मनो धर्मत्वादुक्तदोषात् द्वितीये तु स्वरूपस्य व्यावृत्तत्वे कल्पितत्वाद्विनाशित्वमनुवृत्तत्वे तस्यैव सामान्यतया प्राक्तनदोषा ॥१

किं पुनस्तद्यत्सदेव सर्वदास्तीत्युच्यते॥ अविनाशि न विनष्टुं शीलमस्येति तु शब्दोऽसतो विशेषणार्थस्तद्विद्धि

अविनाशि तु तद्विद्धि येन सर्वमिदं ततं॥

जानीहि॥ किं येन सर्वमिदं जगत्ततं व्याप्तं सदाख्येन ब्रह्मणा स्वात्मना आकाशेन घटादयो यथा

१ पंक्ति तु निर्वृक्तिं किं रिति मन्वानः श्लोकस्यति किं पुनरिति सामान्यविशेषभावशून्यमखंडैकरसं सदेवेत्यादिश्रुतिप्रमितं सर्वविक्रियारहितं वस्तु प्रकृतं सद्विवक्षितमित्युत्तरमाह॥ उच्यत इति आत्मनः सदात्मनो विनाशराहित्यविज्ञाने सर्वजगद्व्यापकत्वं हेतु

आत्मनोविनाशाभावेयुक्तिमाह ॥ विनाशमिति ॥ आत्मनोनाशमिच्छतास्वतोवापरतोवानाशस्तस्येष्यतेनाद्यइत्याह ॥ अविनाशीति ॥ देहादिद्वैतमसदुच्यते ॥ ततःसतोविशेषणंस्वतोनाशराहित्यं ॥ तस्यद्योतकोनिपातइत्याह ॥ तुशब्दइति ॥ आकांक्षापूर्वकंविशेष्यं दर्शयतिकिमित्यादिना ॥ विमतमविनाशिव्यापकत्वादाकाशवन्नहिप्रमितमेवोदाहरणंकिंतुप्रसिद्धमपीतिभावः ॥ नद्वितीयइत्याह ॥ विनाशमिति ॥ नखल्वस्यविनाशंकर्तुंकश्चिदर्हतीतिसंबंधः ॥ विनाशस्यसावशेषत्वनिरवशेषत्वाभ्यांद्वैरूप्यमाश्रित्यव्याकरोति ॥ अदर्शनमभावमिति ॥ नकश्चिदस्याभावंकर्तुंशक्नोतीत्यत्रहेतुमाह ॥ अव्ययस्येति ॥ ब्रह्महिस्वरूपेणव्येतिसंबंधिनावेतिविकल्प्य

विनाशमदर्शनमभावमव्ययस्यनव्येतिउपचयापचयौनयातीत्यव्ययंतस्याव्ययस्यनैतत्सदाख्यंब्रह्मस्वरूपेणव्ये तिव्यभिचरतिनिरवयवत्वाद्देहादिवन्नाप्यात्मीयेनात्मीयाभावाद्यथादेवदत्तोधनहान्याव्येतिनत्वेवंब्रह्मव्येत्यतोव्य

विनाशमव्ययस्यास्यनकश्चित्कर्तुमर्हति ॥ १७ ॥

यस्यास्यब्रह्मणोविनाशंनकश्चित्कर्त्तुमर्हतिनकश्चिदात्मानंविनाशयितुंशक्नोतिईश्वरोप्यात्माहिब्रह्मस्वात्मनिचक्रिया

द्यंदूषयति ॥ नैतदिति ॥ नहिनिरवयवस्यस्वावयवापचयरूपस्वरूपव्ययःसंभवतीत्यत्रवैधर्म्यदृष्टांतमाह ॥ देहादिवदिति ॥ द्वितीयं निरस्यति ॥ नापीति ॥ तदेवव्यतिरेकदृष्टांतेनस्पष्टयति ॥ यथेति ॥ द्विधाप्यव्यायोगेफलितमाह ॥ अतइति ॥ किंच ब्रह्मपरतोननश्यति आत्मत्वात्घटवदित्याह ॥ नकश्चिदिति ॥ आत्मत्वहेतोरसिद्धिमुद्धरति ॥ आत्माहीति ॥ तौदात्म्यश्रुतिरत्रहीतिहेतुःक्रियते ॥ अस्तु तर्हिस्वयमेवब्रह्मस्वात्मनोनाशकमुद्बंधनादिदर्शनान्नेत्याह ॥ स्वात्मनीति ॥ १७ ॥

॥ शिव ॥
३१
अयमात्मात्र ह्येति

सदसतोरनंतरप्रकृतयोःस्वरूपाव्यभिचारित्वेन परमार्थतया सन्निर्धारितमिदानीमसन्निर्दिधारयिषया पृच्छति किंपुनरिति अस
दसतोर्वेति निर्द्धारितत्वात्तत्प्रश्नस्य निरवकाशत्वमाशंक्यानूद्यं यद्वैवक्ष्यं विवक्षितमसन्निर्द्धारयितुं तस्य सावकाशत्वमाह यत्स्वा
त्मेति देहादेरनात्मवर्गस्य प्रकृताऽसच्छब्द विषयत्वे स्याह उच्यत इति अंतवंत इति तेषां स्वातंत्र्यं व्युदस्यति नित्यस्येति आका
शादिव्यावृत्त्यर्थं विशिनष्टि शरीरिण इति परिणामि नित्यत्वं व्यवच्छिनत्ति अनाशिन इति तस्य प्रत्यक्षाद्यविषयत्वमाह अ
प्रमेयस्येति देहादेरवस्तुत्वादात्मनश्चैकरूपत्वाद्युद्धे स्वधर्मे प्रवृत्तस्यापि तव न हिंसादिदोषसंभावनेत्याह तस्मादिति नुनु देहा

किंपुनस्तत्सद्यत्सदात्मसत्तां व्यभिचरतीत्युच्यते अंतवंतोऽतो विनाशो विद्यते येषां तेऽतवंतो यथा मृगतृष्णिका
दौ सत्बुद्धिरनुवृत्ता प्रमाणनिरूपणांते विच्छिद्यते स तस्यांतस्तथेमे देहाः स्वप्नवत् मायादेहादिवच्चांतवंतो ॥ नि

अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः

स्यस्य शरीरिणः शरीरवतोऽनाशिनोऽप्रमेयस्यात्मनोंतवंत इत्युक्ता विवेकिभिरित्यर्थः श्रीरामायनमः॥

दिषु सत्बुद्धेरनुवृत्तेस्तस्याविच्छेदाभावात्कथमंतवत्वं तेषामिष्यते तत्राह यथेति तथेमे देहाः सद्बुद्धिभाजोपि प्रमाणतो नि
रूपणायामवसाने विच्छेदादंतवंतो भवंतीति शेषः देहत्वादिना च जाग्रद्देहादेरंतवत्वं संप्रतिपन्नैवदनुमातुं शक्यमित्याह
स्वप्नेति शरीरादेरंतवत्वेपि प्रवाहरूपेणात्मनस्तत्संबंधस्यानंतत्वमाशंक्याह नित्यस्येति प्रवाहस्य प्रवाहिव्यतिरेकेणा
निरूपणात्तदात्मनो देहाद्यभावे संबंधसिद्धिरित्यभिसंधायोक्तं विवेकिभिरिति॥

पदद्वयस्यैकार्थत्वमाशंक्य निरस्यति ॥ नित्यस्येत्यादिना ॥ नित्यत्वस्य द्वैविध्यसिद्ध्यर्थं नाशद्वैविध्यं प्रतिज्ञातं प्रकटयति ॥ यथेत्यादि
ना ॥ नाशस्य निरवशेषत्वेन सावशेषत्वेन च सिद्धे द्वैविध्ये फलितमाह ॥ तत्रेति ॥ विशेषणाभ्यां कूटस्थनित्यत्वमात्मनो विवक्षितमि
त्यर्थः ॥ अन्यतरविशेषणमात्रोपादाने परिणामिनित्यत्वमात्मनः शंकेतेत्यनिष्टापत्तिमाह ॥ अन्यथेति ॥ औपनिषदत्वविशेषण

नित्यस्यानाशिन इति न पुनरुक्तं ॥ नित्यत्वस्य द्विविधत्वाल्लोके नाशस्य च ॥ यथा देहो भस्मीभूतोऽदर्शनं गतो नष्ट इत्युच्य
ते विद्यमानोप्यन्यथापरिणतो व्याध्यादियुक्तो जातो नष्ट उच्यते ॥ तथा धननाशोप्येवं ॥ तत्रानाशिनो नित्यस्येति द्विविधेना
पि नाशेनासंबद्धस्येत्यर्थः ॥ अन्यथा पृथिव्यादिवदपि नित्यत्वं स्यादात्मनस्तन्माभूदिति नित्य ॥ ॥

अनाशिनोप्रमेयस्य तस्माद्युद्ध्यस्व भारत ॥१८॥ स्व

स्यानाशिन इत्याह ॥ अप्रमेयस्य न प्रमेयस्य प्रत्यक्षादिप्रमाणैरपरिच्छेद्यस्येत्यर्थः ॥ नन्वा
गमेनात्मा परिच्छिद्यते प्रत्यक्षादिना च न ततः पूर्वं स्वतः सिद्धत्वादात्मनः ॥ ॥

मा श्रित्याप्रमेयत्वमाक्षिपति ॥ नन्विति ॥ इतश्चात्मनोनाप्रमेयत्वमित्याह ॥ प्रत्यक्षादिनेति ॥ तेनात्रागमप्रवृत्त्यपेक्षया पूर्वावस्थाया
मात्मैव परिछिद्यते ॥ तस्मिन्नेवाऽज्ञातत्वसंभवादज्ञातज्ञापकं प्रमाणमिति च प्रमाणलक्षणादित्यर्थः ॥ ततर प्रमेयमित्यादिश्रुति

[illegible]हरति ॥ नेत्यादिना ॥

देहाद्यनात्मविविक्ते आत्मनि प्रत्यक्षादिप्रामाण्यव्यवहारप्रवृत्तिसंभवेपि तद्रहिते केवले चिद्रूपे प्रत्यक्षादिप्रमाणव्यवहारः प्रवृत्तेः ३

कथं मानमनपेक्ष्यात्मनः सिद्धत्वमित्याशंक्योक्तं विवृणोति। सिद्धेहीति। प्रमित्सोः प्रमेयमिति शेषः तदेव व्यतिरेकमुखेन विशदय
ति नहीति। आत्मनः सर्वलोकप्रसिद्धत्वात्तस्मिन्न प्रमाणमन्वेषणीयमित्याह नह्यात्मेति। प्रत्यक्षादेरनात्मविषयत्वात्तत्र च वा
ऽज्ञाततया व्यवहारसंभवात्तत्प्रामाण्यस्य च व्यावहारिकत्वाद्विशिष्टे तस्मिन्वृत्तावपि केवले तदप्रवृत्तेर्यद्यपि नात्मनि त
औपनिषदमिति त्प्रामाण्यं तथापि तद्धितश्रुत्या शास्त्रस्य तत्र प्रवृत्तिरवश्यंभाविनीत्याशंक्याह शास्त्रंत्विति। शास्त्रेण प्रत्यग्भूते ब्रह्मणि प्रति

सिद्धेह्यात्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा भवति। नहि पूर्वमित्थं अहमित्यात्मानं अप्रमाय
पश्चात्प्रमेयपरिच्छेदाय प्रवर्त्तते। नह्यात्मा नाम कस्यचिदप्रसिद्धो भवतीति शास्त्रं त्वंत्यं प्रमाणमत
द्धर्माध्यारोपणमात्रनिवर्त्तकत्वेन प्रमाणत्वमात्मनः प्रतिपद्यते॥ ॥

पादिते प्रमात्रादिविभागस्य व्यावृत्तत्वाद्युक्तमस्यांत्यत्वमपौरुषेयतया निर्दोषत्वाच्चागमस्य प्रामाण्यमित्यर्थः॥ तथापि
कथमस्य प्रत्यगात्मनि प्रामाण्यं तस्य स्वतः सिद्धत्वेनाविषयत्वादज्ञाततत्त्वापनायोगादित्याशंक्य स्वतो भासमानस्यापि प्रती
चो मनुष्योहं कर्त्ताहमित्यादिना मनुष्यत्वकर्तृत्वादीनामतद्धर्माणामध्यारोपेणात्मनि प्रतीयमानत्वात्तन्मात्रनिवर्त्तकत्वे
नात्मनो विषयत्वमनापाद्यैव शास्त्रं प्रामाण्यं प्रतिपद्यते सिद्धं तु निवर्त्तकत्वादिति न्यायादित्याह अतद्धर्मेति॥ ॥

घटादाविवस्फुरणातिशयजनकत्वेन किमित्यात्मनि शास्त्रप्रामाण्यं नेष्टमित्याशंक्य जडत्वाजडत्वाभ्यां विशेषादित्युत्तरमाह नचि
ति ब्रह्मात्मनो मानापेक्षामंतरेण स्वतःस्फुरणे प्रमाणमाह तथा चेति साक्षादन्यापेक्षामंतरेणापरोक्षादपरोक्षस्फुरणात्मकं य
द्ब्रह्म न च तस्यात्मनोऽर्थांतरत्वं सर्वाभ्यंतरत्वेन सर्ववस्तुसारत्वात्तमात्मानं व्याचक्ष्वेति यो जना॥ अप्रमेयत्वेनाविनाशित्वं प्रतिपा
द्य फलितं निगमयति यस्मादिति स्वधर्मनिवृत्तिहेतुनिषेधे तात्पर्यं दर्शयति युद्ध्यादिति आत्मनो नित्यत्वादिस्वरूपमुपपाद्य यु

न तस्मातार्थज्ञापकत्वेन तथा चश्रुतिः यत्साक्षादपरोक्षाद्ब्रह्म य आत्मेति यस्मादेवं नित्यो विक्रियश्चात्मा
तस्मात्युध्यस्व युद्धादुपरमं माकार्षीरित्यर्थः नह्यत्र युद्धकर्त्तव्यता विधीयते युद्धे प्रवृत्त एव ह्यसौ शोकमोह
प्रतिबद्धः तूष्णीमास्ते अतः तस्य प्रतिबंधापनयनमात्रं भगवता क्रियते॥ तस्माद्युद्ध्यस्वेत्यनुवादमात्रं न वि
धिः॥१८॥

द्धकर्त्तव्यत्वविधानात् ज्ञानकर्मसमुच्चयोऽत्र भातीत्याशंक्याह नहीति युद्ध्यस्वेति वचनात्तत्कर्त्तव्यत्वविधिरस्तीत्या
शंक्याह युद्धइति कथं तर्हि कथं भीष्ममहमित्याद्यर्जुनस्य युद्धोपरमपरं वचनमिति तत्राह शोकेति यदि स्वतो युद्धे
प्रवृत्तिस्तर्हि भगवद्वचनस्य कागतिरित्याशंक्याह तस्येति भगवद्वचनस्य प्रतिबंधनिवर्त्तकत्वे सत्यर्जुनप्रवृत्तेः स्वा
भाविकत्वे फलितमाह तस्मादिति १८

अविनाशितुतद्विद्धी यत्र पूर्वार्द्धेन तत्पदार्थसमर्थनमुत्तरार्द्धेन निरीश्वरवादस्य परिणामवादस्य वा निराकरणमात्मनि जन्मादि
प्रतिभानस्य औपचारिकत्वप्रदर्शनार्थमंतवंतइत्यादिवचनमिति केचित् अस्तु नामायमपि पंथाः पूर्वोक्तस्य गीताशास्त्रा
र्थस्योत्प्रेक्षामात्रमूलत्वं निराकर्त्तुं मंत्रद्वयं भगवानानीतवानिति श्लोकद्वयस्य संगतिं दर्शयति शोकमोहादीति तत्र प्रथम
मंत्रस्य संगतिमाह यत्विति प्रत्यक्षनिबंधनत्वादमुष्या बुद्धेर्मृषात्वमयुक्तमित्याक्षिपति कथमिति प्रत्यक्षस्याज्ञानप्रसूत

शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रं न प्रवर्त्तकमित्येतस्यार्थस्य साक्षिभूते ऋचावाऽऽनिनाय भगवान् य
त्तु मन्यसे युद्धे भीष्मादयो मया हन्यंते ऽहमेतेषां हंतेत्येषा बुद्धिर्मृषैव ते कथं य एनं प्रकृतं देहिनं वेत्ति विजानाति हंतारं ह
ननक्रियायाः कर्त्तारं यश्चैनं अन्यो मन्यते हतं देहहननेन हतोहमिति हननक्रियायाः कर्मभूतं तावुभौ न वि ॥

य एनं वेत्ति हंतारं यश्चैनं मन्यते हतं उभौ तौ न विजानीतो नायं हंति न हन्यते १९॥

जानीतो न ज्ञातवंतौ विवेकेनात्मानं अहंप्रत्ययविषयं हंताहं हतोहमिति देहहनने आत्मानमहंप्रत्ययविषयं यो विजा
नीतस्तावात्मस्वरूपानभिज्ञावित्यर्थः यस्मान्नायमात्मा हंति न हननक्रियायाः कर्त्ता भवति न च हन्यते न च कर्म भवतीत्य

र्थेनाभासत्वात्तत्कृता बुद्धिर्न प्रमेति परिहरति य एनमिति हंता चेन्मन्यते हंतुमित्याद्यां ऋचमर्थतो दर्शयित्वा व्याचष्टे य एनं प्र
कृतमिति हंतारं हतं चात्मानं मन्यमानस्य कथमज्ञानमित्याशंक्याह हंताहमिति हंतृत्वादि ज्ञानमज्ञानमित्यत्र हेतुमाह य
स्मादिति आत्मनो हननं प्रति कर्तृत्वकर्मत्वयोरभावे हेतुं दर्शयति अविक्रियत्वादिति १९॥

तदेवसाधयितुंनजायतेम्रियतेवाविपश्चिदित्यादिमंत्रांतरमवतारयति। कथमिति। सर्वविक्रियाराहित्यप्रदर्शनेनहेतुंविशद
यन्मंत्रमेवपठति। नजायतइति। जन्ममरणविक्रियाद्वयप्रतिषेधंसाधयति। नायमिति। अयमात्माभूत्वानाऽभवितानवाभू
त्वाभूयोभवितेतियोजना नकेवलंविक्रियाद्वयमेवात्रनिषिध्यते। किंतुसर्वमेवविक्रियाजातमित्याह अजइति। वाक्यमर्थमुक्त्वा

कथमविक्रियआत्मेतिद्वितीयोमंत्रः। नजायतेनोत्पद्यतेजनिलक्षणावस्तुविक्रियानात्मनोविद्यतइत्यर्थः। त
थानम्रियतेवाशब्दश्चार्थेनम्रियतेचेत्यंत्याविनाशलक्षणाविक्रियाप्रतिषिध्यतेकदाचिच्छब्दःसर्वविक्रिया
प्रतिषेधैःसंबध्यते। नकदाचिज्जायतेनकदाचिन्म्रियतेइत्येवंयस्मादयमात्माभूत्वाभ॥ ॥

॥नजायतेम्रियतेवाकदाचिन्नायंभूत्वाभवितावानभूयः॥ ॥

वनक्रियामनुभूयपश्चादभविताअभावंगंतानभूयःपुनस्तस्मान्नम्रियते। योहिभूत्वानभवतिसम्रिय
तइत्युच्यतेलोकेवाशब्दान्नशब्दाच्चायमात्माऽभूत्वाभवितादेहवन्नभूयःपुनस्तस्मान्नजायते॥ ॥

विवक्षितमर्थमाह। जनिलक्षणेति। विकल्पार्थत्वंवारयति। वाशब्दइति। निष्पन्नमर्थंनिर्दिशति। नेत्यादिना। संबंधमे
वाभिनयति। नकदाचिदिति। अंत्यविक्रियाऽभावेहेतुत्वेननायमित्यादिव्याचष्टे। यस्मादिति। उक्तमेवव्यनक्ति। योहीति।
आत्मनितुभूत्वापुनरभवनाभावान्नास्तिमृतिरित्यर्थः। आत्मनोजन्माभावेपिहेतुरिहैवविवक्ष्यतइत्याह। वाशब्दादि

क्षि॰

देहवदिति व्यतिरेकोदाहरणमुक्तमेवार्थंसाधयति। योहीति। जन्माभावेतत्पूर्विकास्तित्वविक्रियापिनात्मनोस्तीत्याह। यस्मादि
तिप्राणवियोगादात्मनोमृतेरभावेसावशेषनाशाभाववन्निरवशेषनाशाभावोपिसिद्ध्यतीत्याह। तस्मादिति। ननुजन्मविनाश
योर्निषेधेतदंतर्गतानांविक्रियांतराणामपिनिषेधसिद्धेस्तन्निषेधार्थंनपृथग्प्रयतितव्यमितितत्राह। यद्यपीति। तदर्थैं

योऽयंभूत्वाभवितासजायतइत्युच्यतेनैवमात्माऽतोनजायते। यस्मादेवंतस्मात् अजोयस्मान्नम्रियतेतस्मान्नि
त्यश्चयद्यप्याद्यंतयोर्विक्रिययोःप्रतिषेधेसर्वाविक्रियाःप्रतिषिद्धाभवंतितथापिमध्यभाविनीनांविक्रियाणांस्व
शब्दैरेवतदर्थैःप्रतिषेधःकर्त्तव्यइति। अनुक्तानामपियौवनादिसमस्तविक्रियाणांप्रतिषेधोयथास्यादित्याह

अजोनित्यःशाश्वतोयंपुराणो ॥

शाश्वतइत्यादिशाश्वतइत्यपक्षयलक्षणाविक्रियाप्रतिषिध्यतेशश्वद्भवःशाश्वतोनापक्षीयतेस्वरूपेणनिर
वयवत्वान्निर्गुणत्वाच्चनापिगुणक्षयेणापक्षयःविपर्ययेणवृद्धिलक्षणाविक्रियाप्रतिषिध्यते ॥

मध्यवर्त्तिविक्रियानिषेधवाचकैरितियावत्। आर्थिकेपिनिषेधेनिषेधस्यसिद्धतयाशाब्दोनिषेधोनपृथगर्थवानित्या
शंक्याह। अनुक्तानामिति। नित्यशब्देनशाश्वतशब्दस्यपौनरुक्त्यंपरिहरन्व्याकरोति। शाश्वतइत्यादिना। अपक्षयोहिस्वरू
पेणवास्यात्गुणापचयतोवेतिविकल्प्यक्रमेणदूषयति। नेत्यादिना।

पुराणपदस्यागतार्थत्वं कथयति ॥ पुराण इति ॥ तदेव व्युत्पाद्यते ॥ यो हीति ॥ न म्रियते वेत्यनेन चतुर्थपादस्य पौनरुक्त्यमाशंक्य
व्याचष्टे ॥ तथेत्यादिना ॥ ननु हिंसार्थो हंतिः श्रूयते तत्कथं विपरिणामो निषिध्यते तत्राह ॥ हंतिरिति ॥ हिंसार्थत्वसंभवे किमित्यर्थां
तरं हंतेरिष्यते तत्राह ॥ अपुनरुक्ततायाइति ॥ हिंसार्थत्वे मृतिनिषेधेन पौनरुक्त्यं स्यात्तन्निषेधार्थं विपरिणामार्थत्वमेष्टव्यमि

पुराणइति ॥ यो ह्यवयवागमेनोपचीयते स वर्द्धते अभिनवइति चोच्यते ॥ अयं त्वात्मा निरवयवत्वात्पुरापि नव एवेति
पुराणो न वर्द्धत इत्यर्थः ॥ तथा न हन्यते न विपरिणम्यते हन्यमानेपि विपरिणम्यमानेपि शरीरे हंतिरत्र विपरिणा
मार्थो द्रष्टव्योऽपुनरुक्तताये ॥ न विपरिणमत इत्यर्थः ॥ अस्मिन्मंत्रे षड्भावविकारा लौकिकवस्त ॥ ॥

न हन्यते हन्यमाने शरीरे ॥ २० ॥

विक्रिया आत्मनि प्रतिषिध्यंते ॥ सर्वप्रकारविक्रिया रहित आत्मेति वाक्यार्थो यस्मादेवं तस्मा
दुभौ तौ न विजानीत इति पूर्वेण मंत्रेणास्य संबंधः ॥ २० ॥

स्थ मित्यर्थः पूर्वावस्थात्यागेनावस्थांतरापत्तिर्विपरिणामस्तदर्थश्चेदत्र हंतिरिष्यते तदा निष्पन्नमर्थमाह ॥ नेतिन
जायत इत्यादिमंत्रार्थमुपसंहरति ॥ अस्मिन्निति ॥ षण्णां विकाराणामात्मनि प्रतिषेधे फलितमाह ॥ सर्वैति ॥ आत्मनः स
र्वविक्रियाराहित्येपि किमायातमित्याशंक्याह ॥ यस्मादिति ॥ २० ॥

अंतवंतेतिमंत्रव्याख्यानावसरेनिरवशेषनाशरहितोनित्यः सावशेषनाशरहितःअनाशीति ३८

पूर्वश्लोकार्थस्यैवोत्तरत्रापिप्रतिभानात्पौनरुक्त्यमाशंक्यवृत्तानुवादपूर्वकमुत्तरश्लोकमवतारयति। यएनमित्यादिना। कर्तृत्वाद्यभिमानविरोधादद्वैतकूटस्थात्मनिश्चयसामर्थ्यात्प्राप्तंविदुषःसंन्यासंविद्यापरिपाकार्थमभ्यनुजानाति। वेदेति। पदद्वयस्यपूर्वमेवपौनरुक्त्यपरिहारेपिप्रकारांतरेणपौनरुक्त्यमाह। अविनाशिनमित्यादिना। प्रश्नेपिसंभवतिकिमितिनश्नुत्ले

यएनंवेत्तिहंतारमित्यनेनमंत्रेणहननक्रियायाःकर्त्ताकर्मचनभवतीतिप्रतिज्ञायनजायतइत्यनेनाविक्रियत्वे
हेतुमुक्त्वाप्रतिज्ञातार्थमुपसंहरति। वेदविजानातिअविनाशिनंइतिअंत्यभावविकाररहितंनित्यंविपरिणामर
हितंयोवेदेतिसंबंधः। एनंपूर्वेणमंत्रेणोक्तलक्षणमजंजन्मरहितंअव्ययमपक्षयरहितं। कथंकेनप्रकारेण
सविद्वान्पुरुषोऽविकृतोहंतिहननक्रियांकरोतिकथंवाघातयतिहंतारंप्रयोजयतिनकथंचित्कंचिद्धंतिन
कथंचित्कंचिद्घातयतीति। उभयत्राक्षेपएवार्थःप्रश्नार्थासंभवात्। हेत्वर्थस्यचाविक्रियत्वस्यतुल्यत्वात्
विदुषःसर्वकर्मप्रतिषेधएवप्रकरणार्थोभिप्रेतोभगवतोहंतेस्त्वाक्षेपउदाहरणार्थत्वेन। विदुषःकंकर्मासं
भवेहेतुविशेषंपश्यन्कर्माण्याक्षिपतिभगवान्कथंसपुरुषइति।

त्वेनव्याख्यायतेतत्राह। उभयत्रेति। उत्तरत्राप्रतिवचनान्नात्रप्रश्नःसंभवतीत्यर्थः। विवक्षितंप्रकरणार्थंनिगमयति
हेत्वर्थस्येति। अविक्रियत्वंहेत्वर्थस्तस्यविदुषःसर्वकर्मनिषेधेसमानत्वादितियावत्। यदिविदुषःसर्वकर्मनिषेधोभि
मतस्तर्हिकिमितिहंत्यर्थएवाक्षिप्यतेतत्राह। हंतेस्त्विति। उक्तहेतुमाक्षेप्तुंपृच्छति। विदुषेति॥ ॥

अभिप्रायमप्रतिपद्यमानो हेतुविशेषं पूर्वोक्तं स्मारयति नन्विति उक्तमंगीकृत्याक्षिपति सत्यमिति विदुषो विज्ञानात्मनो ब्रह्मणः श्रवेद्यस्य विरुद्धधर्मवत्त्वेन दहनतुहिनवद्भिन्नत्वाद्विदुषः सर्वकर्मत्यागेनासौ कारणविशेषः स्यादित्याह अन्यत्वादिति अविक्रियादिति च्छेदः तथापि कूटस्थमविक्रियं ब्रह्म प्रतिपद्यमानस्य कुतो विक्रियासंभवेत् ब्रह्मप्रतिपत्तिविरोधादित्याशंक्याह नहीति अयमात्मा ब्रह्मेत्यादिश्रुत्या समाधत्ते न विदुष इति किंच विद्वत्ताविशिष्टस्य केवलस्य वा नाद्यः॥

ननूक्तमेव आत्मनोऽविक्रियत्वं कर्मासंभवे कारणविशेषः सत्यमुक्तो न तु स कारणविशेषोऽन्यत्वाद्विदुषोऽविक्रियादात्मन इति नह्यविक्रियं स्थाणुं विदितवतः कर्म न संभवतीति चेन्न विदुषः आत्मत्वात् नहि देहादि

वेदाविनाशिनं नित्यं य एनमजमव्ययं कथं स पुरुषः पार्थ कं घातयति हंति कं॥२१॥

संघातस्य विद्वत्ता अतः पारिशेष्यादसंहत आत्मा विद्वानविक्रिय इति तस्य विदुषः कर्मासंभवादाक्षेपो युक्तः कथं स पुरुष इति॥ ॥

विशिष्टस्य विद्वत्तायां विशेषणस्यापि तत्त्वसंगान्न च विशेषणीभूतसंघातस्याचेतनत्वाद्विद्वत्तायुक्तेत्याह नहीति॥ द्वितीये तु जीवब्रह्मविभागासिद्धिरित्याह अत इति किंच प्रामाणिकविरुद्धधर्मत्वस्यासिद्धत्वात्प्रातिभासिकस्य च विंबप्रतिविंबयोरनैकांत्याद्वैदानुमानायोगाज्जीवब्रह्मणोरभेदसिद्धिरित्यभिप्रेत्य फलितमाह इतितस्येति॥

नन्वविक्रियब्रह्मस्वरूपतया सर्वकर्मासंभवे विदुषो विहृत्तापि कथं संभवति । नहि ब्रह्मणोऽविक्रियस्य विद्यालक्षणा विक्रि-
या भवितुमर्हतीति तत्राह । यथेति । अदृष्टेंद्रियादिसहकृतमंतःकरणप्रदीपप्रभावद्विषयपर्यंतं परिणतं बुद्धिवृत्तिरुच्यते ।
तत्र प्रतिबिंबितं चैतन्यमभिव्यंजकबुद्धिवृत्तेरविवेकाद्विषयज्ञानमिति व्यवह्रियते तेनात्मोपलब्धा कल्पते तत्त्वाऽ-
विद्याप्रयुक्तमिथ्यासंबंधनिबंधनं तथैवाध्यासिकसंबंधेन ब्रह्मात्मैक्याभिव्यंजकवाक्योत्थबुद्धिवृत्तिद्वारा विद्वाना-

यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्याविक्रिय एव सन् बुद्धिवृत्त्यविवेकज्ञानेनाविद्ययोपल-
ब्धात्मा कल्प्यते । एवमेवात्मानात्मविवेकविज्ञानेन बुद्धिवृत्त्याविद्ययाऽसत्यरूपयैव परमा-
र्थतो विक्रिय एवात्मा विद्वानुच्यते विदुषः कर्मासंभववचनाद्यानि कर्माणि शास्त्रेषु वि-
धीयंते तान्यविदुषो विहितानीति भगवतो निश्चयोऽवगम्यते ॥ ॥

त्मा व्यपदिश्यते तेन च मिथ्यासंबंधेन पारमार्थिकाविक्रियत्वविहतिरस्तीत्यर्थः । अहं ब्रह्मेति बुद्धिवृत्तेर्मोक्षावस्थायामपि भा-
वादात्मनः सविशेषत्वमाशंक्य तस्या यावदुपाधिसत्त्वमेवेत्याह । असत्येति । ननु कूटस्थस्यात्मनो मिथ्यैव चाविद्यावत्त्वेपि
तस्य कर्माधिकारनिवृत्तौ कस्य कर्माणि विधीयंते नहि निरधिकाराणां तेषां विधिरित्याशंक्याह । विदुष इति ॥ ॥

कर्माण्यविदुषो विहितानीति विशेषमाक्षिपति॥ नन्विति॥ कर्मविधानमविदुषो विदुषश्च विद्याविधानमिति विभागे का हानिरित्याशंक्याह॥ विदितेति॥ विद्याया विदितत्वं लब्धत्वं॥ कर्मविधिरविदुषो विदुषो विद्याविधिरिति विभागासंभवे फलितमाह॥ तत्रेति॥ धर्मज्ञानानंतरमनुष्ठेयस्य भावाद्ब्रह्मज्ञानोत्तरकालं च तदभावाद्ब्रह्मज्ञानहीनस्यैव कर्मविधिरिति समाधत्ते नानुष्ठेयस्येति विशेषोपपत्तिमेव प्रपंचयति॥ अग्निहोत्रादीति॥ ननु देहादिव्यतिरिक्तात्मज्ञानं विना पारलौकिकेषु क

ननु विद्याप्यविदुष एव विधीयते विदितविद्यस्य पिष्टपेषणावत् विद्याविधानानर्थक्यात्॥ तत्राविदुषः कर्माणि विधीयंते न विदुष इति विशेषो नोपपद्यते न अनुष्ठेयस्य भावाभावविशेषोपपत्तेरग्निहोत्रादिविध्यर्थज्ञानोत्तरकालमग्निहोत्रादिकर्मानेकसाधनोपसंहारपूर्वकं अनुष्ठेयं कर्त्ताऽहं कर्त्तव्यं ममेत्येवं प्रकारविज्ञानवतोऽविदुषो यथानुष्ठेयं भवति॥ न तु तथा न जायत इत्याद्यात्मस्वरूपविध्यर्थज्ञानोत्तरकालभाविकिंचिदनुष्ठेयं भवति॥ ॥

र्मसु प्रवृत्तेरनुपपत्तेस्तथाविधज्ञानवता कर्मानुष्ठेयमिति चेत्तत्राह॥ कर्त्ताहमिति॥ आत्मनि कर्त्ताभोक्तेत्येवं विज्ञानवत्त्वेपि ब्रह्मज्ञानविहीनत्वेनाविदुषोनुष्ठेयं कर्मेत्यर्थः॥ देहादिव्यतिरेकज्ञानवद्ब्रह्मज्ञानमपि ज्ञानत्वाविशेषात्कर्मप्रवृत्तावुपकरिष्यतीत्याशंक्याह॥ नत्विति॥ अनुष्ठेयविरोधित्वादविक्रियात्मज्ञानस्येति शेषः॥ ॥

स्य

ननु ब्रह्मात्मैकत्वज्ञानादुत्तरकालमपि कर्त्ताहमित्यादिज्ञानोत्पत्तौ कर्मविधिः सावकाशः स्यादितिनेत्याह नाहमिति कारणाभावादिति शेषः कर्तृत्वादिज्ञानमन्यदित्युक्तं अनुष्ठानानुष्ठानयोरुक्तविशेषाद्विदुषोनुष्ठानं विदुषोनेत्युपसंहरति इत्येष इति नचात्मविदोनन्वेदनुष्ठेयं किंचिदस्ति कथं तर्हि विद्वान्यजेतेत्यादि शास्त्रात्तं प्रति कर्माणि विधीयंते तत्राह यः पुनरिति आत्मनि कर्तृत्वादिज्ञानापेक्षया कर्मस्वधिकृतत्वज्ञानेन तथाविधं पुरुषं प्रति कर्माणि विधीयंते सच श्रौचीनवचनादविद्वानेवेति निश्चीयते ऐक्यव्यक्तृत्वादिज्ञानवतस्तद्विपरीतकर्तृत्वादिज्ञानद्वारा कर्मसु प्रवृत्तिरित्यर्थः कर्मासंभवे ब्रह्म

किंतु नाहं कर्ता न भोक्तेति ब्रह्मात्मैकत्वाकर्तृत्वज्ञानादन्यन्नोपपद्यत इत्येष विशेष उपपद्यते यः पुनः कर्ताहमिति वेत्त्यात्मानं तस्य ममेदं कर्तव्यमित्यवश्यंभाविनी बुद्धिः स्यात्तदपेक्षयासोधिकृत इति तं प्रति कर्माणि संभवंति सच अविद्वानुभौ तौ न विजानीत इति वचनाद्विशेषितस्य च विदुषः कर्माक्षेपवचनात्कथं स पुरुष इति तस्माद्विदुषो मुमुक्षोश्च सर्वकर्मसंन्यास एवाधिकारोऽत एव भगवान्नारायणः सांख्यान्विदुषोऽविदुषश्च कर्मिणः
प्रविभज्य द्वे निष्ठे ग्राहयति ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनामिति

विदो हेत्वंतरमाह विशेषितस्येति वेदाविनाशिनमित्यादिनेति शेषः यद्यपि विदुषो नास्ति कर्म तथापि विविदिषोः स्यादित्याशंक्याह तस्मादिति विद्यया विरुद्धत्वादिष्यमाणमोक्षप्रतिपक्षत्वाच्च कर्मणामित्यर्थः यद्यपि मुमुक्षोराश्रमकर्माण्यपेक्षितानि तथापि विद्यातत्फलाभ्यामविरुद्धान्येव तान्यभ्युपगतानि अन्यथा विविदिषासंन्यासविधिविरोधादित्यभिप्रेत्योक्तेर्थे भगवतोऽनुमतिमाह अत एवेति विदुषो विविदिषोश्च संन्यासाधिकारोऽविदुषस्तु कर्मणीति विभागस्येष्ट

उभौ तौ न विजानीतावित्यादि

गी·भा·
३९

अधिकारिभेदेन निष्ठाद्वयं भगवता वेदव्यासेनापि दर्शितमित्याह। तथा चेति। अध्ययनं ध्यौपेन विधिना स्वाध्यायपाठे त्रैवर्णिकस्य प्रवृत्त्यनंतरं तत्र क्रियामार्गो ज्ञानमार्गश्च द्वौ मार्गावधिकारिभेदेनावेदितावित्यर्थः। आदिशब्दात् यत्र वेदाः प्रतिष्ठिता इत्यादि गृह्यते। उक्तयोर्मार्गयोस्तत्त्यक्तां परिहर्तुमुदाहरणांतरमाह। तथेति। बुद्धिद्वारा कर्मतत्फलयोर्वैराग्योदयात्पूर्वं कर्ममार्गो विहितः विरक्तस्य पुनः संन्यासपूर्वको ज्ञानमार्गो दर्शितः। स चेतरस्मादतिशयशालीति श्रुतमित्यर्थः। उक्ते विभागे पुनरपि

तथा च पुत्रायाह भगवान् व्यासः द्वाविमावथ पंथानावित्यादि। तथा च क्रियापथश्चैव पुरस्तात्संन्यासश्चेत्ये तमेव विभागं पुनः पुनर्दर्शयिष्यति भगवान्। अतत्त्वविदहंकारविमूढात्मा कर्ताहमिति मन्यते तत्त्ववित्तु नाहं करोमीति। तथा च सर्वकर्माणि मनसा संन्यस्य आस्त इत्यादि। तत्र केचित्पंडितंमन्या वदंति। जन्मादिषड्भावविकाररहितोऽविक्रियोऽकर्तैकोहमात्मेति न कस्यचिद्विज्ञानमुत्पद्यते यस्मिन्सति सर्वकर्मसंन्यास उपदिश्यते। ॥

वाक्यशेषानुकूल्यमादर्शयति। एतमेवेति। अहंकारविमूढात्मेत्येतस्य व्याख्यानमतत्त्वविदिति। तत्त्ववित्त्विति श्लोकमवतार्य तात्पर्यार्थं संगृह्णाति। नाहमिति। पूर्वेण क्रियापदेनेतिशब्दः संबध्यते। विरक्तमधिकृत्य वाक्यांतरं पठति। तथा चेति। आदिशब्दस्तस्यैव श्लोकस्य शेषसंग्रहार्थः। अविक्रियात्मज्ञानात्कर्मसंन्यासे दर्शिते मीमांसकमतमुत्थापयति। तत्रेति। आत्मनो ज्ञानक्रियाशक्त्याधारत्वेनाविक्रियत्वाभावादविक्रियात्मज्ञानं संन्यासकारणीभूतं न संभवतीत्यर्थः। ॥

श्रीगी·
२

शिव
३९

यथोक्तज्ञानाभावो विषयाभावाद्वा मानाभावाद्वेति विकल्पाद्यं दूषयति नन्वित्यादिना न तावदविक्रियात्माऽभावो न जायते म्रियते
वेत्यादिशास्त्रस्याप्रवाक्यतया प्रमाणस्यांतरेण कारणमानर्थक्यायोगादित्यर्थः द्वितीयं प्रत्याह यथा चेति पारलौकिककर्मविधि
सामर्थ्यसिद्धं विज्ञानमुदाहरति कर्त्तुश्चेति कर्मकांडादज्ञाते धर्मादौ विज्ञानोत्पत्तिवद्ज्ञानकांडादज्ञाते ब्रह्मात्मनि विज्ञानोत्पत्तिर
विरुद्धाप्रमाणत्वाविशेषादित्यर्थः ज्ञानस्य मनःसंयोगजन्यत्वादात्मनश्चाश्रुत्या मनोगोचरत्वनिरासान्नात्मज्ञाने साधनमस्तीति शं

तन्न न जायत इत्यादिशास्त्रोपदेशानर्थक्यप्रसंगात् यथा च शास्त्रोपदेशसामर्थ्याद्धर्माधर्मास्तित्वविज्ञानं कर्त्तुश्च देहांतरसंबं
धिविज्ञानमुत्पद्यते तथा शास्त्रात्तस्यैवात्मनो विक्रियत्वादकर्तृत्वैकत्वादिविज्ञानं कस्मान्नोत्पद्यत इति प्रष्टव्यास्ते करणागो
चरत्वादिति चेन्न मनसैवानुद्रष्टव्यमिति श्रुतेः शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणं ॥

कते करणेति श्रुतिमाश्रित्य परिहरति नमनसेति तत्त्वमस्यादिवाक्योत्थमनोवृत्त्यैव शास्त्राचार्योपदेशमनुसृत्य द्रष्टव्यं तत्त्व
मिति श्रूयते स्वरूपेण स्वप्रकाशमपि ब्रह्मात्मवस्तु वाक्योत्थबुद्धिवृत्त्यभिव्यक्तं सविकल्पकव्यवहारालंबनं भवतीति मनोगो
चरत्वोपचारादसिद्धं करणागोचरत्वमित्यर्थः कथं तर्हि ब्रह्मात्मनो मनोविषयत्वनिषेधश्रुतिरित्याशंक्यासंस्कृतमनोवृ
त्त्यविषयत्वविषया सेति मत्वा नः सन्नाह शास्त्रेति

सत्यपि श्रुत्यादौ तदनुग्राहकाभावान्नास्माकमविक्रियात्मज्ञानमुत्पत्तुमर्हतीत्याशंक्याह तथेति तस्याविक्रियस्यात्मनोधिगत्यर्थं वि
मतो विकारो नात्मधर्मो विकारत्वादुभयाभिमतविकारवदित्यनुमाने पूर्वोक्तश्रुतिस्मृतिरूपागमे च सत्येव तस्मिन्नोत्पद्यते ज्ञानमिति वचः
साहसमात्रं सत्येव मानेमेयं न भातीतिवदित्यर्थः नन्वयं यथोक्तं ज्ञानमुत्पन्नमपि हानायोपादानाय वा न भवतीति कुतोऽस्य फलवत्त्वं त
त्राह ज्ञानं चेति अवश्यमिति प्रकाशप्रवृत्तेस्तमो निवृत्तिव्यतिरेकेणानुपपत्तिवदात्माज्ञाननिवृत्तिमंतरेणात्मज्ञानोत्पत्ते

तस्यात तदधिगमायानुमाने आगमे च सति ज्ञानं नोत्पद्यत इति साहसमेतत् ॥ ज्ञानं चोत्पद्यमानं तद्विपरीतमज्ञानमवश्यं
बाधत इत्यभ्युपगंतव्यं तच्चाज्ञानं दर्शितं हंता हं हतोस्मीति उभौ तौ न विजानीत इत्यत्र चात्मनो हननक्रियायाः कर्तृत्वं
कर्मत्वं हेतुकर्तृत्वं चाज्ञानकृतं दर्शितं ॥ तच्च सर्वक्रियास्वपि समानं कर्तृत्वादेरविद्याकृतत्वं ॥

रनुपपत्तिरित्यर्थः ॥ नन्वज्ञानस्य ज्ञानप्रागभावत्वात्तन्निवृत्तिरेव ज्ञानं न तु निवर्तकमिति तत्राह तच्चेति ॥ कथं पुनर्भगवताज्ञाना
भावातिरिक्तमज्ञानं दर्शितमित्याशंक्याह अत्र चेति विमतं ज्ञानाभावो न भवति उपादानत्वान्मृदादिवदिति भावः ॥ ननु हनन
क्रियाया एव न हिंस्यादिति निषिद्धत्वात्तत्कर्तृत्वादेरज्ञानकृतत्वेपि विहितक्रियाकर्तृत्वादेर्न तथात्वमिति नेत्याह तच्चेति ॥

नतावदात्मनिकर्तृत्वादिनियममुक्तिप्रसंगान्नचानित्यमपिनिरुपादानंभावकार्यस्योपादाननियमान्नचानात्मातदुपादानमात्मनि
तत्प्रतिभानान्नचात्मैवतदुपादानंकूटस्थस्यतस्याविद्यांविनातद्योगादित्याह अविक्रियत्वादिति । कर्तृत्वाभावेपिकारयितृत्वंस्या
दित्याशंक्याह विक्रियावानिति । आत्मनिकर्तृत्वादिप्रतिभानस्यानाद्यनिर्वाच्यमज्ञानमुपादानंतन्निवृत्तिश्चतत्त्वज्ञानादित्युक्तमि
दानींकर्तृत्वकारयितृत्वयोरविद्याकर्तृत्वेभगवतोनुमतिंदर्शयति । तदेतदिति । विदुषोयदिकर्माधिकाराभावोभगवतोभिमत

अविक्रियत्वादात्मनोदर्शितंविक्रियावान्हिकर्तात्मनःकर्मभूतमन्यंप्रयोजयति । कुर्विति । नदेतदविशेषेणविदुषः
सर्वक्रियासुकर्तृत्वंहेतुकर्तृत्वंचप्रतिषेधतिभगवान्विदुषःकर्माधिकाराभावप्रदर्शनार्थंवेदाविनाशिनंनित्यं
कथंसपुरुषइत्यादिना । क्वपुनर्विदुषोऽधिकारइत्येतदुक्तंपूर्वमेवज्ञानयोगेनसांख्यानामिति । तथाचसर्वक
र्मणांसंन्यासंवक्ष्यति । सर्वकर्माणिमनसासंन्यस्येत्यादिना । ननुमनसेतिवचनान्नवाचिकानांकायिकानांच
॥ संन्यासइतिचेन्नसर्वकर्माणीतिविशेषितत्वान्मानसानामेवसर्वकर्मणामितिचेत् ॥

त्तर्हिकुत्रतस्यजीवतोऽधिकारःस्यादितिपृच्छति । क्वपुनरिति । ज्ञाननिष्ठयामित्युक्तंस्मारयति । उक्तमिति । तदंगभूतेसर्वक
र्मसंन्यासेचतस्याधिकारोस्तीत्याह तथेति । वक्ष्यमाणेवाक्येसर्वकर्मसंन्यासोनप्रतिभातिमानसानामेवकर्मणांविशेष
णवशात्त्यागावगमादितिशंकते । नन्विति । विशेषणांतरमाश्रित्यदूषयति । नसर्वेति । मनसेतिविशेषणान्मानसेष्वेव
कर्मसुसर्वशब्दःसंकुचितःस्यादितिशंकते मानसानामिति ॥

सर्वात्मना मनोव्यापारत्यागे व्यापारांतराणामनुपपत्तेः सर्वकर्मसंन्यासः सिद्ध्यतीति परिहरति नेत्यादिना ॥ मानसेष्वपि कर्मसु संन्यासे संकोचान्नवागादिव्यापारानुपपत्तिरिति शंकते ॥ शास्त्रीयाणामिति ॥ अन्यानीयशास्त्रीयवाक्कायकर्मकारणान्यशास्त्रीयाणि मानसानितानि च सर्वाणि कर्माणीत्यर्थः ॥ वाक्यशेषमादाय दूषयति ॥ न नैवेति ॥ नहि विवेकबुद्ध्या सर्वाणि कर्माण्यशास्त्रीयाणि संन्यस्यतिष्ठतीति युक्तं नैव कुर्वन्नित्यादिविशेषणस्य विवेकबुद्धेश्च त्यागहेतोस्तत्त्यक्त्वा दित्यर्थः ॥ भगवदभिमतसर्वकर्मसंन्यासस्यावस्थाविशेषे संकोचं दर्शयन्नाशंकते ॥ मरिष्यत इति ॥ संन्यासो जीवदवस्थायामेवात्र विवक्षित इत्यत्र लिं

नमनोव्यापारपूर्वकत्वात् वाक्कायव्यापाराणां मनोव्यापाराभावे कर्मानुद्दयापत्तेः ॥ शास्त्रीयाणां वाक्कायकर्मणां कारणानि मानसानि वर्जयित्वान्यानि सर्वकर्माणि मनसा संन्यस्येति चेन्न नैव कुर्वन्न कारयन्निति विशेषणात् सर्वकर्मसंन्यासोयं भगवतोक्तः ॥ मरिष्यतो न जीवत इति चेतन ॥ नवद्वारे पुरे देही आस्त इति विशेषणानुपपत्तेः ॥ नहि सर्वकर्मसंन्यासेन मृतस्य तद्देहे आसनं संभवति ॥ अकुर्वतोऽकारयतश्च देहे संन्यस्येति संबंधो न देह आस्त इति चेन्न ॥ ॥

गं दर्शयन्नुत्तरमाह ॥ न नवेति ॥ अनुपपत्तिमेव स्फोरयति ॥ नहीति ॥ अन्वयविशेषात्तद्व्याख्यानेन लिंगाऽसिद्धिं चोदयति ॥ अकुर्वत इति ॥ विवेकवशादशेषाण्यपि कर्माणि देहे यथोक्ते निःक्षिप्याकुर्वन्नकारयंश्च विद्वानवतिष्ठतेतथा च देहे कर्माणि संन्यस्याकुर्वतोऽकारयतश्च सुखमासनमिति संबंधसंभवाद्विशेषणस्य सति देहे कर्मत्यागविषयत्वाऽभावाज्जीवतः सर्वकर्मत्यागो नास्तीत्यर्थः ॥ अथवा अकुर्वत इत्यादि पूर्वत्रैव संबंधनीयं ॥ लिंगासिद्धिचोद्यं तु देहे संन्यस्येत्यारभ्येत्युन्नेयं ॥

आत्मनः सर्वत्राविक्रियत्वनिर्द्धारणाद्देहसंबंधमंतरेण कर्तृत्वकारयितृत्वाप्राप्तेरप्राप्तप्रतिषेधप्रसंगपरिहारार्थमस्य
दुक्तएवसंबंधः साधीयानितिसमाधत्ते ॥ नसर्वत्रेति ॥ श्रुतिषुस्मृतिषुचेत्यर्थः ॥ किंच ॥ संबंधस्याकांक्षासन्निधियोग्य
ताधीनत्वादाकांक्षावशादस्मदभिमतसंबंधसिद्धिरित्याह ॥ आसनेति ॥ भवदिष्टस्तु संबंधोन सिद्ध्यति ॥ आकांक्षाभा
वादित्याह ॥ तदनपेक्षत्वाच्चेति ॥ संन्यासशब्दस्य निक्षिपार्थत्वात्तस्यचाधिकरणसापेक्षत्वादस्मदिष्टसंबंधसिद्धिरित्या
शंक्याह ॥ संपूर्वकस्त्विति ॥ अन्ययोपसर्गवैयर्थ्यादित्यर्थः ॥ मनसाविवेकविज्ञानेन सर्वाणि कर्माणिपरित्यज्यास्तेदेहे

सर्वत्रात्मनोऽविक्रियत्वावधारणादासनक्रियायाश्चाधिकरणापेक्षत्वात्तदनपेक्षत्वाच्च संन्यासस्यसंपूर्वकस्तु
न्यासशब्दस्त्यागार्थोननिक्षेपार्थः ॥ तस्माद्गीताशास्त्रे आत्मज्ञानवतः संन्यासएवाधिकारोनकर्मणीतितत्र
तत्रोपरिष्टादात्मज्ञानप्रकरणेदर्शयिष्यामः ॥ प्रकृतंतुवक्ष्यामः तत्रात्मनोऽविनाशित्वंप्रतिज्ञातं ॥ २१ ॥

विद्वान्नित्यस्यैवसंबंधस्यसाधुत्वंमत्वोपसंहरति ॥ तस्मादिति ॥ सर्वव्यापारोपरमात्मनः संन्यासस्याविक्रियात्मज्ञाना
विरोधित्वात्प्रयोजकज्ञानवतोवैधेसंन्यासेऽधिकारः सम्य ॥ ग्ज्ञानवतस्त्ववैधेस्वाभाविकेफलात्मनीतिविभागम
भ्युपेत्योक्तेर्थेवाक्यशेषानुगुण्यंदर्शयतिइति ॥ तत्रतत्रेति ॥ आत्मनोऽविक्रियत्वेनकर्माऽसंभवंप्रतिपाद्याविक्रि
यत्वहेतुसमर्थनार्थमेवोत्तरग्रंथमवतारयति ॥ प्रकृतंत्विति ॥ किंतत्प्रकृतमितिशंकमानंप्रत्याह ॥ तत्रेति ॥ अविनाशि
त्वमित्युपलक्षणमविक्रियत्वमित्यर्थः ॥ २१ ॥

तदेवदृष्टांतेनस्पष्टयितुमुत्तरश्लोकमुत्थापयति। नदित्यादिना। आत्मनः स्वतोविक्रियाभावेपिपुरातनदेहत्यागेनूतन
देहोपादानेचविक्रियावत्वध्रौव्यादविक्रियत्वमसिद्धमितिचेत्तत्राह। वासांसीति। शरीराणिजीर्णानिवयोहानिंगतानि

तत्किमिवेतिउच्यते। वासांसिवस्त्राणिजीर्णानिदुर्बलतांगतानियथालोकेवि
हायपरित्यज्यनवान्यभिनवानिगृह्णातिउपादत्तेनरःपुरुषोऽपराण्यन्यानितथा।

वासांसिजीर्णानियथाविहायनवानिगृह्णातिनरोऽपराणि। तथाश
रीराणिविहायजीर्णान्यन्यानिसंयातिनवानिदेही। २२ ॥

तद्वदेवशरीराणिविहायजीर्णान्यन्यानिसंयातिसंगच्छतिनवानिदेहीआत्मापुरुषवदविक्रियएवेत्यर्थः। २२।

वलीपलीतादिसंगतानीत्यर्थः। वाससांपुरातनानांपरित्यागेनवीनानांचोपादानेत्यागोपादानकर्तृभूतलौकिकपुरु
षस्याविकारित्वेनैकरूपत्वादात्मनोदेहत्यागादानयोरविरुद्धमविक्रियत्वमितिवाक्यार्थमाह। पुरुषवदिति। २२।

पृथिव्यादिभूतचतुष्टयप्रयुक्तविक्रियाभाक्त्वादात्मनोऽसिद्धमविक्रियत्वमिति शंकते। कस्मादिति। यतो न भूतान्यात्मानं गोचर

कस्मादविक्रिय एवेत्याह। न एनं प्रकृतं देहिनं छिंदंति शस्त्राणि निरवयवत्वात्। नावयवविभागं कुर्वंति शस्त्राण्य
स्यादीनि। तथा नैनं दहति पावकोऽग्निरपि न भस्मीकरोति। तथा न चैनं क्लेदयंत्यापोऽपां हि सावयवस्य वस्तुन आर्द्री

नैनं छिंदंति शस्त्राणि नैनं दहति पावकः॥ न चैनं
क्लेदयंत्यापो न शोषयति मारुतः॥ २३॥

भावकरणेनावयवविश्लेषापादने सामर्थ्यं तन्निरवयवे आत्मनि न संभवति तथा स्नेहवद्द्रव्यं स्नेहशोषणेन ना
शयति वायुरेवमेनं त्वात्मानं न शोषयति मारुतोऽपि॥ २३॥

यितुमर्हंति। अतो युक्तमाकाशवत्तस्याविक्रियत्वमित्याह। आहेत्यादिना॥ २३॥ श्रीरामायनमः॥ ॥

॥गी॰भा॰॥
॥५२॥ हेतु

अ॰२

पृथिव्यादिभूतप्रयुक्तच्छेदनाद्यर्थक्रियाभावे योग्यताभावं कारणमाह । यत इति पूर्वार्द्धमुत्तरार्द्धे हेतुत्वेन योजयति । यस्मा
दिति । नित्यत्वादीनामन्योऽन्यं हेतुहेतुमद्भावं सूचयति । नित्यत्वादित्यादिना । न च नित्यत्वं परमाणुषु व्यभिचारादसाधकं सर्वग
तत्वस्येति वाच्यं तेषामेवाऽप्रामाणिकत्वेन व्यभिचाराऽनवतारात् न च सर्वगतत्वेपि क्रियाशक्तिमत्वमात्मनोस्तीति युक्तं वि

यत एवं तस्मात् । यस्मादन्योन्यनाशहेतूनि भूतान्यात्मानं नाशयितुं नोत्सहन्ते तस्मा
न्नित्यो नित्यत्वात्सर्वगतः सर्वगतत्वात्स्थाणुः स्थाणुरिव स्थिर इत्येतत् स्थिरत्वादच
लः । अयमात्मातः सनातनश्चिरंतनो न कारणात्कुतश्चिन्निष्पन्नोऽभिनव इत्यर्थः ॥ ॥

भुत्वेनाभिमतेन भस्मितदनुपलंभान्न च क्रियाशक्तिमत्वे स्थैर्यमास्थातुं शक्यं तथाविधस्य मृदादेरस्थिरत्वदर्शनादित्या
शयेनाह । स्थिरत्वादिति । स्वतो नित्यत्वेपि कारणान्नाशसंभवादुत्पत्तिरपि संभावितेति कुतश्चिरंतनत्वमित्याशंक्याह । न

॥कारणादिति॥

॥शिव॥
॥५२॥

आत्मनो विक्रियत्वस्य न जायते म्रियते वेत्यादिना साधितत्वात्तस्यैव पुनः पुनरभिधाने पुनरुक्तिरित्याशंक्याह ॥ नैतेषामिति ॥ अ
नाशंकनीयस्य चोद्यस्य प्रसंगं प्रदर्शयति ॥ यत इति ॥ अतो वेदाविनाशिनमित्यादौ शंक्यते पौनरुक्त्यमिति शेषः कथं तत्र पौनरु
क्त्याशंका समुन्मिषति तत्राह ॥ तत्रेति ॥ वेदाविनाशिनमित्यादिश्लोकः सप्तम्या परामृश्यते श्लोकशब्देन न जायते म्रियते वेत्या

नैतेषां श्लोकानां पौनरुक्त्यं चोदनीयं ॥ यत एकेनैव श्लोकेन आत्मनो नित्यत्वं अविक्रियत्वं चोक्तं न जायते म्रियते
वेत्यादिना ॥ तत्र यदेवात्मविषयं किंचिदुच्यते ॥ तदेतस्मात् श्लोकार्थान्नातिरिच्यते ॥ किंचिच्छब्दतः पुनरुक्तं किंचिद

अच्छेद्योयमदाह्योयमक्लेद्योशोष्य एव च ॥ नित्यः सर्वगतः स्थाणुरचलोयं सनातनः ॥ २४ ॥ ॥

र्थत इति सत्यं दुर्बोधत्वादात्मवस्तुनः पुनः पुनः प्रसंगमापाद्यापाद्य शब्दांतरेण तदेव वस्तु निरूपयति भगवान्वासु
देवः ॥ कथं तु नाम संसारिणां बुद्धिगोचरतामापन्नं सदव्यक्तं तत्वं संसारनिवृत्तये स्यादिति ॥ २४ ॥ ॥

दिरुच्यते न त्विह श्लोके जन्ममरणाद्यभावो भिलप्यते वेदेत्यादौ पुनरपक्षयाद्यभावो विवक्ष्यते तत्र कथमर्थातिरेकाभा
वमाश्रित्य पौनरुक्त्यं चोद्यते तत्राह ॥ किंचिदिति ॥ कथं तर्हि पौनरुक्त्यं न चोदनीयमिति मन्यसे तत्राह दुर्बोधत्वादिति
॥ पुनः पुनर्विधाभेदेन वस्तु निरूपयतो भगवतो भिप्रायमाह ॥ कथं त्विति ॥ २४ ॥ ॥

न

त्वंपदार्थपरिशोधनस्य प्रकृतत्वात्तत्रैव हेत्वंतरमाह । किंचेति । आत्मनो नित्यत्वादिलक्षणस्य तथैव प्रथा स्यात्किमिति न भवतित त्राह । अव्यक्त इति । मा तर्हि प्रत्यक्षत्वं भूदनुमेयत्वं तु स्यादिति शंकाह । अत एवेति । तदेव प्रपंचयति । यद्धीति । अतींद्रियत्वेपि सामान्यतो दृष्टविषयत्वं भविष्यतीत्याशंक्य कूटस्थेनात्मना व्याप्तिलिंगाभावान्नैवमित्याह । अविकार्य इति । अविकार्यत्वे व्यतिरेक दृष्टांतमाह । यथेति । किं चात्मा न विक्रियते निरवयवद्रव्यत्वात् । घटवदिति व्यतिरेक्यनुमानमाह । निरवयवत्वादिति । निरवयवत्वेपि विक्रियावत्त्वे काक्षतिरित्याशंक्याह । नहीति । सावयवस्यैव विक्रियावत्त्वदर्शना

किंच । अव्यक्तः सर्वकरणाविषयत्वान्न व्यज्यत इत्यव्यक्तोयमात्मा । अत एवाचिंत्योयं यद्धींद्रियगोचरं वस्तु तच्चिंताविषयत्वमापद्यते । अयं तु आत्मानेंद्रियगोचर अत एवाऽचिंत्योऽविकार्यो यथा क्षीरं दध्यातंचनादिना

अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते ॥ तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥

विकुरुते अयं च निरवयवत्वादविक्रियो नहि निरवयवं किंचिद्विक्रियात्मकं दृष्टम विक्रियत्वादविकार्योयमात्मे सुच्यते तस्मादेवं यथोक्तप्रकारेणैनमात्मानं विदित्वा त्वं नानुशोचितुमर्हसि हंताऽहमेतेषां मयेमे हन्यंत इति २५

द्विक्रियावत्त्वे निरवयवत्वानुपपत्तिरित्यर्थः । यद्धि सावयवं सविक्रियं क्षीरादि तद्दध्यादिना विकार्यतामापद्यते न चात्मनः श्रुतिप्रमितनिरवयवत्वस्य सावयवत्वमतोऽविक्रियत्वान्नायं विकार्यो भवितुमलमिति फलितमाह । अविक्रियत्वादिति । आत्मयाथात्म्योपदेशमशोच्यानन्वशोचस्त्वमित्युपक्रम्य व्याख्यातमुपसंहरति । तस्मादिति । अव्यक्तत्वाचिंत्यत्वाविकार्यत्वनित्यत्वसर्वगतत्वादिरूपो यस्मादात्मा निर्द्धारितस्तस्मात्तथैव ज्ञातुमुचितस्तत्ज्ञानस्य फलत्वादित्यर्थः

आत्मनो नित्यत्वस्य प्रागेव सिद्धत्वादुत्तरश्लोकानुपपत्तिरित्याशंक्याह। आत्मन इति। अनित्यत्वमिति छेदः। शाक्यानां लोकायतानां वा मतमिदमापरामृश्यते श्रोतुरर्जुनस्य पूर्वोक्तमात्मयाथार्थ्यं श्रुत्वापि तस्मिन्निर्द्धारणासिद्धेर्द्वयोर्मतयोरन्यतरमताभ्युपगमः शंकितस्तदर्थो निपातद्वयप्रयोग इत्याह। अथ चेति। प्रकृतस्यात्मनो नित्यत्वादिलक्षणस्य पुनः पुनर्जातत्वाभिमानो मानाभावादसंभवीत्याशंक्याह। लौकिकेति। नित्यजातत्वाभिनिवेशे पौनःपुन्येन मृतत्वाभिनिवेशो व्याहतः

आत्मनोऽनित्यत्वमभ्युपगम्येदमुच्यते। अथ चेत्यभ्युपगमार्थे एनं प्रकृतमात्मानं नित्यजातं। लौकिकप्रसिद्ध्या प्रत्यनेकशरीरोत्पत्तिं जातो जात इति मन्यसे तथा प्रत्यनेकशरीरविनाशं नित्यं वा मन्यसे मृतं मृतो मृत इति

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं। तथापि त्वं महाबाहो नैवं शोचितुमर्हसि २६।

तथापि तथाभाविन्यात्मनि त्वं महाबाहो नैवं शोचितुमर्हसि। जन्मवतो नाशः नाशवतो जन्म चावश्यंभाविनाविति २६।

स्यादित्याशंक्याह। तथेति। परकीयं मतमनुभाषितमभ्युपेत्याहो वत महत्पापं कर्त्तुं व्यवसिता वयमित्यादेस्त्वदीयशोकस्यानिरवकाशत्वमित्याह। तथापीति। एवमित्यर्जुनस्य दृश्यमानमनुशोकप्रकारं दर्शयित्वा तस्य कर्त्तुमयोग्यत्वे हेतुमाह। जन्मवत इति। जन्मवतो नाशो नाशवतश्च जन्मेत्येताववश्यंभाविनौ मिथो व्याप्ताविति योजना। २६। ॥

तयोरवश्यंभावित्वेसत्यनुशोकस्याऽकर्त्तव्यत्वेहेत्वंतरमाह तथाचेति आत्मानमुद्दिश्यानुशोकंकर्त्तुमयोग्यत्वेपि भूतसंघा

तथाचसति जातस्यहिलब्धजन्मनोध्रुवोऽव्यभिचारीमृत्युर्मरणं ध्रुवंजन्ममृतस्यचतस्मा
दपरिहार्योयंजन्ममरणलक्षणोर्थः तस्मिंजन्ममरणलक्षणेअपरिहार्येर्थेनत्वंशोचितुमर्हसि

जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच॥त
स्मादपरिहार्येर्थेनत्वंशोचितुमर्हसि॥२७॥

कार्यकारणसंघातात्मकान्यपिभूतान्युद्दिश्यशोकोनयुक्तःकर्त्तुं॥२७॥ ॥

तात्मकानिभूतान्युद्दिश्यतस्यकर्त्तव्यत्वमाशंक्याह कार्येति॥२७॥श्रीरामचंद्रायनमः॥श्रीरामायनमः॥ ॥

समनंतरश्लोकस्तत्र हेतुमाह। यत इति। चाक्षुषदर्शनमात्रव्यावृत्तिं व्यावर्त्तयति। अनुपलब्धिरिति। न हि यथोक्तसंघातरूपाणि भू
तानि पूर्वमुत्पत्तेरुपलभ्यंते तेन तानि तथा व्यपदेशभांजि भवंतीत्यर्थः। किं तन्मध्यं यदेषां व्यक्तमिष्यते तदाह। उत्पन्नानीति। उत्प
त्तेरूर्द्धं मरणाच्च पूर्वं व्यावहारिकं सत्त्वं मध्यमेषां व्यक्तमिति तथोच्यते। जन्मानुसारित्वं विलयस्य युक्तमिति मत्वा तात्पर्यमाह। मरणा

यतः। अव्यक्तादीनि अव्यक्तमदर्शनमनुपलब्धिरादिर्येषां भूतानां पुत्रमित्रादिकार्यकारणसंघातात्मकानां तान्यव्यक्ता
दीनि भूतानि प्रागुत्पत्तेरुत्पन्नानि च प्राङ्मरणाद्व्यक्तमध्यान्यव्यक्तनिधनान्येव पुनरप्यदर्शनं निधनं मरणं येषां ता

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत। अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥

न्यव्यक्तनिधनानि मरणादूर्ध्वमप्यव्यक्ततामेव प्रतिपद्यंते इत्यर्थः। तथा चोक्तं अदर्शनादापतितः पुनश्चादर्शनं गतः
मध्ये किंचित्सदृश्येत तत्र का परिदेवनेति। तत्र का परिदेवना को वा प्रलापः अदृष्टदृष्टप्रनष्टभ्रांतिभूतेष्वित्यर्थः ॥ २८ ॥

दिति। उक्तेर्थे पौराणिकसंमतिमाह। तथा चेति। तत्रेत्यस्यार्थमाह। अदृष्टेति। पूर्वमदृष्टानि संति पुनर्दृष्टानि तान्येव पुनर्नष्टदृष्टा
नि। तदेवं भ्रांतिविषयतया घटीयंत्रवच्चक्रीभूतेषु भूतेषु शोकनिमित्तस्य प्रलापस्य नावकाशोस्तीत्यर्थः ॥ २८ ॥ ॥

= नासौ तव न तस्य त्वं वृथा किं = १

अर्जुनं प्रत्युपालंभं दर्शयित्वा प्रकृतस्यात्मनो दुर्विज्ञेयत्वात्तं प्रत्येवोपालंभो न संभवतीति मन्वानः सन्नाह दुर्विज्ञेय इति। तथा चात्माज्ञाननिमित्तविभ्रमस्य साधारणत्वादसाधारणो पालंभस्य निरवकाशतेत्याह। किंत्वामिति। अहंप्रत्ययवेद्यत्वादात्मनो दुर्विज्ञेयत्वमसिद्धमिति शंकते। कथमिति। विशिष्टस्यात्मनोऽहंप्रत्ययदृष्टत्वेपि केवलस्य तदभावादस्तिदुर्विज्ञेयतेति श्लोकमवतारयति आहेति। आश्चर्यवदित्याद्येन पादेनात्मविषयदर्शनस्य दुर्लभत्वं दर्शयता द्रष्टृदौर्लभ्यमुच्यते। द्वितीयेन तद्विषयवदनस्य

दुर्विज्ञेयो यं प्रकृत आत्मा किं त्वामेवैकमुपालंभे साधारणे भ्रांतिनिमित्ते कथं दुर्विज्ञेय आत्मेत्याह। आश्चर्यवदाश्चर्यमदृष्टमद्भुतमकस्माद्दृश्यमानं तेन तुल्यमाश्चर्यवदाश्चर्यमिवैनमात्मानं पश्यति कश्चिदाश्चर्यवदेनं वदति तथैव

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः। आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् २९

चान्य आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वा दृष्ट्वोक्त्वाप्येनं वेद न चैव कश्चिदथवा यो यं आत्मानं पश्यति स आश्चर्यतुल्यो यो वदति यश्च शृणोति सोऽनेकसहस्रेषु कश्चिदेव भवत्यतो दुर्बोध आत्मेत्यभिप्रायः। २९। ॥

दुर्लभत्वोक्त्या तदुपदेष्टुस्तथात्वं कथ्यते। तृतीयेन तदीयश्रवणस्य दुर्लभत्वद्वारा श्रोतुर्विरलता विवक्षिता श्रवणदर्शनोक्तीनां भावेपि तद्विषयसाक्षात्कारस्यात्यंतायासलभ्यत्वं चतुर्थेनाभिहितमिति विभागः। आत्मगोचरदर्शनादिदुर्लभत्वद्वारा दुर्बोधत्वमात्मनः साधयति आश्चर्यवदित्यादिना। संप्रत्यात्मनिद्रष्टुर्वक्तुः श्रोतुः साक्षात्कर्तुश्च दुर्लभत्वाभिधानेन तदीयं दुर्बोधत्वं कथयति। अथवेति। व्याख्यानद्वयेपि फलितमाह अत इति। २९।

श्लोकांतरमुत्थापयति ॥ अथेति ॥ आत्मनोदुर्ज्ञानत्वप्रदर्शनाऽनंतरमितियावत् ॥ वस्तुवृत्तापेक्षया शोकमोहयो
रकर्त्तव्यत्वं प्रकरणार्थः ॥ देहेवध्यमानेपिदेहिनोवध्यत्वाभावे फलितमाह ॥ तस्मादिति ॥ हेतुभागं विभज

अथेदानींप्रकरणार्थउपसंह्रियते ॥ सर्वस्य प्राणिजातस्य देहेवध्यमानेपिनवध्योयंदेही
शरीरीनित्यंसर्वदासर्वावस्थायांनिरवयवत्वान्नित्यत्वाच्चावध्योयं अवधार्होयंदेहेशरीरेसर्वे

देहीनित्यमवध्योयंदेहेसर्वस्यभारत ॥ तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि ॥ ३० ॥

गत्वास्थावराद्येषुस्थितोपियस्मात्तस्माद्भीष्मादीनिसर्वभूतान्युद्दिश्यनत्वंशोचितुमर्हसि ॥ ३० ॥

ते ॥ सर्वस्येति ॥ फलितप्रदर्शनपरंश्लोकार्द्धंव्याचष्टे ॥ तस्माद्भीष्मादीति ॥ ३० ॥ श्रीरामचंद्रायनमः ॥ ॥

श्लोकांतरमवतारयन्वृत्तं कीर्त्तयति इहेति पूर्वश्लोकः सप्तम्यर्थः यत्पारमार्थिकं तत्त्वं तदपेक्षायामेव केवलं शोकमोहयोरसं
भवो न भवति किंतु स्वधर्ममपि चावेक्ष्येति संबंधः स्वकीयं क्षात्रधर्ममनुसंधाय ततश्चलनं परिहर्त्तव्यमित्यर्थः यद्धि क्षत्रिय
स्य धर्मादनपेतं श्रेयःसाधनं तदेव मयानुवर्त्तितव्यमित्याशंक्याह धर्म्यादिति जातिप्रयुक्तं स्वाभाविकं धर्ममेव विशिनष्टि
क्षत्रियस्येति पुनर्नकारोपादानमन्वयार्थं प्रचलितुमयोगित्वे प्रतियोगिनं दर्शयति स्वाभाविकादिति स्वाभाविकत्वम

इह परमार्थतत्त्वापेक्षायां शोकमोहौ वा न संभवतीत्युक्तं न केवलं परमार्थतत्त्वापेक्षायामेव किंतु
स्वधर्ममपि स्वो धर्मः स्वधर्मः क्षत्रियस्य युद्धं तमप्यवेक्ष्य त्वं न विकंपितुं न प्रचलितुं नार्हसि स्वाभा

स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यते ३१

विकाद्धर्मादात्मस्वाभाव्यादित्यभिप्रायः तच्च युद्धं पृथिवीजयद्वारेण धर्मार्थं प्रजारक्षार्थं चेति ध
र्म्यं धर्मादनपेतं परमधर्म्यं तस्माद्धर्म्याद्युद्धात् श्रेयोऽन्यत् क्षत्रियस्य न विद्यते हि यस्मात् ॥ ३१ ॥ ॥

शास्त्रीयत्वमिति शंकां वारयितुं तात्पर्यमाह आत्मेति आत्मनः स्वस्यार्जुनस्य स्वाभाव्यं क्षत्रियस्वभावप्रयुक्तं वर्णाश्रमो
चितं कर्म तस्मादित्यर्थः धर्मार्थं प्रजापरिपालनार्थं च प्रयतमानस्य युद्धादुपरिरंसा श्रद्धातव्येत्याशंक्याह तच्चेति ततो
पि श्रेयस्करं किंचिदनुष्ठातुं युद्धादुपरतिरुचितेत्याशंक्याह तस्मादिति तस्माद्युद्धात्प्रचलनमनुचितमिति शेषः ३१

युद्धस्य गुर्वाद्यनेकप्राणिहिंसात्मकस्याहिंसाशास्त्रविरोधान्नास्ति कर्त्तव्यतेति शंकते कुतश्चेति । अग्नीषोमीयहिंसावत् युद्धमपि क्षत्रियस्य विहितत्वादनुष्ठेयं सामान्यशास्त्रतो विशेषशास्त्रस्य बलीयस्त्वादित्याह उच्यत इति । तथापि युद्धे प्रवृत्तानामैहिकामुष्मिकस्थायिसुखाऽभावादुपरतिरेव ततो युक्ता प्रतिभातीत्याशंक्याह । यदृच्छयेति । चिरेण

कुतश्च तद्युद्धं कर्त्तव्यमित्युच्यते । यदृच्छया चाप्रार्थितं आगतं उपपन्नं स्वर्गद्वारं अपावृतमुद्घा

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतं ॥ सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशं ३२ ॥

टितं एतदीदृशं युद्धं लभंते क्षत्रियाः हे पार्थ किं न सुखिनस्ते ॥ ३२ श्रीरामचंद्राय नमः ॥

धप

चिरतरेण त्वया यागाद्यनुष्ठायिनः स्वर्गादिभाजो भवंति युद्धं मा नास्तु क्षत्रिया वहिर्मुखता विहीनाः सहसैव स्वर्गादिसुखभोक्तारस्तेन तव कर्त्तव्यमेव युद्धमिति व्याख्यानेन स्फुटयति । यदृच्छयेत्यादिना ॥ इहामुत्र च भाविसुखवतामेव क्षत्रियाणां स्वधर्मभूत युद्धे सिद्धे स्वादर्थेनोत्थानं शोकमोहौ हित्वा कर्त्तव्यमित्यर्थः ३२ ॥

स्वधर्मस्य युद्धस्य श्रद्धया करणे स्वर्गादिमहाफलप्राप्तिं प्रदर्श्य तदकरणे प्रत्यवायप्राप्तिं प्रदर्शयन्नुत्तरश्लोकगताथशब्दा
र्थं कथयति। एवमिति। विहितत्वं फलवत्त्वमित्यनेन प्रकारेणेत्यर्थः। अन्वयार्थं पुनश्चेदित्यनूद्यते। महादेवादीत्या
दिशब्देन महेंद्रादयो गृह्यंते ३३ युद्धाकरणे क्षत्रियस्य प्रत्यवायमामुष्मिकमापाद्य शिष्टगर्हालक्षणं दीर्घकालभाविन

एवं कर्त्तव्यताप्राप्तमपि। अथ चेत्त्वमिमं धर्म्यं धर्मादनपेतं संग्रामं युद्धं न करिष्यसि चेत्ततस्तदकर
णात्स्वधर्मं कीर्त्तिं च महादेवादिसमागमनिमित्तां हित्वा केवलं पापमवाप्स्यसि ३३ न केवलं स्वधर्मकी

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि। ततः स्वधर्मं कीर्त्तिं च हित्वा पापमवाप्स्यसि ३३
अकीर्तिं चापि भूतानि कथयिष्यंति तेऽव्ययां। संभावितस्य चाकीर्त्तिर्मरणादतिरिच्यते। ३४

र्त्तिपरित्यागः। अकीर्तिं चापि भूतानि कथयिष्यंति ते तवाऽव्ययां दीर्घकालां धर्मात्मा शूर इत्येवमादिभि
र्गुणैः संभावितस्य चाकीर्त्तिर्मरणादतिरिच्यते संभावितस्य चाकीर्त्तेर्वरं मरणमित्यर्थः। ३४ ॥
मैहिकमपि प्रत्यवायं प्रतिलंभयति। न केवलमिति। युद्धे स्वमरणसंदेहात्तत्परिहारार्थमकीर्त्तिरपि सोढव्या स्वात्मसं
रक्षणस्य श्रेयस्करत्वादित्याशंक्याह। धर्मात्मेति। मान्यानामकीर्त्तिर्भवंती मरणादपि दुःसहेति तात्पर्यार्थमाह संभा

इतश्च त्वया युद्धकर्म कर्तव्यमित्याह किंचेति प्राणिषु कृपया नाहं युद्धं करिष्यामीत्याशंक्याह भयादिति महारथा नैव विशिनष्टि येषां चेति दुर्योधनादिभिस्तवोपहास्यता विरसनार्थं संग्रामे प्रवृत्तिरवश्यं भाविनीत्यर्थः ॥ ३५ ॥ इतश्च त्वं युद्धादुपरमं मा

किंच भयात्कर्णादिभ्यो रणाद्युद्धादुपरतं निवृत्तं मंस्यंते चिंतयिष्यंति न कृपयेति त्वां महारथाः दुर्योधनप्रभृतयः के मंस्यंते तत्राह येषां च त्वं दुर्योधनादीनां बहुमतो बहुभिर्गुणैर्युक्त इत्येवं मतो बहुमतो भूत्वा पुनस्त्वं यास्यसि लाघवं लघुभावं ॥ ३५ ॥ किंच अवाच्यवादान वक्तव्यवादांश्च बहून् अनेकप्र

भयाद्रणादुपरतं मंस्यंते त्वां महारथाः ॥ येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवं ॥ ३५ ॥ अवाच्यवादांश्च बहून्वदिष्यंति तवाऽहिताः ॥ निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किं ॥ ३६ ॥

कारान्वदिष्यंति तवाहिताः शत्रवः निंदंतः कुत्सयंतः तव त्वदीयं सामर्थ्यं निवातकवचादियुद्धनिमित्तं तस्मात्ततो निंदाप्राप्तेर्दुःखात् दुःखतरं नु किं ततः कष्टतरं दुःखं नास्तीत्यर्थः ॥ ३६ ॥ ॥

कार्षीरित्याह किंचेति ननु भीष्मद्रोणादिवधप्रयुक्तं कष्टतरं दुःखमसहमानो युद्धान्निवृत्तः स्वसामर्थ्यनिंदनादिशत्रुकृतं सोढुं शक्ष्यामीत्याशंक्याह तत इति ३६

तर्हि युद्धे गुर्वादिवधवशान्मध्यस्थनिंदा ततो निवृत्तौ शत्रुनिंदेत्युभयतः पाशा रज्जुरित्याशंक्याह ॥ युद्धे पुनरिति ॥ जयेपराजये
च लाभध्रौव्याद्युद्धार्थमुत्थानमावश्यकमित्याह ॥ तस्मादिति ॥ नहि परिशुद्धकुलस्य क्षत्रियस्य युद्धायोपयुक्तस्य तस्मादुपर

युद्धे पुनः क्रियमाणे कर्णादिभिः ॥ हतो वा प्राप्स्यसि स्वर्गं जित्वा वा कर्णादीन् शूरान्महीं भोक्ष्यसे उभयथापि ते लाभ

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीं ॥ तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः ॥ ३७ ॥ श्रीरामाय॰

एवेत्यभिप्रायः यत एवं तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः जेष्यामि शत्रून्मरिष्यामि वेति निश्चयं कृत्वेत्यर्थः ३७

मः साधीयानित्याह ॥ कौंतेयेति ॥ जये पराजये चेत्येतदुभयथेत्युच्यते ॥ जयादिनियमाभावेपि लाभनियमे फलितमाह ॥
॥ यत इति ॥ कृतनिश्चयत्वमेव विशदयति ॥ जेष्यामीति ३७ ॥

पापभीरुतया युद्धाय निश्चयं कृत्वा नोत्थातुं शक्नोमीत्याशंक्याह तत्रेति ॥ युद्धस्य स्वधर्मतया कर्त्तव्यत्वे सतीति यावत् सुहृत् जीवनमरणादिनिमित्तयोः सुखदुःखयोः समताकारणं कथमिति तत्राह रागद्वेषाविति लाभः शत्रुकोशादिप्राप्तिरलाभस्तद्विपर्ययः न्यायेन युद्धेनापरिभूतेन परस्य परिभवो जयस्तद्विपर्ययस्त्वजयस्तयोर्लाभालाभयोर्जयाजययोश्च समताकरणे समान

॥ तत्र युद्धं स्वधर्म इत्येवं युध्यमानस्योपदेशमिदं शृणु सुखदुःखे समे तुल्ये कृत्वा रागद्वेषावकृत्वेत्येतत् तथा चलाभालाभौ जयाजयौ च समौ कृत्वा ततो युद्धाय युज्यस्व घटस्व नैवं युद्धं कुर्वन् पापफलमवाप्स्यसीति ॥ उपदेशस्त्वप्रासंगिकः शोकमोहापनयनाय लौकिको न्यायः ॥ ॥

मेव रागद्वेषावकृत्वेत्येतद्दर्शयितुं तथेत्युक्तं ॥ यथोक्तोपदेशवशात् परमार्थदर्शनप्रकरणे युद्धकर्त्तव्यतोक्तेः समुच्चयपरत्वं शास्त्रस्य प्राप्तमित्याशंक्याह एषइति क्षत्रियस्य तव धर्मभूतयुद्धकर्त्तव्यतानुवादस्य प्रसंगागतत्वादस्योपदेशस्य नानेन निमिषेण समुच्चयसिद्धिरित्यर्थः ॥

ननुस्वधर्ममपिचावेक्ष्येत्यादिश्लोकैर्न्यायावष्टंभेनशोकमोहापनयनस्यतात्पर्येणोक्तत्वात्तस्मिन्नुपसंहर्त्तव्येकिमितिपरमा
र्थदर्शनमुपसंह्रियतेतत्राह श्लोकैरिति स्वधर्ममपीत्यादिभिरतीतैःश्लोकैःशोकमोहयोःस्वजनमरणगुर्वादिवधशं
कानिमित्तयोःसम्यग्ज्ञानप्रतिबंधकयोरपनयनार्थंवर्णाश्रमकृतंधर्ममनुतिष्ठतःस्वर्गादिसिध्यतिनान्यथेत्यन्वय

स्वधर्ममपिचावेक्ष्येत्याद्यैःश्लोकैरुक्तोनतुतात्पर्येणपरमार्थदर्शनंत्विहप्र॥ कृतंतथाचो

सुखदुःखेसमेकृत्वालाभालाभौजयाजयौ॥ ततोयुद्धाययु
ज्यस्वनैवंपापमवाप्स्यसि॥ ३८॥ श्रीरामायनमः॥ ॥

क्तंउपसंहरत्येषातेभिहितेतिशास्त्रविषयविभागप्रदर्शनाय॥ ३८॥ ॥

व्यतिरेकात्मकोलोकसिद्धोन्यायोयद्यपिदर्शितस्तथापिनासौतात्पर्येणोक्तइत्यर्थः किंतर्हितात्पर्येणोक्तंतदाह परमार्थे
ति नत्वेवाहंजातुनासमित्यादिःसतत्त्वापरामृश्यतेउक्तंनजायतेम्रियतेवेत्यादिनोपपादितमित्यर्थः उपसंहारप्रयो
जनमाह शास्त्रेति तस्यवस्तुद्वाराविषयोनिष्ठाद्वयंतस्यविभक्तस्यतेनैवविभागेनप्रदर्शनार्थंपरमार्थदर्शनोपसंहार

ननु किमित्यत्र शास्त्रस्य विषयविभागः प्रदर्श्यते उत्तरत्रैव तद्विभागप्रवृत्तिप्रतिपत्त्योः संभवादिति तत्राह इहहीति शास्त्रप्रवृत्तेः श्रोतृप्रतिपत्तेश्च सौकर्यार्थमादौ विभागसूचनमित्यर्थः उपसंहारस्य फलवत्त्वमेवमुक्त्वा तमेवोपसंहारमवतारयति अत आहेति परमार्थात्मतत्त्वविषयां ज्ञाननिष्ठामुक्तामुपसंहृत्य वक्ष्यमाणं संगृह्णाति योगे त्विति तामेव बुद्धिं वि

इह हि दर्शिते पुनः शास्त्रविषयविभागे उपरिष्टात् ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनामिति निष्ठाद्वयविषयं शास्त्रं सुखं प्रवर्त्तयिष्यते श्रोतारश्च विषयविभागेन सुखं ग्रहीष्यंतीत्यत आह ॥ एषा ते तुभ्य

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ॥

मभिहितोक्ता सांख्ये परमार्थवस्तुविवेकविषये बुद्धिर्ज्ञानं साक्षाच्छोकमोहादिसंसारहेतुदोषनिवृत्तिकारणं ॥

शिष्टफलवत्त्वेनाभिष्टौति बुद्धेति तत्रोपसंहारभागं विभजते एषेत्यादिना बुद्धिशब्दस्यांतःकरणविषयत्वं व्यावर्त्तयति ज्ञानमिति तस्य सहकारिनिरपेक्षस्य विशिष्टफलवत्त्वमाचष्टे साक्षादिति शोकमोहौ रागद्वेषौ कर्त्तृत्वं भोक्तृत्वमित्यादिरनर्थः संसारस्तस्य हेतुर्दोषः स्वाज्ञानं तस्य निवृत्तौ निरपेक्षं कारणं ज्ञानं अज्ञाननिवृत्तौ ज्ञानस्यान्वयव्यतिरेकसमधिगतसाधनता

मु=१

योगे त्विमामित्यादिव्याकुर्वन्योगशब्दस्य प्रकृते चित्तवृत्तिनिरोधविषयत्वं व्यवच्छिनत्ति ॥ तस्याप्तीति प्रकृतं युक्त्युपयुक्तं ज्ञानं
तत्पदेन परामृश्यते ॥ ज्ञानोदयोपायमेव प्रकटयति निःसंगतयेति फलाभिसंधिवैधुर्येनिःसंगत्वं बुद्धिस्तुतिप्रयोजनमा

योगे तु तस्याप्युपाये निःसंगतया ॥ द्वंद्वप्रहाणपूर्वकमीश्वराराधनार्थे कर्मयोगे कर्मानुष्ठाने समाधि ॥ यो
गे चेमामनंतरमेवोच्यमानां बुद्धिं शृणु तां बुद्धिं स्तौति प्ररोचनार्थं बुद्ध्या ययायोगविषयया युक्तो हे पार्थ क

बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि ॥ ३९ ॥

र्मबंधं कर्मैव धर्माधर्माख्यं बंधः तं प्रहास्यसि ईश्वरप्रसादनिमित्तं ज्ञानं प्राप्येत्यभिप्रायः ॥ ३९ ॥ श्रीरामा॰

ह ॥ प्ररोचनार्थमिति ॥ अभिष्टुता हि बुद्धिः श्रद्धातव्या सत्यनुष्ठानमधिकरोतीति तेन स्तुतिरर्थवतीत्यर्थः ॥ कर्माऽनुष्ठानविषय
बुद्ध्या कर्मबंधस्य कुतो निवृत्तिः ॥ न हि तत्त्वज्ञानमंतरेण समूलं कर्म हातुं शक्यमित्याशंक्याह ॥ ईश्वरस्येति ॥ ३९ ॥ ॥

ननुकर्मानुष्ठानस्यानैकांतिकफलत्वेनाकिंचित्करत्वादनेकानर्थकलुषितत्वेनदोषवत्वाच्चयोगबुद्धिरपिनश्रद्धे
येतितत्राह किंचान्यदिति अन्यच्चकिंचिदुच्यते कर्मानुष्ठानस्यावश्यकत्वेकारणमितियावत् कर्मणासहसमाधे
रनुष्ठातुमशक्यत्वादनेकांतरायसंभवाच्चफलस्यचसाक्षात्कारस्यदीर्घकालाभ्याससाध्यस्यैकस्मिन्जन्मन्यसंभ

किंचान्यत् नेहाभिक्रमनाशोस्तिनेहमोक्षमार्गेकर्मयोगेअभिक्रमनाशोऽभिक्रमणमभि

नेहाभिक्रमनाशोऽस्तिप्रत्यवायोनविद्यते॥

क्रमः प्रारंभः तस्यनाशोनास्तियथा कृष्यादेर्योगविषयेप्रारंभस्यनानैकांतिकफलत्वमित्यर्थः॥

वादर्थाद्योगीभ्रष्टस्येतानर्थेचविनिपतेदित्याशंक्याह नेहेति प्रतीकत्वेनोपात्तस्यनकारस्यपुनरन्वयानुगुणत्वेनना
स्तीत्यनुवादः यत्तुकर्मानुष्ठानस्यानैकांतिकफलत्वेनाकिंचित्करत्वमुक्तंतत्दूषयति यथेति कृषिवाणिज्या
देरारंभस्यानियतंफलंसंभावनामात्रोपनीतत्वात्नतथाकर्मणिवैदिकेप्रारंभस्यफलमनियतंयुज्यतेशास्त्रवि

यत्तूक्तमनेकानर्थकलुषितत्वेन दोषवदनुष्ठानमिति तत्राह॥ किंचेति॥ इतोपि कर्मानुष्ठानमावश्यकमिति ज्ञाप
कहेत्वंतरमेवस्फुटयति॥ नापीति॥ चिकित्सायां हि क्रियमाणायां व्याध्यतिरेको वा मरणं वा प्रत्यवायोपि संभाव्य
ते कर्मपरिपाकस्य दुर्विवेकत्वान्न तथा कर्मानुष्ठाने दोषोस्ति विहितत्वादित्यर्थः संप्रति कर्मानुष्ठानस्य फलं

किंच नापि चिकित्सावत्प्रत्यवायो विद्यते किंतु भवति स्वल्पमप्यस्य योगधर्मस्य॥

स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्॥४०॥

नुष्ठितं त्रायते रक्षति महतो भयात्संसारभयात् जन्ममरणादिलक्षणात्॥४०॥

दर्शयति॥ किंत्विति॥ उत्तरार्द्धं व्याकुर्वन्विवक्षितं फलं कथयति॥ स्वल्पमपीति॥ सम्यग्ज्ञानोत्पादनद्वारेण रक्षणं विव
क्षितं सर्वपापप्रसक्तोपि ध्यायन्निमिषमच्युतं पुनस्तपस्वी भवति पंक्तिपावनपावन इति स्मृतेरित्यर्थः॥४०॥

ननु बुद्धिद्वयातिरिक्तानि बुद्ध्यंतराण्यपि कणादादिशास्त्रप्रसिद्धानि विद्यंते। तथा च कथं बुद्धिद्वयमेव भगवतोपदिष्टमि
ति तत्राह। येयमिति। सैवैका प्रमाणभूता बुद्धिरित्याह। व्यवसायात्मिकेति। बुद्ध्यंतराण्यविवेकमूलान्यप्रमाणानीत्याह। बहु
शाखा हीति। व्यवसायात्मिका या बुद्धेः श्रेयोमार्गे प्रवृत्ता या विवक्षितं फलमाह। इतरेति। प्रकृतबुद्धिद्वयापेक्षया इतरा वि

येयं सांख्ये बुद्धिरुक्ता योगे च वक्ष्यमाणा सा। व्यवसायात्मिका निश्चयस्वभावा एकैव बुद्धिः

व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन।

तरविपरीत। बुद्धिशाखाभेदस्य बाधिका सम्यक्प्रमाणजनितत्वात्। इह श्रेयोमार्गे हे कुरुनंदन॥

परीताश्चाप्रमाणजनिताः स्वकपोलकल्पिता या बुद्धयस्तासां शाखाभेदः संसारहेतुस्तस्य बाधिकेति यावत्। तत्र हेतुः
सम्यगिति निर्दोषवेदवाक्यसमुत्थत्वादुक्तमुपायोपेयभूतं बुद्धिद्वयं साक्षात्पारंपर्याभ्यां संसारहेतुबाधकमित्यर्थः॥

उत्तरार्द्धं व्याचष्टे याः पुनरिति प्रकृतबुद्धिद्वयापेक्षया अर्थांतरत्वं तासामनर्थहेतुत्वं दर्शयति यासामिति अप्रामाणिकबुद्धी
नां प्रसक्तानुप्रसक्त्या जायमानानामतीव बुद्धिपरिणामविशेषाः शाखाभेदास्तेषां प्रचारः प्रवृत्तिस्तद्वशादित्येतत् अनंतत्वं स
म्यग्ज्ञानमंतरेण निवृत्तिरहितत्वं अपारत्वं कार्यस्यैव सतो वस्तुभूतकारणविरहित्वं अनुपरतत्वं स्फोरयति नित्येति कथं
तर्हि तन्निवृत्त्या पुरुषार्थपरिसमाप्तिस्तत्राह प्रमाणेति अन्वयव्यतिरेकाख्येनानुमानेनागमेन च पदार्थपरिशोधनपरेण
परिनिष्पन्ना विवेकात्मिका या बुद्धिस्तां निमित्तीकृत्य समुत्पन्नसम्यग्बोधानुरोधात्स्वकृता विपरीतबुद्धयो व्यावर्त्तंते तास्वसं

याः पुनरितरा बुद्धयो यासां शाखाभेदप्रचारवशादनंतोऽपारोऽनुपरतः संसारो नित्यप्रततो भवति प्रमाणजनितविवे
कबुद्धिनिमित्तवशाच्चोपरतास्वनंतभेदबुद्धिषु संसारोप्युपरमते ता बुद्धयो बहुशाखा बह्व्यः शाखा यासां ता बहुशाखा बहु

बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनां ॥४१॥

भेदा इत्येतत्प्रतिशाखाभेदेन ह्यनंताश्च बुद्धयः केषां अव्यवसायिनां प्रमाणजनितविवेकबुद्धिरहितानामित्यर्थः ॥४१॥

ख्यासु व्यावृत्तासु सतीषु निरालंबनतया संसारोपि स्थातुमशक्नुवन्नुपरतो भवतीत्यर्थः याः पुनरित्युपक्रांतास्तत्त्वज्ञानापनो
द्याः संसारास्पदभूता विपरीतबुद्धीरनुक्रामति ता बुद्धय इति बुद्धीनां वृक्षस्येव कुतो बहुशाखात्वं तत्राह बहुभेदा इत्येत
दिति एकैकां बुद्धिं प्रति शाखाभेदोऽवांतरविशेषस्तेन बुद्धीनामसंख्यात्वं प्रख्यातमित्याह प्रतिशाखेति बुद्धीनामानंत्य
प्रसिद्धिप्रद्योतनार्थो हिशब्दः सम्यग्ज्ञानवतां यथोक्तबुद्धिभेदभाक्त्वमप्रसिद्धमित्याशंक्याह केषामित्यादिना ॥४१॥

यदिसांख्ययोगरूपैकैव प्रमाणभूताबुद्धिस्तर्हिसैवसर्वेषां चित्तेकिमितिस्थिरानभवतितत्राह येषामिति तेयामिमांवाचंवं
दंतितयापहृतचेतसांकामिनांकामवशानिश्चयात्मिकाबुद्धिर्नप्रायःस्थिराभवतीत्याह यामिति इमामिस्यध्यय
नविध्युपात्तत्वेनप्रसिद्धत्वंकर्मकांडरूपायावाचोविवक्ष्यतेवक्ष्यमाणत्वंक्रियाविशेषबहुलामित्यादौद्रष्टव्यंकिंशुको
हिपुष्पशालीशोभमानोऽनुभूयतेनपुनरुपभोग्यफलभागीलक्ष्यते तथेयमपिकर्मकांडात्मिकाश्रूयमाणदशा
यांरमणीयावागुपलक्ष्यतेसाध्यसाधनसंबंधप्रतिभानात् नत्वेषानिरतिशयफलभागिनीकर्मानुष्ठानफलस्यानि

येषांव्यवसायात्मिकाबुद्धिर्नास्तिते यामिमांवक्ष्यमाणांपुष्पितांपुष्पितवृक्षइवशोभमानांश्रूयमाणांरमणी
यांवाचंवाक्यलक्षणां प्रवदंतिकेअविपश्चितअमेधसोविवेकिनइत्यर्थःवेदवादरताबहुर्थवादफलसाधनप्रका

यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः वेदवादरताः पार्थनान्यदस्तीतिवादिनः ४२

शकेषुवेदवादेषुरताःपार्थनअन्यत्स्वर्गपश्वादिफलसाधनेभ्यःकर्मभ्योऽस्तीत्येवंवादिनोवदनशीलाः ४२

सत्वादितिमत्वाह पुष्पितामिति वाक्यत्वेनलक्ष्यतेऽर्थवत्वप्रतिभानाद्वस्तुतस्तुनवाक्यमर्थाभावेसत्वादित्याह वाक्यलक्ष
णामिति प्रवक्तॄणांवेदवाक्यतात्पर्यपरिज्ञानाभावंसूचयति अविपश्चितइति वेदवादावेदवाक्यानितानिचबहूनामर्थवा
दानांसाधनानांचविधिविशेषाणांप्रकाशकानितेषुरतिरासक्तिस्तन्निष्टत्वंतद्रतमपितेषांविशेषणमित्याह वेदवा
देति कर्मकांडनिष्टत्वफलंकथयति नान्यदिति ईश्वरोवामोक्षोवानास्तीत्येवंवदंतोनास्तिकाःसंतःसम्यग्ज्ञानवंतोनभ

प्रकृतानप्रवक्तॄन् अविवेकिनो व्यवसायात्मिका बुद्धिभाक्त्वाऽसंभवसिद्ध्यर्थं विधांतरेण विशिनष्टि ते चेति तेषां
संसारपरिवर्त्तनप्रदर्शनार्थं प्रस्तुतां वाचमेव विशिनष्टि जन्मेति ननु पुंसां कामस्वभावत्वमयुक्तं चेतनस्येच्छावतस्तदा
त्मत्वानुपपत्तेरिति तत्राह कामपरा इति तत्परत्वं तत्तत्फलार्थित्वेन तत्तदुपायेषु कर्मस्वेव प्रवृत्ततया कर्मसंन्यासपूर्व

ते च कामात्मानः कामस्वभावाः कामपरा इत्यर्थः स्वर्गपराः स्वर्गः परः पुरुषार्थो येषां ते स्वर्गपराः स्वर्गप्रधा

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां ॥

नाः जन्मकर्मफलप्रदां कर्मणः फलं कर्मफलं जन्मैव कर्मफलं तत् प्रददातीति जन्मकर्मफलप्रदां वाचं प्रवदंतीत्य

काङ्क्षनाद् बहिर्मुखत्वं ननु कर्मनिष्ठानामपि परमपुरुषार्थापेक्षया मोक्षोपाये ज्ञाने भवत्याभिमुख्यमिति नेत्याह
स्वर्गेति तत्परत्वं तस्मिन्नेवासक्ततया तदतिरिक्तपुरुषार्थराहित्यनिश्चयवत्त्वमुच्चावचमध्यमदेहप्रभेदग्रहणं

वाचोयथोक्तफलप्रदत्वमप्रामाणिकमित्याशंक्यानुष्ठानद्वारातदुपपत्तिरित्याह ॥ क्रियेति ॥ क्रियाणामनुष्ठानानांयागदा
नादीनांविशेषादेशकालाधिकारिप्रयुक्ताःसंत्रीहीनैकाहलक्षणास्तेरवल्वस्यांवाचिप्राचुर्येणप्रतिभांतीत्यर्थः ॥ कथंच

क्रियाविशेषबहुलांक्रियाणांविशेषाःक्रियाविशेषास्तेबहुलायस्यांवाचितांस्वर्गपशुपुत्राद्यर्थायस्यावाचा
बाहुल्येनप्रकाश्यंतेभोगैश्वर्यगतिंप्रतिभोगश्चऐश्वर्यंचभोगैश्वर्येतयोःगतिःप्राप्तिर्भोगैश्वर्यगतिस्तांप्र

क्रियाविशेषबहुलांभोगैश्वर्यगतिंप्रति ॥ ४३ ॥

तिसाधनभूतायेक्रियाविशेषाःतद्बहुलां ॥ तांवाचंप्रवदंतोमूढाःसंसारेपरिवर्त्तंतइत्यभिप्रायः ॥ ४३ ॥ ॥

योक्तायांवाचिक्रियाविशेषाणांबाहुल्येनावस्थानमित्याशंक्यप्रकाश्यत्वेनैतद्विशदयति ॥ स्वर्गेति ॥ तथापितेषांमोक्षोपाय
त्वोपपत्तेस्तन्निष्ठानांमोक्षाभिमुख्यंभविष्यतिनेत्याह ॥ भोगेति ॥ यथोक्तांवाचमभिवदतांपर्यवसानंदर्शयति ॥ तद्बहुलामि

ननु कर्मकांडनिष्ठानां कर्मानुष्ठायिनामपि बुद्धिशुद्धिद्वारेणांतःकरणे साध्यसाधनभूतबुद्धिद्वयसमुदयसंभवादस्मतो
मोक्षो भविष्यति नेत्याह तेषां चेति तदात्मभूतानां तयोरेव भोगैश्वर्ययोरात्मकर्त्तव्यत्वेनारोपितयोरभिनिविष्टचे
तसितादात्म्याध्यासवतां बहिर्मुखानामित्यर्थः तथापि शास्त्रानुसारिण्या विवेकप्रज्ञया व्यवसायात्मिका बुद्धि

तेषां च ॥ भोगैश्वर्यप्रसक्तानां भोगः कर्तव्यः ऐश्वर्यं चेति भोगैश्वर्ययोरेव प्रसक्तानां प्रणयवतां
तदात्मभूतानां ॥ तया क्रियाविशेषबहुलया वाचा अपहृतचेतसां आछादितविवेकप्रज्ञानां व्यव

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां ॥ व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ४४॥

सायात्मिका सांख्ये योगे वा या बुद्धिः सा समाधौ समाधीयतेऽस्मिन्पुरुषोपभोगाय सर्वमिति समा
धिरंतःकरणं तस्मिन्समाधौ न विधीयते नास्थिरीभवतीत्यर्थः ॥ ४४॥ ॥

स्तेषामुदेष्यतीत्याशंक्याह तयेति ननु समाधिः संप्रज्ञातासंप्रज्ञातभेदेन द्विधोच्यते तत्र बुद्धिद्वयविधिरप्रसक्तःस
न्कथं निषिध्यते तत्राह समाधीयत इति ४४॥

अविवेकिनामपिवेदाभ्यासवतांविवेकबुद्धिरुदेष्यतीत्याशंक्याह येएवमिति तर्हिवेदार्थतयाकामात्मताप्रशस्तेत्याशंक्या ह निस्त्रैगुण्यइति भवेतिपदंनिर्द्वंद्वादिविशेषणेष्वपिप्रत्येकंसंबध्यतेत्रयाणांसत्वादिगुणानांपुण्यपापव्यामिश्र कर्मतत्फलसंबंधलक्षणःसमाहारस्त्रैगुण्यमित्संगीकृत्यव्याचष्टे संसारइति वेदशब्देनाऽत्रकर्मकांडमेवगृह्यतेत

येएवंविवेकबुद्धिरहितास्तेषांकामात्मनां त्रैगुण्यविषयाः त्रैगुण्यंसंसारोविषयः प्रकाशयित

त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन॥

व्योयेषांवेदानां॥ तेवेदास्त्रैगुण्यविषयास्त्वंतुनिस्त्रैगुण्योभवार्जुननिष्कामोभवेत्यर्थः॥ ॥

दभ्यासवतांतदर्थानुष्ठानद्वारासंसारध्रौव्यान्नविवेकावसरोऽस्तीत्यर्थः तर्हिसंसारपरिवर्जनार्थेविवेकसिद्धयेकिं कर्तव्यमित्याशंक्याह त्वंतिति कथंनिस्त्रैगुण्योभवेतिगुणत्रयराहित्यंविधीयतेनित्यसत्वस्थोभवेतिवाक्यशेष

विरचाहित्याशंक्याह निष्कामइति

सप्रतिपक्षत्वं परस्परविरोधित्वं पदार्थौ शीतोष्णादिलक्षणौ निष्कामत्वे द्वंद्वान्निर्गतत्वं शीतोष्णादिसहिष्णुत्वं हेतुमु
क्तात्राऽपि हेतुत्वपेक्षायां सदा सत्वगुणाश्रितत्वं हेतुमाह नित्येति योगक्षेमव्याप्तचेतसो रजस्तमोभ्यामसंस्पृ
ष्टे सत्वमात्रे समाश्रितत्वमशक्यमित्याशंक्याह नयेति योगक्षेमयोर्जीवनहेतुतया पुरुषार्थसाधनत्वान्नियो

सुखदुःखहेतू सप्रतिपक्षौ पदार्थौ द्वंद्वशब्दवाच्यौ ततो निर्गतो निर्द्वंद्वो भव त्वं नित्यसत्वस्थः
सदा सत्वगुणाश्रितो भव तथा निर्योगक्षेमोऽनुपात्तस्योपादानं योग उपात्तस्य रक्षणं क्षेमो

निर्द्वंद्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान् ॥४५॥

योगक्षेमप्रधानस्य श्रेयसि प्रवृत्तिर्दुष्करेत्यतो निर्योगक्षेमो भव आत्मवान प्रमत्तश्च भव एवं तवोपदेशः
स्वधर्ममनुतिष्ठतः ॥४५॥

गक्षेमो भवेति कुतो विधिरित्याशंक्याह योगेति योगक्षेमप्रधानत्वं सर्वस्य स्वारसिकमिति ततो निर्गमन
मशक्यमित्याशंक्याह आत्मवानिति अप्रमादो मनसो विषयपारवश्यशून्यत्वं अथ यथोक्तोपदेशस्य मु
मुक्षुविषयत्वादर्जुनस्य मुमुक्षुत्वमिह विवक्षितमित्याह एष इति ॥४५॥

ईश्वरार्पणधियास्वधर्मानुष्टानेपिफलकामनाभावाद्वैफल्यंयोगमार्गस्येतिमन्वानःशंकते सर्वेष्विति कर्ममार्गस्यफल
वत्वंप्रतिजानीते उच्यतइति किंतत्फलमित्युक्तेतद्विषयंश्लोकमवतारयति शृण्विति यथोदपानेकूपादौपरिछिन्नोद
केस्नानाचमनादिर्योर्थोयावानुत्पद्यतेसतावानपरिछिन्नेसर्वतःसंप्लुतोदकेसमुद्रेऽतर्भवतिपरिछिन्नोदकानामपरिछि
न्नोदकांशत्वात्तथाचसर्वेषुवेदोक्तेषुकर्मसुयावानर्थोविषयविशेषोपरक्तःसुखविशेषोजायतेसतावानात्मविदः

सर्वेषुवेदोक्तेषुकर्मसुयान्यनंतफलानितानिनापेक्ष्यंतेचेत्तावत्किमर्थंतानिईश्वरायेत्यनुष्ठी
यंतइत्युच्यते शृणु यथालोकेकूपतडागाद्यनेकस्मिंनुदपानेपरिछिन्नोदकेयावान्याव

यावानर्थउदपानेसर्वतःसंप्लुतोदके।

त्परिमाणःस्नानपानादिरर्थःफलंप्रयोजनंसस्सर्वोर्थःसर्वतःसंप्लुतोदकेतावानेवसंपद्यतेतेत
त्रांतर्भवतीत्यर्थः॥

स्वरूपभूतेसुखेंतर्भवतिपरिछिन्नानंदानामपरिछिन्नानंदांतर्भावाभ्युपगमात् एतस्यैवानंदस्यान्यानिभूतानिमात्रामुप
जीवंतीतिश्रुतेः तथाचापरिछिन्नात्मानंदप्राप्तिपर्यवसायिनोयोगमार्गस्यनास्तिवैफल्यमित्याह यावानिति उक्तमर्थम
क्षरयोजनयाप्रकटयति यथेति उदकंपीयतेऽस्मिन्नितिव्युत्पत्त्याकूपादिपरिछिन्नोदकविषयत्वमुदपानशब्दस्यदर्शयति
कूपेति कूपादिगतस्याभिधेयस्यसमुद्रेंऽतर्भावाऽसंभवात्कथमिदमित्थमित्याशंक्यार्थशब्दस्यप्रयोजनविषयत्वंव्युत्पा

गी॰ भा॰
५६

यस्फलत्वेनलीयतेतत्फलमित्युच्यतेतत्कथंतडागादिकृतंस्नानपानादितथेत्याशंक्यतस्याऽस्मीयसोनाशोपपत्तेरित्याह प्रयोजनमिति तडागादिप्रयुक्तप्रयोजनस्यसमुद्रनिमित्तप्रयोजनमात्रत्वमयुक्तमन्यस्यान्यार्थत्वानुपपत्तेरित्याशंक्याह तत्रेति घटाकाशादेरिवमहाकाशेपरिच्छिन्नोदककार्यस्यापरिच्छिन्नोदककार्येऽतर्भावःसंभवतितत्सान्नावितरापेक्षाऽभावादित्यर्थः पूर्वार्द्धंदृष्टांतभूतमेवंव्याख्यायदार्ष्टांतिकमुत्तरार्द्धंव्याकरोति एवमित्यादिना कर्मसुयोऽर्थइत्युक्तंव्यनक्ति यत्कर्म

एवंतावांस्तावत्परिमाणएवसंपद्यतेसर्वेषुवेदेषुवेदोक्तेषुकर्मस्वर्थोयोयत्कर्मफलंसोर्थोब्राह्मणस्यसंन्यासिनःपरमार्थतत्त्वंविजानतोयोर्थोयद्विज्ञानफलंसर्वतःसंप्लुतोदकस्थानीयंतस्मिंस्तावानेवसंपद्य

तावान् सर्वेषुवेदेषुब्राह्मणस्यविजानतः ४६ ॥

ते तत्रैवांऽतर्भवतीत्यर्थः यथाकृतायविजितायाधरेयाःसंयंत्येवमेनंसर्वंतदभिसमेतियत्किंचप्रजाः
साधुकुर्वंतियस्तद्वेदयत्सवेदेतिश्रुतेः सर्वंकर्माखिलमितिचवक्ष्यति ४६

फलमिति सोऽर्थोविजानतोब्राह्मणस्ययोर्थोतावानेवसंपद्यतइतिसंबंधः तदेवस्फुटयति विज्ञानेति तस्मिन्नंतर्भवतीतिशेषः सर्वकर्मफलेज्ञानफलेंतर्भवतीत्यत्रप्रमाणमाह सर्वमिति यत्किमपिप्रजाःसाधुकुर्वंतितत्सर्वंसपुरुषोभिसमेतिप्राप्नोतियःपुरुषस्तद्वेदविजानातियद्वस्तुसएकोवेदतद्वेद्यमितिश्रुतेरर्थःकर्मणःफलस्यसगुणज्ञानफलेंतर्भावःसंवर्गविद्यायांश्रूयतेकथमेतावतानिर्गुणज्ञानफलेकर्मफलांऽतर्भावःसंभवतीत्याशंक्याह सर्वमिति ४६

आ॰गी॰
२

शिव
५६

ज्ञानाय ३

तर्हि ज्ञाननिष्ठैव कर्त्तव्या तावतैव कर्मफलस्य लब्धतया कर्मानुष्ठानानपेक्षणादित्याशंक्याह तस्मादिति । योगमार्गस्य निष्फलत्वाभाव स्तच्छब्दार्थः । तर्हि परं परया पुरुषार्थसाधनं योगमार्गं परित्यज्य साक्षादेव पुरुषार्थकारणमात्मज्ञानं तदर्थमुपदेष्टव्यं तेस्मै हि स्पृहयति मनो मदीयमित्याशंक्याह तवचेति । तर्हि तत्फलाभिलाषोपि स्यादिति नेत्याह माफलेष्विति । पूर्वो

पुरुषार्थोऽर्थे २

तस्मात्त्वाम्ज्ञाननिष्ठाधिकाराप्राप्तेः कर्मण्यधिकृतेन कूपतडागाद्यर्थस्थानीयमपि कर्म कर्त्तव्यं तत्

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ॥

व च । कर्मण्येवाधिकारो न ज्ञाननिष्ठायां ते तव तत्र कर्म कुर्वतो मा फलेष्वधिकारोऽस्तु । ॥

क्तमेवार्थं प्रपंचयति माकर्मेति फलाभिसंध्यसंभवे कर्माऽकरणमेव श्रद्धधामीत्याशंक्याह मातइति ज्ञानानधिकारिणोपि कर्मत्यागप्रसक्तिं निवारयति कर्मण्येवेति एवकारार्थमाह नज्ञानेति नहि ते त्राऽब्राह्मणस्याऽपरिपक्वकषायस्य मुख्योऽधिकारः सिध्यतीत्यर्थः । फलैस्तर्हि बंधो दुर्वारः स्यादित्याशंक्याह तेतवेति कर्मण्येवाधिकारे सतीति सप्तम्यर्थः

ज्ञाने

फलेष्वधिकाराभावं स्फोटयति कर्मेति कर्मानुष्ठानात्प्राग्‌ ऊर्ध्वं तत्काले चेत्येतत्कदाचनेति विवक्षितमित्याह कस्यांचिदिति फलाभिसंधाने दोषमाह यदेति एवं फलतृष्णाद्वारेणेत्यर्थः कर्मफलहेतुत्वं विवृणोति यदा हीति तर्हि विफलं क्लेशरू

कर्मफलतृष्णा मा भूत् कदाचन कस्यांचिदप्यवस्थायामित्यर्थः यदा कर्मफले तृष्णा ते स्यात्तदा कर्मफलप्राप्तेर्हेतुः स्यादेवं कर्मफले मा हेतुर्भूः यदा हि कर्मफलतृष्णायुक्तः कर्मणि प्रवर्त्तते तदा कर्मफलस्यैव जन्मनो हेतुर्भवे

मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि ॥४७॥

यदि कर्मफलं नेष्यते किं कर्मणा दुःखरूपेणेति च मा ते तव संगोस्त्वकर्मण्यऽकरणे प्रीतिर्मा भूत् ॥४७॥ ॥

त्मकं कर्म न कर्त्तव्यमित्याशंकामनुभाष्य दूषयति यदीत्यादिना अकर्मणि ते संगो मा भूदित्युक्तमेव स्पष्टयति अक

आसक्तिरकरणेनयुक्ता चेत्तर्हि क्लेशात्मकंकर्मकिमुद्दिश्यकर्त्तव्यमित्याशंकामनूद्यश्लोकांतरमवतारयति। यदीत्यादिना। व
क्ष्यमाणंयोगमुद्दिश्यतन्निष्ठोभूत्वाकर्माणि क्लेशात्मकान्यपिविहितत्वादनुतिष्ठेत्याह। योगस्थःसन्निति। कर्मानुष्ठान
स्योद्देश्यंदर्शयति। केवलमिति। फलांतरापेक्षामंतरेणेश्वरार्थंतत्प्रसादनार्थमनुष्ठानमित्यर्थः। तर्हीश्वरसंतोषोभिला

यदिकर्मफलप्रयुक्तंनकर्त्तव्यंकर्मकथंतर्हिकर्मकर्त्तव्यमित्युच्यते। योगस्थःसन्कुरुकर्माणिकेवलमी
श्वरार्थंतत्रापीश्वरोमेतुष्यत्विति संगंत्यक्त्वा धनंजय फलतृष्णाशून्येनक्रियमाणेकर्मणिसत्वशुद्धिजा ज्ञान

योगस्थःकुरुकर्माणिसंगंत्यक्त्वा धनंजय। सिद्ध्यसिद्ध्योःसमोभूत्वासमत्वंयोगउच्यते॥४८॥

प्राप्तिलक्षणासिद्धिःतद्विपर्ययजाअसिद्धिःतयोःसिद्ध्यसिद्ध्योरपिसमस्तुल्योभूत्वाकुरुकर्माणि कोऽ
सौयोगोयत्रस्थःकुर्वित्युक्तमिदमेवतत्सिद्ध्यसिद्ध्योःसमत्वंयोगउच्यते॥४८॥

षगोचरीभूतोभविष्यतिनेत्याह। तत्रापीति। ईश्वरप्रसादनार्थेकर्मानुष्ठानेस्थितेपीत्यर्थः। संगंत्यक्त्वाकुर्वितिपूर्वे
णसंबंधः। आकांक्षितंपूरयित्वासिद्धिशब्दार्थमाह। फलेति। तद्विपर्ययजासत्वाऽशुद्धिजन्या ज्ञानाप्राप्तिलक्षणेति
यावत्। कर्माण्यनुष्ठितोयोगमुद्दिश्यशेषतयाप्रकृतमाकांक्षापूर्वकंप्रकटयति। कोसावित्यादिना॥४८॥ ॥

गी·भा·
५५

किमितियोगस्थेनतत्वज्ञानमुद्दिश्यकर्मकर्त्तव्यंफलाभिलाषेणापितदनुष्टानस्यसुलभत्वादित्याशंक्याह यथोक्तयोगयुक्तंकर्मस्तुवन्ननंतरश्लोकमुत्थापयति यस्तुनरिति अवरंकर्मबुद्धिसंबंधविधुरमितिशेषः बुद्धियुक्तस्यबुद्धियोगाधीनंप्रकर्षंसूचयति बुद्धीति बुद्धिसंबंधासंबंधाभ्यांकर्मणिप्रकर्षनिकर्षयोर्भावेकरणीयंनियछति बुद्धाविति यत्तफलेछया

यस्तुनःममत्वबुद्धियुक्तमीश्वराराधनार्थंकर्मएतस्मात्कर्मणः दूरेणातिप्रकर्षेणावरंअधमंनिकृष्टंकर्म

दूरेणह्यवरंकर्मबुद्धियोगाद्धनंजय॥

फलार्थिनाक्रियमाणंबुद्धियोगात्ममत्वबुद्धियुक्तात्कर्मणोजन्ममरणादिहेतुत्वात् हेधनंजय॥

पिकर्मानुष्टानंसुकरमितितत्राह कृपणाइति निकृष्टंकर्मैवविशिनष्टि फलार्थिनेति कस्मात्सतियोगिनःसकाशादिदंनिकृष्टमित्याशंक्यप्रतीकमुपादायव्याचष्टे बुद्धीत्यादिना फलाऽभिलाषेनक्रियमाणस्यकर्मणोनिकृष्टत्वेहेतुमाह ज

आ·गी·
२

राम
५५

समत्वबुद्धियुक्तात्कर्मणस्तद्धीनस्य कर्मणो जन्मादिहेतुत्वेन निकृष्टत्वे फलितमाह ॥ यत इति ॥ योगविषया बुद्धिः समत्वबुद्धिर्बुद्धि
शब्दस्यार्थांतरमाह ॥ तत्परिपाकेति ॥ तच्छब्देन समत्वबुद्धिसमन्वितं कर्म गृह्यते ॥ तस्य परिपाकस्तत्फलभूता बुद्धिः ॥ बुद्धिः शरण
शब्दस्य पर्यायं गृहीत्वा विवक्षितमाह ॥ अभयेति ॥ सप्तमीमविवक्षित्वा द्वितीयं पक्षं गृहीत्वा वाच्यार्थमाह ॥ परमार्थेति ॥ त क्या

यत एवं योगविषयायां बुद्धौ तत्परिपाकजायां वा सांख्यबुद्धौ शरणमाश्रयमभयप्राप्तिकारणमन्विच्छ
प्रार्थयस्व परमार्थज्ञानशरणो भवेत्यर्थः ॥ यतोऽवरं कर्म कुर्वाणाः कृपणाः दीनाः फलहेतवः फलतृष्णात्र

बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥

युक्ताः संतो यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः ॥ ४९ ॥ ॥

थाविधज्ञानशरणत्वे हेतुमाह ॥ यत इति ॥ फलहेतुत्वं विवृणोति ॥ फलेति ॥ तेन परमार्थज्ञानशरणतैव युक्तेति शेषः ॥ परमा
र्थज्ञानबहिर्मुखानां कृपणत्वे श्रुतिं प्रमाणयति ॥ यो वा इति ॥ अस्थूलादिविशेषणमेतदित्युच्यते ॥ ४९ ॥ ॥

पूर्वोक्तसमत्वबुद्धियुक्तस्यस्वधर्मानुष्ठानेप्रवृत्तस्यकिंस्यादित्याशंक्याह समत्वेति बुद्धियुक्तःस्वधर्माख्यंकर्मानुतिष्ठन्निति
शेषःबुद्धियोगस्यफलवत्वेफलितमाह तस्मादिति पूर्वार्द्धंव्याचष्टे बुद्धीत्यादिना ननुसमत्वबुद्धिमात्रात्पुण्यपापनिवृत्तिर्यु
क्तापरमार्थदर्शनवतस्तन्निवृत्तिप्रसिद्धेरितितत्राह सत्वेति उत्तरार्द्धंव्याचष्टे तस्मादिति स्वधर्ममनुतिष्ठतोयथोक्तयोगार्थे
किमर्थंमनोयोजनीयमित्याशंक्याह योगोहीति तर्हियथोक्तयोगसामर्थ्यादेवदर्शितफलसिद्धेरनास्थास्वधर्मानु

समत्वबुद्धियुक्तःसन्स्वधर्ममनुतिष्ठन्यत्फलंप्राप्नोतितत्शृणु बुद्धियुक्तःसमत्वकर्मविषययाबुद्ध्यायुक्तो
बुद्धियुक्तोजहातिपरित्यजतिइहास्मिंल्लोकेउभेसुकृतदुःकृतेपुण्यपापेसत्वशुद्धिज्ञानप्राप्तिद्वारेणयतस्त
स्मात्समत्वबुद्धियोगाययुज्यस्वघटस्वयोगोहिकर्मसुकौशलंस्वधर्माख्येषुकर्मसुप्रवर्त्तमानस्ययात्सिद्ध्यसि

बुद्धियुक्तोजहातीहउभेसुकृतदुःकृते ॥ तस्माद्योगाययुज्यस्वयोगःकर्मसुकौशलं ॥५०॥

द्धोःसमत्वबुद्धिरीश्वरार्पितचेतस्तयातत्कौशलंकुशलभावस्तद्धिकौशलंयत्बंधस्वभावान्यपिकर्माणिसमत्व
बुद्ध्यास्वभावान्निवर्त्तंतेतस्मात्समत्वबुद्धियुक्तोभवत्वं ॥५०॥

ष्ठानेप्राप्तेत्याशंक्याह स्वधर्माख्येष्विति ईश्वरार्पितचेतस्तयाकर्मसुप्रवर्त्तमानस्यानुष्ठाननिष्ठस्ययायथोक्ताबुद्धिस्त
त्तेषुकौशलमितियोजना कर्मणांबंधस्वभावत्वात्तदनुष्ठानेवंधानुबंधःस्यादित्याशंक्यकौशलमेवविशदयति त
द्धीति समत्वबुद्धेरेवंफलवत्वेस्थितेफलितमुपसंहरति तस्मादिति ॥५०॥

समत्वबुद्धियुक्तस्य सुकृतदुःकृततत्फलपरित्यागेपि कथं मोक्षः स्यादित्याशंक्याह ॥ यस्मादिति ॥ समत्वबुद्ध्या यस्मात्क
र्मानुष्ठीयमानं दुरितादित्याजयति ॥ तस्मात्सरं परयाऽसौ मुक्तिहेतुरित्यर्थः ॥ मनीषिणो हि ज्ञानातिशयवंतो बुद्धियु
क्ताः संतः स्वधर्माख्यं कर्मानुतिष्ठंतस्ततो जातं फलं देहप्रभेदं त्वेहित्वा जन्मलक्षणाद्बंधाद्विनिर्मुक्ता वैष्णवं पदं सर्वसं

यस्मात् ॥ कर्मजं फलं त्यक्त्वेति व्यवहितेन संबंधः इष्टानिष्टदेहप्राप्तिः कर्मजं फलं कर्मभ्यो जातं बुद्धियुक्ताः सं
तः हि यस्मात्फलं त्यक्त्वा परित्यज्य मनीषिणो ज्ञानिनो भूत्वा जन्मबंधविनिर्मुक्ताः जन्मैव बंधः जन्मबंधः तेन

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ॥ जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयं ॥ ५१ ॥

विनिर्मुक्ता जीवंत एव जन्मबंधविनिर्मुक्ताः संतः पदं परमं विष्णोर्मोक्षाख्यं गच्छंत्यनामयं सर्वोपद्रवरहितमित्यर्थः ॥

सारस्पर्शशून्यं प्राप्नुवंतीति श्लोकोक्तमर्थं श्लोकयोजनया दर्शयति ॥ कर्मजमित्यादिना इष्टो देहो देवादिलक्षणोऽनि
ष्टदेहस्तिर्यगादिलक्षणस्तत्प्राप्तिरेव कर्मणो जातं फलं तद्यथोक्तबुद्धियुक्ता ज्ञानिनो भूत्वा तद्बलादेव परित्यज्य जन्म
बंधनिर्मोकपूर्वकं जीवन्मुक्ताः संतो विदेहकैवल्यभाजो भवंतीत्यर्थः ॥

गी॰भा॰
६०

मोका

स्व

बुद्धियोगादित्यादौ बुद्धिशब्दस्य समत्वबुद्धिरर्थो व्याख्यातः संप्रति परंपरां परिहृत्य सुकृतदुःकृतप्रहाणहेतुत्वस्य समत्वबुद्धावसिद्धे बुद्धिशब्दस्य योग्यमर्थांतरं कथयति अथवेति अनवच्छिन्नवस्तुगोचरत्वेनानवच्छिन्नत्वं तस्याः सूचयन् बुद्ध्यंतराद्विशेषं दर्शयति सर्वतइति असाधारणं निमित्तं तस्या निर्दिशति कर्मेति यथोक्तबुद्धेर्बुद्धिशब्दार्थत्वे हेतुमाह साक्षादिति जन्मबंधविनिर्मुक्तादिति दिशब्दार्थः यस्मिन्कर्मणि क्रियमाणे परमार्थदर्शनलक्षणा बुद्धिरुद्देश्यतया युज्यते तस्मात्कर्मणः सकाशादितरत्कर्मतथाविधोद्देश्यभूतबुद्धिसंबंधविधुरमतिशयेन निःकृष्टं ततश्च परमार्थबुद्धिमुद्देश्यत्वेनाश्रित्य कर्मानुष्ठातव्यं परि

अथवा बुद्धियोगाद्धनंजय यद्ध्यारभ्य परमार्थदर्शनलक्षणे सर्वतःसंप्लुतोदकस्थानीया कर्मयोगजसत्वशुद्धिजनिता बुद्धिर्दर्शिता साक्षात्सुकृतदुःकृतप्रहाणादिहेतुत्वश्रवणात् ५१ ॥

छिन्नं फलांतरमुद्दिश्य तदनुष्ठाने कार्पण्यप्रसंगात् किंच परमार्थबुद्धिमुद्देश्यमाश्रित्य कर्मानुतिष्ठन्नंतःकरणशुद्धिद्वारा परमार्थदर्शनसिद्धौ जीवत्येव देहे सुकृतदुःकृते हित्वा मोक्षमधिगच्छतीति तथा च परमार्थदर्शनयोगार्थं मनो धारयितव्यं योगशब्दितं हि परमार्थदर्शनमुद्देश्यतया कर्मस्वनुतिष्ठतो नैपुण्यमिष्यते यदि च परमार्थदर्शनमुद्दिश्य तद्युक्ताः संतः समारभेरन् कर्माणि तदा तदनुष्ठानजनितशुद्ध्या ज्ञानिनो भूत्वा कर्मजं फलं परित्यज्य निर्मुक्तबंधना मुक्तिभाजो भवंतीत्येवमस्मिन्पक्षे श्लोकत्रयाक्षराणि व्याख्यातव्यानि ५१

आ॰गी॰
२

शिव
६०

यथोक्तबुद्धिप्राप्तिकालंप्रश्नपूर्वंप्रकटयति योगेति श्रुतंश्रोतव्यंदृष्टंद्रष्टव्यमित्यादौफलाभिलाषप्रतिबंधान्नोक्ताबुद्धिरुदेष्य
तीत्याशंक्याह यदेति विवेकपरिपाकावस्थाकालशब्देनोच्यतेकालुष्यस्यदोषपर्यवसायित्वंदर्शयन्विशिनष्टि येनेति तदनर्थरू

योगानुष्ठानजनितसत्वशुद्धिजाबुद्धिःकदाप्राप्यतइत्युच्यते यदायस्मिन्कालेतेतवमोहकलिलंमोहात्मकंअ
विवेकरूपंकालुष्यंयेनात्मानात्मविवेकबोधंकलुषीकृत्यविषयंप्रत्यंतःकरणंप्रवर्त्ततेतत्तेतवबुद्धिर्व्यतितरिष्यति

यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच ॥ ५२

व्यतिक्रमिष्यतिअतिशुद्धभावमापत्स्यतइत्यर्थः तदातस्मिन्कालेगंतासिप्राप्स्यसिनिर्वेदंवैराग्यंश्रोत
व्यस्यश्रुतस्यचतदाश्रोतव्यंश्रुतंचतेनिःफलंप्रतिपद्यतइत्यभिप्रायः ५२

पकालुष्यंतवेत्यन्वयार्थेपुनर्वचनंबुद्धिशुद्धिफलस्यविवेकस्यप्रासावैराग्यप्राप्तिंदर्शयति तदेति अध्यात्मशास्त्रातिरिक्तशास्त्रं
श्रोतव्यादिशब्देनगृह्यतेउक्तंवैराग्यमेवस्फोरयति श्रोतव्यमितिय थोक्तविवेकसिद्धौसर्वस्मिन्ननात्मविषयेनैःफल्यंप्रतिभा

बुद्धिशुद्धिविवेकवैराग्यसिद्धावपि पूर्वोक्तबुद्धिप्राप्तिकालो दर्शितो न भवतीति शंकते मोहेति प्रागुक्तविवेकादियुक्तबुद्धेरात्मनिस्थै
र्यावस्थायां प्रकृतबुद्धिसिद्धिरित्याह ततः शृण्विति द्वंद्वं कालविशेषाख्यं वस्तुतच्छब्देन गृह्यते बुद्धेः श्रुतिविप्रतिपन्नत्वं विशि

मोहकलिलात्ययद्वारेण लब्धात्मविवेकप्रज्ञः कदा कर्मयोगजं फलं परमार्थयोगमवाप्स्यतीति तत्र शृणु श्रुतिविप्र
तिपन्ना अनेकसाध्यसाधनसंबंधप्रकाशनश्रुतिभिः श्रवणैर्विप्रतिपन्ना नानार्थत्वं प्रतिपन्ना श्रुतिविप्रतिपन्ना
विक्षिप्ता सती ते तव बुद्धिर्यदा यस्मिन्काले स्थास्यति स्थिरीभूता भविष्यति निश्चला विक्षेपचलनवर्जिता सती समा

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ॥ समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३ ॥

धौ समाधीयते चित्तमस्मिन्निति समाधिरात्मा तस्मिन् आत्मनीत्येतद् अचला तत्रापि चलनविकल्पवर्जिता ते तव
बुद्धिरंतःकरणं तदा तस्मिन्काले योगमवाप्स्यसि योगं विवेकप्रज्ञां समाधिं प्राप्स्यसि ॥ ५३ ॥

दयति ॥ अनेकेति ॥ नानाप्रतिपन्नत्वमेव संक्षिपति ॥ विक्षिप्तेति ॥ उक्तं हेतुद्वयमनुरुध्य वैराग्यपरिपाकावस्थाकालशब्दार्थः
नैश्चल्यं विक्षेपराहित्यं अचलत्वं विकल्पशून्यत्वं विक्षेपो विपर्ययः विकल्पः संशय इति विवेकः ॥ ५३ ॥

विवेकद्वाराजाताप्रज्ञाप्रागुक्ताबुद्धिःसमाधिःतत्रैवनिष्ठासंन्यासिनोज्ञाननिष्ठातस्मान्निवचनंप्रश्नबीजंपृछतोऽर्जुन
स्याभिप्रायमाह॥लब्ध्वेति॥लब्ध्वासमाधावात्मनिसमाधानेनवाप्रज्ञापरमार्थदर्शनलक्षणायेनतस्येतियावत् ननुतस्य

प्रश्नबीजंप्रतिलभ्यार्जुनउवाचलब्धसमाधिप्रज्ञस्यलक्षणबुभुत्सया॥स्थितप्रज्ञस्यस्थिताप्रति
ष्ठिताहमस्मिपरंब्रह्मेतिप्रज्ञायस्यसस्थितप्रज्ञस्तस्यकाभाषाभाषणंवचनंकथमसौपरैर्भाष्य

अर्जुनउवाच॥स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यकेश
व॥स्थितधीःकिंप्रभाषेतकिमासीतव्रजेतकिं॥५४॥

तेसमाधिस्थस्यसमाधौस्थितस्यहेकेशवस्थितधीःस्थितप्रज्ञःस्वयंवाकिंप्रभाषेतकिमासीतव्र
जेतकिंकिमासनंव्रजनंवाकिंतस्येत्यर्थःस्थितप्रज्ञस्यलक्षणमनेनश्लोकेनपृछति॥५४॥ ॥

भाषातत्कार्यानुरोधिनीभविष्यतिकिमित्यसौजिज्ञासेतितत्राह॥कथमिति॥ज्ञाननिष्ठस्यलक्षणविवक्षयाप्रश्नमव
तार्यतन्निष्ठासाधनबुभुत्सयाविशिनष्टि॥समाधिस्थस्येति॥तस्यैवार्थक्रियांपृछति॥स्थितधीरितिप्रश्नाक्षराणिव्या

ध्यायवाक्यार्थमाह स्थितप्रज्ञस्येति ५५

भूमिकांस्त्वयतीत्यर्थः १८

प्रतिवचनमवतारयितुंपीतनिकां करोति योहीति हिशब्देनकर्मसंन्यासकारणीभूतविरागसंपत्तिः सूच्यते आदितोब्रह्मचर्यावस्थायामिति यावत् ज्ञानमेवयोगोब्रह्मभावप्रापकत्वात्तस्मिन्निष्ठापरिसमाप्तिस्तस्यामित्यर्थः कर्मैवयोगस्तेन कर्माण्यसंन्यस्यतन्निष्ठायामेवप्रवृत्तइति शेषः ननुतत्कथमेकेनवाक्येनार्थद्वयमुपदिश्यतेद्वैधार्थेवाक्यभेदान्नन्वलक्षणमेवसाधनंकृतार्थलक्षणस्यतत्स्वरूपत्वेनफलत्वेसाधनत्वानुपपत्तेरितितत्राह सर्वत्रैवेति यद्यपिकृतार्थस्यज्ञा

योह्यादितएवसंन्यस्यकर्माणिज्ञानयोगनिष्ठायांप्रवृत्तोयश्चकर्मयोगेनतयोःस्थितप्रज्ञस्यप्रजहातीत्यारभ्याध्यायपरिसमाप्तिपर्यंतंस्थितप्रज्ञलक्षणंसाधनंचोपदिश्यते सर्वत्रैवह्यध्यात्मशास्त्रेकृतार्थलक्षणानियानितान्येवसाधनान्युपदिश्यंतेयत्नसाध्यत्वात्

निनोज्ञानलक्षणंतद्रूपेणफलत्वान्नसाधनत्वमधिगच्छतितथापिजिज्ञासोस्तदेवप्रयत्नसाधनतयासाधनंसंपद्यतेलक्षणंचात्रज्ञानसामर्थ्येलब्धमनूद्यतेनविधीयतेविदुषोविधिनिषेधागोचरत्वात्तेनजिज्ञासोःसाधनानुष्ठानायलक्षणानुवादादेकस्मिन्नेवसाधनानुष्ठानेतात्पर्यमित्यर्थः॥ ॥

उक्तेर्थे भगवद्वाक्यमुत्थापयति। यानीति। लक्षणानि च ज्ञानसामर्थ्यलभ्यानि अयत्नसाध्यानीति शेषः। स्थितप्रज्ञस्य का भा
षेति प्रथमप्रश्नस्योत्तरमाह प्रजहातीति। कामत्यागस्य प्रकर्षो वासनासहित्वं कामानामात्मनिष्ठत्वं कैश्चिदिष्यते। तदयुक्तं
तेषां मनोनिष्ठत्वश्रुतेरित्याशयवानाह मनोगतानिति। आत्मन्येवात्मनेत्याद्युत्तरभागनिरस्यं चोद्यमनुवदति सर्वकामे

यानि यत्नसाध्यानि साधनानि लक्षणानि च भवंति तानि। प्रजहाति प्रकर्षेण जहाति परित्यजति
कामान्यदा यस्मिन्काले कामान् इच्छाभेदान्सर्वान् हे पार्थ मनोगतान्मनसि प्रविष्टान्सर्वकामपरि

श्रीभगवानुवाच॥ प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्। ॥

त्यागे तुष्टिकारणाभावाच्छरीरधारणनिमित्तशेषे च सत्युन्मत्तप्रमत्तस्येव प्रवृत्तिः प्राप्नेत्यत। ॥

ति। तर्हि त्रिवर्गका भावाद्विदुषः सर्वप्रवृत्तेरुपशांतिरितिनेत्याह। शरीरेति। उन्मादवानुन्मत्तो विवेकविरही बुद्धिभ्रमभागी प्र
कर्षेण मदमनुभवन्विद्यमानमपि विवेकं निरस्यन् भ्रांतवद्व्यवहरन् प्रमत्त इति विभागः। ॥ ॥

उत्तरार्द्धमवतार्य व्याकरोति। उच्यत इति। आत्मन्येवेवकारस्यात्मनेत्यत्रापि संबंधं द्योतयति। स्वेनैवेति बाह्यलाभनिरपेक्षत्वेन तु

ष्टिमेव स्पष्टयति परमार्थेति। स्थितप्रज्ञपदं विभजते। स्थितेति प्रज्ञाप्रतिबंधकसर्वकामविगमावस्थातदेति निर्दिश्यते उक्त

उच्यते॥ आत्मन्येव प्रत्यगात्मस्वरूप एवात्मना स्वेनैव बाह्यलाभनिरपेक्षस्तुष्टः परमार्थदर्शनामृतरसला

भेनान्यस्मादलं प्रत्ययवान् स्थितप्रज्ञः स्थिता प्रतिष्ठिताऽऽत्मानात्मविवेकजा प्रज्ञा यस्य स स्थितप्रज्ञो वि

आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥५५॥

द्वांस्तदोच्यते त्यक्तपुत्रवित्तलोकैषणः संन्यासी आत्मारामः आत्मक्रीडः स्थितप्रज्ञ इत्यर्थः॥५५॥

मेव प्रपंचयति। त्यक्तेति। आत्मानं जिज्ञासमानो वैराग्यद्वारा सर्वैषणात्यागात्मकं संन्यासमासाद्य श्रवणाद्यावृत्त्या त

त्त्वज्ञानं प्राप्य तस्मिन्नेवासक्त्या विषयवैमुख्येन तत्फलभूतां परितुष्टिं तत्रैव प्रतिलभमानः स्थितप्रज्ञव्यपदेशभागित्यर्थः॥

लक्षणभेदानुवादद्वाराविविदिषोरेवकर्त्तव्यांतरमुपदिशति। किंचेति। ज्वरशिरोरोगादिकृतानिदुःखान्याध्यात्मिका
न्यादिशब्देनाधिभौतिकानिव्याघ्रसर्पादिप्रयुक्तानि आधिदैविकानिचातिवातातिवर्षादिनिमित्तानिदुःखानिगृह्यं
तेतेषूपनतेष्वपिनोद्विग्नंमनोयस्यसतथेतिसंबंधः नोद्विग्नमित्येतद्व्याचष्टेनप्रक्षुभितमिति। दुःखानामुक्तानांप्रा

किंच दुःखेष्वाध्यात्मिकादिषुप्राप्तेष्वनुद्विग्नंनोद्विग्ननप्रक्षुभितंदुःखप्राप्तौमनो।

दुःखेष्वनुद्विग्नमनाः सुखेषुविगतस्पृहः।

यस्यसोऽनुद्विग्नमनाः तथाचसुखेषुप्राप्तेषुविगतास्पृहातृष्णायस्य। ॥

प्तौपरिहाराक्षमस्यतदनुभवपरिभावितंदुःखमुद्वेगस्तेनसहितंमनोयस्यनभवतिसतथेत्याह दुःखप्राप्ता
विति मनोयस्यनोद्विग्नमितिपूर्वेणसंबंधः सुखान्यपिदुःखवत्त्रिविधानीतिमत्वातथेत्युक्तं तेषुप्राप्तेषुस
त्सुतेभ्योविगतास्पृहातृष्णायस्यसविगतस्पृहइतियोजना।

अज्ञस्य हि प्राप्तानि सुखान्यनुविवर्द्धते तृष्णा विदुषस्तु नैवमित्यत्र वैधर्म्यदृष्टांतमाह नाग्निरिवेति यथा हि दाह्येंधनादेरभ्याधानेव ह्निरनुविवर्द्धते तथाज्ञस्य सुखान्युपनतान्यनुविवर्द्धमाना पि तृष्णा विदुषो न तान्यनुवर्द्धते न हि वन्हिरदाह्यमुपनतमपि दग्धुं विवृद्धिमधिगच्छति तेन जिज्ञासुना सुखदुःखयोस्तृष्णोद्वेगौ न कर्त्तव्याविस्यर्थः

नाग्निरिवेंधनाद्याधाने न सुखान्यनुविवर्द्धते स विगतस्पृहः वीतरागभयक्रोधो रागश्च भयं

वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ५६

च क्रोधश्च वीता विगता यस्मात्स वीतरागभयक्रोधः स्थितधीः स्थितप्रज्ञः मुनिः संन्यासी तदोच्यते ५६

॥रागादयश्च तेन कर्त्तव्या न भवंतीत्याह वीतेति अनुभूताभिनिवेशो विषयेषु रंजनात्मकस्तृष्णाभेदो रागः परेणापकृतस्य गात्रनेत्रादिविकारकारणं भयं क्रोधस्तु परवशीकृत्यात्मानं स्वपरापकारप्रवृत्तिहेतुर्बुद्धिवृत्तिविशेषः मनुते इति मुनिरात्मविदित्यंगीकृत्याह संन्यासीति सुखादिविषयतृष्णादेः रागादेश्चाभावावस्यातदेत्युस

लक्षणभेदाऽनुवादद्वाराविविदिषोरेवकर्त्तव्यांतरमुपदिशति । किंचेतिविवेकवतो विदुषो विवेकजन्याप्रज्ञाकथंप्रति
ष्ठांप्रतिपद्यतामित्याशंक्याह । यःसर्वत्रेति । ननुदेहजीवितादौस्पृहाशुभाशुभप्राप्तौहर्षविषादौविदुषो विविदिषोश्च

किंच योमुनिःसर्वत्रदेहजीवितादिष्वपिअनभिस्नेहोभिस्नेहवर्जितःतत्तत्प्राप्यशुभा
शुभंतत्तत्शुभमशुभंवालब्ध्वानाभिनंदतिशुभंप्राप्यनतुष्यतिनहृष्यतिअशुभंचप्रा

यःसर्वत्रानभिस्नेहस्तत्तत्प्राप्यशुभाशुभं ॥
नाभिनंदतिनद्वेष्टितस्यप्रज्ञाप्रतिष्ठिता ॥ ५७ ॥

प्यनद्वेष्टीत्यर्थः तस्यैवंहर्षविषादवर्जितस्यविवेकजाप्रज्ञाप्रतिष्ठिता ॥ ५७ ॥

वर्जनीयाविति प्रज्ञास्थैर्यसिद्धिस्तत्राह । योमुनिरिति । तत्तदिति शोभनत्वेनाशोभनत्वेनवानिर्दिश्यतेतदेवाभि
भजते शुभमिति । विषयेष्वभिषंगाभावःशुभादिप्राप्तौहर्षाद्यभावश्चप्रज्ञास्थैर्यैकारणमित्याह । तस्येति । ५७ ॥

जिज्ञासोरेव कर्त्तव्यांतरं सूचयतितरां। किंचेति। इंद्रियाणां विषयेभ्यो वैमुख्यस्य प्रज्ञास्थैर्यकारणत्वादादौ जिज्ञासुना तदनुष्ठेयमित्याह यदेति। मुमुक्षुणा मोक्षहेतुं प्रज्ञां प्रार्थयमानेन सर्वेभ्यो विषयेभ्यः सर्वाणींद्रियाणि विमुखानि कर्त्तव्यानीति श्लोकव्याख्यानेन कथयति। यदेत्यादिना। उपसंहारः स्ववशत्वापादनं तस्य च सम्यक्त्वमतिदृढत्वं। अ

किंच। यदा संहरते सम्यगुपसंहरते चायं ज्ञाननिष्ठायां प्रवृत्तो यतिः। कूर्मोंगानीव यथा। कूर्मो भयात्स्वान्यंगानि उपसंहरति सर्वशः सर्वतः एवं ज्ञाननिष्ठः इंद्रियाणींद्रि

यदा संहरते चायं कूर्मोंगानीव सर्वशः॥ इंद्रियाणींद्रि
यार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥ ५८॥ ॥

यार्थेभ्यः सर्वविषयेभ्यः उपसंहरति तस्य प्रज्ञा प्रतिष्ठितेत्युक्तार्थं वाक्यं॥ ५८॥ ॥

यमिति। प्रकृतस्थितप्रज्ञग्रहणं व्यावर्त्तयति। ज्ञाननिष्ठायामिति इंद्रियोपसंहारस्य प्रलयरूपत्वं व्यावर्त्त्य संकोचा मत्वं दृष्टांतेन दर्शयति। कूर्म इति। दृष्टांतं वर्णयति। यथेति। दार्ष्टांतिके ज्ञाननिष्ठापदं तत्र प्रवर्त्तयति। एवमिति। इंद्रियाणां विषयेभ्यो वैमुख्यकरणं प्रज्ञास्थैर्यहेतुरिति उक्तमुपसंहरति। तस्येति। ५८।

इंद्रियाणां विषयेभ्यो वैमुख्येपि तद्विषयरागानुवृत्तौ कथं प्रज्ञालाभः स्यादिति शंकते ॥ तत्रेति ॥ व्यवहारभूमिः सप्तम्य
र्थः विषयाननाहरतस्तदुपभोग विमुखस्यास्यार्थः रागश्चेन्नोपसंह्रियते न तर्हि प्रज्ञालाभः संभवति रागस्य तत्परिपं
थित्वादिति मत्वाह ॥ स कथमिति ॥ रागनिवृत्त्युपायमुपदिशन्नुत्तरमाह ॥ उच्यत इति ॥ विषयोपभोगपराङ्मुखस्य कुतो वि

तत्र विषयाननाहरत आतुरस्यापि इंद्रियाणि कूर्मोऽगानीव संह्रियंते ॥ न तु तद्विषयरागः स कथं संह्रियत इत्यु
च्यते ॥ यद्यपि विषयोपलक्षितानि विषयशब्दवाच्यानि इंद्रियाणि ॥ अथवा विषया एव निराहारस्य अनाह्रियमा

विषया विनिवर्त्तंते निराहारस्य देहिनः ॥

ण विषयस्य कष्टे तपसि स्थितस्य मूर्खस्यापि निवर्त्तंते देहिनो देहवतो रसवर्जं रसो रागो विषयेषु यः तं वर्जयित्वा ॥

षयपरावृत्तिस्तत्परावृत्तिश्चाप्रसक्तेत्याशंक्याह ॥ यद्यपीति ॥ निराहारस्येत्यस्य व्याख्यानम् अनाह्रियमाणविषय
स्येति यो हि विषयग्रहणो न भवति तस्यात्यंतिके तपसि क्लेशात्मके व्यवस्थितस्य विद्याविहीनस्यापीद्रियाणि विषये
भ्यः सकाशाद्यद्यपि संह्रियंते तथापि रागो वशिष्यते स च तत्वज्ञानादुच्छिद्यत इत्यर्थः ॥

रसशब्दस्य माधुर्यादिषड्विधरसविषयत्वं निषेधति रसशब्द इति वृद्धप्रयोगमंतरेण कथं प्रसिद्धिरित्याशंक्याह स्वरसेने
ति स्वेच्छयेति यावत् रसिकः स्वेच्छावशवर्त्ती रसज्ञो विवक्षितापेक्षितरसज्ञातेत्यर्थः कथं तस्य निवृत्तिस्तत्राह सोपीति
दृष्टमेवोपलब्धिपर्यायांस्पष्टयति अहमेवेति रागापगमे सिद्धमर्थमाह निर्बीजमिति ननु सम्यग्ज्ञानमंतरेण रागो

रसशब्दो रागे प्रसिद्धः स्वरसेन प्रवृत्तो रसिको रसज्ञ इत्यादिदर्शनात् सोपि रसो रंजनारूपः सूक्ष्मोऽस्य यतेः परं प
रमार्थतत्वं ब्रह्म दृष्ट्वोपलभ्याहमेव तदिति वर्त्तमानस्य निवर्त्तते निर्बीजं विषयज्ञानं संपद्यत इत्यर्थः नासति

रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्त्तते ५९॥

सम्यग्दर्शने रसस्योच्छेदस्तस्मात् सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं कर्त्तव्यमिति अभिप्रायः॥ ५९॥

नापगच्छति चेत्तदपगमादृते रागवतः सम्यग्ज्ञानोदयायोगादितरेतराश्रयतेति नेत्याह नासतीति इंद्रियाणां वि
षयपारवश्ये विवेकद्वारा परिहृते स्थूलो रागो व्यावर्त्तते ततश्च सम्यग्ज्ञानोत्पत्त्या सूक्ष्मस्यापि रागस्य सर्वात्मना निवृ
त्त्युपपत्तेः नेतरेतराश्रयतेत्यर्थः प्रज्ञास्थैर्यस्य सफलत्वे स्थिते फलितमाह तस्मादिति ५९

श्लोकांतरमवतारयति सम्यग्दर्शनेति मनसः स्ववशत्वादेव प्रज्ञास्थैर्यसंभवे किमर्थमिंद्रियाणां स्ववशत्वापादनमित्याशंक्या
ह यस्मादिति ॥ ननु विवेकवतो विषयदोषदर्शिनो विषयेभ्यः स्वयमेवेंद्रियाणि व्यावर्त्तंते ॥ किं तत्र प्रज्ञास्थैर्यं चिकीर्षता कर्त्त
व्यमिति तत्राह यततो हीति ॥ विषयेषु भूयो भूयो दोषदर्शनमेव प्रयत्नः हि शब्दस्य यस्मादर्थस्य समाप्तौ संबंधं वक्ष्यति

सम्यग्दर्शनलक्षणं प्रज्ञास्थैर्यं चिकीर्षता आदाविंद्रियाणि स्ववशे स्थापयितव्यानि यस्मात्तदनवस्थापने
दोषमाह ॥ यततः प्रयत्नं कुर्वतोपि हि यस्मात्कौंतेय पुरुषस्य विपश्चितो मेधाविनोऽपीति व्यवहितेन संबं

यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः ॥ इं
द्रियाणि प्रमाथीनि हरंति प्रसभं मनः ॥ ६० ॥

धः इंद्रियाणि प्रमाथीनि प्रमथनशीलानि विषयाभिमुखं पुरुषं विक्षोभयंत्याकुली कुर्वंति
आकुलीकृत्य च हरंति प्रसभं प्रसह्य प्रकाशमेव पश्यतो विवेकज्ञानयुक्तं मनः ॥ ६० ॥ ॥

अपि शब्दस्य प्रयत्नं कुर्वतोपीति संबंधं गृहीत्वा संबंधांतरमाह पुरुषस्येति ॥ प्रमथनशीलत्वं प्रकटयति ॥ विषयेति
॥ विक्षोभस्याकुलीकरणस्य फलमाह आकुलीकृत्येति प्रकाशमेवेत्युक्तं विशदयति ॥ पश्यत इति ॥ विपश्चितोपि
विदुषोपि प्रकाशमेव प्रकाशशब्दितविवेकाख्यविज्ञानेन युक्तमेव मनो हरंतींद्रियाणीति संबंधः ॥ ६० ॥

॥गी॰भा॰॥
॥६७॥

हि शब्दार्थमनूद्य तस्मादिंद्रियाणि स्ववशे स्थापयितव्यानीति पूर्वेण संबंधमभिसंधायाह तस्मादिति इंद्रियाणां स्ववशत्वसंपादनानंतरं कर्त्तव्यमर्थमाह तानीति एवमासीनस्य किं स्यादिति तत्राह वशे हीति समाहितस्य विक्षेपविकलस्य कथमासनमित्यपेक्षायामाह मत्पर इति पराऽपरभेदशंकामपाकृत्यासनमेव स्फोरयति नान्योहमिति उत्तरार्द्धं व्याकरोति

यतस्तस्मात् तानि सर्वाणि संयम्य संयमनं वशीकरणं कृत्वा युक्तः समाहितः सन्नासीत मत्परः अहं वासुदेवः सर्वप्रत्यगात्मा परो यस्य स मत्परः नान्योहं तस्मादित्यासीतेत्यर्थः एवमा

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ॥ व
शे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१

सीनस्य यतेर्वशे हि यस्येंद्रियाणि वर्त्तंतेऽभ्यासबलात्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

॥एवमिति हि शब्दार्थं स्फुटयति अभ्यासेति परस्मादात्मनो नाहमन्योस्मीति प्रागुक्तानुसंधानस्यादरेण नैरंतर्यदीर्घकालानुष्ठानसामर्थ्यादित्यर्थः अथवा विषयेषु दोषदर्शनाभ्याससामर्थ्यादिंद्रियाणि संयतानीत्यर्थः ॥ ६१ ॥

॥आ॰गी॰॥
॥२॥

॥शिव॥
॥६७॥

समनंतरश्लोकद्वयतात्पर्यमाह अथेति पुरुषार्थोपायोपदेशानंतर्यमथशब्दार्थः तन्निश्चलराहित्यावस्थांदर्शयति इदानी
मिति पराभविष्यतोमहांतमनर्थंगमिष्यतो विवेकविज्ञानविहीनस्येतियावत् सर्वानर्थमूलंविषयाभिध्यानंतस्यतथा

अथेदानींपराभविष्यतः सर्वानर्थमूलमिदमुच्यते ॥ ध्यायतः चिंतयतो विषयान् शब्दादिविषयविशे
षानालोचयतः पुंसः पुरुषस्य संगः आसक्तिः प्रीतिस्तेषु विषयेषूपजायते उत्पद्यते संगात्प्रीतेः सं

ध्यायतो विषयान्पुंसः संगस्तेषूपजायते ॥ संगा
त्संजायते कामः कामात्क्रोधोऽभिजायते ॥ ६२ ॥

जायते समुत्पद्यते कामः तृष्णा तस्मात्कामात् कुतश्चित्प्रतिहतात् क्रोधोभिजायते ॥ ६२ ॥ ॥

त्समनुभवसिद्धमितिवक्तुमिदमित्युक्तं विषयेषु विषयत्वमारोपितरमणीयत्वं प्रीतिरपिसाधारणमासक्तिमात्रं
गृह्यते ॥ तृष्णेत्युद्रिक्तासक्तिरुक्ता प्रतिबंधेन प्रणाशेन वा प्रतिहतिः ॥ ६२ ॥

क्रोधस्य संमोहहेतुत्वमनुभवेन द्रढयति क्रुद्धो हीति आक्रोशत्यधिक्षिपति तदयोग्यत्वमपेरर्थः संमोहकार्यं कथयति संमो
हादिति स्मृते र्निमित्तनिवेदनद्वारा स्वरूपं कथयति शास्त्रेति क्षणिकत्वादेवास्याः स्वतो नाशसंभवान्न संमोहाधीनत्वं तस्ये
त्याशंक्याह स्मृतीति स्मृतिभ्रंशेपि कथं बुद्धिनाशस्वरूपं सिध्यतितत्राह कार्येति ननु पुरुषस्य नित्यसिद्धस्य बुद्धिनाशे

क्रोधाद्भवति संमोहः संमोहोऽविवेकः कार्याकार्यविषयः भवतीति संबध्यते क्रुद्धो हि संमूढः सन्गुरुमप्याक्रो
शति संमोहात्स्मृतिविभ्रमः शास्त्राचार्योपदेशाहितसंस्कारजनितायाः स्मृतेः स्याद्विभ्रमो भ्रंशः स्मृत्युत्पत्ति
निमित्तप्राप्तौ अनुत्पत्तिस्ततः स्मृतिभ्रंशाद्बुद्धेर्नाशः कार्याकार्यविषयविवेकायोग्यतांतःकरणस्य बुद्धेर्नाशस्त

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः स्मृ
तिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥

स्मृते बुद्धिनाशात्प्रणश्यतीति तावदेव हि पुरुषो यावदंतःकरणं कार्याकार्यविषयविवेकयोग्यं तदयोग्यत्वे नष्ट ए
व पुरुषो भवत्यतस्तस्यांतःकरणस्य बुद्धेर्नाशात्प्रणश्यति पुरुषार्थायोग्यो भवतीत्यर्थः ॥ ६३ ॥

पि प्रणाशो न प्रकल्प्यते तत्राह तावदेवेति कार्याकार्यविवेचनयोग्यांतःकरणाभावे सतोपि पुरुषस्य करभव
दपगततत्वविवेकविवक्षया नष्टत्वव्यपदेशः तदेतदाह पुरुषार्थेति ॥ ६३ ॥

विषयाणांस्मरणमपिचेदनर्थकारणंसुतरां तर्हिभोगस्तेनजीवनार्थंभुंजानोविषयाननर्थंकथंनप्रतिपद्यतइत्याशंक्य
वृत्तानुवादपूर्वकमुत्तरश्लोकतात्पर्यमाह सर्वानर्थस्येति अनर्थमूलकथनानंतर्यमथशब्दार्थः परिहर्त्तव्ये निर्णीतेति
ज्ञातेतत्परिहारोपायजिज्ञासांदर्शयति इदानीमिति रागद्वेषपूर्विकाप्रवृत्तिरित्यनुभवप्रदर्शनार्थोहिशब्दः शास्त्री

सर्वानर्थस्यमूलमुक्तंविषयाभिध्यानमथेदानीमोक्षकारणमिदमुच्यते रागद्वेषवियुक्तैः रागश्चद्वेषश्च
रागद्वेषौतत्पुरःसराहींद्रियाणांप्रवृत्तिःस्वाभाविकीतत्रयोमुमुक्षुर्भवतिसताभ्यांवियुक्तैःश्रोत्रादिभिरिंद्रि

रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति ॥ ६४ ॥

येर्विषयानवर्जनीयांश्चरंनुपलभमानः आत्मवश्यैरात्मनोवश्यानिवशीकृतानितैरात्मवश्यैर्विधेयात्मा
स्वेछातोविधेयआत्माअंतःकरणंयस्यसोयंप्रसादमधिगच्छतिप्रसादः प्रसन्नतास्वास्थ्यं ॥ ६४ ॥ ॥

यत्प्रवृत्तिव्यासेद्धार्थंस्वाभाविकीत्युक्तं तत्रेत्यधिकृतानधिकृत्स्यप्रयोगः अवर्ज्जनीयानशनपानादीन्देहस्थि
तिहेतूनितियावदिंद्रियाणांविषयेषुप्रवृत्तिश्चेन्नियमाऽनुपपत्त्यावर्ज्जनीयेष्वपिसास्यादित्याशंक्याह आत्मे
ति अंतःकरणाधीनत्वेपींद्रियाणांतदनियमात्तेषामपिनियमानुपपत्तिरित्याशंक्याह विधेयात्मेति ॥ ६४ ॥

तथापि नानाविधदुःखाभिभूतत्वान्न स्वास्थ्यमास्थापयितुं शक्यमित्याशयेन पृच्छति ॥ प्रसाद इति ॥ श्लोकार्द्धेनोत्तरमाह उच्यत इति सर्वदुःखहान्या बुद्धिस्वास्थ्येपि प्रकृतं प्रज्ञास्थैर्यं कथं सिद्धमित्याशंक्याह ॥ प्रसन्नेति ॥ बुद्धिप्रसादस्यैव फ

प्रसादे सति किं स्यादित्युच्यते ॥ प्रसादे सर्वदुःखानां आध्यात्मिकादीनां हानिर्विनाशोऽस्य यतेरुपजायते किंच प्रसन्नचेतसः स्वस्थांतःकरणस्य हि यस्मात् आशु शीघ्रं बुद्धिः पर्यवतिष्ठते ॥ आकाशमिव परिसमंतात् अवति

प्रसादे सर्वदुःखानां हानिरस्योपजायते ॥ प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥

ष्ठते आत्मस्वरूपेणैव निश्चला भवतीत्यर्थः ॥ एवं प्रसन्नचेतसोऽवस्थितबुद्धेः कृतकृत्यता यतस्तस्मात् रागद्वेषवियुक्तैरिंद्रियैः शास्त्राविरुद्धेष्ववर्ज्जनीयेषु युक्तः समाचरेदिति वाक्यार्थः ॥ ६५ ॥

लांतरमाह ॥ किंचेति ॥ तस्माद्बुद्धिप्रसादार्थं प्रयतितव्यमिति शेषः श्लोकद्वयस्याक्षरोत्थमर्थमुक्त्वा तात्पर्यार्थमुपसंहरति ॥ एवमिति ॥ युक्तः समाहितो विषयपारवश्यशून्यः सन्निति यावत् ॥ ६५ ॥

किंपुनः सत्त्वशुद्धैव यथोक्ता बुद्धिः सिध्यति नेत्याह सेयमिति। असमाहितस्यापि बुद्धिमात्रमुत्पद्यमानं प्रति भातीत्याशंक्याह
आत्मस्वरूपेति। नहि विक्षिप्तचित्तस्यात्मस्वरूपविषया बुद्धिरुदेतुमर्हतीत्यत्र हेतुमाह। नचेति। आत्मज्ञाने शब्दादापाततो जा
ते स्मृतिसंतानानुकरणं साक्षात्कारार्थमभिनिवेशो भावनेति चोच्यते न चासौ विक्षिप्तबुद्धेः सिध्यतीति हेत्वर्थं विवक्षि
त्वाह। आत्मज्ञानेति। भावनाद्वारा साक्षात्काराभावेपि का क्षतिरित्याशंक्याह। तथेति। असमाहितस्य भावनाभावादि
तियावत्। आत्मन्यापाततो ज्ञाते श्रवणाद्यावृत्तिरूपां स्मृतिमसंतन्वानस्यापरोक्षबुद्ध्यभावेनानर्थनिवृत्तिः सिद्ध्यती

सेयं प्रसन्नता सूच्यते नास्ति न विद्यते न भवतीत्यर्थः॥ बुद्धिरात्मस्वरूपविषयाऽयुक्तस्यासमाहितांतःकरण
स्य न चास्ति अयुक्तस्य भावना आत्मज्ञानाभिनिवेशः तथा न चास्य भावयतः। आत्मज्ञानाभिनिवेशमकुर्वतः

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना। न चाभावयतः शांतिरशांतस्य कुतः सुखं॥ ६६ ॥

शांतिरुपशमः न विद्यते अशांतस्य कुतः सुखं इंद्रियाणां हि विषयसेवातृष्णातो निवृत्तिः या तत्सुखं न विषयतृष्णा
दुःखमेव हि सा न तृष्णायां हि सत्यां सुखस्य गंधमात्रमप्युपपद्यत इत्यर्थः॥ ६६॥

स्याह उपशम इति। अनिवृत्तानर्थस्य परमानंदसागराद्विभक्तस्य संसारवारिधौ निमग्नस्य सुखाविर्भावो न संभवती
त्याह। अशांतस्येति। तस्यापि विषयसेवातो वैषयिकसुखं संभवतीत्याशंक्याह। इंद्रियाणां हीति। तृष्णाक्षयस्य शा
स्त्रप्रसिद्धमानुभाविकं च सुखत्वमिति वक्तुं हि शब्दः विषयसेवातृष्णया विषयोपभोगद्वारा सुखमुपलब्धमित्या
शंक्याह। दुःखमेवेति। तत्रापि हि शब्दो नुभवद्योतीत देवस्पष्टयति। नेत्यादिना॥ ६६॥

आकांक्षाद्वारा श्लोकांतरमुत्थापयति अयुक्तस्येति विक्षिप्तचेतसो भावनाऽभावे साक्षात्कारलक्षणा बुद्धिर्न भवती
ति हेत्वंतरेण साधयति इंद्रियाणामिति यत्पदोपात्तं मनस्तत्पदेनापि गृह्यते इंद्रियाणां श्रोत्रादीनां विषयाः शब्दाद

अयुक्तस्य कस्माद्बुद्धिर्नास्तीत्युच्यते इंद्रियाणां हि यस्माच्चरतां स्वस्वविषयेषु प्रवर्त्तमानानां य
न्मनोनुविधीयतेऽनुप्रवर्त्तते तदिंद्रियविषयविकल्पनेन प्रवृत्तं मनोऽस्य यतेर्हरति प्रज्ञामात्मानात्म

इंद्रियाणां हि चरतां यन्मनोनुविधीयते तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ॥६७॥

विवेकजां नाशयति कथं वायुर्नावमिवांभसि उदके जिगमिषतां मार्गादुद्धृत्योन्मार्गे यथा वायुः ना
वं प्रवर्त्तयत्येवमात्मविषयां प्रज्ञां हृत्वा मनो विषयविषयां करोति ॥६७॥ ॥

यत्तेषां विकल्पनं मिथो विभज्य ग्रहणं तेनेति यावत् दृष्टांतं व्याकरोति उदक इति करोतीति यस्मात्तस्मादयुक्तस्य नोत्पद्यते बु

इति यत्नेन ६७

यततोहीत्यादिश्लोकाभ्यामुक्तस्यैवार्थस्य प्रकृतश्लोकाभ्यामपिकथ्यमानत्वात्पुनरुक्तिरित्याशंक्यपरिहरति ॥ यततोही
त्यादिनाध्यायतोविषयानित्यादावुपपत्तिवचनमुक्तेयंतच्छब्दापेक्षितार्थोक्तिद्वाराश्लोकमवतारयति ॥ इंद्रियाणामिति ॥

यततोह्यपीत्युपन्यस्तस्यार्थस्यानेकधोपपत्तिमुक्त्वातंचार्थमुपपाद्योपसंहरति ॥ तस्मादिति ॥
इंद्रियाणांप्रवृत्तौदोषउपपादितोयस्मात् ॥ तस्माद्यस्ययतेःहेमहाबाहो निगृहीतानिसर्वशःस

तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः ॥ इंद्रियाणीं
द्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ॥ ६८ ॥ ॥

र्वप्रकारैःमानसादिभेदैः इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ॥ ६८ ॥ ॥

असमाहितेनमनसायस्मादनुविधीयमानानींद्रियाणिप्रसज्यप्रज्ञामपहरंति ॥ तस्मादितियोजना ॥ ६८ ॥ ॥

आत्मविदः स्थितप्रज्ञस्य सर्वकर्मपरित्यागेऽधिकारस्तद्विपरीतात्तस्य कर्मणीत्येतस्मिन्नर्थे समनंतरश्लोकमवतारयति। योय
मिति अविद्यानिवृत्तौ सर्वकर्मनिवृत्तिश्चेत्तन्निवृत्तिरेव कथमित्याशंक्याह। अविद्यायाश्चेति। स्फुटीकुर्वन्बाह्याभ्यंतरकरणानां
पराक्प्रत्यक्प्रवृत्तिवत्तथाविधे दर्शने च मिथो विरुध्येते परागदर्शनस्यात्मावरणाविद्याकार्यत्वादात्मदर्शनस्य च तन्निवर्त्त

योयं लौकिको वैदिकश्च व्यवहारः स उत्पन्नविवेकज्ञानस्य स्थितप्रज्ञस्याविद्याकार्यत्वादविद्यानिवृत्तौ निवर्त्तते अ
विद्यायाश्च विद्याविरोधान्निवृत्तिरित्येतमर्थं स्फुटीकुर्वन्नाह। यानिशा रात्रिः सर्वपदार्थानामविवेककरी तमः

यानिशा सर्वभूतानां तस्यां जागर्ति संयमी॥

स्वभावत्वात्सर्वभूतानां सर्वेषां भूतानां किं तत्परमार्थतत्वं स्थितप्रज्ञस्य विषयो॥ श्रीरामचंद्राय नमः॥ ॥ ॥

कत्वात्ततश्चात्मदर्शनार्थमिंद्रियाण्यर्थेभ्यो निगृह्णीयादित्याहेति योजना। सर्वप्राणिनां निशा पदार्थाविवेककरी त्यत्र हेतुमाह
तमःस्वभावत्वादिति। सर्वप्राणिसाधारणां प्रसिद्धां निशां दर्शयित्वा तामेव प्रकृतानुगुणत्वेन प्रश्नपूर्वकं विशदयति। किं तदित्या

स्थितप्रज्ञविषयस्यपरमार्थतत्त्वस्यप्रकाशैकतानस्यकथमज्ञानान्प्रतिनिशात्वमित्याशंक्याह। यथेति तत्रहेतुमाह अगोचरत्वा
दिति अतद्बुद्धीनांपरमार्थतत्त्वातिरिक्तेद्वैतप्रपंचेप्रवृत्तबुद्धीनामप्रतिपन्नत्वात्परमार्थतत्त्वंनिशेवाविदुषामित्यर्थः। तस्यामित्यादि
व्याचष्टे। तस्यामितिनिशावदुक्तायामवस्थायामितियावत्। योगीतिज्ञानीकथ्यतेद्वितीयार्द्धंविभजतेयस्यामितिप्रसुप्तानांजा

यथानक्तंचराणामहरेवसदन्येषांनिशाभवतितद्वन्नक्तंचरस्थानीयानामज्ञानांसर्वभूतानांयानिशेव
निशापरमार्थतत्त्वमगोचरत्वादतद्बुद्धीनांतस्यांपरमार्थतत्त्वलक्षणायांअज्ञाननिद्रायाःप्रबुद्धोजागर्ति
इतिसंयमीसंयमवान् जितेंद्रियोयोगीत्यर्थः यस्यांग्राह्यग्राहकभेदलक्षणायांअविद्यानिशायांप्रसु
प्तान्येवभूतानिजाग्रतीत्युच्यंतेअस्यांनिशायांप्रसुप्ताइवस्वप्नदृशः सानिशाअविद्यारूपत्वात्परमा
र्थतत्त्वंपश्यतोमुनेरतःकर्माण्यविद्यावस्थायामेवचोद्यंतेनविद्यावस्थायां॥

॥श्रीरामायनमः॥

गरणंविरुद्धमित्याशंक्याह॥ प्रसुप्ताइवेति परमार्थतत्त्वमनुभवतोनिवृत्ताविद्यस्यसंन्यासिनोद्वैतावस्थानिशेत्यत्रहेतुमाह॥
अविद्यारूपत्वादिति॥ परमार्थावस्थानिशेवाविदुषांविदुषांतुद्वैतावस्थातथेतिफलितमाह॥ अतइति॥ अविद्यावस्थायामे
वक्रियाकारकफलभेदप्रतिभानादित्यर्थः॥

विद्योदये पि तत्प्रतिभानाविशेषात्पूर्वमिव कर्माणि विधीयेरन्नित्याशंक्याह॥ विद्यायामिति॥ अविद्यानिवृत्तौ बाधितानुवृत्त्या
विभागभाने पि नास्ति कर्मविधिर्विभागाभिनिवेशाभावादित्यर्थः॥ अविद्यावस्थायामेव कर्माणीत्युक्तं व्यक्तीकरोति॥ प्रा
गिति॥ विद्योदयात्पूर्वं बाधकाभावादबाधिता ऽविद्या क्रियादिभेदमापाद्य प्रमाणरूपया बुद्ध्या ग्राह्यतां प्राप्य कर्महेतुर्भ

विद्यायां हि सत्यामुदिते सवितरि शार्वरमिव तमः प्रणाशमुपगच्छति अविद्या प्राग्विद्योत्पत्तेरविद्या प्र
माणबुद्ध्या गृह्यमाणा क्रियाकारकफलभेदरूपा सती सर्वकर्महेतुत्वं प्रतिपद्यते नाप्रमाणबुद्ध्या

यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥ ६९॥

गृह्यमाणायाः कर्महेतुत्वोपपत्तिः॥ यथा चोक्तं उत्तवात दं श्रोरगवदविद्या किं करिष्यतीति॥ ॥

वति क्रियादिभेदाभिमानस्य तद्धेतुत्वादित्यर्थः॥ न विद्यावस्थायामित्युक्तं प्रपंचयति॥ नाप्रमाणेति॥ उत्पन्नायां विद्याया
म विद्याया निवृत्तत्वात्क्रियादिभेदभानमप्रमाणमिति बुद्धिरुत्पद्यते तया ग्राह्यमाणाया यथोक्तविभागभागिन्यप्यवि
द्या न कर्महेतुत्वं प्रतिपद्यते बाधितत्वेनाभासतया तद्धेतुत्वायोगादित्यर्थः॥ ॥

विद्याविद्याविभागेनोक्तमेवविशेषं विवृणोति । प्रमाणभूतेनेति । यथोक्तेन वेदेन कामनाजीवनादिमतो मम कर्म विहितं तेन मया तत्कर्त्तव्यमिति मन्वानः सन्कर्मण्यज्ञोऽधिक्रियते तं प्रति साधनविशेषवादिनो वेदस्य प्रवर्त्तकत्वादित्यर्थः सर्वमिदमविद्यामात्रं द्वैतं निःशेषेति मन्वानस्तु न प्रवर्तते कर्मणीति व्यावर्त्त्यमाह । नाविद्येति । विदुषो न कर्मण्यधिकार इत्युक्तस्याधि

प्रमाणभूतेन वेदेन मम नोदितं कर्त्तव्यं कर्मेति हि कर्मणि कर्त्ता प्रवर्त्तते नाविद्यामात्रमिदं सर्वं निःशेषेति । यस्य पुनर्निःशेषाविद्यामात्रमिदं सर्वं भेदजातमिति ज्ञानं तस्यात्मज्ञस्य सर्वकर्मसंन्यास एवाधिकारो न प्रवृत्तौ तथा च दर्शयिष्यति तद्बुद्धय इत्यादिना तस्य ज्ञाननिष्ठायामेवाधिकारः तत्रापि प्रवर्त्तकप्रमाणाभावे प्रवृत्त्यनुपपत्तिरिति चेत् । न स्वात्मविषयत्वादात्मज्ञानस्य न ह्यात्मनः स्वात्मनि प्रवर्त्तकप्रमाणापेक्षा ॥

कारस्तर्हि कुत्रेत्याशंक्याह । यस्येति । आत्मज्ञस्य फलभूतसंन्यासाधिकार एवाक्यशेषं प्रमाणयति । तथेति । प्रवर्त्तकप्रमाणं विधिस्तदभावे कर्मस्विव विदुषो ज्ञाननिष्ठायामपि प्रवृत्त्यनुपपत्तेराश्रणीयो ज्ञाने तत्रापि विधिरिति शंकते । तत्रापीति । किमात्मज्ञानं विधिमपेक्षते किं वात्मानाद्यः तस्य स्वरूपविषयस्य यथा प्रमाणप्रमेयमुत्पत्तौ विध्यनपेक्षत्वादित्याह । न स्वात्मेति

तद्बुद्धय इत्याह । नहीति ।

प्रवर्त्तकप्रमाणशब्दितस्य विधेः साध्यविषयत्वादात्मनश्चासाध्यत्वादिति हेतुमाह आत्मत्वादेवेति आत्मतज्ज्ञानयोर्विध्यनपेक्षत्वेपि ज्ञानिनो मानमेयव्यवहारप्रतिनियमार्थं विध्यपेक्षास्यादित्याशंक्याह तदंतत्वाच्चेति सर्वेषां प्रमाणानां प्रामाण्यस्यात्मज्ञानोदयावसानत्वात्तस्मिन्नुत्पन्ने व्यवहारस्य निरवकाशत्वान्न तत्प्रतिनियमाय ज्ञानिनो विधिरित्यर्थः उक्तमेव व्यक्तं करोति नहीति धर्माधिगमवदात्माधिगमेपि किमिति यथोक्तो व्यवहारो न भवतीत्याशंक्याह प्रमातृत्वं हीति

आत्मत्वादेव तदंतत्वाच्च सर्वप्रमाणानां प्रमाणत्वस्य न ह्यात्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्यवहारः संभवति प्रमातृत्वं ह्यात्मनो निवर्त्तयत्यंत्यं प्रमाणं निवर्त्तयदेव चाप्रमाणी भवति स्वप्नकालप्रमाणमिव प्रतिबोधे लोके च वस्त्वधिगमे प्रवृत्तिहेतुत्वादर्शनात् प्रमाणस्य तस्मान्नात्मविदः कर्मण्यधिकार इति सिद्धं ॥ ६९ ॥

तन्निवृत्तौ कथमद्वैतज्ञानस्य प्रामाण्यमित्याशंक्याह निवर्त्तयदेवेति प्रमातृत्वं निवर्त्तयदद्वैतज्ञानं स्वयं निवृत्तेर्न प्रमाणमित्यत्र दृष्टांतमाह स्वप्नेति आत्मज्ञानस्य विध्यनपेक्षत्वे हेत्वंतरमाह लोके चेति व्यवहारभूमौ हि प्रामाण्यस्य वस्तुनिश्चयफलपर्यंतत्वे सति प्रवर्त्तकविधिसापेक्षत्वानुपलंभादद्वैतज्ञानमपि प्रमाणत्वान्न विधिमपेक्षते रज्ज्वादिज्ञानवदित्यर्थः आत्मज्ञानवतस्तन्निष्ठाया विधिमंतरेण ज्ञानमाहात्म्येनैव सिद्धत्वात्तस्य कर्मसंन्यासेधिकारो न कर्मणीत्युप

ननु असंन्यासिनापि विद्यावता विद्याफलस्य लब्धुं शक्यत्वात्किमिति विदुषो संन्यासो नियम्यते तत्राह विदुष इति। आपा
तज्ज्ञानवतो विवेकवैराग्यादिविशिष्टस्यैषणाभ्यः सर्वाभ्यो व्युत्थितस्य श्रवणादिद्वारा समुत्पन्नसाक्षात्कारवतो मुख्य
स्य संन्यासिनो मोक्षो नान्यस्य विषयतृष्णापरिभूतस्येत्येतद्दृष्टांतेन प्रतिपादयितुमनंतरश्लोकप्रवृत्तिरित्यर्थः। दृष्टांते
नैतमर्थं प्रतिपादयितुमिच्छन् रागद्वेषवियुक्तैस्त्विति श्लोकोक्तमेवार्थं पुनराहेति योजना। अद्भिः समुद्रस्य समंतात्पूर्यमा

विदुषस्त्यक्तैषणस्य स्थितप्रज्ञस्य यतेरेव मोक्षप्राप्तिर्नत्वसंन्यासिनः कामकामिन इत्येतमर्थं दृ
ष्टांतेन प्रतिपादयिष्यन्नाह। आपूर्यमाणमद्भिरचलप्रतिष्ठं अचलतया प्रतिष्ठा अवस्थितिर्यस्य तम

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत्। ॥

चलप्रतिष्ठं समुद्रमापः प्रविशंति सर्वतो गताः स्वात्मस्थमविक्रियमेव संतं यद्वत्। ॥

णत्वेन वृद्धिह्रासवतीनदीयास्थितिरापतेदित्याशंक्याह अचलेति नहि समुद्रस्योदकात्मकं प्रतिनियतं रूपं कदाचिदपि व
र्द्धते ह्रसतेति। तेन नदीयास्थितिरेकरूपैवेत्यर्थः। नन्वनादेया श्चेदापः समुद्रं अंतर्गच्छंति। तर्हि तस्य विक्रियावत्वादप्रति
ष्ठास्यादित्याशंक्याह स्वात्मस्थमिति।

इच्छानिषेधाद्विषयानामसन्निधौ विदुषि निर्विकारे प्रविशंतोपि सन्निधाने तस्मिन्प्रविशंतो विकारमापादयेयुरित्याशंक्याह

तद्वत्कामा विषयसन्निधावपि सर्वत इच्छाविशेषा यं मुनिं समुद्रमिवापोऽविकुर्वंतः प्रविशंति सर्वे आत्मन्येव प्रलीयंते न स्वात्मवशं कुर्वंति स शांतिं मोक्षमाप्नोति नेतरः कामकामी काम्यंत इति कामा वि

तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी ॥७०॥

षयास्तान्कामयितुं शीलं यस्य स कामकामी न प्राप्नोतीत्यर्थः ॥७०॥ श्रीरामचंद्रायनमः ॥

विषयेति प्रवेशं विशदयति सर्वत इति योऽकाम इत्यादिश्रुते विषयविमुखस्य निःकामस्य मोक्षो न कामुकस्येत्याह स शांतिमि

यदि गृहस्थेनापि मनसा समस्ताभिमानं हित्वा कूटस्थं ब्रह्मात्मानं परिभावयता ब्रह्मनिर्वाणमाप्यते प्राप्तं तर्हि मौंज्यादि विडंबनमेवेत्याशंक्याह यस्मादिति शब्दादि विषयप्रवणस्य तत्तदिच्छाभेदभागिनो न मुक्तिरिति व्यतिरेकस्य सिद्धत्वात्पूर्वोक्तमन्वयं निगमयितुमनंतरवाक्यमित्यर्थः अशेषविषयत्यागे जीवनमपि कथमित्याशंक्याह जीवनेति संभवद्रागद्वेषादिके देशे निवासव्यावृत्त्यर्थं चरतीत्येतद्व्याचष्टे पर्यटतीति विहाय कामानित्यनेन पुनरुक्तिं परिहरति शरीरेति निस्पृहत्वमुक्त्वा निर्ममत्वं पुनर्वदन्नक

यस्मादेवं तस्मात् विहाय परित्यज्य कामान्यः संन्यासी सर्वानशेषतः कार्त्स्न्येन चरति जीवनमात्रचेष्टाशेषः पर्यटतीत्यर्थः निस्पृहः शरीरजीवनमात्रेपि निर्गतास्पृहा यस्य स निस्पृहः सन् निर्मम इति ममत्ववर्जितः शरीरजीवनमात्राक्षिप्तप

विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः निर्ममो निरहंकारः स शांतिमधिगच्छति ७१ ॥

रिग्रहेपि ममेदमित्यभिनिवेशवर्जितो निरहंकारो विद्यावत्त्वादिनिमित्तात्मसंभावनारहित इत्येतत् स एवंभूतः स्थितप्रज्ञो ब्रह्मविच्छांतिं सर्वसंसारदुःखोपरमलक्षणां निर्वाणाख्यामधिगच्छति प्राप्नोति ब्रह्मभूतो भवतीति भावः ७१

र्थं पुनरुक्तिमार्थिकीं न पश्यतीत्याशंक्याह शरीरजीवनेति सत्यहंकारे ममकारस्यावश्यकत्वान्निरहंकारत्वं व्याकरोति विद्यावत्त्वादीति स शांतिमाप्नोतीत्युक्तं उपसंहरति स इति संन्यासिनो मोक्षमाणस्य सर्वकामपरित्यागादीनि श्लोकोक्तानि विशेषणानि यत्नसाध्यानि तत्संपत्तिफलं तु कैवल्यमित्यर्थः ७१

तत्रतत्र संक्षेपविस्ताराभ्यां प्रदर्शितां ज्ञाननिष्ठामधिकारिप्रशस्त्यंगत्वेन स्तोतुमुत्तरश्लोकमवतारयति ॥ सैषेति ॥ गृहस्थः संन्या
सीत्युभावपि चेन्मुक्तिभागिनौ किं तर्हि किष्टेन सर्वथैव संन्यासेनेत्याशंक्य संन्यासिव्यतिरिक्तानामंतरायसंभवादपेक्षितः संन्यासो
मुमुक्षोरित्याह ॥ एषेति ॥ स्थितिमेव व्याचष्टे ॥ सर्वमिति ॥ न विमुह्यतीति पुनर्नञोनुकर्षणमन्वयार्थं संन्यासिनः विमोहाभावेपि गृह
स्थो धनहान्यादिनिमित्तं प्रायेण विमुह्यति ॥ विचित्तः सन् परमार्थविवेकरहितो भवतीत्यर्थः ॥ यथोक्ता ब्राह्मी स्थितिः सर्वकर्मसं

सैषा ज्ञाननिष्ठा स्तूयते ॥ एषा यथोक्ता ब्राह्मी ब्रह्मणि भवेयं स्थितिः सर्वकर्म संन्यस्य ब्रह्मस्वरूपेणैवावस्थानमित्येतत्
नैनां स्थितिं प्राप्य लब्ध्वा न विमुह्यति न मोहं प्राप्नोति स्थित्वास्यां स्थितौ ब्राह्म्यां यथोक्तायामंतकालेप्यंतेवयसि अपि ब्रह्म

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ॥ स्थित्वास्यामंतकालेपि ब्रह्मनिर्वाणमृच्छति ॥ ७२ ॥

निर्वाणं निर्वृत्तिं मोक्षमृच्छति गच्छति किमु वक्तव्यं ब्रह्मचर्यादेव संन्यस्य यावज्जीवं यो ब्रह्मण्येवावतिष्ठते स ब्रह्मनिर्वाणमृच्छ
तीति ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भाष्ये द्वितीयोध्यायः ॥ २ ॥

न्यासपूर्विका ब्रह्मनिष्ठा तस्यां स्थित्वा तामिमामायुषश्चतुर्थेपि विभागे कृत्वेत्यर्थः ॥ अपिशब्दसूचितं कैमुतिकन्यायमाह ॥ किमु
वक्तव्यमिति ॥ तदेवं तत्त्वंपदार्थौ तदैक्यं वाक्यार्थस्तत्ज्ञानादेकाकिनो मुक्तिस्तदुपायश्चेत्येतेषामेकैकमेकैकत्र श्लोके प्राधान्ये
न प्रदर्शितमिति निष्ठाद्वयमुपायोपेयभूतमध्यायेन सिद्धं ॥ ७२ ॥ ॥ इति श्रीगीताभाष्ये आनंदगीरीटीकायां द्वितीयोध्यायः ॥

पूर्वोत्तराध्याययोः संबंधं वक्तुं पूर्वस्मिन्नध्याये वृत्तमर्थं संक्षिप्यानुवदति शास्त्रस्येति गीताशास्त्रप्रारंभापेक्षितं हेतुफलभूतं बुद्धिद्वयं भगवतोपदिष्टमित्यर्थः प्रष्टुरर्जुनस्याभिप्रायं निर्देष्टुं वृत्तमर्थांतरमनुवदति तत्रेति अध्यायो बुद्धिद्वयनिर्द्धारणं वा सप्तम्यर्थः पारमार्थिके तत्त्वे यत् ज्ञानं तन्निष्ठानामशेषकामत्यागिनां काममूलानां कर्मणामपि प्रतिपत्तिकर्मवत्यागं कर्त्तव्यत्वेन भगवानुक्तवानित्यर्थः तथापि मोक्षसाधने विकल्पसमुच्चययोरन्यतरस्य विवक्षितत्वबुद्ध्या समनंतरप्रश्न

शास्त्रस्य प्रवृत्तिनिवृत्तिविषयभूते द्वे बुद्धी भगवता निर्दिष्टे सांख्यबुद्धिर्योगबुद्धिरिति च तत्र प्रजहाति यदा कामानित्यारभ्याध्यायपरिसमाप्तेः सांख्यबुद्ध्याश्रितानां संन्यासं कर्त्तव्यमुक्त्वा तेषां तन्निष्ठतयैव कृतार्थतोक्ता एषा ब्राह्मी स्थितिरित्यर्जुनाय च कर्मण्येवाधिकारस्ते मा ते संगोस्त्वकर्मणीति कर्मैव कर्त्तव्यमुक्तवान्योगबुद्धिमाश्रित्य न तत एव श्रेयः प्राप्तिमुक्तवान् ॥

प्रवृत्तिरित्याशंक्याह उक्तेति अर्जुनस्य मनसि व्याकुलत्वं प्रश्नबीजं दर्शयितुमुक्तमर्थांतरमनुभाषते अर्जुनाय चेति सांख्यबुद्धिमाश्रित्य कर्मत्यागमुक्त्वा पुनस्तस्यैव कर्त्तव्यत्वं कथं मिथो विरुद्धं ब्रुवतीत्याशंक्याह योगेति यथा सांख्यबुद्धिमाश्रितानां संन्यासद्वारा तन्निष्ठानां कृतार्थतोक्ता तथा योगबुद्धिमाश्रित्य कर्म कुर्वतोपि कृतार्थत्वमुक्तमित्याशंक्याह न तत एवेति दूरेण ह्यवरं कर्म बुद्धियोगादिदर्शनादिति शेषः ॥

बुद्धिव्याकुलत्वं प्रश्नबीजं प्रतिलभ्य प्रश्नं करोतीत्याह॥ तदेतदिति॥ साक्षादेव श्रेयःसाधनं ज्ञानमन्ये भ्यो दर्शितं तदित्युच्यते तद्विप
रीतं कर्म स्वस्यानुष्ठेयत्वेनोक्तमेतदिति निर्दिश्यते भगवदुक्तेऽर्थे संदिह्यमानस्य निर्णयाकांक्षायां प्रश्नप्रवृत्तिरस्ति पूर्वोत्तराध्या
ययोरुत्थाप्योत्थापकलक्षणा संगतिरित्यर्थः॥ अर्जुनस्य प्रश्ननिमित्तं पर्याकुलत्वं प्रश्नपूर्वकं प्रपंचयति॥ कथमित्यादिना॥
यद्धि साक्षादेव श्रेयःसाधनं सांख्यशब्दितपरमार्थतत्वविषयबुद्धौ निष्ठारूपं तदन्यस्मै श्रेयोर्थिने भक्ताय श्रावयित्वा मां पुन
रभक्तमश्रेयोर्थिनमिव कर्मणि पूर्वोक्तविपरीते कथं भगवाननुपयोक्तुमर्हतीत्यर्जुनस्य पर्याकुलीभावो युक्त इति संबंधः॥

> स्यादेतदालक्ष्य पर्याकुलीभूतबुद्धिः॥ अर्जुन उवाच॥ कथं भक्ताय श्रेयोर्थिने यत्साक्षाच्छ्रेयःप्राप्तिसाध
> नं सांख्यबुद्धिनिष्ठां श्रावयित्वा मां कर्मणि दृष्टादृष्टाऽनेकानर्थयुक्ते पारंपर्येणाप्यनैकांतिकश्रेयःप्राप्ति
> फले नियुंज्यादिति युक्तः पर्याकुलीभावोऽर्जुनस्य तदनुरूपश्च प्रश्नो ज्यायसी चेदित्यादिः॥ प्रश्नापा
> करणवाक्यं च भगवतो युक्तं यथोक्तविभागविषये शास्त्रे॥ ॥

ज्ञाननिष्ठातो वैपरीत्यं स्फोरयितुं कर्मविशिनष्टि॥ दृष्टेति॥ युद्धे हि क्षत्रकर्मणि दृष्टोऽनेकोऽनर्थो गुरुभ्रातृहिंसादिस्तेन सं
बंधेन बुद्धिशुद्धिद्वारापि वर्त्तमाने जन्मन्येव फलमित्यनियतो मम भक्तस्य श्रेयोर्थिनो नियोगो भगवतो युक्तो न भवतीति शेषः॥

यथोक्तं निमित्तं प्रश्नस्य युक्तं तदनुगुणत्वात्तस्येति द्योतकमाह॥ तदनुरूपश्चेति॥ ज्ञाननिष्ठानां कृतार्थता कर्मनिष्ठानां तु न
तथेत्युक्तविभागभागिशास्त्रमित्यत्र लोकेऽस्मिन्नित्यादिवाक्यस्यापि द्योतकत्वं दर्शयति॥ प्रश्नेति॥ ॥

साक्षादेव श्रेयःसाधनमन्येभ्यो भगवतोक्तं न तु मह्यमिति मत्वाकुलीभूतः सन्पृच्छतीति स्वाभिप्रायेण संबंधमुक्त्वा वृत्तिकाराभिप्रायं दू
षयति केचिदिति ज्ञानकर्मणोः समुच्चयमवधारयितुं प्रश्नांगीकारे समुच्चयावधारणे नैव प्रतिवचनमुचितं न तथा भगवता प्रतिव
चनमुक्तं तथा च प्रश्नस्य समुच्चयविषयत्वोपगमात्प्रत्युक्तेश्चासमुच्चयविषयत्वात्तयोर्मिथो विरोधो वृत्तिकारमते स्यादित्यर्थः किंच
केवलं प्रश्नप्रतिवचनयोरेव परमते परस्परविरोधो न भवति अपि तु परेषां स्वग्रंथेपि पूर्वाऽपरविरोधोस्तीत्याह यथा चेति आ
त्मना वृत्तिकारैरिति यावत् संबंधग्रंथो गीताशास्त्रारंभोपोद्घातः इहेति तृतीयाध्यायारंभं परामृशति तदेव विवृण्वन्नाकां

केचित्त्वर्जुनस्य प्रश्नार्थमन्यथा कल्पयित्वा तत्प्रतिकूलं भगवतः प्रतिवचनं वर्णयंति यथा चात्मना संबंधग्रंथे गीता
र्थो निरूपितस्तत्प्रतिकूलं चेह पुनः प्रश्नप्रतिवचनयोरर्थं निरूपयंति कथं तत्र संबंधग्रंथे तावत्सर्वेषामाश्रमि
णां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे निश्चितोर्थ इत्युक्तं पुनर्विशेषितं च यावज्जीवश्रुतिचोदितानि कर्माणि
परित्यज्य केवलादेव ज्ञानान्मोक्षः प्राप्यत इत्येतदेकांतेनैव प्रतिषिद्धमिती ॥ ॥

क्षामाह कथमिति पूर्वापरविरोधं स्फोटयितुं संबंधग्रंथोक्तमर्थमनुवदति तत्रेति परकीया वृत्तिः सप्तम्या समुद्दि
श्यते संबंधग्रंथे तावदयमर्थ उक्त इति संबंधग्रंथमेवार्थं विशदयति सर्वेषामिति सर्वकर्मसंन्यासपूर्वकात् ज्ञानादेव के
वलात्कैवल्यमिति अस्मिन्नर्थे शास्त्रस्य पर्यवसानाच्च समुच्चयो विवक्षितस्तत्रेत्याशंक्याह पुनरिति उक्तो गीतार्थो वृत्तिकारैरेव
कर्मत्यागाऽयोगेन विशेषितत्वान्नाऽविवक्षितो भवितुमुत्सहते तथा च श्रौतानि कर्माणि त्यक्त्वा ज्ञानादेव केवलान्मुक्तिर्भ
वतीत्येतन्मतं नियमेनैव यावज्जीवश्रुतिभिर्विप्रतिषिद्धत्वान्नाभ्युपगंतुमुचितमित्यर्थः ॥ ॥ ॥

॥गी॰भा॰॥
॥१७॥

॥आ॰टी॰॥
॥२॥

तथापिकथंमिथोविरोधधीरित्याशंक्याह॥इहत्वितिप्रथमतोहिसंबंधग्रंथेसमुच्चयोगीताप्रतिपाद्यत्वेनवृत्तिकृताप्रतिज्ञातः॥
श्रौतकर्मपरित्यागश्चश्रुतिविरोधादेवनसंभवतीत्युक्तंततीयाध्यायारंभेपुनःसंन्यासिनांज्ञाननिष्ठाकर्मिणांकर्मनिष्ठेत्या
श्रमविभागमभिदधतापूर्वप्रतिषिद्धकर्मत्यागाभ्युपगमान्मिथोविरोधोदर्शितःस्यादित्यर्थः॥ननुयथाभगवताप्रतिपादितंतथै
ववृत्तिकृताव्याख्यातमितिनतस्यापराधोस्तीत्याशंक्याह॥तत्कथमिति॥नहीहभगवान्विरुद्धमर्थमभिधत्तेसर्वज्ञस्यपरमाप्तस्यवि
रुद्धार्थवादित्वायोगात्‌किंतुतदभिप्रायापरिज्ञानादेवव्याख्यातुर्विरुद्धार्थवादितेत्यर्थः॥भगवतोविरुद्धार्थवादित्वाऽभावेपिश्रोतुर्वि

॥ऽहत्वाश्रमविकल्पंदर्शयतायावज्जीवश्रुतिचोदितानामेवकर्मणांपरित्यागउक्तस्तत्कथंविरुद्धमी-
दृशमर्थमर्जुनायब्रूयाद्भगवान्‌श्रोतावाकथंविरुद्धमर्थमवधारयेत॥तत्रैवंतस्मात्गृहस्थानामेवश्रौ
तस्मार्तकर्मपरित्यागेनकेवलादेवज्ञानान्मोक्षःप्रतिषिध्यतेनत्वाश्रमांतराणांदृत्ये॥ ॥

तस्या

रुद्धार्थप्रतिपत्तिंप्रतीत्यव्याचक्षाणोवृत्तिकारोनापराध्यतीत्याशंक्याह॥श्रोतावेति॥अर्जुनोहिश्रोतासोपिबुद्धिपूर्वकाधिकारीभग
वदुक्तमेवावधारयन्नविरुद्धमर्थमवधारयितुमर्हतितथाचपरस्यैवविरुद्धार्थवादितेत्यर्थः॥विरोधंपरिहरन्नाशंकते॥तत्रेतिसं
बंधग्रंथेहिवृत्तिकारस्येदमभिप्रेतंगृहस्थानामेवसतांपरिपक्वज्ञानमंतरेणयावज्जीवश्रुतिचोदिताग्निहोत्रादित्यागेन
केवलादेवापातिकादात्मज्ञानान्मोक्षमपेक्षमाणानांयावज्जीवादिशास्त्रैरसौनिषिध्यतेनतुस्वरूपेणैवकर्मत्यागोज्ञानान्मोक्षो
वानिषेद्धुमिष्यतेततीयेपुनरध्यायेकर्मत्यागिनांगृहस्थेभ्योव्यतिरिक्तानामेवकेवलादात्मज्ञानान्मोक्षोविवक्ष्यते॥अतोभिन्न

विषयत्वान्निषेधाभ्यनुज्ञातयोर्विधिगोचरत्वाशंक्यः

शिव
॥७७॥

विधानांतरेण विरोधं दर्शयन्नुत्तरमाह एतदपीति विरोधमेवाकांक्षाद्वारा साधयति कथमित्यादिना श्रौतकर्म गृहस्थानामवश्यमनुष्ठेयमि
त्यनेनाभिप्रायेण तेषां केवलात्मज्ञानान्मोक्षो निषिध्यते न तु गृहस्थानां ज्ञानमात्रोपात्तं मोक्षं प्रतिषिध्यान्येषां केवलज्ञानाधीनो मोक्षो
विवक्ष्यते आश्रमांतराणामपि स्मार्त्तेन कर्मणा समुच्चयाऽभ्युपगमादिति चोदयति अथेति एतत्सदपरामृष्टं वचनमेवाभिनयति केवला
दिति ननु गृहस्थानां श्रौतकर्मरहितेऽपि सति स्मार्त्ते कर्मणि कुतो ज्ञानस्य केवलत्वं लभ्यते येन निषिध्योक्तिरर्थवती तत्राह तत्रेति प्रकृतं वच

तदपि पूर्वोत्तरविरुद्धमेव कथं सर्वाश्रमाणां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे निश्चितोऽर्थ इति प्रतिज्ञायेह कथं त
द्विरुद्धं केवलादेव ज्ञानान्मोक्षं ब्रूयादाश्रमांतराणामथ मतं श्रौतकर्मापेक्षयैतद्वचनं केवलादेव ज्ञानात् श्रौतकर्मरहिता
त् गृहस्थानां मोक्षः प्रतिषिध्यत इति तत्र गृहस्थानां विद्यमानमपि स्मार्त्तं कर्माविद्यमानवदुपेक्ष्य ज्ञानादेव केवलान्न
मोक्ष इत्युच्यत इति एतदपि विरुद्धं कथं गृहस्थस्यैव स्मार्त्तकर्मणा समुच्चितात् ज्ञानान्न मोक्षः प्रतिषिध्यते न त्वाश्र
मांतराणामिति कथं विवेकिभिः शक्यमवधारयितुं श्रीकृष्णायनमः॥ ॥श्रीरामचंद्रायनमोनमः॥ श्रीः ॥

नमेव सप्तम्यर्थः प्रधानं हि श्रौतं कर्म तद्राहित्ये सति स्मार्त्तस्य कर्मणः सतोऽप्यसद्भावमभिप्रेत्य ज्ञानस्य केवलमुक्तमिति युक्ता निषेधोक्तिरित्यर्थः

षामन्ये

॥गृहस्थानामेव श्रौतेन कर्मणा समुच्चयो नान्येषां तु स्मार्त्तेनेति पक्षपाते हेत्वभावं मन्वानः सन्परिहरति एतदपीति तमेव हेत्वभावं प्रश्नद्वारा विवृणो
ति कथमित्यादिना गृहस्थानां श्रौतस्मार्त्तकर्मसमुच्चितज्ञानं मुक्तिहेतुरित्यभ्युपगमात् केवलस्मार्त्तकर्मसमुच्चितात्तेन न विमुक्तिरिति निषेधो
युज्यते ऊर्द्ध्वरेतसां तु स्मार्त्तकर्ममात्रसमुच्चितात् तज्ज्ञानात् मुक्तिरिति विभागे नास्ति हेतुरित्यर्थः ॥

पक्षपातेकारणंनास्तीत्युक्त्वापक्षपातपरित्यागेकारणमस्तीत्याह किंचेति गृहस्थानामपिब्रह्मज्ञानंस्मार्त्तैरेवकर्मभिःसमुच्चितंमोक्ष
साधनंब्रह्मज्ञानत्वादूर्ध्वरेतस्समुच्चयवस्थितब्रह्मज्ञानवदितिपक्षपातत्यागेहेतुंस्फुरयति यदीत्यादिना यदिगृहस्थानांब्रह्मज्ञानंस्मार्त्तै
रेवकर्मभिःसमुच्चितंमोक्षहेतुरितिविवक्षितंतदातान्प्रतियावज्जीवश्रुतिर्विरुध्येत यदिस्मार्त्तैरपिकर्मभिःसमुच्चितंतदीयंज्ञानं

किंच यदिमोक्षसाधनत्वेनस्मार्त्तानिकर्माणिऊर्ध्वरेतसांसमुच्चीयंतेतथागृहस्थस्यापिइष्यतांस्मार्त्तैरेव
समुच्चयोनश्रौतैरथश्रौतैःस्मार्त्तैश्चगृहस्थस्यएवसमुच्चयोमोक्षायोर्ध्वरेतसांतुस्मार्त्तकर्ममात्रसमुच्चिता
त्ज्ञानान्मोक्षइति तन्नैवंसतिगृहस्थस्यैवायासबाहुल्यंश्रौतंस्मार्त्तंचबहुदुःखरूपंकर्मशिरस्यारोपितं
स्यारोपितंस्यादथगृहस्थस्यैवायासबाहुल्यकरणान्मोक्षःस्यात् ॥ ॥

मोक्षसाधनंविवक्ष्यतेतदासिद्धसाध्यतेतिप्रागुक्तमभिप्रेत्यचोदयति अथेति आश्रमांतराणांतर्हिकेवलादेवज्ञानान्मुक्तिरितिप्रागु
क्तविरोधतादवस्थ्यमित्याशंक्याह ऊर्ध्वरेतसांत्विति यथोक्तविभागोगार्हस्थ्यंक्लेशात्मकंकर्मबाहुल्यादनुपादेयमापद्येतेतिदूषयति
तत्रेति साधनभूयस्त्वेफलभूयस्त्वमितिन्यायमाश्रित्याशंकते अथेति क्लेशबाहुल्योपेतंश्रौतंस्मार्त्तंचबहुकर्मतस्यानुष्ठानान्मुक्ति

एवकारनिरस्यानुदर्शयति नाश्रमांतराणामिति तेषांनास्तिमुक्तिरित्यत्र यावज्जीवादिश्रुतिविहितावश्यानुष्ठेयकर्मराहित्यं हेतुं सूचयति श्रौतेति शास्त्रविरोधेन्यायस्य निरवकाशत्वमभिप्रेत्य दूषयति तदपीति ऐकाश्रम्यश्रुत्या गार्हस्थ्यस्यैव प्राधान्यादनधिकृतांधादिविषयं कर्मसंन्यासविधानमित्याशंक्याह ज्ञानांगत्वेनेति न खल्वनधिकृतानामंधादीनां संन्यासः श्रवणाद्यावृत्तिद्वारा ज्ञानांगं भवितुमलं तेषां श्रवणाद्यभ्यासासामर्थ्यादतः श्रुत्यादिविरोधेनास्ति गार्हस्थ्यस्य प्राधान्यमित्यर्थः तस्य प्राधान्याभावे हेत्वंतरमाह आश्रमेति ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा इति श्रुतौ तस्याश्रमविकल्प

नाश्रमांतराणां श्रौतादिनित्यकर्मरहितत्वादिति तदप्यसत् सर्वोपनिषत्स्वितिहासपुराणयोगशास्त्रेषु च ज्ञानांगत्वेन मुमुक्षोः सर्वकर्मसंन्यासविधानादाश्रमविकल्पसमुच्चयविधानाच्च श्रुतिस्मृत्योः सिद्धस्तर्हि सर्वाश्रमाणां ज्ञानकर्मणोः समुच्चयो न मुमुक्षोः सर्वकर्मसंन्यासविधानात् व्युत्थायाथ भिक्षाचर्यं चरंति ॥ ॥

मेके ब्रुवत इति यमिच्छेत्तमावसेदित्यादिश्रुतौ स्मृतौ चाश्रमाणां समुच्चयेन विकल्पेन चाश्रमांतरमिच्छंतं प्रति विधानान्न गार्हस्थ्यस्य प्रधानत्वमित्यर्थः यदि सर्वेषामाश्रमाणां श्रुतिस्मृतिमूलत्वं तर्हि तत्तदाश्रमविहितकर्मणां ज्ञानेन सह समुच्चयः सिध्यतीति शंकते सिद्धस्तर्हीति यद्यपि ज्ञानोत्पत्तावाश्रमकर्मणां साधनत्वं तथापि ज्ञानमुत्पन्नं नैव फले सहकारित्वेन तान्यपेक्षते अन्यथा संन्यासविध्यनुपपत्तेरिति दूषयति न मुमुक्षोरिति संन्यासविधानमेवानुक्रामति व्युत्थायेत्यादिना इषणाभ्यो वैमुख्येनोत्थानं तत्परित्याग आश्रमसंपत्त्यनंतरं तत्र विहितधर्मकलापानुष्ठानमपि कर्तव्यमित्याह अथेति

प्रागुक्तानां सत्यादीनामल्पफलत्वात्संन्यासस्य च ज्ञानद्वारा मोक्षफलत्वादित्याह तस्मादिति अतिरिक्तमतिशयवंतं महाफलमिति यावत् प्रकृतकर्मभ्यः सकाशात्संन्यास एवातिशयवानासीदित्युक्तेऽर्थे वाक्यांतरं पठति न्यास एवेति लोकत्रयहेतुं साधनत्रयं परित्यज्य संसाराद्विरक्ताः संन्यासपूर्वकादात्मज्ञानादेव प्राप्नुवंतो मोक्षमित्याह नकर्मणेति सति वैराग्ये नास्ति क्रमापेक्षा सत्यां सामग्र्यां कार्यापेक्षानुपपत्तेरित्याह ब्रह्मचर्यादेवेति इत्याद्याः सर्वकर्मसंन्यासविधायिन्यः श्रुतयो भवंतीति शेषः आत्मानमेव लोकमिच्छंतः प्रव्रजंतीत्यादिवाक्यसंग्रहार्थमादिपदं तत्रैव स्मृतीरुदाहरति त्यजेति धर्माधर्मयोः सत्यानृतयोश्च संसारारंभक

तस्मात्संन्यासमेषां तपसामतिरिक्तमाहुः न्यास इति ब्रह्मन्यास एवात्यरेचयदिति न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति च ब्रह्मचर्यादेव प्रव्रजेदित्याद्याः श्रुतयः त्यज धर्ममधर्मं च उभे सत्यानृते त्यज उभे सत्यानृते त्यक्त्वा येन त्यजसि तत् त्यज संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रिता इति बृहस्पतिरपि कर्मणा बध्यते जंतुर्विद्यया च विमुच्यते ॥ ॥

त्यान्मुमुक्षुणा तत्त्यागे प्रयतितव्यमित्यर्थः त्यक्ताभिमानस्यापि तत्त्वतः स्वरूपसंबंधाऽभावात्त्याज्यत्वमवशिष्टमित्याह येनेति अनुभवानुसारेण प्रमातृता प्रमुखस्य संसारस्य दुःखफलत्वमालक्ष्य मोक्षहेतुसम्यग्ज्ञानसिद्धये ब्रह्मचर्यादेव पारिव्राज्यमित्युपपत्तिविधिमुपन्यस्यति संसारमिति तत्त्वज्ञानमुद्दिश्य ब्रह्मचर्यादेव कर्मसंन्यासे सामग्रीमभिदधानो विनियोगविधिं सूचयति परमिति ज्ञानकर्मणोरसमुच्चयार्थे फलविभागं कथयति कर्मणेति ॥

उक्तंफलविभागमनूद्यज्ञाननिष्टानांकर्मसंन्यासस्यकर्त्तव्यत्वमाह तस्मादिति वाक्यशेषेपिसर्वकर्मसंन्यासोविवक्षितोस्तीत्याह इहापीति ज्ञानार्थिनोमुमुक्षोःसंन्यासविध्यनुपपत्तिबाधितंसमुच्चयवचनमित्युक्तमिदानींमोक्षस्वभावालोचनयापिसमुच्चयवचनमनुचितमित्याह मोक्षस्येति अकुर्वन्विहितंकर्म निंदितंचसमाचरन् प्रसज्जंश्चेंद्रियार्थेषुनरःपतनमृछतीतिस्मृतेर्मुमुक्षुणापिप्रत्यवायनिवृत्तयेकर्त्तव्यंनित्यकर्मेतिशंकते नित्यानीति योयस्मिन्कर्मण्यधिकृतस्तस्य

तस्मात्कर्मनकुर्वंतियतयःपारदर्शिनइतिशुकानुशासनंइहापिचसर्वकर्माणिमनसासंन्यस्येत्यादिमोक्षस्यचाकार्यत्वान्मुमुक्षोःकर्मानर्थक्यंनित्यानिप्रत्यवायपरिहारार्थमनुष्टेयानीतिचेन्न असंन्यासिविषयत्वात्प्रत्यवायप्राप्तेर्नह्यग्निकार्याद्यकरणात्संन्यासिनःप्रत्यवायःकल्पयितुंशक्यो यथाब्रह्मचारिणामसंन्यासिनामपिनतावन्नित्यानांकर्मणांअकरणादभावादेवभावरूपस्यप्रत्यवायस्योत्पत्तिःकल्पयितुंशक्याकथमसतःसज्जायेतेत्यसतःसज्जन्मासंभवश्रुतेः ॥

स्यतदकरणात्प्रत्यवायोभवति नतुकर्मानधिकारिणःसंन्यासिनस्तदकरणात्प्रत्यवायःसंभवतीत्यतआह नासंन्यासीति तदेवस्पष्टयति नहीति समिद्धोमाऽध्ययनाद्यऽकरणात्प्रत्यवायःसंन्यासिनोनास्तीत्यत्रव्यतिरेकोदाहरणमाह यथेति अकरणात्प्रत्यवायोत्पत्तिमभ्युपेत्योक्तंसंप्रतिनिषिद्धकरणादेवप्रत्यवायोनत्वकरणादभावाद्भावोत्पत्तेर्लोकवेदविरुद्धत्वादित्याह असंन्यासिनामपीति ननुनित्यकर्मविधायीवेदस्तदकरणात्प्रत्यवायोभवतीतिब्रवीति ॥

गी·भा·
८०
तीतिदृश्य

तत्कथमकरणात्प्रत्यवायो न भवतीति श्रुतिमाश्रित्योच्यते श्रुत्यंतरविरोधादिति तत्राह यदीति विहितस्याकरणे प्रत्यन
र्थप्राप्तेर्नित्यकर्मविधायी वेदोऽनर्थकरत्वेनाप्रमाणमित्याशंक्याह विहितस्येति न हि विहितस्याकरणे पितृलोकप्राप्तिल
क्षणं फलं भवति ब्यैते धूमादिनानयनपीडादिदुःखं तु प्रत्यक्षमेवाकरणे च प्रत्यवायोत्पत्तिरित्युभयथापि पुरुषस्यानर्थक
रो वेदोऽप्रमाणमेव स्यादित्यर्थः ननु अभावस्यापि भावोत्पादनसामर्थ्यं वेदः संपादयिष्यति तथा च विहिताकरणनिमि
त्तप्रत्यवायपरिहारो विहितकरणे फलिष्यतीति नेत्याह तथा चेति लोकप्रसिद्धपदार्थशक्त्याश्रयणेन शास्त्रप्रवृत्त्यंगी

यदि विहिताकरणात् असंभाव्यमपि प्रत्यवायं ब्रूयाद्वेदस्तदानर्थकरो वेदोऽप्रमाणमित्युक्तं स्या
द्विहितस्य करणाकरणयोर्दुःखमात्रफलत्वात् तथा च कारकं शास्त्रं न ज्ञापकमित्यनुपपन्नार्थं क
ल्पितं स्यात् न चैतदिष्टं तस्मान्न संन्यासिनां कर्माणि अतो ज्ञानकर्मणोः समुच्चयानुपपत्तिः ॥ ॥

कारादपूर्वशक्त्याऽऽधानायोगात् ज्ञापकमेव शास्त्रमित्यर्थः कारकत्वे च तस्याप्रामाण्यमप्रत्यूहं स्यादित्याह कारकमिति
भवतु शास्त्रस्याप्रामाण्यमित्याशंक्यापौरुषेयतयाऽशेषदोषानन्वितत्वान्नैवमित्याह न चेति अनिर्वाच्यानुपलंभस्य संवे
दनमभावज्ञाने कारणं समीहितसाधनज्ञानं तु चरणन्यासादिप्रवृत्तिकारणमित्यंगीकृत्योपसंहरति तस्मादिति अक
रणात्प्रत्यवायोत्पत्त्यसंभवस्तच्छब्दार्थः संन्यासिनां ज्ञाननिष्ठानां कर्मसंन्यासित्वादेव कर्मासंभवे फलितमाह अत इति

आ·गी·
२

शिव
८०

समुच्चयानुपपत्तौ हेत्वंतरमाह। ज्यायसीति प्रश्नानुपपत्तिमेव प्रपंचयति यदिहीति समुच्चयोपदेशे प्रश्नैकदेशोऽनुपपत्ते
श्च न तदुपदेशोपपत्तिरित्याह अर्जुनाय चेदिति कर्मण्येवाधिकारस्ते मा फलेषु कदाचनेति अर्ज्जुनं प्रत्युपदेशात्तं प्रति
ज्यायसी बुद्धिर्नोक्तेति युक्तं तत्किमित्याद्युपालंभवचनमित्याशंक्याह। न चेति येन कल्पनेन ज्यायसी चेदित्या

ज्यायसी चेदित्यर्ज्जुनस्य प्रश्नानुपपत्तेश्च यदि हि भगवता द्वितीयेऽध्याये ज्ञानं कर्म च समुच्चयेन त्वया एकेन
अनुष्ठेयमित्युक्तं स्यात्ततोऽर्ज्जुनस्य प्रश्नोऽनुपपन्नो ज्यायसी चेत्कर्मणस्ते मता बुद्धिरित्यर्ज्जुनाय चेत् बुद्धिकर्म
णी त्वयानुष्ठेये इत्युक्ते या कर्मणो ज्यायसी बुद्धिः साप्युक्तैवेति तत्किं कर्मणि घोरे मां नियोजयसीति उपालंभो वा
प्रश्नो वा न कथंचनोपपद्यते न चार्ज्जुनस्यैव ज्यायसी बुद्धिर्नानुष्ठेयेति भगवतोक्तं पूर्वमिति कल्पयितुं यु
क्तं येन ज्यायसी चेदिति प्रश्नः स्याद्यदि पुनरेकस्य पुरुषस्य ज्ञानकर्मणोर्विरोधाद्युगपदनुष्ठानं न संभवती
ति भिन्नपुरुषानुष्ठेयत्वेन भगवता पूर्वमुक्तं स्यात्ततोऽयं प्रश्न उपपन्नो ज्यायसी चेदित्यादि॥ ॥

रभ्यतत्किं कर्मणीत्युपालंभात्मा प्रश्नः स्यात्तथा न युक्तं कल्पयितुमेषा तेऽभिहिता सांख्ये बुद्धिरिति वचनविरोधा
दिति योजना। कस्मिन्पक्षे तर्हि प्रश्नस्योपपत्तिरित्याशंक्याह। यदीति॥

भगवदुक्तेर्थे प्रष्टुर्विवेकाभावात्प्रश्नः स्यादित्याशंक्य पूर्वोक्तमेवाधिकविवक्षया स्मारयति ॥ अविवेकत इति ॥ भगवतोपि प्र
तिवचनमज्ञाननिमित्तं प्रश्नाननुरूपत्वादित्याशंक्याधिक्यं दर्शयति ॥ न चेति ॥ भगवतः सर्वज्ञत्वप्रसिद्धिविरोधादज्ञाना

॥ रविवेकतः प्रश्नकल्पनायामपि भिन्नपुरुषानुष्ठेयत्वेन भगवतः प्रतिवचनं नोपपद्येत न चाज्ञा
ननिमित्तं भगवतः प्रतिवचनं कल्पनीयं अस्माच्च भिन्नपुरुषानुष्ठेयत्वेन ज्ञानकर्मनिष्ठयोर्भगवतः
प्रतिवचनदर्शनात् ज्ञानकर्मणोः समुच्चयानुपपत्तिः केवलादेव ज्ञानान्मोक्ष इत्येषोर्थो निश्चितो गीता
सु सर्वोपनिषत्सु च ज्ञानकर्मणोरेकं वद निश्चित्येति चैकविषयैव प्रार्थनानुपपन्ना उभयोः समुच्चयसं
भवे कुरु कर्मैव तस्मात्त्वमिति च ज्ञाननिष्ठाऽसंभवमर्जुनस्यावधारणेन दर्शयिष्यति ॥ ॥

धीन प्रतिवचनायोगादित्यर्थः ॥ इतश्च समुच्चयः शास्त्रार्थो न भवतीत्याह ॥ अस्माच्चेति ॥ कस्तर्हि शास्त्रार्थो विवक्षितस्त
त्राह ॥ केवलादिति ॥ ज्ञानकर्मणोः समुच्चयानुपपत्तौ कारणांतरमाह ॥ ज्ञानेति ॥ वाक्यशेषवशादपि समुच्चयस्याशास्त्रार्थे

प्राथमिकेन संबंधग्रंथेन समस्तशास्त्रार्थसंग्राहकेण तद्विवरणात्मनोस्य संदर्भस्य नास्ति पौनरुक्त्यमिति मत्वा प्रतिपदं व्याख्यातुं प्र
श्लोकदेशमुत्थापयति ॥ ज्यायसी चेति ॥ वेदाश्चेत्प्रमाणमिति वच्चेदित्यस्य निश्चयार्थत्वं व्यावर्त्तयति ॥ यदीति ॥ बुद्धिशब्दस्यांतःकरण
विषयत्वं व्यवच्छिनत्ति ॥ ज्ञानमिति ॥ पूर्वार्द्धस्याक्षरयोजनां कृत्वा समुच्चयाभावे तात्पर्यमाह ॥ यदीति ॥ इष्टे भगवतेति शेषः

ज्यायसी श्रेयसी चेद्यदि कर्मणः सकाशात्ते तव मताभिप्रेता बुद्धिर्ज्ञानं हे जनार्दन यदि बुद्धिकर्मणी स
मुच्चिते इष्टे तदेकं वरश्रेयः साधनमिति कर्मणो ज्यायसी बुद्धिरिति च कर्मणोतिरिक्तकरणं बुद्धेरनुप

अर्जुन उवाच ॥ ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ॥ श्रीरामायनमः ॥

पन्नमर्जुनेन कृतं स्यान्नहि तदेव तस्मात्फलतोऽतिरिक्तं स्यात् ॥ श्रीरामचंद्रायनमः ॥ श्रीरामायनः ॥

एकं ज्ञानं कर्म्मासमुच्चितमिति यावत् ज्ञानकर्मणोरभीष्टे समुच्चये समुच्चितस्य श्रेयःसाधनस्यैकत्वात्कर्मणः सकाशाज्ज्ञा
नस्य पृथक्करणमयुक्तमित्यर्थः ॥ एकमपि साधनं फलतोतिरिक्तं किं न स्यादित्याशंक्याह ॥ न हीति ॥ न च केवलात्कर्मणो
ज्ञानस्य केवलस्य फलतोऽतिरिक्तत्वं विवक्षितं पृथक्करणं समुच्चयपक्षे प्रत्येकं श्रेयःसाधनत्वानभ्युपगमादिति भावः ॥

पूर्वार्द्धस्येवोत्तरार्द्धस्यापि समुच्चयपक्षेतुल्यानुपपत्तिरित्याह तथेति दूरेणह्यवरं कर्मेत्यत्र कर्मणः सकाशाद्बुद्धिः श्रेयस्करी भ
गवतोक्ता कर्मचबुद्धेः सकाशादश्रेयस्करमुक्तं तथापि तदेवकर्म कर्मण्येवाधिकारस्तेमाफलेष्विति स्निग्धं भक्तंच मांप्रति
कुर्विति भगवान्प्रतिपादयति तत्रकारणानुपलंभादयुक्तमिति क्रूरेकर्मणि भगवतामन्नियोजनमिति यदर्जुनोऽब्रवीति

तयाकर्मणः श्रेयस्करी भगवतोक्ताबुद्धिरश्रेयस्करंचकर्मकुर्वितिमांप्रतिपादयतितत्किं
कारणमितिभगवतउपालंभमिवकुर्वंस्तत्किंकस्मात्कर्मणिघोरेक्रूरेहिंसालक्षणेमांनियो

तत्किंकर्मणिघोरेमांनियोजयसिकेशव ॥१॥

जयसिकेशवेतिचयदाहतच्चनोपपद्यते अयस्मात्तैर्नैवकर्मणासमुच्चयः सर्वेषांभगवतो
क्तोऽर्जुनेनचावधारितश्चेत्तत्किंकर्मणिघोरेमांनियोजयसीत्यादिकथंयुक्तंवचनं ॥ १ ॥

तत्रसमुच्चयपक्षेअनुपपन्नंस्यादित्यर्थः ॥ यत्तुवृत्तिकारैरुक्तं श्रौतेनस्मार्त्तेनचकर्मणासमुच्चयोगृहस्थानांश्रेयःसा
धनमितरेषांस्मार्त्तेनैवेति भगवतोक्तमर्जुनेनचनिर्द्धारितमिति तदेतदनुवदति अथेति तत्रापितत्किमित्याद्युपालं
भवचनमनुपपन्नंकर्ममात्रेसमुच्चयवादिनोमते भगवतोनियोजनाभावादितिदूषयति तत्किमिति ॥१॥ ॥

इतश्चप्रश्नः समुच्चयानुसारी न भवतीत्याह। किंचेति। भगवतो विविक्तार्थवादित्वादयुक्तं व्यामिश्रेणेत्यादिवचनमित्याशंक्याह। यद्य
पीति। यदि भगवतो वचनं संकीर्णमिव ते भाति तर्हि तेन तदीयबुद्धिव्यामोहनमेव तस्य विवक्षितमिति किमिति मोहयसीवेत्युच्यते

किंच व्यामिश्रेणेव यद्यपि विविक्ताभिधायी भगवांस्तथापि मममंदबुद्धेर्व्यामिश्रमिव भगवतो वाक्यं प्रति भाति तेन मम
मबुद्धिं मोहयसीवेति मम बुद्धेर्व्यामोहापनयनाय हि प्रवृत्तस्त्वं तु कथं मोहयस्यतोऽब्रवीमि बुद्धिं मोहयसीवेति मे म

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे॥

मेति तत्र भिन्नकर्तृकयोर्ज्ञानकर्मणोरेकपुरुषानुष्ठानासंभवं यदि मन्यसे॥ श्रीरामायनमः॥ श्रीः॥ ॥

तत्राह। ममेति। ज्ञानकर्मणी मिथो विरोधाद्युगपदेकपुरुषाननुष्ठेयतया भिन्नकर्तृके कथ्येते तथा च तयोरन्यतरस्मिन्नेव त्वं नियु
क्तो न तु ते बुद्धिव्यामोहनमभिमतमिति भगवतो मतमनुवदति। तदेकमिति॥

तदेकमित्यादिश्लोकार्द्धेनोत्तरमाह तत्रेति उक्तं भगवतो मतं सततमस्यापरामृश्यते एवमित्युक्तप्रकारोक्तिः एकमित्युक्तमेव स्फुटयति बुद्धिमिति निश्चयप्रकारं प्रकटयति इदमिति योग्यत्वं स्पष्टयति बुद्धीति अस्य हि क्षत्रियस्य सतोऽतः करणस्य देहशक्तेः समरसंमारंभावस्थायाश्चेदमेव ज्ञानं कर्म वाऽनुगुणमिति निर्द्धार्येत्यन्वयः ब्रूहीत्यर्थः निश्चित्य साऽन्यतरोक्तौ तेन श्रोतुः श्रेयोवाप्तिफलमाह येनेति तदेकमित्यादिवाक्यस्याक्षरोत्थमर्थमुक्त्वा समुच्चयस्य शास्त्रार्थत्वाभावे तात्पर्यमाह यद्दिहीति गुणभूतमपीत्यादि

तत्रैवं सति तत्तयोरेकं बुद्धिकर्मेवाऽहमेवार्ज्जुनस्य योग्यं बुद्धिशक्त्यवस्थानुरूपमिति च निश्चित्य वदेयेन ज्ञानेन कर्मणा वाऽन्यतरेण श्रेयोऽहमाप्नुयां प्राप्नुयां यदि हि कर्मनिष्ठायां गुणभूतमपि ज्ञानं भगवतोक्तं

तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयां २ ॥

स्यात्तत्कथं तयोरेकं वदेत्येकविषय एवार्ज्जुनस्य प्रश्नः स्यान्न हि भगवतोक्तमन्यतरदेव ज्ञानकर्मणोर्वक्ष्यामि नैव द्वयमिति येनोभयप्राप्त्यसंभवमात्मनो मन्यमान एकमेव प्रार्थयेत २ ॥

नाप्रधानभूतमपि चेति विवक्षितं ननूभयप्राप्त्यसंभवमात्मनो मन्यमानस्यार्ज्जुनस्यान्यतरविषया शुश्रूषा भविष्यतीति नेत्याह नहीति यथोक्तं भगवद्वचनाभावे द्वयप्राप्त्यसंभवबुद्ध्यानान्यतरप्रार्थनासंभवतीत्याह येनेति नहि तथाविधं भगवद्वचनं भवते एवं भगवतः समुच्चयवादित्वांगीकारादतस्तदभावादुक्तं बुद्ध्यानयुक्तान्यतरप्रार्थनेत्यर्थः २

समुच्चयविरोधितया प्रश्नं व्याख्याय तद्विरोधित्वेनैव प्रतिवचनमुत्थापयति। प्रश्नेति। येयं व्यवहारभूमिरुपलभ्यते तत्र ये त्रैवर्णि
कास्तानेकमेवाशास्त्रीयमनुष्ठातुमधिक्रियंते ते षां द्वयी स्थितिर्मया प्रोक्तेति पूर्वार्द्धं योजयति। लोकेऽस्मिन्निति स्थितिमेव व्याक
रोति। अनुष्ठेयेति। पूर्वं प्रवचनप्रसंगं प्रदर्शयन्प्रवक्तारं विशिनष्टि। सर्गादाविति। प्रवचनस्यायथार्थत्वशंकां वारयति। सर्वज्ञेने

प्रश्नानुरूपमेव प्रतिवचनं। लोकेऽस्मिन् शास्त्रार्थानुष्ठानाधिकृतानां त्रैवर्णिकानां द्विविधा द्विःप्रकारा
निष्ठा स्थितिरनुष्ठेयतात्पर्यं पुरा पूर्वं सर्गादौ प्रजाः सृष्ट्वा तासामभ्युदयनिःश्रेयसप्राप्तिसाधनं वेदार्थसं

॥श्रीभगवानुवाच॥ लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ॥

प्रदायं आविः कुर्वता प्रोक्ता मया सर्वज्ञेनेश्वरेण इति अनघ अपाप तत्र का सा द्विविधा निष्ठा इत्याह। त
त्र ज्ञानयोगेन ज्ञानमेव योगस्तेन योगेन सांख्यानामात्मानात्मविषयविवेकज्ञानवतां॥ ॥

ति। अर्जुनस्य भगवदुपदेशश्रवणे योग्यत्वं सूचयति। अनघेति। निर्द्धारणार्थात त्रेति सप्तमी ज्ञानं परमार्थवस्तुविषयं तदेव यो
गशब्दितं युज्यतेऽनेन ब्रह्मणेति व्युत्पत्तेस्तेन निष्ठेत्यनुवर्त्तते। उक्तज्ञानोपायमुपदिदिक्षुः सांख्यशब्दार्थमाह। आत्मेति॥ ॥

तेषामेव कर्मनिष्ठत्वं व्यावर्त्तयति। ब्रह्मचर्येति तेषां जपादिपारवश्येन श्रवणादिपराङ्मुखत्वं व्यैाकरोति वेदांतेति उक्तविशेष
णवतां मुख्यसंन्यासित्वेन फलावस्थत्वं दर्शयति परमहंसेति। कर्म वर्णाश्रमविहितं धर्माख्यं तदेव युज्यते अनेनाभ्युदयेनेति
योगस्तेन निष्ठा कर्मिणां प्रोक्ता इत्यनुषंगं दर्शयन्नाह। कर्मैवेत्यादिना। एवं प्रतिवचनवाक्यस्यान्यक्षराणि व्याख्यायतस्यैव

॥ ॥ ब्रह्मचर्याश्रमादेव कृतसंन्यासानां वेदांतविज्ञानसुनिश्चितार्थानां परमहंसपरिव्राजकानां ब्रह्म
ण्येवावस्थितानां निष्ठा प्रोक्ता कर्मयोगेन कर्मैव योगः कर्मयोगस्तेन कर्मयोगेन योगिनां कर्मिणां निष्ठा

ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां ॥३॥

प्रोक्तेत्यर्थः। यदि चैकेन पुरुषेणैकस्मै पुरुषार्थाय ज्ञानं कर्म च समुच्चित्यानुष्ठेयं भगवतेष्टमुक्तं वक्ष्यमाणं वा गी
तासु वेदेषु चोक्तं कथमिहार्जुनायोपसन्नाय प्रियाय विशिष्टभिन्नपुरुषकर्तृके एव ज्ञानकर्मनिष्ठे ब्रूयात्॥

तात्पर्यं कथयति। यदि चेकेति। इष्टस्यापि दुर्बोधत्वमाशंक्याह। उक्तमिति। ज्ञानस्यापि मूलविकलतया विभ्रम
त्वमाशंक्याह वेदेष्विति। तस्याशिष्यत्वबुद्ध्या अन्यथा कथनमित्याशंक्याह। उपसन्नायेति। तथापि तस्मिन्नौदासि
न्यादन्यथोक्तिरित्याशंक्याह प्रियायेति। ब्रवीति च विभिन्नपुरुषकर्तृकं निष्ठाद्वयं तेन न समुच्चयो भगवदभीष्टः। श्रा

नन्वर्जुनस्य प्रेक्षापूर्वकारित्वात्ज्ञानकर्मश्रवणानंतरमुभयनिर्देशानुपपत्त्या समुच्चयानुष्ठानं संपत्स्यते तद्व्यतिरिक्तानां तु ज्ञानक
र्मणोर्भिन्नपुरुषानुष्ठेयत्वं श्रुत्वा प्रत्येकं तदनुष्ठानं भविष्यतीति भगवतो मतं कल्प्यते तस्यार्जुने अनुरागातिरेकादितरेषु च तदभा
वादिति तत्राह । यदि पुनरिति । अप्रमाणभूतत्वमनाप्तत्वं न च भगवतो रागादिमत्वेनानाप्तत्वं युक्तं समं सर्वेषु भूतेषु तिष्ठंतमित्या

यदि पुनरर्जुनो ज्ञानं । च कर्म च द्वयं श्रुत्वा स्वयमेवानुष्ठास्यत्यन्येषां तु भिन्नपुरुषानुष्ठेयतां वक्ष्यामीति
मतं भगवतः कल्प्येत तदा रागद्वेषवानप्रमाणभूतो भगवान् कल्पितः स्यात् तच्चायुक्तं तस्मान्न समुच्चयो
ज्ञानकर्मणोर्यदर्जुनेनोक्तं कर्मणो ज्यायस्त्वं बुद्धेस्तच्च स्थितमनिराकरणं तस्याश्च ज्ञाननिष्ठायाः संन्या
सिनैवानुष्ठेय । त्वं भिन्नपुरुषानुष्ठेयत्ववचनाद्भगवत एवमेवानुमतमिति गम्यते ॥ ३ ॥ ॥

दिविरोधादित्याह । तच्चेति । निष्ठाद्वयस्य भिन्नपुरुषानुष्ठेयत्वनिर्देशफलमुपसंहरति । तस्मादिति । किमिति भगवता बुद्धेर्ज्या
यस्त्वं ज्यायसी चेदित्यत्रोक्तमुपेक्षितमिति तत्राह । यदर्जुनेनेति । किंच ज्ञाननिष्ठायां संन्यासिनामेवाधिकारो भगवतोऽभि
प्रेतोऽन्यथा तदीयविभागवचनविरोधादिति विभागवचनसामर्थ्यसिद्धमर्थमाह । तस्याश्चेति ॥ ३ ॥ ॥

तर्हि विभागवचनानुरोधादर्जुनस्यापि संन्यासपूर्विकायां ज्ञाननिष्ठायामेवाधिकारो भविष्यतीनेत्याह मां चेति बुद्धेर्ज्यायस्त्वमु
पेयापीति चकारार्थः अर्जुनमालक्ष्य भगवानाहेति संबंधः अंतरेणापि कर्मणि श्रवणादिभिर्ज्ञानावाप्तिर्भविष्यतीति परबु
द्धिमनुरुध्य विशिनष्टि कर्मेति विभागवचनवशात् समुच्चयश्चेदुभयोरपि ज्ञानकर्मणोः स्वातंत्र्येण पुरुषार्थहेतुत्वमन्यथा

मां च बंधकारणे कर्मण्येव नियोजयसीति विषण्णमनसमर्जुनं कर्मनारभ इत्येवं मन्वानमालक्ष्याह भगवान्न कर्मणा
मनारंभादिति अथवा ज्ञानकर्मनिष्ठयोः परस्परविरोधादेकेन पुरुषेण युगपदनुष्ठातुमशक्यत्वे सतीतरेतरानपे
क्षयोरेकपुरुषार्थहेतुत्वे प्राप्ते कर्मनिष्ठाया ज्ञाननिष्ठाप्राप्तिहेतुत्वेन पुरुषार्थहेतुत्वं न स्वातंत्र्येण ज्ञाननिष्ठा तु कर्मनि
ष्ठोपायलब्धात्मिका सती स्वातंत्र्येणैव पुरुषार्थहेतुरिति अन्यानपेक्षेत्येतमर्थं प्रदर्शयिष्यन्नाह भगवान् ॥

कर्मवत्तज्ज्ञानमपि न स्वातंत्र्येण पुरुषार्थं साधयेदित्याशंक्य संबंधांतरमाह अथवेति तर्हि ज्ञाननिष्ठापि कर्मनिष्ठावन्निष्ठ
त्वाविशेषान्न स्वातंत्र्येण पुरुषार्थहेतुरिति समुच्चयसिद्धिरित्याशंक्याह ज्ञाननिष्ठा त्विति न हि रज्जुतत्त्वज्ञानमुत्पन्नं फलसिद्धौ स
हकारिसापेक्षमालक्ष्यते तथेदमपि समुत्पन्नं मोक्षाय नान्यदपेक्षते तदाह अन्येति ॥ ॥

तस्य चैतत्कर्मेति श्रुताविव कर्मशब्दस्य क्रियमाणवस्तुविषयत्वमाशंक्य व्याचष्टे क्रियाणामिति तासां नित्यनैमित्तिकत्वेन वि
भजते यज्ञादीनामिति अस्मिन्नेव जन्मन्यनुष्ठितानां कर्मणां बुद्धिशुद्धिद्वारा ज्ञानकारणत्वे ब्रह्मचारिणां कुतो ज्ञानोत्पत्तिर्ज
न्मांतरकृतानां च कर्मणां तथात्वे गृहस्थादीनामैहिकानि कर्माणि न ज्ञानहेतवः स्युरित्याशंक्यानियमं दर्शयति इहेति नामु
नि सत्वशुद्धिकारणानि उपात्तदुरितबंधादित्याशंक्याह उपात्तेति तर्हि तावतैव कृतार्थानां कुतो ज्ञाननिष्ठाहेतुत्वं तत्राह त

न कर्मणामनारंभाद्यारंभात्कर्मणां क्रियाणां यज्ञादीनां इह जन्मनि जन्मांतरे वानुष्ठितानामुपात्तदुरितक्षयहेतुत्वेन
सत्वशुद्धिकारणानां तत्कारणत्वेन च ज्ञानोत्पत्तिद्वारेण ज्ञाननिष्ठाहेतूनां ज्ञानमुत्पद्यते पुंसां श्रुत्यास्य पापस्य कर्मणः य
थादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि इत्यादेः स्मरणाद्यनारंभादननुष्ठानान्नैःकर्म्यं निःकर्मभावं कर्मशून्यतां ज्ञानयोगे
न निष्ठां निःक्रियात्मरूपेणैवावस्थानमिति यावत्पुरुषो नाश्नुते न व्याप्नोति न प्राप्नोतीत्यर्थः ॥ ॥ ॥

कारणत्वेनेति कर्मणां चित्तशुद्धिद्वारा ज्ञानहेतुत्वे मानमाह ज्ञानमिति अनारंभशब्दस्योपक्रमविपरीतविषयत्वं व्यावर्त्तयति
अननुष्ठानादिति निःकर्मणः संन्यासिनः कर्मेज्ञानं नैष्कर्म्यं इति व्याचष्टे नैष्कर्म्येति कर्माभावावस्थां व्यवच्छिनत्ति ज्ञानयोगे
॥ ॥ न इति तस्याः साधनपक्षपातित्वं व्यावर्त्तयति निःक्रियेति ॥ ॥ ॥ ॥

गी·भा·
९६

कर्मानुष्ठानोपायलब्धज्ञाननिष्ठास्वतंत्रापुमर्थहेतुरिति प्रकृतार्थसमर्थनार्थे व्यतिरेकवचनस्य विपर्ययपर्यवसानमन्वाचष्टे कर्मणामिति । तद्विपर्ययमेवव्याचष्टे तेषामिति । उक्तेर्थे हेतुं पृच्छति कस्मादिति । जिज्ञासितहेतुमाह यन्यत इति उपायत्वेपि तदभावे कुतो नैष्कर्म्यसिद्धिरित्याशंक्याह नहीति ज्ञानयोगं प्रति कर्मयोगस्योपायत्वे श्रुतिस्मृती प्रमाणयति

कर्मणामनारंभान्नैः कर्म्यं नाश्नुत इति वचनात्तद्विपर्ययात्तेषामारंभान्नैः कर्म्यमश्नुत इति गम्यते कस्मात्पुनः कारणात्कर्मणामनारंभान्नैः कर्म्यं नाश्नुत इत्युच्यते कर्मारंभस्यैव नैः कर्म्योपायत्वात् नह्युपायमंतरेणोपेयप्राप्तिरस्ति कर्मयोगोपायत्वं च नैः कर्म्यलक्षणस्य ज्ञानयोगस्य श्रुताविह च प्रतिपादनात् श्रुतौ ताव

न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते ॥

त्प्रकृतस्यात्मलोकस्य वेद्यस्य वेदनोपायत्वेन तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसे त्यादिना कर्मयोगस्य ज्ञानयोगोपायत्वं प्रतिपादितमिहापि च संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये यज्ञो दानं तपश्चैव पावनानि मनीषिणामित्यादि प्रतिपादयिष्यति ॥

ति कर्मयोगेति श्रौतमुपायोपेयत्वप्रतिपादनं प्रकटयति श्रुताविति यत्तु गीताशास्त्रे कर्मयोगस्य ज्ञानयोगं प्रत्युपायत्वोपपादनं तदिदानीमुदाहरति इहापि चेति ॥

आ·गी·
३

शिव
९६

नकर्मणामित्यादिपूर्वार्द्धंव्याख्यायोत्तरार्द्धंव्याख्यातुमाशंकयति ननुचेति आदिशब्देनशांतोदांतउपरतस्तितिक्षुःसंन्यासयो
गाद्यतयःशुद्धसत्वाइत्यादिगृह्यते तत्रैवलोकप्रसिद्धिमनुकूलयति लोकेति प्रसिद्धतरंयतोयतोनिवर्त्ततेततस्ततोविमुच्य
तेनिवर्त्तनाद्धिसर्वतोनवेत्तिदुःखमण्वपीत्यादिदर्शनादितिशेषः लौकिकवैदिकप्रसिद्धिभ्यांसिद्धमर्थमाह अतश्चेति

ननुचाभयंसर्वभूतेभ्योदत्वानैःकर्म्यमाचरेदित्यादौकर्त्तव्यकर्मसंन्यासादपिनैःकर्म्यप्रा
प्तिंदर्शयतिलोकेचकर्मणामनारंभान्नैःकर्म्यमितिप्रसिद्धतरमतश्चनैःकर्म्यार्थिनःकिंक

नचसंन्यसनादेवसिद्धिंसमधिगच्छति ॥४॥

र्मारंभेणेतिप्राप्तमतआह नचसंन्यसनादेवेति नापिसंन्यसनादेवकेवलात्कर्मपरित्याग
मात्रादेवज्ञानरहितात्सिद्धिंनैःकर्म्यलक्षणांज्ञानयोगेननिष्ठांसमधिगच्छतिनप्राप्नोति ॥४॥

तत्रोत्तरस्तेनोत्तरार्द्धमवतार्यव्याकरोत्यत आहेत्यादिना एवकारार्थमाह केवलादिति नदेवस्पष्टयति कर्मेति उक्त
मेवनञमनुकृष्यक्रियापदेनसंगतिंदर्शयति नप्राप्नोतीति ॥४॥

उक्तेर्थे बुभुत्सितं हेतुं वक्तुमुत्तरश्लोकमुत्थापयति कस्मादिति कस्माच्च कर्मसंन्यासादेव सिद्धिमधिगच्छतीति पूर्वेण संबंधः क
दाचित् क्षणमात्रमपि न कश्चिदकर्मकृत्तिष्ठतीत्यत्र हेतुत्वेनोत्तरार्द्धं व्याचष्टे कस्मादिति सर्वशब्दात् ज्ञानवानपि गुणैरवशः
सन् कर्म कार्यते तेत तश्च ज्ञानवतः संन्यासवचनमनवकाशं स्यादित्याशंक्याह अज्ञ इति तमेव वाक्यशेषावष्टंभेन स्पष्टयति
यत इति आत्मज्ञानवतो गुणैरविचाल्यतया गुणातीतत्ववचनादज्ञस्यैव सत्वादिगुणैरिच्छाभेदेन कार्यकारणसंघातं प्रव

कस्मात्पुनः कारणात्कर्मसंन्यासमात्रादेव केवलाज्ज्ञानरहितात्सिद्धिं नैःकर्म्यलक्षणां पुरुषो नाधिगच्छतीति हेत्वाकां
क्षायामाह न हि यस्मात् क्षणमपि किंचित्कालं जातु कदाचिदपि कश्चित्तिष्ठत्यकर्मकृत् सन् कस्मात्कार्यते हि यस्मा
दवश अस्वतंत्र एव कर्म सर्वः प्राणी प्रकृतिजैः प्रकृतितो जातैः सत्वरजस्तमोभिर्गुणैरज्ञ इति वाक्यशेषः यतो व

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ॥ कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥

क्ष्यति गुणैर्यो न विचाल्यत इति सांख्यानां पृथक्करणादज्ञानामेव हि कर्मयोगो न ज्ञानिनां ज्ञानिनां तु गुणैः स्वात्मा
नानां स्वतश्चलनाभावात्कर्मयोगो नोपपद्यते तथा च व्याख्यातं वेदाविनाशिनमित्यत्र ॥ ५ ॥ ॥

र्तयितुमशक्तस्याजितकार्यकारणसंघातस्य क्रियासु प्रवर्त्तमानत्वमित्यर्थः ज्ञानयोगेनेत्यादावुक्तन्यायाच्च वा
क्यशेषोपपत्तिरित्याह सांख्यानामिति ज्ञानिनां गुणप्रयुक्तचलनाभावेपि स्वाभाविकचलनबलात्कर्मयोगो भवि
ष्यतीत्याशंक्याह ज्ञानिनां त्विति प्रत्यगात्मनि स्वाभाविकचलनासंभवे प्रागुक्तन्यायं स्मारयति तथा चेति ॥ ५ ॥ ॥

आत्मज्ञवदनात्मज्ञस्यापि तर्हि कर्माकुर्वतो न प्रत्यवायः शरीरेंद्रियसंघातं नियंतुमसमर्थस्य मूर्खस्यापि संन्याससं
भवादित्याशंक्याह ॥ यस्त्विति ॥ तस्य चोदिताकरणं तच्छब्देन परामृश्यते ॥ ६ ॥ अनात्मज्ञस्य चोदितमकुर्वतो जाग्रतो विषयां

यस्त्वनात्मज्ञश्चोदितं कर्म नारभत इति तदसदेवेति आह ॥ कर्मेंद्रियाणि हस्तादीनि संयम्य संहृत्य य आस्ते तिष्ठ
ति मनसा स्मरन्निंद्रियार्थान्विषयान्विमूढात्मा विमूढांतःकरणो मिथ्याचारो मृषाचारः पापाचारः स उच्यते

॥ कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् ॥ इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥
॥ ६ ॥ यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन ॥ कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ७ ॥ ॥

॥ ६ ॥ यस्तु पुनः कर्मण्यधिकृतोऽज्ञो बुद्धींद्रियाणि मनसा नियम्य आरभतेऽर्जुन कर्मेंद्रियैर्वाक्पाण्यादि
भिः किमारभत इत्याह कर्मयोगमसक्तः सन् स विशिष्यत इतरस्मात् मिथ्याचारात् ॥ ७ ॥ ॥

तरदर्शनध्रौव्यान्मिथ्याचारत्वेन प्रत्यवायित्वमुक्त्वा विहितमनुतिष्ठतस्तस्यैव फलाभिलाषविकलस्य सदाचारत्वे
न वैशिष्ट्यमाचष्टे यस्त्विंद्रियाणीति ॥ विहितमनुतिष्ठतो मूढात्कर्मत्यागो वैशिष्ट्यमक्षरयोजनया स्पष्टयति यस्तु

मौ

कर्मानुष्ठायिनो वै शिष्यमुद्दिश्यमनूद्यतदनुष्ठानमधिकृतेन कर्त्तव्यमिति निगमयति यतइति उक्तमेवहेतुं भगवदनु मतिकथनेन स्फुटयति कर्मेति इतश्चत्वयाकर्त्तव्यं कर्मेत्याह शरीरेति तन्नियतं तस्याधिकृतस्येति संबंधः स्वर्गादि फलेदर्शपूर्णमासादावधिकृतस्यतदपि नित्यंस्यादित्याशंक्यविशिनष्टि फलायेति नित्यंकर्म नियमेन कर्त्तव्यमित्य

यतः एवमतः नियतंनित्यंयोयस्मिन्कर्मणि अधिकृतः फलायचाश्रुतंतन्नियतंकर्मतत्कुरुत्वंय तःकर्मज्यायोऽधिकतरंफलतो हि यस्मात्तदकर्मणोऽकरणादनारंभात् कथंशरीरयात्राशरीर

नियतंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः शरीरयात्रापिचतेन प्रसिध्येदकर्मणः ॥ ८ ॥

स्थितिरपिचतेतवनप्रसिद्ध्येन्नप्रसिद्धिंगच्छेत् कर्मणोकरणाद्दतोदृष्टः कर्माकर्मणोर्विशेषोलोके ॥ ८ ॥

त्रहेतुमाह यतइति हिशब्दोपात्तमुक्तमेवहेतुमनुवदति यस्मादिति करणस्याकरणात् ज्यायस्त्वंप्रश्नपूर्वकंप्रकटय ति कथमित्यादिना सत्येवकर्मणि देहादिचेष्टाद्वाराशरीरंस्थातुंपारयति तदभावेजीवनमेवदुर्लभंभवेदिति फलित

कर्मणाबध्यते जंतुरिति स्मृतेर्बंधार्थं कर्म न श्रेयोर्थिना कर्त्तव्यमित्याशंकामनूद्य दूषयति यच्चेत्यादिना कर्मोधिकृतस्य
तदकरणमयुक्तमिति प्रतिज्ञातं प्रश्नपूर्वकं विवृणोति कथमित्यादिना फलाभिसंधिमंतरेण यज्ञार्थं कर्म कुर्वाणस्य बंधा
भावात्तादर्थ्येन कर्म कर्त्तव्यमित्याह तदर्थमिति यज्ञार्थं कर्मेत्ययुक्तं न हि कर्मार्थमेव कर्मेत्याशंक्य व्याचष्टे यज्ञो वै वि

यच्चमन्यसे बंधार्थत्वात्कर्म न कर्त्तव्यमिति तदप्यसत् कथं यज्ञो वै विष्णुरिति श्रुतेर्यज्ञ ईश्वरस्त
दर्थं यत् क्रियते तद्यज्ञार्थं कर्म तस्मात्कर्मणोन्यत्रान्येन कर्मणा लोकोयमधिकृतः कर्मकृत् कर्म

यज्ञार्थात्कर्मणोन्यत्र लोकोयं कर्मबंधनः तदर्थं कर्म कौंतेय मुक्तसंगः समाचर ॥ ९ ॥ ॥

बंधनः कर्मबंधनं यस्य स कर्मबंधनो लोको न तु यज्ञार्थात् अतस्तदर्थं यज्ञार्थं कर्म कौंतेय मुक्तसंगः
कर्मफलसंगवर्जितः सन् समाचर निर्वर्त्तय ॥ ९ ॥ ॥

ष्णुरिति कथं तर्हि कर्मणा बध्यते जंतुरिति स्मृतिस्तत्राह तस्मादिति ईश्वरार्पणबुद्ध्या कृतस्य कर्मणो बंधार्थत्वाभावे
फलितमाह अत इति ९ ॥

नित्यस्य कर्मणो नैमित्तिकसहितस्याधिकृतेन कर्त्तव्यत्वे हेत्वंतरपरत्वेनानंतरश्लोकमवतारयति। इतश्चेति। कथं पुनरनेन यज्ञेन
वृद्धिरस्माभिः शक्या कर्तुमित्याशंक्याह। एष इति। १०। कथं पुनरभीष्टफलविशेषहेतुत्वं यज्ञस्य विज्ञायते न हि देवतात्र सा

इतश्चाधिकृतेन कर्म कर्त्तव्यं। सहयज्ञाः यज्ञसहिताः प्रजास्त्रयो वर्णास्तान्सृष्ट्वोत्पाद्य पुरा पूर्वं सर्गादौ उवा
च उक्तवान्प्रजापतिः। प्रजानां स्रष्टा अनेन यज्ञेन प्रसविष्यध्वं प्रसवो वृद्धिरुत्पत्तिस्तां कुरुध्वं। एष यज्ञो वो
युष्माकं अस्तु भवतु इष्टकामधुक् इष्टान् अभिप्रेतान्कामान्फलविशेषान्दोग्धीतीष्टकामधुक्। १०।

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्। १०। दे
वान्भावयताऽनेन ते देवा भावयंतु वः। परस्परं भावयंतः श्रेयः परमवाप्स्यथ। ११। ॥

कथं देवानिंद्रादीन्भावयत वर्द्धयत अनेन यज्ञेन ते देवा भावयंतु आप्याययंतु वृष्ट्यादिना वो युष्मानेवं परस्प
रं अन्योन्यं भावयंतः श्रेयः परमपि ज्ञानप्राप्तिक्रमेणावाप्स्यथ स्वर्गं वापरं श्रेयोऽवाप्स्यथ। ११। ॥

दाहृते स्वर्गाद्यभ्युदयो लभ्यते नापि सम्यग्दर्शनमंतरेण निःश्रेयसं सेद्धुं पारयतीति शंकते कथमिति। तत्र श्लोकेनोत्तर
माह। देवानिति। मुमुक्षुत्वबुभुक्षुत्वविभागेन श्रेयसि विकल्पः। ११।

इतश्चाधिकृतेन कर्म कर्त्तव्यमित्याह किंचेति कथमस्माभिर्भाविताः संतो देवा भावयंत्यस्मानिति तदाह इष्टानिति यज्ञानुष्ठानेन
पूर्वोक्तरीत्या स्वर्गापवर्गयोर्भावेपि कथं स्त्रीपुत्रादिसिद्धिरित्याशंक्य पूर्वार्द्धं व्याकरोति इष्टानभिप्रेतानिति पश्वादिभिश्च

किंच इष्टानभिप्रेतान्भोगान्हि वो युष्मभ्यं देवा दास्यंते वितरिष्यंति स्त्रीपशुपुत्रादीन्यज्ञभाविताय
ज्ञैर्विवर्द्धितास्तोषिता इत्यर्थः तैर्देवैर्दत्तान्भोगानप्रदायादत्त्वा आनृण्यमकृत्वैवेत्यर्थः एभ्यो

इष्टान्भोगान्हि वो देवा दास्यंते यज्ञभाविताः तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः १२ ॥

देवेभ्यो यो भुंक्ते स्वदेहेंद्रियाण्येव तर्पयति स्तेन एव तस्कर एव सः देवादिस्वापहारी ॥ १२ ॥ ॥

यज्ञानुष्ठानद्वारा भोगो निर्वर्त्तनीयोन्यथा त्वस्य वा यत्प्रसंगादित्युत्तरार्द्धं व्याचष्टे तैरिति आनृण्यमकृत्वेत्ययमर्थः देवानाम्
षीणां पितृणां च यज्ञेन ब्रह्मचर्येण प्रजया संतोषमनापाद्य स्वकीयं कार्यकारणसंघातमेव पोष्टुं भुंजानः तस्करो भव

देवादिभ्यः संविभागमकृत्वा भुंजानानां प्रत्यवायित्वमुक्त्वा तदन्येषां सर्वदोषराहित्यं दर्शयति ॥ येपुनरिति ॥ यज्ञशिष्टाशि
नो ये पुनस्ते तादृशाः सर्वकिल्बिषैर्मुच्यंत इति यो जनात्तैर्दत्तानित्यादिनोक्तं निगमयति ॥ भुंजत इति ॥ देवयज्ञादीनित्यादिश
ब्देन पितृयज्ञो मनुष्ययज्ञो भूतयज्ञो ब्रह्मयज्ञश्चेति चत्वारो यज्ञा गृह्यंते ॥ चुल्ली शब्देन पिठर धारणाद्यर्थो क्रियां कुर्वंतो विन्या

येपुनः देवयज्ञादीन्निर्वर्त्यतच्छिष्टमशनममृताख्यमशितुं शीलं येषां ते यज्ञ

यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः॥

शिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः सर्वैः पापैः चुल्ल्यादिपंचसूनाकृतैः॥

सविशेषवंतस्तल्लयो ग्रावाणो विवक्ष्यंते ॥ आदिशब्देन कंडनी पेषणी मार्जन्युदकुंभश्चैते हिंसाहेतवो गृहीतास्तान्येता
नि पंच प्राणिनां सूनास्थानानि हिंसाकारणानि तत्तद्युक्तैः सर्वैरपि बुद्धिपूर्वकैर्दुरितैर्विमुच्यंत इति संबंधः॥ ॥

प्रमादोविचारव्यतिरेकेणाबुद्धिपूर्वकमुपनतंपादपातादिकर्मतेन प्राणिनांहिंसासंभाव्यते आदिशब्देनाशुचिसंस्पर्शादिग्रही
तंतदुत्थैश्चपापैर्महायज्ञादिकारिणोमुच्यंते ॥ उक्तं हि खंडनंपेषणंचुल्लीउदकुंभश्चमार्जनं ॥ पंचसूनागृहस्थस्यपंचयज्ञात्प्र
णश्यतीति ॥ पंचसूनागृहस्थस्यचुल्लीपेषण्युपस्करः खंडनीचोदकुंभश्चवद्ध्यंतेयास्तुवाहयन्निति च तस्यायमर्थः या
यथोक्ताः पंचसंख्याकागृहस्थस्यसूनास्ताः योवाहयन्व्यापारयन्वर्त्ततेतेनप्राणिनोबुद्धिपूर्वकमबुद्धिपूर्वकंचवद्ध्यं

प्रमादकृतहिंसादिजनितैश्चाप्येः ये त्वात्मंभरयो भुंजतेतेत्वघंपापंस्व

भुंजतेतेत्वघंपा पायेपचंत्यात्मकारणात् ॥ १३ ॥

यमपिपा पायेपचंतिपाकंनिर्वर्त्तयंति आत्मकारणादात्महेतोः ॥ १३ ॥

तेतत्त्वयुक्तंसर्वमपिपापंमहायज्ञानुष्ठानात्प्रणश्यतीति ॥ महायज्ञानुष्ठातुस्तुत्यर्थंतदनुष्ठानविमुखान्निंदति ॥ येत्विति
॥ आत्मंभरित्वमेवस्फुटयति ॥ येपचंतीति ॥ स्वदेहेंद्रियपोषणार्थमेवपाकंकुर्वतांदेवयज्ञादिपराङ्मुखानांपापभूयस्त्वं
दर्शयति ॥ भुंजतइति ॥ पाठक्रमस्त्वर्थक्रमादपबाधनीयः ॥ १३ ॥

देवयज्ञादिकं कर्माधिकृतेन कर्त्तव्यमित्यत्र हेत्वंतरमितः शब्दोपात्तमेव दर्शयति अन्नादिति ननु भुक्तमन्नं रेतो लोहितपरिणतिक्रमेण प्रजारूपेण जायते तच्चान्नं वृष्टिसंभवं प्रत्यक्षदृष्टं तत्कथं कर्मणो जगच्चक्रप्रवर्त्तकत्वमिति शंकते कथमिति पारंपर्येण कर्मणस्तद्धेतुत्वं साधयति अन्यत इति उक्तेर्थे स्मृत्यंतरं संवादयति अग्नाविति तत्र हि देवताभिधानपूर्वकं तदुद्देशेन प्रहिताहु

इतश्चाधिकृतेन कर्म कर्त्तव्यं जगच्चक्रप्रवृत्तिहेतुर्हि कर्म कथमुच्यते अन्नाद्भुक्ताल्लोहितरेतःपरिणतात्प्रत्यक्षं भवंति जायंते भूतानि पर्ज्जन्याद्वृष्टेरन्नस्य संभवोन्नसंभवः यज्ञाद्भवति पर्ज्जन्यः अग्नौ प्रास्ताहुतिः

अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः यज्ञाद्भवति पर्ज्जन्यो यज्ञः कर्मसमुद्भवः १४

सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मृतेः यज्ञोऽपूर्वं स च कर्मसमुद्भवः ऋत्विग्यजमानयोश्च व्यापारः कर्म ततः समुद्भवो यस्य यज्ञस्यापूर्वस्य स यज्ञः कर्मसमुद्भवः १४ ॥

तीरपूर्वं तां गतारश्मिद्वारेणादित्यमधिरुह्य वृष्ट्यात्मना पृथिवीं प्राप्य व्रीहियवाद्यन्नभावमापद्य संस्कृतोपयुक्ता शुक्रशोणितरूपेण परिणता प्रजाभावं प्राप्नोतीत्यर्थः यज्ञः कर्मसमुद्भव इत्ययुक्तं स्वस्यैव स्वोद्भवे कारणतायोगादित्याशंक्याह ऋत्विगिति

यदपूर्वहेतुत्वेनकर्मोक्तंतत्किंचैत्यवंदनादिकिंवाग्निहोत्रादियदिवाचैत्यवंदनादीतिसंदिहानंप्रत्याह ॥ कर्मेति ॥ किमितिकर्मणोब्रह्मो
द्भवत्वमुच्यते ॥ सर्वस्यतदुद्भवत्वाविशेषादित्याशंक्याह ॥ ब्रह्मवेदइति ॥ ब्रह्मतर्हिवेदाख्यमनादिनिधनमितितत्राह ॥ ब्रह्मपुनरिति
॥ अक्षरात्मनोवेदस्यपुनरक्षरेभ्यःसकाशादेवसमुद्भवोनसंभवतीत्याशंक्याह ॥ अक्षरमिति ॥ ब्रह्मेत्यक्षरमेवोक्तंतत्कथंत

तच्चएवंविधंकर्मकुतोजातमित्याह ॥ कर्मब्रह्मोद्भवंब्रह्मवेदःसउद्भवोयस्यतत्कर्मब्रह्मोद्भवंविद्धिजानी
हिब्रह्मपुनर्वेदाख्यमक्षरसमुद्भवंअक्षरंपरमात्मासमुद्भवोयस्यतदक्षरसमुद्भवंतत्संभवोब्रह्मवेदइत्यर्थः ॥

कर्मब्रह्मोद्भवंविद्धिब्रह्माक्षरसमुद्भवं ॥ तस्मात्सर्वगतंब्रह्मनित्यंयज्ञेप्रतिष्ठितं ॥ १५ ॥

॥ यस्मात्साक्षात्परमात्माख्यादक्षरात्पुरुषनिःश्वासवत्समुद्भूतंब्रह्मतस्मात्सर्वार्थप्रकाशकत्वात्सर्व
गतमपि ॥ सन्नित्यंसदायज्ञविधिप्रधानत्वाद्यज्ञेप्रतिष्ठितं ॥ १५ ॥

स्मादेवोद्भवतीत्याशंक्यब्रह्मशब्दार्थमुक्तमेवस्मारयति ॥ ब्रह्मवेदइति ॥ ननुब्रह्मशब्दितस्यवेदस्यापिपौरुषेयत्वात्प्रामा
ण्यसंदेहात्कथंतदुक्तमग्निहोत्रादिकंकर्मनिर्द्धारयितुंशक्यतेतत्राह ॥ यस्मादिति ॥ कथंतर्हितस्ययज्ञेप्रतिष्ठितत्वंसर्वगत
त्वविशेषायोगादित्याशंक्याह ॥ सर्वगतमपीति ॥ १५ ॥

अधिकृतेनाऽध्ययनादिद्वारा जगच्चक्रमनुवर्तनीयमन्यथेश्वराज्ञाऽतिलंघिनस्तस्य प्रत्यवायः स्यादित्याह। एवमिति। न कर्मणामनारं
भादित्यादिनोक्तमुपसंहरति। तस्मादिति। जगच्चक्रस्य प्रागुक्तप्रकारेण नानुवर्तते वृथा जीवनमघसाधनं यस्मात्तस्माज्जीवता नि
यतं कर्म कर्तव्यमित्यर्थः। यद्यधिकृतेन कर्तव्यमेव कर्म तर्हि किमित्यज्ञेनेति विशेष्यते ज्ञाननिष्ठेनापि तत्कर्तव्यमेवाधिकृतत्वावि
शेषादित्याशंक्य पूर्वोक्तमनुवदति। प्रागिति। नहि ज्ञानकर्मणोर्विरोधात् ज्ञाननिष्ठेन कर्म कर्तुं शक्यते तथा चानात्मज्ञेनैव शुद्ध्यादि

एवमीश्वरेण वेदयज्ञपूर्वकं जगच्चक्रं प्रवर्तितं नानुवर्तयतीह लोके यः कर्मण्यधिकृतः सन्नघायुः। अघं पापमस्यायुर्जीव
नं सोऽघायुः पापजीवन इति यावत्। इंद्रियारामः इंद्रियैरारमणं आक्रीडा विषयेषु यस्य स इंद्रियारामो मोघं वृथा हे पार्थ स जी
वति तस्मादज्ञेनाधिकृतेन कर्तव्यमेव कर्मेति प्रकरणार्थः। प्रागात्मज्ञाननिष्ठायोग्यताप्राप्तेस्तादर्थ्येन कर्मयोगानुष्ठानम

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः। अघायुरिंद्रियारामो मोघं पार्थ स जीवति॥१६॥ श्रीरामायन॥

धिकृतेनानात्मज्ञेन कर्तव्यमित्येतन्न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते इत्यत आरभ्य शरीरयात्रापि च ते न प्रसि
द्ध्येदकर्मण इत्येतदंतेन प्रतिपाद्य यज्ञार्थात्कर्मणोऽन्यत्रेत्यादिना मोघं पार्थ स जीवतीत्येवमंतेनापि ग्रंथेन प्रासंगिक
मधिकृतस्यानात्मविदः कर्मानुष्ठाने बहुकारणमुक्तं तदकरणे च दोषसंकीर्तनं कृतं॥१६॥ ॥

परंपरया ज्ञानार्थं कर्मानुष्ठेयमिति प्रतिपादितमित्यर्थः। तर्हि यज्ञार्थादित्यादि किमर्थेन हि तत्र ज्ञाननिष्ठा प्रतिपाद्यते कर्म
निष्ठा तु पूर्वमेवोक्ता तान्नात्र वक्तव्येत्याशंक्य वृत्तमर्थांतरमनुवदति। प्रतिपाद्येति प्रासंगिकमस्तस्य कर्मकर्तव्यतोक्तिप्रसंगा
गतमिति यावत् बहुकारणमीश्वरप्रसादो देवताप्रीतिश्चेत्यादि दोषसंकीर्तनं तैर्दत्तानप्रदायेत्यादि॥१६॥ ॥

वृत्तमर्थमेवं विभज्यानूद्यानंतरंश्लोकमाशंकोत्तरत्वेनावतारयति। एवमिति। अर्जुनस्यप्रश्नमित्येवमर्थमाशंक्याह। भगवा
निति संबंधः नन्वेषाशंकानावकाशमासादयति। अनात्मज्ञेन कर्त्तव्यं कर्मेति बहुशो विशेषितत्वादित्याशंक्याह। स्वयमेवेति
॥ किमर्थं श्रुत्यर्थे स्वयमेव भगवानत्र प्रतिपादयतीत्याशंक्याह। शास्त्रार्थस्येति। गीताशास्त्रस्य ससंन्यासं ज्ञानमेव मुक्ति
साधनमर्थो नार्थांतरमिति विवेकार्थमिह श्रुत्यर्थे कीर्त्तयतीत्यर्थः। तमेव श्रुत्यर्थं संक्षिपति। एतमिति। सिद्धं वेदात्मवेद

॥ एवं स्थिते किमेवं प्रवर्त्तितं चक्रं सर्वेणानुवर्त्तनीयमाहोस्वित्पूर्वोक्तकर्मयोगानुष्ठानोपायत्राप्यामनात्म
विदाज्ञानयोगेनैव निष्ठामात्मविद्भिः सांख्यैः अनुष्ठेयामप्राप्तेनैवेत्येवमर्थमर्जुनस्य प्रश्नमाशंक्य स्वयमे
वशास्त्रार्थस्य विवेकप्रतिपत्त्यर्थमेतमेवं चैतमात्मानं विदित्वा निवृत्तमिथ्याज्ञानाः संतो ब्राह्मणा मिथ्या
ज्ञानवद्भिरवश्यकर्त्तव्येभ्यः पुत्रैषणादिभ्यो व्युत्थायाथ भिक्षाचर्यं शरीरस्थितिमात्रप्रयुक्तं चरंति न ते
षामात्मविज्ञाननिष्ठाव्यतिरेकेणान्यत्कार्यमस्तीत्येवं श्रुत्यर्थमिह गीताशास्त्रे प्रतिपिपादयिषितमाविःकुर्वन्ना

नमनर्थकं तर्हि व्युत्थानादीत्याशंक्याप्रातिकविज्ञानफलमाह। निवृत्तेति। ब्राह्मणग्रहणं तेषामेव व्युत्थाने मुख्याधिकारि
त्वमिति ज्ञापनार्थं क्लेशात्मकत्वादेषणानां ताभ्यो व्युत्थानं सर्वेषां स्वाभाविकत्वादविधित्सितमित्याशंक्याह। मिथ्येति
॥ भिक्षाचर्यं चरंतीति वचनं व्युत्थानविरुद्धमित्याशंक्याह। शरीरेति। तर्हि तद्वदेव तेषामग्निहोत्राद्यपि कर्त्तव्यमापद्येते
त्याशंक्य व्युत्थायिनामाश्रमधर्मवदग्निहोत्रादेरनुष्ठायकाभावान्नैवमित्याह। न तेषामिति। ॥

यथोक्तं श्रुत्यर्थमस्मिन् गीताशास्त्रे पौर्वापर्येण पर्यालोच्यमाने प्रतिपादयितुमिष्टं प्रकटीकुर्वन् कर्तव्यमेव कर्म जीवते
ति नियमे ज्ञानयोगेन सांख्यानामिति कथमुक्तमिति चोद्यपरिहारमुपदर्शयतीत्याह ॥ इत्येवमिति ॥ आत्मनिष्ठस्य विषयसंगरा
हित्यं दृष्टं तदनात्मज्ञेन जिज्ञासुना कर्तव्यमिति मत्वाह ॥ यस्त्विति सांख्य इति ॥ किं चात्मज्ञस्य ज्ञानेनात्मनैव परितृप्तत्वान्नान्नपाना
दिना साध्या तृप्तिरिष्टा तेन विद्यार्थिना संन्यासिनापि नान्नरसादावासक्तिर्युक्ता कर्तुमित्याह ॥ आत्मतृप्त इति ॥ किं चात्मविदः

यस्तु सांख्य आत्मज्ञाननिष्ठ आत्मरतिरात्मन्येव रतिर्न विषयेषु यस्य स आत्मरतिरेव स्याद्भवेत् आत्मतृ
प्त आत्मनैव तृप्तो नान्नरसादिना स मानवो मनुष्यः संन्यासी आत्मन्येव च संतुष्टः संतोषो हि बाह्यार्थ

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ॥ आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ १७ ॥

लाभेन सर्वस्य भवति तमनपेक्ष्यात्मन्येव च संतुष्टः सर्वतो वीततृष्ण इत्येतद्य ईदृश आत्मवित्तस्य ॥ का
र्यं करणीयं न विद्यते नास्तीत्यर्थः ॥ १७ ॥

सर्वतो वैतृष्ण्यं दृष्टं तदनात्मविदा विद्यार्थिना कर्तव्यमित्याह ॥ आत्मन्येवेति ॥ रतितृप्तिसंतोषाणां मोदप्रमोदानंदवदवांतरभे
दः ॥ अथवा रतिर्विषयासक्तिः तृप्तिर्विषयविशेषसंपर्के सुखं संतोषोऽभीष्टविषयमात्रलाभाधीनं सुखसामान्यमिति भे
दः ॥ नन्वात्मरतेरात्मतृप्तस्यात्मन्येव संतुष्टस्यापि किंचित्कर्तव्यं मुक्तये भविष्यतीति नेत्याह ॥ यस्त्वीदृश इति ॥ १७ ॥

एतश्चात्मविदोनकिंचित्कर्तव्यमित्याह । किंचेति । अभ्युदयनिःश्रेयसयोरन्यतरस्यप्रयोजनंकृतेनसुकृतेनात्मविदोभविष्यती
त्याशंक्याह । नैवेति । प्रत्यवायनिवृत्तयेस्वरूपप्रच्युतिप्रत्याख्यानायवाकर्मेत्यादित्याशंक्याह । नेत्यादिना । ब्रह्मादिषुस्थावरान्ते
षुभूतेषुकंचिद्भूतविशेषमाश्रित्यकश्चिदर्थोविदुषःसाध्योभविष्यतितिदर्थंतेनकर्त्तव्यंकर्मेत्याशंक्याह । नचेति । तत्राद्यं

किंच । नैवतस्यैवमात्मरतेःकृतेनकर्मणार्थःप्रयोजनमस्तीतिअस्तुतर्ह्यकृतेनाऽकरणेनचप्रत्य

नैवतस्यकृतेनार्थोनाकृतेनेहकश्चन ॥

वायाख्योर्थो । तत्राहनाकृतेनेहलोकेकश्चनकश्चिदपिप्रत्यवायप्राप्तिरूपःआत्महानिलक्षणोवानै टि

पादमादत्ते । नैवेति । तंव्याचष्टे । तस्येति । आत्मविदःस्वर्गाद्यभ्युदयानर्थित्वान्निःश्रेयसस्यचप्राप्तत्वान्नकृतंकर्मार्थवदि
त्यर्थः । आत्मविदाचेत्कर्मनक्रियतेतेनाकृतेनतस्यानर्थोभविष्यतीतितन्निरस्याख्यानार्थेतस्यकर्त्तव्यंकर्मेतिशंकते
॥ तर्हीति । द्वितीयपादेनोत्तरमाह । नेत्यादिना । अतोनतन्निवृत्त्यर्थंकृतमर्थवदितिशेषः ॥ ॥

द्वितीयभागं विभजते नचास्येति ॥ व्यपाश्रयणमालंबनं नचेति संबंधः पदार्थमुक्त्वा वाक्यार्थमाह कंचिदिति ॥ उक्तविशेषस्या
श्रितस्यापि क्रियाद्वारा प्रयोजनप्रसवहेतुत्वमिति मत्वाह ॥ येनेति ॥ तर्हि मयापि यथोक्तं तत्त्वज्ञानमाश्रित्य त्याज्यमेव

नचास्य सर्वभूतेषु ब्रह्मादिस्थावरांतेषु कश्चिदर्थव्यपाश्रयः प्रयोजननिमित्तः क्रियासाध्यो व्य॥पा
श्रयः व्यपाश्रयणं कंचिद्भूतविशेषमाश्रित्य न साध्यः कश्चिदर्थोस्ति येन तदर्थैव क्रियानुष्टे ॥ यास्या

नचास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥

त्व ॥ नत्वमेतस्मिन्सर्वतः संप्लुतोदकस्थानीये सम्यग्दर्शने वर्त्तसे ॥ १८ ॥ श्रीरामचंद्राय नमः ॥ ॥

कर्मेत्यर्जुनस्य मतमाशंक्याह ॥ नत्वमिति ॥ १८ ॥ श्रीरामचंद्राय नमः ॥ श्रीरामाय नमः ॥ श्रीरामचंद्राय नमः ॥ ॥

सम्यग्ज्ञाननिष्ठायाः अभावे कर्मानुष्ठानमावश्यकमित्याह यत इति तस्मात्ज्ञाननिष्ठारहित्यादितियावन्मोक्षमेवापे

यत एवं तस्मादसक्तः संगवर्जितः सततं सर्वदा कार्यं कर्त्तव्यं नित्यं कर्म समाचर निर्वर्त्तय असक्तो हि यस्मात्समा

तस्मादसक्तः सततं कार्यं कर्म समाचर ॥ असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥१९॥

चरन्नीश्वरार्थं कर्म कुर्वन्परमाप्नोति पुरुषः परं मोक्षमाप्नोति पूरुषः पुरुषः सत्वशुद्धिद्वारेणेत्यर्थः ॥१९॥

क्षमाणस्य कथं कर्मणि फलांतरवति नियोग स्यादित्याशंक्याह असक्तो हीति ॥ १९॥ श्रीरामायनमः ॥ गः॥

यद्यपि जितेंद्रियो विवेकी श्रवणादिभिरजस्रं ब्रह्मणि निष्ठातुं शक्नोति तथापि क्षत्रियेण त्वया विहितं कर्म न त्याज्यमित्याह यस्माच्चेति तस्मात्त्वमपि कर्म कर्तुमर्हसीति संबंधः इतोपि त्वया विहितं कर्म कर्त्तव्यमित्याह लोकेति पूर्वार्द्धं विभजते कर्मणैवेति

यस्माच्च कर्मणैव हि यस्मात्पूर्वे क्षत्रिया विद्वांसः संसिद्धिं मोक्षं गंतुमास्थिताः प्रवृत्ताः जन

कर्मणैव हि संसिद्धिमास्थिता जनकादयः

नकाश्च पतिप्रभृतयो यदि ते प्राप्तसम्यग्दर्शनास्ततो लोकसंग्रहार्थं॥ श्रीरामायनमः॥ कृ

कथं जनकादीनां कर्मणा संसिद्धिप्राप्तिरुच्यते कर्मत्यजां हि सम्यग्दर्शनवतां प्रसिद्धा संसिद्धिरिति ततः किं जनकादयोपि प्राप्तसम्यग्दर्शनाः स्युरुताप्राप्तसम्यग्दर्शना भवेयुरिति विकल्प्य प्रथमं प्रत्याह यदीति लोकसंग्रहार्थं कर्मणा सहैव संसिद्धिमास्थि

नह्यनिबंधः

कर्मणासहैवेत्येतद्याकरोति ॥ असंन्यस्यैवकर्मेति ॥ तत्रहेतुमाह ॥ प्रारब्धेति ॥ जनकादीनांसत्यपिज्ञानित्वेप्रारब्धकर्मवशात्क
र्मापरित्यज्यैवलोकसंग्रहार्थंप्रवर्त्तमानानांज्ञानमाहात्म्यादुपपन्नासंसिद्धिरित्यर्थः द्वितीयमनूद्यपूर्वोर्द्धेनैवोत्तरमाह
॥ अथेत्यादिना द्वितीयार्द्धव्यावर्त्यामाशंकामुत्थापयति ॥ अथेति ॥ अर्जुनेनाकृतार्थेनकर्त्तव्यंकर्मेत्येतावताज्ञानवता

प्रारब्धकर्मत्वात्कर्मणासहैवासंन्यस्यैवकर्मसंसिद्धिमास्थिताइत्यर्थः ॥ अथाप्राप्तसम्यग्दर्शनाजनका
दयःतदाकर्मणासत्वशुद्धिसाधनभूतेनकर्मणसंसिद्धिमास्थिताइतिव्याख्येयःश्लोकः ॥ अथमन्यसे

लोकसंग्रहमेवापिसंपश्यन्कर्तुमर्हसि ॥ २० ॥

पूर्वैरप्यज्ञानवद्भिरेवकर्त्तव्यंकर्मकृतंनावश्यमन्येनकर्त्तव्यंसम्यग्दर्शनवताकृतार्थेनेतितथापिप्रारब्धक
र्मायत्तस्त्वंलोकसंग्रहमेवापिलोकस्योन्मार्गप्रवृत्तिनिवारणंलोकसंग्रहस्तमेवापिप्रयोजनंसंपश्यन्कर्तुमर्हसि

कृतकृत्येननकर्त्तव्यमित्युक्तमंगीकरोति ॥ तथापीति ॥ तर्हिमयापिज्ञानवताकर्मनकर्त्तव्यमित्याशंक्यार्जुनस्यकर्त्त
व्यमेवकर्मेत्युत्तरार्द्धव्याख्यानंकथयति ॥ प्रारब्धेति ॥ २० ॥

॥ १० ॥

ज्ञानवता कृतार्थेन लोकसंग्रहार्थमपि न प्रवर्त्तितव्यमित्याशंकामुत्थाप्य परिहरति॥ लोकेत्यादिना॥ श्रुताध्यापनसंपन्नत्वेनाभिम
तो यद्यद्विहितं प्रतिषिद्धं वा कर्मानुतिष्ठति तत्तदेव प्राकृतो जनोनुवर्त्तते तेन विद्यावतापि लोकमर्यादास्थापनार्थं विहितं कर्म कर्त्तव्यमि
त्यर्थः॥ श्रेष्ठानुसारित्वमितरेषामाचारे दर्शयित्वा प्रतिपत्तावपि दर्शयति॥ किंचेति॥ २१॥ कृतार्थस्यापि लोकसंग्रहार्थं विहितं क
र्म कर्त्तव्यमित्युक्त्वा तत्रैव भगवन्मतमुदाहृतित्वेनोपन्यस्यति॥ यदीत्यादिना॥ अप्राप्तस्य प्राप्तव्यत्वेनापि कर्त्तव्यत्वसंभवान्न किंचि

॥ लोकसंग्रहं कः कर्त्तुमर्हतीति कथं चेत्युच्यते॥ यद्यत्कर्माचरति श्रेष्ठः प्रधानस्तत्तदेव कर्माचरतीतरोऽन्यो जनस्त
दनुगतः किंच॥ स श्रेष्ठो यत्प्रमाणं कुरुते लौकिकं वैदिकं वा लोकस्तदनुवर्त्तते तदेव प्रमाणीकरोतीत्यर्थः॥ २१॥ य

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते॥ २१॥ न मे पार्था
स्ति कर्त्तव्यं त्रिषु लोकेषु किंचन॥ नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि॥ २२॥ श्रीरामायनमः॥

यत्र ते लोकसंग्रहकर्तव्यतायां विप्रतिपत्तिस्तदा मां किं न पश्यसि न मे मम पार्थ अस्ति न विद्यते कर्त्तव्यं त्रिष्वपि लो
केषु किंचन किंचिदपि कस्मान्न मे अनवाप्तं अवाप्तव्यं प्रापणीयं तथापि वर्त्त एव कर्मण्यहं॥ २२॥ ॥

दपि विद्यते कर्त्तव्यमिति कथं उक्तमित्याशंक्याह॥ नानवाप्तमिति॥ प्रतीकमुपादाय व्याख्यानद्वारा विद्यावतोपि कर्मप्रवृत्तिं
संभावयति नेत्यादिना॥ अन्वयार्थं पुनर्नञोनुवादः भगवतो नास्ति कर्त्तव्यमित्येतदाकांक्षाद्वारा स्फोटयति॥ कस्मादि
त्यादिना॥ प्रयोजनाभावे त्वयापि नानुष्ठेयं कर्मेत्याशंक्य लोकसंग्रहार्थं मम कर्मानुष्ठानमिति मत्वाह॥ तथापीति॥ २२॥

लोकसंग्रहोऽपि न ते कर्तव्यो विफलत्वादित्याशंक्याह यदीति २४ श्रेष्ठस्य तव मार्गानुवर्तित्वं मनुष्याणामुचितं एवेत्याशंक्य दूषयति तथा चेत्यादिना ईश्वरस्य कर्मण्यप्रवृत्तौ तदनुवर्तिनामपि कर्मानुपपत्तेरितिहेतुमाह लोकस्थितीति इतश्चेश्वरेण कर्म कर्तव्यमित्याह किं चेति यदि कर्म न कुर्यामिति शेषः संकरकरणस्य कार्यं कथयति तेनेति प्रजोपहतिरपि प्राप्यते चेत्किं तया तव

यदि पुनरहं न वर्तेयं जातु कदाचित्कर्मण्यतन्द्रितोऽनलसः सन्मम श्रेष्ठस्य सतो वर्त्म मार्गमनुवर्तन्ते मनुष्याः हे पार्थ सर्वशः सर्वप्रकारैः २३ तथा च को दोष इत्याह उत्सीदेयुर्विनश्येयुरिमे सर्वे लोकाः लोकस्थितिनिमि

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः २३

त्तस्य कर्मणोऽभावान्न कुर्यां कर्म चेदहं किं च संकरस्य च कर्त्ता स्यां तेन कारणेनोपहन्यामिमाः प्रजाः प्रजानामनुग्रहाय प्रवृत्त उपहतिमुपहननं कुर्यामिति ममेश्वरस्याननुरूपमापद्येत ॥ ॥ ॥

स्यादिति तत्राह प्रजानामिति त्वामनाचरंतमनुवर्त्ततां सर्वेषां को दोषः स्यादित्यपेक्षायामीश्वरस्य कृतार्थतया कर्मानुष्ठानाऽभावे तदनुवर्तिनामपि तदभावादेव स्थितिहेत्वभावात्स्थित्यादिभूतानां विनाशप्रसंगाद्वर्णाश्रमधर्मव्यवस्थानुपपत्तेश्चाधिकृतानां प्राणभृतां पापोपहतत्वप्रसंगात्

परानुग्रहार्थं प्रवृत्तिरीश्वरस्येव युक्तं संप्रति लोकसंग्रहाय कर्म कुर्वाणस्य कर्तृत्वाभिमानेन ज्ञानाभिनिवेशो न प्रसज्यत इत्याह यदि पुनरिति
कृतार्थबुद्धित्वे हेतुमाह आत्मविदिति यथावदात्मानमवगच्छन् कर्तृत्वाद्यभिमानाभावात् कृतार्थो भवत्येवेत्यर्थः अर्जुनादन्य
त्रापि ज्ञानवति कृतार्थबुद्धित्वं कर्तृत्वाद्यभिमानहीनत्वं तुल्यमित्याह अन्यो वेति तर्हि तस्य कर्मानुष्ठानमफलत्वादनवकाश

यदि पुनरहमिव त्वं कृतार्थबुद्धिरात्मवित् अन्यो वा तस्यापि आत्मनः कर्तव्याभावेऽपि परानुग्रह एव कर्तव्य इति ॥२४॥ सक्ताः कर्मण्यस्य कर्मणः फलं मम भविष्यतीति केऽविद्वांसो यथा कुर्वन्ति भारत कुर्याद्विद्वानात्मवि

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं ॥ संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥२४॥ सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ॥ कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं ॥२५॥

त्तथा असक्तः सन् तद्वत् किमर्थं करोति तत् शृणु चिकीर्षुः कर्तुमिच्छुः लोकसंग्रहं ॥२५॥ ॥

मित्याशंक्याह तस्यापीति कर्तव्य इति आत्मविदापि परानुग्रहाय कर्तव्यमेव कर्मेत्याहेति शेषः ॥२४॥ दृष्टांतदार्ष्टांतिकरूपं
श्लोकं व्याकरोति सक्ता इत्यादिना असक्तः सन् कर्तृत्वाद्यभिमानं फलाभिसंधिं वाकुर्वन्निति यावत् ॥२५॥ ॥

त्तमनूद्योत्तरश्लोकमवतारयति ॥ एवमिति कर्त्तव्यंकर्मेतिशेषः पूर्वार्द्धमेवंव्याख्यायोत्तरार्द्धंप्रश्नपूर्वकमवतार्य्यव्याचष्टे ॥

एवंलोकसंग्रहंचिकीर्षोर्नममआत्मविदः कर्त्तव्यमस्ति अन्यस्यवालोकसंग्रहमुक्त्वा एवंतस्यात्मविदइदमुपदिश्यते ॥ नबुद्धिभेदंबुद्धेर्भेदोबुद्धिभेदोममेदंकर्त्तव्यंकर्मभोक्तव्यंचास्यकर्मणः फलमितिनिश्चितरूपायाबु

नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनां ॥ जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥ २६ ॥

द्धेर्भेदनंचालनंबुद्धिभेदस्तंनजनयेत् नोत्पादयेदज्ञानामविवेकिनांकर्मसंगिनांकर्मण्यासंगवतां किंतु कुर्यात् जोषयेत्कारयेत्सर्वकर्माणिविद्वान्स्वयंतदेवाविदुषांकर्मयुक्तोभियुक्तः समाचरन् २६ ॥

किंतुकुर्य्यादिति ॥ सर्वकर्माणि कारयेत्तेषुप्रीतिंकुर्वन्नितिशेषः कथंकारयेदित्याकांक्षायामाह ॥ नदेवेति ॥ २६ ॥ ॥

अज्ञानां कर्मसंगिनाम् इत्युक्तं तेनोत्तरश्लोकस्य संगतिमाह। अविद्वानिति कर्तृत्वमात्मनो वास्तवमित्यभ्युपगमाद्विद्वान्कथं कु
र्वन्नेव तस्याभावं पश्यतीत्याशंक्याह। प्रकृतेरिति कर्मस्वविदुषः सक्तिप्रकारं प्रकटयन्व्याकरोति। प्रकृतेरित्यादिना

अविद्वानज्ञः कथं कर्मसु सज्जत इत्याह। प्रकृतेः प्रकृतिः प्रधानं सत्वरजस्तमसां गुणानां साम्यावस्था तस्याः प्र
कृतेर्गुणैर्विकारैः कार्यकरणरूपैः क्रियमाणानि कर्माणि लौकिकानि शास्त्रीयाणि च सर्वशः सर्वप्रकारैरहंकारवि

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहंकारविमूढात्मा कर्ताहमिति मन्यते॥२७॥ ॥

मूढात्मा कार्यकरणसंघातात्मप्रत्ययोऽहंकारस्तेन विविधं नानाप्रकारं मूढः आत्मांऽतःकरणं यस्य सोयं कार्यकरणधर्मा
कार्यकरणाभिमान्यात्माऽविद्यया कर्माण्यात्मनि मन्यमानस्तत्तत्कर्मणामहं कर्तेति मन्यते॥२७॥ ॥ ॥

॥ प्रधानशब्देन मायाशक्तिरुच्यते। अविद्ययेत्युभयतः संबध्यते॥२७॥ श्रीरामचंद्राय नमः॥ श्रीरामाय नमः॥ ॥

नाहं गुणात्मक इति गुणेभ्य आत्मनो विभागः नमे कर्माणीति कर्मभ्यो प्यात्मनो विभागः २८

अज्ञस्य कर्मसु सक्तिमुक्त्वा विदुषस्तदभावमभिदधाति यः पुनरिति तत्त्वं याथार्थ्यं वेत्तीति व्युत्पत्त्या तत्त्वविदिति तु शब्देनाज्ञाद्विशिष्टे निर्दिष्टे प्रश्नपूर्वकं द्वितीयपादमवतार्य व्याचष्टे कस्येत्यादिना गुणानामेव गुणेषु वर्त्तमानत्वमयुक्तं निर्गुणत्वात्तेषामित्याशंक्य तान् विभजते गुणा इति कार्यकारणामेव विषयेषु प्रवृत्तिरात्मनस्तु कूटस्थत्वान्नैवमिति ज्ञात्वा तत्त्ववित्कर्मसु दृढतरं कर्त्तृ

यः पुनर्विद्वान्स तु तत्त्ववित्तु महाबाहो कस्य तत्त्ववित् गुणकर्मविभागयोर्गुणविभागस्य कर्मविभागस्य च तत्त्वविदित्यर्थः गुणाः करणात्मका गुणेषु विषयात्मकेषु वर्त्तंते नात्मेति मत्वा न सज्जते आसक्तिं न करोति २८ ये पुनः प्रकृतेर्गुणैः सम्य

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः गुणा गुणेषु वर्त्तंत इति मत्वा न सज्जते २८ प्रकृते
र्गुणसंमूढाः सज्जंते गुणकर्मसु तानकृत्स्नविदो मंदान् कृत्स्नविन्न विचालयेत् २९ ॥

ग्मूढाः संमोहिताः सज्जंते गुणानां कर्मसु गुणकर्मसु वयं कर्म कुर्मः फलायेति तान्कर्मसंगिनोऽकृत्स्नविदः कर्ममात्रद
र्शिनो मंदान्मंदप्रज्ञान् कृत्स्नविदात्मवित्स्वयं न विचालयेत् बुद्धिभेदकरणमेव चालनं तन्न कुर्यादित्यर्थः २९ ॥

त्वाभिमानं न करोतीत्यर्थः २८ विद्वानविद्वानित्युभावपि प्रकृत्यविद्वानः विदुषो बुद्धिभेदं न कुर्यादित्युपसंहरति ये पुनरिति प्रकृतेरुक्ताया गुणैर्देहादिभिर्विकारैः संमूढास्तामेवात्मत्वेन मन्यमाना ये ते गुणानां तेषां एव देहादीनां कर्मसु व्यापारेषु सज्जंते सक्तिं दृढतरात्मीयबुद्धिं कुर्वंतीत्याह प्रकृतेरित्यादिना तेषामनात्मविदां स्वयमात्मविद् बुद्धिभेदं नापादयेदित्याह तानित्यादिना २९ ॥

ध्य

यद्यपि कर्मण्यज्ञोधिक्रियते तथापि मोक्षकामेन तेन कर्मैव कर्तव्यं मोक्षस्य कर्मासाध्यत्वात्तु तेन कर्मैव कर्तुं शक्यं कर्मणः स्वापेक्षितविरोधित्वादिति शंकते कथमिति श्लोकेनोत्तरमाह उच्यत इति यथोक्ते परस्मिन्नात्मनि सर्वकर्मणां समर्पणेकारणमाह अध्यात्मेति विवेकबुद्धिमेव व्याकरोति अहमिति दर्शितरीत्या कर्मसु प्रवृत्तस्य कर्तव्यांतरमाह

कथं पुनः कर्मण्यधिकृतेनाज्ञेन मुमुक्षुणा कर्मैव कर्त्तव्यमित्युच्यते मयि वासुदेवे परमेश्वरे सर्वज्ञे सर्वात्मनि सर्वाणि कर्माणि संन्यस्य निक्षिप्याध्यात्मचेतसा विवेकबुद्ध्याहं कर्त्तेश्वराय भृत्य

॥ मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा निराशीर्निर्ममो भूत्वा युद्ध्यस्व विगतज्वरः ३०

वत्करोमीत्यनया बुद्ध्या किंच निराशीस्त्यक्ताशीर्निर्ममो ममताभावश्च निर्गतो यस्य तव स त्वं निर्ममो भूत्वा युद्ध्यस्व विगतज्वरो विगतसंतापो विगतशोकः सन्नित्यर्थः ॥ ३० ॥ ॥

किंचेति त्यक्ताशीः फलप्रार्थनाहीनः सन्नित्यर्थः निर्ममो निर्मोहो भूत्वा पुत्रभ्रात्रादिष्विति शेषः ननु युद्धे नियोगेनोपपद्यते पुत्रभ्रात्रादिहिंसात्मनस्तस्य संतापहेतोर्नियोगविषयत्वायोगादिति तत्राह विगतेति ३० ॥

प्रकृतं भगवतो मतमुक्तप्रकारमनुसृत्यैवानुतिष्ठतां क्रममुक्तिफलं कथयति ॥ यदेतदिति ॥ शास्त्राचार्योपदिष्टेऽदृष्टार्थे वि
श्वासवत्त्वं श्रद्दधानत्वं गुणेषु दोषाविःकरणमसूया अपिर्यथोक्ताया मुक्तेरमुख्यत्वद्योतनार्थः ॥ ३१ भगवन्मताऽनुवर्त्ति

यदेतन्ममं मतं कर्म कर्त्तव्यमिति सप्रमाणमुक्तं तत्तथा ॥ ये मे मदीयं इदं मतं अनुतिष्ठंति अनुवर्त्तंते मानवा मनुष्याः श्र
द्धावंतो श्रद्दधाना अनसूयंतोऽसूयां च मयि गुरौ वासुदेवेऽकुर्वंतो मुच्यंते तेप्येवं भूताः कर्मभिर्द्धर्माधर्माख्यैः ॥ ३१ ॥

ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः ॥ श्रद्धावंतोऽनसूयंतो मुच्यंते तेपि कर्मभिः ॥ ३१ ॥ ये त्वेत
दभ्यसूयंतो नानुतिष्ठंति मे मतं ॥ सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ३२ ॥ श्रीः ॥ ॥

ये तु तद्विपरीता एतन्मम मतं अभ्यसूयंतो निंदंतो नानुतिष्ठंति नानुवर्त्तंते सर्वेषु ज्ञानेषु विविधं मूढास्ते सर्वज्ञा
नविमूढास्तान्विद्धि जानीहि नष्टान्नाशं गतानचेतसोऽविवेकिनः ॥ ३२ ॥ ॥

नां प्रत्यवायित्वं प्रख्यापयति ॥ ये त्विति ॥ तद्विपरीतत्वं भगवन्मताऽनुवर्त्तिभ्यो वैपरीत्यं तदेव दर्शयति ॥ एतदित्यादिना अभ्यसूयंतः
तत्राऽन्यैः संत मपि दोषमुद्भावयंतइत्यर्थः सर्वज्ञाना निसगुण निर्गुण विषयानि प्रमाण प्रमेय प्रयोजन विभागतो विविध

गी॰
९९

भगवन्मतानुवर्त्तनमंतरेणपरधर्मानुष्ठानेस्वधर्माऽननुष्ठानेचकारणंपृच्छति ॥ कस्मादिति ॥ भगवत्प्रतिकूलत्वमेवतत्रकारण
मित्याह ॥ त्वत्प्रतिकूलाइति ॥ राजशासनाऽतिक्रमेपिदोषदर्शनाद्भगवदनुशासनातिक्रमेपिदोषसंभवात्त्वत्प्रतिकूलत्वंभय
कारणमित्यर्थः ॥ उत्तरत्वेनश्लोकमवतारयति ॥ सदृशमिति ॥ सर्वस्यप्राणिवर्गस्यप्रकृतिवशवर्तित्वेकैमुतिकन्यायंसूचय

कस्मात्पुनःकारणात्त्वदीयंमतंनानुतिष्ठंतःपरधर्मंअनुतिष्ठंतिस्वधर्मंचनानुवर्त्तंतेत्वत्प्रतिकूलाःकथंनवि

सदृशंचेष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपि ॥ श्रीः ॥

भ्यंतित्वच्छासनातिक्रमदोषात्तत्राह ॥ सदृशमनुरूपंचेष्टतेकस्याःस्वस्याःस्वकीयायाःप्रकृतेः ॥ ॥

ति ॥ ज्ञानवानपीति ॥ सर्वाण्यपिभूतानिअनिच्छंत्यपिप्रकृतिसदृशींचेष्टांगच्छंतीतिनिगमयति ॥ प्रकृतिमिति ॥ भूतानांप्र
कृत्यधीनत्वेपिप्रकृतिर्भगवतानिग्राह्येत्याशंक्याह ॥ निग्रहइति ॥

कापुनरियंप्रकृतिर्यदनुसारिणीभूतानांचेष्टेतिपृच्छति प्रकृतिर्नामेति भगवदभिप्रेतांप्रकृतिंप्रकटयति पूर्वेति आदिशब्देनज्ञानेच्छा
दिसंगृह्यते यथोक्तःसंस्कारःस्वसत्तयाप्रवर्त्तकश्चेल्लयेपिप्रवृत्तिःस्यादित्याशंक्यविशिनष्टि वर्त्तमानेति सर्वोजंतुरित्ययुक्तंवि
वेकिप्रवृत्तेरतथात्वादित्याशंक्यपश्वादिभिश्चाविशेषादितिन्यायमनुसरन्नाह ज्ञानवानिति ज्ञानवतामज्ञानवतांचतत्प्र

प्रकृतिर्नामपूर्वकृतधर्माधर्मादिसंस्कारोवर्त्तमानजन्मादावभिव्यक्तःसाप्रकृतिस्तस्याःसदृशमेवसर्वोजंतुर्ज्ञानवान

प्राचीनंकर्म

प्रकृतिंयांतिभूतानिनिग्रहःकिंकरिष्यति ३३

पिकिंपुनर्मूर्खस्तस्मात्प्रकृतिंयांतिभूतानिनिग्रहःनिषेधरूपःकिंकरिष्यतिममवान्यस्यवा ३३ ॥

कृत्यधीनत्वाविशेषेफलितमाह तस्मादिति प्रकृतिंयांतिप्रकृतिसदृशींचेष्टांगच्छंत्यनिच्छंत्योपिसर्वाणिभूतानीत्यर्थः प्रकृ
तेर्भगवतातत्तुल्येनवाकेनचिन्निग्रहमाशंक्यावतारितचतुर्थपादस्यार्थापेक्षितंपूरयति ममवेति ३३ श्रीः ॥

सर्वस्य भूतवर्गस्य प्रकृतिवशवर्त्तित्वे लौकिकवैदिकपुरुषकारविषयाभावाद्विधिनिषेधानर्थक्यमिति शंकते यदीति ननु यस्य नप्रकृतिरस्ति तस्य पुरुषकारसंभवादर्थवत्वं तद्विषये विधिनिषेधयोर्भविष्यतीनेत्याह न चेति शंकितदोषं श्लोकेन परिहरति इंद्रस्मित्यादिना वीप्सायाः सर्वकरणगोचरत्वं दर्शयति सर्वेति प्रतींद्रियार्थे रागद्वेषयोरव्यवस्थया प्राप्तौ प्रस्या

यदि सर्वो जंतुरात्मनः प्रकृतिसदृशमेव चेष्टते न च प्रकृतिशून्यः कश्चिदस्ति पुरुषकारस्य विषयानुपपत्तेः शास्त्रानर्थक्यप्राप्तावि दमुच्यते इंद्रियस्येंद्रियस्यार्थे सर्वेषामिंद्रियाणामर्थे शब्दादिविषये इष्टे रागः अनिष्टे द्वेषः इत्येवं प्रतींद्रियार्थे राग

इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ॥

द्वेषाववश्यंभाविनौ तत्रायं पुरुषकारस्य शास्त्रार्थस्य च विषय उच्यते शास्त्रार्थे प्रवृत्तः पूर्वमेव रागद्वेषयोर्वशं नागच्छेत्

दिशतीति इष्ट इति प्रतिविषयविभागेन तयोरन्यतरस्यावश्यकत्वेपि पुरुषकारविषयाभावप्रयुक्त्या प्रागुक्ते दूषणं कथं समाधेयमित्याशंक्याह तत्रेति तयोरित्याद्यवतारितं भागं विभजते शास्त्रार्थ इति ॥ ॥

प्रकृतिवशत्वाज्ञंतोनैवंनियोज्यत्वमित्याशंक्याह ॥ यांहीति ॥ रागद्वेषद्वाराप्रकृतिवशवर्त्तित्वेस्वधर्मत्यागादिदुर्वारमित्युक्तमिदानीं विवेकविज्ञानेनरागादिनिवारणेशास्त्रीयदृष्ट्याप्रकृतिपारवश्यंपरिहर्त्तुंशक्यमित्याह ॥ यदेति ॥ मिथ्याज्ञाननिबंधनौरागद्वेषौतत्प्रति पक्षत्वंविवेकविज्ञानस्यमिथ्याज्ञानविरोधित्वादवधेयंरागद्वेषयोर्मूलनिवृत्त्यानिवृत्तौप्रतिबंधध्वंसेकार्यसिद्धिमभिसंधायो

याहिपुरुषस्यप्रकृतिःसारागद्वेषपुरःसरैवपुरुषंस्वकार्येप्रवर्त्तयतितदास्वधर्मपरित्यागःपरधर्मानुष्ठानंचभवति ॥ यदा पुनःरागद्वेषौतत्प्रतिपक्षेणनियमयतितदाशास्त्रदृष्टिरेवपुरुषोभवति ॥ नप्रकृतिवशस्तस्मात्तयोरागद्वेषयोर्वशंनागच्छे

तयोर्नवशमागच्छेत्तौह्यस्यपरिपंथिनौ ॥ ३४ ॥

त्यतस्तौह्यस्यपुरुषस्यपरिपंथिनौश्रेयोमार्गस्यविघ्नकर्त्तारौतस्करावियपथः ॥ ३४ ॥ श्रीरामचंद्रायनमः ॥ ॥

र्कं तदेति ॥ एवकारस्यान्ययोगव्यवच्छेदकत्वंदर्शयति ॥ नेति ॥ पूर्वोक्तनियोगमुपसंहरति ॥ तस्मादिति ॥ तत्रहेतुमाह ॥ यतइति ॥ हिश ब्दोपात्तोहेतुर्यतइतिप्रकटितःसचपूर्वेणातच्छब्देनसंबंधनीयःपुरुषपरिपंथित्वमेतयोःसोदाहरणंस्फोरयतिश्रेयोमार्गे

रागद्वेषयोः श्रेयोमार्गप्रतिपक्षत्वं प्रकटयितुं परमतोपन्यासद्वारा समनंतरश्लोकमवतारयति । तत्रेत्यादिना । व्यवहारभूमिः सप्त
म्यर्थः शास्त्रार्थस्यान्यथा प्रतिपत्तिमेव प्रत्यापयति । परधर्मोपीति । स्वधर्मवदित्यपेरर्थः । अनुमानं दूषयन्नुत्तरत्वेन श्लोकमु
त्थापयति । तदसदिति । क्षत्रधर्मो युद्धानुष्ठानात्परिव्राजकधर्मस्य भिक्षाशनादिलक्षणस्य अनुष्ठेयतया मयापि कर्त्तव्यत्वं

तत्र रागद्वेषयुक्तो मन्यते शास्त्रार्थमप्यन्यथा परधर्मोपि धर्मत्वादनुष्ठेय एवेति तदसत् श्रेयान्प्रशस्यतरः स्व
धर्मः स्वकीयो धर्मो विगुणोपि विगतगुणोप्यनुष्ठीयमानः परधर्मात्स्वनुष्ठितात्साद्गुण्येन संपादितादपि स्वधर्मे स्थि

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥ श्री ॥

तस्य निधनं मरणमपि श्रेयः परधर्मस्थस्य जीवितात्कस्मात्परधर्मो भयावहो नरकादिलक्षणं भयमावहति यतः ॥ ३५ ॥

प्राप्तमित्याशंक्य व्याचष्टे श्रेयानिति । उक्तेर्थे प्रश्नपूर्वकं हेतुमाह । कस्मादित्यादिना । स्वधर्ममवधूय परधर्ममनुतिष्ठतः
स्वधर्मातिक्रमकृतदोषस्य दुष्परिहरत्वान्न तत्त्यागः साधीयानित्यर्थः ॥ ३५ ॥

प्रागेवानर्थमूलस्योक्तत्वात्पुनस्तज्जिज्ञासयाप्रश्नानुपपत्तिरित्याशंक्याह यद्यपीति। विक्षिप्तं विविधेषु प्रदेशेषु क्षिप्तं दर्शितमिति यावत्। अनवधारितमनेकत्रोक्तत्वादनेकधात्वात् अविवेककामादिभिर्विकल्पितत्वादित्यर्थः। नन्वनर्थमूलं परिहर्त्तव्यं तत्किमिति ज्ञातुमिष्यते तत्राह त्वातेहीति कुर्यामितितत्ज्ञानमर्थवदिति शेषः वाक्यारंभार्थत्वमथशब्दस्य गृहीत्वा प्रश्नवाक्यं व्या

यद्यप्यनर्थमूलं ध्यायतो विषयान्पुंसो रागद्वेषौ ह्यस्य परिपंथिनाविति चोक्तं विक्षिप्तमनवधारितं च तदुक्तं तत्संक्षिप्तं निश्चितं चेदमेवेति ज्ञातुमिच्छन्नर्जुन उवाच त्वाते हि तस्मिंस्तदुच्छेदाय यत्नं कुर्यामिति। अ

॥ अर्जुन उवाच ॥ अथ केन प्रयुक्तोयं पापं चरति पूरुषः। अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥

थ केन हेतुभूतेन प्रयुक्तः सन्राज्ञेव भृत्योयं पापं कर्म चरत्याचरति पूरुषः पुरुषः स्वयमनिच्छन्नपि हे वार्ष्णेय वृष्णिकुलप्रसूत बलादिव नियोजितः राज्ञेवेत्युक्तो दृष्टांतः ॥ ३६ ॥ ॥

करोति ॥ अथेत्यादिना ॥ अनिच्छतो पि बलादिव दुश्चरितप्रेरितत्वे दृष्टांतमाचष्टे ॥ राज्ञेवेति ॥ नियोज्यत्वस्य स्वेच्छापेक्षत्वात्तदभावे तदसिद्धिमाशंक्य प्रागुक्तं स्मारयति ॥ राज्ञेवेत्युक्त इति ॥ ३६ ॥

संप्रतिवचनंप्रस्तौति शृण्विति तस्यवैरिलंस्फोटयति सर्वेति अप्रस्तुतंकिमितिप्रसूयते तत्राह यंत्वमिति भगवच्छ्रास्त्रे निर्द्धारयितुंपौराणिकंवचनंउदाहरति ऐश्वर्यस्येति समग्रस्येत्येतत्प्रत्येकंविशेषणैःसंबध्यते अथयशःश्वस्तथाशब्दपर्यायः समुच्चयार्थःमोक्षशब्देनतदुपायोज्ञानंविवक्ष्यते उदाहृतवचसस्तात्पर्यमाह ऐश्वर्यादीति सवाच्योभगवानितिसंबंधः

शृणुतंवैरिणंसर्वानर्थकरंयंत्वंपृच्छसि॥ श्रीभगवानुवाच॥ ऐश्वर्यस्यसमग्रस्य धर्मस्ययशसःश्रियः॥ वैराग्यस्याथमोक्षस्यषण्णांभगइतीरणा॥ ऐश्वर्यादिषट्कंयस्मिन्वासुदेवेनित्यमप्रतिबंधेनसामस्त्येनवर्त्तते॥ उत्पत्तिंचविनाशंचभूतानामगतिंगतिं॥ वेत्तिविद्यामविद्यांचसवाच्योभगवानिति॥ उत्पत्त्यादिविषयंचविज्ञानंयस्यसवासुदेवोवाच्योभगवानितिच॥ ॥

तत्रैवपौराणिकंवाक्यांतरंपठति॥ उत्पत्तिमिति भूतानामितिप्रत्येकमुत्पत्त्यादिभिःसंबध्यते कारणार्थौचोत्पत्तिप्रलयशब्दौ क्रियामात्रस्यपुरुषांतरगोचरत्वसंभवादगतिर्गतिश्चेत्यागामिन्योसंपदापदौसूच्येते वाक्यांतरस्यापितात्पर्यमाह उत्पत्त्यादीति वेत्तीत्युक्तःसाक्षात्कारोविज्ञानमित्युच्यते समग्रैश्वर्यादिसंपत्तिसमुच्चयार्थश्चकारः॥ ॥

उक्तलक्षणोभगवान्किमुक्तवानितितदाह । कामइति । कामस्यसर्वलोकशत्रुत्वंविशदयति । यन्निमित्तेति । तथापिक
थंतस्यैवक्रोधत्वंतदाह । सएषइति । कामक्रोधयोरेवहेयत्वद्योतनार्थंकारणंकथयति । रजोगुणेति । कारणद्वाराकामा
देरेवहेयत्वमुक्त्वाकार्यद्वारापितस्यहेयत्वंसूचयति । रजोगुणस्येति । कामस्यपुरुषप्रवर्त्तकत्वमेवनरजोगुणजनकत्वमि

कामएषः सर्वलोकंवशंकुर्वन्शत्रुर्यन्निमित्तासर्वानर्थप्राप्तिः प्राणिनांसएषकामः प्रतिहतःकेन
चित्क्रोधत्वेनपरिणमतेऽतःक्रोधोप्येषएवरजोगुणसमुद्भवोरजोगुणात्समुद्भवोयस्यसःकामोरजो
गुणसमुद्भवःरजोगुणस्यवासमुद्भवःकामोह्युद्भूतोरजःप्रवर्त्तयन्पुरुषंप्रवर्त्तयति । तृष्णयाह्यहंकारि

कामएषक्रोधएषरजोगुणसमुद्भवः ॥ महाशनोमहापाप्माविद्ध्येनमिहवैरिणं ॥३७॥ ॥

तइतिदुःखितानांरजःकार्येसेवादौप्रवृत्तानांप्रलापःश्रूयतेमहाशनोमहदशनमस्येतिमहाशनोऽ
तएवमहापाप्माकामेनहिप्रेरितःजंतुःपापंकरोत्यतोविद्ध्येनंकाममिहसंसारेवैरिणं ॥३७॥ ॥

त्याशंक्याह । कामोहीति । तत्रैवानुभवानुसारिणींलोकप्रसिद्धिंप्रमाणयति । तृष्णयाहीति । तस्ययोग्यायोग्यविभा
गमंतरेणबहुविषयत्वंदर्शयति । महाशनेति । बहुविषयत्वप्रयुक्तंकार्यंनिर्दिशति । अतइति । सर्वविषयत्वेपिकु
तोस्यपापत्वमित्याशंक्याह ॥ कामेनेति । कामस्योक्तविशेषणवत्वेफलितमाह । अतइति ॥३७॥ ॥श्रीः॥ ॥

ॐ॥ उत्तरश्लोकमवतारयति॥ कथमिति॥ अनेकदृष्टांतोपादानंप्रतिपत्तिसौकर्यार्थंसहजस्यधूमस्यप्रकाशात्मकंव

कथंवैरीतिदृष्टांतैःप्रत्याययति॥ धूमेनसहजेनाव्रियतेवन्हिःप्रकाशात्मकोऽप्रकाशात्मकेनयथाचा

धूमेनाव्रियतेवन्हिर्यथादर्शोमलेनच॥ यथोल्बेनावृतोगर्भस्तथाते॥ नेदमावृतं॥३८॥ ॥

दर्शोमलेनयथोल्बेनगर्भवेष्टनेनचजरायुणाआवृतःआच्छादितोगर्भःतथातेनेदमावृतं॥३८॥

ह्निंप्रत्यावरकत्वसिद्ध्यर्थंविशिनष्टि॥ अप्रकाशात्मकेनेति॥३८॥ श्रीरामचंद्रायनमः॥श्रीरामायनमः॥ ॥

सामान्यतो निर्दिष्टं विशेषतो निर्देष्टुमाकांक्षापूर्वकमनंतरश्लोकमवतारयति ॥ किंपुनरिति ॥ कामस्य ज्ञानं प्रत्यावरणत्वसिद्ध्यर्थं ज्ञानिनो
नित्यवैरिणेत्यादिविशेषणं प्रतीकमादाय व्याकरोति ॥ आवृतमित्यादिना ॥ ज्ञानिनं प्रतिवैरित्वेपि नित्यवैरित्वं कामस्य कथमित्या
शंक्याह ॥ ज्ञानी हीति ॥ अनर्थप्राप्तिमंतरेण कामस्य प्रसंगावस्थापूर्वमेवेत्युच्यते ॥ अतःशब्देन कामप्रसक्तिरेव परामृश्यते नित्य
मेवेत्युत्तरावस्था कार्यावस्था च कामस्य कथ्यते नेनु सर्वस्यापि कामात्मतानप्रशस्तेति कामो नित्यवैरी भवति तत्कुतो ज्ञानि

किंपुनस्तदिदं शब्दवाच्यं यत्कामेनावृतमुच्यते ॥ आवृतमेतेन कामेन ज्ञानं ज्ञानिनो नित्यवैरिणा ॥ ज्ञानी हि जाना
त्यनेनाहमनर्थे प्रयुक्तः इति पूर्वमेवातः दुःखी भवति नित्यमेव ते नासौ ज्ञानिनो नित्यवैरी न तु मूर्खस्य स हि का
मं तृष्णाकाले मित्रमिव पश्यंस्तत्कार्ये दुःखे प्राप्ते जानाति तृष्णयाहं दुःखित्वमापादित इति न पूर्वमेवातो ज्ञानिन

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ॥ कामरूपेण कौंतेय दुःपूरेणानलेन च ॥ ३९ ॥ छ ॥ ॥

एव नित्यवैरी किंरूपेण कामरूपेण काम इच्छैव रूपमस्येति कामरूपः तेन दुःपूरेण दुःखेन पूरणमस्येति दुःपूरः अतस्ते
नानलेन नास्यालं पर्याप्तिर्विद्यत इत्यनलस्तेन अनलेन आच्छादितः ॥ ३९ ॥ श्रीरामचंद्राय नमः ॥ ॥ श्रीः ॥

विशेषणमित्याशंक्याह ॥ न त्विति ॥ अज्ञस्य नासौ नित्यवैरीत्येतदुपपादयति स हीति ॥ कार्यप्राप्तिप्रागवस्थापूर्वमित्युक्ता अज्ञं
प्रतिवैरित्वे सत्यपि कामस्य नित्यवैरित्वाभावे फलितमाह ॥ अत इति ॥ स्वरूपतो नित्यवैरित्वाविशेषेपि ज्ञानाज्ञानाभ्याम
वांतरभेदसिद्धिरित्यर्थः ॥ आकांक्षाद्वारा प्रकृतवैरिणमेव स्फोरयति ॥ किंरूपेणेत्यादिना ॥ ३९ ॥ ॥

कामस्यनिराश्रयस्यकार्यकरत्वाभावंमत्वाप्रश्नपूर्वकमाश्रयंदर्शयति किमधिष्ठानइति कामस्यनित्यवैरित्वेनपरिजिहीर्षि
तस्यकिमित्यधिष्ठानंज्ञाप्यतेतत्राह ज्ञातेहीति इंद्रियादीनांकामाधिष्ठानत्वंप्रकटयति एतैरिति नन्वेताभिरितिवक्त
व्येकथमेतैरित्युच्यतेतत्राह इंद्रियादिभिरिति ४० तेषांकामाश्रयत्वेसिद्धेसाश्रयस्यतस्यपरिहर्त्तव्यतामाह यतइति

एवंकिमधिष्ठानःकामोज्ञानस्यावरणत्वेनवैरीसर्वस्येत्यपेक्षायामाह ज्ञातेहिशत्रोरधिष्ठानेसुखेनशत्रुनिवर्हणं
कर्त्तुंशक्यतइति इंद्रियाणिमनोबुद्धिश्चास्यकामस्याधिष्ठानमाश्रयउच्यते एतैरिंद्रियादिभिराश्रयैर्विमोहयतिविविधं
मोहयतिएषकामोज्ञानमावृत्याछाद्यदेहिनंशरीरिणं ४० यतएवं तस्मात्त्वमिंद्रियाण्यादौप्रथमंपूर्वंनियम्यवशीकृत्य

इंद्रियाणिमनोबुद्धिरस्याधिष्ठानमुच्यते एतैर्विमोहयत्येषज्ञानमावृत्यदेहिनं ॥ ४० तस्मात्त्वमिं
द्रियाण्यादौनियम्यभरतर्षभ ॥ पाप्मानंप्रजहिह्येनंज्ञानविज्ञाननाशनं ॥ ४१ ॥ श्रीः ॥ ॥

भरतर्षभपाप्मानंपापाचारंकामंप्रजहिपरित्यजहियस्मात्एनंप्रकृतंवैरिणंज्ञानविज्ञाननाशनंज्ञानंशास्त्रतःआचा
र्यतश्चात्मादीनामवबोधोविज्ञानंविशेषतस्तदनुभवस्तयोर्ज्ञानविज्ञानयोःश्रेयःप्राप्तिहेत्वोर्नाशनस्तंनाशनंआत्मनः

Margin: हि परित्यजेत्यर्थः

तस्मातइंद्रियादीनामाश्रयत्वादितियावत पूर्वंकामनिरोधात्प्रागवस्थायामित्यर्थः तेषुनियमितेषुमनोबुद्ध्योर्नियमःसिद्ध्य
तितत्प्रवृत्तेरितरप्रवृत्तिव्यतिरेकेणाफलत्वादितिभावः पापमूलतयाकामस्यैतछब्दवाच्यत्वमुन्नेयंकामस्यपरित्याज्य
त्वेवैरित्वेहेतुंसाधयति ज्ञानेति ज्ञानविज्ञानशब्दयोरर्थभेदमावेदयति ज्ञानमित्यादिना ॥ ४१ श्रीरामायनमः ॥ ॥

पूर्वोक्तमनूद्य कामत्यागस्य दुष्करत्वं मन्वानो रसोप्यस्येत्यत्रोक्तमेव स्पष्टीकर्तुं प्रश्नपूर्वकं श्लोकांतरमवतारयति इंद्रियाणीत्यादिना पंचेति ज्ञानेंद्रियवत्कर्मेंद्रियाण्यपि वागादीनि गृह्यंते किमपेक्षया तेषां परत्वं तत्राह देहमिति तथापि केन प्रकारेण परत्वं तदाह सौक्ष्म्येति आदिशब्देन कारणत्वादि गृह्यते इंद्रियापेक्षया सूक्ष्मत्वादिना मनसः स्वरूपोक्तिपूर्वकं परत्वं क

इंद्रियाणि आदौ नियम्य कामं शत्रुं जहीत्युक्तं तत्र किमाश्रयः कामं जह्यादित्युच्यते॥ इंद्रियाणि श्रोत्रादीनि पंच देहं स्थूलं बाह्यं परिच्छिन्नं चापेक्ष्य सौक्ष्म्यांतःस्थत्वव्यापित्वाद्यपेक्षया पराणि प्रकृष्टान्याहुः पंडिताः॥ तथेंद्रियेभ्यः प

इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः॥ मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥ ४२॥ श्रीः॥

रं मनः संकल्पविकल्पात्मकं तथा मनसस्तु परा बुद्धिर्निश्चयात्मिका तथा यः सर्वदृश्येभ्यो बुद्ध्यंतेभ्योऽभ्यंतरो यं देहिनमिंद्रियादिभिराश्रयैर्युक्तः कामो ज्ञानावरणद्वारेण मोहयतीत्युक्तं स बुद्धेर्द्रष्टा परआत्मा॥ ४२॥

थयति तथेति मनसि दर्शितं न्यायं बुद्धावतिदिशति तथा मनसस्त्विति यो बुद्धेरित्यादि व्याचष्टे तथेत्यादिना॥ आत्मनो यथोक्तविशेषणस्याप्रकृतत्वमाशंक्याह॥ यं देहिनमिति ४२ श्रीरामचंद्राय नमः॥ श्रीरामाय नमः॥ ॥श्रीः॥ ॥

स

इंद्रियादिसमाधानपूर्वकात्मज्ञानात्कामजयो भवतीत्युपसंहरति ॥ एवमित्यादिना ॥ संस्कृतं मनो मनःसमाधाने हेतुरिति सूचयति ॥
संस्तभ्येति ॥ प्रकृतं शत्रुमेव विशिनष्टि कामरूपमिति ॥ तस्य दुरासदत्वे हेतुमाह ॥ दुर्विज्ञेयमिति ॥ अनेको विशेषस्तादृशो महाशनत्वा

ततः किं ॥ एवं बुद्धेः परमात्मानं बुध्वा ज्ञात्वा संस्तभ्य सम्यक्स्तंभनं कृत्वा आत्मानं स्वेनैवात्मना सम्यक्समाधाये
त्यर्थः ॥ जह्येनं शत्रुं हे महाबाहो कामरूपं दुरासदं दुःखेनासादः आसादनं प्राप्तिर्यस्य तं दुरासदं दुर्विज्ञेयानेकवि

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ॥ जहि शत्रुं महाबाहो कामरूपं दुरासदं ॥४३॥ ॥ श्रीः ॥

शेषमिति ॥४३॥ ॥इति श्रीगीताभाष्यटीकायां तृतीयोऽध्यायः॥ ॥३॥ ॥श्रीः॥ ॥

दिसदनेनोपायभूता कर्मनिष्ठा प्राधान्येनोक्ता उपेया तु ज्ञाननिष्ठा गुणत्वेनेति विवेक्तव्यं ॥४३॥ इति आनंदगिरीटीकायां तृतीयो

पूर्वाभ्यामध्यायाभ्यां निष्ठाद्वयात्मनो योगस्य गीतत्वाद्वेदार्थस्य च समाप्तत्वाद्वक्तव्यविशेषाऽभावादुक्तयोगस्य कृत्रिमत्वशं
कानिवृत्तये वंशकथनपूर्विकां स्तुतिं भगवानुक्तवानित्याह॥ भगवानिति॥ तदेव भगवद्वचनं वृत्तानुवादद्वारेण प्रस्तौति॥ योयमि
ति उक्तमेव योगं विभज्यानुवदति॥ ज्ञानेति॥ संन्यासेनेति कर्त्तव्यतया सहितस्य ज्ञानात्मनो योगस्य कर्माख्यो योगो हेतुरतश्चो
पायोपेयभूते निष्ठाद्वयं प्रतिष्ठापितमित्यर्थः॥ उक्तयोगद्वये प्रमाणमुपन्यस्यति॥ यस्मिन्निति॥ अथवा ज्ञानयोगस्य कर्मयोगो

योयं योगोऽध्यायद्वयेनोक्तो ज्ञाननिष्ठालक्षणः ससंन्यासः कर्मयोगोपायो यस्मिन्वेदार्थः प
रिसमाप्तः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च गीतासु च सर्वास्वयमेव योगो विवक्षितो भगवता
अतः परिसमाप्तं वेदार्थं मन्वानस्तं वंशकथनेन स्तौति भगवान्॥ ॥ ॥

पायत्वमेव स्फुटयति॥ यस्मिन्निति॥ प्रवृत्त्या लक्ष्यते ज्ञायते कर्मयोगो निवृत्त्या च लक्ष्यते ज्ञानयोग इति विभागः॥ यद्यपि पूर्वस्मि
न्नध्यायद्वये यथोक्तनिष्ठाद्वयं व्याख्यातं तथापि वक्ष्यमाणाध्यायेषु वक्तव्यांतरमस्तीत्याशंक्याह॥ गीतासु चेति कथं तर्हि स
मनंतराध्यायप्रवृत्तिरत आह॥ अत इति॥ वंशकथनं संप्रदायोपन्यासः संप्रदायोपदेशश्चाकृत्रिमत्वशंकानिवृत्त्या योगस्तुतेरुप

संपश्यति

गुरुशिष्यपरंपरोपन्यासमेवानुक्रामति ॥ इममिति ॥ इममित्यस्य संनिहितं विषयं दर्शयति अध्यायेति ॥ योगं ज्ञाननिष्ठालक्षणं कर्म
योगोपायलभ्यमित्यर्थः स्वयमकृतार्थानां प्रयोजनव्यग्राणां परार्थप्रवृत्त्यसंभवाद्भगवतस्तथाविधप्रवृत्तिदर्शनात्कृतार्थता
कल्पनीयेत्याह ॥ विवस्वत इति ॥ अव्ययवेदमूलत्वादव्ययत्वं योगस्यगमयितव्यं ॥ किमिति भगवता कृतार्थेनापि योगप्रवच
नं कृतमिति ॥ तदाह ॥ जगदिति ॥ कथं यथोक्तेन योगेन क्षत्रियाणां बलाधानं तदाह ॥ तेनेति ॥ युक्ताः क्षत्रिया इति शेषः ब्रह्म
शब्देन ब्राह्मणत्वजातिरुच्यते यद्यपि योगप्रवचनेन क्षत्रं रक्षितं तेन च ब्राह्मणत्वं तथापि कथं रक्षणीयं जगदशेषं रक्षित

इममध्यायद्वयेनोक्तं योगं विवस्वते आदित्याय सर्गादौ प्रोक्तवानऽहं जगत्परिपालयितॄणां क्षत्रियाणां बलाधानाय तेन यो
गबलेन युक्ताः समर्था भवंति ब्रह्म परिरक्षितुं ब्रह्म क्षत्रे परिपालिते जगत्परिपालयितुं अलमव्ययमव्ययफलत्वान्न

॥श्रीभगवानुवाच॥ इमं विवस्वते योगं प्रोक्तवानऽहमव्ययं ॥ विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥१॥

ह्यस्य सम्यग्दर्शननिष्ठालक्षणस्य मोक्षाख्य फलं व्येति स च विवस्वान्मनवे प्राह मनुरिक्ष्वाकवे स्वपुत्राय आदिराजायाऽब्रवीत् ॥१॥

मित्याशंक्याह ॥ ब्रह्मेति ॥ ताभ्यां हि कर्मफलभूतं जगदनुष्ठानद्वारा रक्षितुं शक्यमित्यर्थः योगस्याव्ययत्वे हेत्वंतरमाह ॥ अव्ययफ
लत्वादिति ॥ ननु कर्मफलवदुक्तयोगफलस्यापि साध्यत्वेन क्षयिष्णुत्वमनुमीयते नेत्याह ॥ नहीति ॥ अपुनरावृत्तिश्रुतिप्रति
हतमनुमानं न प्रमाणी भवतीति भावः ॥ भगवता विवस्वते प्रोक्तो योगस्तत्रैव पर्यवस्यतीत्याशंक्याह ॥ स चेति ॥ स्वपुत्रायेत्यु
भयत्र संबध्यते ॥ आदिराजायेति इक्ष्वाकोः सूर्यवंशप्रवर्त्तकत्वेन वैशिष्ट्यं उच्यते ॥१॥ श्रीरामचंद्राय नमः ॥ ॥

यथोक्ते योगे परंपरागतेविशिष्टजनसंमतिमुदाहरति । एवमिति । तस्यकथं संप्रतिविक्तव्यस्तंतदाह । सकालेनेति । पूर्वार्द्धं व्याकरोति । एवमित्यादिना । ऐश्वर्ये संपत्ती राजत्वंतेषामेव सूक्ष्मार्थे निरीक्षणक्षमत्वमृषित्वंद्वेहेतिभगवतोऽर्ज्जुनेनसहसं

एवंक्षत्रियपरंपराप्राप्तमिमंराजर्षयोराजानश्चतेऋषयश्चराजर्षयोविदुरिमंयोगंसयोगःकाले

सं नेहमहतादीर्घेणनष्टोविछिन्नसंप्रदायःप्रवृत्तःहेपरंतपयेआत्मनोविपक्षभूताःतेपरेउच्यंतेता

एवंपरंपराप्राप्तमिमंराजर्षयोविदुः सकालेनेहमहतायोगोनष्टःपरंतप ॥ २ ॥

न्शोर्यतेजोगभस्तिभिर्भानुरिवतापयतीतिपरंतपशत्रुतापनेत्यर्थः ॥ २ ॥ श्रीरामायनमः ॥

व्यवहारकालोगृह्यते । परंतपेति । संबोधनंविभजते । आत्मनइति । २ । श्रीसीतारामचंद्रायनमोनमः । ॥ ॥

किमितिवर्त्तमानकालेप्रकृतोयोगःसंप्रदायरहितोभूदित्याशंक्याधिकार्यभावादित्याह ॥ दुर्बलानिति ॥ तदेवदौर्बल्यंप्रकृतोपयो
गित्वेनव्याकरोति ॥ अजितेंद्रियानिति ॥ यद्यपिकामक्रोधादिप्रधानान्पुरुषान्प्रतिलब्धकामक्रोधादिभिरभिभूयमानोयो
गोनष्टोविच्छिन्नसंप्रदायःसंजातस्तथापियोगादृतेपुरुषार्थोलोकस्यलभ्यतेचेत्कृतमनेनयोगोपदेशेनेत्याशंक्ययथोक्तयो
गाभावेपरमपुरुषार्थाप्राप्तेर्मैवमित्याह ॥ लोकंचेति ॥ पूर्वोयोगोविच्छिन्नसंप्रदायोधुनात्वन्योयोगोमदर्थमुच्यतेभगवतेत्या

दुर्बलानजितेंद्रियान्प्राप्यनष्टंयोगमुपलभ्यलोकंचापुरुषार्थसंबंधिनंउपलभ्य सएवायंमयाते

सएवायंमयातेद्ययोगःप्रोक्तःपुरातनः ॥ भक्तोसिमेसखाचेतिरहस्यंह्येतदुत्तमं ॥ ३ ॥

तुभ्यंअद्ययोगःप्रोक्तःपुरातनःभक्तोसिमेसखाचेतिरहस्यंहियस्मादेतदुत्तमंयोगज्ञानमित्यर्थः ॥ ३ ॥

शंक्याह ॥ सएवेति ॥ कस्मादन्यस्मैयस्मैकस्मैचित्पुरातनोयोगोनोक्तोभगवतेत्याशंक्याह ॥ भक्तोसीति ॥ उक्तमधिकारिणंप्रति
योगस्यवक्तव्यत्वेहेतुमाह ॥ रहस्यंहीति ॥ अनादित्वेदमूलत्वाद्योगस्यपुरातनत्वं ॥ भक्तिःशरणबुद्ध्याप्रीतिस्तयायुक्तोनिजस्व
रूपमपेक्ष्यभक्तोविवक्षितःसमानवयाःस्निग्धःसहायःसखेत्युच्यते ॥ एतदिति ॥ कथंयोगोविशिष्यतेतत्राह ॥ ज्ञानमिति ॥ ३ ॥

भगवतिलोकस्यानीश्वरत्वशंकां निवर्त्तयितुं चोद्यमुद्भावयति ॥ भगवतेति परिहारार्थं भगवतो मनुष्यवदवस्थितस्यानीश्वरत्वमुप

भगवताविप्रतिषिद्धमुक्तमिति माभूत्कस्यचिद्बुद्धिरिति परिहारार्थं चोद्यमिव कुर्वन् ॥ अर्जुनउवाच ॥ अ
परमर्वाग्वसुदेवगृहे भवतोजन्म परं पूर्वं सर्गादौ जन्मोत्पत्तिर्विवस्वत आदित्यस्य तत्कथमेतद्विजानी

॥ अर्जुनउवाच ॥ अपरं भवतो जन्म परं जन्म विवस्वतः ॥ कथमेत
द्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥ श्रीभगवानुवाच ॥ ॥

यां अविरुद्धार्थतया यस्त्वमेवादौ प्रोक्तवानिति योगं स एव त्वमिदानीं मह्यं प्रोक्तवानिति ॥ ४ ॥

त्यतद्वचने शंकितविप्रतिषेधस्येति शेषः भगवतो निजरूपमुपेत्यनेदं चोद्यं किंतु लीलाविग्रहं गृहीत्वेति वक्तुं चोद्यमिवेत्युक्तं एतच्छ्रद्धा

श्रीमद्भगवद्गीता ५

भगवत्स्त्वानां मनुष्याणां शंकां वारयितुं प्रतिवचनमवतारयति ॥ यावासुदेव इति ॥ अन्यथा प्रश्ने कथमाशंकोपरिहर्त्तुं भगवद्वचन मित्याशंक्य प्रश्नप्रतिवचनयोः एकार्थ्यत्वमाह ॥ यदर्थो हीति ॥ यस्य शंकितस्य विरोधस्य परिहारार्थत्वस्य प्रश्नत्वमेव परिहारं वत्तुं भगवद्वचनमित्यर्थः ॥ अतीतानेकजन्मवत्त्वं ममैव नासाधारणं किंतु सर्वप्राणिसाधारणमित्याह ॥ तव चेति ॥ तानि प्रमाणाभावान्न प्रतिभांतीत्याशंक्याह ॥ तानीति ॥ ईश्वरस्यानावृतज्ञानत्वादित्यर्थः ॥ किमितितर्हि तानि मम न प्रतीयंते तवावृतज्ञान

यावासुदेवे ऽनीश्वरा ऽसर्वज्ञाशंकामूर्खाणां तां परिहरन् ॥ भगवानुवाच ॥ यदर्थो ह्यर्जुनस्य प्रश्नः ॥ बहूनि मे मम व्यतीतानि अतिक्रांतानि जन्मानि तव च हे अर्जुन तान्यहं वेद जाने सर्वाणि न त्वं वेत्थ न जानीषे धर्मा

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ॥ तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ५ ॥ ॥

धर्मादिप्रतिबद्धज्ञानशक्तित्वादहं पुनर्नित्यशुद्धबुद्धमुक्तसत्यस्वभावत्वादनावरणज्ञानशक्तिरिति हे परं

तवेदाहं ५

त्वादित्याह ॥ न त्वमिति ॥ परान्परिकल्प्यतत्परिहारार्थं प्रवृत्तत्वात्तव ज्ञानावरणं विज्ञेयमित्याह ॥ परंतपेति ॥ अर्जुनस्य भगवता सह अतीतानेकजन्मवत्वे तुल्ये पि ज्ञानवैषम्ये हेतुमाह ॥ धर्मेति ॥ आदिशब्देन रागलोभादयो गृह्यंते ईश्वरस्यातीतानागतवर्त्तमानसर्वार्थविषयज्ञानवत्वे हेतुमाह ॥ अहमिति ॥ ५ ॥ श्री सीतारामचंद्राय नमो नमः ॥ ॥

ईश्वरस्यकारणाभावाज्जन्मैवाऽयुक्तमतीतानेकजन्मवत्त्वंतुदूरादुत्सारितमितिशंक्यते कथमिति॥ वस्तुतोजन्माभा
वेपिमायावशाज्जन्मसंभवतीत्युत्तरमाह उच्यतइति पारमार्थिकजन्मायोगेकारणंपूर्वार्द्धेनानूद्यप्रातिभासिकज

कथंतर्हितवनित्येश्वरस्यधर्माधर्माभावेजन्मेत्युच्यते॥ अजोपिजन्मरहितोपिसंस्तथाऽव्ययात्मा

अजोपिसन्नव्ययात्माभूतानामीश्वरोपिसन्॥

अक्षीणज्ञानशक्तिस्वभावोपिसंस्तथाभूतानांब्रह्मादिस्तंबपर्यंतानामीश्वरईशनशीलोपिसन्

न्मसंभवेकारणमाह प्रकृतिमिति॥ प्रकृतिंशुद्धसत्त्वस्वरूपविषयत्वंप्रत्यादेष्टुंआत्ममाययेत्युक्तं वस्तुतोजन्माभा
वेकारणानुवादभागंविवृणोति अजोपीत्यादिना॥ ॥

प्रातिभासिकजन्मसंभवेकारणकथनपरमुत्तरार्द्धं विभजते प्रकृतिमित्यादिना प्रकृतिशब्दस्यस्वरूपशब्दपर्याय
त्वंवारयति मायामिति तस्याः स्वातंत्र्यं निराकृत्य भगवदधीनत्वमाह ममेति तस्याश्चाधिकरणद्वारेणानवच्छि
न्नत्वंसूचयति वैष्णवीमिति मायाशब्दस्यापि प्रज्ञानामसुपागाद्विज्ञानशक्तिविषयत्वमाशंक्याह त्रिगुणात्मि
कामिति तस्याः कार्यलिंगकमनुमानंसूचयति यस्याइति जगतोमायावशवर्त्तितामेवस्फुटयति ययेति यथालो

प्रकृतिंस्वांममवैष्णवीमायांत्रिगुणात्मिकांयस्यावशेसर्वंजगद्वर्त्ततेययामोहि
तंसत्सर्वंस्वमात्मानंवासुदेवंमांनजानातितांप्रकृतिंस्वामात्ममायामधिष्ठायवशी

प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममायया ६

कृतसंभवामिदेहवान्जातइवभवामिआत्ममाययानपरमार्थतोलोकवत् ६

केकश्चिज्जातोदेहवानालक्ष्यतेएवमहमपिमायामाश्रित्यतयास्ववशयासंभवामिजन्मव्यवहारमनुभवामितेन
मायामयमीश्वरस्यजन्मेत्याह प्रकृतिमित्यादिना संभवामीत्युक्तमेवविभजते देहवानिति अस्मदादेरिवतवापि
परमार्थत्वाभिमानोजन्मादिविषयेस्यादित्याशंक्यप्रागुक्तस्वरूपपरिज्ञानवत्वादीश्वरस्यमैवमित्याह नपरमार्थ
तइति आवृतज्ञानवतोलोकस्यजन्मादिविषयेपरमार्थत्वाभिमानःसंभवतीत्याह लोकवदिति ६

यदीश्वरस्य माया निबंधनं जन्मोक्तं तस्य प्रश्नपूर्वकं कालं कथयति। तत्रेत्यादिना। चातुर्वर्ण्ये चातुराश्रमे च यथावदनुष्ठीयमानेना स्ति धर्महानिरिति मन्वानो विशिनष्टि वर्णेति वर्णैराश्रमैस्तदाचारैश्च लक्ष्यते ज्ञायते धर्मस्तस्येति यावत्। धर्महानौ समस्तपुरुषार्थभंगो भवतीत्यभिप्रेत्याह। प्राणिनामिति। न च यथोक्तस्य धर्मस्य हानिं सोढुं शक्तो भवानित्याह। भारतेति। न केवलं प्राणिनां धर्महा

तत्र जन्म कदा किमर्थं चेत्युच्यते। यदा यदा हि धर्मस्य ग्लानिर्हानिर्वर्णाश्रमादिलक्षणस्य प्राणिनामभ्युदयनिःश्रेयससाधनस्य भवति भारत अभ्युत्थानं समुद्भवोऽधर्मस्य तदा तदात्मानं सृजाम्यहं मायया॥ ७ किमर्थं॥ परित्राणाय परिरक्षणाय साधूनां स

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं॥ ७॥ परित्राणा
य साधूनां विनाशाय च दुःकृतां॥ धर्मसंस्थापनार्थाय संभवामि युगे युगे॥ ८॥ श्रीरामाय नमः॥

न्मार्गस्थानां विनाशाय च दुःकृतां पापकारिणां किंच धर्मसंस्थापनार्थाय धर्मस्य सम्यग्स्थापनं धर्मसंस्थापनं तदर्थं संभवामि यु

निरेव भगवतो मायाविग्रहस्य परिग्रहे हेतुरपि तु तेषामधर्मप्रवृत्तिरपीत्याह। अभ्युत्थानमिति यदा यदेति पूर्वेण संबंधः॥ ७॥ यथोक्ते काले कृतकृत्यस्य भगवतो मायाकृते जन्म निप्रश्नपूर्वकं प्रयोजनमाह। किमर्थमित्यादिना। यथा साधूनां रक्षणमसाधूनां निग्रहश्च भगवदवतारफलं तथा फलांतरमपि तस्यास्तीत्याह। किंचेति। धर्मे हि स्थापिते जगदेव स्थापितं भवति। अन्यथा भिन्नमर्यादं जगदसंगतमाप

मायामयमीश्वरस्यजन्मनवास्तवंतस्यैवचजगत्परिपालनंकर्मनान्यस्येतिजानतःश्रेयोवाप्तिंदर्शयन्विपक्षेप्रत्यवायंसूचयति॥तदित्यादि
ना॥यथोक्तंमायामयंकल्पितमित्यर्थः॥वेदनस्ययथावत्त्वंवेद्यस्यजन्मादेरुक्तरूपानतिवर्तित्वंयदिपुनर्भगवतोवास्तवंजन्मसाधुज

तत्॥जन्ममायारूपंकर्मचसाधूनांपरित्राणादिमेममदिव्यमप्राकृतंरैश्वरमेवंयथोक्तंयोवेत्तितत्वतःतत्वेनयथा

जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्वतः॥त्यक्त्वादेहंपुनर्जन्मनैतिमामेतिसोऽर्जुन॥९॥ ॥

वत्यक्त्वादेहंइमंपुनर्जन्मपुनरुत्पत्तिंनैतिनप्राप्नोतिमामेत्यागच्छतिसमुच्यतेहेऽर्जुन॥९॥ श्रीः॥ ॥

नपरिपालनादिचान्यस्यैवकर्मक्षत्रियस्येतिविवक्ष्येततदातत्वापरिज्ञानप्रयुक्तोजन्मादिसंसारोदुर्वारःस्यादितिभावः॥९॥ ॥

संप्रतिप्रसक्तमोक्षमार्गस्य नूतनत्वेन व्यवस्थितत्वमाशंक्य परिहरति नैष इति मन्मयत्वस्य मद्भावागमनेनापौनरुक्त्यं दर्शयति ब्रह्मविद इति आत्मनो भिन्नत्वेन भिन्नाभिन्नत्वेन वा ब्रह्मणो वेदनं व्यावर्त्तयति ईश्वरेति अभेददर्शनेन समुच्चित्य कर्मानुष्ठानं प्रत्याचष्टे मामेवेति

नैष मोक्षमार्ग इदानीं प्रवृत्तः किं तर्हि पूर्वमपि। वीतरागभयक्रोधाः रागश्च भयं च क्रोधश्च वीता विगता येभ्यस्ते वीतरागभयक्रोधाः मन्मया ब्रह्मविदः ईश्वराभेददर्शिनो मामेव परमेश्वरमुपाश्रिताः केवलज्ञाननिष्ठा इत्यर्थः॥ ब

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः। बहवो ज्ञानतपसा पूता मद्भावमागताः॥ १०

हवो अनेके ज्ञानतपसा ज्ञानमेव परमात्मविषयं तपः तेन ज्ञानतपसा पूताः परां शुद्धिं गताः संतो मद्भावमीश्वरभावं मोक्षमागताः समनुप्राप्ताः इतरतपोनिरपेक्षा ज्ञाननिष्ठा इत्यस्य लिंगं ज्ञानतपसेति विशेषणं॥ १०॥

तदुपाश्रयत्वमेव विशदयति केवलेति मामुपाश्रिता इति केवलज्ञाननिष्ठत्वमुक्त्वा ज्ञानतपसा पूता इति किमर्थं पुनरुच्यते तत्राह इत

टी० ८०

ईश्वरः सर्वेभ्यो भूतेभ्यो मोक्षं प्रयच्छति चेत्तदायुक्तविशेषणवैयर्थ्यं यदि तु केभ्यश्चिदेव मोक्षं प्रयच्छेत्तर्हि तस्य रागादिमत्त्वादनीश्वरत्वापत्ति
रिति शंकते ॥ नवतर्हीति ॥ ये मुमुक्षवस्तेभ्यो मोक्षमीश्वरो ज्ञानसंपादनद्वारा प्रयच्छति फलांतरार्थिभ्यस्तु तत्तदुपायानुष्ठापनेन तदेवद
दातीति नास्य रागद्वेषाविति परिहरति ॥ उच्यत इति ॥ मुमुक्षूणामीश्वरानुसारित्वेपि फलांतरार्थिनां कुतस्तदनुसारित्वमित्याशंक्य फल

तवतर्हि रागद्वेषौ स्तो येन केभ्यश्चिदेवात्मभावं प्रयच्छसि न सर्वेभ्य इत्युच्यते ॥ ये यथा येन प्रकारेण येन प्रयोजने
न यत्फलार्थितया मां प्रपद्यंते तांस्तथैव तत्फलदानेन भजाम्यनुगृह्णाम्यहं ते षां मोक्षं प्रत्यनर्थित्वान्नह्येकस्य

ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहं ॥

मुमुक्षुत्वं फलार्थित्वं च युगपत्संभवति ॥ अतो ये फलार्थिनस्तांस्तत्फलदानेन ॥ श्रीसीतारामचंद्राय नमः ॥

मंत उपपत्तेरिति न्यायेन तत्तत्फलस्येश्वरायत्तत्वात्तदनुवर्त्तनमावश्यकमित्याह ॥ ममेति ॥ भगवद्भजनभागिनां सर्वेषामेव केवल्यमेकरू
पं किमिति नानुगृह्यते तत्राह ॥ तेषामिति ॥ अभ्युदयनिःश्रेयसार्थित्वं प्रार्थनावैचित्र्यादेकस्यैव किं न स्यादित्याशंक्य पर्यायेण तदनु
पपत्तिं साधयति ॥ नहीति ॥ मुमुक्षूणां फलार्थिनां च विभागे स्थिते अनुग्रहविभागं फलितमाह ॥ अत इति ॥ फलप्रदानेनानुगृह्णामीति

नित्यनैमित्तिककर्मानुष्ठायिनामेवफलार्थित्वाभावेसति चमुमुक्षुत्वे कथंतेष्वनुग्रहःस्यादितितत्राह । येयथोक्तेति । ज्ञानप्रदानेनभजामीत्युत्तरोत्तरसंबंधः । संतिकेचित्त्यक्तसर्वकर्माणोज्ञानिनोमोक्षमेवापेक्षमाणास्तेष्वनुग्रहप्रकारंप्रकटयति । येज्ञानिनइति । केचिदार्त्ताःसंतोज्ञानादिसाधनांतररहिताभगवंतमेवार्त्तिमपहर्त्तुमनुवर्त्ततेतेषुभगवतोऽनुग्रहविशेषंदर्शयति । तथेति । पूर्वार्द्धंव्या

येयथोक्तकारिणस्तत्फलार्थिनोमुमुक्षवश्चतान्ज्ञानप्रदानेनयेज्ञानिनःसंन्यासिनोमुमुक्षवश्चतान्मोक्षप्रदानेनतथाआर्त्तानार्त्तिहरणेनइत्येवंयथायेनप्रकारेणप्रपद्यंतेयेतांस्तथैवभजामीत्यर्थः । नपुनारागद्वेषनिमित्तं

ममवर्त्मानुवर्त्ततेमनुष्याःपार्थसर्वशः ॥ ११ ॥

मोहनिमित्तंवाकंचिद्भजामि सर्वथापिसर्वावस्थासुममेश्वरस्यवर्त्ममार्गमनुवर्त्ततेमनुष्यायत्फलार्थितयायस्मिन्कर्मणिमोक्षमार्गेवाधिकृतायेप्रयतंतेतेमनुष्याअत्रउच्यंतेहेपार्थसर्वशःसर्वप्रकारैः ॥ ११ ॥ श्रीरामायनमः ॥

ख्यानमुपसंहरति । इत्येवमिति । भगवदनुग्रहेनिमित्तांतरंनिवारयति । नपुनरिति । फलार्थित्वेमुमुक्षुत्वेचजंतूनांभगवदनुस्मरणमावश्यकमित्युत्तरार्द्धंविभजते । सर्वथापीति । सर्वावस्थत्वंतेनतेनात्मनापरस्येश्वरस्यावस्थानंमार्गोज्ञानकर्मलक्षणःमनुष्यग्रहणादितरेषामीश्वरमार्गानुवर्त्तित्वपर्युदासःस्यादित्याशंक्याह । यत्फलेति । सर्वप्रकारैर्ममममार्गमनुवर्त्ततइतिपूर्वेणसंबंधः ॥ ११ ॥

अनुग्राह्याणांज्ञानकर्मानुरोधेनभगवतातेष्वनुग्रहविधानात्तस्यरागद्वेषौयदिनभवतस्तर्हितस्यरागाद्यभावादेवसर्वेषुप्राणिष्वनुग्र
हेच्छातुल्याप्राप्तानचतस्यांसत्यामेवफलस्यात्मीयस्यसंपादनेसामर्थ्येनतुभगवतोमहतोमोक्षाख्यस्यफलस्यप्रदानेशक्तिरितियु
क्तंअप्रतिहतज्ञानेच्छाक्रियाशक्तिमतस्तस्यसर्वफलदानसामर्थ्यात्तथाचयथोक्तानुजिघृक्षायांसत्यांतथ्यश्चयथोक्तसामर्थ्यवतिसति

यदितवेश्वरस्यरागादिदोषाभावात्सर्वप्राणिषुअनुजिघृक्षायांतुल्यायांसर्वफलप्रदानसमर्थेचत्वयिसतिवा
सुदेवःसर्वमितिज्ञानेनैवमुमुक्षवःसंतःकस्मात्त्वामेवसर्वेनप्रपद्यंतइतिशृणुतत्रकारणंकांक्षंतःअभी

कांक्षंतःकर्मणांसिद्धिंयजंतइहदेवताः॥

क्षंतःकर्मणांसिद्धिंफलनिष्पत्तिंप्रार्थयंतोयजंतेइहास्मिंल्लोकेदेवताइंद्राग्न्याद्याः॥ ॥श्रीः॥ ॥

सर्वैफलत्वफलादभ्युदयाद्धिमुख्यामोक्षमेवापेक्षमाणाज्ञानेनत्वामेवकिमितिनप्रतिपद्येरन्निितिनोदयति यदीति मोक्षापेक्षाभावात्तदुपा
यभूतज्ञानादपिवैमुख्याद्भगवत्प्राप्त्यभावेहेतुमभिदधानःसमाधत्ते अणिवति कर्मफलसिद्धिमिच्छतांकिमितिमानुषेलोकेदेवतापूजन

मिश्रकेतानाद्दे॥ क्षिप्रंहीति॥

कर्मफलसंपत्त्यर्थिनां यष्टव्यविभागदर्शिनां तद्दर्शनेकारणमात्माज्ञानमित्यत्र बृहदारण्यकश्रुतिमुदाहरति ॥ अथेति ॥ अविद्याप्रकरणोपक्रमार्थमथेत्युक्तमुपासनं भेददर्शनमित्यनूद्यकारणमात्माज्ञानं तत्रेतिदर्शयति ॥ नेति ॥ यथास्मदादीनां हलवहनादिना पशुरुपकरोति एवमज्ञो देवादीनां यागादिभिरुपकरोतित्याह ॥ यथेति ॥ किमितिते फलकांक्षिणो भिन्नदेवतायाजिनो ज्ञानमार्गं नापेक्षंते तत्रोत्तरार्द्धमुत्तरत्वेन योजयति तेषामित्यादिना ॥ यस्माद्यथोक्तानामधिकारिणां कर्मप्रयुक्तं फलं लोकविशेषप्राप्तिरिति

अथयोन्यां देवतामुपास्तेऽन्योसावन्योहमस्मीति न सवेद यथा पशुरेवं स देवानामितिश्रुतेः ॥ तेषां हि भिन्नदेवतायाजिनां फलकांक्षिणां क्षिप्रं शीघ्रं हि यस्मान्मानुषे लोके सिद्धिर्भवति कर्मजा मनुष्यलोके हि शास्त्राधिकारः क्षिप्रं हि मानु

क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥१२॥

षे लोक इति विशेषणादन्येष्वपि कर्मफलसिद्धिं दर्शयति भगवान्मानुषे लोके वर्णाश्रमादिकर्माधिकार इति विशेषः तेषां च वर्णाश्रमाद्यधिकारिणां फलसिद्धिः क्षिप्रं भवति कर्मजा कर्मभ्यो जाता ॥१२॥ सिद्ध्यतितस्मात्तेषां मोक्षमार्गादप्ति वैमुख्यमित्यर्थः ॥ मानुषलोकविशेषणं किमर्थमित्याशंक्याह ॥ मनुष्यलोके हीति ॥ लोकांतरेषु तर्हि कर्मफलसिद्धिर्नास्तीत्याशंक्य क्षिप्रविशेषणस्य तात्पर्यमाह ॥ क्षिप्रमिति ॥ क्वचित्कर्मफलसिद्धिर्विलंबेन भवति अत्र त्वविलंबेनेति विभागे को हेतुरित्याशंक्य सामग्रीभावाभावाविस्याह ॥ मानुषइति ॥ मनुष्यलोके कर्मफलसिद्धेः शैघ्र्यात्तदभिमुखानां ज्ञानमार्गाद्वैमुख्यं

प्राप्तिकमित्युपसंहरति तेषामिति ९८

मनुष्यलोके चातुर्वर्ण्यं चातुराश्रम्यमित्यनेनद्वारेण कर्माधिकारिनियमे कारणं पृच्छति मानुषएवेति आदिशब्देनावस्थाविशेषा विवक्ष्यंते ॥ प्रकारांतरेण वृत्तानुवादपूर्वकं चोद्यमुत्थापयति अथवेत्यादिना प्रश्नद्वयं परिहरति उच्यत इति तर्हि

मानुष एव हि लोके वर्णाश्रमादिकर्माधिकारो नान्येषु लोकेष्विति नियमः किंनिमित्त इति ॥ अथवा वर्णाश्रमादिप्रविभागोपेता मनुष्या मम वर्त्मानुवर्त्तंते मनुष्याः पार्थ सर्वश इत्युक्तं कस्मात्पुनः कारणान्नियमेन तवैव वर्त्मानुवर्त्तंते नान्यस्येत्युच्यते ॥ चातुर्वर्ण्यं चत्वार एव वर्णाश्चातुर्वर्ण्यं मयेश्वरेण सृष्टं उत्पादितं ब्राह्मणोऽस्य मुखमासीदित्यादिश्रुतेः ॥ गुणकर्मविभागशः गुणविभागशः कर्मविभागशश्च गुणाः सत्वरजस्तमांसि तत्र सा

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ॥

त्त्विकस्य सत्वप्रधानस्य ब्राह्मणस्य शमो दमस्तप इत्यादीनि कर्माणि सत्वोपसर्ज्जनरजःप्रधानस्य क्षत्रियस्य शौर्यतेजःप्रभृतीनि कर्माणि तमउपसर्ज्जनरजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि रजउपसर्ज्जनतमःप्रधानस्य शूद्रस्य शुश्रूषैव कर्मेत्येवं गुणकर्मविभागशश्चातुर्वर्ण्यं मया सृष्टमित्यर्थः ॥ ॥ ॥

वकर्तृत्व भोक्तृत्वसंभवादस्मदादितुल्यत्वेनानीश्वरत्वमित्याशंक्याह तस्येति ॥ ईश्वरस्य विषमां सृष्टिं विदधानस्य सृष्टिवैशिष्ट्य निर्वाहकं कथयति गुणेति ॥ गुणविभागेन कर्मविभागस्तेन चातुर्वर्ण्यस्य सृष्टिमेवोपदिष्टं स्पष्टयति तत्रेत्यादिना ॥ ॥

प्रश्नद्वयप्रतिविधानंप्रकृतमुपसंहरति तद्वेदमिति मनुष्यलोकेवर्णाश्रमादिपूर्वकेकर्मण्यधिकारस्तत्रैववर्णादेरीश्वरेण सृष्टत्वान्नलोकांतरेषुतत्रवर्णाद्यभावादीश्वरमेवचतुर्वर्णाश्रमादिविभागभागिनोऽधिकारिणोनुवर्त्ततेतेनैववर्णादेस्त द्व्यापारस्यचसृष्टत्वात्तदनुवर्त्तनस्ययुक्तत्वादित्यर्थः तस्येत्यादिद्वितीयभागायचोद्यमनुवदति हंतेति यदिचातु र्वर्ण्यादिकर्तृत्वादीश्वरस्यप्रायुक्तोनियमोभिमतस्तर्हितद्विषयसृष्ट्यादेस्तन्निष्ठव्यापारस्यचधर्मादेर्निर्वर्त्तकत्वात्तत्फल

तद्वेदंचातुर्वर्ण्यंनान्येषुलोकेषुअतोमानुषेलोकइतिविशेषणं हंततर्हिकृतत्वस्यचातुर्वर्ण्यस्यसर्गादिकर्मणःक र्तृत्वात्तत्फलेनयुज्यसेअतोनत्वंनित्यमुक्तोनित्येश्वरइत्युच्यतेयद्यपिमायासंव्यवहारेणतस्यकर्मणःकर्त्तारम

तस्यकर्त्तारमपिमांविद्ध्यकर्त्तारमव्ययं ॥१३॥

पिसंतंमांपरमार्थतोविद्ध्यकर्त्तारमतएवाव्ययमसंसारिणंचमांविद्धियेषांतुकर्मणांकर्त्तारंमांमन्यसेपरमार्थत स्यकर्तृगामित्वात्कर्तृत्वभोक्तृत्वयोस्त्वयिप्रसंगान्नित्यमुक्तत्वादितेनस्यादित्यर्थः मायायाक[तेषामकर्तैवाहं ॥१३॥] र्तृत्वंपरमार्थतश्चाकर्तृत्वमित्यभ्युपगमान्नित्यमुक्तत्वादिसिद्ध्यतीत्युत्तरमाह उच्यतेति मायाप्रवृत्त्यातेनसंव्यवहारेण चातुर्वर्ण्यादेस्तत्कर्मणश्चयद्यपिकर्त्ताहंतथापितथाविधंमांपरमार्थतोऽकर्त्तारंविद्धीतियोजनाअकर्तृत्वादेवाभोक्तृत्व सिद्धिरित्याह अतएवेति ईश्वरस्यकर्तृत्वभोक्तृत्वयोर्वस्तुतोऽभावेकर्मतत्फलसंबंधवैधुर्यंफलतीत्याह येषांत्विति

कर्मतत्फलसंस्पर्शशून्यमीश्वरं पश्यतो दर्शनानुरूपं फलं दर्शयति न मामिति तानि कर्माणीति येषां कर्मणामहं कर्त्तेत्यभिमतस्तानि इतियावद्देहेंद्रियाद्यारंभकत्वेन तेषां कर्मणामीश्वरसंस्पर्शाभावे तत्र तत्कारणावस्थायामहंकाराभावं हेतुं करोति अहंकाराभावादिति कर्मफलतृष्णाभावाच्चेश्वरं कर्माणि न लिंपंतीत्याह न चेति उक्तमेव प्रपंचय

यतः न मां तानि कर्माणि लिंपंति देहाद्यारंभकत्वेनाहंकाराभावान्न च तेषां कर्मणां फलेषु मे मम स्पृहा तृष्णा येषां तु संसारिणामहं कर्त्तेत्यभिमानः कर्मसु स्पृहा तत्फलेषु च तानि कर्माणि लिंपंतीति

न मां कर्माणि लिंपंति न मे कर्मफले स्पृहा इति मां योभिजानाति कर्मभिर्न स बध्यते १४

युक्तं तदभावान्न मां कर्माणि लिंपंतीत्येवं योन्योपि मामात्मत्वेनाभिजानाति नाहं कर्त्ता न मे कर्मफले स्पृहेति कर्मभिर्न स बध्यते तस्यापि न देहाद्यारंभकानि कर्माणि प्रभवंतीत्यर्थः १४ हंत

तियेषां त्विति तदभावात्कर्मस्वहंकर्तेत्यभिमानस्य तत्फलेषु च स्पृहायाश्चाभावादित्यर्थः ईश्वरस्य कर्मभिरलेपेपि क्षेत्रज्ञस्य किमायातमित्याशंक्योत्तरार्द्धं व्याचष्टे इत्येवमिति अभिमानप्रकारमभिनयति नाहमिति ज्ञानफलं कथयति कर्मभिरिति कर्मासंबंधं विदुषो विशदयति तस्यापीति १४ श्रीरामचंद्राय नमो नमः ॥ ॥

ज्ञा २

तवकर्मतत्फलसंबंधाभावेतथाज्ञानवतश्चतदसंबंधेममापिकिंकर्मणेत्याशंक्यकर्मणिकर्तृत्वाभिमानंतत्फलेस्पृहांचाकृत्वा
मुमुक्षुवत्त्वयाकर्मकर्त्तव्यमेवेत्याह ॥ नाहमित्यादिना ॥ एवमिति ॥ नाहंकर्त्तेत्येवमादिपरामृश्यते ॥ तेनपूर्वैर्मुमुक्षुभिरनुष्ठितत्वेनहे
तुनेत्यर्थः ॥ कर्मैवेत्येवकारार्थमाह ॥ नेत्यादिना ॥ त्वंशब्दस्यक्रियापदेनसंबंधः ॥ तस्मादित्युक्तमेवस्फुटयति ॥ पूर्वैरिति ॥ यदुक्तंकिंम
मकर्मणेतितत्रत्वमज्ञोवातत्वविद्वायद्यज्ञस्तदात्मशुद्ध्यर्थंकुरुकर्मेत्याह ॥ यदीति ॥ द्वितीयंप्रत्याह ॥ तत्वविच्चेदिति ॥ कुरुकर्मेतिसंबंधः

नाहंकर्त्तानमेकर्मफलेस्पृहेति ॥ एवंज्ञात्वाकृतंकर्मपूर्वैरप्यतिक्रांतैर्मुमुक्षुभिः कुरुतेनकर्मैवत्वंनतूष्णीमास
नंनापिसंन्यासः कर्त्तव्यः तस्मात्त्वंपूर्वैरप्यनुष्ठितत्वात्‌यद्यज्ञस्त्वंततः आत्मशुध्यर्थंतत्वविच्चेत्तर्हिलोकसंग्रहा

एवंज्ञात्वाकृतंकर्मपूर्वैरपिमुमुक्षुभिः ॥ कुरुकर्मैवतस्मात्त्वंपूर्वैः पूर्वतरंकृतं ॥ १५ ॥ श्रीः ॥ ॥

र्थंपूर्वैर्जनकादिभिः पूर्वतरंकृतंनाधुनातनंकृतंनिर्वर्तितंतत्रकर्मचेत्कर्त्तव्यंत्वद्वचनात्करोम्यहंकिंविशे
षितेनपूर्वैः पूर्वतरंकृतंइतिउच्यतेयस्मान्महद्वैषम्यंकर्मणि ॥ १५ ॥ श्रीसीतारामचंद्रायनमोनमः ॥ ॥

पूर्वैर्मूढैराचरितंइत्येतावताकिमितिविवेकवतामयातत्कर्त्तव्यमित्याशंक्याह ॥ जनकादिभिरिति ॥ तेतदैवसंपाद्यकर्मकृ
तवंतोनतदिदानीमप्रामाणिकत्वादनुष्ठेयमित्याशंक्याह ॥ पूर्वतरमिति ॥ कर्मविशेषणमाक्षिपति ॥ तत्रेति ॥ मनुष्यलोकः सप्त
म्यर्थः कर्मणिमहतोवैषम्यस्यविद्यमानत्वात्तस्यपूर्वैरनुष्ठितत्वेनपूर्वतरत्वेनचविशेषितत्वेतस्मिन्प्रवृत्तिस्तवसुकरेतियुक्तंवि

कर्मणि देहादिचेष्टारूपे लोकप्रसिद्धे नास्ति वैषम्यमिति शंकते। कथमिति। विज्ञानवतामपि कर्मादिविषये व्यामोहोपपत्तेः सुतरामेवतवतद्विषयव्यामोहसंभवापोहार्थमात्मवाक्यापेक्षणादस्तिकर्मणि वैषम्यमित्युत्तरमाह। किंकर्मेति। तत्तेऽकर्मे

कथं। किंकर्म किंचाकर्मेति कवयो मेधाविनोप्यत्रास्मिन्कर्मादिविषये मोहिताः मोहंगताः। अतः तुभ्यमहं कर्माकर्मंच प्रवक्ष्यामि यत् ज्ञात्वा कर्मादि मोक्ष्यसेऽशुभात्संसारात्। नचैतत्त्वया मंतव्यं कर्मनाम देहादि

किंकर्म किमकर्मेति कवयोप्यत्र मोहिताः॥ तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥१६॥

चेष्टा लोकप्रसिद्धमकर्मनाम तदक्रिया तूष्णीमासनं किं तत्र बोद्धव्यमिति॥१६॥ श्रीरामचंद्राय नमः॥ ॥

सत्राकाराद्यनुबंधेनापि परं छेत्तव्यं। कर्मादिप्रवचनस्य प्रयोजनमाह। यज्ज्ञात्वेति। तत्कर्माकर्मचेति संबंधः। अतो मेधाविनोपि यथोक्ते विषये व्यामोहस्य सत्वादित्यर्थः। कर्मणोऽकर्मणश्च प्रसिद्धत्वात्तद्विषयेन किंचिद्बोद्धव्यमिति चोद्यमनूद्य निरस्यति। नचेति

तत्रहेलाकांक्षापूर्वकमनंतरश्लोकमवतारयति ॥ कस्मादिति ॥ त्रिष्वपिकर्माकर्मविकर्मसुबोद्धव्यमस्तीतियस्मादध्याहारस्तस्मान्म
दीयंप्रवचनमर्थवदितियोजनाबोद्धव्यसद्भावेहेतुमाह ॥ यस्मादिति ॥ त्रितयंप्रकृत्यान्यतमस्यगहनत्ववचनमयुक्तमित्याशंक्या

कस्मादुच्यते ॥ कर्मणःशास्त्रविहितस्यहियस्मादपिअस्तिबोद्धव्यंबोद्धव्यंचास्त्येवविकर्मणःप्रतिषिद्धस्य
तथाअकर्मणश्चतूष्णींभावस्यबोद्धव्यंअस्तीतित्रिषुष्यध्याहारःकर्त्तव्योयस्माद्गहनाविषमादुर्विज्ञा

कर्मणोह्यपिबोद्धव्यंबोद्धव्यंचविकर्मणः ॥ अकर्मणश्चबोद्धव्यंगहनाकर्मणोगतिः ॥ १७ ॥

नाकर्मणइत्युपलक्षणार्थंकर्मादीनांकर्माकर्मविकर्मणांगतिर्याथात्म्यंतत्त्वमित्यर्थः ॥ १७ ॥ ॥

न्यतमग्रहणस्योपलक्षणार्थत्वमुपेत्यविवक्षितमर्थमाह ॥ कर्मादीनामिति ॥ १७ ॥ श्रीरामचंद्रायनमः ॥

उत्तरश्लोकमाकांक्षापूर्वकमुपादत्ते ॥ किंपुनरिति ॥ प्रथमपादस्याक्षरोक्तमर्थं कथयति कर्मणीत्यादिना ॥ द्वितीयपादस्यापिशब्दता
डितमर्थं निर्दिशति ॥ अकर्मणि चेति ॥ कर्माभावे यः कर्म पश्यतीति संबंधः प्रवृत्तेरेव कर्मत्वान्निवृत्तेस्तदभावत्वात्तत्र कर्मदर्शनम
नुचितमित्याशंक्योभयोरपि कारकाधीनत्वेनाविशेषमभिप्रेत्याह ॥ कर्तृतंत्रत्वादिति ॥ प्रवृत्ताविव निवृत्तावपि कर्मदर्शनमविरु

किंपुनस्तत्त्वं कर्मादेर्यद्बोद्धव्यं वक्ष्यामीति प्रतिज्ञातमुच्यते ॥ कर्मणि कर्म क्रियत इति व्यापारमात्रं तस्मिन्कर्म
ण्यकर्म कर्माभावं यः पश्येदकर्मणि कर्माभावे च कर्तृतंत्रत्वात्प्रवृत्तिनिवृत्त्योर्वस्त्वप्राप्यैव हि सर्व एव क्रि

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ॥ स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८ ॥

याकारकादिव्यवहारोऽविद्याभूमावेव कर्म यः पश्येत्पश्यति स बुद्धिमान्मनुष्येषु स युक्तो योगी च
कृत्स्नकर्मकृत्समस्तकर्मकृच्च सः ॥ इति स्तूयते कर्माकर्मणोरितरेतरदर्शी ॥ श्रीरामायनमः ॥ ॥

द्धमिति शेषः ॥ ननु निवृत्तेर्वस्त्वधीनत्वात्कारकनिबंधनत्वाभावात्तत्र कर्मदर्शनं न युज्यते तत्राह ॥ वस्त्विति ॥ क्रियाकारकफ
लव्यवहारस्य सर्वस्याऽविद्यावस्थायामेव प्रवृत्तत्वाद्वस्तुसंस्पर्शशून्यत्वात्प्रवृत्तिवन्निवृत्तावपि यः कर्म पश्यति स मनुष्येषु बु
द्धिमानिति संबंधः कर्मण्यकर्म अकर्मणि च कर्म पश्यतो बुद्धिमत्त्वं समस्तकर्मकर्तृत्वं च कथमित्याशंक्याह ॥ इति स्तूयत इति ॥

श्लोकस्यशाब्दोर्थेर्थेदर्शितेनात्पर्यापरिज्ञानान्मिथोविरोधंशंकते नन्विति कथमेवंविरुद्धमित्याशंकायकर्मणीतिविषयसप्त
मीवास्यादधिकरणसप्तमीवेतिविकल्प्याद्ये अन्याकारंज्ञानमन्यालंबनमितिस्पष्टेविरोधःस्यादित्याह नहीति अन्यस्यान्या
त्मतायोगात्कर्माकर्मणोरभेदासंभवादकर्माकारंकर्मालंबनज्ञानमयुक्तमित्यर्थः द्वितीयंदूषयति तत्रेत्कर्मण्यधिकरणे
ततोविरुद्धमकर्मकथमाधेयंद्रष्टाद्रष्टुमीष्टेनहिकर्माकर्मणोर्मिथोविरुद्धयोराधाराधेयभावोभवतीत्यर्थः विषयसप्त
मीमुपेत्यसिद्धांतीपरिहरति नन्वकर्मैवेति लोकस्यमूढदृष्टेर्विवेकवर्जितस्यपरमार्थतोब्रह्माकर्माक्रियमेवसद्धांत्याकर्म

ननुकिमिदंविरुद्धमुच्यतेकर्मण्यकर्मयःपश्येदकर्मणिचकर्मेति नहिकर्माकर्मस्यादकर्मवाक
र्मतत्रकथंविरुद्धंपश्येत्द्रष्टा नन्वकर्मैवपरमार्थतःसत्कर्मवदवभासतेमूढदृष्टेर्लोकस्यतथाकर्मै
वाकर्मवत्तत्रयथाभूतदर्शनार्थमाहभगवान्कर्मण्यकर्मयःपश्येदित्यादि ॥ श्रीः ॥

सहितंक्रियावदिवप्रतिभातीत्यक्षरार्थःपरस्पराध्यासमभ्युपेत्योक्तं तथेति यथाखल्वकर्मसत्कर्मवोपलभ्यते तथाक
र्मसक्रियमेवद्वैतमक्रियेब्रह्मण्यधिष्ठानेसंसृष्टंतद्वद्भातीत्यक्षरयोजनाकर्माकर्मणोरितरेतराध्यासेसिद्धेसम्यग्दर्शनसिद्ध्य
र्थंभगवतोवचनमुचितमित्याह तत्रेति यथापदिदंरजतमितिप्रतिपन्नंतदिदानींशुक्तिशकलंपश्यतीति भ्रमसिद्धरजतरूप
विषयानुवादेनतदधिष्ठानंशुक्तिमात्रमुपदिश्यतेतथाभ्रमसिद्धकर्माद्यात्मविषयानुवादेनतदधिष्ठानंकर्मादिरहितंकूटस्थं

तथाचभगवतोवचनमविरुद्धमित्याह । अतइति । इतश्चाध्यारोपितकर्माद्यनुवादपूर्वकंतदधिष्ठानस्यकर्मादिरहितस्य
निर्विशेषस्यब्रह्मणोभगवताबोध्यमानत्वान्नतत्रविरोधाशंकावकाशोभवतीत्याह । बुद्धिमत्वादीति । कूटस्थब्रह्मणोन्य
स्यसर्वस्यमायामात्रत्वादन्यज्ञानाद्बुद्धिमत्वयुक्तत्वसर्वकर्मकर्तृत्वानामनुपपत्तेरत्रचसबुद्धिमानित्यादिनाबुद्धिमत्वा
दिनिर्दिशन्ब्रह्मज्ञानादेवतदुपपत्तेःसर्वविक्रियारहितंब्रह्मज्ञानमेवविवक्षितमित्यर्थः । बोधशब्दस्यसम्यग्ज्ञानेप्रसिद्ध
त्वात्कर्माकर्मविकर्मणांस्वरूपंबोद्धव्यमस्तीतिवदतासम्यग्ज्ञानोपदेशस्यविवक्षितत्वादपिकूटस्थंब्रह्मात्राभिप्रेतमि

अतोनविरुद्धंबुद्धिमत्वाद्युपपत्तेश्चबोद्धव्यमितिचयथाभूतदर्शनमुच्यते । नचविपरीतज्ञाना
दशुभान्मोक्षणंस्यात् । यज्ज्ञात्वामोक्ष्यसेऽशुभादितिचोक्तंतस्मात्कर्माकर्मणीविपर्ययेणगृहीते
प्राणिभिस्तद्विपर्ययग्रहणनिवृत्त्यर्थंभगवतोवचनंकर्मण्यकर्मयःपश्येदित्यादि । नचात्रकर्माधि
करणमकर्मास्तिकुंडेबदराणीवनाप्यकर्माधिकरणंकर्मास्तिकर्माभावत्वादकर्मणो । ॥

त्याह । बोद्धव्यमितिचेति । फलवचनपर्यालोचनायामपिकूटस्थंब्रह्माभिप्रेतंप्रतिभातीत्याह । नचेति । सम्यग्ज्ञाना
धीनंफलमत्रनशक्तमित्याशंक्याह । यज्ज्ञात्वेति । अध्यारोपापवादार्थंभगवद्वचनमविरुद्धमित्युपपादितमुपसं
हरति । तस्मादिति । तद्विपर्ययेणेत्यत्रतच्छब्देनप्राणिनोगृह्यंतेविषयसप्तमीपरिग्रहेणपरिहारमभिधायाधिकरणसप्तमी
पक्षेदर्शितंदूषणमनंगीकारेणपरिहरति । नचेति । व्यवहारभूमिरत्रेत्युच्यतेयोग्यत्वेसत्यनुपलब्धिरित्यर्थः । अकर्मा
धिकरणंकर्मनसंभवतीत्यत्रहेत्वंतरमाह । कर्माभावत्वादिति । नहितुच्छस्याधिकरणत्वंक्वचिद्दृष्टमिष्टंवेत्यर्थः

निरूप्यमाणे कर्माकर्मणोरधिकरणाऽधिकर्त्तव्यभावासंभवे फलितमाह अतइति शास्त्रपरिचयविरहिणामध्यारोप्यमुदाहरति यथेति कर्माकर्मणोरारोपितत्वमुक्तममृष्यमाणः शंकते नन्विति कर्मकर्मैवेत्यत्राकर्मैवाकर्मैवेतिद्रष्टव्यं विमतं सत्यं अव्यभिचारित्वाद्ब्रह्मवदित्यर्थः तत्र कर्मतत्वतो नाव्यभिचारि कर्मत्वान्नौस्थस्य तटस्थवृक्षगमनवदित्यव्यभिचारित्वं कर्मण्यसिद्धमिति परिहरति तन्नेति अकर्म च तत्वतो नाव्यभिचारि कर्माभावत्वात् दूरप्रदेशे चैत्रमैत्रादिषु गच्छत्सु एव चक्षुषास

ऽतो विपरीते गृहीते एवं कर्माकर्मणी लोकिके यथा मृगतृष्णिकायामुदकं शुक्तिकायां वा रजतं ॥ ननु कर्मकर्मैव सर्वेषां न क्वचिद्व्यभिचरति तन्न ॥ नौस्थस्य नाविगच्छंत्यां तटस्थेष्वगतिषु नगेषु प्रतिकूलगतिदर्शनात् दूरे च चक्षुषाऽसन्निकृष्टेषु गच्छत्सु गत्यभावदर्शनात् एवमिहाप्यकर्मणि अहं करोमीति कर्मदर्शनं कर्मणि चाकर्मदर्शनं विपरीतदर्शनं तेन तन्निराकरणार्थमुच्यते कर्मण्यकर्म यः पश्येदित्यादि ॥

न्निधानविधुरेषु दृश्यमानगत्यभाववदित्याह दूर इति ॥ दूरत्वादेव विशेषतः सन्निकर्षविरहितेषु स्वरूपेण चक्षुरसन्निकृष्टेषु चक्षुषा गत्यभावदर्शनादिति योजना गतिरहितेषु तरुषु गतिदर्शनवत् प्रकृते ब्रह्मण्यविक्रिये कर्मदर्शनं सक्रिये च द्वैतप्रपंचे गतिमत्सु चैत्रादिषु गत्यभावदर्शनवत्कर्माभावस्य विपरीतस्य दर्शनं येन हेतुना न संभवति तेन तस्य विपरीतदर्शनस्य निरसनार्थं भगवद्वचनमिति दार्ष्टांतिकं निगमयति ॥ एवमित्यादिना ॥ श्रीसीतारामचंद्राय नमः श्रीरामाय नमः ॥ ॥

ननु कर्मतदभावयोरारोपितत्वादविक्रियस्य ब्रह्मणो ज्ञानमत्राभिप्रेतं चेदव्यक्तोयमचिंत्योयमविकार्योयं न जायते वेत्यादिना पौनरुक्त्यं प्राप्तं तत्रैव न ह्यात्मनो निर्विकारस्योक्तत्वादितितत्राह। तदेतदिति। तदेतदात्मनि शंकितं सक्रियत्वमसकृदुक्तप्रतिवचनमपि निर्विकारात्मवस्तुपेक्षयात्यंतं विपरीतदर्शनं मिथ्याज्ञानं तेन भावितत्वं तत्संस्कारप्रचयवत्वं ततोतिशयेन मोहमापद्यमानो लोकः श्रुतमपि तत्वं विस्मृत्य पुनर्यत् किंचित्प्रसंगमापद्य सक्रियत्वमेवात्मनश्चोदयतीति पुनः पुनः त

तदेतदुक्तप्रतिवचनमप्यत्यंतविपरीतदर्शनेन भाविततया मोमुह्यमानो लोकः श्रुतमप्यसकृत्तत्वं विस्मृत्य विस्मृत्य मिथ्याप्रसंगमवतार्यावतार्य चोदयतीति पुनः पुनरुत्तरमाह भगवान् दुर्विज्ञेयत्वं चालक्ष्य वस्तुनः अव्यक्तोयमचिंत्यो॥ यं न जायते म्रियते वेत्यादिनात्मनि कर्माभावः श्रुतिस्मृतिन्यायप्रसिद्ध उक्तो वक्ष्यमा॥ण॥

त्वभूतमुत्तरं भगवानभिधत्ते वस्तुनश्च दुर्विज्ञेयत्वात्तु नः पुनः प्रतिपादनं तत्तद्भ्रमनिराकरणार्थं उपपद्यते तथा च नास्ति पुनरुक्तिरित्यर्थः॥ असकृदुक्तप्रतिवचनमेवानुवदति॥ अव्यक्तोयमिति॥ कर्माभाव उक्त इति संबंधः॥ उक्तस्य न जायते म्रियते वा विपश्चिदित्यादिश्रुतौ प्रकृतस्मृतावसंगत्वादिन्यायेन च प्रसिद्धत्वमस्तीत्याह॥ श्रुतीति॥ न केवलमुक्तः कर्माभावः किंतु सर्वकर्माणि मनसा संन्यस्येत्यादौ वक्ष्यमाणश्चेत्याह॥ वक्ष्यमाणश्चेति॥

ननु कर्मणो देहादिनिर्वर्त्यत्वेन त्रैविध्यात् कूटस्थस्वभावस्यात्मनोऽसंगत्वात्तद्व्यापाररूपस्य कर्मणोऽप्रसिद्धत्वान्न तस्मिन्न कर्मणि विपरीतस्य कर्मणो दर्शनं सिद्ध्यतीत्याशंक्याह । तस्मिन्निति । कर्मैव विपरीतं तस्य दर्शनमिति यावत् । अहं कर्त्तेत्यात्मसमानाधिकरणस्य व्यापारस्यानुभवात् कर्मण्यप्रमस्तावदात्मन्यत्यंतरूढोऽस्तीत्यर्थः । आत्मनि कर्मविभ्रमोऽस्तीत्यत्र हेतुमाह । यत इति । आत्मा यदा निःक्रियस्तदा कुतस्तस्मिन्यथोक्तो विभ्रमः संभवेदित्याशंक्याह । देहेति । इदानीमात्मन्यकर्मविभ्रममुदाहरति । तथेत्या

तस्मिन्नात्मनि कर्माभावेऽकर्मणि कर्मविपरीतदर्शनमत्यंतनिरूढं यतः किं कर्म किमकर्मेति कवयोप्यत्र मोहिताः । देहाद्याश्रयं कर्मात्मन्यध्यारोप्याहं कर्त्ता मम तत्कर्म मयाऽस्य कर्मणः फलं भोक्तव्यमिति ॥ तथाऽहं तूष्णीं भवामि येनाहं निरायासोऽकर्मा सुखी स्यामिति कार्यकरणाश्रयव्यापारोपरमं तत्कृतं च सुखित्वमात्मन्यध्यारोप्य न करोमि किंचित्तूष्णीं सुखमासे इत्यभिमन्यते लोकस्तत्रेदं लोकस्य विपरीतदर्शनापनयनायाऽह भगवान्कर्मण्यकर्म य इत्यादि ॥

प्प

दिना । यथा शुक्तेः स्वाभाविकमरूप्यत्वं रूप्यत्वमारोपितं तदभावोप्यारोप्याभावादारोपपक्ष्यातीत तथाऽऽत्मनोपि स्वाभाविकमविक्रियत्वं सविक्रियत्वं पुनरध्यस्तं तदभावत्वात्कर्माभावोप्यध्यस्त एवेति मन्वानः सन्नुपसंहरति । तत्रेदमिति । आत्मनि कर्मादिविभ्रमे लौकिके सिद्धे सति इदं कर्मणीत्यादि वचनं तत्परिहारार्थं भगवानुक्तवानित्यर्थः ॥ श्रीरामचंद्राय नमः ॥ ॥

संप्रयुक्तेर्थे श्लोकाक्षरसमन्वयं दर्शयितुं कर्मणीत्यादिव्याचिख्यासुर्भूमिकां करोति ॥ अत्र चेति ॥ व्यवहारभूमौ कार्यकरणाधिकरणं कर्मत्वेनैव रूपेण व्यवस्थितं सदात्मन्यविक्रिये कार्यकरणारोपद्वारेण सर्वैरारोपितमित्यत्र हेतुमाह ॥ यत इति ॥ अविवेकिनां तु कर्तृत्वाभिमानः सुतरामिति वक्तुमपिशब्दः ॥ एवमात्मनि कर्मारोपमुपपाद्य प्रथमपादं व्याच

अत्र च कर्म कर्मैव सत्कार्यकरणाश्रयं कर्मरहितेऽविक्रियात्मनि सर्वैरध्यस्तं यतः पंडितोप्यहं करोमीति मन्यते अत आत्मसमवेततया सर्वलोकप्रसिद्धे कर्मणि नदीकूलस्थितेष्विव वृक्षेषु गतिः प्रातिलोम्येनाकर्म कर्माभावं यथाभूतं गत्यभावमिव वृक्षेषु यः पश्येदकर्मणि च कार्यकरणव्यापारोपरमे कर्मवदात्मन्यध्यारोपिते तूष्णीमकुर्वन्सुखमासेऽहमित्यहंकाराभिसंधिहेतुत्वात्तस्मिन्नकर्मणि च कर्म यः प

ष्टे अत इति ॥ आत्मनि कर्मरहिते कर्मारोपदृष्टांतमाह ॥ नदीति ॥ आरोपवशादात्मनिष्ठत्वेन कर्मणि सर्वलोकप्रसिद्धे कर्माभावं यः पश्येत्स बुद्धिमानिति संबंधः ॥ अकर्मदर्शनस्य यथाभूतत्वं सम्यक्त्वं तत्र दृष्टांतमाह ॥ गत्यभावमिवेति ॥ द्वितीयपादं व्याकरोति ॥ अकर्मणि चेति ॥ अध्यारोपमभिनयति ॥ तूष्णीमिति ॥ अकर्मणि कर्मदर्शने युक्तिमाह ॥ अहंकारेति ॥

पूर्वार्द्धेनोक्तमनूद्योत्तरार्द्धं विभजते यएवमिति आत्मनि कार्यकरणसंघातसमारोपद्वारेण तद्व्यापारमात्रे कर्मणि शु
क्तिकायामिव रजतमारोपिते विषये तदभावमकर्मवस्तुतो योरजताभाववदनुभवति अकर्मणि च संघातव्यापारो
परमे तद्द्वारा स्वात्मन्यहं तूष्णीमासे सुखमित्यारोपिते यो चरेकर्माहंकारहेतुकं यस्तत्तो मन्यते सरूप्यतदभावविभागवि

यएवं कर्माकर्मविभागज्ञः स बुद्धिमान्पंडितो मनुष्येषु स युक्तो योगी कृत्स्नकर्मकृच्च असौ
अशुभान्मोक्षितः कृतकृत्यो भवतीत्यर्थः अयं श्लोकोऽन्यथा व्याख्यातः केश्चित् कथं
नित्यानां किल कर्मणामीश्वरार्थेनुष्ठीयमानानां फलाभावादकर्माणि तान्युच्यंते ॥ ॥

हीनशु क्तिमात्रवदात्ममात्रं कर्म तदभावविभागशून्यं कूटस्थं परमार्थतो वगच्छन्बुद्धिमानित्यादिस्तुति योग्य
तां गच्छतीति एवं स्वाभिप्रायेण श्लोकं व्याख्याय वृत्तिकारव्याख्यानमुत्थापयति अयमिति अन्यथा व्याख्यानमेव प्र
श्नद्वारा प्रकटयति कथमित्यादिना ईश्वरार्थेनानुष्ठाने फलाभाववचनं व्याहतमिति मत्वाह किलेति ॥ ॥ ॥

नित्यानामकर्मत्वमसिद्धमित्याशंक्य फलराहित्यगुणयोगात्तेषु कर्मत्वव्यवहारः सिद्ध इतीत्याह । गौण्येति । नित्याना
मकरणं मुख्यवृत्त्यैवाकर्मशब्दवाच्यमित्याह । तेषां चेति । तत्र कर्मशब्दस्य प्रत्यवायाख्यफलहेतुगुणयोगाद्गौण्यैव
वृत्त्या प्रवृत्तिरित्याह । तच्चेति । पातनिकामेवं कृत्वा श्लोकाक्षराणि व्याचष्टे । तत्रेत्यादिना । अकर्मणि चेत्यादि व्याकरो

गौण्या वृत्त्या तेषां चाकरणमकर्म तच्च प्रत्यवायफलत्वात्कर्मोच्यते गौण्यैव वृत्त्या तत्र नित्ये कर्म
ण्यकर्मेयः पश्येत्फलाभावात् यथा धेनुरपि गौरगौरुच्यते क्षीराख्यं फलं न प्रयच्छतीति तद्वत्तथा नित्या
करणे त्वकर्मणि कर्मयः पश्येन्नरकादिप्रत्यवायफलं प्रयच्छतीति नैतद्युक्तं व्याख्यानमेवं ज्ञानाद
शुभान्मोक्षस्यानुपपत्तेः यत्ज्ञात्वा मोक्ष्यसेऽशुभादिति भगवतोक्तं बाध्येत ॥ श्रीरामायनमः ॥

ति ॥ तथेति ॥ स बुद्धिमानित्यादि पूर्ववत्परकीयं व्याख्यानं दूषयति ॥ नैतदिति ॥ नित्यकर्माकर्मनित्याकरणं कर्मे
तिज्ञानात्दुरितनिवृत्त्यनुपपत्तेर्भगवद्वचनं वृत्तिकारमते बाधितं स्यादित्यर्थः ॥ श्रीरामचंद्रायनमः ॥ ॥

धर्मेणपापमपनुदतीतिश्रुतेर्नित्यानुष्ठानात्दुरितनिबर्हणप्रसिद्धेस्तदनुष्ठानस्यफलांतराभावात्तदकर्मेतिज्ञात्वानित्यानुष्ठा
नेक्रियमाणेकथमशुभक्षयोनेतिशंकते कथमिति क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमामतेति "स्मरणात्कर्मपाशेभ्य इति
काशुभक्षयाभावेप्यंगीकृत्यपरिहरति नित्यानामिति नित्यानुष्ठानादशुभक्षयेपिनास्मिन्प्रकरणेतद्विवक्षितं य
तज्ज्ञात्वामोक्ष्यसेऽशुभादितिज्ञानादशुभक्षयस्यप्रतिज्ञातत्वान्नचतज्ज्ञानंफलाभावविषयमेष्टितव्यमित्याह नति

कथंनित्यानामनुष्ठानादशुभात्स्यान्नाममोक्षणं नतुतेषांफलाभावज्ञानान्नहि नित्यानां
फलाभावज्ञानमशुभमुक्तिफलत्वेनचोदितंनित्यकर्मज्ञानंवानचभगवतैवेहोक्तं ॥

ति अशुभस्यफलाऽभावाऽज्ञानकार्यत्वाभावान्नफलाभावज्ञानात्क्षयः सिद्ध्यतीत्यर्थः किंचातींद्रियोर्थःशा
स्त्राधिगम्यतेनचनित्यकर्मणांफलाभावज्ञानादशुभनिवृत्तिरित्यत्रशास्त्रमस्तीत्याह नहीति नित्याकरणंक
र्मेतिज्ञानमपिनाशुभनिवृत्तिफलत्वेनचोदितमस्तीत्याह नित्यकर्मेति भगवद्वचनमेवात्रप्रमाणमित्याशं
क्याह नचेति साधारणमेवयज्ज्ञात्वेत्यादिभगवतोवचनंनतुनित्यानांफलाभावंज्ञात्वेतिविशेषविषयमित्यर्थः

अशुभमोक्षणासंभवप्रदर्शनेन कर्मण्यकर्मदर्शननिराकरणन्यायेनाकर्मणि कर्मदर्शनं निराकरोति ॥ एतेनेति ॥ नामादिषु फलाय ब्रह्मदृष्टिवदकर्मण्यपि फलार्थे कर्मदृष्टिविधानान्नाशुभमोक्षणानुपपत्तिरित्याशंक्याह ॥ नहीति ॥ अत्र हि श्लोके नित्यस्य कर्त्तव्यतामात्रं परमते विवक्षितमतश्चाकर्मणि कर्मदर्शनं विधीयते फलायेति ॥ कल्पनापरस्य सिद्धांतविरुद्धेत्याह ॥ नित्यस्यत्विति ॥ परमतेपि नित्यस्य कर्तव्यतामात्रमत्र श्लोकेन विवक्षितं किंतु नित्यानुष्ठाने प्रवृत्तिसिद्ध्यर्थे नित्याकरणा

एतेनाकर्मणि कर्मदर्शनं प्रत्युक्तं नह्यकर्मणि कर्मेति दर्शनं कर्तव्यतयेह चोद्यते नित्यस्य तु कर्त्तव्यतामात्रं नचा करणान्नित्यस्य प्रत्यवायो भवतीति विज्ञानात्किंचिद्धि ज्ञातुः फलं स्यान्नापि नित्याकरणं ज्ञेयत्वेन चोदितं ॥

त्प्रत्यवायो भवतीति ज्ञानमपि कर्त्तव्यत्वेनात्र विवक्षितमित्याशंक्याह ॥ नचेति ॥ न तावत्प्रवृत्तिरस्य विज्ञानस्य फलं नियोगादेव तदुपपत्तेर्नापि फलांतरमनुपलंभादतोऽफलत्वादकरणात्प्रत्यवायो भवतीति ज्ञानं नात्र कर्त्तव्यत्वेन विवक्षितमित्यर्थः ॥ किंचाकरणे कर्मदृष्टिविधावैरणस्यालंबनत्वेन प्रधानत्वाद्ध्येयत्वं वक्तव्यं तच्च तुच्छत्वादनुपपन्नमि

= विधिवाक्यादेव नित्यानुष्ठाने प्रवृत्त्युपपत्तेः = २   कं   ज्ञेयत्वं च १

=दुःखस्यापि रजतदृष्टांतेन ज्ञेयत्वोपपत्तिद्वारा ज्ञानं भविष्यतीति भावः ॥

अकरणस्यासतो नामादिवदाश्रयत्वेन दर्शनासंभवेपि सामानाधिकरण्येनेदं रजतमितिवद्दर्शनं भविष्यतीत्याशंक्याह ना
पिकर्मेति आदिशब्देन सर्वोत्कर्षो दिगृह्यते फलवत्वं स्तुतिर्वा सम्यग्ज्ञानस्य युक्तं न मिथ्याज्ञानस्यानुपलब्धेरित्यर्थः स्वप्ने मिथ्याज्ञा
नमपि फलवदुपलब्धमित्याशंक्य मिथ्याज्ञानस्याशुभाऽविरोधित्वान्न तस्मात्तन्निवृत्तिरित्याह मिथ्याज्ञानमेवेति नत्वशुभादेवा
शुभनिवृत्तिरित्यत्र दृष्टांतमाह नहीति अविवेकपूर्वकमिदं रजतमिति सदसतोः सामानाधिकरण्यान्मिथ्याज्ञानं युक्तं कर्माक
र्मणोस्तु विवेकेन भासतोः सामानाधिकरण्याधीनं ज्ञानं सिंहदेवदत्तयोरिव गौणं न मिथ्याज्ञानमिति शंकते नन्विति कर्माक

॥ नापि कर्माकर्मेति मिथ्यादर्शनादशुभान्मोक्षणं न बुद्धिमत्त्वं युक्तता कृत्स्नकर्मकृदित्यादि च फलमुपपद्यते स्तुति
र्वा मिथ्याज्ञानमेव हि साक्षादशुभस्वरूपं कुतोऽन्यस्मादशुभान्मोक्षणं नहि तमस्तमसो निवर्त्तकं भवति ननु क
र्मणि यदकर्मदर्शनमकर्मणि च कर्मदर्शनं न तन्मिथ्याज्ञानं किं तर्हि गौणं फलभावाभावनिमित्तं न कर्माकर्मविज्ञा
नादपि गौणात्फलस्याश्रवणान्नापि श्रुतहान्यश्रुतपरिकल्पनया कश्चिद्विशेषो लभ्यते ॥ श्रीरामाय नमः ॥

त

र्मेति दर्शने फलाभावो गुणः अकर्मकर्मेति दर्शने तु फलभावो गुणः तन्निमित्तमिदं ज्ञानं गौणमित्याह फलेति यथोक्त
ज्ञानस्य गौणत्वेपि प्रामाणिकफलाभावान्न तद्गौणतोचितेति दूषयति नेत्यादिना कर्माकर्मेत्यादि गौणविज्ञानोपन्यास
व्याजेन नित्यकर्मकर्त्तव्यतया विवक्षितत्वाद्गौणज्ञानस्याफलत्वमदूषणमित्याशंक्याह नापीति ज्ञानादशुभमोक्षण
स्य श्रुतस्य हानिरश्रुतस्य नित्यानुष्ठानस्य कल्पनेत्यनेन व्यापारगौरवेण न कश्चिद्विशेषः सिद्ध्यतीत्यर्थः ॥ ॥

गी॰ भा॰ ॥
॥ २२३ ॥

उक्तमेवप्रपंचयति। स्वशब्देनेति। नरकपातः स्यादतो विधेरेवानुष्ठेयानि तानीति शेषः। यथोक्तवाचककर्मशब्दप्रयोगा
देवापेक्षितार्थसिद्धिसंभवे भगवतो व्याजवचनकल्पनमनुचितमित्याह। तत्रेति। प्रकृते श्लोके वृत्तिकृतां व्याख्याने
न परमात्मस्यैव भगवतो विप्रलंभकत्वमापादितमिति तदीयं व्याख्यानमुपेक्षितव्यमिति फलितमाह। तत्रैवमिति। नित्यकर्मा
नुष्ठानसिद्ध्यर्थं व्याजरूपमपि भगवतो वचनमुचितमित्याशंक्य स्वशब्देनापीत्यादिना गुरुक्तपरिपाट्यापि तदनुष्ठानबोध

स्वशब्देनापि वक्तुं शक्यं नित्यकर्मणां फलं नास्त्यकरणाच्च तेषां नरकपातः स्यादिति। तत्र व्याजेन परव्यामोहरूपे
ण कर्मण्यकर्म यः पश्येदित्यादिना किं तत्रैवं व्याचक्षाणेन भगवतो वाक्यं लोकव्यामोहार्थमिति व्यक्तं कल्पितं स्यात्। न चैत
त् छद्मरूपेण वाक्येन रक्षणीयं वस्तुनापि शब्दांतरेण पुनः पुनरुच्यमानं वस्तु सुबोधं स्यादित्येवं वक्तुं युक्तं॥

न संभवान्नैवमित्याह। न चैतदिति। वस्तुशब्देन नित्यकर्मानुष्ठानमुच्यते यथा तत्प्रतिपादनं सुबोधत्वसिध्यर्थं पौनःपु
न्येन क्रियते तथा नित्यानामपि कर्मणामनुष्ठानं कर्मण्यकर्मेत्यादिशब्दांतरेणोच्यमानं सुबोधं स्यादिति भगवतः श
ब्दांतरं युक्तमित्याशंक्य तस्य नित्यानुष्ठानवाचकत्वाभावान्नैवमित्याह। नापीति॥

॥ आ॰ गी॰ ॥
॥ ५ ॥

॥ शिव ॥
॥ २२३ ॥

किंच पूर्वमेव नित्यानुष्ठानस्य स्पष्टमुपदिष्टत्वान्न तस्य सुबोधत्वार्थं शब्दांतरमपेक्षितमित्याह कर्मण्येवेति कर्माकर्मादि
विज्ञान व्याजेन नित्यकर्मानुष्ठानकर्त्तव्यतायां तात्पर्यमित्येतन्निराकृत्य कर्माकर्मादिदर्शनं गौणमिति पक्षे दूषणांतरमाह
सर्वत्रचेति लोके वेदे च यत्प्रशस्तं देवतादि तत्तं यच्च कर्त्तव्यमनुष्ठानार्हं अग्निहोत्रादि तदेव बोधव्यमित्युच्यते न निःफ
लं काकदंतादि कर्मण्यकर्मदर्शनमकर्मणि च कर्मदर्शनं गौणत्वादेवाप्रशस्तमकर्त्तव्यं च नातस्तत्तद्बोद्धव्यमिति वचन

कर्मण्येवाधिकारस्त इत्यत्र स्फुटतरमुक्तोऽर्थो न पुनर्वक्तव्यो भवति सर्वत्र च प्रशस्तं बोधव्यं च कर्त्तव्यमेव
न निःप्रयोजनं बोधव्यमित्युच्यते न च मिथ्याज्ञानं बोधव्यं भवति तत्प्रत्युपस्थापितं वावस्त्वाभासं नापि नि
त्यानामकरणादभावाद्भावरूपः प्रत्यवायोत्पत्तिर्नासतो विद्यते भाव इति कथमसतः सज्जायेतेति च अ
सतः सज्जन्मप्रतिषेधादसतः सदुत्पत्तिं ब्रुवता असदेव सत्सच्चाप्यसद्भवेदित्युक्तं स्यात् श्रीरामायनमः

महतीत्यर्थः किंच कर्मादेर्मायामात्रत्वाद्गौणमपि तद्विषयं ज्ञानं मिथ्याज्ञानमिति न तस्य बोधव्यत्वसिद्धिरित्याह नचेति
मिथ्याज्ञानस्य बोध्यत्वाभावे पि तद्विषयस्य बोधव्यतासिद्धेरित्याशंक्य वस्त्वाभासत्वान्नैवमित्याह तत्प्रत्युपस्था
पितं वेति यत्तु नरकणस्य प्रत्यवायहेतुत्वं अकरणे गौण्या वृत्त्या कर्मेशब्दप्रयोगो निमित्तमिति दूषयति नापीति
अकरणात्प्रत्यवायो भवतीत्यत्र श्रुतिस्मृतिविरोधमभिधाय युक्तिविरोधमभिदधाति असत इति ॥ ॥

असतः सद्रूपेण भवनमभवनं च निःस्वरूपत्वादनुपपन्नं निरस्तसमस्ततत्त्वस्य किंचित्तत्त्वाभ्युपगमे सर्वप्रमाणानामप्रा
माण्यप्रसंगादित्याह तच्चेति यत्तु नित्यानां फलराहित्यं तच्चाकर्मशब्दप्रयोगनिमित्तमिति तन्निरस्यति न चेति न केवलं
विध्युद्देश्यफलाभावान्नित्यानां विध्यनुपपत्तिरपि तु धात्वर्थस्य क्लेशात्मकत्वात्तत्र श्रुतिफलभावेनैव विधिरवकाशमा
सादयेदित्याह दुःखेति दुःखरूपस्यापि धात्वर्थस्य साध्यत्वेन कार्यत्वात्तद्विषयो विधिः स्यादिति चेन्नेत्याह दुःखस्य चे

तच्चायुक्तं सर्वप्रमाणाविरोधान्न च निःफलं विदध्यात्कर्मशास्त्रं दुःखस्वरूपत्वात् दुःखस्य च बुद्धिपूर्व
कतया कार्यत्वानुपपत्तेः तदकरणे च नरकपाताभ्युपगमेऽनर्थायैवोभयथापि करणेऽकरणे च
शास्त्रं प्रकल्पितं स्यात् तथाभ्युपगमविरोधश्च नित्यं निःफलं कर्मेत्युपगम्य मोक्षफलायेति ब्रुवतः
तस्माद्यथाश्रुत एवार्थः कर्मण्यकर्म यः इत्यादौ तथा च व्याख्यातोऽस्माभिः श्लोकः १८ ॥

ति स्वर्गादिफलाभावेपि नित्यानामकरणनिमित्तनिरयनिरासार्थं दुःखरूपाणामपि स्यादनुष्ठेयत्वमित्याशंक्याह तद
करणे चेति फलांतराभावेपि मोक्षसाधनत्वान्मुमुक्षुणा नित्यानि कर्माण्यनुष्ठेयानीत्याशंक्याह स्वाभ्युपगमेति इति
काख्याख्यानासंभवे फलितमुपसंहरति तस्मादिति कोसौ यथाश्रुतोर्थः श्लोकस्येत्याशंक्याह तथा चेति १८

कर्मण्यकर्मदर्शनं पूर्वोक्तं स्तोतुमुत्तरश्लोकं प्रस्तौति तदेतदिति । यथोक्तदर्शित्वं पूर्वोक्तसम्यग्दर्शनसंपन्नत्वं समारं
भस्य कर्मविषयत्वं न रूढ्या किंतु व्युत्पत्त्या इत्याह समारभ्यंत इति कामसंकल्पवर्जितत्वे कथं कर्मणामनुष्ठान
मित्याशंक्याह मुधैवेति उद्देश्यफलाभावात्तेषामनुष्ठानं यादृच्छिकं स्यादित्याशंक्य प्रवृत्तेन निवृत्तेन वा तेषा

तदेतत्कर्मण्यकर्मादिदर्शनं स्तूयते यस्य यथोक्तदर्शिनः सर्वे यावंतः समारंभाः सर्वाणि कर्माणि समारभ्यंत इ
ति समारंभाः कामसंकल्पवर्जिताः कामैस्तत्कारणैश्च संकल्पैर्वर्जिताः मुधैव चेष्टामात्रा अनुष्ठीयंते प्रवृत्तेन चे

यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ॥ ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः ॥ १९ ॥

त्लोकसंग्रहार्थं निवृत्तेन चेत् जीवनमात्रार्थं तं ज्ञानाग्निदग्धकर्माणं कर्मादावकर्मादिदर्शनं ज्ञानं तदेवाग्निः तेन
ज्ञानाग्निना दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य तमाहुः परमार्थतः ॥ पंडितं बुधा ब्रह्मविदः ॥ १९ ॥

ष्ठान   मनुमिति विकल्पक्रमेण निरस्यति प्रवृत्तेनेत्यादिना ज्ञानाग्नीत्यादि विभजते कर्मादाविति यथोक्तं ज्ञानं योग्यमेव द
हति नायोग्यमिति विवक्षितत्वात्तस्मिन्नग्निपदं यथोक्तविज्ञानविरहिणामपि वैशेषिकादीनां पंडितत्वप्रसिद्धि
स   माशंक्य तेषां पंडिताभावं विवक्षितत्वात्तं विशिनष्टि परमार्थत इति ॥ १९ ॥ श्रीसीतारामचंद्राय नमो नमः ॥ ॥

विवेकात्पूर्वं कर्मणि प्रवृत्तावपि सति विवेके तत्र न प्रवृत्तिरित्याशंक्यांगीकरोति यस्त्विति ॥ विवेकात्पूर्वमभिनिवेशेन प्रवृत्तस्य
विवेकानंतरमभिनिवेशाभावात्प्रवृत्त्यसंभवेपि जीवनमात्रमुद्दिश्य प्रवृत्त्याभासः संभवतीत्यर्थः ॥ सत्यपि विवेके तत्त्वसा
क्षात्कारानुदयात्कर्मणि प्रवृत्तस्य कथं तत्त्यागः स्यादित्याशंक्याह यस्त्वप्रारब्धेति ॥ त्यक्त्वेत्यादिसमनंतरश्लोकमवता
रयितुं भूमिकां कृत्वा तदवतारणप्रकारं दर्शयति सकृत्तश्चिदिति ॥ लोकसंग्रहादिनिमित्तं विवक्षितं कर्मपरित्यागासंभ

यस्त्वकर्मादिदर्शी सोऽकर्मादिदर्शनादेव निःकर्मा संन्यासी जीवनमात्रार्थचेष्टः सन्कर्मणि न प्रवर्तते
यद्यपि प्राग्विवेकतः प्रवृत्तः यस्त्वप्रारब्धकर्मा सन्नुत्तरकालसमुत्पन्नात्मसम्यग्दर्शनः स्यात्कर्मणि प्रयोज
नमपश्यन्ससाधनं कर्म परित्यजत्येव सकृत्तश्चिन्निमित्तात्कर्मपरित्यागासंभवे सति कर्मणि तत्फले च सं
गरहिततया स्वप्रयोजनाभावाल्लोकसंग्रहार्थं पूर्ववत्कर्मणि प्रवृत्तोपि नैव किंचित्करोति ॥ ज्ञानाग्नि
दग्धकर्मत्वात्तदीयं कर्माकर्मैव संपद्यत इत्येतमर्थं दर्शयिष्यन्नाह ॥ श्रीरामचंद्राय नमो नमः ॥

वे सति तस्मिन्प्रवृत्तोपि नैव करोति किंचिदिति संबंधः कर्मणि प्रवृत्तो न करोति कर्मेति कथमुच्यते तत्राह स्वप्रयोज
नाभावादिति कथं तर्हि कर्मणि प्रवर्त्तते तत्राह लोकेति प्रवृत्तेरर्थक्रियाकारित्वात्पूर्वं पश्वादिभिश्चाविशेषादिति न्या
येन व्यावर्त्तयति पूर्ववदिति कथं तर्हि विवेकिनामविवेकिनां च विशेषः स्यादित्याशंक्य कर्मादौ संगासंगाभ्यामित्या
ह कर्मणीति उक्तेर्थे समनंतरश्लोकमवतारयति ज्ञानाग्नीति एतमर्थं दर्शयिष्यन्निमं श्लोकमाहेति योजना ॥

यथोक्तं ज्ञानं कूटस्थात्मदर्शनं तेन स्वरूपभूतं सुखं साक्षादनुभूय कर्मणि तत्फले च संगमपास्य विषयेषु निरपेक्षो वतिष्टते वि
द्वानित्याह त्यक्त्वेत्यादिना इष्टसाधनसापेक्षस्य कुतो निरपेक्षत्वमित्याशंक्य विशिनष्टि निराश्रय इति यदाश्रित्येति यच्छब्दे
न फलसाधनमुच्यते आश्रयरहित इत्यस्यार्थं स्पष्टयति दृष्टेति तेन ज्ञानवता पुरुषेणैवं भूतेन त्यक्त्वा कर्मफलासंगमि

त्यक्त्वा कर्मस्वभिमानं फलासंगं च यथोक्तेन ज्ञानेन नित्यतृप्तो निराकांक्षो विषयेष्वित्यर्थः निराश्रय आश्रयरहि
त आश्रयो नाम यदाश्रित्य पुरुषार्थं सिसाधयिषति दृष्टादृष्टेष्टफलसाधनाश्रयरहित इत्यर्थः तेनैवं भूतेनात्र

त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः २० ॥

योजनासंभवात्ससाधनं कर्म त्यक्तव्यमेवेति प्राप्ते ततो निर्गमासंभवाल्लोकसंग्रहचिकीर्षया शिष्टविगर्हणा
परिजिहीर्षया वा पूर्ववत्कर्मण्यभिप्रवृत्तोऽपि निःक्रियात्मदर्शनसंपन्नत्वान्नैव किंचित्करोति सः २० ॥

त्यादिना विशेषितेनेत्यर्थः ततः ससाधनात्कर्मणः सकाशादिति यावत् निर्गमाऽसंभवे हेतुमाह लोकेत्यादिना पूर्ववत्
ज्ञानोदयात्प्रागवस्थायामिवेत्यर्थः अभिप्रवृत्तोऽपि लोकदृष्ट्येति शेषः नैव करोति किंचिदिति स्वदृष्ट्येति द्रष्टव्यं २०

सत्यपिविक्षेपकेकर्मणिकूटस्थात्मानुसंधानस्यसिद्धेःकैवल्यहेतुत्वेतदभावेसुतरांतस्यतद्धेतुत्वसिद्धिरित्यभिप्रेत्याह यःपु नरितिपूर्वोक्तविपरीतत्वंलोकसंग्रहादिनिरपेक्षत्वंतदेववैपरीत्यंस्फोरयति प्रागेवेति समाधनसर्वकर्मसंन्यासेशरीरस्थितिरपिक थमित्याशंक्याह शरीरेति तर्हितथाविधचेष्टानिविष्टस्यतत्तयासम्यग्ज्ञानवहिर्मुखस्यकुतोमुक्तिरित्याशंक्ययथोपदिष्ट

यःपुनःपूर्वोक्तविपरीतःप्रागेवकर्मारंभाद्ब्रह्मणिसर्वात्मकेप्रत्यगात्मनिनिःक्रियेसंजातात्मदर्श नःसदृष्टादृष्टेष्टविषयाशाविवर्जिततयादृष्टादृष्टार्थेकर्मणिप्रयोजनमपश्यन्ससाधनंकर्मसंन्यस्यशरीर यात्रामात्रचेष्टेयतिर्ज्ञाननिष्ठोमुच्यतइत्येतमर्थंदर्शयितुमाह निराशीःनिर्गताआशिषोयस्मात्स

निराशीर्यतचित्तात्मात्यक्तसर्वपरिग्रहः

निराशीर्यतचित्तात्माचित्तमंतःकरणंआत्माबाह्यःकार्यकरणसंघातस्तावुभौअपियतौसंयतौयेनसय तचित्तात्मात्यक्तसर्वपरिग्रहःत्यक्तःसर्वपरिग्रहोयेनसत्यक्तसर्वपरिग्रहः ॥ श्रीरामायनमः॥ ॥

चेष्टायामनादरान्नैवमित्याह ज्ञाननिष्ठइति दर्शयितुमिमंश्लोकमाहेतिपूर्ववदाशिषःप्रार्थनाभेदास्तृष्णाविशेषाःआशि षांविदुषोनिर्गतत्वेहेतुमाह यतेति चित्तवदात्मनःसंयमनंकथमित्याशंक्याह आत्माबाह्यइति द्वयोःसंयमनेसतिसिद्ध

सर्वपरिग्रहपरित्यागे देहस्थितिरपि दुःस्यात् स्यादित्याशंक्याह । शारीरमिति । मात्रशब्देन पौनरुक्त्यादनर्थकं केवलपदमित्याशंक्या
ह । तत्रापीति । शारीरं केवलमित्यादौ शारीरपदार्थं स्फुटीकर्तुमुभयथा संभावनया विकल्पयति । शारीरमिति । शरीरनिर्वर्त्यं शारी
रमित्यस्मिन्पक्षे किं दूषणं शरीरस्थितिमात्रमित्यस्मिन्वा पक्षे किं फलमिति पूर्ववादी पृच्छति । किंचातइति । शरीरनिर्वर्त्यं शारीर

शारीरं शरीरस्थितिमात्रप्रयोजनं केवलं तत्राप्यभिमानवर्जितं कुर्वन्नाप्नोति किल्बिषमनिष्टरूपं पापं धर्मं
च धर्मोपि मुमुक्षोरनिष्टरूपत्वात्किल्बिषमेव । शारीरं केवलं कर्मेत्यत्र किं शारीरनिर्वर्त्यं शारीरं कर्माभिप्रेतं आ
हो स्वित् शरीरस्थितिमात्रप्रयोजनं शारीरं कर्मेति । किंचातो यदि शारीरनिर्वर्त्यं शारीरं कर्म यदि वा शारीर

शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषं ॥ २१ ॥

स्थितिमात्रप्रयोजनं शारीरमित्युच्यते । यदा शरीरनिर्वर्त्यं कर्म शारीरमभिप्रेतं स्यात्तदा दृष्टादृष्टप्रयो
जनं कर्म प्रतिषिद्धं अपि शरीरेण कुर्वन्नाप्नोति किल्बिषमिति ब्रुवतो विरुद्धाभिधानं प्रसज्येत ॥ ॥

मित्यस्मिन्पक्षे सिद्धांती दूषणमाह । उच्यतइति । शरीरेणायन्निर्वर्त्यं तत्किं प्रतिषिद्धं विहितं वा प्रथमे विरोधः स्यादि
त्याह । यदेति । प्रतिषिद्धाचरणेपि नानिष्टप्राप्तिरित्युक्ते प्रतिषेधविरोधः स्यादित्यर्थः । श्रीरामायनमः ॥ ॥ ॥

द्वितीये विहिताकरणे सत्यनिष्टप्राप्त्यभावादप्राप्तप्रतिषेधः स्यादित्याह शास्त्रीयं चेति दृष्टप्रयोजनं शारीरं कारीयादिकर्म
अदृष्टप्रयोजनं स्वर्गसाधनं ज्योतिष्टोमादिकं कर्मेति विभागः शरीरनिर्वर्त्यं कर्म शारीरमभिमतमिति पक्षे दूषणांतरमाह

शास्त्रीयं च कर्मादृष्टादृष्टप्रयोजनं शरीरेण कुर्वन्नाप्नोति किल्बिषमित्यपि ब्रुवतोऽप्राप्तप्रतिषेधप्रसंगः
शारीरं कर्म कुर्वन्निति विशेषणात् केवलशब्दप्रयोगाच्च वाङ्मनसनिर्वर्त्यं कर्म विधिप्रतिषेधविषयं ध
र्माधर्मशब्दवाच्यं कुर्वन्नाप्नोति किल्बिषमित्युक्तं स्यात्तत्रापि वाङ्मनोभ्यां विहितानुष्ठानपक्षे किल्बि
षप्राप्तिवचनं विरुद्धमापद्येत प्रतिषिद्धसेवापक्षेऽपि भूतार्थानुवादमात्रमनर्थकं स्यात् ॥ ॥ ॥

पक्षेप्रतिषिद्धेति

शारीरमिति वाचा मनसा वा कर्मणोऽनुष्ठाने संन्यासिनोऽपवत्सेव किल्बिषप्राप्तिरित्याशंक्याह तत्रापीति वाङ्मनोभ्यां विहितानु
ष्ठाने वा प्रतिषिद्धकरणे वा किल्बिषप्राप्तिः संन्यासिनः स्यादिति विकल्प्याद्ये जपध्यानविधिविरोधः स्यादित्युक्त्वा द्वितीयं दू

शरीरनिर्वर्त्यंकर्मशारीरमितिपक्षमेवंप्रतिक्षिप्यद्वितीयपक्षेलाभंदर्शयति यदात्विति अन्यद्देहस्थितिप्रयोजनात्कर्मणःस
काशादितिशेषः तत्रापिविदुषःस्वदृष्ट्यानप्रवृत्तिरितिसूचयति लोकेति विद्वानुक्तरीत्यावर्त्तमानोनाप्नोतिकिल्बिषमित्यत्र

यदातुशरीरस्थितिमात्रप्रयोजनंशारीरंकर्माभिप्रेतंभवेत्तदादृष्टादृष्टप्रयोजनंकर्मविधिप्रतिषेधशास्त्रगम्यंश
रीरवाङ्मनोनिर्वर्त्यमन्यदकुर्वंस्तैरेवशरीरादिभिःशरीरस्थितिमात्रप्रयोजनंकेवलशब्दप्रयोगादहंकरोमीत्य
भिमानवर्जितःशरीरादिचेष्टामात्रंलोकदृष्ट्याकुर्वन्नाप्नोतिकिल्बिषंएवंभूतस्यपापशब्दवाच्यस्यकिल्बिष
स्याप्राप्त्यसंभवात्किल्बिषंसंसारंनाप्नोतिज्ञानाग्निदग्धसर्वकर्मत्वादप्रतिबंधेनमुच्यतएवेतिपूर्वोक्तसम्य
ग्दर्शनफलानुवादएवैषः एवंशारीरंकेवलंकर्मेत्यस्यार्थस्यपरिग्रहेनिरवद्यंभवति ॥ २१ ॥ ॥

विवक्षितमर्थमाह। एवंभूतस्येति विधिनिषेधगम्यंकर्मदेहस्थितिहेतुव्यतिरिक्तमकुर्वत इत्यर्थः शारीरंकेवलंकर्म
कुर्वन्नाप्नोतिकिल्बिषमित्यस्योक्तेनप्रकारेणपरिग्रहेशारीरंकेवलमितिविशेषणद्वयंनिर्दोषंसिद्ध्यतीतिफलितमाह

पूर्वश्लोकेनसंगतिंदर्शयन्नुत्तरश्लोकमुत्थापयति त्यक्तेति अन्नादिरित्यादिशब्देनपानाच्छादनादिगृह्यतेयाचनादिनेत्या
दिपदेनसेवाकृष्याद्युपादीयतेभिक्षाटनार्थमुद्योगात्प्राक्कालेकेनापियोग्येननिवेदितंभैक्षमयाचितमभिशस्तपतितंचवर्ज
यित्वासंकल्पमंतरेणपंचभ्यःसप्तभ्योवागृहेभ्यःसमानीतंभैक्षमसंक्लृप्तंसिद्धमन्नंभक्तजनैःस्वसमीपमुपनीतमुप

॥ त्यक्तसर्वपरिग्रहस्ययतेरन्नादेःशरीरस्थितिहेतोःपरिग्रहस्याभावाद्याचनादिनाशरीरस्थितिकर्त्तव्यता
यांप्राप्तायामयाचितमसंक्लृप्तमुपपन्नंयदृच्छयेत्यादिनावचनेनानुज्ञातंयतेःशरीरस्थितिहेतोरन्नादेः

यदृच्छालाभसंतुष्टोद्वंद्वातीतोविमत्सरः॥

प्राप्तेर्द्वारमाविःकुर्वन्नाह यदृच्छालाभसंतुष्टःअप्रार्थितोपनतोलाभोयदृच्छालाभःतेनसंतुष्टःसंजातालं
प्रत्ययोद्वंद्वातीतोद्वंद्वैःशीतोष्णादिभिरभिहन्यमानोप्यविषण्णचित्तोद्वंद्वातीतउच्यतेविमत्सरोनिर्वैरबु

पन्नंयदृच्छयास्वकीयप्रयत्नव्यतिरेकेणेतियावत् आदिशब्देनमाधुकरमसंक्लृप्तंप्राक्प्रणीतमयाचितंतात्कालिकोपपन्नं
चभैक्ष्यंपंचविधंस्मृतमित्यादिगृह्यते आविःकुर्वन्निदंवाक्यमाहेतियोजनीयं परोत्कर्षामर्षपूर्विकास्वस्योत्कर्षवांछा
विगतायस्मादितिव्युत्पत्तिमाश्रित्यविवक्षितमर्थमाह निर्वैरेति॥

संक्षेपतो दर्शितमर्थं विशदयति। एवंभूत इति तथापि प्रकृतस्य यतेर्भिक्षाटनादौ कर्तृत्वं प्रतिभाति तदभावे भिक्षाटनाद्यभावे च जीवनाभावप्रसंगादित्याशंक्याह लोकेति लौकिकैरविवेकिभिः सह व्यवहारस्य स्नानाचमनभोजनादिलक्षणस्य विदुष्यपि सामान्येन दर्शनात्तदनुसारेण लौकिकैरध्यारोपितकर्तृत्वभाक्त्वाद्विद्वानपि लोकदृष्ट्या भिक्षाटनादौ कर्तृत्वमनुभवतीत्यर्थः। कथं तर्हि तस्याकर्तृत्वं तत्राह

समस्तु त्यो यदृच्छालाभस्यापि सिद्धावसिद्धौ च। एवंभूतो यतिरन्नादेः शरीरस्थितिमात्रहेतोः लाभालाभयोः समो हर्षविषादवर्जितः कर्मादावकर्मादिदर्शी यथाभूतात्मदर्शननिष्ठः शरीरस्थितिमात्रप्रयोजने भिक्षाटनादौ कर्मणि शरीरादिनिर्वर्त्येनैव किंचित्करोम्यहं गुणा गुणेषु वर्तंत इत्येवं सदा परिसंचक्षाण आत्मनः कर्तृत्वाभावं पश्यन्नैव किंचिद्भिक्षाटनादिकं कर्म

समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥२२॥

करोति लोकव्यवहारसामान्यदर्शनेन तु लौकिकैरारोपितकर्तृत्वे भिक्षाटनादौ कर्मणि कर्ता भवति। स्वानुभवेन तु शास्त्रप्रमाणजनितेनाकर्तैव स एवं पराध्यारोपितकर्तृत्वं शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिकं कर्म कृत्वापि न निबध्यते बंधहेतोः कर्मणः सहेतुकस्य ज्ञानाग्निना दग्धत्वादित्युक्तानुवाद एवैषः ॥२२॥ श्रीसीतारामचंद्राय नमो नमः ॥ ॥

स्वानुभवेनेति। यदृच्छेत्यादिपादत्रयं व्याख्याय कृत्वापीत्यादिचतुर्थपादं व्याचष्टे स एवमिति। भिक्षाटनादिना प्रातिभासिकेन कर्मणा विदुषो बंधत्वाभावेपि कर्मांतरेण निबद्धत्वं भविष्यतीत्याशंक्याह बंधेति ज्ञानाग्निदग्धत्वादित्येवं शरीरं केवलमित्यादावुक्तस्यायमनुवाद इति योजना यथोक्तस्य कर्मणो युक्त्या सहाविरोधाभ्युपगमसूचनार्थोपि शब्दः ॥२२॥ श्रीरामाय नमः ॥

गतसंगस्येत्यादिश्लोकस्याव्यवहितेनसंबंधंवक्तुंवृत्तांकीर्त्तयति॥त्यक्त्वेति॥अनेनश्लोकेननैवकिंचित्करोतिसइत्युक्तक
र्माभावःप्रदृश्यतइतिसंबंधःकस्मकर्माभावप्रदर्शनमित्याशंकायांआह॥यःप्रारब्धेति॥प्रारब्धकर्मासन्योऽवतिष्टते
तस्यकर्माभावःप्रदर्शितश्चेद्विरोधःस्यादित्याशंक्याऽवस्थाविशेषेतत्प्रदर्शनान्नैवमित्याह॥यदेति॥ननुज्ञानवतःक्रि

त्यक्त्वाकर्मफलासंगमित्यनेनश्लोकेनयःप्रारब्धकर्मासन्यदानिःक्रियब्रह्मात्मदर्शनसंपन्नःस्यात्तदातस्यात्मनःकर्तृ
कर्मप्रयोजनाभावदर्शिनःकर्मपरित्यागेप्राप्तेकुतश्चिन्निमित्तात्तदसंभवेसतिपूर्ववत्तस्मिन्कर्मण्यभिप्रवृत्तस्यापिनैव
किंचित्करोतिसइतिकर्माभावःप्रदर्शितःयस्यैवंकर्माभावोदर्शितःतस्यैव॥श्रीसीतारामचंद्रायनमोनमः॥ ॥

याकारकफलाभावदर्शिनःकर्मपरित्यागध्रौव्यात्कर्माभाववचनमप्राप्तप्रतिषेधःस्यादित्याशंक्याह॥आत्मनइति॥लोकसं
ग्रहादिनिमित्तंप्रागेवोक्तमविद्यावस्थापूर्ववदित्युक्त्वा एवंवृत्तमनूद्योत्तरश्लोकमवतारयति॥यस्येति॥श्रीरामायनमः॥

यथोक्तस्यापि विद्यावतो मुक्तस्य भगवल्लीलार्थे कर्मानुष्ठानोपलंभात्ततो बंधारंभः संभाव्येतेत्याशंक्याह यज्ञायेति धर्माधर्मा
दीत्यादिशब्देन रागद्वेषादिसंग्रहः तस्य बंधनत्वंकरणव्युत्पत्त्या प्रतिपत्तव्यं यज्ञनिर्वर्त्यर्थे यज्ञशब्दितस्य भगवतो विष्णोर्नारायण

गतसंगस्य सर्वतो निवृत्तासक्तेर्मुक्तस्य निवृत्तधर्माधर्मादिबंधनस्य ज्ञानावस्थितचेतसो ज्ञाननिष्ठावस्थितं
चेतो यस्य स अयं ज्ञानावस्थितचेताः तस्य यज्ञाय यज्ञनिर्वर्त्यर्थे आचरतो निर्वर्त्तयतः कर्म समग्रं सहाग्रे

गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः ॥ यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥ ॥

णफलेन वर्त्तत इति समग्रं कर्म तत्समग्रं प्रविलीयते विनश्यतीत्यर्थः ॥ २३ ॥ श्रीरामाय नमः ॥ ॥

स्य प्रीतिसंपत्त्यर्थे इति यावत् ज्ञानमेवेष्टं तां ज्ञानस्य प्रतिबंधकं कर्मेति परिशंकितं परिहरति कर्मेति समग्रेणेत्यंगीकृत्य व्याचष्टे

भट्टेत्यादिटी २३

नाभुक्तं क्षीयते कर्मेतिस्मृतिमाश्रित्य शंकते कस्मादिति समग्रस्य क्रियाकारकफलात्मकस्यद्वैतस्य ब्रह्ममात्रत्वेनबाधितत्वा
द्ब्रह्मविदोब्रह्ममात्रस्य कर्मप्रविलीयतेसर्वमितियुक्तमित्याह उच्यतइति ब्रह्मविदो ब्रह्मैव सर्वक्रियाकारकफलजातमद्वैतमि
त्यत्रहेतुभूतमनंतर श्लोकमवतारयति यतइति अर्प्पणशब्दस्यकरणविषयत्वंदर्शयन्नर्प्पणंब्रह्मेतिसामानाधिकरण्यंसा
धयति येनेति यद्रजतंसाशुक्तिरितिवद्बाधायामिदंसामानाधिकरण्यमित्याह तस्येति तत्रदृष्टांतमाह यथेति उक्तेर्थे

कस्मात्पुनः कारणात्क्रियमाणंकर्मस्वकार्यारंभमकुर्वत्समग्रंप्रविलीयतइत्युच्यतेयतः ब्रह्मार्प्पणंयेनकरणेन
हस्तादिना ब्रह्मविद्धविरग्नावर्पयतितदर्प्पणंतत्ब्रह्मैवेतिपश्यतितस्यात्मव्यतिरेकेणाभावंपश्यतियथाशुक्ति

ब्रह्मार्पणंब्रह्महवि॥

कायांरजताभावंतद्वदुच्यतेब्रह्मैवार्पणमितियथायद्रजतंतत्तत्शुक्तिकैवेति ब्रह्मअर्प्पणमित्यसमस्तेपदेयदर्प्पणबु
द्ध्यागृह्यतेलोकेतदस्यब्रह्मविदोब्रह्मैवेत्यर्थः ब्रह्महविस्तथायद्धविर्बुद्ध्यागृह्यमाणंतद्ब्रह्मैवास्य॥ ॥

पदद्वयमवतारयति तद्वदुच्यतइति उक्तमेवार्थंस्पष्टयति यथायदिति समासशंकांव्यावर्त्तयति ब्रह्मेति पदद्वयपक्षेविवक्षितमर्थ
र्थंकथयति यदर्प्पणेति ब्रह्महविरितिपदद्वयमवतार्यव्याचष्टे ब्रह्मेत्यादिना यदर्प्पणबुद्ध्यागृह्यतेतद्ब्रह्मविदोब्रह्मैवेतियथोक्तं
तथेहापीत्याह तथेति असेतिषष्ठीब्रह्मविदमधिकरोति

पूर्ववदसमासमाशंक्य व्यावर्त्तयन् यदंतरमवतार्य व्याकरोति तथेति प्रागुक्तासमासवदिति व्यतिरेकः तत्र विवक्षितमर्थमाह अग्निरपी
ति ब्रह्मणेतिपदस्याभिमतमर्थमाह ब्रह्मणेति कर्त्राहूयत इति संबंधः कर्त्तुर्ब्रह्मणः सकाशाद्व्यतिरिक्तो नास्तीत्येतदत्राभिप्रेतमित्याह ।
ब्रह्मैवेति हुतमित्यस्य विवक्षितमर्थमाह यत्तेनेति ब्रह्मैव तेनेत्यादिभागं विभजते ब्रह्मैवेत्यादिना ब्रह्मकर्मेत्याद्यवतार्य व्याकरोति ब्रह्मेति

तथा ब्रह्माग्नौ इति समस्तं पदमग्निरपि ब्रह्मैव यत्र हूयते ब्रह्मणा कर्त्रा ब्रह्मैव कर्त्रेत्यर्थः यत्तेन हुतं हवनक्रियापि ब्रह्मैव य
त्तेन गंतव्यं फलं तदपि ब्रह्मैव ब्रह्मकर्मसमाधिना ब्रह्मैव कर्म ब्रह्मकर्म ब्रह्मकर्मणि समाधिर्यस्य स ब्रह्मकर्मसमाधिस्तेन
ब्रह्मकर्मसमाधिना ब्रह्मैव गंतव्यं एवं लोकसंग्रहं चिकीर्षुणापि क्रियमाणं कर्म परमार्थतोऽकर्म ब्रह्मबुद्ध्युपम

ब्रह्माग्नौ ब्रह्मणा हुतं ब्रह्मैव तेन गंतव्यं ब्रह्मकर्मसमाधिना २४

र्दितत्वात् एवं सति निवृत्तकर्मणोपि सर्वकर्मसंन्यासिनः सम्यग्दर्शनस्तुत्यर्थं यज्ञत्वसंपादनं ज्ञानस्य सुतरामु
पपद्यते यदर्पणाद्यधियज्ञे प्रसिद्धं तदस्याध्यात्मं ब्रह्मैव परमार्थदर्शिन इति ॥ श्रीरामायनमः ॥ ॥ ॥

कर्मत्वं ब्रह्मणो ज्ञेयत्वात् प्राप्यत्वाच्च प्रतिपत्तव्यमेवं ब्रह्मार्पणमंत्रस्याक्षरार्थमुक्त्वा तात्पर्यार्थमाह एवमिति निवृत्तकर्माणं संन्यासिनं प्रति
कथमस्य मंत्रस्य प्रवृत्तिरित्याशंक्याह निवृत्तेति यथा बाह्ययज्ञानुष्ठानासमर्थस्याज्यसंकल्पात्मको यज्ञो दृष्टः तथा ज्ञानस्य यज्ञत्व
संपादनं स्तुत्यर्थं सुतरामुपपद्यते तेन स्तुतिलाभात् कल्पनायाः स्वाधीनत्वाच्चेत्यर्थः ज्ञानस्य यज्ञत्वसंपादनमभिनयति यदर्पणादीति

केनप्रमाणेनात्रयजत्वसंपादनमवगतमित्याशंक्यार्पणादीनां विशेषतोब्रह्मत्वाभिधानानुपपत्त्येत्याह अन्यथेति ज्ञानस्ययज्ञत्वसं
पादितेफलितमाह तस्मादिति आत्मैवेदंसर्वमिति आत्मातिरेकेणसर्वस्यावस्तुत्वंप्रतिपद्यमानस्यकर्माभावेहेत्वंतरमाह कारकेति
कारकबुद्धेस्तेष्वभिमानस्याभावेपिकिमितिकर्मनस्यादित्याशंक्याह नहीति उक्तमेवान्वयव्यतिरेकाभ्यांद्रढयति सर्वमेवेति इंद्रा

अन्यथासर्वस्यब्रह्मत्वेऽर्पणादीनामेवविशेषतोब्रह्मत्वाभिधानमनर्थकंस्यात् यथात्वमिंद्रस्त्वंवरुणोयमस्त्वं तस्मादात्मैवेदंस
र्वमभिजानतः सर्वकर्माभावः कारकबुद्ध्यभिमानाभावाच्च नहिकारकबुद्धिरहितंयज्ञाख्यंकर्मदृष्टं सर्वमेवाग्निहोत्रादि
कंकर्मशब्दसमर्पितंदेवताविशेषसंप्रदानादिकारकबुद्धिमत्कर्तृत्वाभिमानफलाभिसंधिमच्चदृष्टंनोपमृदितक्रियाकारक
फलभेदबुद्धिमत्कर्तृत्वाभिमानफलाभिसंधिरहितंवा ॥ श्रीसीतारामचंद्रायनमोनमः ॥ श्रीरामचंद्रायनमोनमः ॥

येत्यादिनाशब्देनसमर्पितोदेवताविशेषः संप्रदानकारकमादिशब्दाद्व्रीह्यादिकरणकारकंतद्विषयबुद्धिमत्कर्त्तास्मीत्यभिमानपूर्वको
भोक्ष्येफलमस्येतिफलाभिसंधिमच्चकर्मदृष्टमितियोजना अन्वयमुक्त्वाव्यतिरेकमाह नेत्यादिना उपमृदिताक्रियादिभेद
विषयाबुद्धिर्यस्यतत्कर्मतथाकर्तृत्वाभिमानपूर्वकोभोक्ष्येफलमस्येतियोभिसंधिस्तेनरहितंचकर्मनदृष्टमित्यन्वयः ॥

तथापिब्रह्मविदोभासमानकर्माभावेकिमायातमित्याशंक्याह इदमिति यदिदंब्रह्मविदोदृश्यमानंकर्मतदहमस्मिब्रह्मेतिबुद्ध्यानि
राकृतकारकादिभेदविषयबुद्धिमदतश्चकर्मैवंनभवतितत्तज्ज्ञानेसतिव्यापकंकारकादिव्यावर्त्तमानं व्याप्यंकर्मापिव्यावर्त्तयतित
त्त्वविदःशरीरादिचेष्टाकर्माभासःकर्मव्यापकरहितत्वात्सुषुप्तचेष्टावदित्यर्थः ज्ञानवतोदृश्यमानंकर्माकर्मैवेत्यत्रभगवदनुमतिमा
ह तथाचेति ब्रह्मविदोदृष्टंकर्मनास्तीत्युक्तेपितत्कारणानुपमर्दात्पुनर्भविष्यतीत्याशंक्याह तथाचदर्शयन्निति अविद्वानिव विद्वान

इदंतुब्रह्मबुद्ध्युपमृदितार्प्पणादिकारकक्रियाफलभेदबुद्धिकर्मातोऽकर्मैवतत्तत्तथाचदर्शितंकर्मण्यकर्मयःपश्येत्कर्म
ण्यभिप्रवृत्तोपिनैवकिंचित्करोतिसःगुणागुणेषुवर्त्ततेनैवकिंचित्करोमीतियुक्तोमन्येततत्त्वविदित्यादिभिस्तथाच
दर्शयंस्तत्रतत्रक्रियाकारकफलभेदबुद्ध्युपमर्दनंकरोतिदृष्टंचकाम्याग्निहोत्रादौकामोपमर्दैकाम्याग्निहोत्रादिहा
नि[illegible]स्तथामतिपूर्वकामतिपूर्वकादीनांकर्मणांकार्यविशेषस्यारंभकत्वंदृष्टंतथेहापिब्रह्मबुद्ध्युपमर्दितार्पणादिकारकक्रि
याफलभेदबुद्धेर्बाह्यचेष्टामात्रेणकर्मापिविदुषोऽकर्मैवसंपद्यतेऽतउक्तंसमग्रंप्रविलीयतइति ॥ श्रीरामायनमः॥

पिकर्मणिप्रवर्त्तमानोदृश्यते तथापितस्यकर्माकर्मैवेत्यत्रदृष्टांतमाह दृष्टंचेति विद्वत्कर्मापिकर्मत्वाविशेषादितरकर्मवत्फ
लारंभकमित्यपिशंकानयुक्तेत्याह तथेति इदंकर्मैवकर्त्तव्यमस्यकर्मणःफलंभोक्तव्यमितिमतिस्तत्पूर्वकाण्यतत्पूर्वका
णिचकर्माणितेषामैवांतरभेदसंग्रहार्थमादिपदं दार्ष्टांतिकमाह तथेति सप्तम्याविद्वत्करणंपरामृष्टंपष्ठ्योसामाना
धिकरणेउक्तेर्थेपूर्ववाक्यमनुकूलयति अतइति॥

ची

ब्रह्मार्पण मंत्रेषु व्याख्यानमुक्त्वा सयूथ्य व्याख्यानमनुवदति अत्रेति प्रसिद्धोद्देशेनाप्रसिद्धविधानस्य न्याय्यत्वादप्रसिद्धोद्देशेन प्रसि
द्धविधानं कथमित्याशंक्याह ब्रह्मैवेति किलेत्यस्मिन्व्याख्याने सिद्धांतिनोऽसंप्रतिपत्तिं सूचयति कर्तृकर्मकरणसंप्रदानाधिकरण
रूपेण पंचविधेन ब्रह्मैव व्यवस्थितं कर्म करोत्संगीकारात्तदप्रसिद्धाभावात्तदनुवादेनार्पणादिषु विरुद्धस्तद्दृष्टिविधिरित्यर्थः दृ

अत्र केचिदाहुः यत्तु ब्रह्म तदर्पणादीनि ब्रह्मैव किल तदर्पणादिना पंचविधेन कारकात्मनावस्थितं सत्तदेव कर्म करो
ति तत्र नार्पणादिबुद्धिर्निवर्त्यते किं त्वर्प्पणादिषु ब्रह्मबुद्धिराधीयते यथा प्रतिमादौ विष्ण्वादिबुद्धिर्यथा च नामा
दौ ब्रह्मबुद्धिरेवं सत्यमेवं स्याद्यदि ज्ञानयज्ञस्तुत्यर्थं प्रकरणं न स्यात् अत्र तु सम्यग्दर्शनं ज्ञानयज्ञशब्दितमने
कान् यज्ञशब्दितान् क्रियाविशेषानुपन्यस्य श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंतप इति स्तौति ॥ ॥

ष्टिविधिपक्षे सिद्धांताद्विशेषं दर्शयति तत्रेति अर्पणादिषु कर्त्तव्यां ब्रह्मबुद्धिं दृष्टांताभ्यां स्पष्टयति यथेत्यादिना दृष्टिविधाने विधेय
दृष्टिर्मानसक्रियात्वेन सम्यग्ज्ञानत्वाभावात्प्रकरणभंगः स्यादित्यभिप्रेत्य परिहरति सत्यमेवमिति विधित्सितदृष्टिस्तुतिपरमेवप्र
करणं न ज्ञानस्तुतिपरमित्याशंक्य प्रकरणपर्यालोचनया ज्ञानस्तुतिरेवात्र प्रतिभातीति प्रतिपादयति अत्र त्विति ॥ ॥

किंच ब्रह्मार्पणमंत्रस्यापि सम्यग्ज्ञानस्कतौ सामर्थ्यं प्रतिभातीत्याह । अत्र चेति । नन्वर्पणादिषु ब्रह्मदृष्टिं कुर्वतामपि ब्रह्मविद्यै
वात्र विवक्षितेति भेदासिद्धिरिति चेत्तत्राह । चेत्विति । यथा ब्रह्मदृष्ट्या नामादिकमुपास्यं तथार्पणादिषु ब्रह्मदृष्टिकरणे सत्य

अत्र च समर्थमिदं वचनं ब्रह्मार्पणमित्यादि ज्ञानस्य यज्ञत्वसंपादने । अन्यथा सर्वस्य ब्रह्मत्वेऽर्पणादी
नामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं स्यात् । ये त्वर्पणादिषु प्रतिमायां विष्णुदृष्टिरिव ब्रह्मदृ
ष्टिः क्षिप्यते नामादिष्विव चेति ब्रुवते । न तेषां ब्रह्मविद्योक्तेह विवक्षिता स्यादर्पणादिविषयत्वात् ज्ञा
नस्य न च दृष्टिसंपादनज्ञानेन मोक्षफलं प्राप्यते ब्रह्मैव तेन गंतव्यं इति चोच्यते । श्रीरामाय नमः ॥

र्पणादिकमेव प्राधान्येन ज्ञेयमिति ब्रह्मविद्या यथोक्तेन वाक्येन विवक्षिता न स्यादित्यर्थः । किंच ब्रह्मैव तेन गंतव्यमिति ब्रह्मप्रा
प्तिफलाभिधानादपि दृष्टिविधानमश्लिष्टमित्याह । न चेति । न चार्पणाद्यालंबना दृष्टिर्ब्रह्म प्रापयति । श्रीरामाय नमः

अप्रतीकालंबनान्नयतीतिन्यायविरोधादिति भावः दृष्टिविधानेपि नियोगबलादेव स्वर्गवद्दृष्टो मोक्षो भविष्यतीत्याशंक्याह ।विरुद्धं चेति ज्ञानादेव कैवल्यमुक्त्वा मार्गांतरापवादिन्याः श्रुत्या विरुद्धं मोक्षस्याविद्यानिवृत्तिलक्षणस्य दृष्टस्य नैयोगिकत्ववचन मित्यर्थः दृष्टिनियोगान्मोक्षो भवतीत्येतत्प्रकरणविरुद्धं चेत्याह प्रकृतेति तदेव प्रपंचयति सम्यग्दर्शनं चेति अंते च सम्यग्द

विरुद्धं च सम्यग्दर्शनमंतरेण मोक्षफलं प्राप्यत इति प्रकृतविरोधश्च सम्यग्दर्शनं च प्रकृतं कर्मण्यकर्म यः पश्येदित्यत्रांते च सम्यग्दर्शनं तस्यैवोपसंहारात् श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः ज्ञानं लब्ध्वा परां शांतिमित्यादिना सम्यग्दर्शनस्तुतिमेव कुर्वन्नुपक्षीणोध्यायस्तत्रार्पणादौ ब्रह्मदृष्टिरत्र प्रकरणे प्रतिमायामिव विष्णुदृष्टिरुच्यत इत्यनुपपन्नं तस्माद्यथाव्याख्यातार्थ एवायं श्लो

र्शनं प्रकृतमिति संबंधः तत्र हेतुस्तस्यैवेति सम्यग्ज्ञानोपक्रमे यत्नेनैवोपसंहारेपि मध्ये किंचिदन्यदुक्तमिति प्रकरणस्यातद्विषयत्वमाशंक्याह श्रेयानिति प्रकरणे सम्यग्दर्शनविषये सत्यनुपपन्नो दर्शनविधिरिति फलितमाह तत्रेति ब्रह्मार्पणमंत्रे परकीयव्याख्यानासंभवे स्वकीयव्याख्यानं व्यवस्थितमित्युपसंहरति तस्मादिति २४ श्रीसीतारामचंद्राय नमः ॥ ॥ ॥

ज्ञानस्य यज्ञत्वं संपाद्य पूर्वश्लोके स्थिते सत्यधुना तस्यैव ज्ञानस्य स्तुत्यर्थं यज्ञांतरनिर्देशार्थमुत्तरग्रंथप्रवृत्तिरित्याह तत्रेति सर्व
स्य श्रेयःसाधनस्य मुख्यगौणवृत्तिभ्यां यज्ञत्वं दर्शयन्नादौ यज्ञद्वयमादर्शयति दैवमित्यादिना दैवमेवेति प्रतीकमादाय दैवयज्ञं व्याच
ष्टे देवा इति सम्यग्ज्ञानात्यं यज्ञं विभजते ब्रह्माग्नाविति तत्र ब्रह्मशब्दार्थश्च सत्यं ज्ञानमनंतमिति सत्यमिति मज्जडानृतविपरीतम

तत्राधुना सम्यग्दर्शनस्य यज्ञत्वं संपाद्य तत्स्तुत्यर्थमन्येपि यज्ञा उपक्षिप्यंते दैवमेवेत्यादिना दैवमेव देवा इज्यंते येन
यज्ञेनासौ दैवो यज्ञस्तमेवापरे यज्ञं योगिनः कर्मिणः पर्युपासते कुर्वंतीत्यर्थः ब्रह्माग्नौ सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमा

दैवमेवापरे यज्ञं योगिनः पर्युपासते ॥ ॥

नंदं ब्रह्म यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतर इत्यादिवचनोक्तमशनायादिसर्वसंसारधर्मवर्जितं नेति नेती
ति निरस्ताशेषविशेषं ब्रह्मशब्देनोच्यते ब्रह्म च तदग्निश्च श्रीसीतारामचंद्राय नमः श्रीरामचंद्राय नमः ॥ ॥

परिछिन्नं ब्रह्म तस्य परमानंदत्वेन पुरुषार्थत्वमाह विज्ञानमिति तस्य ज्ञानाधिकरणत्वेन ज्ञानत्वमौपचारिकमित्याशंक्याह यत्साक्षादि
ति जीवब्रह्मविभागे कथमपरिछिन्नत्वमित्याशंक्य विशिनष्टि य आत्मेति परस्यैवात्मत्वं सर्वस्माद्देहादेरव्याहृतांतादांतरत्वेन साधयति
स सर्वांतर इति विधिमुखं सर्वमेवोपनिषद्वाक्यं ब्रह्मविषयमादिशब्दार्थः निषेधमुखं ब्रह्मविषयमुपनिषद्वाक्यमशेषमेवार्थतो निबध्नाति

अ० ४ गीता टी०

ब्रह्मण्याग्निशब्दप्रयोगेनिमित्तमाह सहोमेति बुद्ध्यारूढतयासर्वस्यदाहकत्वादिलयस्यवाहेतुत्वादितिद्रष्टव्यं यज्ञशब्दस्यात्मनि त्वंपदार्थेप्रयो
गेहेतुमाह आत्मनामस्विति आधाराधेयभावेनवास्तवंभेदंब्रह्मात्मनोर्व्यावर्त्तयतिपरमार्थतइति कथंतर्हिहोमोनहितस्यैवतत्रहोमःसं
भवतीत्याशंक्याह बुद्ध्यादीति उपाधिसंयोगफलंकथयति अध्यस्तेति उपाध्यध्यासद्वारातद्धर्माध्यासेनात्मनर्थे निर्दिशत्याहुतीति इत्थं

सःहोमाधिकरणत्वविवक्षयाब्रह्माग्निस्तस्मिन्ब्रह्माग्नावपरेऽन्येचब्रह्मविदो यज्ञं यज्ञशब्दवाच्यआत्माआत्मनामसुयज्ञशब्दस्य
पाठात्तमात्मानंयज्ञंपरमार्थतः परमेवब्रह्मसंतंबुद्ध्याद्युपाधिसंयुक्तमध्यस्तसर्वोपाधिधर्मकमाहुतिरूपंयज्ञेनैवात्मनैवोक्तलक्ष

ब्रह्माग्नावपरेयज्ञंयज्ञेनैवोपजुह्वति २५

णेनोपजुह्वतिप्रक्षिपंतिसोपाधिकस्यात्मनोनिरुपाधिकेनपरब्रह्मस्वरूपेणैवयद्दर्शनंसतस्मिन्होमस्तंकुर्वंतिब्रह्मात्मैकत्वदर्शननिष्ठाः
संन्यासिनइत्यर्थः सोयंसम्यग्दर्शनलक्षणोयज्ञोत्रदैवयज्ञादिषुयज्ञेषूपक्षिप्यतेब्रह्मार्पणमित्यादिश्लोकैःश्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञा
नयज्ञइत्यादिनास्तुत्यर्थः २५

भूतलक्षणतृतीयामेवव्याकरोति उक्तेति अशनायादिसर्वसंसारधर्मवर्जितेननिर्विशेषेणस्वरूपेणे
तियावदात्मनोब्रह्मणिहोममेवप्रकटयति सोपाधिकस्येति अपरइत्यस्यार्थंस्फोटयति ब्रह्मेति उक्तस्यज्ञानयज्ञस्यदैवयज्ञादिषु
ब्रह्मार्पणमित्यादिश्लोकैरुपक्षिप्यमानत्वंदर्शयति सोयमिति उक्तोपक्षेपप्रयोजनमाह श्रेयानिति २५ श्रीरामायनमः

संप्रतियम्हद्वयमुपन्यस्यति श्रोत्रादीनीति बाह्यानांकरणानांमनसिसंयमस्यैकत्वात्कथंसंयमाग्निष्विति बहुवचनंइत्याशंक्याह प्रतीं
द्रियमिति संयमानांप्रत्याहाराधिकरणत्वेन व्यवस्थितानांमनोरूपाणांहोमाधारत्वादग्नित्वंव्यपदिशति संयमाइति विषयेभ्योंत
र्बाह्यानींद्रियाणिप्रत्याहरतीतिसंयमयज्ञंसंक्षिप्यदर्शयति इंद्रियेति श्रोत्रादींद्रियाग्निषुशब्दादिविषयहोमस्यतत्तदिंद्रियैस्तत्त

श्रोत्रादीनींद्रियाण्यन्ये योगिनःसंयमाग्निषुप्रतींद्रियंसंयमोभिद्यतइति बहुवचनंसंयमाएवाग्नयस्तेषुजु
ह्वति इंद्रियसंयममेवकुर्वंतीत्यर्थः शब्दादीन्विषयानन्येइंद्रियाग्निषुइंद्रियाण्येवाग्नयस्तेषुइंद्रियाऽग्निषुजु

श्रोत्रादीनींद्रियाण्यन्येसंयमाग्निषुजुह्वति शब्दादीन्विषयानन्येइंद्रियाग्निषुजुह्वति २६ ॥

ह्वति श्रोत्रादिभिरविरुद्धविषयग्रहणंहोमंमन्यंते २६ श्रीसीतारामचंद्रायनमः श्रीरामचंद्रायनमोनमः

द्विषयोपभोगलक्षणस्यसर्वसाधारणत्वमाशंक्यप्रतिषिद्धान्वर्जयित्वारागद्वेषरहितोभूत्वाप्राप्तान्विषयानुपभुंजतेतैस्तेरिति
विवक्षितंहोमंविशदयति श्रोत्रादिभिरिति २६ श्रीसीतारामचंद्रायनमोनमः श्रीरामचंद्रायनमोनमः श्रीरामायनमः॥

यज्ञांतरं कथयति किंचेति इंद्रियाणां कर्माणि श्रवणवदनादीनि आत्मनिसंयमो धारणाध्यानसमाधिलक्षणं सर्वमपिव्यापा

किंच सर्वाणींद्रियकर्माणि इंद्रियाणां कर्माणि तथा प्राणकर्माणि प्राणो वायुराध्यात्मिकस्तत्कर्माण्याकुंचनप्रसारणादीनि
तानि चापरे आत्मसंयमयोगाग्नौ आत्मनि संयमः आत्मसंयमः स एव योगो ऽग्निश्चतस्मिन्नात्मसंयमयोगाग्नौ जुह्व

सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥

ति प्रक्षिपंति ज्ञानदीपिते स्नेहेनेव दीपिते विवेकविज्ञानेनोज्वलभावमापादिते जुह्वति प्रविलापयंतीत्यर्थः ॥ २७ ॥

रं निरुध्यात्मनि चित्तसमाधानं कुर्वंतीत्याह विवेकेति ॥ २७ ॥ श्रीरामचंद्रायनमो नमः ॥ श्रीसीतारामचंद्रायनमः ॥

यज्ञषट्कमवतारयति द्रव्ययज्ञा इति तत्र द्रव्ययज्ञान्पुरुषानुपादाय विभजते तीर्थेष्विति तपस्विनो यज्ञबुद्ध्या तपोनुतिष्ठंतो नियमवंत इत्यर्थः प्रत्याहारादी त्यादिशब्देन यमनियमासनध्यानधारणासमाधयो गृह्यंते यथाविधि प्राङ्मुखत्वपवित्रपाणित्वाद्यंग

किंच द्रव्ययज्ञास्तीर्थेषु द्रव्यविनियोगं यज्ञबुद्ध्या कुर्वंतीति ये ते द्रव्ययज्ञाः तपोयज्ञा ये तपस्विनस्ते तपोयज्ञा योगयज्ञाः प्राणायामप्रत्याहारादिलक्षणो योगो यज्ञो येषां ते योगयज्ञास्तथापरे स्वाध्याययज्ञानयज्ञाश्च स्वाध्यायो यथा

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ॥ स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥२८॥ ॥

विधि ऋगाद्यभ्यासो येषां ते स्वाध्याययज्ञा ज्ञानयज्ञाः ज्ञानं शास्त्रार्थपरिज्ञानं यज्ञो येषां ते ज्ञानयज्ञाश्च यतयो यत्नशीलाः संशितव्रताः सम्यक्शितानि तनूकृतानि तीक्ष्णीकृतानि व्रतानि येषां ते संशितव्रताः ॥२८॥ ॥

विधिमनतिक्रम्येति यावत् व्रतानां तीक्ष्णीकरणमतिदृढत्वं ॥२८॥ श्रीसीतारामचंद्राय नमः ॥ श्रीरामाय नमः ॥

प्राणायामाख्यं यज्ञमुदाहरति किंचेति प्राणायामपरायणाः संतो रेचकं पूरकं च कृत्वा कुंभकं कुर्वंतीत्याह प्राणेति २९ प्राणापानयोर्गती निश्वासप्रश्वासौ निरुध्य किं कुर्वंतीत्यपेक्षायामाह किंचेति प्राणापानगतिनिरोधरूपं कुंभकं कृत्वा पुनः पु

किंच अपानेऽपानवृत्तौ जुह्वति प्रक्षिपंति प्राणं प्राणवृत्तिं पूरकाख्यं प्राणायामं कुर्वंतीत्यर्थः प्राणेऽपानं तथापरे जुह्वति रेचकाख्यं प्राणायामं कुर्वंतीत्येतत् प्राणापानगती रुद्ध्वा मुखनासिकाभ्यां वायोर्निर्गमनं प्राणस्य गतिस्तद्वि पर्ययेणाधोगमनमपानस्य गतिः ते प्राणापानगती रुद्ध्वा निरुध्य प्राणायामपरायणाः प्राणायामतत्पराः कुंभ

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे प्राणापानगती रुद्ध्वा प्राणायामपरायणाः २९ अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ३० श्रीरामाय नमः

काख्यं प्राणायामं कुर्वंतीत्यर्थः २९ किंच अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति नियतः परिमित आहारो येषां ते नियताहाराः संतः प्राणान्वायुभेदान्प्राणेष्वेव जुह्वति यस्य यस्य वायोर्जयः क्रियते इतरान्वायुभेदान्तस्मिंस्तस्मिन् जु ह्वति ते तत्र प्रविष्टा इव भवंति सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः यज्ञैर्यथोक्तैः क्षपितो नाशितः कल्मषो येषां ते यज्ञक्षपितकल्मषाः ३० नवायुजयं कुर्वंतीत्यर्थः आहारस्य परिमितत्वं हितत्वमेध्यत्वोपलक्षणार्थं प्राणानां प्राणेषु होममेव विभजते यस्येति जितेषु वायुभेदेष्वजितानां तेषां होमप्रकारं प्रकटयति तेतत्रेति प्रकृतान्यज्ञाननुपसंहरति सर्वेपीति ३०

यथोक्तयज्ञनिर्वर्त्तनानंतरं क्षीणे कल्मषे किं स्यादित्याशंक्याह एवमिति यथोक्तानां यज्ञानां मध्ये केनचिदपि यज्ञेनाविशेषितस्य प्रत्यवायं दर्शयति नायमिति कथं यथोक्तयज्ञानुष्ठायिनामवशिष्टेन कालेन विहितान्नभुजां ब्रह्मप्राप्तिरित्याशंक्य मुमुक्षुत्वे सति चित्तशुद्धिद्वारेत्याह मुमुक्षवश्चेति तत्किमिदानीं साक्षादेव मोक्षो विवक्षितस्तथा च गतिश्रुतिविरोधः स्यादित्याशंक्य गति

एवं यथोक्तान्यज्ञान्निर्वर्त्य यज्ञशिष्टाऽमृतभुजो यज्ञानां शिष्टं यज्ञशिष्टं यज्ञशिष्टं च तदमृतं च यज्ञशिष्टामृतं तद्भुंजत इति यज्ञशिष्टाऽमृतभुजो यथोक्तान्यज्ञान्कृत्वा ततः शिष्टेन कालेन यथाविधिचोदितमन्नममृताख्यं भुंजत इति यज्ञशिष्टामृतभुजो यांति गच्छंति ब्रह्म सनातनं चिरंतनं मुमुक्षवश्चेत्कालातिक्रमापेक्षयेति सामर्थ्याद्गम्य

यज्ञशिष्टाऽमृतभुजो यांति ब्रह्म सनातनं ॥ नायं लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम ॥ ३१ ॥

तेनायं लोकः सर्वप्राणिसाधारणोस्ति यथोक्तानां यज्ञानां मध्ये कोपि यज्ञो यस्य नास्ति सोऽयज्ञस्तस्य कुतोऽन्यो विशिष्टसाधनसाध्यः कुरुसत्तम ॥ ३१ ॥ श्रीसीतारामचंद्राय नमो नमः ॥ श्रीरामचंद्राय नमो नमः ॥ ॥

ते निर्देशसामर्थ्यात्क्रममुक्तिरत्राभिप्रेतेत्याह कालेति तृतीयं पादं व्याचष्टे नायमिति विवक्षितं कैमुतिकन्यायमाह कुत इति साधारणलोकाभावे पुनरसाधारणलोकप्राप्तिर्दूरं निरस्तेत्यर्थः यथोक्तेर्थे बुद्धिसमाधानं कुरुकुलप्रधानस्यानायासलभ्यमिति वक्तुं कुरु

स. गी. म. स. टी. अ. ४ ३१

उक्तानां यज्ञानां वेदमुखत्वेनोत्प्रेक्षानिबंधनत्वं निरस्यति एवमिति आत्मव्यापारसाध्यत्वमुक्तकर्मणामाशंक्य दूषयति कर्मजानि
ति आत्मनो निर्व्यापारत्वज्ञानफलमाह एवमिति कथं यथोक्तानां यज्ञानां वेदस्य मुखे विस्तीर्णत्वमित्याशंक्याह वेदद्वारेणेति
तेनावगम्यमानत्वमेवोदाहरति नचयेति एतद्धस्मवैतत्पूर्वे विद्वांस आहुरित्युपक्रम्याध्ययनाद्याक्षिप्य हेत्वाकांक्षायामुक्तं वाचि

एवं यथोक्ता बहुविधा बहुप्रकारा यज्ञा वितता विस्तीर्णा ब्रह्मणो वेदस्य मुखे वेदद्वारेणावगम्यमाना ब्रह्मणो मुखे
वितता उच्यंते तद्यथा वाचि हि प्राणं जुहुम इत्यादयः कर्मजान्कायिकवाचिकमानसकर्मोद्भवान्विद्धि तान्सर्वानात्म

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ३२ ॥

जान्निर्व्यापारो ह्यात्मा तत एवं ज्ञात्वा विमोक्ष्यसे अशुभान्नमम व्यापारा एते निर्व्यापारोऽहमुदासीन इत्येवं ज्ञात्वा अ
स्मात्सम्यग्दर्शनान्मोक्ष्यसे संसारबंधनादित्यर्थः ३२ श्रीसीतारामचंद्राय नमो नमः श्रीरामायनमः ॥

हीति ज्ञानशक्तिमद्विषये क्रियाशक्तिमदुपसंहारोऽत्रविवक्षितः प्राणे वावाचं यो ह्येव प्रभवः स एवाप्यय इति वाक्यमादिशब्दार्थः
ज्ञानशक्तिमतां क्रियाशक्तिमतां चान्योऽन्योत्पत्तिप्रलयत्वात्तदभावेनाध्ययनादिसिद्धिरित्यर्थः कर्मणामात्मव्यापारजन्यत्वाभा
वे हेतुमाह निर्व्यापारो हीति तस्य च निर्व्यापारत्वं फलवत्वात्ज्ञातव्यमित्याह अत इति एवं ज्ञानमेव ज्ञापयन्नुक्तं व्यनक्ति नेत्यादिना ३२

कर्मयोगेऽनेकधाभिहिते सर्वस्य श्रेयःसाधनस्य कर्मात्मकत्वप्रतिपत्त्या केवलज्ञानं द्रियमाणमर्जुनमालक्ष्य इत्तानुवादपूर्वक-
मुत्तरश्लोकस्य तात्पर्यमाह ब्रह्मेत्यादिना सिद्धेति सिद्धं पुरुषार्थभूतं पुरुषापेक्षितलक्षणं प्रयोजनं येषां यज्ञानां तैरनंतरोपदि-
ष्टैरितियावत् प्रश्नपूर्वकं स्तुतिप्रकारं प्रकटयति कथमित्यादिना ज्ञानयज्ञस्य द्रव्ययज्ञात्प्रशस्यतरत्वे हेतुमाह सर्वमिति द्रव्य-
साधनसाध्यादित्युपलक्षणं स्वाध्यायादेरपि ततोपि ज्ञानयज्ञस्य श्रेयस्त्वाऽविशेषात् द्रव्यमयादियज्ञेभ्यो ज्ञानयज्ञस्य प्रशस्यतर

ब्रह्मार्पणमित्यादिश्लोकेन सम्यग्दर्शनस्य यज्ञत्वं संपादितं यज्ञाश्चानेक उपदिष्टाः तैः सिद्धपुरुषार्थप्रयोजनैः ज्ञानं
स्तूयते कथं श्रेयान्द्रव्यमयाद्द्रव्यसाधनसाध्याद्यज्ञात् ज्ञानयज्ञः परंतप द्रव्यमयो हि यज्ञः फलस्यारंभकोन

श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंतप । सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥ ॥

ज्ञानयज्ञः फलारंभको तः श्रेयान्प्रशस्यतरः कथं यतः सर्वं समस्तं कर्माखिलमप्रतिबंधं पार्थ ज्ञाने मोक्षसाधने
सर्वतः संप्लुतोदकस्थानीये परिसमाप्यते ऽतर्भवतीत्यर्थः ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीरामायनमः ॥

त्वं प्रपंचयति द्रव्यमयो हीति फलस्याभ्युदयस्येत्यर्थः नफलारंभको न कस्यचित्फलस्योत्पादकः किंतु नित्यसिद्धस्य मोक्षस्या-
भिव्यंजक इत्यर्थः तस्य प्रशस्यतरत्वे हेत्वंतरमाह यत इति समस्तं कर्माग्निहोत्रादिकमुच्यते अखिलमविद्यमानं खिलं शेषो
ऽस्येत्यनल्पं महत्तरमितियावत् सर्वमखिलमिति पदद्वयोपादानमसंकोचार्थं श्रीसीतारामचंद्रायनमः श्रीरामायनमः

गी॰ भा॰
१३५

सर्वेकर्मज्ञानेऽन्तर्भवतीत्यत्र छांदोग्यश्रुतिं प्रमाणयति यथेति चतुरायके द्यूते कश्चिदायश्चतुरंकः सन्कृतशब्देनोच्यते तस्मै विजि
तायकृता यतादर्थ्येना धरेयास्तस्मात्तदधस्ताद्भाविनस्त्रिद्व्येकांकास्त्रेताद्वापरकलिनामानः संयंत्यायाः संगच्छंति चतुरंके खल्वायेत्रिद्व्ये
कांकानामंतर्भावो भवति महासंख्यायामवांतरसंख्यांतर्भावावश्यंभावादेवमेनं विद्यावंतं पुरुषं सर्वं तदभिमुख्येन समेति संगच्छ

आ॰ गी॰
५

॥ यथा कृताय विजितायाधरेयाः संयंत्येवमेनं सर्वं तदभिसमे
ति यत्किंचित्प्रजाः साधु कुर्वंति यस्तद्वेद यत्स वेदेति श्रुतेः ॥ ३३ ॥

ते किं तत्सर्वं यद्विदुषि पुरुषेऽन्तर्भवति तदाह यत्किंचिदिति प्रजाः सर्वा यत्किमपि साधुकर्म कुर्वंति तत्सर्वमित्यर्थः एनमभिस
मेतीत्युक्तं तमेव विद्यावंतं पुरुषं विशिनष्टि यस्तदिति किं तदित्युक्ते तदेव विशदयति यत्स इति सराको यत्तत्वं वेद तत्तत्वं योऽन्योपि
जानाति तमेनं सर्वसाधुकर्माभिसमेतीति योजना ३३

शिव
१३५

यद्येवं प्रशस्यतरमिदं ज्ञानं तर्हि केनोपायेन तल्लाभिरिति पृच्छति तदेवमिति ज्ञानप्राप्तौ प्रत्यासन्नमुपायमुपदिशति वच्यत इति न ज्ञानं गुरुभ्यो विद्धि गुरवश्च प्रणिपातादिभिरुपायैरावर्जितचेतसो वदिष्यंतीत्याह तद्विद्धीत्यादि उपदेष्टृत्वमुपदेशकर्तृत्वं परोक्षज्ञानमात्रेण न भवतीत्याह उपदेक्ष्यंतीति तदिति प्रेक्षितं ज्ञानसाधनं गृह्यते येन विधिनेति शेषदर्शनात् ग्रहायेनाचार्याविर्ज्जनप्र

तदेवं विशिष्टं ज्ञानं तर्हि केन पुनः प्राप्यत इत्युच्यते तद्विद्धि विजानीहि येन विधिना प्राप्यत इत्याचार्यानभिगम्य प्रणिपातेन प्र

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ॥

कर्षेण नीचैः पतनं प्रणिपातो दीर्घनमस्कारस्तेन कथं बंधः कथं मोक्षः का विद्या का चाविद्येति परिप्रश्नेन सेवया गुरुशुश्रूषयेत्येवमा

कारेण तदुपदेशवशादपेक्षितं ज्ञानं लभ्यते तथा तत् ज्ञानमाचार्येभ्यो लभस्वेत्यर्थः ॥ तदेव स्फुटयति आचार्यानिति एवमादिनेत्यादिशब्देन शमादयो गृह्यंते एवमादिना विद्धीति पूर्वेण संबंधः ॥ श्रीरामाय नमः ॥

उत्तरार्द्धं व्याचष्टे प्रश्रयेणेति प्रश्रयो भक्तिश्च श्रद्धापूर्वको निरतिशयोऽवनतिविशेषः यथोक्तविशेषणं पूर्वोक्तेन प्रकारेण प्रशस्यतममित्यर्थः विशेषणस्य पौनरुक्त्यापरिहारार्थमर्थभेदं कथयति ज्ञानवंतोपीति ज्ञानिन इत्युक्त्वा पुनस्तत्वदर्शिन इति ब्रुवतो भग

प्रश्रयेणावर्जिता आचार्या उपदेक्ष्यंति कथयिष्यंति ते ज्ञानं यथोक्तविशेषणं ज्ञानिनो ज्ञानवंतोपि केचिद्यथावत्तत्वदर्शनशी

उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः ३४

लाः यतः अपरे न भवंत्यतो विशिनष्टि तत्वदर्शिन इति ये सम्यग्दर्शिनस्तैरुपदिष्टं ज्ञानं कार्यक्षमं भवति नेतरदिति भगवतो मतं ३४

वतोभिप्रायमाह येसम्यगिति बहुवचनं चैतदाचार्यविषयं बहुभ्यः श्रोतव्यं बहुधा चेति सामान्यन्यायाभ्यनुज्ञार्थं न त्वात्मज्ञानमधिकृत्याचार्यबहुत्वं विवक्षितं तस्य तत्वसाक्षात्कारवदाचार्यमात्रोपदेशादेवोदयसंभवात् ३४ श्रीरामायनमः ॥ ॥

विशिष्टैराचार्यैरुपदिष्टज्ञाने कार्यक्षमे प्राप्ते सति समनंतरवचनमपि योग्यविषयमर्थवद्भवतीत्याह ॥ तथा चेति ॥ अतस्तस्मि
न्विशिष्टज्ञाने त्वदीयमोहापोहहेतौ निष्ठावता भवितव्यमिति शेषः तत्र निष्ठाप्रतिष्ठायै तदेव ज्ञानं पुन र्विशिनष्टि ॥ येनेति ॥ यज्ज्ञा
त्वेत्ययुक्तं ज्ञाने ज्ञानायोगादित्याशंक्य प्राप्त्यर्थत्वमधिपूर्वस्य गमेरंगीकृत्य व्याकरोति ॥ अधिगम्येति ॥ इतश्चाचार्योपदेशल

तथा च सतीदमपि समर्थं वचनं ॥ यज्ज्ञात्वा यज्ज्ञानं तैरुपदिष्टमधिगम्य पुनर्भूयो मोहमेवं यथेदानीं मोहं गतोसि पुनरे
वं न यास्यसि हे पांडव ॥ किं च येन ज्ञानेन भूतान्यशेषेण ब्रह्मादीनि स्तंबपर्यंतानि द्रक्ष्यसि साक्षादात्मनि प्रत्यगा

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव ॥ येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥

गी० ९६

त्मनि मत्स्थानीमानीति ॥ अथो अपि मयि वासुदेवे परमेश्वरे च इमानीति क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसीत्य

र्थः ज्ञाने फलवति प्रतिष्ठावता भवितव्यमित्याह ॥ किं चेति ॥ जीवे चेश्वरे चोभयत्र भूतानां प्रतिष्ठितत्वप्रतिनिर्देशे भेद
वादानुमतिः स्यादित्याशंक्याह ॥ क्षेत्रज्ञेति ॥ मूलप्रमाणाभावे कथं तदेकत्वदर्शनं स्यादित्याशंक्याह ॥ सर्वेति ॥ ३५ ॥ ॥

ज्ञानस्य प्रकारांतरेण प्रशंसां प्रस्तौति ॥ किंचेति ॥ पापकारिभ्यः सर्वेभ्यः सकाशादतिशयेन पापकारित्वमेकस्मिन्नसंभावितमपि ज्ञान
माहात्म्यसिद्ध्यर्थमंगीकृत्य ब्रवीति ॥ अपि चेदिति ॥ ब्रह्मात्मैक्यज्ञानस्य सर्वपापनिवर्त्तकत्वेन माहात्म्यमिदानीं प्रकटयति ॥ सर्वमिति ॥ अ

किंच तस्य ज्ञानस्य माहात्म्यं ॥ अपि चेदसि पापेभ्यः पापकृद्भ्यः सर्वेभ्योतिशयेन पापकृत्पापकृत्तमः यद्यसि भवसि

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ॥ सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥ ॥

र्वं ज्ञानप्लवेनैव ज्ञानमेव प्लवं कृत्वा वृजिनं वृजिनार्णवं पापं संतरिष्यसि धर्मोपीह मुमुक्षोः पापमुच्यते ॥ ३६ ॥ ॥

धर्मे निवृत्तेपि धर्मप्रतिबंधाच्च ज्ञानवतोपि मोक्षः संभवतीत्याशंक्याह ॥ धर्मोपीति ॥ इहेत्यध्यात्मशास्त्रं गृह्यते ॥ ३६ ॥ ॥ ॥

ज्ञानेसत्यपिधर्माधर्मयोरुपलंभात्कुतस्तयोस्ततोनिवृत्तिरित्याशंक्यज्ञानस्यधर्माधर्मनिवर्त्तकत्वंदृष्टांतेनदर्शयितुमनंतरश्लोकमव
तारयति ज्ञानमिति योग्यायोग्यविभागेननिवर्त्तकत्वान्निवर्त्तकत्वविभागमुदाहरति यथेति दृष्टांतानुरूपंदार्ष्टांतिकमाचष्टे
ज्ञानाग्निरिति योग्यविषयेपिदाहकत्वमग्नेरप्रतिबंधापेक्षयेतिविवक्षितांविशिनष्टि सम्यगिति दार्ष्टांतिकंव्याचष्टे ज्ञानमेवेति

ज्ञानंकथंनाशयतिपापमितिदृष्टांतमाह यथैधांसिकाष्ठानिसमिद्धः सम्यगिद्धोदीप्तोग्निर्भस्मसाद्भस्मीभावंकर्तुं
शक्तः सर्वंभस्मीभावंकुरुतेऽर्जुनज्ञानमेवाग्निः ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथानिर्बीजंकरोतीत्य
र्थः॥ नहिसाक्षादेवज्ञानाग्निः तानिकर्माणींधनवद्भस्मीकर्तुंशक्नोति ॥ श्रीसीतारामचंद्रायनमोनमः॥ ॥

ननुज्ञानंसाक्षादेवकर्मदाहकंकिमितिनोच्यतेनिर्बीजंकरोतिकर्मेतिकिमितिव्याख्यातमित्याशंक्याह नहीति ज्ञानस्यस्वप्रमेयावरणा
ज्ञानापाकरणेसामर्थ्यस्यलोकेदृष्टत्वादविक्रियब्रह्मात्मज्ञानमपितदज्ञानंनिवर्त्तयत्तज्जन्मकर्तृत्वभ्रमंकर्मबीजमूतंनिवर्त्तयति तन्नि
वृत्तौचकर्माणिनस्यातुंपारयंति नतुसाक्षात्कर्मणांनिवर्त्तकंज्ञानमज्ञानस्यैवनिवर्त्तकमितिव्याप्तेस्तदनिवृत्तौपुनरपिकर्मोद्भवसंभवा

ज्ञानस्यसाक्षात्कर्मनिवर्त्तकत्वाभावे फलितमाह तस्मादिति सम्यग्ज्ञानंमूलभूताऽज्ञाननिवर्त्तनेनकर्मनिवर्त्तकमिष्टंचेदारब्धफल
स्यापिकर्मणोनिवृत्तिप्रसंगात्ज्ञानोदयसमकालमेवशरीरपातःस्यादित्याशंक्याह सामर्थ्यादिति ज्ञानोदयसमयमेवदेहापोहेतत्वद
र्शिभिरुपदिष्टंज्ञानंफलवदितिभगवदभिप्रायस्यबाधितत्वप्रसंगादाचार्यत्वाभाव्यथानुपपत्याप्रवृत्तफलकर्मसंपादकमज्ञानलेशंननाः

तस्मात्सम्यग्दर्शनंसर्वकर्मणांभस्मसात्कारणंनिर्बीजत्वकारणमित्यभिप्रायः सामर्थ्याद्येनकर्मणाशरीरमार
ब्धंतत्प्रवृत्तफलत्वादुपभोगेनैवक्षीयते अतोयान्यप्रवृत्तफलानिज्ञानोत्पत्तेःप्राग्कृतानिज्ञानसहभावीनि

यथैधांसिसमिद्धोग्निर्भस्मसात्कुरुतेऽर्जुन ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथा ३७

चअतीतानेकजन्मकृतानिचतान्येवसर्वाणिकर्माणिभस्मसात्कुरुते ३७ श्रीसीतारामचंद्रायनमः ॥

शयतिज्ञानमित्यर्थः कथंतर्हिप्रारब्धफलंकर्मनश्यतीत्याशंक्याह येनेति तर्हिकिंथंज्ञानाग्निःसर्वकर्माणिभस्मसात्करोतीत्युक्तं
तत्राह अतइति ज्ञानादारब्धफलानांकर्मणांनिवृत्त्यनुपपत्तेरनारब्धफलानियानिकर्माणिपूर्वंज्ञानोदयादस्मिन्नेवजन्मनिकृता
निज्ञानेनचसहवर्त्तमानानिप्राचीनेषुचानेकेषुजन्मसुअर्जितानितानिसर्वाणिज्ञानंकारणनिवर्त्तनेननिवर्त्तयतीत्यर्थः ३७

नन्वन्येनैव परमपरिशुद्धिकरेण केनचिदश्वमेधादिना परमपुरुषार्थसिद्धेरलमात्मज्ञानेनेत्याशंक्याह। यत इति। पूर्वोक्तेनप्र
कारेण ज्ञानमाहात्म्यं यतः सिद्धमतस्तेन ज्ञानेन तुल्यं परिशुद्धिकरं परमपुरुषार्थौपयिकमिह व्यवहारभूमौ नास्तीत्यर्थः। तत्पुन

यत एवमतः। नहि ज्ञानेन सदृशं तुल्यं पवित्रं पावनं शुद्धिकरमिह विद्यते हि यस्मात्तज्ज्ञानं स्वयमेव योगसंसिद्धः योगेन क

नहि ज्ञानेन सदृशं पवित्रमिह विद्यते। तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति ३८ ॥

र्मयोगेन समाधियोगेन च संसिद्धः संस्कृतो योग्यतामापन्नः सन्मुमुक्षुः कालेनेह महता आत्मनि विंदति लभत इत्यर्थः।

रात्मविषयं ज्ञानं सर्वेषां किमिति झटिति नोत्पद्यते तत्राह। तत्स्वयमिति। महता कालेन यथोक्तसाधनेन योग्यतामापन्नस्तदधि
कृतः स्वयं तदात्मनि ज्ञानं विंदतीति योजना सर्वेषां झटिति ज्ञानानुदयो योग्यतावैधुर्यादिति भावः। ३८। श्रीरामाय नमः। ॥

कर्मयोगेनसमाधियोगेनचसंपन्नस्यज्ञानोत्पत्तावंतरंगसाधनमुपदिशति। येनेति। ज्ञानलाभेप्रयोजनमाह। ज्ञानमिति। नके
वलंश्रद्धालुत्वमेवसहायंज्ञानलाभेहेतुः अपितुतात्पर्यमपीत्याह। श्रद्धालुत्वेपीति। मंदप्रस्थानत्वंतात्पर्यविधुरत्वंनचतस्योपदिष्ट
मपिज्ञानमुत्पत्तुमीष्टेतेनतात्पर्यमपितत्रकारणंभवतीत्याह। अतआहेति। अभियुक्तोनिष्ठावानुपासनादावित्यादिशब्देनश्र

येनैकांतेनज्ञानप्राप्तिर्भवतिसउपायउपदिश्यते। श्रद्धावान्श्रद्धालुर्लभतेज्ञानंश्रद्धालुत्वेपिभवतिकश्चिन्मंदप्रस्थानो
ऽतआहतत्परोगुरूपासनादावभियुक्तोज्ञानलब्ध्युपायेश्रद्धावान्तत्परोप्यजितेंद्रियःस्यादित्यतआह। संयतेंद्रियःसंय

श्रद्धावांल्लभतेज्ञानंतत्परःसंयतेंद्रियः॥

तानिविषयेभ्योनिवर्तितानियस्येंद्रियाणिससंयतेंद्रियोयएवंभूतःश्रद्धावांस्तत्परश्चसंयतेंद्रियःसोऽवश्यंज्ञानंलभते।

वणादिगृह्यते। नकेवलंश्रद्धातात्पर्यंचेत्युभयमेवज्ञानकारणंकिंतुसंयतेंद्रियत्वमपितदभावेश्रद्धादेरकिंचित्करत्वादित्याश
येनाह। श्रद्धावानिति। उक्तसाधनानांज्ञानेनसहैकांतिकत्वमाह। यएवंभूतइति। श्रीसीतारामचंद्रायनमोनमः॥ ॥

नहि द्विप्रणिपातेनेत्यादौ प्रागेव प्रणिपातादेर्ज्ञाने हेतोरुक्तत्वात् किमितीदानीं हेत्वंतरमुच्यते तत्राह ॥ प्रणिपातादिस्त्विति
तद्धि बहिरंगमिदं पुनरंतरंगं न च तत्र ज्ञानेन प्रति नियमो मनस्यन्यथा कृत्वा बहिरन्यथा प्रदर्शनात्मनो मायावित्वस्य संभवा
द्विप्रलंभकत्वादेरपि संभावनोपनीतत्वादित्यर्थः ॥ मायावित्वादेः श्रद्धावत्तात्पर्यादावपि संभवादनैकांतिकत्वमविशि
ष्टमित्याशंक्याह नत्विति ॥ न हि मायया विप्रलंभेन वा श्रद्धा तात्पर्यसंयमानि योगतो निष्पत्तुमर्हंतीत्यर्थः ॥ उत्तरार्द्धं

प्रणिपातादिस्तु बाह्यो नैकांतिकोपि भवति मायावित्वादि संभवान्न तु तथा श्रद्धावत्त्वादावित्येकांततो ज्ञा
नलब्ध्युपायः किंपुनर्ज्ञानलाभात्स्यादित्युच्यते ज्ञानं लब्ध्वा परां मोक्षाख्यां शांतिमुपरतिमचिरेण क्षिप्र

ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति ॥ ३९ ॥

मेवाधिगच्छति सम्यग्दर्शनात् क्षिप्रं मोक्षो भवतीति सर्वशास्त्रन्यायप्रसिद्धः सुनिश्चितोर्थः ॥ ३९ ॥

प्रश्नपूर्वकमवतार्य व्याकरोति ॥ किंपुनरित्यादिना ॥ सम्यग्ज्ञानादभ्यासाद्यनपेक्षान्मोक्षो भवतीत्यत्र प्रमाणमाह ॥ सम्य
ग्दर्शनादिति ॥ शास्त्रशब्देन तमेव विदित्वा ज्ञानादेव तु कैवल्यमित्यादि विवक्षितं न्यायस्तु ज्ञानादज्ञाननिवृत्तेरज्ञानादेः प्र
सिद्धत्वादात्मज्ञानादपि निरपेक्षादज्ञानतत्कार्यप्रक्षयलक्षणो मोक्षः स्यादित्येवं लक्षणः ॥ ३९ ॥ श्रीरामायनमः ॥ ॥

उत्तरश्लोकस्यपातनिकांकरोति अत्रेति यथोक्तसाधनवानुपदेशमपेक्ष्याचिरेणब्रह्मसाक्षात्करोतिसाक्षात्कृतब्रह्मात्मा
त्वचिरेणैवमोक्षंप्राप्नोतीत्येषोर्थःसम्यगापरामृश्यते संशयस्याकर्त्तव्यत्वेहेतुमाह पापिष्ठोहीति उक्तंहेतुंप्रश्नपूर्वकमुत्तरश्लो
केनसाधयति कथमित्यादिना अज्ञादश्रद्दधानाच्चसंशयचित्तस्यविशेषमादर्शयति नायमिति द्वितीयभागविभजनार्थं

अत्रनसंशयःकर्त्तव्यःपापिष्ठोहिसंशयःकथमित्युच्यते अज्ञश्चानात्मज्ञोऽश्रद्दधानश्चसंशयात्माचवि
नश्यत्यज्ञाश्रद्दधानौयद्यपिविनश्येतेतथापिनयथासंशयात्मासतुपापिष्ठःसर्वेषांकथंनायंलोकःसाधा

अज्ञश्चाश्रद्दधानश्चसंशयात्माविनश्यति नायंलोकोस्तिनपरोनसुखंसंशयात्मनः ४०

रणोप्यस्तितथानपरोलोकोनसुखंतत्रापिसंशयोपपत्तेःसंशयात्मनःसंशयचित्तस्यतस्मात्संशयोनकर्त्तव्यः

भूमिकांकरोति अज्ञेति अज्ञादीनांमध्येसंशयात्मनोयत्पापिष्ठत्वंतत्प्रश्नद्वाराप्रकटयति कथमिति लोकद्वयस्यतत्प्रयुक्त
सुखस्यचाभावेहेतुमाह तत्रापीति संशयचित्तस्यसर्वत्रसंशयप्रवृत्तेर्दुर्निवारत्वादित्यर्थः संशयस्यानर्थमूलत्वेस्थिते

फलितमाहतस्मादिति ४०

यद्यपि संशयः सर्वानर्थहेतुत्वात्कर्त्तव्यो न भवति तथापि निवर्त्तकाभावे तदकरणमस्वाधीनमिति शंक्यते कस्मादिति श्रुतियुक्ति प्रयुक्तमैक्यज्ञानं तन्निवर्त्तकमित्युत्तरमाह ज्ञानेति संशयरहितस्यापि कर्माण्यनर्थहेतवो भवंतीत्याशंक्याह योगेति विषयपरवशस्य पुंसो योगायोगात्कुतो योगसंन्यस्तकर्मत्वमित्याशंक्याह आत्मवंतमिति परमार्थदर्शनतः संशयसमुच्छित्तौ तदुच्छेदकमा

कस्मात् योगसंन्यस्तकर्माणं परमार्थदर्शनलक्षणेन योगेन संन्यस्तानि कर्माणि येन परमा

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयं ॥

र्थदर्शिना धर्माधर्माख्यानि तं योगसंन्यस्तकर्माणं कथं योगसंन्यस्तकर्मे ॥ ॥

हात्म्याद्वेव कर्मणां च निवृत्तावप्रमत्तस्य प्रातिभासिकानि कर्माणि बंधहेतवो न भवंतीत्याह न कर्माणीति कर्मयोगादेव कर्मसंन्यासस्यानुपपत्तिमाशंक्याद्यं पादं विभजते परमार्थेति तच्च वैधसंन्यासपक्षे परोक्षं फलसंन्यासपक्षे त्वपरोक्षमिति विवेकः यथोक्तज्ञानेन संन्यस्तकर्मत्वमेव सति संशयेन सिध्यति संशयवतस्तदयोगादिति शंकते कथमिति ॥ ॥० ॥

द्वितीयपादं व्याकुर्वन्परिहरति ॥ आहेत्यादिना ॥ पाठक्रमादर्थक्रमस्य बलीयस्त्वादादौ द्वितीयं पादं व्याख्याय पश्चादाद्यं पादं व्याचष्टे तेसा
ह ॥ एवमिति ॥ सर्वमिदं प्रमादवतो विषयपरवशस्य न सिद्ध्यतीत्यभिसंधायात्मवंतं व्याकरोति ॥ अप्रमत्तमिति ॥ न कर्माणि इत्यादि फ

त्याह ज्ञानेति ज्ञानेनात्मेश्वरैकत्वदर्शनलक्षणेन संछिन्नः संशयो यस्य स ज्ञानसंछिन्नसंशयः ॥ एवं योगसंन्यस्तकर्माणं तं आ

आत्मवंतं न कर्माणि निबध्नंति धनंजय ॥४१॥

त्मवंतं अप्रमत्तं गुणचेष्टारूपेण दृष्टानि कर्माणि न निबध्नंति अनिष्टादिरूपं फलं नारभंते हे धनंजय ॥४१॥ श्रीरामायनमः॥

लौकिं व्याचष्टे ॥ गुणचेष्टेति ॥ अनिष्टादीत्यादिशब्देनेष्टं मिश्रं च गृह्यते ॥४१॥ श्रीसीतारामचंद्रायनमः ॥ श्रीरामचंद्रायनमोनमः ॥

तस्मादित्यादिसमनंतरश्लोकगततत्पदापेक्षितमर्थमाह यस्मादिति सतां कर्मणामस्मदादिषु फलारंभकत्वोपलंभाद्दुष्यपितेषां तद्बाध्यमानमबाधमित्याशंक्याह ज्ञानाग्नीति ननु संदिहानस्य तत्प्रतिबंधान्न कर्मयोगानुष्ठानं नापि तद्धेतुकं ज्ञानं तत्रापि संशयावतारादित्याशंक्याह यस्माच्चेति श्लोकाक्षराणि व्याचष्टे तस्मादित्यादिना पापिष्ठं इति संशयस्य सर्वानर्थमूलत्वेन त्याज्यत्वं सूचितं विवेकाग्रहप्रसूतत्वादपि तस्य हेयत्वमविवेकस्यानर्थकरत्वप्रसिद्धेरित्याह अविवेकादिति न च तस्य चैतन्यवदात्मनिष्ठत्वाद

यस्मात्कर्मयोगानुष्ठानादशुद्धिक्षयहेतुकज्ञानसंछिन्नसंशयो न निबध्यते कर्मभिर्ज्ञानाग्निदग्धकर्मत्वादेव यस्माच्च ज्ञानकर्मानुष्ठानविषये संशयवान् विनश्यति तस्मात्पापिष्ठमज्ञानसंभूतं अज्ञानादविवेकाज्जातं हृत्स्थं हृदि बुद्धौ स्थितं ज्ञानासि

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः॥

नाशोकमोहादिदोषहरं सम्यग्दर्शनं ज्ञानं तदेवासिः खड्गः तेन ज्ञानासिनात्मनः स्वस्य आत्मविषयत्वात्संशयस्य॥ ॥

त्याज्यत्वं शंकितव्यमित्याह हृदिति शोकमोहाभ्यामभिभूतस्य पुंसो मनसि प्रादुर्भवतः संशयस्य प्रबलप्रतिबंधकाभावेनैव प्रध्वंसः सिद्धो दित्याशंक्याह ज्ञानासिनेति स्वाश्रयसंशयस्य स्वाश्रये णैव ज्ञानेन समुच्छेदसंभवात्किमिति स्वस्येति विशेषणमित्याशंक्याह आत्मविषयत्वादिति स्थाण्वादिविषयः संशयस्तद्विषयेण ज्ञानेन देवदत्तनिष्ठेन तन्निष्ठो व्यावर्त्यते प्रकृते त्वात्मविषयस्तदाश्रयश्च संशयस्तथाविधेन ज्ञानेनापनीयते तेन विशेषणमर्थवदित्यर्थः॥ श्रीसीतारामचंद्राय नमो नमः॥ ॥ ॥

तदेव प्रपंचयति नहीति आत्माश्रयत्वस्य प्रकृते संशये सिद्धत्वेनाविवक्षितत्वात्तद्विषयस्य तु तद्विषये णैवतस्यतेन निवृत्तिर्विवक्षितेत्यु
पसंहरति अत इति संशयसमुच्छित्त्यनंतरं कर्त्तव्यमुपदिशति छित्त्वैनमिति अग्निहोत्रादिकं कर्म भगवदाज्ञयाक्रमेण करिष्यामि युद्धात्तु
न रुपरिरंसे वेत्याशंक्याह उत्तिष्ठेति भारतान्वये महति क्षत्रियवंशे प्रसूतस्यास्य समुपस्थितसमरविमुखत्वमनुचितमिव मन्वानः सन्ना

न हि परस्य संशयो ऽपरेण छेत्तव्यतां प्राप्नोति येन स्वस्येति विवक्षितत्वात् विशेषैते अत आत्मविषयोपि स्वस्यै
व भवति छित्त्वैनं संशयं स्वविनाशहेतुभूतं योगं सम्यग्दर्शनोपायं कर्मानुष्ठानमातिष्ठ कुर्वित्यर्थः उत्ति

छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥४२॥

ष्ठ च युद्धायेदानीं भारत ॥४२॥ ॥इति श्रीगीताभाष्ये चतुर्थोऽध्यायः॥ ॥४॥ ॥श्रीरामाय॰॥

ह भारतेति तदनेन योगस्याकृत्रिमत्वं भगवतोऽनीश्वरत्वं च निराकृत्य कर्मादावकर्मादिदर्शनादात्मनः सम्यग्ज्ञानात्प्रणिपातादेर्बहिरं
गादंतरंगाच्च श्रद्धादेरुद्भूतादशेषानर्थनिवृत्त्या ब्रह्मभावमभिदधता सर्वस्मादुत्कृष्टे तस्मिन्संशयानस्याधिकारदशेषदोषवंतं संशयं
हित्वा उत्तमस्य ज्ञाननिष्ठापरस्य कर्मनिष्ठेति स्थापितं ॥४२॥ ॥इति श्रीगीताभाष्यव्याख्याने चतुर्थोऽध्यायः॥ ॥४॥ ॥०॥ ॥

पूर्वोत्तराध्याययोः संबंधमभिदधानो वृत्तानुवादपूर्वकमर्ज्जुनस्य प्रश्नाभिप्रायं प्रदर्शयितुं प्रक्रमते कर्मणीत्यादिना ॥ इत्या
रभ्य कर्मण्यकर्मदर्शनमुक्त्वा तत्प्रशंसा प्रसारितेत्याह ॥ स युक्त इति ॥ ज्ञानवंतं सर्वाणि कर्माणि लोकसंग्रहार्थं कुर्वंतं ज्ञान
लक्षणेनाग्निना दग्धसर्वकर्माणं कर्मप्रयुक्तबंधप्रबंधविधुरं विवेकवंतो वदंतीति ज्ञानवतो ज्ञानफलभूतं संन्यासं विवक्ष
न्विविदिषोः साधनरूपमपि संन्यासं भगवानविवक्षितवानित्याह ॥ ज्ञानाग्नीति ॥ निराशीरित्यारभ्य शरीरस्थितिमात्रकार
णं कर्म शरीरस्थितावपि संगरहितः सन्नाचरन् धर्माधर्मफलभागी न भवतीत्यपि पूर्वोत्तराभ्यां अर्द्धाभ्यां द्विविधं संन्यासं सू
चितवानित्याह ॥ शरीरमिति ॥ यदृच्छेत्यादावपि संन्यासः सूचितस्तद्धर्मकलापोपदेशादित्याह ॥ यदृच्छेति ॥ ज्ञानस्य यज्ञत्वसं
पादनपूर्वकं प्रशंसावचनादपि कर्मसंन्यासो दर्शितो ज्ञाननिष्ठस्येत्याह ॥ ब्रह्मार्पणमिति ॥ ज्ञानं यज्ञत्वस्तुत्यर्थं कल्पितान्नाना

कर्मण्यकर्म यः पश्येदित्यारभ्य स युक्तः कृत्स्नकर्मकृत् ज्ञानाग्निदग्धकर्माणं शारीरं केवलं कर्म कुर्वन् यदृ
च्छालाभसंतुष्टो ब्रह्मार्पणं ब्रह्महविः कर्मजान्विद्धि तान्सर्वान्सर्वं कर्माखिलं पार्थ ज्ञानाग्निः सर्वकर्माणि यो
गसंन्यस्तकर्माणमित्येतैर्वचनैः सर्वकर्मणां संन्यासमवोचद्भगवान् ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु

विधान् यज्ञाननूद्य तेषां देहादिव्यापारजन्यत्ववचनेनात्मनो निर्व्यापारत्वेन विज्ञानफलाभिलाषादपि यथोक्तमात्मानं विवि
दिषोः सर्वकर्मसंन्यासेऽधिकारो ध्वनित इत्याह ॥ कर्मजानिति ॥ समस्तस्यैव विशेषवर्जितस्य कर्मणो ज्ञाने पर्यवसानाभिधा
नात्तज्जिज्ञासोः सर्वकर्मसंन्यासः सूचित इत्याह ॥ सर्वमिति ॥ तद्विद्धीत्यादिना ज्ञानप्राप्त्युपायं प्रणिपातादि प्रदर्श्य प्राप्तेन ज्ञानेना
तिशयमाहात्म्यवता सर्वकर्मणां निवृत्तिरेवेति वदता च ज्ञानार्थिनः संन्यासेऽधिकारो दर्शितो भगवतेत्याह ॥ ज्ञानाग्निरिति ॥ ज्ञा
नेन समुच्छिन्नसंशयं तस्मादेव ज्ञानात्कर्माणि संन्यस्य व्यवस्थितमप्रमत्तं वशीकृतकार्यकरणसंघातवंतं प्रातिभासिकानि क
र्माणि न निबध्नंतीत्यपि द्विविधः संन्यासो भगवतोक्त इत्याह ॥ योगेति ॥ कर्मणीत्यारभ्य योगसंन्यस्तकर्माणमित्यंतैरुदाहृ
तैरुक्तं संन्यासमुपसंहरति ॥ इत्येतैरिति ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीरामचंद्राय नमः श्रीरामचंद्राय नमः ॥

तर्हि कर्मसंन्यासस्यैव जिज्ञासुना ज्ञानवता चादरणीयत्वात्कर्मानुष्ठानमनादेयमापन्नमित्याशंक्योक्तमर्थांतरमनुवदति
छित्त्वैनमिति॥ कर्मतत्त्यागयोरुक्तयोरेकेनैव पुरुषेणानुष्ठेयत्वसंभवान्नविरोधोस्तीत्याशंक्य युगपद्वा क्रमेण वानुष्ठानमि
ति विकल्प्याद्यं दूषयति॥ उभयोश्चेति॥ द्वितीयं प्रत्याह॥ कालभेदेनेति॥ उक्तयोरेकेन पुरुषेणानुष्ठेयत्वासंभवे कथं कर्तव्य
त्वसिद्धिरित्याशंक्याह॥ अर्थादिति॥ द्वयोरुक्तयोरेकेन क्रमाऽक्रमाभ्यामनुष्ठानानुपपत्तेरित्यर्थः॥ अन्यतरस्य कर्तव्यत्वे कतर

छित्त्वैनं संशयं योगमातिष्ठेत्यनेन वचनेन योगं च कर्मानुष्ठानलक्षणमनुतिष्ठेत्युक्त्वा न तूभयोश्च कर्मानुष्ठान
कर्मसंन्यासयोः स्थितिगतिवत्परस्परविरोधादेकेन सह कर्तुमशक्यत्वात् कालभेदेन चानुष्ठानविधानाभावाद
र्थादितयोरन्यतरकर्तव्यतायाः प्राप्तौ सत्यां यत्प्रशस्यतरमेतयोः कर्मानुष्ठानकर्मसंन्यासयोस्तत्कर्तव्यं नेत
रदित्येवं मन्यमानः प्रशस्यतरबुभुत्सया अर्जुन उवाच संन्यासं कर्मणां कृष्ण इत्यादिना ननु चात्मविदो ज्ञानयो
गेन निष्ठां प्रतिपादयिष्यन् पूर्वोदाहृतैर्वचनैर्भगवान्कर्मसंन्यासमवोचन्न त्वनात्मज्ञस्यात श्च कर्मानुष्ठानकर्म
संन्यासयोर्भिन्नपुरुषविषयत्वादन्यतरस्य प्रशस्यतरबुभुत्सया प्रश्नोनुपपन्नः॥ श्रीरामचंद्राय नमः॥ श्रीः॥

स्येति कुतो निर्णयो द्वयोः सान्निध्याविशेषादित्याशंक्याह॥ यत्प्रशस्यतरमिति॥ भगवता कर्मणां संन्यासो योगश्चोक्तोन
च तयोः समुच्चित्यानुष्ठानं तेनान्यतरस्य श्रेष्ठस्यानुष्ठेयत्वे तद्बुभुत्सया प्रश्नोपपत्तिरित्युपसंहरति॥ एवमिति॥ नायं प्रष्टुर
भिप्रायः कर्मसंन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेयत्वस्योक्तत्वादेकस्मिन्पुरुषे प्राप्त्यभावादिति शंकते॥ नन्विति॥ ॥

चोद्यमंगीकृत्यपरिहरति॥सत्यमेवमिति॥कीदृक्तर्हिप्रष्टुरभिप्रायोयेनप्रश्नप्रवृत्तिरितिपृच्छति॥कथमिति॥एकस्मिन्पुरुषेकर्मतत्या
गयोरस्तिप्राप्तिरितिप्रष्टुरभिप्रायंप्रतिनिर्देष्टुंप्रारभतेपूर्वोदाहृतैरिति॥यथास्वर्गकामोयजेतेतिस्वर्गकामोद्देशेनयागोविधी
यतेनतुतस्यैवाधिकारोनान्यस्येत्यपिप्रतिपाद्यतेवाक्यभेदप्रसंगात्तथानात्मविल्कर्मसंन्यासपक्षेप्राप्तोनूद्यतेनत्वात्मविल्कर्तृक
त्वमेवसंन्यासस्यनियम्यतेवैराग्यमात्रेणाज्ञस्यापिसंन्यासविधिदर्शनात्तस्मात्कर्मत्यागयोरविद्वत्कर्तृकत्वमस्तीतिमन्वानस्याऽ

सत्यमेवंत्वदभिप्रायेणप्रश्नोनोपपद्यतेप्रष्टुःस्वाभिप्रायेणपुनःप्रश्नोयुज्यतएवेतिवदामःकथंपू
र्वोदाहृतैर्वचनैर्भगवताकर्मसंन्यासस्यकर्त्तव्यतयाविवक्षितत्वात्प्राधान्यमंतरेणचकर्तारंतस्यकर्त्त
व्यत्वासंभवादनात्मविदपिकर्त्तापक्षेप्राप्तोनूद्यतइति॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥श्रीः॥

र्जुनस्यप्रश्नःसंभवतीतिभावः॥भवतुसंन्यासस्यकर्त्तव्यत्वविवक्षातथापिकथंप्रशस्यतरबुभुत्सयाप्रश्नप्रवृत्तिरित्याशंक्याह
प्राधान्यमिति॥तथापिकथमेकस्मिन्पुरुषेतयोरप्राप्तावुक्ताभिप्रायेणप्रश्नवचनंप्रकल्प्यतेतत्राह॥अनात्मविदपीति॥आत्म
विदोविद्यासामर्थ्यात्कर्मत्यागध्रौव्यवदितरस्यापिसतिवैराग्येतत्त्यागस्यावश्यकत्वात्तत्रकर्तासौप्राप्तोऽत्रानूद्यतेतथाचकर्मयोग
तत्त्यागयोरेकस्मिन्नविदुषिप्राप्तेर्व्यक्तत्वात्उक्ताभिप्रायेणप्रश्नप्रवृत्तिरविरुद्धेत्यर्थः॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ ॥

संन्यासस्यात्मविल्कर्तृकत्वमेवात्रविवक्षितंकिंनस्यादित्याशंक्यकर्त्रंतरपर्युदासःसंन्यासविधिश्चेत्यर्थभेदेवाक्यभेदप्रसंगान्मैवमित्याह॥नपुनरिति॥इतिशब्दोवाक्यभेदप्रसंगहेतुद्योतनार्थः॥ततःकिमित्याशंक्यफलितमाह॥एवमिति॥कर्मानुष्ठानकर्मसंन्यासयोरविद्वत्कर्तृकत्वमप्रसक्तमित्येवंमत्वानस्यार्जुनस्यप्रशस्यतरविविदिषयाप्रश्नोनानुपपन्नइतिसंबंधः तयोःसमुच्चित्यानुष्ठानसंभवेकथंप्रशस्यतरविविदिषेत्याशंक्याह॥पूर्वोक्तेनेति॥उभयोश्चेत्यादावुक्तप्रकारेणकर्मतत्त्यागयोर्मिथोविरोधात्नसमुच्चित्यानुष्ठानंसावकाशमित्यर्थः॥भवतुतर्हियस्यकस्यचिदन्यतरस्यानु

नपुनरात्मविल्कर्तृत्वमेवसंन्यासस्यविवक्षितमित्येवंमत्वानस्यार्जुनस्यकर्मानुष्ठानकर्मसंन्यासयोरविद्वत्पुरुषकर्तृत्वमप्रसक्तमितिपूर्वोक्तेनप्रकारेणतयोःपरस्परविरोधादन्यतरस्यकर्त्तव्यत्वेप्राप्तेप्रशस्यतरंयत्कर्त्तव्यंनेतरदितिप्रशस्यतरविविदिषयाप्रश्नोनानुपपन्नः॥प्रतिवचनवाक्यार्थनिरूपणेनापिप्रष्टुरभिप्रायएवमेवेतिगम्यते॥कथंसंन्यासकर्मयोगौनिःश्रेयसकरौतयोस्तुकर्मसंन्यासात्कर्मयोगोविशिष्यतइतिप्रतिवचन॥

ष्टेयत्वमितिकुतोयथोक्ताभिप्रायेणप्रश्नप्रवृत्तिरित्याशंक्याह॥अन्यतरस्येति॥उभयप्राप्तौसमुच्चयानुपपत्तावन्यतरपरिग्रहेविशेषस्यान्वेष्यत्वादुक्ताभिप्रायेणप्रश्नोपपत्तिरित्यर्थः॥इतश्चाविद्वत्कर्तृकत्वयोःसंन्यासकर्मयोगयोःकतरःश्रेयानितिप्रष्टुरभिप्रायोभातीत्याह॥प्रतिवचनेति॥किंतत्प्रतिवचनंकथंवातन्निरूपणमितिपृच्छतिकथमिति॥तत्रप्रतिवचनंदर्शयति॥संन्यासेति॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥श्रीरामचंद्रायनमोनमः॥

तन्निरूपणं कथयति एतदिति ॥ तदुभयमिति ॥ निःश्रेयसकरत्वं कर्मयोगस्य श्रेष्ठत्वं चेत्यर्थः ॥ गुणदोषविभागविवेकाय पृच्छति ॥ किंचेति ॥ अतोस्मिन्नाद्यपक्षे किं दूषणं ॥ अस्मिन्वा द्वितीयपक्षे किं फलमिति प्रश्नार्थः ॥ तत्र सिद्धांती प्रथमपक्षे

मे तन्निरूप्यं किमनेनात्मविदकर्तृकसंन्यासकर्मयोगयोर्निःश्रेयसकरत्वं प्रयोजनमुक्त्वा तयोरेव कुतश्चिद्विशेषात्कर्मसंन्यासात्कर्मयोगस्य विशिष्टत्वमुच्यते ॥ आहोस्विदनात्मविदकर्तृकयोः संन्यासकर्मयोगयोः तदुभयमुच्यत इति किं चातोयद्यात्मविदकर्तृकयोः कर्मसंन्यासकर्मयोगयोर्निःश्रेयसकरत्वं तयोस्तु कर्मसंन्यासात्कर्मयोगस्य विशिष्टत्वमुच्यते ॥ यद्विवाऽनात्मविदकर्तृकसंन्यासकर्मयोगयोस्तदुभयमुच्यते इति ॥ अत्रोच्यते आत्मविदकर्तृकयोः संन्यासकर्मयोगयोरसंभवात्तयोर्निःश्रेयसकरत्ववचनं तदीयाच्च कर्मसंन्यासात्कर्मयोगस्य विशिष्टत्वाभिधानमित्येतदुभयमनुपपन्नं यद्यात्मविदः कर्मसंन्यासस्तत्प्रतिकूलश्च कर्मानुष्ठानलक्षणः कर्मयोगः संभवेतां तदा तयोर्निःश्रेयसकरत्वोक्तिः कर्मयोगस्य च कर्मसंन्यासाद्विशिष्टत्वाभिधानमित्येतदुभयमुपपद्येत ॥ आत्मविदस्तु संन्यासकर्मयोगयोरसंभवात्तयोर्निःश्रेयसकरत्वाभिधानं कर्मसंन्यासाच्च कर्मयोगो विशिष्यत इति चानुपपन्नं ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीः ॥

दोषमादर्शयति ॥ अत्रेत्यादिना ॥ तदेवानुपपन्नत्वं व्यतिरेकद्वारा विवृणोति ॥ यदीत्यादिना ॥ निःश्रेयसकरत्वोक्तिरित्यत्र पारंपर्येणेति द्रष्टव्यं ॥ विशिष्टत्वाभिधानमिति प्रतियोगिनोसहायत्वादस्य च शुद्धिद्वारा ज्ञानार्थत्वादित्यर्थः ॥ ॥

आत्मज्ञस्य कर्मसंन्यासकर्मयोगयोरसंभवे दर्शिते चोदयति ॥ अत्राहेति ॥ चोदयिता निर्द्धारणार्थे विमृशति ॥ किमित्यादि
ना ॥ अन्यतरासंभवेऽपि संदेहात्प्रश्नोऽवतरतीत्याह ॥ यदा चेति ॥ यस्य कस्यचिदन्यतरस्यासंभवोऽभविष्यतीत्याशंक्य का
रणमंतरेणासंभवोऽभवन्नातिप्रसंगी स्यादिति मन्वानः सन्नाह ॥ असंभवेति ॥ आत्मविदः सकारणं कर्मयोगासंभवं
सिद्धांती दर्शयति ॥ अत्रेति ॥ संग्रहवाक्यं विवृण्वन्नात्मवित्त्वं विवृणोति ॥ जन्मादीति ॥ तस्य यदुक्तं निवृत्तमिथ्याज्ञानत्वं त

अत्राह ॥ किमात्मविदः संन्यासकर्मयोगयोरुभयोरप्यसंभवः ॥ आहोस्विदन्यतरस्यासंभवः ॥ यदा
चान्यतरस्यासंभवस्तदापि किं कर्मसंन्यासस्य स्यादुत कर्मयोगस्येत्यसंभवकारणं च वक्तव्यमिति ॥
अत्रोच्यते ॥ आत्मविदो निवृत्तमिथ्याज्ञानत्वाद्विपर्ययज्ञानमूलस्य कर्मयोगस्यासंभवः स्यात् ॥
जन्मादिसर्वविक्रियारहितत्वेन निःक्रियमात्मानमात्मत्वेन यो वेत्ति तस्यात्मविदः सम्यग्दर्शनेना
पास्तमिथ्याज्ञानस्य निःक्रियात्मस्वरूपावस्थानलक्षणं सर्वकर्मसंन्यासमुक्त्वा तद्विपरीतस्य मि
थ्याऽज्ञानमूलकर्तृत्वाभिमानपुरःसरस्य सक्रियात्मस्वरूपावस्थानरूपस्य कर्मयोगस्य ॥ ॥

द्विशिनीयनक्ति ॥ सम्यगिति ॥ विपर्य्ययज्ञानमूलस्येत्यादिनोक्तं प्रपंचयति ॥ निःक्रियेति ॥ यथोक्तं संन्यासमुक्त्वा त
तो विपरीतस्य कर्मयोगस्याभावः प्रतिपाद्यत इति संबंधः वैपरीत्यं स्फोटयन् कर्मयोगमेव विशिनष्टि ॥ मिथ्याज्ञानमि
ति ॥ मिथ्या च तदज्ञानं चेत्यनाद्यनिर्वाच्यमज्ञानं तन्मूलोऽहं कर्त्तेत्यात्मनि कर्तृत्वाभिमानस्तज्जन्यस्येति यावत् ॥ ॥

यथोक्तं संन्यासमुक्त्वा यथोक्तकर्मयोगस्यासंभवप्रतिपादने हेतुमाह सम्यग्ज्ञानेति कुत्र तदभावप्रतिपादनं तदाह इहेति ॥ उक्तं हे
तुं कृत्वात्मज्ञस्य कर्मयोगासंभवे फलितमाह यस्मादिति इहशास्त्रे तत्र तत्रेत्यादावुक्तमेव व्यक्तीकर्तुमिच्छति केषु केष्विति ॥
तानेव प्रदेशान्दर्शयति अत्रेति आत्मस्वरूपनिरूपणप्रदेशेषु संन्यासप्रतिपादनादात्मविदः संन्यासो विवक्षितश्चेत्तर्हि क

इह शास्त्रे तत्र तत्रात्मस्वरूपनिरूपणप्रदेशेषु सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधादभावः प्रतिपाद्यते ॥ यस्मात्तस्मा
दात्मविदो निवृत्तमिथ्याज्ञानस्य विपर्ययज्ञानमूलः कर्मयोगो न संभवतीति युक्तं उक्तं स्यात्केषु केषु पुनरात्मस्वरूपनि
रूपणप्रदेशेषु आत्मविदः कर्माभावः प्रतिपाद्यत इत्यत्रोच्यते ॥ अविनाशि तु तद्विद्धीति प्रकृत्य य एनं वेत्ति हंतारं वेदा
विनाशिनं नित्यमित्यादौ तत्र तत्रात्मविदः कर्माभाव उच्यते ॥ ननु च कर्मयोगोऽप्यात्मस्वरूपनिरूपणप्रदेशेषु तत्र त
त्र प्रतिपाद्यत एव तद्यथा तस्माद्युध्यस्व भारत स्वधर्ममपि चावेक्ष्य कर्मण्येवाधिकारस्ते इत्यादावतश्च कथमात्मवि
दः कर्मयोगस्यासंभवः स्यादिति ॥ श्रीसीतारामचंद्रजीप्रसंन्नो मस्तु ॥ श्रीरामचंद्राय नमः ॥ श्रीरामाय नमः ॥ ॥

र्मयोगोऽपि तस्य कस्मान्न भवति प्रकरणाविशेषादिति शंकते ॥ नन्विति ॥ आत्मविद्याप्रकरणे कर्मयोगप्रतिपादनमुदा
हरति ॥ तद्यथेति ॥ प्रकरणादात्मविदोऽपि कर्मयोगस्यसंभवे फलितमाह ॥ अतश्चेति ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥

आत्मज्ञानोपायत्वेनापि प्रकरणपाठासिद्धो ज्ञानादूर्ध्वं न्यायविरुद्धं कर्म कल्पयितुमशक्यमिति परिहरति ॥ अत्रोच्यते ॥ सम्यग्ज्ञानमिथ्याज्ञानयोस्तत्कार्ययोश्च भ्रमनिवृत्तिभ्रमसद्भावयोश्च मिथो विरोधात्कर्तृत्वादिभ्रममूलं कर्म सम्यग्ज्ञानादूर्ध्वं न संभवतीत्यर्थः आत्मज्ञस्य कर्मयोगासंभवे हेत्वंतरमाह ॥ ज्ञानयोगेनेति ॥ इतश्चात्मविदो ज्ञानादूर्ध्वं कर्मयोगो न युक्तिमानित्याह ॥ कृतकृत्यत्वेनेति ॥ ज्ञानवतो नास्तिकर्मेत्यत्र कारणांतरमाह ॥ तस्येति ॥ तर्हि ज्ञानवता कर्मयोगस्य हेयत्वं

अत्रोच्यते ॥ सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधात् ॥ ज्ञानयोगेन सांख्यानामित्यनेन सांख्यानामात्मतत्वविदां अनात्मविल्कर्तृकर्मयोगनिष्ठातो निःक्रियात्मस्वरूपावस्थानलक्षणाया ज्ञानयोगनिष्ठायाः पृथक्करणात् कृतकृत्यत्वेन चात्मविदः प्रयोजनांतराभावात्तस्य कार्यं न विद्यत इति कर्तव्यांतराभाववचनाच्च न कर्मणामनारंभान्नैष्कर्म्यं संन्यासस्तु महाबाहो दुःखमाप्तुमयोगत इत्यादिना चात्मज्ञानांगत्वेन कर्मयोगस्य विधानात् योगारूढस्य तस्यैव शमः कारणमुच्यत इत्यनेन चोत्पन्नात्मज्ञानस्य कर्मयोगाभाववचनात् ॥ श्रीकृष्णायनमः॥

जिज्ञासुनापि तस्य त्याज्यत्वं ज्ञानप्राप्त्या तस्यापि पुरुषार्थसिद्धेरित्याशंक्य जिज्ञासोरस्तिकर्मयोगापेक्षेत्याह ॥ न कर्मणामिति ॥ स्वरूपोपकार्यंगमंतरेणांगिस्वरूपानिष्पत्तेर्ज्ञानार्थिना कर्मयोगस्य शुद्ध्यादिद्वारा ज्ञानहेतोरादेयत्वमित्यर्थः ॥ तर्हि ज्ञानवतापि ज्ञानफलोपकारित्वेन कर्मयोगो मृग्यतामित्याशंक्याह ॥ योगारूढस्येति ॥ श्रीकृष्ण॥

उत्पन्नसम्यग्ज्ञानस्यकर्माभावेशरीरस्थितिहेतोरपिकर्मणोऽसंभवान्नतस्यशरीरस्थितिस्तदस्थितौचकुतोजीवन्मुक्तिस्तदभावे
चकस्योपदेष्टृत्वमुपदेशाभावेचकुतोज्ञानोदयःस्यादित्याशंक्याह ॥ शरीरमिति ॥ विदुषोपिशरीरस्थितिरास्थिताचेत्तन्मा
त्रप्रयुक्तेषुदर्शनश्रवणादिषुकर्तृत्वाभिमानोपिस्यादित्याशंक्याह ॥ नेवेति ॥ तत्त्ववित्त्वित्यनेनचसमाहितचेतस्तयाकरो ॥
मीतिप्रत्ययस्यसदैवाकर्तव्यत्वोपदेशादितिसंबंधः यत्तुविदुषःशरीरस्थितिनिमित्तकर्माभ्यनुज्ञानेतस्मिन्कर्तृत्वाभिमा

शारीरंकेवलंकर्मकुर्वन्नाप्नोतिकिल्बिषमितिचशरीरस्थितिकारणातिरिक्तस्यकर्मणोनु
वारणान्नैवकिंचित्करोमीतियुक्तोमन्येततत्त्वविदित्यनेनचशरीरस्थितिमात्रप्रयुक्तेष्व
पिदर्शनश्रवणादिकर्मस्वात्मयाथात्म्यविदःनैवकिंचित्करोमीतिप्रत्ययस्यसमाहितचे
तस्तयासदाऽकर्तव्यत्वोपदेशादात्मतत्त्वविदःसम्यग्दर्शनेनविरुद्धोमिथ्याज्ञानहेतुकः
कर्मयोगःस्वप्नेपिनसंभावयितुंशक्यते ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ ॥

नोपिस्यादितितत्राह ॥ शरीरेति ॥ आत्मयाथार्थ्यविदस्तेष्वपिनाहंकरोमीतिप्रत्ययस्यनैवकिंचित्करोमीत्यादावकर्त ॥
व्यत्वोपदेशान्नकर्तृत्वाद्यभिमानसंभावनेत्यर्थः ॥ यथोक्तोपदेशानुसंधानाभावेविदुषोपिकरोमीतिस्वाभाविकप्रत्यय
द्वाराकर्मयोगःस्यादित्याशंक्याह ॥ आत्मतत्त्वेति ॥ यद्यपिविद्वान्यथोक्तमुपदेशंकदाचिन्नानुसंधत्ते ॥ तथापितत्त्वविद्या
विरोधान्मिथ्याज्ञानंतन्निमित्तंकर्मवातस्यसंभावयितुमशक्यमित्यर्थः ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥

आत्मविलकर्तृकयोः संन्यासकर्मयोगयोरयोगात्तयोर्निःश्रेयसकरत्वमन्यतरस्य च विशिष्टत्वमित्येतदयुक्तमिति सिद्धं॥ द्वि
तीयंपक्षमंगीकरोति॥ यस्मादित्यादिना॥ तदीयाच्चकर्मसंन्यासात्कर्मयोगस्य विशिष्टत्वाभिधानमिति संबंधः॥ ननु कर्मयो
गेनशुद्धबुद्धेः संन्यासोजायमानस्तस्मादुत्कृष्यते कथं तस्मात्कर्मयोगस्योत्कृष्टत्ववाचोयुक्तिर्युक्तेति तत्राह॥ पूर्वोक्ते
ति॥ वैलक्षण्यमेवस्पष्टयति॥ सत्येवेति॥ स्वाश्रमविहितश्रवणादौकर्तृत्वविज्ञाने सत्येव पूर्वाश्रमोपात्तकर्मैकदेशविष
यसंन्यासात्कर्मयोगस्य श्रेयस्त्ववचनं नैतादृशं ब्राह्मणस्यास्ति वित्तमित्यादिस्मृतिविरुद्धं इत्याशंक्याह॥ यमनियमादी

यस्मात्तस्मात्तदनात्मविल्कर्तृकयोरेव संन्यासकर्मयोगयोर्निःश्रेयसकरत्ववचनं
तदीयाच्चकर्मसंन्यासात्पूर्वोक्तात्मविल्कर्तृकसर्वकर्मसंन्यासविलक्षणात्सत्ये
वकर्तृत्वविज्ञाने कर्मैकदेशविषयात् यमनियमादिसहितत्वेन च दुरनुष्ठेयात्
सुकरत्वेन च कर्मयोगस्य विशिष्टत्वाभिधान॥ श्रीरामचंद्रायनमः॥ श्रीरामः॥

ति॥ आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवं॥ प्रीतिः प्रसादो माधुर्यमक्रोधश्च यमा दश॥ दानमिज्या तपो ध्यानं स्वा
ध्यायोपस्थनिग्रहौ॥ व्रतोपवासं मौनं च स्नानं च नियमा दश॥ इत्युक्तैर्यमनियमैरन्यैश्चाश्रमधर्मैर्विशिष्टत्वेनानुष्ठातुम
शक्यत्वादुक्तसंन्यासात्कर्मयोगस्य विशिष्टत्वोक्तिर्युक्तेत्यर्थः॥ नहिकश्चिदितिन्यायेन कर्मयोगस्येतरापेक्षया सुक
रत्वाच्च तस्य विशिष्टत्ववचनं श्लिष्टमित्याह॥ सुकरत्वेन चेति॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीरामचंद्रायनमः॥

प्रतिवचनवाक्यार्थालोचनतः सिद्धमर्थमुपसंहरति ॥ इत्येवमिति ॥ संन्यासकर्मयोगयो रुक्तयोर्मिथोविरुद्धयोः समुच्चित्यानु
ष्ठातुमशक्ययोरन्यतरस्य कर्त्तव्यत्वे प्रशस्यतरस्य तद्भावात् तद्भावस्य चानिर्द्धारितत्वात्तन्निर्द्धारयिषया प्रश्नः स्यादिति
प्रश्नवचनार्थपर्यालोचनया प्रष्टुरभिप्रायो यथापूर्वमुपदिष्टस्तथा प्रतिवचनार्थनिरूपणेनापि तस्य निश्चितत्वात्प्रश्नोप
पत्तिः सिद्धेत्यर्थः ॥ ननु तृतीये यथोक्तप्रश्नस्य भगवता निर्णीतत्वान्नात्र प्रश्नप्रतिवचनयोः सावकाशत्वमित्याशंक्य विस्त
रेणोक्तमेव संबंधं पुनः संक्षेपतो दर्शयति ॥ ज्यायसी चेदिति ॥ सांख्ययोगयोर्भिन्नपुरुषानुष्ठेयत्वेन निर्णीतत्वान्न पुनः

८

मित्येवं प्रतिवचनवाक्यार्थनिरूपणेनापि पूर्वोक्तः प्रष्टुरभिप्रायो निश्चीयत इति स्थितं ॥ अथवा ज्यायसी चेत्कर्मणस्त इत्य
त्र ज्ञानकर्मणोः सहासंभवे यच्छ्रेय एतयोस्तन्मे ब्रूहीत्येवं पृष्टोऽर्जुनेन भगवान् ज्ञानयोगेन सांख्यानां निष्ठा कर्मयोगे
न योगिनां निष्ठा प्रोक्तेति निर्णयं चकार न च संन्यसनादेव केवलात्सिद्धिं समधिगच्छतीति वचनात् ज्ञानसहितस्य
तस्य सिद्धिसाधनत्वमिष्टं छित्वैनं संशयं योगमातिष्ठेति ज्ञानसहितस्यैव कर्मयोगस्य च विधानात् ॥ ज्ञानरहितस्य सं
न्यासः श्रेयान् किं वा कर्मयोगः श्रेयानित्येतयोर्विशेषबुभुत्सया ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ ॥

प्रश्नयोग्यत्वमित्यर्थः ॥ इतोऽपि तयोर्न प्रश्नविषयत्वमित्याह ॥ न चेति ॥ एवकारविशेषणात् ज्ञानसहितसंन्यासस्य सिद्धिसा
धनत्वं भगवतोऽभिमतं छित्वैनं संशयं योगमातिष्ठेति च कर्मयोगस्य विधानात्तस्यापि सिद्धिसाधनत्वमिष्टं तत्रश्च निर्णीत
त्वान्न प्रश्नस्तद्विषयः सिध्यतीत्यर्थः ॥ केनाभिप्रायेण तर्हि प्रश्नः स्यादित्याशंक्य ज्ञानरहितसंन्यासात्कर्मयोगस्य प्रशस्य
तरत्वबुभुत्सयेत्याह ॥ ज्ञानरहित इति ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामचंद्राय नमः ॥ श्रीकृष्णाय नमो नमः ॥

प्रष्टुरभिप्रायमेवं प्रदर्श्य प्रश्नोपपत्तिमुक्त्वा प्रश्नमुत्थापयति॥ संन्यासमिति॥ तर्हि द्वयं त्वयानुष्ठेयमित्याशंक्य तद्दशक्तेः उक्तत्वात्प्रशस्यतरस्यानुष्ठानार्थं तदिदमिति निश्चित्य वक्तव्यमित्याह॥ यच्छ्रेय इति॥ काम्यानां प्रतिषिद्धानां च कर्मणां परित्यागो मयोच्यते॥ न च सर्वेषामित्याशंक्य कर्मण्यकर्मेत्यादौ विशेषादर्शनान्मैवमित्याह॥ शास्त्रीयाणामिति॥ अस्तु तर्हि शास्त्रीयाशास्त्रीययोरशेषयोरपि कर्मणोस्त्यागो नेत्याह॥ पुनरिति॥ तर्हि कर्म तत्त्यागश्चेत्युभयमादर्शितव्यमित्याशंक्य विरोधान्मैवमित्यभि

संन्यासं परित्यागं कर्मणां शास्त्रीयाणां अनुष्ठानविशेषाणां शंससि कथयसि इह पुनर्योगं च तेषामेवानुष्ठानमवश्यं कर्तव्यं शंससि॥ अतो मे कतरन्नु श्रेय इति संशयः किं कर्मानुष्ठानं श्रेयः किं वा तद्धा

अर्जुन उवाच॥ संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि॥ यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं॥ १॥

नमिति प्रशस्यतरं वानुष्ठेयमतश्च यत् श्रेयः प्रशस्यतरमेतयोः कर्मसंन्यासकर्मानुष्ठानयोर्यदनुष्ठानात् श्रेयःप्राप्तिर्मम स्यादिति मन्यसे तदेकमन्यतरत्सहैकपुरुषानुष्ठेयत्वासंभवात् मे ब्रूहि सुनिश्चितमभिप्रेतं तवेति॥ १॥

प्रेत्याह॥ अत इति॥ द्वयोरेकेनानुष्ठानायोगस्योक्तत्वात् कर्तव्योक्तेश्च संशयो जायते तमेव संशयं विशदयति॥ किं कर्मेति॥ प्रशस्यतरबुभुत्सा किमर्थेत्याशंक्याह॥ प्रशस्यतरं चेति॥ तस्यैवानुष्ठेयत्वे प्रश्नस्य सावकाशत्वमाह॥ अतश्चेति॥ तदेव प्रशस्यतरं विशिनष्टि॥ यदनुष्ठानादिति॥ तदेकं दैन्यतरन्मे ब्रूहीति संबंधः उभयोरुक्तत्वे सति किमित्येकं वक्तव्यमिति नियुज्यते तत्राह॥ सहेति॥ कर्मतत्त्यागयोर्मिथो विरोधादित्यर्थः॥ १॥ श्रीसीतारामचंद्राय नमः॥ श्रीरामचंद्राय नमः॥ श्रीरामाय॰

म

प्रश्नमेवमुत्थाप्यप्रतिवचनमुत्थापयति ॥ स्वाभिप्रायमिति ॥ निर्णयायतद्द्वारेणपरस्यसंशयनिवृत्यर्थमित्यर्थः ॥ एवंप्रश्ने
प्रवृत्तेकर्मयोगस्यसौकर्यमभिप्रेत्यप्रशस्यतरत्वमभिधित्सुर्भगवान्प्रतिवचनंकिमुक्तवानित्याशंक्याह ॥ संन्यासइ
तिउभयोरपितुल्यत्वशंकांवारयति ॥ तयोस्त्विति ॥ कथंतर्हिज्ञानस्यैवमोक्षोपायत्वंविवक्ष्यतेतत्राह ॥ ज्ञानोत्पत्ती

स्वाभिप्रायमाचक्षाणोनिर्णयाय ॥ संन्यासःकर्मणांपरित्यागःकर्मयोगश्चतेषा
मनुष्ठानंतावुभावपिनिःश्रेयसकरौमोक्षंकुर्वाते ॥ ज्ञानोत्पत्तिहेतुत्वेनउभौयद्यपि

॥श्रीभगवानुवाच॥ संन्यासःकर्मयोगश्चनिःश्रेयसकरावुभौ ॥ ॥
तयोस्तुकर्मसंन्यासात्कर्मयोगोविशिष्यते ॥ २ ॥ श्रीरामायनमः ॥ ॥

निःश्रेयसकरौतथापितयोश्चनिःश्रेयसहेत्वोःकर्मसंन्यासात्केवलात्तुकर्मयोगोवि
शिष्यतइतिकर्मयोगंस्तौति ॥ २ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीकृष्णायनमः ॥

तितर्हिद्वयोरपिप्रशस्यत्वमप्रशस्यत्वंवातुल्यमित्याशंक्याह ॥ उभाविति ॥ ज्ञानासहायस्यकर्मसंन्यासस्यकर्मयोगा
पेक्षयाअविशिष्टत्वविवक्षयाविशिनष्टि ॥ केवलादिति ॥ २ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामचंद्रायनमः ॥

कर्म हि बंधकारणं प्रसिद्धं तत्कथं निःश्रेयसकरं स्यादिति शंकते ॥ कस्मादिति ॥ अकर्त्रात्मविज्ञानात्त्यागापि सर्वदा सो संन्यासी
ज्ञेयः योरागद्वेषो क्वचिदपि न करोतीत्याह ॥ ज्ञेय इत्याहेति ॥ यथाननुष्टीयमानानि कर्माणि संन्यासिनं न बध्नंति कृतानि च वैरा
ग्येंद्रियसंयमादिना निवर्त्तंते ॥ तथैवानभिसंधितफलानि नित्यनैमित्तिकानि योगिनमपि न निबध्नंति निवर्त्तयंति च सं

कस्मादित्याह ॥ ज्ञेयो ज्ञातव्यः स कर्मयोगी नित्यसंन्यासीति ॥ यो न द्वेष्टि किंचिन्न च कांक्षति दुःखसुखे त
त्साधने चैवंविधो यः कर्मणि च प्रवर्त्तमानोपि स नित्यसंन्यासीति ज्ञातव्य इत्यर्थः ॥ निर्द्वंद्वो द्वंद्ववर्जितो

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति ॥ निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ॥ ३ ॥ श्रीरामः ॥

हि यस्मान्महाबाहो सुखं बंधादनायासेन प्रमुच्यते ॥ ३ ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीरामाय नमो नमः ॥

चितदुरितमित्यभिप्रेत्याह ॥ निर्द्वंद्वो हीति ॥ कर्मयोगिनो नित्यसंन्यासित्वज्ञानमन्यथाज्ञानत्वान्मिथ्याज्ञानमित्याशंक्याह ॥ ए
वंविध इति कर्मिणोपि रागद्वेषाभावेन संन्यासित्वं ज्ञातुमुचितमित्यर्थः ॥ रागद्वेषरहितस्यानायासेन बंधप्रध्वंससिद्धेश्च युक्तं त

संन्यासित्वमित्याह ॥ निर्द्वंद्व इति ॥ ३

यदुक्तं संन्यासकर्मयोगयोर्निःश्रेयसकरत्वं तदाक्षिपति ॥ ननु संन्यासेति ॥ तत्रोत्तरत्वेनोत्तरश्लोकमवतारयति ॥ इति प्रा
प्तइति ॥ विवेकवंतस्तर्हि कथं वदंतीत्याकांक्षायामाह ॥ एकमिति ॥ संख्या आत्मसमीक्षामर्हतीति सांख्यः संन्यासो योग
स्तु कर्मयोगस्तावुभावपि पृथगित्यस्यार्थमाह ॥ विरुद्धेति ॥ शास्त्रार्थविवेकशून्यत्वं बाल्यं ॥ उत्तरार्द्धमवतारयितुं भू
मिकां करोति ॥ पंडितास्त्विति ॥ ज्ञानिनो योगिनश्चेति शेषः द्वयोरविरुद्धफलत्वमेव प्रश्नपूर्वकं प्रकटयति ॥ कथमित्यो

ननु संन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेययोर्विरुद्धयोः फलेपि विरोधो युक्तो न तूभयोर्निःश्रेयसकरत्वमे
वेति प्राप्त इदमुच्यते ॥ सांख्ययोगौ पृथग्विरुद्धभिन्नफलौ बालाः प्रवदंति न तु पंडिताः पंडितास्तु ज्ञानिनः ॥
एकं फलमविरुद्धमिच्छंति ॥ कथमेकमपि सांख्ययोगयोः सम्यगास्थितः सम्यगनुष्ठितवानित्यर्थः ॥ उ

सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः ॥ एकमप्यास्थितः सम्यगुभयोर्विंदते फलं ॥ ४ ॥

भयोर्विंदते फलमुभयोस्तदेव हि निःश्रेयसं फलमतः फले विरोधो नास्ति ॥ ननु संन्यासकर्मयोगशब्देन प्रस्तु
तस्य सांख्ययोगयोः फलैकत्वं कथं इहाप्रकृतं ब्रवीति ॥

दिना ॥ एकसाधनमनुतिष्ठतो द्वयोरपि फलं भवतीति विरु
द्धमित्याशंक्याह ॥ उभयोरिति ॥ सांख्ययोगयोः संन्यासकर्मानुष्ठानयोस्तत्त्वज्ञानद्वारा निःश्रेयसफलत्वान्न विरु
द्धफलत्वशंकेत्यर्थः ॥ सांख्ययोगयोरेकफलत्ववचनं प्रकरणाननुगुणमिति शंकते ॥ नन्विति ॥ श्रीरामचंद्राय नमः ॥

अप्रकृतत्वमसिद्धमितिपरिहरति नैषदोषइति संन्यासंकर्मणामित्यादिना संन्यासंकर्मयोगंचांगीकृत्यप्रश्नेसंन्यासः कर्मयोगश्चेत्यादिनातथैवप्रतिवचनेन्चकथंसांख्ययोगयोरेकफलत्वमप्रकृतंनभवतीत्युच्यतेतत्राह यद्यपीति प्रतिवचनमपितदनुरूपमेवभगवतानिरूपितमितिविशेषानुपपत्तिरित्याशंकाह भगवांस्त्विति तदपरित्यागेनेत्यत्रतस्देनप्रष्टृप्रतिनिर्दिष्टौकर्मसंन्यासकर्मयोगावुच्येतेसांख्ययोगाविति शब्दांतरवाच्यतयातयोरेवसंन्यासकर्मयोग

नैषदोषः यद्यप्यर्जुनेनसंन्यासंकर्मयोगंचकेवलमभिप्रेत्यप्रश्नः कृतोभगवांस्तु तदपरित्यागेनैवस्वाभिप्रेतंचविशेषंसंयोज्यशब्दांतरवाच्यतयाप्रतिवचनंददौसांख्ययोगाविति तावेवसंन्यासकर्मयोगौज्ञाननतदुपायसमबुद्धित्वादिसंयुक्तौसांख्ययोगशब्दवाच्याविति भगवतोमतमतोनाप्रकृतप्रक्रियेति॥ ४॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ ॥

योरत्यागेनस्वाभिप्रेतंविशेषंसंयोज्यभगवान्प्रतिवचनंददाविति योजनायदुक्तंस्वाभिप्रेतंचविशेषंसंयोज्येतितदेवव्यक्तीकरोति तावेवेति समबुद्धित्वादीत्यादिशब्देनज्ञानोपायभूतःशमादिरादीयते प्रकृतयोरेवसंन्यासकर्मयोगयोरुपादानेफलितमाह अतइति सांख्ययोगावित्यादिश्लोकव्याख्यानसमाप्तिरितिशब्दार्थः॥ ४॥ श्रीकृष्णायनमः॥

प्रश्नपूर्वकं श्लोकांतरमवतारयति ॥ एकस्यापीति ॥ केचिदेवं तयोरेकफलत्वं पश्यंतीत्याशंक्य तेषामेव सम्यग्दर्शित्वं नेतरेषामित्याह ॥ एकमिति ॥ तिष्ठत्यस्मिन्न च्यवते पुनरिति व्युत्पत्तिमाश्रित्याह ॥ मोक्षाख्यमिति ॥ योगशब्दार्थमाह ॥ ज्ञानप्राप्तिरिति ॥ ये हि जिज्ञासवः सर्वाणि कर्माणि भगवत्प्रीत्यर्थत्वेन तेषां फलाभिलाषमकृत्वा ज्ञानप्राप्तौ बुद्धिशुद्धिद्वारेणोपायत्वेनानुतिष्ठंति

एकस्यापि सम्यगनुष्ठानात्कथमुभयोः फलं विंदतीत्युच्यते ॥ यत्सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिः प्राप्यते स्थानं मोक्षाख्यं तत्योगैरपि ज्ञानप्राप्त्युपायत्वेनेश्वरे समर्प्य कर्माण्यात्मनः फलमनभिसंधायानुति

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥ एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥ ॥

ष्ठंति ये ते योगिनस्तैरपि परमार्थज्ञानसंन्यासप्राप्तिद्वारेण गम्यत इत्यभिप्रायः ॥ अत एकं सांख्यं च योगं च यः पश्यति स पश्यति फलैकत्वात्सम्यक्पश्यतीत्यर्थः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीः ॥

तेऽत्र योगा विवक्ष्यंते अर्श आद्यच्प्रत्ययस्य मत्वर्थत्वं गृहीत्वोक्तं ॥ योगिन इति ॥ सर्वोपि द्वैतप्रपंचो न वस्तुभूतो मायाविलासत्वात् मालविक्रियोऽद्वितीयो वस्तु सन्निति प्रयोजकज्ञानं परमार्थज्ञानं तत्पूर्वकसंन्यासद्वारेण कर्मिभिरापितदेव स्थानं प्राप्यमित्येकफलत्वं संन्यासकर्मयोगयोरविरुद्धमित्याह ॥ तैरपीति ॥ फलैकत्वे फलितमाह ॥ अत इति ॥ श्रीरामचंद्रायनमः ॥

यदि यथोक्तज्ञानपूर्वकसंन्यासद्वाराकर्मणामपिश्रेयोऽवाप्तिरिष्टातर्हिसंन्यासस्यैवश्रेयस्त्वंप्राप्तमितिनोदयति ॥ एवंतर्हीति ॥ संन्यासस्यश्रेष्ठत्वेकर्मयोगस्यप्रशस्यतरत्ववचनमनुचितमित्याह ॥ कथंतर्हीति ॥ पूर्वोक्तमेवाभिप्रायंस्मारयन् परिहरति ॥ शृण्विति ॥ कर्मयोगस्यविशिष्टत्ववचनंतत्रेतिपरामृष्टंतदेवकारणंकथयति ॥ त्वयेत्यादिना ॥ केवलंविज्ञानरहितमितियावत् ॥ तयोरन्यतरः कःश्रेयानितीतिशब्दोऽध्याहर्त्तव्यः त्वदीयंप्रश्नमनुसृत्यतदनुगुणंप्रतिवचनं

एवंतर्हियोगात्संन्यासएवविशिष्यते ॥ कथंतर्हीदमुक्तंतयोस्तुकर्मसंन्यासात्कर्मयोगोविशिष्यतइति ॥ तत्शृणुतत्रकारणं ॥ त्वयापृष्टंकेवलंकर्मसंन्यासंकर्मयोगंचाभिप्रेत्यतयोरन्यतरःकःश्रेयांस्तदनुरूपंप्रतिवचनंमयोक्तंकर्मसंन्यासात्कर्मयोगोविशिष्यतेइतिज्ञानमनपेक्ष्य ॥ ज्ञानापेक्षस्तुसंन्यासःसांख्यमितिममाभिप्रेतंपरमार्थयोगश्चसएवयस्तुकर्मयोगोवैदिकःसतादर्थ्यात्योगःसंन्यासइतिचोपचर्यते ॥ ५ ॥ श्रीरामाय·

ज्ञानमनपेक्ष्यतद्रहितात्केवलादेवसंन्यासाद्योगस्यविशिष्टत्वमितिमयोक्तमित्याह ॥ तदनुरूपमिति ॥ ज्ञानापेक्षःसंन्यासस्तर्हिकीदृशइत्याशंक्याह ॥ ज्ञानेति ॥ तर्हिकर्मयोगेकथंयोगशब्दःसंन्यासशब्दोवाप्रयुज्यतेतत्राह ॥ सत्विति ॥ तादर्थ्यात्परमात्मज्ञानशेषत्वादितियावत् ॥ ५ ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु

तदेवतादर्थ्यं प्रश्नपूर्वकं प्रसाधयति ॥ कथमित्यादिना ॥ कर्मानुष्ठानाभावे बुद्धिशुद्ध्यभावात्परमार्थसंन्यासस्य सम्यग्ज्ञानात्म
नोनप्राप्तिरितिव्यतिरेकमुपन्यस्यान्वयमुपन्यस्यति ॥ योगेति ॥ पारमार्थिकः सम्यग्ज्ञानात्मकः सामग्र्यभावे कार्यप्राप्ति
रयुक्तेतिमत्वाह ॥ दुःखमिति ॥ योगयुक्तत्वं व्याचष्टे ॥ वैदिकेनेति ॥ ईश्वरस्वरूपस्य सविशेषस्येति शेषः ॥ ब्रह्मेति ॥ व्या
ख्येयं पदमुपादाय व्याचष्टे ॥ प्रकृत इति ॥ तत्र ब्रह्मशब्दप्रयोगे हेतुमाह ॥ परमात्मेति ॥ लक्षणया बोधगमकविषयः

कथं तादर्थ्यमित्युच्यते ॥ संन्यासस्तु पारमार्थिको दुःखमाप्तुमयोगतः योगेन विना योगयुक्तो वैदिकेन कर्म
योगेनेश्वरसमर्पितरूपेण फलनिरपेक्षेण तेन युक्तो मुनिः मननादीश्वरस्वरूपस्य मुनिर्ब्रह्म परमात्म

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ॥ योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥ ६ ॥

ज्ञाननिष्ठालक्षणत्वात्प्रकृतः संन्यासो ब्रह्म उच्यते संन्यास इति ब्रह्म ब्रह्मा हि पर इति श्रुतेः ॥ ब्रह्म परमार्थ
संन्यासं परमात्मज्ञाननिष्ठालक्षणं महाबाहो अचिरेण क्षिप्रमेवाधिगच्छति प्राप्नोति अतो मयोक्तं कर्मयोगो विशि

संन्यासे ब्रह्मशब्दप्रयोगे तैत्तिरीयश्रुतिं प्रमाणयति ॥ संन्यास इति ॥ कथं संन्यासे हिरण्यगर्भवाची ब्रह्मशब्दः प्रयुज्य
ते द्वयोरपि परत्वाविशेषादित्याह ॥ ब्रह्मा हीति ॥ ब्रह्मशब्दस्य संन्यासविषयत्वे फलितं वाक्यार्थमाह ॥ ब्रह्मेत्यादिना ॥ न
द्याः स्रोतांसीव निम्नप्रवणानि कर्मभिरतितरां परिपक्वकषायस्य करणानि सर्वतो व्यावृत्तानि निरस्ताशेषविशेष
कूटस्थप्रत्यगात्मान्वेषणप्रवणानि भवंतीति कर्मयोगस्य परमार्थसंन्यासप्राप्त्युपायत्वे फलितमाह ॥ अत इति ॥

न्यासं

गीताभाष्य

ननु पारिव्राज्यं परिगृह्य श्रवणादिसाधनमसकृदनुतिष्ठतो लब्धसम्यग्बोधस्यापि यथापूर्वं कर्माण्युपलभ्यंते तानि च बंधहेतवो भविष्यंतीत्याशंक्य श्लोकांतरमवतारयति ॥ यदा पुनरिति ॥ सम्यग्दर्शनप्राप्त्युपायत्वेन यदा पुनरयं पुरुषो योगयुक्तादिविशेषणः सम्यग्दर्शी संपद्यते तदा प्रातिभासिकीं वृत्तिमनुसृत्य कुर्वन्नपि न लिप्यत इति योजना योगेन नित्यनैमित्तिककर्मानुष्ठानेनेति यावत् आदौ नित्याद्यनुष्ठानवतो रजस्तमोमलाभ्यामकलुषितं सत्त्वं सिध्यतीत्याह ॥ विशुद्धेति ॥ बुद्धि

यदा पुनरयं सम्यग्दर्शनप्राप्त्युपायेन योगेन युक्तो योगयुक्तो विशुद्धात्मा विशुद्धसत्त्वो विजितात्मा विजितदेहो जितेंद्रियश्च सर्वभूतात्मभूतात्मा सर्वेषां ब्रह्मादीनां स्तंबपर्यंतानां भूतानामात्मभूत आत्मा प्रत्यक्चेतनो यस्य स सर्वभूतात्मभूतात्मा सम्यग्दर्शीत्यर्थः ॥ स तत्रैवं वर्त्तमानो लोकसंग्रहाय कर्म कुर्वन्नपि न लिप्यते न क

योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः ॥ सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥
नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ॥८॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥

र्मभिर्बध्यत इत्यर्थः ॥७॥ न चासौ परमार्थतः करोतीत्यतः ॥ नैव किंचित्करोमीति युक्तः समाहितमतिः सन्नैव किंचित्करोमीति मन्येत चिंतयेत्तत्त्ववित् आत्मनो याथात्म्यं तत्त्वं वेत्तीति तत्त्ववित्परमार्थदर्शीत्यर्थः ॥८॥

देति ॥ बुद्धिशुद्धौ कार्यकारणसंघातस्यापि स्वाधीनत्वं भवतीत्याह ॥ विजितेति ॥ तस्य यथोक्तविशेषणवतो जायते सम्यग्दर्शित्वमित्याह ॥ सर्वभूतेति ॥ सम्यग्दर्शिनस्तर्हि कर्मानुष्ठानं कुत्र संतदनुष्ठाने वा कुतो बंधविश्लेषसिद्धिरित्याशंक्याह ॥ स तत्रेति ॥ सम्यग्दर्शनं सप्तम्यर्थः ॥७॥ कर्माण्यंगीकृत्य तैरस्य विदुषो बंधो नास्तीत्युक्तमिदानीं वस्तुतस्तस्य कर्माण्येव न संतीत्याह ॥ न चेति ॥ लोकदृष्ट्या विदुषोपि कर्माणि संतीत्याशंक्य स्वदृष्ट्या तदभावमभिप्रेत्याह ॥ नैवेति ॥८॥

साईसमनंतरश्लोकमाकांक्षापूर्वकमुत्थापयति ॥ करेत्यादिना ॥ चक्षुरादिज्ञानेंद्रियैर्वागादिकर्मेंद्रियैः प्राणादिवायुभेदैरंतःकरणचतु
ष्टयेनच तत्तच्चेष्टानिर्वर्त्तनावस्थायां तत्तदर्थेषु सर्वप्रवृत्तिरिंद्रियादीनामेवेत्यनुसंदधानो नैवकिंचित्करोमीतिविद्वान्प्रतिपद्यत

कदाकथंवातत्वमवधारयन्मन्येतेत्युच्यते ॥ मन्येतेतिपूर्वेणसंबंधः यस्यैवंतत्वविदः सर्वकार्यकर
णचेष्टासुकर्मसुअकर्मैवपश्यतः सम्यग्दर्शिनः तस्यसर्वकर्मसंन्यासएवाधिकारः कर्मणोऽभावद

पश्यन्शृण्वन्स्पृशन्जिघ्रन्अश्नन्गच्छन्स्वपन्श्वसन् ॥ प्रलपन्विसृजन्गृह्णन्
उन्मिषन्निमिषन्नपि ॥ इंद्रियाणींद्रियार्थेषुवर्त्तंतइतिधारयन् ॥ ९ ॥ श्रीरामायनमः ॥

र्शनात् न हि मृगतृष्णिकायामुदकबुद्ध्यापानाय प्रवृत्तउदकाभावज्ञानेपितत्रतत्रैवपानप्रयोजनायप्रवर्त्तेत ॥

इत्यर्थः ॥ यथोक्तस्याविदुषोविध्यभावेपिविद्यासामर्थ्यात्प्रतिपत्तिकर्मभूतंकर्मसंन्यासंफलात्मकमभिलपति ॥ तस्येति ॥
अज्ञस्येवविदुषोपिकर्मसुप्रवृत्तिसंभवात् कुतः संन्यासेऽधिकारः स्यादित्याशंक्याह ॥ नहीति ॥ ९ ॥ श्रीरामायनमः ॥

तर्हि विद्वानिवाविद्वानपि कर्माणि न प्रवर्त्तेत पापोपहतिसंभवादित्याशंक्याह ॥ यस्त्विति ॥ यथा भृत्यः स्वाम्यर्थं कर्माणि करोति न स्वफलमपेक्षते तथैव यो विद्वान्मोक्षेपि संगं त्यक्त्वा भगवदर्थमेव सर्वाणि कर्माणि करोति न स कर्मणा बध्यते ॥ न हि पद्मपत्रमंभसा संबध्यते तद्वदित्यर्थः ॥१०॥ अविदुषस्तर्हि कृतेन कर्मणा किं स्यादित्याह ॥ केवलामिति ॥ अज्ञस्येश्वरार्पणबुद्ध्यानुष्ठितं कर्म

यस्तु पुनरतत्ववित्सत्वश्च कर्मयोगे ॥ ब्रह्मणीश्वरे आधाय निक्षिप्य तदर्थं करोमीति भृत्य इव स्वाम्यर्थं सर्वाणि कर्माणि मोक्षेपि फले संगं त्यक्त्वा करोति यः सर्वकर्माणि लिप्यते न स पापेन न संबध्यते पद्मपत्रमिवांभसा उदकेन ॥१०॥ केवलं सत्वशुद्धिमात्रफलमेव तस्यैव कर्मणः स्यात् यस्मात् ॥ कायेन देहेन मनसा बुद्ध्या च केवलै

ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ॥ लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥१०॥
कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि ॥ योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये ॥११॥ ॥

र्ममत्ववर्जितैरीश्वरायैव करोमि न मम फलायेति ममत्वबुद्धिशून्यैरिंद्रियैरपि केवलशब्दः कायादिभिरपि प्रत्येकं संबध्यते सर्वव्यापारेषु ममतावर्जिता योगिनः कर्मिणः कर्म कुर्वंति संगं त्यक्त्वा फलविषयमात्मशुद्धये सत्वशुद्धय इत्यर्थः तस्मात्त्वमेव तवाधिकार इति कुरु कर्मैव ॥११॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामाय नमः ॥

बुद्धिशुद्धिफलमित्यत्रैव हेतुमाह ॥ यस्मादिति ॥ केवलशब्दस्य प्रत्येकं संबंधप्रयोजनमाह ॥ सर्वव्यापारेष्विति ॥ कर्मणश्चित्तशुद्धिफलत्वेतादर्थ्येन कर्मानुष्ठानमेव तव कर्त्तव्यमिति ॥ यस्मादित्यस्यापेक्षितं वदन्फलितमाह ॥ तस्मादिति ॥११॥ श्रीः ॥

इतश्च संगं त्यक्त्वा कर्मानुष्ठानं त्वया कर्त्तव्यमित्याह यस्माच्चेति युक्तः सन् फलं त्यक्त्वा कर्म कुर्वन्मोक्षाख्यां शांतिं यस्मादाप्नोति तस्माच्च त्वया संगं त्यक्त्वा कर्म कर्त्तव्यमिति योजना विपक्षे दोषमाह अयुक्त इति युक्तस्त्वं या करोति ईश्वरायेति फलं परित्यज्य

यस्माच्च युक्त ईश्वराय कर्माणि करोमि न मम फलायेत्येवं समाहितः सन् कर्मफलं त्यक्त्वा परित्यज्य शांतिं मोक्षाख्यामाप्नोति नैष्ठिकीं निष्ठायां भवां सत्वशुद्धिज्ञानप्राप्तिकर्मसंन्यासज्ञाननिष्ठाक्रमेणेति वाक्यशेषः यस्तु पुनः अयुक्त अ

युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीं । अयुक्तः कामकारेण फले सक्तो निबध्यते १२

समाहितः कामकारेण करणं कारः कामस्य कारः कामकारस्तेन कामकारेण कामप्रेरिततयेत्यर्थः । मम फलायेदं करोमि कर्मेत्येवं फले सक्तो निबध्यते । अतस्त्वं युक्तो भवेत्यर्थः । १२ । श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु । श्रीरामाय

कर्म कुर्वन्निति शेषः नैष्ठिकीं शांतिं रित्येतदेव विशदयति सत्वेति द्वितीयमर्द्धं विभज्यते यस्त्विति असमाधानदोषादर्जुनस्य नियोगं दर्शयति । अतस्त्वमिति १२ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु । श्रीरामचंद्राय नमः । श्रीरामाय नमः

तर्हि फलेसक्तिं त्यक्त्वा सर्वैरपि कर्म कर्त्तव्यमिति कर्मसंन्यासस्य निरवकाशत्वमित्याशंक्याविदुषः सकाशाद्विदुषो विशेषं द
र्शयति ॥ यस्त्विति ॥ सर्वकर्मपरित्यागे प्राप्तं मरणं व्यावर्त्तयति ॥ आस्त इति ॥ वृत्तिं लभमानोपि शरीरतापेनाध्यात्मिकादिना
तप्यमानस्तिष्ठतीति चेन्नेत्याह ॥ सुखमिति ॥ कार्यकारणसंघातपारवश्यं पर्युदस्यति वशीति ॥ आसनस्यापेक्षितमधि

यस्तु परमार्थदर्शी स सर्वाणि कर्माणि सर्वकर्माणि संन्यस्य परित्यज्य नित्यं नैमित्तिकं काम्यं प्रतिषि
द्धं च तानि सर्वाणि कर्माणि मनसा विवेकबुद्ध्या कर्मादिवकर्मदर्शनेन संन्यस्येत्यर्थः ॥ आस्ते तिष्ठति सुखं

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ॥ ॥

त्यक्तवाङ्मनःकायचेष्टो यतिः निरायासः प्रसन्नचित्तः आत्मनोन्यत्र निवृत्तबाह्यसर्वप्रयोजन इ
ति सुखमास्त इत्युच्यते वशी जितेंद्रिय इत्यर्थः ॥ श्रीसीतारामचंद्रजी प्रसन्नो मरूक ॥ श्रीकृष्ण॥

करणं निर्दिशति ॥ नवेति ॥ देहसंबंधाभिमानाभासत्वमाह ॥ देहीति ॥ मनसा सर्वकर्मसंन्यासेपि लोकसंग्रहार्थं बहिः सर्वक
र्म कर्त्तव्यमिति प्राप्तं प्रत्याह ॥ नैवेति ॥ तान्येव सर्वाणि कर्माणि परित्याज्यानि विशिनष्टि ॥ निसेति ॥ तेषां परित्यागे हेतुमाह
तानीति ॥ यदुक्तं सुखमास्त इति तदुपपादयति ॥ सक्तेति ॥ जितेंद्रियत्वं कायवशीकारस्याप्युपलक्षणं ॥ श्रीरामायनमः

द्वेश्रोत्रे द्वेचक्षुषी द्वेनासिकेवागेकेतिसप्तशीर्षण्यानिशिरोगतानिशब्दाद्युपलब्धिद्वाराणितथापिकथंनवद्वारत्वमधोगताभ्यांपा
यूपस्थाभ्यांसहेत्याह अर्वागिति शरीरस्यपुरसाधर्म्यंस्वामिनापौरैश्चाधिष्ठितत्वेनदर्शयति आत्मेत्यादिना यद्यपिदे
हजीवनत्वाद्देहसंबंधाभिमानाभासवाननवतिष्ठतेतथापिप्रवासीवपरगेहेतत्पूजापरिभवादिभिरपरिहृष्यन्नविषीदन्
व्यामोहादिरहितश्चतिष्ठतीतिमत्वाहतस्मिन्निति विशेषणमाक्षिपति किमिति तदनुपपत्तिमेवापादयति सर्वोहीति

क्वकथमास्तइत्याह नवद्वारेपुरेसप्तशीर्षण्यान्यात्मनउपलब्धिद्वाराण्यर्वाक् द्वेमूत्रपुरीषोत्सर्गार्थेतैर्नव
द्वारंपुरमुच्यतेशरीरंपुरमिवपुरमात्मैकस्वामिकंतदर्थप्रयोजनैश्चेंद्रियमनोबुद्धिविषयैरनेकफलवि
ज्ञानस्योत्पादकैःपौरैरिवाधिष्ठितंतस्मिन्नवद्वारेपुरेदेहीसर्वकर्माणिसंन्यस्यास्तइतिकिंविशेषणेन

नवद्वारेपुरेदेहीनैवकुर्वन्नकारयन् ॥ १३ ॥ श्रीः ॥

सर्वोहिदेहीसंन्यास्यसंन्यासीवादेहएवास्तेतत्रानर्थकंविशेषणमित्युच्यते यस्त्वज्ञोदेहीदेहेंद्रियसंघात
मात्रात्मदर्शीसर्वोपिगेहेभूमावासनेवासइतिमन्यते ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीकृष्णायनमः

सर्वसाधारणेदेहावस्थानेसंन्यस्यदेहेतिष्ठतिविद्वानिति विशेषणमकिंचित्करमितिफलितमाह तत्रेति विशेषण
फलंदर्शयन्नुत्तरमाह उच्यतइति किमविवेकिनंप्रतिविशेषणानर्थक्यंचोद्यते किंवाविवेकिनंप्रतीतिविकल्प्याद्य
मंगीकरोति यस्त्विति अज्ञत्वंदेहित्वेहेतुस्तदेवदेहित्वंस्फुटयति देहेति श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ ॥

संघातात्मदर्शिनोपि देहे स्थितिप्रतिभासः स्यादिति चेन्नेत्याह। नहीति। द्वितीयं दूषयति देहादीति गृहादिषु देहस्यावस्थानेनात्मावस्थानभ्रमव्यावृत्त्यर्थं देहे विद्वानास्त इति विशेषणमुपपद्यते विवेकवतो देहेऽवस्थानप्रतिभाससंभवादित्यर्थः। ननु विवेकिनो देहेऽवस्थानप्रतिभाने देहव्यापारात्मनां कर्मणां तस्मिन्नसंगभावात्तत्यागे न कुतस्तस्य देहेऽवस्थानमुच्यते तत्राह परकर्मणां चेति। ननु विवेकिनो दिगाद्यनवच्छिन्नबाह्याभ्यंतरादविक्रिय ब्रह्मात्मतां मन्यमानस्य कुतो देहेऽवस्थानमास्थातुं

नहि देहमात्रात्मदर्शिनो गेह इव देह आस इति प्रत्ययः संभवति देहादिसंघातव्यतिरिक्तात्मदर्शिनस्तु देह आस इति प्रत्यय उपपद्यते परकर्मणां च परस्मिन्नात्मनि अविद्ययाध्यारोपितानां विद्यया विवेकज्ञानेन मनसा संन्यास उपपद्यते। उत्पन्नविवेकविज्ञानस्य सर्वकर्मसंन्यासिनोपि गेह इव देह एव नवद्वारे पुरे आसनं प्रारब्धफलकर्मशेषसंस्कारानुवृत्त्या देह एव विशेषविज्ञानोत्पत्तेर्देह एवास्त इत्यस्त्येव विशेषणफलं। श्रीरामायनमः।

शक्यते तत्राह। उत्पन्नेति। तत्र हेतुमाह प्रारब्धेति। यद्धि प्रारब्धफलं धर्माधर्मात्मकं कर्म तस्योपभुक्तस्य शेषादनुपभुक्ताद्देहादिसंस्कारोऽनुवर्तते तदनुवृत्त्या च तत्रैव देहे विशेषविज्ञानमवस्थानविषयमुपपद्यते। अतो विवेकवतः संन्यासिनो देहेऽवस्थानव्यपदेशः संभवतीत्यर्थः। अविद्वत्प्रत्ययापेक्षया विशेषणासंभवेपि विद्वत्प्रत्ययापेक्षया विशेषणमर्थवदित्युपसंहरति देह एवेति। श्रीसीतारामचंद्रायनमः। श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु। श्रीरामायनमोनमः॥ ॥

देहस्यावस्थानविषयो विद्वत्त्वस्य यस्तदविषयश्चाविद्वत्त्वस्य यस्तयोरेवं भेदे विद्वत्त्वस्यापेक्षया विशेषणमर्थवदित्युपसंहरन्नेवहेतुं विशदयति ॥ विद्वदिति ॥ आरोपितकर्तृत्वाद्यभावेपि स्वगतकर्तृत्वादिदुर्वारमित्याशंकामनूद्य दूषयति ॥ यद्यपीत्यादिना ॥ क्रियासु प्रवर्तयन्नास्त इति पूर्वेण संबंधः पूर्वस्यापि शंकि तु रेवमेव संबंधः कर्तृत्वं कारयितृत्वं चात्मनो नेत्यत्र विचारयति ॥ किमिति ॥ यत्कर्तृत्वं कारयितृत्वं च तत् किं देहिनः स्वात्मसमवायि सदेव संन्यासान्न भवतीत्युच्यते ॥

विद्वदविद्वत्त्वस्य भेदापेक्षत्वाद्यद्यपि कार्यकरणकर्माणि अविद्ययात्मन्यध्यारोपितानि संन्यस्यास्ते इत्युक्तं तथापि स्वात्मसमवायित्वात्कर्तृत्वं कारयितृत्वं च स्यादित्याशंक्याह नैव कुर्वन्स्वयं न च कार्यकरणानि कारयन्क्रियासु प्रवर्तयन् ॥ किं तत्कर्तृत्वं च कारयितृत्वं च देहिनः स्वात्मसमवायि सत्संन्यासान्न संभवति यथा गच्छतो गतिः गमनव्यापारपरित्यागेन स्यात्तद्वत् किं वा स्वत एवात्मनो नास्तीत्यत्रोच्यते नास्यात्मनः स्वतः कर्तृत्वं कारयितृत्वं उक्तं ह्यविकार्योयमुच्यते शरीरस्थोपि कौंतेय न करोति न लिप्यत इति ध्यायतीव लेलायतीवेति च श्रुतेः ॥ १३ ॥ श्रीरामायनमः ॥

यथा गच्छतो देवदत्तस्य स्वगतैव गतिस्तत्स्थित्यत्यागान्न भवति ॥ अथवा स्वारस्येन कर्तृत्वं कारयितृत्वं चात्मनो नास्तीति वक्तव्यमाद्ये सक्रियत्वं द्वितीये कूटस्थत्वमित्यर्थः ॥ द्वितीयपक्षमाश्रित्योत्तरमाह ॥ अत्रेति ॥ उक्तेर्थे वाक्योपक्रममनुकूलयति ॥ उक्तं हीति ॥ तत्रैव वाक्यशेषमपि संवादयति ॥ शरीरस्थोपीति ॥ स्मृत्यर्थे श्रुतिमपि दर्शयति ॥ ध्यायतीवेति उपाधिगतैव सर्वा विक्रिया नात्मनि स्वतोऽस्तीत्यर्थः ॥ १३ ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीसीतारामचंद्रायनमोनमः ॥

गी॰ व्या॰
१५९

आत्मनो यदुक्तं कारयितृत्वं नास्तीति तत्प्रपंचयति ॥ नेत्यादिना ॥ यद्यपि लोकस्य कर्तृत्वं न सृजतीति नास्ति कारयितृत्वं त
थापि रथशकटादीन् कुर्वन् भवति कर्त्तेत्याशंक्याह ॥ न कर्माणीति ॥ तथापि भोजयितृत्वेन विक्रियावत्त्वं दुष्परिहारमि
त्याशंक्याह ॥ न कर्मेति ॥ कस्तर्हि प्रवर्त्तकत्वं तदाह ॥ स्वभावस्त्विति ॥ कुर्विति ॥ कर्तृत्वं लोकस्य न सृजत्यात्मेति संबंधः ॥ र
थादीनां कर्मत्वं साधयति ॥ ईप्सिततेति ॥ आत्मनो देहादिस्वामित्वेन प्रभुत्वं रथादीन् कृतवतो लोकस्य रथादिफलेन सं

न कर्तृत्वं स्वतः कुर्विति नापि कर्माणि रथघटप्रासादादीनि ईप्सिततमानि लोकस्य सृजति उत्पाद
यति प्रभुरात्मा नापि रथादिकृतवतस्तत्फलेन संयोगं कर्मफलसंयोगं यदि किंचिदपि स्वतो न

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ॥ न कर्मफलसंयोगं स्वभावस्तु प्रवर्त्तते ॥ १४ ॥

करोति न कारयति च देही कस्तर्हि कुर्वन् कारयंश्च प्रवर्त्तत इत्युच्यते स्वभावस्तु स्वो भावः स्वभावः
अविद्यालक्षणा प्रकृतिः माया प्रवर्त्तते देहीन दैवी हीत्यादि वक्ष्यमाणा ॥ १४ ॥ श्रीरामायनमो नमः ॥

बंधमपि न सृजत्यात्मेति आत्मनो भोजयितृत्वं प्रत्याचष्टे नापीति चतुर्थपादं शंकोत्तरत्वेनावतारयति ॥ यदीत्यादिना
स्वभाववादस्तर्हीत्याशंक्य व्याकरोत्यविद्यालक्षणेति प्रकृतेर्विद्याभावत्वं व्युदसितुं मायेत्युक्तं सा च सप्तममेव वक्ष्यते तेन प्र
धानविलक्षणेत्याह ॥ दैवीहीति ॥ १४ ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीरामाय नमः ॥

आ॰ गी॰
५

शिव
१५९

कर्तृत्वभोक्तृत्वैश्वर्याण्यात्मनोऽविद्याकृतानीत्युक्तमिदानीमीश्वरे संन्यस्तसमस्तव्यापारस्य तदेकशरणस्य दुरितं सुकृतं वा तत्
दनुग्रहार्थं भगवानादत्ते मदेकशरणो मत्प्रीत्यर्थं कर्म कुर्वाणो दुःकृताद्यपनोदनेनानुग्राह्यो मयेति प्रत्ययभाक्त्वादित्याशं
क्यसोपि परमार्थतो नास्त्यस्ति अविक्रियत्वादित्याह परमार्थतस्त्विति ॥ कथं तर्हि भक्तानामनुग्राह्यत्वमीश्वरस्यानुग्र

परमार्थतस्तु ॥ नादत्ते न गृह्णाति भक्तस्यापि कस्यचित्पापं न चैवादत्ते सुकृतं विभुः भक्तैः प्रयुक्तं किमर्थं तर्हि भक्तैः
पूजादिलक्षणं यागदानहोमादिकं च सुकृतं प्रयुज्यते इत्यत आह अज्ञानेनावृतं विवेकविज्ञानं तेन मुह्यंति करोमि
कारयामि भोक्ष्ये भोजयामीत्येवं मोहं गच्छंति ॥ अविवेकिनः संसारिणो जंतवः १५ ज्ञानेन तु येनाज्ञानेनावृता

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ॥ १५ ॥ ज्ञानेन तु
तदज्ञानं येषां नाशितमात्मनः ॥ तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं ॥ १६ ॥ श्रीरामाय नमः

मुह्यंति जंतवस्तदज्ञानं येषां जंतूनां विवेकज्ञानेनात्मविषयेण नाशितमात्मनो भवति ॥ तेषां जंतूनामादित्य
वद्यथादित्यः समस्तं रूपजातमवभासयति तद्वत् ज्ञानं ज्ञेयं वस्तु सर्वं प्रकाशयति तत्परं परमार्थतत्त्वं १६

हीतृत्वमिति प्रसिद्धिस्तत्राह अज्ञानेनेति पूर्वार्द्धगतान्यक्षराणि व्याख्याय आकांक्षापूर्वकमुत्तरार्द्धमवतार्य व्याचष्टे किं
मर्थमित्यादिना १५ तर्हि सर्वेषामनाद्यज्ञानावृतज्ञानत्वात्तद्व्यामोहापोहाभावाकाकुतः संसारनिवृत्तिरितित त्राह ज्ञा
नेनेति सर्वमिति पूर्णत्वमुच्यते ज्ञेयस्यैव वस्तुनस्तत्परमिति विशेषणं तद्व्याचष्टे परमार्थतत्त्वमिति १६ श्रीरामाय०

विदुषां विविदिषूणां चांतरंगानि विद्यापरिपाकसाधनान्युपदिश्य तु तरश्लोकस्यापेक्षितं पूरयति ॥ यत्परमिति ॥ तस्मि
न्परमार्थतत्वे परस्मिन् ब्रह्मणि बाह्यं विषयमपोह्य गता प्रवृत्ता श्रवणमनननिदिध्यासनैरसकृत्तदनुष्ठितैर्बुद्धिः सा
क्षात्काररलक्षणा येषां ते तथेति प्रथमविशेषणं विभजते ॥ तस्मिन्निति ॥ तर्हि बोद्धा जीवो बोद्धव्यं ब्रह्मेति जीवब्रह्मभे
दाभ्युपगमो नेत्याह ॥ तदात्मान इति ॥ कल्पितं बोद्धृबोद्धव्यत्वं वस्तुतस्तु न भेदोस्तीसंगीकृत्य व्याचष्टे तदेवेति ॥

यत्परं परमार्थतत्वं निष्ठाज्ञानप्रकाशितं ॥ तस्मिन् गता बुद्धिर्येषां ते तद्बुद्धयः तदात्मा
नः तदेव परंब्रह्म आत्मा येषां ते तदात्मानः तन्निष्ठा निष्ठा अभिनिवेशस्तात्पर्यं सर्वाणि

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ॥

कर्माणि संन्यस्य ब्रह्मण्येवावस्थानं येषां ते तन्निष्ठास्तत्परायणाश्च तदेव परमयनं प
रागतिर्येषां भवति ते तत्परायणाः केवलात्मरतय इत्यर्थः ॥ श्रीरामायनमः ॥ ॥

ननु देहादात्माभिमानमपनीय ब्रह्मण्येवाहमस्मीत्यवस्थानं तत्तदनुष्ठीयमानकर्मप्रतिबंधान्न सिध्यतीत्या
शंक्य विशेषणांतरमादत्ते तन्निष्ठा इति तत्र निष्ठाशब्दार्थं दर्शयन् विवक्षितमर्थमाह ॥ निष्ठेत्यादिना ॥ तथापि पुरु
षार्थांतरापेक्षाप्रतिबंधात् कथं यथोक्ते ब्रह्मण्यवस्थानं सेद्धुं पारयति ॥ तत्परायणाश्चेति ॥ यथोक्तानामधिका
रिणां परमपुरुषार्थस्योक्तब्रह्मज्ञानतिरेकान्नान्यत्रासक्तिरिति तात्पर्यार्थमाह ॥ केवलेति ॥ श्रीरामायनमः ॥

ननुयथोक्तविशेषणवतांवर्त्तमानदेहपातेपिदेहांतरपरिग्रहव्यग्रतयाकुतोयथोक्तेब्रह्मणिअवस्थानमास्थातुंशक्यतेतत्राह तेगच्छंतीति सतिसंसारकारणेदुरितादौसंसारप्रसरस्यदुर्वारत्वान्नापुनरावृत्तिसिद्धिरित्याशंक्याह ज्ञानेति उक्त

येषांज्ञानेननाशितमात्मनोऽज्ञानंतेगच्छंत्येवंविधाअपुनरावृत्तिमपुनर्देहसंबंधंज्ञाननिर्धूतकल्मषाः यथोक्ते

गच्छंत्यपुनरावृत्तिंज्ञाननिर्धूतकल्मषाः ॥ १७ ॥ श्रीः

नज्ञानेननिर्धूतोनिवृत्तोनाशितःकल्मषःपापादिसंसारकारणंदोषोयेषांतेज्ञाननिर्धूतकल्मषाःयतयइत्यर्थः १७

विशेषणसंपत्त्यादर्शितफलप्राप्तित्वमाश्रमांतरेषुअसंभावितमितिमन्वानोविशिनष्टि यतयइति १७ श्रीरामायनमः

यदपुनरावृत्तिसाधनंतत्वज्ञानंतदेवप्रश्नद्वारेणविवृणोति येषामित्यादिना विद्यावेदार्थविज्ञानमिसंगीकृत्यविनयंव्याचष्टे विनयइति उपशमो निरहंकारत्वमनौद्धत्यंपदार्थमेवमुक्त्वावाक्यार्थंदर्शयति विद्वानिति गवीत्याद्यनूद्यवाक्यार्थंकथयति विद्येति हस्त्यादौपंडिताःसमदर्शिनइतिउत्तरत्रसंबंधः तत्रतत्रप्राणिप्रभेदेषुतत्तद्गुणैस्तत्तन्निमित्तसंस्कारैश्च संस्पृष्टत्वसंभवान्नब्रह्मणःसमत्वमित्याशंक्याह सत्वादीति तन्नजैश्चेत्यत्रतच्छब्देनसत्वमेवगृह्यते सात्विकसंस्का

येषांज्ञानेननाशितमात्मनोऽज्ञानंतेपंडिताःकथंतत्वंपश्यंतीत्युच्यते विद्याविनयसंपन्नेविद्याचविनयश्चविद्याविनयौविद्यात्मबोधोविनयश्चोपशमस्ताभ्यांविद्याविनयाभ्यांसंपन्नोविद्वान्विनीतश्चयोब्राह्मणस्तस्मिन्ब्राह्मणेगविहस्तिनिशुनिचैवश्वपाकेचपंडिताःसमदर्शिनोविद्याविनयसंपन्नेउत्तमसंस्कारवतिब्रा

विद्याविनयसंपन्नेब्राह्मणेगविहस्तिनि शुनिचैवश्वपाकेचपंडिताःसमदर्शिनः १८

ह्मणेसात्विकेमध्यमायांचराजस्यांगविसंस्कारहीनायांअत्यंतमेवकेवलतामसेहस्त्यादौचसत्वादिगुणैस्तज्जैश्चसंस्कारैस्तथाराजसैस्तथातामसैश्चसंस्कारैरत्यंतमेवासंस्पृष्टंसममेकमविक्रियंब्रह्मद्रष्टुंशीलंयेषांते पंडिताःसमदर्शिनः १८ रैरिवराजससंस्कारैरपिसर्वथैवासंस्पृष्टंब्रह्मेत्याह तथेति राजसैरिवतामसैरपि संस्कारैर्ब्रह्मात्यंतमेवासंस्पृष्टमित्याह तथातामसैरिति ब्रह्मणोऽद्वितीयत्वंकूटस्थत्वमसंगत्वंचोक्तेर्थेहेतुरितिमत्वासमशब्दार्थमाह सममिति समदर्शित्वमेवपांडित्यंतद्व्याचष्टे ब्रह्मेति १८ श्रीसीतारामचंद्रजीप्रसन्नोमस्तु

सात्विकेषुराजसेषुतामसेषुचसमत्वदर्शनमनुचितमितिशंकते ॥ नन्विति ॥ सर्वत्रसमदर्शिनस्त्वच्छब्देनपरामृश्यंते ॥ तेषांदो
षवत्वाद्भोज्यान्नत्वमित्यत्रप्रमाणमाह ॥ समासमाभ्यामिति ॥ समानामध्ययनादिभिःसमानधर्मकाणांवस्त्रालंकारादि
पूजयाविषमेप्रतिपत्तिविशेषेक्रियमाणेसति ॥ असमानांचाऽसमानधर्मकाणांकस्यचिदेकवेदत्वमपरमपरस्यद्विवेदत्व
मित्यादिधर्मवतांप्रागुक्तयापूजयासमेप्रतिपत्तिविशेषेक्रियमाणेपूजयित्वापुरुषविशेषंज्ञात्वाप्रतिपत्तिमकुर्वन् ॥ ध

नन्वभोज्यान्नास्तेदोषवंतःसमासमाभ्यांविषमसमेपूजातइतिस्मृतेरितिचेन्नदोषवंतःकथं ॥ इहैवजीवद्भिरेवतैः ॥

इहैवतैर्जितःसर्गोयेषांसाम्येस्थितंमनः ॥

समदर्शिभिःपंडितैर्जितोवशीकृतःसर्गोजन्मयेषांसाम्येसर्वभूतेषुब्रह्मणिसमभावेस्थितंनिश्चलीकृतंमनोंतःक

नाद्भर्मोत्त्वह्रीयते ॥ तेनसात्विकेराजसतामसयोश्चसमबुद्धिंकुर्वन्प्रत्यवेतीत्यर्थः ॥ उत्तरत्वेनोत्तरश्लोकमवतारयति ॥ नदोषवंत
इति ॥ स्मृत्यवष्टंभेनसर्वसत्वेषुसमत्वदर्शिनांदोषवत्वमुक्तंकथंनास्तीतिप्रतिज्ञामात्रेणसिद्ध्यतीतिशंकते ॥ कथमिति ॥ स्मृ
तेर्गतिमग्रेवदिष्यन्निर्दोषत्वंसमदर्शिनांविशदयति ॥ इहैवेति ॥ सर्वेषांचेतनानांसाम्येप्रवणमानसांब्रह्मलोकगमनमंतरेणा
स्मिन्नेवदेहेपरिभूतजन्मनामशेषदोषराहित्येहेतुमाह ॥ निर्दोषंहीति ॥ वर्त्तमानोदेहःसप्तम्यापरिगृह्यते ॥ तानेवसमदर्शिनोवि

ननुब्रह्मणो निर्दोषत्वमसिद्धं दोषवत्श्वपाकादिषु तद्दोषैर्दोषवत्त्वोपलंभसंभवात्तत्राह ॥ यद्यपीति ॥ यस्मात्तन्निर्दोषं तस्मात् तस्मिन् ब्रह्मणि स्थितैर्निर्दोषैः सर्गोपि जितः नतु संबंधः ब्रह्मणोगुणभूयस्त्वादल्पीयान् दोषोपि स्यादित्याशंक्याह ॥ नापीति ॥ चेतनस्य स्वगुणविशेषविशिष्टत्वमनिष्टं निर्गुणत्वश्रवणादिषु उक्तं इच्छाबुद्धिसुखादीनां परिशेषादात्मधर्मत्वस्य केश्चिन्निश्चितत्वादित्याशंक्याह ॥ वक्ष्यति चेति ॥ आत्मनो निर्गुणत्वे वाक्यशेषं प्रमाणयति ॥ अनादित्वादिति ॥ चकारो वक्ष्यतीत्यनेन संबंधार्थः ॥ गुणदोषवशा

निर्दोषं यद्यपि दोषवत्सु श्वपाकादिषु मूढैस्तद्दोषैर्दोषवदिव विभाव्यते तथापि तद्दोषैरसंस्पृष्टं इति निर्दोषं दोषवर्जितं हि यस्मान्नापि स्वगुणभेदभिन्नं निर्गुणत्वाच्चैतन्यस्य वक्ष्यति च भगवानिच्छादीनां क्षेत्रधर्मत्व

निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥१९॥

मनादित्वान्निर्गुणत्वादिति च नाप्यंत्या विशेषा आत्मनो भेदकल्पकाः संति प्रतिशरीरं तेषां सत्वे प्रमाणानुपपत्तेरतः समं ब्रह्मैकं च तस्माद्ब्रह्मण्येव ते स्थिताः ॥ श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु ॥

दात्मनो भेदाभावेपि भेदोंत्यविशेषेभ्यो भविष्यतीति प्रसंगादाशंक्य दूषयति ॥ नापीति ॥ प्रतिशरीरमात्मभेदासिद्धौ तद्धेतुत्वेन तेषां सत्वं तेषां च सत्वे प्रतिशरीरमात्मभेदसिद्धिरिति परस्पराश्रयत्वमभिप्रेत्य हेतुमाह ॥ प्रतिशरीरमिति ॥ आत्मनो भेदकाभावे फलितमाह ॥ अतइति ॥ समत्वमेव व्याकरोति ॥ एकं चेति ॥ ब्रह्मणो निर्विशेषत्वेनैकत्वाज्जीवानां च भेदकाभावेनैकत्वस्योक्तत्वादेकलक्षणत्वादेकत्वं जीवब्रह्मणोरैक्यमित्याह ॥ तस्मादिति ॥ श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु ॥ श्रीकृष्णः

जीवब्रह्मणोरेकत्वे जीवानां ब्रह्मवन्निर्दोषत्वं सिद्धतीत्याह तस्मान्नेति तच्छब्दार्थमेव स्फोरयति देहादीति यदि सर्वेसत्वेषु समदर्शनमदुष्टमिष्टं तर्हि कथं गौतमसूत्रमित्याशंक्याह देहादिसंघातेति सूत्रस्य यथोक्ताभिमानवद्विषयत्वेगमकमाह पूजेति यस्मिंश्चतुर्वेदिनामेव सतां पूजया वैषम्यं यदि वा चतुर्वेदानां षडंगविदां ब्रह्मविदां च पूजया साम्यं तदा तेषामुक्तपूजाविषयाणां केषांचिन्मनो विकारसंभवे कर्तृत्वप्रत्ययवैतीत्यविद्वद्विषयत्वं सूत्रस्य प्रतिभातीत्यर्थः तत्रैवानुभवमनुकूलत्वेनोदाहरति दृश्यते हीति देहादिसंघाताभिमानवतां गुणदोषसंबंधसंभवात्तद्विषयं सूत्रमित्युक्तमिदानीं ब्रह्मात्मदर्शना

तस्मान्न दोषगंधमात्रमपि तान् स्पृशतीति देहादिसंघातात्मदर्शनाभावात्तेषां देहादिसंघातात्मदर्शनाभिमानवद्विषयं तत्तु सूत्रं समासमाभ्यां विषमसमे पूजात इति पूजाविषयत्वेन विशेषणात् दृश्यते हि ब्रह्मवित् षडंगविच्चतुर्वेदविदिति पूजादानादौ गुणविशेषसंबंधः कारणं ब्रह्म तु सर्वगुणदोषसंबंधवर्जितमित्यतो ब्रह्मणि स्थिता इत्युक्तं कर्मविषयं च समासमाभ्यामित्यादीदं तु सर्वकर्मसंन्यासिविषयं प्रस्तुतं सर्वकर्माणि मनसेत्यारभ्याध्यायपरिसमाप्तेः ॥ १९ ॥ श्रीसीतारामचंद्रजी प्रसन्नो भव ॥

भिमानवतां गुणदोषासंबंधान्न तद्विषयं सूत्रमित्यभिप्रेत्याह ब्रह्मत्विति ॥ इतश्चानेदं सूत्रं ब्रह्मविद्विषयमित्याह कर्मीति ॥ तत्रैव पूजापरिसंभवादित्यर्थः ॥ ननु यत्र समत्वदर्शनं तत्रैवेदं सूत्रं न तु कर्मण्यकर्मणि वेति विभागोऽस्ति तत्राह इदं त्विति ॥ समत्वदर्शनस्य संन्यासिविषयत्वे हेतुमाह सर्वकर्माणीति ॥ अध्यायपरिसमाप्तेः सर्वकर्माणीत्यारभ्य तत्र तत्र सर्वकर्मसंन्यासाभिधानात्तद्विषयमिदं समत्वदर्शनं गम्यते ॥ तत्र च निरहंकारे निरवकाशं सूत्रमित्यर्थः ॥ १९ ॥

नन्विष्टानिष्टप्राप्तिभ्यां हर्षविषादौ विद्वानपि कुर्वन्निर्दोषे ब्रह्मणि कथं स्थितिं लभत इत्याशंक्याकांक्षितं पूरयन्नुत्तरश्लोकमुत्थापयति यस्मादिति आत्मज्ञाननिष्ठावतो विदुषो हर्षविषादनिमित्ताभावान्न तावुचिताविस्याह स्थिरबुद्धिरिति नन्तु हर्षविषादनिमित्तत्वं प्रियाप्रिययोः सिद्धं कथं तत्प्राप्त्या हर्षोद्वेगौ न कर्त्तव्याविति नियुज्यते तत्राह देहेति विदुषो प्रियाप्रियप्राप्तिसामर्थ्यादेव हर्षविषादौ दुर्वाराविस्याशंक्याह नकेवलेति अद्वितीयात्मदर्शनशीलस्य व्यतिरिक्तप्रिया

यस्मान्निर्दोषं समं ब्रह्मात्मा तस्मात् नप्रहृष्येत् प्रहर्षं न कुर्यात् प्रियमिष्टं प्राप्य नो द्विजेत् प्राप्य चाप्रियं अनिष्टं लब्ध्वा देहमात्रात्मदर्शिनां हि प्रियाप्रियप्राप्यप्राप्ती हर्षविषादौ कुर्वाते न केवलात्मदर्शिनस्तस्य प्रियाप्रि

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियं स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः २०

यप्राप्त्यसंभवात् किंच सर्वभूतेष्वेकः समो निर्दोषः आत्मेति स्थिरा निर्विचिकित्सा संदेहरहिता बुद्धिर्यस्य स स्थिरबुद्धिरसंमूढः संमोहवर्जितश्च स्याद्यथोक्तब्रह्मवित् ब्रह्मणि स्थितोऽकर्मकृत् सर्वकर्मसंन्यासीत्यर्थः २०

प्रियप्राप्त्ययोगान्न तन्निमित्तौ हर्षविषादावित्यर्थः इतोपि विदुषो हर्षविषादावसंभावितावित्याह किंचेति निर्दोषे ब्रह्मणि प्रागुक्ते दृढप्रतिपत्तिः संमोहेन हर्षादिहेतुना रहितो यथोक्ते सर्वदोषरहिते ब्रह्मण्यहमस्मीति विद्यावानशेषदोषशून्ये तस्मिन्नेव ब्रह्मणि स्थितस्तदनुरोधात् कर्माण्यनुष्यमाणो नैव हर्षविषादभागी भवितुमलमित्यर्थः २० श्रीरामायनमः

शब्दादिविषयप्रतीतिप्रतिबंधान्नकस्यचिदपिब्रह्मणिस्थितिः सिद्ध्येदित्याशंक्याह । किंचेति । नकेवलंपूर्वोक्तरीत्याब्रह्मणिस्थितो
हर्षविषादरहितः किंतुविधांतरेणापीत्यर्थः । यावद्यावद्विषयेषुरागरूपमावरणंनिवर्त्स्यतेतावत्तावदात्मस्वरूपसुखमभि
व्यक्तंभवतीत्याह । बाह्येति । नकेवलमसक्तात्माशमवशादेवसुखंविंदति । किंतुब्रह्मसमाधिनासमाहितांतःकरणःसुखम

किंच । तद्ब्रह्मणिस्थितः । बाह्यस्पर्शेषुबाह्याश्चतेस्पर्शाश्चस्पृश्यंतइतिस्पर्शाः शब्दादयोविषया
स्तेषुबाह्यस्पर्शेषुअसक्तआत्मांऽतःकरणंयस्यसोयमसक्तात्माविषयेषुप्रीतिवर्जितःसन्
विंदतिलभतेआत्मनियत्सुखंतद्विंदतीत्येतत्सब्रह्मयोगयुक्तात्माब्रह्मणियोगःसमाधिःब्र

बाह्यस्पर्शेष्वसक्तात्माविंदत्यात्मनियत्सुखं । सब्रह्मयोगयुक्तात्मासुखमक्षयमश्नुते २१ ।

ह्मयोगस्तेनब्रह्मयोगेनयुक्तःसमाहितस्तस्मिन्व्यापृतआत्मांतःकरणंयस्यसब्रह्मयोगयु
क्तात्मासुखमक्षयमश्नुते प्राप्नोति । तस्माद्बाह्यविषयप्रीतेः क्षणिकायाइंद्रियाणिनिवर्त्त
येदात्मन्यक्षयसुखार्थीत्यर्थः । २१ । श्रीसीतारामचंद्रायनमः । श्रीरामचंद्रायनमोनमः ।

नंतमाप्नोतीत्याह । सब्रह्मेति । तत्रपूर्वार्द्धंव्याचष्टे । बाह्यास्वेति । समाधानाधीनसम्यग्ज्ञानद्वारानिरतिशयसुखप्राप्तिमु
त्तरार्द्धव्याख्यानेनकथयति । ब्रह्मणीत्यादिना । शब्दादिविषयविमुखस्यानंतसुखाप्तिसंभवात्तदर्थिनाप्रयत्नेनविषयवै
मुख्यंकर्त्तव्यमितिशिष्यशिक्षार्थमाह । तस्मादिति । २१ । श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु । श्रीरामचंद्रायनमोनमः ।

तत्रैवहेतुत्वंतरपरत्वेनोत्तरश्लोकमवतारयति इतश्चेति॥ विषयेभ्यःसकाशादिंद्रियाणीतिशेषः वैराग्यार्थमेवंवैषयिकानिसुखानि दूषयति येहीति॥ ननुविषयेंद्रियसंयोगसंप्रसूतेषुभोगेषुजंतूनामभिरुचिदर्शनात्कुतस्तेषांदुःखयोनित्वमित्याशंक्याविवेकिनांतेषांसंगेपिनविवेकिनामित्याह॥ आद्यंतवंतइति यस्मादाधिव्याधिजन्ममरणादिसहितेभ्यःसमागमादिक्लेशभागिभ्यश्चविषयेंद्रियसंबंधेभ्योभोगाःसुखलवानुभवाजायंते तस्मात्तेदुःखहेतवोभवंतीतियोजना॥ अविद्याकार्यत्वंदुःखानांयुक्तमित्यभिप्रेत्याह अविद्येति॥ भोगानांदुःखयोनित्वेमानमनुभवमुपन्यस्यति॥ दृश्यंतेहीति॥ ऐहिकानांभोगानांदुःखनिमित्तत्वेपिनामुष्मिकानां

इतश्चनिवर्त्तयेत्॥ येहियस्मात्संस्पर्शजाविषयेंद्रियसंस्पर्शेभ्योजाताभोगाभुक्तयोदुःखयोनयएवते॥ अविद्याकृतत्वात् दृश्यंतेह्याध्यात्मिकादीनिदुःखानितन्निमित्तान्येवयथेहलोकेतथापरलोकेपीतिगम्यतेएवशब्दान्नसंसारेसुखस्यगंधमात्रमप्यस्तीतिबुद्ध्वाविषयमृगतृष्णिकाया इंद्रियाणिनिवर्त्तयेन्नकेवलंदुःखयोनयआद्यंतवंतश्चआदिर्विषयेंद्रियसंयोगोभो

येहिसंस्पर्शजाभोगादुःखयोनयएवते॥ आद्यंतवंतःकौंतेयनतेषुरमतेबुधः॥ २२॥ श्रीः॥

गानामंतश्चतद्वियोगएवातआद्यंतवंतोऽनित्यामध्यक्षणभावित्वादित्यर्थःकौंतेयनतेषुभोगेषुरमतेबुधोविवेकीअवगतपरमार्थतत्त्वोबुधइति अत्यंतमूढानामेवहिविषयेषुरतिर्दृश्यतेयथापशुप्रभृतीनां॥ २२॥ श्रीरामचंद्रायनमः॥ ॥

तथात्वमननुभवादित्याशंक्यावधारणसामर्थ्यात्तुसिद्धमर्थमाह यथेति॥ पूर्वार्धस्याक्षरार्थमुक्त्वातात्पर्यार्थमाह नेत्यादिना॥ इतश्चविषयेभ्यःसकाशादिंद्रियाणिनिवर्त्तयितव्यानीत्याह नकेवलमिति॥ आद्यंतवत्वेमध्यक्षणवर्त्तित्वेनक्षणभंगुरत्वादुपेक्षणीयत्वंभोगानांसिद्ध्यति॥ अस्तिहितेषांक्षणभंगुरत्वंक्षणिकविषयाकारमनोवृत्तिव्यंग्यत्वादितिमन्वानःसन्नाह॥ अतइति॥ बुद्धिपूर्वकारिणांविवेकवतांभोगेषूपेक्षोपलब्धेश्चतेषामाभासत्वंप्रतिभातीत्याह नतेष्विति॥ प्रतीकोपादानमिदंपुनर्व्याख्यानमितिनपुनरुक्तिः॥ ननुकेषांचिद्भोगेष्वभिरुचिरुपलभ्यतेतत्राह॥ अत्यंतेति॥ २२॥ श्रीसीतारामचंद्रजीप्रसन्नोमस्तु॥ श्रीरामचंद्रायनमः॥ श्री॥

उत्तरश्लोकस्य तात्पर्यमाह ॥ अयंचेति ॥ श्रेयोमार्गप्रतिपक्षत्वं कष्टतमत्वे हेतुस्तत्रैव हेत्वंतरमाह ॥ सर्वेति ॥ प्रयत्नाधिक्यस्य कर्त्तव्यत्वे हेतुं सूचयति ॥ दुर्निवार्य इति ॥ प्रसिद्धं हि कामक्रोधोद्भवस्य वेगस्य दुर्न्निवार्यत्वं येन मातरमपि चाधिरोहति पितरमपि हंति तमवश्यं परिहर्त्तव्यं दर्शयति ॥ शक्नोतीति ॥ यथोक्तवेगं बहिरनर्थरूपेण परिणामात्प्रागेव देहांतरुत्पन्नं सोढुं क्षम

अयं च श्रेयोमार्गे प्रतिपक्षी कष्टतमो दोषः सर्वानर्थप्राप्तिहेतुर्दुर्निवार्यश्चेति तत्परिहाराय यत्नाधिक्यं कर्त्तव्यमित्याह भगवान् ॥ शक्नोत्युत्सहत इहैव जीवन्नेव यः सोढुं प्रसहितुं प्राग्पूर्वं शरीरविमोक्षणात् ॥

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ॥

मरणादित्यर्थः मरणसीमाकरणं जीवतोऽवश्यंभावी हि कामक्रोधोद्भवो वेगोऽनंतनिमित्तवान् हि स इति यावन्मरणं तावन्न विश्रंभणीय इत्येतदर्थः ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीः ॥ ॥

ते तं स्तौति ॥ स युक्त इति ॥ मरणसीमाकरणस्य तात्पर्यमाह ॥ मरणेति ॥ प्रसिद्धो हि शब्दः तत्र हेतुमाह ॥ अनंतेति ॥ व्याध्युपहतानां वृद्धानां च कामादिवेगो न भवतीत्याशंक्याह ॥ इति यावदिति ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामायनमः ॥

कामक्रोधोद्भवंवेगंव्याख्यातुमादौकामंमनोविकारविशेषत्वेनव्याचष्टे कामइति कथमस्यमनोविकारविशेषत्वंतत्राह इंद्रि
येति कामोगर्द्धिःतृष्णेत्येतेपर्यायाःसंतःशब्दामनोविकारविशेषेपर्य्यवस्यंतीत्यर्थः क्रोधश्चमनोविकारविशेषस्तद्दर्शया
ह क्रोधश्चेति तमेवक्रोधंस्फुटयति आत्मनइति एवंकामक्रोधौव्याख्यायतयोरुत्कटत्वावस्थात्मनोवेगस्यताभ्यामुत्प

कामइंद्रियगोचरप्राप्तेइष्टेविषयेश्रूयमाणेस्मर्यमाणेवानुभूतेसुखहेतौयागर्द्धिःतृष्णासका
मःक्रोधश्चात्मनःप्रतिकूलेषुदुःखहेतुषुदृश्यमाणेषुश्रूयमाणेषुस्मर्यमाणेषुवायोद्वेषःसक्रो
धःतौकामक्रोधौउद्भवोयस्यवेगस्यसकामक्रोधोद्भवोवेगोरोमांचहृष्टनेत्रवदनादिलिंगोंतःकरण

कामक्रोधोद्भवंवेगंसयुक्तःससुखीनरः ॥२३॥

प्रक्षोभ्यरूपःकामोद्भवोवेगोगात्रप्रकंपप्रस्वेदसंदष्टोष्ठपुटरक्तनेत्रादिलिंगःक्रोधोद्भवोवेगस्तंकामक्रो
धोद्भवंवेगंयःप्रसहतेसोढुंशक्तःसयुक्तोयोगीसुखीचेहलोकेनरः ॥२३॥ श्रीरामचंद्रायनमः॥ ॥

त्तिमुपन्यस्यति ॥ताविति॥ यथोक्तवेगावगमोपायमुपदिशति ॥रोमांचेत्यादिना॥ उभयविधवेगंयोजीवन्नेवसोढुंशक्नोति
तंपुरुषधौरेयत्वेनस्तौति ॥तमित्यादिना॥ २३॥ श्रीसीतारामचंद्रायनमः॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीः॥

ज्ञानस्यात्यंतमंतरंगमात्ममात्रनिष्ठत्वं दर्शयन्प्रकृतं ब्रह्मविदमेव विशिनष्टि । कथंभूतश्चेति । यथांतरेव सुखं न बाह्यैर्विषयैस्त
थांतरेव ज्योतिर्न श्रोत्रादिभिरतो विषयांतरविज्ञानरहित इत्याह । तथेति । यथोक्तविशेषणसमाधिमान् जीवन्नेव मुक्ति
मधिगच्छतीत्याह । स योगीति । आत्मन्यंतरेव सुखमिति बाह्यविषयनिरपेक्षितं विवक्षितमंतराराम त्वं च स्त्र्यादिविषयापे

कथंभूतश्च ब्रह्मणि स्थितो ब्रह्म प्राप्नोतीत्याह भगवान् । योंतःसुख अंतरात्मनि सुखं यस्य सोंतःसुखस्तथां
तरेवात्मन्याराम आक्रीडा यस्य सोंतरारामस्तथांतरात्मैव ज्योतिःप्रकाशो यस्य सोंतर्ज्योतिरेव यईदृशः स यो

योंतःसुखोंतरारामस्तथांतर्ज्योतिरेव यः स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोधिगच्छति ॥ २४ ॥

गी ब्रह्मनिर्वाणं ब्रह्मनिर्वृतिं मोक्षमिह जीवन्नेव ब्रह्मभूतः सन्नधिगच्छति प्राप्नोति ॥ २४ ॥ श्रीरामायनमः ॥

क्षामंतरेण क्रीडाप्रयुक्तफलभाक्त्वमभिमतमिंद्रियादिजन्यप्रकाशशून्यत्वमात्मज्योतिष्ट्वमिष्टं यथोक्तविशेषणसंपन्नः
समाहितश्च जीवन्नेव ब्रह्मभावं प्राप्नोति । ब्रह्मणि परिपूर्णे निर्वृतिं सर्वानर्थनिवृत्त्युपलक्षितां स्थितिमनतिशयानंदाविर्भावल
क्षणां प्राप्नोतीत्याह । ईदृश इति ॥ २४ ॥ श्रीकृष्णायनमः ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामकृष्णायनमः ॥

मुक्तिहेतोर्ज्ञानस्य साधनांतरमाह ॥ किंचेति ॥ यज्ञादिनित्यकर्मानुष्ठानात्पापादिलक्षणाःकल्मषाःक्षीयंतेततस्तच्छ्रवणाद्या
वृत्तेः सम्यग्दर्शनंजायतेततोमुक्तिरप्रयत्नेनभवतीत्याह ॥ लभंतइति ॥ ज्ञानप्राप्त्युपायांतरंदर्शयति ॥ छिन्नेति ॥ श्रवणादिना

किंच ॥ लभंतेब्रह्मनिर्वाणंमोक्षंऋषयःसम्यग्दर्शिनःसंन्यासिनोक्षीणकल्मषाःक्षीणपापादिदो
षाःछिन्नद्वैधाःछिन्नसंशयाःयतात्मानःसंयतेंद्रियाःसर्वभूतहितेरताःसर्वेषांभूतानांहितेआ

लभंतेब्रह्मनिर्वाणमृषयःक्षीणकल्मषाः ॥ छिन्नद्वैधायतात्मानःसर्वभूतहितेरताः ॥ २५ ॥

नुकूल्येरताःअहिंसकाइत्यर्थः ॥ २५ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामचंद्रायनमः ॥

संशयनिरसनकार्यकरणनियमनंदयालुत्वेनाहिंसकत्वमित्येतदपिसम्यग्ज्ञानप्राप्तौकारणमित्यर्थः ॥ अक्षरव्याख्या
नंस्पष्टत्वान्नव्याख्यायते ॥ २५ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामचंद्रायनमः ॥ श्रीरामचंद्रायनमः ॥ ॥

पूर्वंकामक्रोधवेगः सोढव्योदर्शितःसंप्रतितावेवत्याज्याविल्याह। किंचेति। ननुदर्शितविशेषणवतांमृतानामेवमोक्षोनतुजी
वतामितिचेन्नेत्याह। अभितइति। अस्मदादीनामपितर्हिप्रभूतकामादिप्रभावविधुराणांकिमितिमोक्षोनभवतीत्याशंक्य

किंच। कामक्रोधवियुक्तानांकामश्चक्रोधश्चकामक्रोधौताभ्यांवियुक्तानांयतीनांसंन्या
सिनांयतचेतसांसंयतांतःकरणानांअभितउभयतोजीवतांमृतानांचब्रह्मनिर्वाणंमोक्षो

कामक्रोधवियुक्तानांयतीनांयतचेतसां। अभितोब्रह्मनिर्वाणंवर्त्ततेविदितात्मनां। २६।

वर्त्ततेविदितात्मनांविदितोज्ञातआत्मायेषांतेविदितात्मानस्तेषांविदितात्मनांसम्यग्दर्शिनामित्यर्थः २६।

सम्यग्दर्शनवैशद्याभावादित्याह विदितेति। उक्तेर्थेश्लोकाक्षराणामन्वयमाचष्टे कामक्रोधेत्यादिना। २६। श्रीः।

वृत्तमनूद्योत्तरश्लोकत्रयस्यतात्पर्यमाह सम्यग्दर्शनेति ईश्वरार्पितसर्वभावेनेति भगवति परस्मिन्नीश्वरे समर्पितः सर्वेषांदे
हेंद्रियमनसांभावश्चेष्टाविशेषोनकाचिदपिवहिस्तेषांव्यापारस्तेनेत्यर्थः कर्मयोगस्यतत्फलस्यचाभिधानानंतरं इतिशा

सम्यग्दर्शननिष्ठानांसंन्यासिनांसद्योमुक्तिरुक्ताकर्मयोगश्चईश्वरार्पितसर्वभावेनेश्वरेब्रह्मण्याधायक्रियमाणः
सत्त्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासक्रमेणमोक्षायेतिभगवान्पदेपदेऽब्रवीत्वक्ष्यतिच॥अथेदानींध्यानयोगं
सम्यग्दर्शनस्यांतरंगंविस्तरेणवक्ष्यामीतितस्यसूत्रस्थानीयान्श्लोकानुपदिशतिस्मदेवःस्पर्शान्शब्दादीन्कृ

स्पर्शान्कृत्वाबहिर्बाह्यांश्चक्षुश्चैवांतरेभ्रुवोः॥ प्राणापानौसमौकृत्वानासाभ्यंतरचारिणौ॥२७॥

त्वाबहिर्बाह्यान्श्रोत्रादिद्वारेणांतर्बुद्धौप्रवेशिताःशब्दादयोविषयास्तानचिंतयतोबाह्याबहिरेवकृताभवंति
तानेवंबहिःकृत्वाचक्षुश्चैवांतरेभ्रुवोःकृत्वेत्यनुषज्यतेतथाप्राणापानौनासाभ्यंतरचारिणौसमौकृत्वा॥२७॥

द्वार्थः स्वतोबाह्यानांविषयाणांकुतोवहिःकरणमित्याशंक्याह श्रोत्रादीति तेषांवहिःकरणंकीदृशमित्याशंक्याह तानिति २७॥

विषयप्रावण्यं परित्यज्य चक्षुरपि भ्रुवोर्मध्ये विक्षेपपरिहारार्थं कृत्वा प्राणापानौ च नासाभ्यंतरचरणशीलौ समौ न्यूनाधिकव
र्जितौ कुंभकेन निरुद्धौ कृत्वा करणानि सर्वाण्येवं संयम्य प्राणायामपरो भूत्वा किं कुर्यादित्यपेक्षायामाह यतेंद्रिय इति
इंद्रियादिसंयमं कृत्वा मोक्षमेवापेक्षमाणो मननशीलः स्यादित्यर्थः ज्ञानातिशयनिष्ठस्य सर्वेच्छाशून्यस्य संन्यासि

यतेंद्रियमनोबुद्धिः संयतानींद्रियाणि मनो बुद्धिश्च यस्य स यतेंद्रियमनोबुद्धिः मननान्मुनिः संन्यासी मोक्ष
परायणः एवं देहसंस्थानो मोक्षपरायणः मोक्ष एव परमयनं परा गतिर्यस्य सोयं मोक्षपरायणो मुनिर्भवे

यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ॥ विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८॥

द्विगतेच्छाभयक्रोध इच्छा च भयं च क्रोधश्च इच्छाभयक्रोधास्ते विगता यस्मात्स विगतेच्छाभयक्रोधः य
एवं वर्त्तते स सदा संन्यासी मुक्त एव सः न तस्य मोक्षोन्यः कर्त्तव्योस्ति ॥ २८ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु

नो मुक्तेरनायाससिद्धत्वान्न तस्य किंचिदपि कर्त्तव्यमस्तीत्याह विगतेति पूर्वार्द्धाक्षराणि व्याकरोति यतेत्यादिना ॥ द्वि
तीयार्द्धाक्षराणि व्याचष्टे ॥ विगतेत्यादिना ॥ २८ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीसीतारामचंद्राय नमः ॥

अधिकारिणो यथोक्तस्य कर्त्तव्यताभावे ज्ञातव्यमपि नास्तीत्याशंक्य परिहरति ॥ एवमित्यादिना ॥ प्रसिद्धं भोक्तारं यष्टव्यं वाञ्छन्ति ॥ सर्वलोकेति ॥ ततो ह्यस्य बंधविपर्ययाविति न्यायेन सर्वफलदातृत्वं दर्शयति ॥ सुहृदमिति ॥ उक्तेश्वरज्ञाने फलं कथयति ॥ ज्ञात्वेति ॥ यज्ञेषु तपःसु च द्विधा भोक्तृत्वं व्यनक्ति ॥ कर्तृरूपेणेति ॥ हिरण्यगर्भादिव्यवच्छेदार्थं विशिनष्टि ॥ महांतमिति ॥ स्वपरिकरोपकारिणं राजानं व्यावर्त्तयति ॥ प्रत्युपकारेति ॥ ईश्वरस्य ताटस्थ्यं सुहृदस्पाति ॥ सर्वभूतानामिति ॥ तर्हि तत्र तत्र व्यवस्थितकर्मतत्तत्फलसंसर्गित्वं स्यादित्याशंक्याह ॥ सर्वकर्मेति ॥ न च तस्य बुद्धितद्वृत्तिसंबंधोपि

एवं समाहितचित्तेन किं विज्ञेयमिति चोच्यते ॥ भोक्तारं यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च सर्वलोकमहेश्वरं सर्वेषां लोकानां महांतमीश्वरं सुहृदं सर्वभूतानां सर्वप्राणिनां प्रत्युपकारानपेक्षतयोपकारिणं सर्व

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं ॥ सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ॥ २९ ॥

भूतानां हृदयेशयं सर्वकर्मफलाध्यक्षं सर्वप्रत्ययसाक्षिणं नारायणं मां ज्ञात्वा शांतिं सर्वसंसारोपरतिमृच्छति प्राप्नोति ॥ २९ ॥ ॥ इति श्रीमद्भगवद्गीताभाष्ये पंचमोध्यायः ॥ ५ ॥ ॥ श्रीकृष्णायनमः ॥ ॥

वस्तुतोस्तीत्याह ॥ सर्वप्रत्ययेति ॥ यथोक्तेश्वरपरिज्ञाने फलमभिदधाति ॥ मां नारायणमिति ॥ तदेवं कर्मयोगस्यामुख्यसंन्यासापेक्षया ॥ प्रशस्तत्वेपि ततो मुख्यसंन्यासस्याधिक्यात्तद्वतो बुद्धिशुद्ध्यादियुक्तस्य कामक्रोधोद्भवं वेगमिहैव सोढुं शक्तस्य शमदमादिमतो योगाधिकृतस्य त्वंपदार्थाभिज्ञस्य परमात्मानं प्रत्यक्त्वेन ज्ञानतो मुक्तिरिति सिद्धं ॥ २९ ॥
इति श्रीमद्भगवद्गीताटीकायामानंदगिरीये पंचमोध्यायः ॥ ५ ॥ ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीः ॥

ध्यानयोगप्रस्तावानंतरं तद्योग्यताहेतुकर्मणः स्तुतिं भगवानुक्तवानित्याह ॥ श्रीभगवानिति ॥ पूर्वोत्तराध्याययोः संगतिम
भिदधानो वृत्तमनूद्याध्यायांतरमवतारयति ॥ अतीतेति ॥ सम्यग्दर्शनप्रकरणे ध्यानयोगस्य प्रसंगाभावं प्रत्युदस्यति ॥
सम्यगिति ॥ संग्रहविवरणयोरानंतर्याद् अध्याययोर्युक्तं हेतुहेतुमत्त्वमिति भावः ॥ अध्यायसंबंधमभिधायानाश्रितः क
र्मफलमित्यादिश्लोकद्वयतात्पर्यमाह ॥ तत्रेति ॥ कर्मयोगस्य संन्यासहेतोर्मर्यादां दर्शयितुं सांगं च योगं विवर्जितुमध्या

॥ श्रीभगवानुवाच ॥ अतीतानंतराध्याये ध्यानयोगस्य सम्यग्दर्शनं प्रत्यं
तरंगस्य सूत्रभूताः श्लोकाः स्पर्शान्कृत्वा बहिरित्यादय उपदिष्टास्तेषां वृत्तिस्थानी
योयं षष्ठोऽध्याय आरभ्यते तत्र ध्यानयोगस्य बहिरंगं कर्मेति यावन्न ध्यानयोगारो
हणसमर्थस्तावत् गृहस्थेनाधिकृतेन कर्त्तव्यमेव कर्मेत्यतस्तत्स्तौति ॥ ननु किमर्थं ध्या
नयोगारोहणसीमाकरणं ॥ यावता नुष्ठेयमेव विहितं कर्म यावज्जीवं ॥ श्रीः ॥

येप्रवृत्ते सतीति सप्तम्यर्थः ॥ संन्यासिना कर्त्तव्यं कर्मेत्येवं प्रतिभासं व्युदस्यति ॥ गृहस्थेनेति ॥ कर्त्तव्यस्य स्तुतियोग्यत्वमतः
शब्दार्थः समुच्चयवादी सीमाकरणमाक्षिपति ॥ नन्विति ॥ यावज्जीवश्रुतिवशाद्ध्यानारोहणसामर्थ्ये सत्यपि कर्मानुष्ठा
नस्य दुर्वारत्वादिति हेतुमाह ॥ यावतेति ॥ भार्यावियोगादिप्रतिबंधाद्यावज्जीवश्रुतिनोदितकर्माननुष्ठाने ॥ ॥

वैराग्यप्रतिबंधाद्दर्पितदनुष्ठानसंभवाद्भगवतो विशेषवचनाच्चनयावज्जीवं कर्मानुष्ठानप्रसक्तिरिति परिहरति ॥ नारुरुक्षो
रिति ॥ उक्तमेवार्थं व्यतिरेकद्वारा विवृणोत्यारुरुक्षोरित्यादिना ॥ आरोढुमिच्छतीत्यारुरुक्षुरित्यत्रारोहणेच्छा विशेषणं ॥ आ
रोहणं कृतवानित्यारूढ इत्यत्र पुनरिच्छाविषयभूतमारोहणं विशेषणमेवं शमकर्मविषययोर्भेदेन विशेषणं मर्यादाकरणाऽ
नंगीकरणे विरुद्धमापद्येत तयोरेव विभागकरणं च भगवतो सीमानंगीकारेन युज्येतेत्यर्थः ॥ विशेषणविभागकरणयो
रन्यथासिद्धिमाशंकते ॥ तत्रेति ॥ व्यवहारभूमिः सप्तम्यर्थेः षष्ठी निर्द्धारणे भवत्वधिकारिणां त्रैविध्यं तथापि प्रकृते विशे

नारुरुक्षो मुनेर्योगं कर्म कारणमुच्यत इति विशेषणादारूढस्य च शमेनैव संबंधकरणादारुरुक्षोरारूढस्य च शमः ॥
कर्म चोभयं कर्तव्यत्वेनाभिप्रेतं चेत्स्यादारुरुक्षोरारूढस्येति शमकर्मविषयभेदेन विशेषणं विभागकरणं चानर्थकं
स्यात् ॥ तत्राश्रमिणां कश्चिद्योगमारुरुक्षुर्भवत्यारूढश्च कश्चिदन्ये नारुरुक्षवो न चारूढास्तानपेक्ष्यारुरुक्षो
रारूढस्य चेति विशेषणं विभागकरणं चोपपद्यत एवेति चेन्न तस्यैवेति वचना ॥ श्रीरामचंद्राय नमो नमः ॥ ॥

षणादेः किमायातमित्याशंक्य तृतीयापेक्षया तदुपपत्तिरित्याह ॥ तानपेक्ष्येति ॥ आरुरुक्षोरारूढस्य च भेदेत स्यैवेति प्रकृ
तपरामर्शानुपपत्तिरिति दूषयति ॥ न तस्येति ॥ यद्य नारुरुक्षुमपेक्ष्यारुरुक्षोरिति विशेषणं तस्य च कर्मारोहणकारणमना
रूढं च पुरुषमपेक्ष्यारूढस्येति विशेषणं तस्य च शमः संन्यासो योगफलप्राप्तौ कारणमिति विशेषणविभागकरणयोरु
पपत्तिस्तदारुरुक्षोरारूढस्य च भिन्नत्वात्प्रकृतपरामर्शिनस्तच्छब्दस्यानुपपत्तेर्न युक्तमित्थं विशेषणाद्युपपादनमित्यर्थः ॥

किंच ॥ योगमारुरुक्षोस्तदारोहणे कारणं कर्मेत्युक्त्वा पुनर्योगारूढस्येति योगशब्दप्रयोगाद्यो योगं पूर्वमारुरुक्षुरासीत्तस्यैवापे
क्षितं योगमारूढस्य तत्फलप्राप्तौ कर्मसंन्यासः शमशब्दवाच्यो हेतुत्वेन कर्त्तव्य इति वचनादारुरुक्षोरारूढस्य चाभिन्नत्वप्र
त्यभिज्ञानान्न तयोर्भिन्नत्वं शंकितुं शक्यमित्याह ॥ पुनरिति ॥ यत्तु यावज्जीवश्रुतिविरोधाद्योगारोहणसीमाकरणं कर्म
णोनुचितमिति तत्राह ॥ अत इति ॥ पूर्वोक्तरीत्या कर्मतत्त्यागयोर्विभागोपपत्तौ श्रुतेरन्यविषयत्वाद्योगमारूढस्य मुमु

क्षुनर्योगग्रहणाच्च योगारूढस्येति य आसीत्पूर्वं योगमारुरुक्षुस्तस्यैवारूढस्य शम एव कर्त्त
व्यं कारणं योगफलं प्रत्युच्यत इत्यतो न यावज्जीवं कर्त्तव्यत्वप्राप्तिः कस्यचिदपि कर्मणः यो
गविभ्रष्टवचनाच्च गृहस्थस्य चेत्कर्मिणो योगो विहितः षष्ठेध्याये स योगविभ्रष्टोपि कर्मग
तिं कर्मफलं प्राप्नोतीति तस्य नाशशंकानुपपन्ना स्यात् ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥

क्षोर्जिज्ञासमानस्य नित्यनैमित्तिककर्मस्वपि परित्यागसिद्धिरित्यर्थः ॥ इतश्च यावज्जीवं कर्म कर्त्तव्यं न भवतीत्याह ॥ योगेति
संन्यासिनो योगभ्रष्टस्य विनाशशंकावचनान्न यावज्जीवं कर्म कर्त्तव्यं प्रतिभातीत्यर्थः ॥ ननु योगभ्रष्टशब्देन गृहस्थस्यै
वाभिधानात्तस्यैवास्मिन्नध्याये योगविधानाद्योगारोहणयोग्यत्वेसत्यपि यावज्जीवं कर्म कर्त्तव्यमिति नेत्याह ॥ गृ
हस्थस्येति ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीरामचंद्राय नमः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामचंद्राय नमः ॥

॥गी·भा·॥
॥१७०॥

तेनापिमुमुक्षुणाकृतस्यकर्मणोमोक्षातिरिक्तफलानारंभकत्वाद्योगभ्रष्टोसौछिन्नाभ्रमिवनश्यतीतिशंकावकाशोस्याशं
क्याह ॥ अवश्यंहीति ॥ अपौरुषेयान्निर्दोषाद्वेदात्फलदायिनीकर्मणःस्वाभाविकीशक्तिरधिगताअत्रस्वभावश्चस्वतःसिद्धत्वा
न्नकर्मफलमतोमोक्षातिरिक्तस्यैवफलस्यकर्मारंभकमितिकर्मणियोगभ्रष्टोपिकर्मगतिंगच्छतीतिनिरवकाशाशंके
त्यर्थः ॥ ननुमुमुक्षुणाकाम्यप्रतिषिद्धयोरकरणात्कृतयोश्चनित्यनैमित्तिकयोरफलत्वात्कथंतदीयस्यकर्मणोनियमे
नफलारंभकत्वंतत्राह ॥ नित्यस्यचेति ॥ चकारेणनैमित्तिकंकर्मानुकृष्यते ॥ वेदप्रमाणकत्वेपिनित्यनैमित्तिकयोरफलत्वे

दवश्यंहिकृतंकर्मकाम्यंनित्यंवामोक्षस्यनित्यत्वादनारभ्यत्वेपिस्वफलमारभतएवनित्यस्यचकर्मणोवे
दप्रमाणावबुद्धत्वात्फलेनभवितव्यमित्यवोचामाऽन्यथावेदस्यानर्थकत्वप्रसंगादिति ॥ नचकर्मणिस
त्युभयविभ्रष्टवचनमर्थवत्कर्मणोविभ्रंशकारणानुपपत्तेःकर्मकृतमीश्वरेसंन्यस्यतिअतःक
र्त्तरिकर्मफलंनारभतइतिचे ॥

दोषमाह ॥ अन्यथेति ॥ कर्मणोनुष्ठितस्यफलारंभकत्वध्रौव्याद्गृहस्थोयोगभ्रष्टोपिकर्मगतिंगच्छतीतिनतस्यनाशशंके
तिशेषः ॥ इतश्चगृहस्थोयोगभ्रष्टशब्दवाच्योनभवतीत्याह ॥ नचेति ॥ ज्ञानंकर्मचेत्युभयंनतोपिविभ्रष्टोयंनश्यतीतिवच
नंगृहस्थेकर्मणिसतिनार्थवद्भवितुमलंतस्यकर्मनिष्ठस्यकर्मणोपिविभ्रंशहेत्वभावात्तत्फलस्यावश्यकत्वादित्यर्थः
कृतस्यकर्मणोमुमुक्षुणाभगवतिसमर्पणात्कर्त्तरिफलानारंभकत्वादस्तिभ्रंशकारणमितिशंकते ॥ कर्मेति ॥ ॥

॥आ·गी·॥
॥६॥

॥शिव॥
॥१७०॥

राजाराधनबुद्ध्याधनधान्यादिसमर्पणस्याधिकफलहेतुतोपलंभादीश्वरे समर्पणं नभ्रंशकारणमितिदूषयति नेत्यादिना
अधिकफलहेतुत्वेपिमोक्षहेतुत्वमिति शंकते मोक्षायेति तदेवच्चो द्यं विवृणोति स्वकर्मणामिति सहकारिसामर्थ्या
नस्य फलांतरं प्रत्युपायत्वासिद्धिरिति हेतुं सूचयति योगेति ध्यानसहितसंन्यासस्य मोक्षोपयिकत्वेकुतो योगभ्रष्टम
धिकृत्यनाशशंकेत्याशंक्याह योगाच्चेति सहकार्यभावे सामग्र्यभावात्फलानुपपत्तेर्युक्तानाशशंकेत्यर्थः ध्यानसहि

नेश्वरे संन्यासस्याधिकतरफलहेतुत्वोपपत्तेर्मोक्षायेति चेत्स्वकर्मणां कृतानामीश्वरे न्यासो
मोक्षायैव न फलांतराय योगसहितो योगाच्च विभ्रष्टइष्यतः तं प्रतिनाशशंका युक्तेवेति ॥
नैकाकीयतचित्तात्मा निराशीरपरिग्रहो ब्रह्मचारिव्रते स्थितइतिकर्मसंन्यासविधानान्न
चात्रध्यानकालेस्त्रीसहायत्वाशंकायेनैकाकित्वंविधीयते ॥ श्रीरामचंद्रायनमः ॥ श्रीः ॥

तमीश्वरेकर्मसमर्पणं मोक्षायेत्यत्र प्रमाणाभावात् गृहस्थो योगभ्रष्टप्राप्तव्याच्यो न भवतीति दूषयति नेति गृहस्थस्य यो
गभ्रष्टप्राप्तव्याच्यत्वाभावे हेत्वंतरमाह एकाकीति न खल्वेतानि विशेषणानि गृहस्थसमवायीनि संभवंतीति तेन तस्य ध्या
नयोगे विध्यभावान्न तं प्रति योगभ्रष्टवचनमुचितमित्यर्थः एकाकित्ववचनं गृहस्थस्यापि ध्यानकाले स्त्रीसहायत्वाभावा
भिप्रायेण भविष्यतीत्याशंक्याग्निहोत्रादिवत् ध्यानस्य पत्नीसाध्यत्वाभावादप्राप्तप्रतिषेधप्रसंगान्नैवमित्याह नचात्रेति ॥

विशेषणांतरपर्यालोचनायामपिनायमेकाकिशब्दोगृहस्थपरोभवितुमर्हतीत्याह। नचेति॥ किंचगृहस्थस्यैवैकाकित्वादिवि
वक्षित्वाध्यानयोगविधौतंप्रत्युभयभ्रष्टप्रश्नोनोपपद्येतेत्याह। उभयेति॥ नहिगृहस्थंप्रत्युभयस्मात्ज्ञानात्कर्मणश्चविभ्रष्ट
त्वमुपेत्यप्रश्नंयुज्यतेतस्यज्ञानाद्भ्रंशेपिकर्मणस्तदभावात्अनुष्ठीयमानविहितकर्मभ्रंशेपिप्रागनुष्ठितकर्मवशात्फलप्रतिलं

नचगृहस्थस्यनिराशीरपरिग्रहइत्यादिवचनमनुकूलमित्युभयविभ्रष्टप्रश्नानुपपत्तेश्च॥ अना
श्रितइत्यनेनकर्मिणएवयोगित्वंसंन्यासित्वंचोक्तंप्रतिषिद्धंचनिरग्नेरक्रियस्यचसंन्यासि
त्वंयोगित्वंचेतिचेन्नध्यानयोगंप्रतिबहिरंगस्यसतःकर्मणःफलाऽकांक्षासंन्यासस्तुति
परत्वान्नकेवलंनिरग्निरक्रियएवसंन्यासीयोगीच॥ किंतर्हिकर्म्यपिकर्मफलासंगंसंन्य
स्यकर्मयोगमनुतिष्ठन्सत्वशुद्ध्यर्थंसंन्यासीचयोगीचभवतीतिस्तूयते॥ श्रीकृष्णायनमः॥

भाष्यतोयथोक्तप्रश्नालोचनयानगृहस्थंप्रतिध्यानविधानोपपत्तिरित्यर्थः॥ ननुभगवतासंन्यासस्यप्रतिषिद्धत्वात्गृ
हस्थस्यैवयोगविधानात्तस्यैवयोगभ्रष्टशब्दवाच्यत्वमितिशंकते॥ अनाश्रितइत्यनेनेति॥ भगवद्वाक्यंनप्रतिषेधपरमि
तिपरिहरति॥ नध्यानेति॥ स्तुतिपरत्वमेवस्फोरयति नकेवलमिति॥ सत्वशुद्ध्यर्थमनुतिष्ठन्निति संबंधः॥ श्रीरामाय॥

वाक्यस्योभयपरत्वमाशंक्य भेदप्रसंगान्नैवमित्याह् । नचेति । इतोपि भगवतः संन्यासाश्रमप्रतिषेधोभिप्रेतो न भवतीत्याह्
न च प्रसिद्धमिति । तच्च प्रसिद्धं संन्यासित्वं योगित्वं चेति संबंधः । प्रसिद्धत्वमेव व्याकरोति । श्रुतीति । इतोपि संन्यासाश्रमं भ

न चैकेन वाक्येन कर्मफलासंगसंन्यास स्तुतिश्चतुर्थाश्रमप्रतिषेधश्चोपपद्यते न च प्रसिद्धं निरग्नेरक्रि
यस्य परमार्थसंन्यासिनः श्रुतिस्मृतिपुराणेतिहासयोगशास्त्रविहितं संन्यासित्वं योगित्वं च प्रतिषेध
यति भगवान् । स्ववचनविरोधत्वाच्च सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्ते मौनी संतुष्टो येन
केनचिद् अनिकेतः स्थिरमतिर् विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः । सर्वारंभपरित्यागीति च तत्र तत्र
भगवता स्ववचनानि दर्शितानि तैर्विरुध्यते चतुर्थाश्रमप्रतिषेधस्तस्मान्मुनेर्योगमारुरुक्षोः प्रतिप
न्नगार्हस्थ्यस्याग्निहोत्रादिकर्मफलनिरपेक्षमनुष्ठीयमानं ध्यानयोगारोहणसाधनत्वं सत्त्वशुद्धिद्वा
रेण प्रतिपद्यत इति स संन्यासी च योगी चेति स्तूयते । श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु । श्रीः ॥ ॥

गवान्न प्रतिषेधतीत्याह् स्ववचनेति । विरोधमेव साधयति । सर्वकर्माणीति । अनाश्रितइत्यादिवाक्यस्य यथाश्रुतार्थत्वा
नुपपत्तेः स्तुतिपरत्वमुपपादितमुपसंहरति । तस्मादिति । कर्मफलसंन्यासित्वमत्र मुनिशब्दार्थः । श्रीकृष्णायनमोनमः ॥

स्तौति परं वाक्यमक्षरयोजनार्थमुदाहरति ॥अनाश्रित इति ॥ कर्मफलैरभिलाषो नास्तीत्येतावता कथं तदनाश्रितत्वं वाचोयुक्ति
रिति आशंक्य व्यतिरेकमुखेन विशदयति ॥ यो हीति ॥ कार्यमित्यादि व्याकरोति ॥ एवंभूतः सन्निति ॥ कथं कर्मिणः संन्यासित्वं
योगित्वं च कर्मित्वविरोधादित्याशंक्याह ॥ य ईदृश इति ॥ स्तुतेरत्र विवक्षितत्वान्नानुपपत्तिश्चोदनीयेति मन्वानः सन्नाह ॥ इत्ये

अनाश्रितः न आश्रितोऽनाश्रितः किं कर्मफलं कर्मणः फलं कर्मफलं यत्तदनाश्रितः कर्मफलतृष्णारहित इत्यर्थः
यो हि कर्मफले तृष्णावान्स कर्मफलमाश्रितो भवति अयं तु तद्विपरीतो नाश्रितः कर्मफलं एवंभूतः सन् कार्यं क
र्तव्यं नित्यं काम्यविपरीतमग्निहोत्रादिकं करोति निर्वर्तयति यः कश्चिदीदृशः कर्मी स कर्मितरेभ्यो विशिष्यत इ

श्रीभगवानुवाच ॥ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ॥ स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥ १ ॥

त्येवमर्थमाह स संन्यासी च योगी चेति संन्यासः परित्यागः स यस्यास्ति स संन्यासी च योगी च योगश्चित्तसमाधानं
स यस्यास्ति स योगी चेत्येवंगुणसंपन्नोऽयं मंतव्यः ॥ न केवलं निरग्निरक्रिय एव संन्यासी योगी चेति मंतव्यः नि
र्गताः अग्नयः कर्मांगभूता यस्मात् स निरग्निः अक्रियश्च अनग्निसाधना अपि विद्यमानाः क्रियास्तपोदानादिका
यस्यासावक्रियः ॥ १ ॥
वमिति ॥ न निरग्निरित्यादेरर्थमाह ॥ न केवलमिति ॥ अग्नयो गार्हपत्याहवनीयान्वाहार्य
पचनप्रभृतयः ॥ ननु अनग्नित्वे सिद्धमक्रियत्वमग्निसाध्यत्वात् क्रियाणां तथा च न निरग्निरित्येतावतैवापेक्षितसि
द्धेर्न चाक्रिय इत्यनर्थकमर्थपुनरुक्तेरिति तत्राह ॥ अनग्नीति ॥ १ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीकृष्णाय ॥

उत्तरश्लोकस्य तात्पर्यं दर्शयितुं व्याचष्टे आशंकां दर्शयति ॥ ननु चेति ॥ प्रसिद्धिं परित्यज्याप्रसिद्धिरुपादीयमाना प्रसिद्धिवि
रुद्धेति चोद्यं दूषयति ॥ नैष दोष इति ॥ उभयस्य साग्नौ सक्रिये च संन्यासित्वस्य योगित्वस्य चेत्यर्थः ॥ गुणवृत्त्योभयसंपाद
नं प्रश्नपूर्वकं प्रकटयति ॥ तत्कथमित्यादिना ॥ संभवति मुख्ये संन्यासित्वादौ कथं गौणमुभयमभीष्टमित्याशंक्य मुख्य

ननु च निरग्नेरक्रियस्य चश्रुतिस्मृतियोगशास्त्रे संन्यासित्वं योगित्वं च प्रसिद्धं कथं इह साग्नेः सक्रियस्य च संन्या
सित्वं योगित्वं चाप्रसिद्धमुच्यत इति नैष दोषः कयाचित् गुणवृत्त्या उभयस्य संपिपादयिषितत्वात् ॥ तत्कथं ॥ कर्म

यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव ॥ न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥ २ ॥ श्रीः ॥

फलसंकल्पसंन्यासात्संन्यासित्वं योगांगत्वेन च कर्मानुष्ठानात्कर्मफलसंकल्पस्य च चित्तविक्षेपहेतोः परित्यागा
त् योगित्वं चेति गौणमुभयं न पुनर्मुख्यं संन्यासित्वं योगित्वं वाभिप्रेतमित्येतमर्थं दर्शयितुमाह ॥ ॥ श्रीः ॥ ॥

स्य कर्मण्यसंभवाद्गौणमेव स्यादिति सिद्धवदर्थं तदिष्टमित्यभिप्रेत्याह ॥ न पुनरिति ॥ चित्तव्याकुलत्वहेतुकामनात्यागाच्चित्त
समाधानसिद्धेर्योगित्वं कर्मिणोऽपि युक्तं संन्यासित्वं तु तस्य विरुद्धमिति शंकमानं प्रत्युक्तेऽर्थे श्लोकमवतारयति ॥ एतमिति

परमार्थसंन्यासं प्राहुरितिसंबंधः इतीत्थं संन्यासस्य प्रामाणिकाभ्युपगतत्वादितीतिशब्दो योज्यः योगं फलतृष्णां परि
त्यज्य समाहितचेतस्त्वये तिशेषः यदुक्तं संन्यासित्वं योगित्वं च गृहस्थस्य गौणमिति तदुत्तरार्द्धयोजनया प्रकटीकर्त्तुमु
त्तरार्द्धमुत्थापयति कर्मयोगस्येति कर्मयोगस्य परमार्थसंन्यासेन कर्तृद्वारकं साम्यमुक्तं व्यक्तीकरोति योहीति त्य
क्तानि सर्वाणि कर्माणि साधनानि च येन स तथोक्तस्तस्य भावस्तत्ता तया सर्वकर्मविषयं तत्फलविषयं च संकल्पं त्य

पं सर्वकर्म तत्फलत्वपरित्यागलक्षणं परमार्थसंन्यासमिति प्राहुः श्रुतिस्मृतिविदो योगं कर्मानुष्ठानलक्षणं
तं परमार्थसंन्यासं विद्धि जानीहि पांडव कर्मयोगस्य प्रवृत्तिलक्षणस्य तद्विपरीतेन निवृत्तिलक्षणेन परमार्थ
संन्यासेन कीदृशं साम्यमंगीकृत्य तद्भाव उच्यत इत्यपेक्षायामिदमुच्यते अस्ति परमार्थसंन्यासेन सादृश्यं कर्तृद्वा
रकं कर्मयोगस्य यो हि परमार्थसंन्यासी त्यक्तसर्वकर्मसाधनतया सर्वकर्मतत्फलविषयं संकल्पं प्रवृत्तिहेतुका
मकारणं संन्यस्यति अयमपि कर्मयोगी कर्म कुर्वाण एव फलविषयं संकल्पं संन्यस्यतीत्येतमर्थं दर्शयिष्य
न्नाह न हि यस्मादसंन्यस्तसंकल्पोऽसंन्यस्तोऽपरित्यक्तः फलविषयः संकल्पोऽभिसंधिर्येनासावसंन्यस्तसं
कल्पः कश्चन कश्चिदपि योगी कर्मी समाधानवान्न भवति संन्यस्तसंकल्प एव न भवतीत्यर्थः॥ श्रीः॥

जतीत्यर्थः॥ संकल्पत्यागे तत्कार्यकामत्यागस्तत्त्यागे तज्जन्यप्रवृत्तित्यागश्चासिद्ध्यतीत्यभिसंधाय विशिनष्टि प्रवृत्तीति
कर्मिण्यपि यथोक्तसंकल्पसंन्यासित्वमस्तीत्याह॥ अयमपीति॥ तदपरित्यागे व्याकुलचेतस्तया कर्मानुष्ठानस्यैव दुः
शकत्वादित्यर्थः॥ उक्तमेव साम्यं व्यक्तीकुर्वन्व्यतिरेकं दर्शयति॥ इत्येतमिति॥ श्रीसीतारामचंद्राय नमः॥ श्रीकृष्णः॥

फलसंकल्पापरित्यागे किमिति समाधानवत्वाभावस्तदाह फलेति ॥ व्यतिरेकमुखेनोक्तमर्थमन्वयमुखेनोपसंहरति ॥
तस्मादिति ॥ हि शब्दार्थस्य यस्मादित्युक्तस्य तस्मादित्यनेन संबंधः कर्मणि प्रतिपयोक्तविधेर्हेतुहेतुमद्भावमभिप्रेत्य

फलसंकल्पस्य चित्तविक्षेपहेतुत्वात्तस्माद्यः कश्चन कर्मी संन्यस्तफलसंकल्पो भवेत्स यो
गी समाधानवान्न विक्षिप्तचित्तो भवेच्चित्तविक्षेपहेतोः फलसंकल्पस्य संन्यस्तत्वादित्यभि
प्रायः ॥ २ ॥ एवं परमार्थसंन्यासकर्मयोगयोः कर्तृद्वारकं संन्याससाम्यमपेक्ष्य यं संन्यासमि
ति प्राहुर्योगं तं विद्धि पांडवेति कर्मयोगस्य स्तुत्यर्थं संन्यासित्वमुक्तं ॥ श्रीकृष्णायनमः ॥ ॥

द्वितीयविधौ हेतुमाह ॥ चित्तविक्षेपेति ॥ २ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामचंद्राय नमः ॥ श्रीरामाय नमः ॥

पूर्वश्लोके पूर्वोत्तरार्द्धाभ्यामुक्तमनुवदति॥ एवमिति॥ परमार्थसंन्यासस्य कर्मयोगांतर्भावे कर्मयोगस्यैव सदा कर्तव्यत्वमापाद्येत तेनेतरस्यापि कृतत्वासिद्धेरित्याशंक्योक्तानुवादपूर्वकमुत्तरश्लोकतात्पर्यमाह॥ ध्यानयोगस्येति॥ ध्यावित्र्रस्या मुनेर्योगमारोढुमिच्छोरिष्यमाणस्य योगारोहणस्य कर्म हेतुश्चेदपेक्षितं योगमारूढस्यापि तत्फलप्राप्तौ तदेव कारणं भविष्यति तस्य कारणत्वेऽकृतप्रशक्तित्वादित्याशंक्याह॥ योगारूढस्येति॥ अनारूढस्येस्यस्यैवार्थस्य स्पष्टयाति॥ ध्यानेति॥ मु

ध्यानयोगस्य फलनिरपेक्षः कर्मयोगो बहिरंगसाधनमिति तं संन्यासत्वेन स्तुत्वाऽधुना कर्मयोगस्य ध्यानयोगसाधनत्वं दर्शयति॥ आरुरुक्षोरारोढुमिच्छोरनारूढस्य ध्यानयोगेऽवस्थातुमसमर्थस्येत्यर्थः कस्यारुरु

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते॥ योगारूढस्य तस्यैव शमः कारणमुच्यते॥३॥

क्षोर्मुनेः कर्मफलसंन्यासिन इत्यर्थः॥ किमारुरुक्षोर्योगं कर्म कारणं साधनमुच्यते॥ योगारूढस्य पुनस्तस्यैव शम उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगारूढत्वस्य साधनमुच्यत इत्यर्थः॥ श्रीरामाय नमः॥ ॥

नित्यं कर्मफलसंन्यासिन औपचारिकमित्याह॥ कर्मफलेति॥ साधनं चित्तशुद्धिद्वारा ध्यानयोगप्राप्तीच्छायामिति शेषः॥ तस्येति प्रकृतस्य कर्मिणो ग्रहणं एवकारो भिन्नक्रमः शमशब्देन संबध्यते॥ कस्यान्ययोगव्यवच्छेदेन शमो हेतुरिति तत्राह॥ योगारूढत्वस्येति॥ श्रीसीतारामचंद्राय नमः॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥ श्रीरामचंद्राय नमः॥ ॥

सर्वव्यापारोपरमरूपोपशमस्य योगारूढत्वे कारणत्वं विवृणोति ॥ यावद्यावदिति ॥ सर्वकर्मनिवृत्त्या वा यासाभावाद्वशीकृतें
द्रियग्रामस्य चित्तसमाधाने योगारूढत्वं सिद्ध्यतीत्यर्थः ॥ सर्वकर्मोपरमस्य पुरुषार्थसाधनत्वे पौराणिकीं संमतिमाह
तथा चेति ॥ एकता सर्वेषु भूतेषु वस्तुनो द्वैताऽभावोपलक्षितत्वमिति प्रतिपत्तिः समता तेष्वेवौपाधिकविशेषेऽपि स्व

यावद्यावत्कर्मभ्य उपरमते तावत्तावन्निराशयासस्य जितेंद्रियस्य
चित्तं समाधीयते तथा सति सकृदिति योगारूढो भवति ॥ तथा चो
क्तं ॥ नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता चा शीलं
स्थितिर्दंडनिधानमार्ज्जवं ततस्ततश्चोपरमः क्रियाभ्यः ॥ ३ ॥ ॥

तो निर्विशेषत्वधीः सत्यता तेषामेव हितवचनं शीलं स्वभावसंपत्तिः स्थितिः स्थैर्यं दंडनिधानमहिंसनं आर्ज्जवमव
क्रत्वं क्रियाभ्यः सकाशादुपरतिश्चेत्येतदुक्तं सर्वं यथा यादृशमेतादृशं नान्यद्ब्राह्मणस्य वित्तं पुरुषार्थसाधनमस्ति
तस्मादेतदेवास्य निरतिशयं पुरुषार्थसाधनमित्यर्थः ॥ ३ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामचंद्राय नमः ॥

योगप्राप्तौ कारणकथनानंतरं तत्प्राप्तिकालं दर्शयितुं श्लोकांतरमवतारयति ॥ अथेति ॥ समाधानावस्था यदेत्युच्यते ॥ अत एवोक्तं समाधीयमानचित्तो योगीति ॥ शब्दादिषु कर्मसु चानुषंगस्य योगारोहणप्रतिबंधकत्वात्तदभावस्य तदुपायत्वं प्रसिद्धमिति द्योतयितुं हीत्युक्तं ॥ सर्वेषामपि संकल्पानां योगारोहणप्रतिबंधकत्वमभिप्रेत्य सर्वसंकल्पसंन्यासी

अथेदानीं कदा योगारूढो भवतीत्युच्यते ॥ यदा समाधीयमानचित्तो योगी इंद्रियार्थेषु इंद्रियाणामर्थाः शब्दादयस्तेष्विंद्रियार्थेषु कर्मसु च नित्यनैमित्तिककाम्यप्रतिषिद्धेषु प्रयोजनाभावबुद्ध्या नानुषज्जते ॥ अनुषंगं कर्तव्यताबुद्धिं न करोतीत्यर्थः ॥ सर्वसंकल्पसंन्यासी सर्वान् संकल्पानिहामुत्रार्थकामहेतून् संन्यसितुं शीलम

यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते ॥ सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥

स्येति सर्वसंकल्पसंन्यासी योगारूढः प्राप्तयोग इत्येतत्तदा तस्मिन्काले योगारूढ उच्यते सर्वसंकल्पसंन्यासीति वचनात्सर्वांश्च कामान्सर्वाणि च कर्माणि संन्यसेदित्यर्थः ॥ श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु ॥ ॥

तत्र विवक्षितमर्थमाह ॥ सर्वानिति ॥ सर्वसंकल्पसंन्यासेपि सर्वेषां कामानां कर्मणां च प्रतिबंधकत्वसंभवे कुतो योगप्राप्तिरित्याशंक्याह ॥ सर्वेति ॥ सर्वसंकल्पपरित्यागे यथोक्तविध्यनुष्ठानमयत्नसिद्धमिति मन्वानः सन्नाह ॥ संकल्पेति ॥ मूलोन्मूलने च तत्कार्यनिवृत्तिरयत्नलब्धेति भावः ॥ श्रीकृष्णायनमः ॥ श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु ॥ श्रीः ॥

तत्रप्रमाणमाह। संकल्पमूलइति। तत्रान्वयव्यतिरेकावभिप्रेत्योक्तमुपपादयति। कामेति। सर्वसंकल्पाभावेकामाभावव
त्कर्माभावस्यासिद्धत्वेपिकर्मणांकामकार्यत्वात्तन्निवृत्तिप्रयुक्तामपिनिवृत्तिमुपन्यस्यति। सर्वकामेति। यदुक्तंकर्मणःका
मकार्यत्वंतत्रश्रुतिंस्मृतिंप्रमाणयति। सयथेति। सपुरुषःस्वरूपमजानन्यत्फलकामोभवतितत्साधनमनुष्ठेयतयाबु

संकल्पमूलाहिसर्वेकामाः संकल्पमूलःकामोवैयज्ञाः संकल्पसंभवाःकामजानामितेमूलंसंकल्पा
त्किलजायसेनत्वांसंकल्पयिष्यामिसमूलोनभविष्यसीत्यादिस्मृतेः॥ सर्वकामपरित्यागेचसर्वकर्म
संन्यासःसिद्धोभवति॥ सयथाकामोभवतितत्क्रतुर्भवतियत्क्रतुर्भवतितत्कर्मकुरुतइत्यादि
श्रुतिभ्योयद्यद्धिकुरुतेजंतुस्तत्तत्कामस्यचेष्टितमित्यादिस्मृतिभ्यश्चन्यायाच्चनहिसर्वसंकल्प
संन्यासेकश्चित्स्पंदितुमपिशक्तस्तस्मात्सर्वसंकल्पसंन्यासीचेतिवचनात्सर्वान्कामान्सर्वा
णिचकर्माणित्याजयतिभगवान्॥ ४॥ श्रीसीतारामचंद्रजीप्रसन्नोमस्तु॥ श्रीरामचंद्रायनमः॥

द्ध्योधारयतीतितत्क्रतुर्भवतियच्चानुष्ठेयतयागृह्णातितदेवकर्मबहिरपिकरोतीतिकामाधीनंकर्मोक्तमितिश्रुत्यर्थः
कामजन्यंकर्मेत्यन्वयव्यतिरेकसिद्धमितिद्योतयितुंस्मृतोहिशब्दःन्यायमेवदर्शयति। नहिसर्वसंकल्पेति। स्वापादावदर्श
नादित्यर्थः॥ नित्यनैमित्तिककर्मानुष्ठानंदूरनिरस्तमितिवक्तुमपिशब्दःश्रुतिस्मृतिन्यायसिद्धमर्थमुपसंहरति। तस्मादिति॥४॥

योगारूढस्य किं स्यादित्याशंक्याह॥ यदैवमिति॥ योगारोहस्य दृष्टादृष्टोपायैरवश्यकर्त्तव्यतायै मुक्तिहेतुत्वं तद्विपर्ययस्याधोन
यनहेतुत्वं च दर्शयति॥ अत इति॥ तत्र हेतुमाह॥ आत्मैव हीति॥ उद्धरणापेक्षामात्मनः सूचयति॥ संसारेति॥ संसारादुद्धरणं
कीदृगित्याशंक्याह॥ योगारूढतामिति॥ योगप्राप्त्यावनास्थातु न कर्त्तव्येत्याह॥ नात्मानमिति॥ योगे प्राप्त्युपायश्चेन्नानुष्टीय
ते तदा योगासंभवे संसारपरिहारासंभवादात्माधोनीतः स्यादित्यर्थः॥ नन्वात्मानं संसारे निमग्नं तदीयो बंधुस्तस्मादुद्ध

यदैवं योगारूढस्तदा चात्मा तेन आत्मनोद्धृतो भवति संसारानर्थव्राता ततः॥ उद्धरेत् संसारसागरे निमग्नमात्मान
मात्मना ततः उत् ऊर्द्ध हरेत् उद्धरेत् योगारूढतामापादयेदित्यर्थः॥ नात्मानमवसादयेन्नाधो नयेत् नाधोगमयेत् आत्मैव
हि यस्मादात्मनो बंधुर्न ह्यन्यः कश्चिद्बंधुर्यः संसारमुक्तये भवति॥ बंधुरपि तावन्मोक्षं प्रति प्रतिकूल एव स्नेहादि

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्॥ आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः॥ ५॥

बंधनायतनत्वात्तस्मात् युक्तमेवावधारणमात्मैव ह्यात्मनो बंधुरिति॥ आत्मैव रिपुः शत्रुर्योन्योपकारी बाह्यश
त्रुः सोप्यात्मप्रयुक्त एवेति युक्तमेवावधारणमात्मैव रिपुरात्मन इति॥ ५॥ श्रीसीतारामचंद्राय नमः॥ श्रीः॥

रिष्यतीनेत्याह॥ आत्मैव हीति॥ कुतोवधारणमन्यस्यापि प्रसिद्धस्य बंधोः संभवात्तत्राह॥ न हीति॥ अन्यो बंधुः स
न्नपि संसारमुक्तये न भवतीत्येतदुपपादयति॥ बंधुरपीति॥ स्नेहादीत्यादिशब्दात्तदनुगुणप्रवृत्तिविषयत्वं गृह्यते
आत्मातिरिक्तस्यापि शत्रोरपकारिणः सुप्रसिद्धत्वादवधारणमनुचितमित्याशंक्याह योन्य इति॥ ५॥ श्रीकृष्णाय नमः॥

उक्तमनूद्य प्रश्नपूर्वकं श्लोकांतरमवतारयति ॥ आत्मैवेत्यादिना ॥ एकस्यैवात्मनो मिथो विरुद्धं बंधुत्वं रिपुत्वं च लक्षणभेद
मंतरेणायुक्तमिति चोदिते वशीकृतसंघातस्यात्मानं प्रति बंधुत्वमितरस्य शत्रुत्वमित्यविरोधं दर्शयति ॥ बंधुरित्यादिना ॥ व
शीकृतसंघातस्य विक्षेपाभावादात्मनि समाधानसंभवादुपपन्नमात्मानं प्रति बंधुत्वमिति साधयति ॥ तस्येति ॥ अवशीकृ

आत्मैव बंधुरात्मैव रिपुरात्मन इत्युक्तं ॥ तत्र किंलक्षण आत्मात्मनो बंधुः किंलक्षणो वा आत्मात्मनो रिपुरु
च्यते ॥ बंधुरात्मात्मनस्तस्यात्मनः स आत्मा बंधुर्येनात्मैवात्मना जितः आत्मा कार्यकारणसंघातो येन जि

बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ॥ अनात्मनस्तु शत्रुत्वे वर्त्तेतात्मैव शत्रुवत् ॥ ६ ॥

तः वशीकृतो जितेंद्रिय इत्यर्थः ॥ अनात्मनः अजितात्मनस्तु शत्रुत्वे शत्रुभावे वर्त्तेत आत्मैव शत्रुवत् ॥
यथाऽनात्मा शत्रुरात्मनो अपकारी तथात्मात्मनोऽपकारे वर्त्तेत इत्यर्थः ॥ ६ ॥ श्रीरामचंद्राय नमः ॥ ॥

तसंघातस्य पुनर्विक्षेपोपपत्तेरात्मनि समाधानायोगादात्मानं प्रति शत्रुभावे प्रसिद्धशत्रुवदात्मैव शत्रुत्वेन वर्त्तेते त्युत्त
रार्द्धं व्याकरोति ॥ अनात्मन इति ॥ दृष्टांतं व्याचष्टे ॥ यथेति ॥ उक्तदृष्टांतवशादवशीकृतसंघातस्य स्वस्य हितानाचरणादा
त्मानं प्रति शत्रुरेवेति दार्ष्टांतिकमाह ॥ तथेति ॥ ६ ॥ श्रीकृष्णाय नमः ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीरामाय नमः ॥

कथंसंयतकार्यकारणस्यबंधुरात्मेतितत्राह॥ जितात्मनइति॥ जितकार्यकारणसंघातस्यप्रकर्षेणोपरतबाह्याभ्यंतरकरणस्यपरमात्माविक्षेपेणपुनःपुनरनभिभूयमानोनिरंतरंचित्तेप्रथतइत्यर्थः॥ जितात्मानंसंन्यस्तसमस्तकर्माणमधिकारिणंप्रदर्श्ययोगांगानिदर्शयति॥ शीतेति॥ समःस्यादित्यध्याहार्यं॥ पूर्वार्द्धंव्याचष्टे॥ जितेत्यादिना॥ नकेवलंतस्यपरमात्मासाक्षादात्मभावेनवर्त्ततेकिंतुशीतोष्णादिभिरपिनासौचाल्यते॥ तत्वज्ञानादिपुत्तरार्द्धंविभजते॥ किंचेति॥ तेषुसमःस्यादितिसंबंधः॥७॥

जितात्मनःकार्यकारणसंघातआत्माजितोयेनसजितात्मातस्यजितात्मनःप्रशांतस्यउपशांतस्यपरमात्मासमाहितःसाक्षादात्मभावेनवर्त्ततइत्यर्थः॥ किंच॥ शीतोष्णसुखदुःखेषुतथामानापमानयोःपूजापरिभवयोःसमःस्यादित्यध्याहारः॥७॥ ज्ञानविज्ञानतृप्तात्माज्ञानंशास्त्रोक्तपदार्थानांपरिज्ञानंविज्ञानंतुशास्त्रतोज्ञातानांतथैवस्वानुभव

जितात्मनःप्रशांतस्यपरमात्मासमाहितः॥ शीतोष्णसुखदुःखेषुतथामानापमानयोः॥७॥
ज्ञानविज्ञानतृप्तात्माकूटस्थोविजितेंद्रियः॥ युक्तइत्युच्यतेयोगीसमलोष्टाश्मकांचनः॥८॥

करणंताभ्यांज्ञानविज्ञानाभ्यांतृप्तःसंजातालंप्रत्ययःआत्माअंतःकरणंयस्यसज्ञानविज्ञानतृप्तात्माकूटस्थोऽप्रकंप्योकेनापिचालयितुंशक्योनभवतीत्यर्थः॥ विजितेंद्रियश्चयईदृशोयुक्तःसमाहितइतिसउच्यतेकथ्यतेसयोगीसमलोष्टाश्मकांचनःलोष्टाश्मकांचनानिसमानियस्यसःसमलोष्टाश्मकांचनः॥८॥ श्रीसीतारामचंद्रायनमः॥ ॥

चित्तसमाधानमेवविशिष्टफलंचेदिष्टं॥ तर्हिकिंकथंभूतःसमाहितोव्यवह्रियतेतत्राह॥ ज्ञानेति॥ परोक्षापरोक्षाभ्यांज्ञानविज्ञानाभ्यांसंजातालंप्रत्ययोऽविक्रियोहर्षविषादकामक्रोधादिरहितोयोगीयुक्तःसमाहितइतिव्यवहारभागीभवतीतिपादत्रयव्याख्यानेनदर्शयति॥ ज्ञानमित्यादिना॥ सचयोगीपरमहंसपरिव्राजकःसर्वत्रोपेक्षाबुद्धिरतिशयःवैराग्यभागीतिकथयति॥ सयोगी

योगारूढस्य प्रशस्तत्वमभ्युपेत्य योगस्यांगांतरं दर्शयति ॥ किंचेति ॥ पदच्छेदः पदार्थोक्तिरिति व्याख्यानांगं संपादयति ॥ सुहृदित्यादीति ॥ अरिर्नाम परीक्षमपकारकः प्रत्यक्षमप्रियो द्वेष्य इति विभागः समबुद्धिरिति व्याचष्टे ॥ कः किमिति ॥ प्रथमोहिप्र

किंच सुहृदिति प्रत्युपकारमनपेक्ष्योपकारकर्त्ता मित्रं स्नेहवानरिः शत्रुरुदासीनो न कस्य चित्पक्षं भजते मध्यस्थो यो विरुद्धयोरुभयोर्हितैषी द्वेष्य आत्मनोऽप्रियो बंधुः संबंधी एतेषु साधुषु शास्त्रार्थानुवर्त्तिषु अपि च

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु ॥ साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥

पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः किं कर्मेत्यव्यापृतबुद्धिरित्यर्थः ॥ विशिष्यते विमुच्यत इति वा पाठांतरं योगारूढानां सर्वेषामयमुत्तम इत्यर्थः ॥ ९ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामचंद्राय नमः ॥

श्नो जातिगोत्रादिविषयः द्वितीयो व्यापारविषयः ॥ उक्तप्रकारेणाव्यापृतबुद्धित्वे सर्वोत्कर्षो वा सर्वपापविमोक्षो वा सिध्यतीत्याह ॥ विशिष्यत इति ॥ पाठद्वयेपि सिद्धमर्थं संगृह्य कथयति ॥ योगारूढानामिति ॥ ९ ॥ श्रीरामचंद्राय नमः ॥ ॥

यथोक्तविशेषणवतो योगारूढे पूत्तमत्वे योगानुष्ठाने प्रयतितव्यमित्युक्तं गाभिधानानंतरं प्रधानमभिदधाति ॥ अत एवेति
आदरनैरंतर्यदीर्घकालत्वं विशेषणत्रयं योगस्य सूचयति ॥ सततमिति ॥ तस्यैव पंचांगान्युपन्यस्यति ॥ रहसीत्यादिना
सर्वदेत्यादरदीर्घकालयो रुपलक्षणं प्रसंगात्मानं व्यावर्त्तयति ॥ अंतःकरणमिति ॥ गीरिगुहादाविस्यादिशब्देन योगप्र

अत एव उत्तमफलप्राप्तये ॥ योगी ध्यायी युंजीत समादध्यात् सततं सर्वदा आत्मानमंतःकरणं रहसि एकां
ते गीरिगुहादौ स्थितः सन्नेकाकी असहायो रहसि स्थितः एकाकी चेति विशेषणात्संन्यासं कृत्वेत्यर्थः ॥ यतचि

योगी युंजीत सततमात्मानं रहसि स्थितः ॥ एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥१०॥

तात्मा चित्तमंतःकरणं आत्मा देहश्च संयतौ यस्य सः यतचित्तात्मा निराशीर्वीततृष्णोऽपरिग्रहश्च परिग्रहरहि
तइत्यर्थः ॥ संन्यासित्वेपि त्यक्तसर्वपरिग्रहः सन् युंजीतइत्यर्थः ॥१०॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥

तिबंधदुर्जनादिविधुरोदेशो गृह्यते ॥ विशेषणद्वयतात्पर्यमाह ॥ रहसीति ॥ योगं युंजानस्य संन्यासिनो विशेषणांतराणि
दर्शयति ॥ यतेति ॥ सति संन्यासित्वे किमित्यपरिग्रहे इति विशेषणमर्थपुनरुक्तमित्याशंक्याको पीनाच्छादनादिष्वपि सक्तिनि
वृत्त्यर्थमित्याह ॥ संन्यासित्वेपीति ॥१०॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीकृष्णायनमः ॥ श्रीरामचंद्रायनमः ॥ श्री ॥

योगांगानि चोपदिश्योत्तरसंदर्भस्य तात्पर्यमाह । अथेति । योगस्वरूपकथनपतदंगप्रदर्शनानंतर्यमथशब्दार्थः । विहारादीनामित्यादिशब्देन यथोक्तासनादीनामवांतरभेदस्य ग्रहणं । तत्फलादि चेत्यादिशब्देन योगफलं सम्यग्ज्ञानं तत्फलं कैवल्यं ततो भ्रष्टस्यापि शांतिकाविनष्टत्वमित्यादि गृह्यते । एवं समुदायतात्पर्ये दर्शिते किमासीनः शयानस्तिष्ठन्गच्छन्वा युंजीतेत्यपेक्षायामनंतरश्लोकतात्पर्यमाह । तत्रेति । निर्द्धारणे सप्तमी प्रथमं योगानुष्ठानस्य प्रधानमासीनः संभवादिति न्यायादिति यावत् । विविक्तत्वं द्वेधा विभजते स्वभावत इति । आसनस्य स्थैर्ये तत्रोपविश्य योगमनुतिष्ठतः समाधानायोगात् योगासिद्धिरित्यभिसंधायविशिनष्टि । अ

अथेदानीं योगं युंजानस्य आसनाहारविहारादीनां योगसाधनत्वेन नियमो वक्तव्यः प्राप्तयोगस्य लक्षणं तत्फलादि चेत्यत आरभ्यते तत्रासनमेव तावत्प्रथममुच्यते । शुचौ विशुद्धे विविक्ते स्वभावतः संस्कारतो वा देशे स्थाने प्रतिष्ठाप्य स्थिरमचल

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः । नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं ॥ ११ ॥

मात्मनः आसनं नात्युच्छ्रितं नात्युच्चं नाप्यतिनीचं तच्च चैलाजिनकुशोत्तरं चैलमजिनं कुशाश्चोत्तरे यस्मिन्नासने तदासनं चैलाजिनकुशोत्तरं पाठक्रमाद्विपरीतोत्र क्रमः चैलादीनां प्रतिष्ठाप्य ॥ ११ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ ॥

चलमिति । आस्तेऽस्मिन्निति व्युत्पत्तिं अनुसृत्याह । आसनमिति । आत्मन इति परकीयासनव्युदासार्थं पतनभयपरिहारार्थं नात्युच्छ्रितमित्युक्तं । नाप्यतिनीचमिति । भूतलपाषाणादिसंश्लेषे वा तच्छोभाग्निमांद्यादि संभावितदोषनिरासार्थं चैलं वस्त्रं अजिनं चर्म पशूनां तच्च मृगस्य कुशा दर्भास्ते चोत्तरे यस्मिन्नुपविष्टादारभ्य तत् तथोक्तं प्रथमं चैलं वस्त्रं ततोऽजिनं ततोंऽतत्रश्च कुशा इति प्रतिपन्नमापाततिकं क्रममतिक्रम्यादौ कुशास्ततोऽजिनं ततश्चैलमिति क्रमं विवक्षित्वा विपरीतोत्रेत्युक्तं यथोक्तमासनं संपाद्य किं कर्त्तव्यमिति निर्दिशति । प्रतिष्ठाप्येति । ११ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु । श्रीरामचंद्राय नमः ॥

योगंयुंजानस्येतिकर्त्तव्यताकलापंपृच्छति॥ कथमिति॥ सर्वेभ्योविषयेभ्यःसकाशात्प्रत्याहृत्यमनसोयदेकस्मिन्नेवध्येयेविषयेस
माधानंयच्चचित्तस्येंद्रियाणांचबाह्यक्रियाणांसंयमनंनिरोधनंतदुभयंकृत्वायोगमनुतिष्ठेदित्याह सर्वेति॥ आसनेयथोक्ते

किंच॥ तत्रतस्मिन्नासनेउपविश्ययोगंयुंज्यात्कथंसर्वविषयेभ्यःउपसंहृत्यैकाग्रंमनःकृत्वायतचित्ते
द्रियक्रियःचित्तंचइंद्रियाणिचचित्तेंद्रियाणितेषांक्रियाःसंयतायस्यसःयतचित्तेंद्रियक्रियःसाकिमर्थंयोगं

तत्रैकाग्रंमनःकृत्वायतचित्तेंद्रियक्रियः॥ उपविश्यासनेयुंज्याद्योगमात्मविशुद्धये॥१२॥

युंज्यादित्याहात्मविशुद्धयेंतःकरणस्यविशुद्ध्यर्थमित्येतत्॥१२॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु

स्थित्वायथोक्तयारीत्यायोगानुष्ठानस्यप्रश्नपूर्वकंफलमाह॥ साकिमर्थमित्यादिना॥१२॥ श्रीरामचंद्रायनमोनमः॥

उक्तमनूद्यानंतरश्लोकस्यापुनरुक्तमर्थमाह ॥ बाह्यमिति ॥ समत्वमृजुत्वं कायः शरीरमध्यं ॥ अचलमिति ॥ विशेषणमवतार्य तस्य तात्पर्यमाह ॥ सममिति ॥ कार्यकरणयोर्विषयपारवश्यशून्यत्वमचलत्वं स्थैर्यं ॥ किमितिइवशब्दलोपोऽत्र कल्प्यते स्वनासिकाग्रसंप्रेक्षणमेव योगांगत्वेनात्र विधित्सितं किं न स्यादित्याशंक्याह ॥ नहीति ॥ तर्हि किमत्र विवक्षितमिति प्रश्नपूर्वकमाह ॥ किंतर्हीति ॥ दृष्टिसंनिपातो दृष्टेश्चाक्षुषरूपादिविषयप्रवृत्तिराहित्यं कथमसावनायासेन सिद्ध्यतीति तत्राह ॥ सचेति ॥ समाधानस्य प्रधानेनात्र विवक्षितत्वात् दृष्टेर्वहिर्विषयत्वे च तद्भंगप्रसंगात्तस्याविषयेभ्यो व्यावृत्त्यांतर एव संनिपातो विवक्षितो भातीत्यर्थः ॥ तथापि कथं स्वनासा

बाह्यमासनमुक्तमधुना शरीरधारणं कथमित्युच्यते ॥ समं कायश्च शिरश्च ग्रीवा च समं कायशिरोग्रीवं तत्समं धारयन्नचलं वा समं च समं धारयतश्चलनं संभवत्यतो विशिनष्टि चलमिति स्थिरः स्थिरो भूत्वेत्यर्थः संप्रेक्ष्य सम्यक्प्रेक्षणं दर्शनं कृत्वेवेतीवशब्दो लुप्तो द्रष्टव्यः ॥ नहि स्वनासिकाग्रसंप्रेक्षणमिह विवक्षितं किं तर्हि चक्षुषोर्दृष्टिसंनिपातः स चांतःकरणस

समंकायशिरोग्रीवं धारयन्नचलं स्थिरः ॥ संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १३ ॥

माधानमपेक्ष्य विवक्षितः स्वनासिकाग्रसंप्रेक्षणमेव चेत्तु विवक्षितं मनस्तत्रैव समाधीयेत नात्मनि आत्मनि हि मनसः समाधानं वक्ष्यत्यात्मसंस्थं मनः कृत्वेति तस्मादिवशब्दलोपेनाक्ष्णोर्दृष्टिसंनिपात एव संप्रेक्ष्येत्युच्यते दिशश्चानवलोकयन् दिशां चावलोकनमकुर्वन्नित्येतत् ॥ १३ ॥

ग्रसंप्रेक्षणमत्रश्रुतमविवक्षितमित्याशंक्याह ॥ स्वनासिकेति ॥ तत्रैव

कथम

मनःसमाधाने का हानिरित्याशंक्य शेषविरोधान्मैवमित्याह ॥ आत्मनिहीति ॥ किंतर्हि संप्रेक्ष्येत्यादौ विवक्षितमित्याशंक्याह ॥ तस्मादिति ॥ दक्षिणेतरचक्षुषोर्योर्दृष्टिस्तस्या बाह्याद्विषयाद्विमुखत्वेनांतर एव सन्निपातनमत्र स्वकीयं नासिकाग्रं नासिकाग्रांतं संप्रेक्ष्येति विवक्षितमित्यर्थः ॥ तत्रैवोत्तरमपि विशेषणमनुकूलमित्याह ॥ दिशश्चेति ॥ अनवलोकयन्नासीतेत्युत्तरत्र संबंधः अंतरांतरा दिशामवलोकनमपि योगप्रतिबंधकमिति तत्प्रतिषेधः ॥ १३ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीः ॥

योगंयुंजानस्यविशेषणांतराणिदर्शयति ॥ किंचेति ॥ अंतःकरणस्यप्रशांतिः रागद्वेषादिराहित्यंतस्याश्चप्रकर्षेणरागादिहेतोरपि निवृत्तिः विगतभयत्वंसर्वकर्मपरित्यागेशास्त्रीयनिश्चयवशान्निःसंदिग्धबुद्धित्वंभिक्षाभुक्त्यादीत्यादिशब्देनत्रिषवणंस्नानशौचाचमनादिग्रह्यतेविशेषणांतरमाह ॥ किंचेति ॥ उपसंहृत्ययोगनिष्ठोभवेदितिशेषः ॥ मनोवृत्त्युपसंहारेध्यानमपिन

किंच ॥ प्रशांतात्माप्रकर्षेणशांतआत्मांतःकरणंयस्यसोयंप्रशांतात्माविगतभीर्विगतभयोब्रह्मचारिव्रतेस्थितोब्रह्मचारिणोव्रतंब्रह्मचर्यंगुरुशुश्रूषाभिक्षाभुक्त्यादितस्मिन्स्थितस्तदनुष्ठाताभवेदित्यर्थः ॥ किंच ॥ मनः संयम्यमनसोवृत्तीरुपसंहृत्येत्येतन्मच्चित्तोमयिपरमेश्वरेचित्तंयस्यसोयंमच्चित्तोयुक्तःसमाहितःसन्नासीतो

प्रशांतात्माविगतभीर्ब्रह्मचारिव्रतेस्थितः ॥ मनःसंयम्यमच्चित्तोयुक्तआसीतमत्परः ॥ १४ ॥

पविशेन्मत्परअहंपरोयस्यसोयंमत्परोभवतिकश्चिद्रागीस्त्रीचित्तोनतुस्त्रियमेवपरत्वेनगृह्णातिकिंतर्हिराजानंमहादेवंवाअयंतुमच्चित्तोमत्परश्च ॥ १४ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीः ॥ ॥

सिद्धेत्तस्यतद्वृत्त्यावृत्तिरूपत्वादित्याशंक्याह ॥ मच्चित्तइति ॥ विषयांतरविषयमनोवृत्त्युपसंहारेप्यात्मन्येवतन्नियमनान्नध्यानानुपपत्तिरित्यर्थः ॥ मच्चित्तत्वेनैवमत्परत्वस्यसिद्धत्वान्मत्परइतिपृथग्विशेषणमनर्थकमित्याशंक्याह ॥ भवतीति ॥ १४ ॥ ॥

क

अंतःकरणशुद्धिर्योगस्यावांतरफलं संप्रति परमफलकथनत्वेनानंतरश्लोकमारत्ते ॥ अथेति ॥ योगस्वरूपं तदंगमासनद्वयं तत्कर्त्तृ
विशेषणमित्यस्यार्थस्य प्रकथनानंतरमित्यथशब्दार्थः ॥ आत्मानं युंजन्निति संबंधः आत्मशब्दो मनोविषयः यथोक्तो विधिरासना
दिः उक्तविशेषणत्रयद्योतनार्थः सदेत्युक्तं योगी ध्यायी संन्यासीत्यर्थः ॥ मनःसंयमस्य योगं प्रत्यसाधारणत्वं दर्शयति ॥ नियतेति

अथेदानीं योगफलमुच्यते ॥ युंजन्समाधानं कुर्वन्नेवं यथोक्तेन विधानेन योगी सदात्मानं नियतमानसः नि
यतं संयतं मानसं मनो यस्य सोयं नियतमानसः स शांतिं उपरतिं निर्वाणपरमां निर्वाणं मोक्षः तत्र परमा नि

युंजन्नेवं सदात्मानं योगी नियतमानसः ॥ शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५ ॥

ष्ठा यस्याः सा शांति निर्वाणपरमा तां मत्संस्थां मदधीनामधिगच्छति प्राप्नोति ॥ १५ ॥ श्रीरामायनमः ॥

शांति शब्दितोपरतेः सर्वसंसारनिवृत्तिपर्यवसायित्वं मत्वा विशिनष्टि ॥ निर्वाणेति ॥ यथोक्तायामुक्तेर्ब्रह्मस्वरूपावस्थानाद
नर्थांतरत्वमाह ॥ मत्संस्थामिति ॥ मदधीनां मदात्मिकामित्यर्थः ॥ १५ ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीरामायनमः ॥

आहारादिरित्यादिशब्देनविहारोजागरणादिश्चोच्यते ॥ आत्मसंमितमन्नपरिमाणमष्टग्रासादि ॥ आहारादिनियमेशतपथश्रुतिंप्रमाण यति ॥ यदिति ॥ तदन्नंभुज्यमानंयदुहवाइतिप्रसिद्धान्नूदितमवत्यनुष्ठानयोग्यतामापाद्यानुष्ठानद्वारेणभोक्तारंरक्षतिनपुनस्तद स्यानर्थायभवतीत्यर्थः ॥ यत्पुनरात्मसंमितादूयोधिकतरंशास्त्रमतिक्रम्यभुज्यतेतदात्मानंहिनस्तिभोक्तुरनर्थायभवति ॥ यस्त्वा त्मंकनीयोऽल्पतरंशास्त्रनिश्चयाभावादद्यते ॥ तदन्नमनुष्ठानयोग्यतादिद्वारानरक्षितुंक्षमते ॥ तस्मादधिकमत्यल्पंवान्नंयो

इदानींयोगिनआहारादिनियमउच्यते ॥ नअत्यश्नतःआत्मसंमितमन्नपरिमाणमतीत्यअश्नतः ॥ अत्यश्नतोनयो गोस्तिनचएकांतमनश्नतोयोगोस्तियदुहवात्मसंमितमन्नंतदवतितन्नहिनस्तियद्भूयोहिनस्तितद्यत्कनीयोनतदवतीति श्रुतेस्तस्माद्योगीनात्मसंमितादन्नादधिकंन्यूनंवाश्नीयादथवायोगिनोयोगशास्त्रेपरिपठितादन्नपरिमाणादतिमात्र

नात्यश्नतस्तुयोगोस्तिनचैकांतमनश्नतः ॥ नचातिस्वप्नशीलस्यजाग्रतोनैवचार्जुन ॥ १६ ॥ श्रीरामा० ॥

मश्नतोयोगोनास्तीत्युक्तंहि ॥ पूरयेदशनेनार्द्धंतृतीयमुदकस्यतुवायोःसंचारणार्थायचतुर्थमवशेषयेदित्यादिपरिमाणं तथानचातिस्वप्नशीलस्ययोगोभवतिनैवचातिमात्रंजाग्रतोवायोगोभवतिचार्जुन ॥ १६ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु

गमारुरुक्षतात्याज्यमित्यर्थः ॥ श्रुतिसिद्धमर्थंनिगमयति ॥ तस्मादिति ॥ नेत्यादेर्व्याख्यानांतरमाह ॥ अथवेति ॥ किंतदन्नपरिमाणंशा स्त्रोक्तंयदधिकंन्यूनंवाभ्यवहरतोयोगानुपपत्तिरित्याशंक्याह ॥ उक्तंहीति ॥ पूरयेदशनेनार्द्धंतृतीयमुदकेनतुवायोःसंचरणार्थायच तुर्थमवशेषयेदितिवाक्यमादिशब्दार्थः ॥ यथानात्यंतमश्नतोऽनश्नतश्चयोगोनसंभवतितथाचात्यंतंस्वपतोजाग्रतश्चनयोगःसंभ

आहारनिद्रादिनियमविरहिणोयोगव्यतिरेकमुक्तान्नियमवतोयोगोपायान्व्याचष्टे कथंपुनरित्यादिना अन्नस्यनियतत्वमर्द्ध मशनस्येत्यादिविहारस्यनियतत्वंयोजनान्नपरंगच्छेदित्यादिकर्मसुचेष्टायांनियतत्वंवाङ्नियमादिरात्रौप्रथमतोदशघटिकाप रिमितकालेजागरणंमध्यतःस्वप्नंपुनरपिदशघटिकापरिमितेजागरणमितिस्वप्नावबोधयोर्नियतकालत्वंएवंप्रयतमानस्य योगिनोभवतःयोगस्यफलमाह दुःखहेति सर्वाणीत्याध्यात्मिकादिभेदभिन्नानीत्यर्थः यथोक्तयोगमंतरेणापिस्वापादेर्दुः

कथंपुनर्योगोभवतीत्युच्यते युक्ताहारविहारस्याह्रियतइत्याहारोन्नंविहरणंविहारःपादक्रमस्तौयुक्तौनियतपरिमा णौयस्यतस्ययुक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसुयुक्तस्वप्नावबोधस्ययोगिनोयोगोभवतिदुःखहादुःखानिसर्वाणि हंतिइतिदुःखहासर्वसंसारदुःखक्षयकृद्योगोभवतीत्यर्थः १७ अधुनाकदायुक्तोभवतीत्युच्यते यदाविनियतंचित्तं

युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु युक्तस्वप्नावबोधस्ययोगोभवतिदुःखहा ॥ १७ ॥ यदावि नियतंचित्तमात्मन्येवावतिष्ठते निस्पृहःसर्वकामेभ्योयुक्तइत्युच्यतेतदा ॥ १८ ॥ श्रीः ॥

विशेषेणनियतंसंयतमेकाग्रतामापन्नंचित्तंहित्वाबाह्यचिंतामात्मन्येवकेवलेवतिष्ठते स्वात्मनिस्थितिंलभतइत्यर्थः निस्पृहःसर्वकामेभ्योनिर्गताद्दृष्टादृष्टविषयेभ्यःस्पृहातृष्णायस्ययोगिनःसयुक्तःसमाहितइत्युच्यते १८ ॥

खनिवृत्तिरस्तीतिविशिनष्टि सर्वेति विशुद्धिविज्ञानद्वारेतिशेषः १७ सफलस्यसांगस्ययोगस्योक्तपनंतरंयदाहीत्याद्युक्त कालानुवादेनयुक्तंलक्षयितुमनंतरश्लोकप्रवृत्तिंदर्शयति अधुनेति विशेषेणसंयतत्वमेवसंक्षिपति एकाग्रतामिति आत्मन्येवेत्येवकारार्थंकथयति हित्वेति केवलत्वमद्वितीयत्वंतस्यात्मस्थितिंविवृणोति स्वात्मनीति चित्तस्यद्विकल्पितस्या त्मैवतत्वंनखलुनरत्यतःसर्वतोवारितमधिष्ठानेनिमग्नंतिष्ठतीतिभावः तस्यामवस्थायांसर्वेभ्योव्यावृत्ततृष्णोयुक्तोव्यवह्रियत

उपमायोगिनश्चित्तस्थैर्यस्योदाहरणमित्यर्थः ॥ उपमाशब्दस्य प्रदीपविषयत्वसिद्ध्यर्थं करणव्युत्पत्तिं दर्शयति ॥ उपमीयत इति ॥ योगि
नो यथोक्तविशेषणवतश्चित्तस्थैर्यस्येति शेषः ॥ १९ ॥ द्विविधः समाधिः संप्रज्ञातोऽसंप्रज्ञातश्च ध्येयैकाकारा सत्त्ववृत्तिर्भेदेन कथं
चित् ज्ञायमाना संप्रज्ञातः समाधिः कथमपि न पृथग्ज्ञायमाना एव सत्त्ववृत्तिरसंप्रज्ञातः समाधिः ॥ तत्र सामान्येन समाधिलक्ष
णमभिधायासंप्रज्ञातस्य समाधेरधुना लक्षणं विवक्षन्नाह ॥ एवमिति ॥ काले समाध्युपलक्षिते ॥ एवकारस्तुष्यतीत्यनेन सं

तदा योगिनः समाहितचित्तस्योपमोच्यते ॥ यथा दीपः प्रदीपो निवातस्थो निवाते वातवर्जिते देशे स्थितो नेंगते न चलति सा
उपमा उपमीयतेऽनयेत्युपमा योगज्ञैश्चित्तप्रचारदर्शिभिः स्मृता चिंतिता कस्य योगिनो यतचित्तस्य संयतांतःक
रणस्य युंजतो योगमनुतिष्ठतः आत्मनः समाधानं अनुतिष्ठत इत्यर्थः ॥ १९ ॥ एवं योगाभ्यासबलादेकाग्रीभूतं निवा ॥

यथा दीपो निवातस्थो नेंगते सोपमा स्मृता ॥ योगिनो यतचित्तस्य युंजतो योगमात्मनः ॥ १९ ॥
यत्रोपरमते चित्तं निरुद्धं योगसेवया ॥ यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥

तप्रदीपकल्पं सत् ॥ यत्र यस्मिन् काले उपरमते चित्तमुपरतिं गच्छति निरुद्धं सर्वतो निवारितप्रचारं योगसेवया योगा
नुष्ठानेन यत्र चैव यस्मिंश्च काले आत्मना समाधिपरिशुद्धेनांतःकरणेनात्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन्नुप ॥
लभमानः स्व एवात्मनि तुष्यति तुष्टिं भजते ॥ २० ॥

बध्यते ॥ चकारस्य संबंधमाह ॥ यस्मिंश्चेति ॥ कालस्तु पूर्ववत् कर्मकारकत्वे
न निर्दिष्टमात्मानं तत्पदार्थत्वेन व्याचष्टे ॥ परमिति ॥ आत्मनीत्यस्य त्वंपदार्थविषयत्वमाह ॥ स्व एवेति ॥ परमात्मानं प्रतीच्येव तद्भा
वेनापरोक्षीकुर्वन्न तुष्टिहेत्वभावात् तुष्यत्येवेत्यर्थः ॥ तस्मिन् काले योगसिद्धिर्भवतीति शेषः ॥ २० ॥ श्रीसीतारामचंद्राय नमः ॥

योगसिद्धिकालं प्रकारांतरेण प्रकटयति ॥ किंचेति ॥ बुद्धिशब्दः स्वानुभवविषयः इंद्रियानिरपेक्षस्वानुभवगम्यतोक्ते रतींद्रियमि
तिपुनरुक्तमित्याशंक्याह ॥ अविषयेति ॥ पदच्छेदो नचेत्यादिः ॥ अपेक्षितपूरणमात्मस्वरूपमिति तस्मात्तत्वतइति संबंधः
नैवेत्येवकारसंबंधोक्तिः ॥ चकारः सप्तम्या संबंधनीयः ॥ यत्रेति ॥ पूर्ववत् संबंधः ॥ २१ ॥ प्रकारांतरेण प्रकृतं योगं विशि

किंच ॥ सुखमात्यंतिकमत्यंतमेव भवतीत्यात्यंतिकमनंतमित्यर्थः ॥ यत्तद्बुद्धिग्राह्यं बुद्ध्यैवेंद्रियनिरपेक्षया ग्र
ह्यतइति बुद्धिग्राह्यं अतींद्रियं इंद्रियगोचरातीतं ॥ अविषयजनितमित्यर्थः ॥ वेत्तियदीदृशं सुखमनुभवति
यत्र यस्मिन् काले नचायं विद्वान् आत्मस्वरूपे स्थितस्तस्मान्नैवचलति तत्व तस्तत्वस्वरूपान्न प्रच्यवतइत्य

सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं ॥ वेत्ति यत्र न चैवायं स्थितश्चलति तत्वतः ॥ २१ ॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ॥ यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते २२ ॥

र्थः ॥ २१ ॥ किंच ॥ यं आत्मलाभं लब्ध्वा प्राप्य अपरमन्यल्लाभांतरं ततोधिकमस्तीति न मन्यते न चिंतयति ॥ किंच
यस्मिन्नात्मतत्वे स्थितो दुःखेन शस्त्रनिपातादिलक्षणेन गुरुणा महतापि न विचाल्यते ॥ २२ ॥ श्रीकृष्णः ॥

नष्टि ॥ किंचेति ॥ आत्मलाभान्न परं विद्यत इति स्मृत्या व्याचष्टे ॥ यमात्मलाभमिति ॥ लाभांतरं पुरुषार्थभूतं ततस्तस्मा
दात्मलाभादिति यावत् ॥ तं विद्यादित्युत्तरत्र संबंधः ॥ यस्मिन्नित्याद्यवतारयति ॥ किंचेति ॥ अपरिपक्वयोगो यथा दर्शिते
न दुःखेन प्रच्यवते नैवं विचाल्यते यस्मिन् स्थितो योगी तं योगं विद्यादिति पूर्ववत् ॥ २२ ॥ श्रीसीतारामचंद्राय नमो नमः ॥

तं विद्यादित्याद्यपेक्षितं पूरयन्नवतारयति ॥ यत्रेति ॥ तमिमामात्मावस्थाविशेषं परामृशति ॥ दुःखसंयोगस्य वियोगो वियोगसं
ज्ञितो युज्यते स कथं योगसंज्ञितः स्यादित्याशंक्याह ॥ विपरीतेनेति ॥ इयं हि योगावस्था समुत्खातनिखिलदुःखभेदेति दुः
खसंयोगाभावो योगसंज्ञामर्हतीत्यर्थः ॥ उपसंहृते योगफले किमिति पुनर्योगस्य कर्त्तव्यत्वमुच्यते तत्राह ॥ योगफलमिति

यत्रोपरमते इत्याद्यारभ्य यावद्भिर्विशेषणैर्विशिष्ट आत्मावस्थाविशेषो योग उक्तः ॥ तं विद्यात् विजानीया
त् दुःखसंयोगवियोगं दुःखैः संयोगो दुःखसंयोगः तेन वियोगस्तं दुःखसंयोगवियोगं योग इत्येव संज्ञितं विप
रीतलक्षणया विद्याद्विजानीयात् इत्यर्थः ॥ योगफलमुपसंहृत्य पुनरन्वारंभेण योगस्य कर्त्तव्यतोच्यते निश्चया

तं विद्यात् दुःखसंयोगवियोगं योगसंज्ञितं ॥ स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा ॥ २३ ॥

निर्वेदयोः योगसाधनत्वविधानार्थस्य यथोक्तफलयोगो निश्चयेनाध्यवसायेन योक्तव्यः निर्विण्णचेतसा
न निर्विण्णम निर्विण्णं तच्चेतस्तेन निर्वेदरहितेन चेतसा चित्तेनेत्यर्थः ॥ २३ ॥ श्रीरामचंद्राय नमो नमः ॥

प्रकारांतरेण योगस्य कर्त्तव्यत्वोपदेशारंभो त्रान्वारंभः योगं युंजानस्तत्क्षणादुक्तां संसिद्धिमलभमानः संशयानो निव
र्तेत तन्निवृत्त्यर्थं पुनः कर्त्तव्यत्वोपदेशोऽर्थवानिति मत्वाह ॥ निश्चयेति ॥ तयोः साधनत्वविधानमेवाक्षरयोजनया साधय
ति ॥ स यथेति ॥ इह जन्मनि जन्मांतरे वा सेत्स्यत्यध्यवसायेन योक्तव्यः कर्त्तव्यः ॥ २३ ॥ श्रीसीतारामचंद्रजी प्रसन्नो मम ॥

रतश्च योगस्य कर्त्तव्यत्वमिति प्रतिजानीते ॥ किं चेति ॥ केन क्रमेण कर्त्तव्यत्वमित्यपेक्षायामाह ॥ संकल्पेति ॥ संकल्पः शोभनाध्यासः स
र्वानित्युक्त्वा पुनरशेषत इति पुनरुक्तमित्याशंक्याह ॥ निर्लेपेनेति ॥ यथात्र शेषो न भवति तथा सर्वेषां कामानां शोभनाध्यासा
धीनानां त्यागस्य योगानुष्ठानशेषत्ववद्विवेकयुक्तेन मनसा करणसमुदायस्य सर्वतो नियमनमपि तत्र शेषत्वेन कर्त्तव्यमि
त्याह ॥ किं चेति ॥ २४ ॥ कामत्यागद्वारेणेंद्रियाणि प्रत्याहृत्य किं कुर्यादिति शंकितारं प्रत्याह ॥ शनैः शनैरिति ॥ सहसा विषयेभ्यः

किंच ॥ संकल्पप्रभवान्संकल्पः प्रभवो येषां कामानां ते संकल्पप्रभवाः कामाः तान्कामान्त्यक्त्वा परित्यज्य सर्वान
शेषतो निर्लेपेन किंच मनसैव विवेकयुक्तेनेंद्रियग्राममिंद्रियसमुदायं विनियम्य नियमनं कृत्वा समंततः समंता
त् ॥ २४ ॥ शनैः शनैर्न सहसोपरमेत् उपरतिं कुर्यात्केन बुद्ध्या किं विशिष्टया धृतिगृहीतया धृत्या गृहीता धृतिगृ

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ॥ मनसैवेंद्रियग्रामं विनियम्य समंततः ॥ २४ ॥
शनैः शनैरुपरमेत् बुद्ध्या धृतिगृहीतया ॥ आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् ॥ २५ ॥

हीता तया धैर्ययुक्तयेत्यर्थः ॥ आत्मसंस्थमात्मनि संस्थितमात्मैव सर्वं न ततोन्यत् किंचिदस्तीत्येवमात्म
संस्थं मनः कृत्वा न किंचिदपि चिंतयेदेष योगस्य परमो वधिः ॥ २५ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥

सकाशादुपरमे मनसो न स्वास्थ्यं संभवतीत्यभिप्रेत्याह ॥ न सहसेति ॥ तत्र साधनं धैर्ययुक्ता बुद्धिरित्याह ॥ केनेत्यादिना भूम्यादी
रव्याकृतपर्यंताः प्रकृतीरष्ट पूर्वपूर्वत्र धारणां कृत्वोत्तरोत्तरक्रमेण प्रविलापयेदिति भावः ॥ अव्यक्तमात्मनि प्रविलाप्यात्ममा
त्रनिष्ठं मनो विधाय चिंतयितव्याभावादृतिसुस्थो भवेदित्याह ॥ आत्मेति ॥ तत्र संस्थितिमेव मनसो विवृणोति ॥ आत्मैवेति ॥ यो
गविधिमुपक्रम्य किमिदमुक्तमित्याशंक्याह ॥ एष इति ॥ यन्मनसो नैश्चल्यमिति शेषः ॥ २५ ॥ श्रीरामचंद्राय नमः ॥ ॥

ननुमनसः शब्दादिनिमित्तानुरोधेन रागद्वेषवशादस्थं तत्त्वं चलस्यास्थिरस्य तत्र तत्र स्वभावेन प्रवृत्तस्य कुतो नैश्चल्यं नैश्चिंत्यं वेति तत्राह॥ ततेति॥ योगप्रारंभः सप्तम्यर्थः॥ एवं शब्देन मनसैवेत्याद्युक्तप्रकारो गृह्यते॥ स्वाभाविको दोषो मिथ्याज्ञानाधीनो रागादिः शब्दादेर्मनसो नियमनं कथमित्याशंक्याह॥ ततन्निमित्तमिति॥ यथार्थनिरूपणं क्षयिष्णुत्वदुःखसंमिश्रत्वाद्यालोचनं तेन तत्र तत्र वैराग्यभावनया तत्तद्भावीकृत्य ततस्ततो नियम्यैतन्मन इति संबंधः॥ २६॥ मनसो वशीकरणेनोपशमे किं स्या

तत्रैवमात्मसंस्थं मनः कर्तुं प्रवृत्तो योगी यतो यतो यस्माद्यस्मान्निमित्ताच्छब्दादेर्निश्चरति निर्गच्छति स्वभावदोषान्मनश्चंचलमस्यर्थं चलमत एवास्थिरं॥ ततस्ततस्तस्मात्तस्माच्छब्दादेर्निमित्तान्नियम्य तत्तन्निमित्तं याथात्म्यनिरूपणेनाभावीकृत्य वैराग्यभावनया चैतन्मन आत्मन्येव वशं नयेदात्मवश्यतामापादयेत्॥ २६॥ एवं योगाभ्यासबलाद्यो

यतो यतो निश्चरति मनश्चंचलमस्थिरं॥ ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥ २६॥ प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमं॥ उपैति शांतरजसं ब्रह्मभूतमकल्मषं॥ २७॥ श्रीकृष्णः॥

गिन आत्मन्येव प्रशाम्यति मनः प्रशांतमनो यस्य स प्रशांतमनाः तं प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमं निरतिशयमुपैत्युपगच्छति॥ शांतरजसं प्रक्षीणमोहादिक्लेशरजसमित्यर्थः॥ ब्रह्मभूतं जीवन्मुक्तं ब्रह्मैव सर्वतरसेवं निश्चयवंतं ब्रह्मभूतमकल्मषं धर्माधर्मवर्जितं॥ २७॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥ श्रीकृष्णः॥

दित्याशंक्याह॥ एवमिति॥ योगाभ्यासो विषयविवेकद्वारा मनोनिग्रहाद्यावृत्तिः प्रशांतं स्वात्मन्येव प्रलीनमिति यावन्मनस्तद्धेतोरभावे स्वरूपभूतसुखाविर्भावस्य स्वापादौ प्रसिद्धिं द्योतयितुं हि शब्दः मोहादिक्लेशप्रतिबंधाद्योगिनियथोक्तसुखाप्राप्तिमाशंक्य मनो विलयमुपेत्य परिहरति॥ शांतरजसमिति॥ तस्यास्मदादिविलक्षणत्वमाह॥ ब्रह्मभूतमिति॥ अस्मदादेरपि स्वतो ब्रह्मभूतत्वेन तुल्यं जीवन्मुक्तत्वमित्याशंक्याह॥ ब्रह्मैवेति॥ धर्माधर्मप्रतिबंधादयुक्ता यथोक्तसुखप्राप्तिरित्याशंक्योक्तं॥ अक

उत्तमसुखंयोगिनोभवतीत्युक्तं तदेवस्फुटयति युंजन्निति ॥ क्रमोयथोक्तोमनसैवेंद्रियग्राममित्यादिः ॥ योगांतरायोरागद्वेषादिः सदा

त्मानंयुंजन्निति संबंधः पापपदमुपलक्षणंपुण्यस्यापि संस्पर्शस्तादात्म्यमेकरस्यंउत्कर्षोविषयासंस्पर्शः ॥ २८ ॥ योगमनुतिष्ठतोब्र

ह्मभूतस्यसर्वानर्थनिवृत्तिनिरतिशयसुखप्राप्तिलक्षणोद्विविधोमोक्षोहेतुनाकेनस्यादितिशंकमानंप्रत्याह ॥ इदानीमिति ॥ खमा

युंजन्नेवंयथोक्तेनक्रमेणयोगीयोगांतरायवर्जितः सदासर्वदात्मानंयुंजन्विगतकल्मषोविगतपापः सुखेना

नायासेनब्रह्मसंस्पर्शंब्रह्मणापरेणसंस्पर्शोयस्यतद्ब्रह्मसंस्पर्शंसुखमत्यंतमुत्कृष्टंसुखंनिरतिशयंसुखंअ

श्नुतेव्याप्नोति ॥ २८ ॥ इदानींयोगस्ययत्फलंब्रह्मैकत्वदर्शनंसर्वसंसारविच्छेदकारणंतत्प्रदर्श्यते ॥ सर्वभूतस्थंस

युंजन्नेवंसदात्मानंयोगीविगतकल्मषः ॥ सुखेनब्रह्मसंस्पर्शमत्यंतंसुखमश्नुते ॥ २८ ॥

सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि ॥ ईक्षतेयोगयुक्तात्मासर्वत्रसमदर्शनः ॥ २९ ॥

र्वेषुभूतेषुस्थितंस्वमात्मानंसर्वभूतानिचात्मनिब्रह्मादीनिस्तंबपर्यंतानिसर्वभूतान्यात्मन्येकतांगतानि

ईक्षतेपश्यतिकः योगयुक्तात्मासमाहितांतःकरणः सर्वत्रसमदर्शनः सर्वेषुब्रह्मादिस्थावरांतेषुविषमे

षुसर्वभूतेषुसमंनिर्विशेषंब्रह्मात्मैकत्वविषयंदर्शनंज्ञानंयस्यससर्वत्रसमदर्शनः ॥ २९ ॥ श्रीरामायनमः ॥

त्मानमीक्षतइतिसंबंधः सर्वभूतान्यपितद्विशेषणत्वेनपश्यतिचेतन्नशुद्धवस्तुज्ञानमितिनाविद्यानिवृत्तिरित्याशं

क्याह ॥ सर्वभूतानीति ॥ उक्तेदर्शनेचित्तसमाधानमुपायंदर्शयति ॥ योगेति ॥ विषमेषूपाधिषुतद्वस्तुरोधाद्विषममेवद

र्शनमुपदर्शनप्रतिबंधकंप्रत्युद्दिश्यति ॥ सर्वत्रेति ॥ २९ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामचंद्रायनमोनमः ॥

उक्तस्यैकत्वज्ञानस्य फलविकलत्वशंकां शिथिलयति एतस्येति तत्रैकत्वदर्शनमनुवदति योमामिति तत्फलमिदानीमुपन्यस्यति तस्येति ज्ञानानुवादभागं विभजते योमामिति तत्फलोक्तिभागं व्याचष्टे तस्यैवमिति अनेकत्वदर्शनेपीश्वरो नित्यत्वान्न प्रणश्यतीत्याशंक्याह नेति अहं परमानंदो न तं प्रति परोक्षी भवामीत्यर्थः सचेत्यादि व्याचष्टे विद्वानिति विद्वानिवाविद्वानपीश्वरस्य न नश्यतीत्याशंक्याह नेत्यादि अविदुषः स्वरूपेण सतोपि व्यवहितत्वाद्विद्यया नष्टप्रायते त्यर्थः ईश्वरस्य विदुषश्च पर

एतस्यात्मैकत्वदर्शनस्य फलमुच्यते योमां पश्यति वासुदेवं सर्वस्यात्मानं सर्वत्र सर्वेषु पश्यति वीक्ष्यते सर्वं च ब्रह्मादि भूतजातं मयि सर्वात्मनि पश्यति तस्यैवमात्मैकत्वदर्शिनोहमीश्वरो न प्रणश्यामि न परोक्षतां गच्छामि स च मे न प्रणश्यति स च विद्वान्मे मम वासुदेवस्य न प्रणश्यति न परोक्षो भवति तस्य च मम चैकात्मकत्वात् स्वात्मा हि नाम

योमां पश्यति सर्वत्र सर्वं च मयि पश्यति तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥३०॥ सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः सर्वथा वर्तमानोपि स योगी मयि वर्तते ॥३१॥ श्रीः॥

त्मनः प्रिय एव भवति ॥३०॥ यस्माच्चाहमेव स सर्वात्मैकत्वदर्शी इत्येतं पूर्वश्लोकार्थं सम्यग्दर्शनमनूद्य तत्फलं मोक्षो विधीयते सर्वथा सर्वप्रकारैर्वर्त्तमानोपि सम्यग्दर्शी योगी मयि वैष्णवे परमे पदे वर्त्तते नित्यमुक्त एव सः न मोक्षं प्रति केन चित्प्रतिबध्यत इत्यर्थः ॥३१॥ श्रीसीतारामचंद्राय नमः श्रीसीतारामचंद्राय नमः ॥ श्रीः॥

स्परमपरोक्षत्वे हेतुमाह तस्य चेति आत्मैकत्वेपि कथं मिथोऽपरोक्षत्वं तत्राह स्वात्मेति ॥३०॥ विद्वदीश्वरयोरेकत्वानुवादेन विद्याफलं विवृणोति यस्माच्चेति तस्मादेकत्वदर्शनार्थं प्रयतितव्यमिति शेषः पूर्वार्द्धेनानूद्योत्तरार्द्धेन फलविधिरिति मत्वाह इत्येतमिति रागादिरहितस्य यमनियमादिसंस्कारवतः स्वैरवृत्त्यसंभवेपि तामंगीकृत्येत्युक्तं ज्ञानं स्तौति सर्वथेति प्रतिभासतोपि यथेष्टचेष्टांगीकारे कुतो ज्ञानवतो नित्यमुक्तत्वं प्रातीतिकदुराचारप्रतिबंधादित्याशंक्याह न मोक्षमिति ॥३१॥ श्रीरामाय नमः॥

खेऽप्याचरणस्याप्रतिबंधकत्वकथनात्सर्पीडनस्य योगिनः सम्यग्दर्शनं प्रत्यप्रतिबंधकत्वप्रसक्तावुक्तं ॥ किंचेति ॥ अन्यदपि किं
चिदुच्यते ॥ परमयोगिनो निर्देशद्वारा योगमाहात्म्यमित्यर्थः ॥ उपमैवौपम्यमात्मा च तदौपम्यं च तेन सर्वभूतेषु यः समं प
श्यतीत्युक्तं तदेव समदर्शनं प्रश्नपूर्वकं विवृणोति ॥ किमित्यादिना ॥ विकल्पार्थत्वं व्यावर्त्तयति ॥ चाशब्द इति ॥ उपदर्शित

किंचान्यत् ॥ आत्मा स्वयमेवोपमा तद्भाव औपम्यं तेनात्मौपम्येन सर्वभूतेषु समं तुल्यं पश्यति योऽर्जुन स च किं स
मं पश्यतीत्युच्यते ॥ यथा मम सुखमिष्टं तथा सर्वप्राणिनां सुखमनुकूलं वाशब्दश्चार्थे यदि वा यच्च दुःखं मम प्रति
कूलमनिष्टं यथा तथा सर्वप्राणिनां दुःखमनिष्टं प्रतिकूलमित्येवमात्मौपम्येन सुखदुःखेऽनुकूलप्रतिकूले तुल्यत
या सर्वभूतेषु समं पश्यति न कस्यचित्प्रतिकूलमाचरति अहिंसक इत्यर्थः ॥ य एवमहिंसकः सम्यग्दर्शननिष्ठः स योगी

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ॥ सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥ अर्जुन उवाच ॥ योऽयं
योगस्त्वया प्रोक्तः साम्येन मधुसूदन ॥ एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिरां ॥ ३३ ॥ श्रीरामाय०

परम उत्कृष्टो मतोऽभिमतः सर्वेषां योगिनां मध्ये ॥ ३२ ॥ एतस्य यथोक्तस्य सम्यग्दर्शनलक्षणस्य योगस्य दुःसंपा
द्यतामालक्ष्य शुश्रूषुः ध्रुवं तत्प्राप्त्युपायमर्जुन उवाच ॥ योऽयं योगस्त्वया प्रोक्तः साम्येन समत्वेन मधुसूदन ॥ एत
स्य योगस्याहं न पश्यामि नोपलभे चंचलत्वान्मनसः ॥ किं स्थिरामचलां स्थितिं ॥ ३३ ॥ श्रीकृष्णायनमः ॥ श्रीः

समदर्शनफलमभिलक्षयति ॥ न कस्यचिदिति ॥ किमपेक्ष्यास्य परमत्वं तत्राह ॥ सर्वेति ॥ ३२ ॥ मनश्चंचलमस्थिरमित्यु
पश्रुत्य निर्विशेषे चित्तस्थैर्यं दुःशकमिति मन्वानस्तदुपायबुभुत्सया पृच्छतीति प्रश्नमुत्थापयति ॥ एतस्येति ॥ तत्प्राप्त्युपायं शु

क्षुप्तिमिवंधः ॥३३॥

मनसश्चंचलत्वे पि तन्निग्रहद्वारा योगस्य स्थैर्यं संपाद्यतामित्याशंक्याह प्रसिद्धमिति ॥ कृष्णपदपरिनिष्पत्तिप्रकारं सूचयति कृष्ण इति ॥ कथं कर्षकत्वमात्मकामस्य भगवतः संभवतीत्याशंक्याह भक्तेति ॥ ऐहिकामुष्मिकसर्वसंपदामाकर्षणशीलत्वाच्चेति द्रष्टव्यः प्रमथ्नातिक्षोभयति ॥ तदेव क्षोभकत्वं प्रकटयति विक्षिपतीति ॥ दुर्निवारकत्वमभिप्रेता

प्रसिद्धमेतत् चंचलं हि मनः कृष्ण इति कृष्यते र्विलेखनार्थस्य रूपं भक्तजनानां पापादिदोषाकर्षणात्कृष्णः हि यस्मान्मनः चंचलं न केवलं अत्यर्थं चंचलं प्रमथनशीलं प्रमथ्नाति शरीरमिंद्रियाणि च विक्षिपति परवशी

चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं तस्याहं निग्रहं मन्ये वायोरिव सुदुःकरं ॥ ३४ ॥

करोति ॥ किंच बलवन्न केनचिन्नियंतुं शक्यं ॥ किंच दृढं तंतुनागबंधवदछेद्यं तस्यैवंभूतस्य मनसो ऽहं निग्रहं निरोधं मन्ये वायोरिव यथा वायोः दुःकरो विनिग्रहस्ततोपि मनसः दुःकरं मन्ये इत्यभिप्रायः ॥ ३४ ॥ श्रीः ॥ ॥

द्विषयादाकृष्टुमशक्यत्वं विशेषणांतरमाह ॥ किंचेति ॥ अछेद्यत्वं विशेषणांतरमाह ॥ किंच दृढमिति ॥ तंतुनागो वरुणपाशाख्यो जलचारी पदार्थो यस्तंतदृढतया छेत्तुमशक्यत्वेन प्रसिद्धो विवक्षितः वायोरिवेत्युक्तं व्यनक्ति ॥ यथेति ॥ ३४ ॥

प्रश्नमंगीकृत्यप्रतिवचनमुत्थापयति भगवानिति कुत्रसंशयराहित्यंतत्राह मनइति कथंतर्हिमनोनिरोधोभवतितत्रा
ह किंत्विति अभ्यासस्वरूपंसामान्येननिर्दिशति अभ्यासोनामेति कस्यांचिच्चित्तभूमावित्यविशेषितोध्येयोविष
योनिर्दिश्यतेसमानप्रत्ययावृत्तिर्विजातीयप्रत्ययानंतरितेतिशेषः चित्तस्येतिषष्ठीप्रत्ययस्यतद्विकारत्वद्योतनार्थोवै

एवमेवयथाब्रवीषि॥ असंशयंनास्तिसंशयोमनोदुर्निग्रहंचलमित्यत्रमहाबाहोकिंतुअभ्यासेनतुअभ्या
सोनामचित्तभूमौकस्यांचित्समानप्रत्ययावृत्तिश्चित्तस्यवैराग्यंदृष्टादृष्टेष्टभोगेषुदोषदर्शनाभ्यासात्वै

श्रीभगवानुवाच॥ असंशयंमहाबाहोमनोदुर्निग्रहंचलं॥ अभ्यासेनतुकौंतेयवैराग्येणचगृह्यते॥ ३५॥

तृष्ण्यंतेनचवैराग्येणचगृह्यतेविक्षेपरूपःप्रचारःचित्तस्यैवंतन्मनोगृह्यतेनिरुध्यतइत्यर्थः॥ ३५॥ श्रीः

राग्यस्वरूपंनिरूपयति वैराग्यमिति तेषुवैतृष्ण्यंवैराग्यंनामेतिसंबंधः तत्रहेतुंसूचयति दोषेति विषयेषुतत्तद्विष
येषुदोषदर्शनमभ्यस्यतोतेनवैतृष्ण्यंजायतेतेनगृह्यमाणंनिर्दिशति विक्षेपेति तस्मिन्गृहीतेनिरुद्धेमनोनिरोधकस्य
किंस्यादित्यपेक्षायामाह एवमिति अभ्यासहेतुकवैराग्यद्वाराचित्तप्रचारनिरोधेनिरुद्धवृत्तिकंमनोविषयविमुखमंतर्निष्ठं

संयतात्मनो योगप्राप्तिः सुलभेत्युक्त्वा व्यतिरेकं दर्शयति यः पुनरिति व्यतिरेकोपन्यासपरं पूर्वार्द्धमनूद्य व्याकरोति असंयते
ति पूर्वोक्तान्वयव्याख्यानपरमुत्तरार्द्धं व्याचष्टे ॥ यत्त्वित्यादिना ॥ अंतःकरणस्य वश्यत्वेऽसिद्धेऽपि वैराग्यादावास्थावता भवि

यः पुनः असंयतात्मा तेन ॥ असंयतात्मना अभ्यासवैराग्याभ्यां असंयत आत्मांतःकरणं यस्य
सोऽयमसंयतात्मा तेनासंयतात्मना योगो दुःप्रापो दुःखेन प्राप्यत इति मे मतिः ॥ यस्तु पुनर्वश्या

असंयतात्मना योगो दुःप्राप इति मे मतिः ॥ वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६ ॥

त्मा अभ्यासवैराग्याभ्यां वश्यत्वमापादितं आत्मा मनो यस्य सोऽयं वश्यात्मा तेन वश्यात्मना तु य
तता भूयोऽपि प्रयत्नं कुर्वता शक्योऽवाप्तुं योगः उपायतः यथोक्तादुपायात् ॥ ३६ ॥ श्रीरामायनमः

तव्यमित्याह ॥ यततेति ॥ उपायो वैराग्यादिपूर्वको मनोनिरोधः ॥ ३६ ॥ श्रीरामायनमः ॥ श्रीसीतारामचंद्रायनमः ॥

तत्रे

प्रश्नांतरमुत्थापयति ॥ अयथेति ॥ मनोनिरोधस्य दुःसाध्यत्वमाशंक्य परिहृते सति प्रष्टा पुनरवकाशं प्रतिलभ्यो वा चेति संबंधः
लोकद्वयप्रापककर्मसंभवे कुतो योगिनो नाशाशंकेत्याशंक्याह ॥ योगाभ्यासेति ॥ तथापि योगानुष्ठानपरिपाकपरिप्रापि
तसम्यग्दर्शनसामर्थ्यान्मोक्षोपपत्तेः कुतस्तस्य नाशाशंकेति चेन्मैवमनेकांतरायवत्वात् योगस्येह जन्मनि प्रायेण संसि
द्धेरसिद्धेरित्यभिप्रायेणाह ॥ योगसिद्धीति ॥ अभ्युदयनिःश्रेयसबहिर्भावो नाशः योगमार्गे तत्फलस्य सम्यग्दर्शनस्यादर्श

तत्र योगाभ्यासांगीकरणेन परलोकेहलोकप्राप्तिनिमित्तानि कर्माणि संन्यस्तानि योगसिद्धिफलं च मोक्षसाध
नं सम्यग्दर्शनमप्राप्तमिति योगी योगमार्गान्मरणकाले चलितचित्त इति तस्य नाशमाशंक्याह ॥ अयतिरप्रयत्न

॥ अर्जुन उवाच ॥ अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ॥ अप्राप्य
योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७ ॥ श्रीकृष्णायनमो नमः ॥

वान्योगमार्गेषु श्रद्धया आस्तिक्यबुद्ध्या चोपेतो योगादंतकाले च चलितं मानसं मनो यस्य स च चलितमानसो
भ्रष्टस्मृतिः सोऽप्राप्य योगसंसिद्धिं योगफलं सम्यग्दर्शनं कां गतिं हे कृष्ण गच्छति ॥ ३७ ॥ श्रीकृष्णायनमः

नादिति शेषः ॥ तर्हि तन्नो बहिर्मुखत्वमेवास्यांतिकं संवृत्तमित्याशंक्याह ॥ श्रद्धयेति ॥ तर्हि योगमार्गमाश्रियते नेत्याह ॥ यो
गादिति ॥ मरणकाले व्याकुलेंद्रियस्य ज्ञानसाधनानुष्ठानावकाशाभावाद्युक्तं तत्र स्खलितमानसत्वमित्याह ॥ भ्रष्टेति ॥
गम्यत इति गतिः पुरुषार्थः सामान्यप्रश्नमंतर्भाव्य विशेषप्रश्नो द्रष्टव्यः ॥ ३७ ॥ श्रीसीतारामचंद्रायनमो नमः ॥

प्रश्नमेव विवृणोति ॥ कच्चिदिति ॥ प्रशस्तप्रश्नार्थत्वं कच्चिदित्यस्यांगीकृत्य व्याचष्टे ॥ किमिति ॥ उभयविभ्रष्टत्वं स्पष्टयति कर्मेत्यादिना ॥ वायुना छिन्नं विशकलितमभ्रं यथा नश्यति तद्वदित्याह ॥ छिन्नेति ॥ नाशशंकानिमित्तमाह ॥ निराश्रय इति कर्ममार्गरूपावष्टंभाभावेपि ज्ञानमार्गावष्टंभस्तस्य भविष्यतीत्याशंक्याह ॥ विमूढः सन्निति ॥ न हि कर्मिणां प्रतीयमा शंका फलाभिलाषं त्यक्त्वेश्वरे समर्प्यास मर्प्य वा कर्मानुतिष्ठतो निरुपचारेण तद्भ्रंशवचनासंभवात्सर्वकर्मसंन्यासिन

कच्चिन्नोभयविभ्रष्टः कर्ममार्गाद्योगमार्गाच्च विभ्रष्टः सन्नुभयविभ्रष्टः छिन्नाभ्रमिव नश्यति किं न श्यति वा अप्रतिष्ठो निराश्रयो हे महाबाहो विमूढः सन् ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे ॥ ३८ ॥ एतन्मेम मसंशयं कृष्ण

कच्चिन्नोभयविभ्रष्टः छिन्नाभ्रमिव नश्यति ॥ अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥
एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ॥ त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३९ ॥

छेत्तुमपनेतुमर्हस्यशेषतः ॥ त्वदन्यस्त्वत्तोन्य ऋषिर्देवो वा छेत्ता नाशयिता संशयस्यास्य न हि यस्मादुपपद्यते न संभवति ॥ अतस्त्वमेव छेत्तुमर्हसीत्यर्थः ॥ ३९ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामायनमोनमः ॥

स्तु विहितानां त्यागात् ज्ञानोपायस्य चाविच्युतेरनर्थप्राप्तिशंकायुक्तेति भावः ॥ ३८ ॥ यथोपदर्शितसंशयापाकरणार्थमर्जुनो भगवंतं प्रेरयन्नाह ॥ एतदिति ॥ मत्तोन्यः कश्चिदृषिर्वा देवो वा त्वदीयं संशयं छेत्स्यतीत्याशंक्याह ॥ त्वदन्य इति अन्यस्य संशयछेत्तुरभावे फलितमाह ॥ अत इति ॥ ३९ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामचंद्रायनमः ॥

योगिनोनाशशंकांपरिहरन्नुत्तरमाह ॥ भगवानिति ॥ यदुक्तमुभयभ्रष्टोयोगीनश्यतीतितत्राह पार्थेति ॥ तत्रहेतुमाह ॥ न
हीति ॥ योगिनोमार्गद्वयाद्विभ्रष्टस्यैहिकोनाशः शिष्टगर्हालक्षणोनभवतिश्रद्धादेः सद्भावात्तथापिकथमामुष्मिकना
शइत्यन्यत्त्वमित्याशंक्यतद्रूपनिरूपणपूर्वकंतदभावंप्रतिजानीते ॥ नाशोनामेति ॥ तत्रहेतुभागंविभजते नहीत्यादिना ॥ उ

पार्थनैवेहलोकेनामुत्रपरस्मिन्वालोकेविनाशस्तस्यविद्यतेनास्तिनाशोनामपूर्वस्माद्धीनजन्मप्राप्तिः सयोगभ्र
ष्टस्यनास्तिनहियस्मात्कारणात्कल्याणकृत्शुभकृत्कश्चित्दुर्गतिंकुत्सितांगतिंहेताततनोत्यात्मानंपु

॥ श्रीभगवानुवाच ॥ पार्थनैवेहनामुत्रविनाशस्तस्यविद्यते ॥
नहिकल्याणकृत्कश्चित्दुर्गतिंतातगच्छति ॥ ४० ॥ श्रीः ॥ ॥

त्ररूपेणेतिपितातातउच्यतेपितैवपुत्रइतिपुत्रोपितातउच्यतेशिष्योपिपुत्रउच्यतेयतः ॥ ४० ॥ ४० ॥ ४० ॥

भयभ्रष्टस्यापिश्रद्धेंद्रियसंयमादेःसात्विकत्वश्रवणादेश्वभावादुपपन्नंशुभकृत्त्वं ॥ ताताेति ॥ कथंपुत्रस्थानीयः शिष्यः
संबोध्यतेपितुरेवतच्छाब्दत्वादित्याशंक्याह ॥ तनोतीति ॥ तेनपुत्रस्थानीयशिष्यस्यतातेतिसंबोधनमविरुद्धमितिभावः
नगच्छतिकुत्सितांगतिं ॥ कल्याणकारित्वादितिनाशाभावः ॥ ४० ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीकृष्णायनमः

योगभ्रष्टस्य लोकद्वयेपि नाशाभावे किं भवतीति पृच्छति किंत्विति तत्र श्लोकांतरेणोत्तरमाह प्राप्येति कथं संन्यासीति विशिष्य
स्य तेतत्राह सामर्थ्यादिति कर्मणिव्या एतस्य कर्मिणो योगमार्गे प्रवृत्तस्य नुपपत्तेस्तस्य ज्ञानवपि फलाभिलाषविकलस्ये
श्वरे समर्पितसर्वकर्मण स्तद्भ्रंशशंकानवकाशादित्यर्थः समानां नित्यत्वं मानुषसमाविलक्षणत्वं वैराग्याभावविवक्षया
विभूतिमतां गेहे जन्मेति विशिष्यते ४१ श्रद्धावैराग्यादिकल्याणाधिक्यपक्षांतरमाह अथवेति योगिनामिति कर्मि

किंत्वस्य भवति योगमार्गेषु प्रवृत्तः संन्यासी सामर्थ्यात्प्राप्य गत्वा पुण्यकृतामश्वमेधादियाजिनां लोकांस्तत्र उ
षित्वा वासमनुभूय शाश्वतीर्नित्याः समाः संवत्सरान् तद्भोगक्षये शुचीनां यथोक्तकारिणां श्रीमतां विभूतिम
तां गृहे योगभ्रष्टोभिजायते ॥४१॥ अथवा श्रीमतां कुलादन्यस्मिन् योगिनामेव दरिद्राणां कुले भवति जाय

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजायते ॥४१॥
अथवा योगिनामेव कुले भवति धीमतां ॥ एतद्धि दुर्लभतरं लोके जन्म यदीदृशं ॥४२॥ श्रीः॥

ते धीमतां बुद्धिमतां एतद्धि जन्म यद्दरिद्राणां योगिनां कुले दुर्लभतरं दुःखेन लभ्यतरं पूर्वमपेक्ष्य लोके जन्म य
दीदृशं यथोक्तविशेषणे कुले स्यात् ॥४२॥ णोग्रहणं माभूदिति विशिनष्टि धीमतामिति ब्रह्मविद्यावतां शुचीनां दरि
द्राणां कुले जन्म दुर्लभादपि दुर्लभं प्रमादकारणाभावादित्याह एतद्धीति किमपेक्ष्यास्य जन्मनो दुःखलभ्यादपि दुःखल
भ्यत्वं तदाह पूर्वमिति यद्यपि विभूतिमतामपि शुचीनां गृहे जन्म दुःखलभ्यं तथापि तदपेक्ष्येदं जन्म दुःखलभ्यतरं यदी
दृशं शुचीनो दरिद्राणां विद्यावतामिति विशेषणोपेते कुले लोके जन्म वक्ष्यमाणमित्यर्थः ॥४२॥ श्रीरामायनमः॥

शिव
१८९

यदुक्तमं जन्मोक्तं तस्योत्तमत्वे हेतुं तं तरमाह यस्मादिति बुद्ध्येस्यात्मविषययेति शेषः पूर्वस्मिन् देहे भवं तत्रानुष्ठितसाधनविशे

यस्मात् तत्र योगिनां कुले तं बुद्धिसंयोगं बुद्ध्यासंयोगं बुद्धिसंयोगं लभते पौर्वदैहिकं पूर्वस्मिन् देहे भवं पौर्वदैहिकं यतते

तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकं । यतते च ततो भूयः संसिद्धौ कुरुनंदन ४३ श्रीरामचंद्राय नमः ॥

च प्रयत्नं करोतीति ततस्तस्मात्पूर्वकृतात्संस्कारात् भूयो बहुतरं संसिद्धौ संसिद्धिनिमित्तं हे कुरुनंदन ॥ ४३ ॥ ४३ ॥

षयुक्तमित्यर्थः नहीयथोक्तजन्मनि साधनानुष्ठानमंतरेणैव बुद्धिसंबंधः स्यादित्याशंक्याह यततेचेति प्रयत्नः श्रवणाद्यनुष्ठानवि

क्षयः ॥ ४३ ॥

यदि पूर्वसंस्कारोस्येच्छामुपनयति प्रवर्त्तयति तथा चाप्रवृत्तिरनिच्छया स्यादित्याशंक्याह पूर्वेति सहि योगभ्रष्टः समनंतरजन्मकृत
संस्कारवशादुत्तरस्मिंज्जन्मन्यनिच्छन्नपि योगं प्रत्येवाकृष्टो भवतीत्यर्थः तत्र कैमुतिकन्यायं सूचयति जिज्ञासुरिति पू
र्वार्द्धं विभजते यः पूर्वेति तस्मान्नेच्छया तस्य प्रवृत्तिरिति शेषः योगभ्रष्टस्याधर्मादिप्रतिबंधेपि तर्हि पूर्वाभ्यासवशाद्बुद्धिसंबंधः
स्यादित्याशंक्याह नेत्यादिना यदि योगभ्रष्टेन योगाभ्यासजनितसंस्कारप्राबल्यात्प्रबलमधर्मप्रभेदरूपं कर्म न कृतं स्यात्त

कथंभूतं पूर्वदेहबुद्धिसंयोगं इत्युच्यते यः पूर्वजन्मनि कृतोभ्यासः स पूर्वाभ्यासस्तेनैव बलवता ह्रियते ह्रिय
स्मादवशोपि स योगभ्रष्टो न कृतं चेद्योगाभ्याससंस्काराद्बलवत्तरमधर्मादिलक्षणं कर्म तदा योगाभ्यास

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः॥ ॥

जनितेन संस्कारेण ह्रियते अधर्मश्चेद्बलवत्तरः कृतस्तेन योगजोपि संस्कारोभिभूयत एव तत्क्षये तु योग
जः संस्कारः स्वयमेव कार्यमारभते न दीर्घकालस्थस्यापि विनाशस्तस्यास्तीत्यतो॥ श्रीकृष्णायनमः॥

दातेन संस्कारेण वशीकृतः सन्निच्छारहितोपि बुद्धिसंबंधभाग्भवतीत्यर्थः विपक्षे योगसंस्कारस्याभिभूतत्वान्न कार्या
रंभकत्वमित्याह अधर्मश्चेदिति योगजसंस्कारस्याधर्माभिभूतस्य कार्यमकृत्वैवाभिभावकप्राबल्ये प्रणाशः स्यादित्याशं
क्याह न तत्क्षय इति कालव्यवधानान्निवृत्तिं शंकित्वोक्तं नेति तृणजलौकादृष्टांतः तस्य तस्य संस्कारस्य दीर्घतायाः समधिगत

वासुदेवशिवाय

केमुतिकन्यायोक्तिपरमुत्तरार्द्धं विभजते ॥ जिज्ञासुरपीत्यादिना ॥ अत्रापि संन्यासीति विशेषणं पूर्ववत् विधेयमित्याह ॥ साम
र्थ्यादिति ॥ नहि कर्मी कर्ममार्गे प्रवृत्तस्ततो भ्रष्टः शंकितुं शक्यते ॥ अतः संन्यासी पूर्वोक्तैर्विशेषणैर्विशिष्टो योगभ्रष्टोऽभीष्टः

जिज्ञासुरपि योगस्य स्वरूपं ज्ञातुमिछन् योगमार्गे प्रवृत्तः संन्यासी योगभ्रष्टः ॥ सामर्थ्यात्सोपि शब्दब्रह्म वेदोक्तक

जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते ॥ ४४ ॥ श्रीः ॥

र्मानुष्ठानफलमतिवर्त्तते कर्मानुष्ठानलक्षणमतिक्रामतीति किमुत बुध्वा योगं तन्निष्ठोऽभ्यासं कुर्यात् ॥ ४४ ॥

सोपि वैदिकं कर्म तत्फलं चातिवर्त्तते किमुत योगं बुध्वा तन्निष्ठः सदाभ्यासं कुर्वन् कर्म तत्फलं चातिवर्त्तेतेति किं वक्तव्य
मिति योजना ॥ योगनिष्ठस्य कर्म तत्फलातिवर्त्तनं ततोधिकफलावाप्तिं विवक्ष्यते ॥ ४४ ॥ श्रीकृष्णायनमोनमः ॥

योगनिष्ठस्यश्रेष्ठत्वेहेत्वंतरंवक्तुमुत्तरश्लोकमवतारयति कुतश्चेति मंदप्रयत्नेपिक्रमेणमोक्ष्यतेचेदधिकप्रयत्नस्यत्क्के
शहेतोरकिंचित्करत्वमित्याशंक्याहेत्वंतरंप्रकटयति प्रयत्नादिति तत्रयोगविषयेप्रयत्नातिरेकेसतीत्यर्थः ततःसंचि

कुतश्चयोगित्वंश्रेयइति॥प्रयत्नाद्यतमानस्तुयतमानादधिकतरंप्रयतमानइत्यर्थः॥ तत्रयोगीविद्वान् सं
शुद्धकिल्बिषोविशुद्धपापोऽनेकेषुजन्मसुकिंचित्किंचित्संस्कारजातमुपचित्यतेनोपचितेनानेकजन्मकृ

प्रयत्नाद्यतमानस्तुयोगीसंशुद्धकिल्बिषः॥अनेकजन्मसंसिद्धस्ततोयातिपरांगतिं॥४५॥

तेनसंसिद्धोनेकजन्मसंसिद्धस्ततोलब्धसम्यग्दर्शनःसन्संन्यासीतियातिपरांप्रकृष्टांगतिं॥४५॥श्री॥

तसंस्कारसमुदायादितियावत्॥समुत्पन्नसम्यग्दर्शनवशात्प्रकृष्टागतिःसंन्यासिनालभ्यतेतेनशीघ्रंमुक्ति
मिच्छन्नधिकप्रयत्नोभवेदल्पप्रयत्नस्तुचिरेणैवमुक्तिभागीत्यर्थः॥४५॥श्रीसीतारामचंद्रायनमः॥ ॥

सम्यग्ज्ञानद्वारामोक्षहेतुत्वं योगस्योक्तमर्नुद्य योगिनः सर्वाधिकत्वमाह । यस्मादिति । योगस्य सर्वस्मादुत्कृष्टत्वश्चयंकर्त्त
व्यत्वाय योगिनः सर्वाधिक्यं साधयति । तपस्विभ्यो इति । योगिनो ज्ञानिनश्च पर्यायत्वात्कथं तस्य ज्ञानिभ्योऽधिकत्वमि

यस्मादेवं तस्मात् । तपस्विभ्योधिको योगी ज्ञानिभ्योपि ज्ञानमत्र शास्त्रपांडित्यं तद्वद्भ्योपि मतो ज्ञातोधिकः श्रे

तपस्विभ्योधिको योगी ज्ञानिभ्योपि मतोधिकः । कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ४६

ष्ठः इति कर्मिभ्योऽग्निहोत्रादिकर्म तद्वद्भ्योधिको योगी विशिष्टो तस्माद्योगी भवार्जुन ॥ ४६ ॥ श्रीरामचं०

त्याशंक्याह । ज्ञानमिति । योगिनः सर्वाधिकत्वे फलितमाह ॥ तस्मादिति ॥ ४६ ॥ श्रीसीतारामचंद्रायनमोनमः

नन्वादित्योविराडात्मासूत्रंकारणमक्षरमित्येतेषामुपासकानांभूयांसोयोगिनोगम्यंतेतेषांकतमःश्रेयानिष्यतेतत्राह
योगिनामिति॥योभगवंतंसगुणंनिर्गुणंवायथोक्तेनचेतसाश्रद्दधानःसन्ननवरतमनुसंधत्ते॥सयुक्तानांमध्येऽतिशये
नयुक्तःश्रेयानीश्वरस्याभिप्रेतःनहितदीयोभिप्रायोऽन्यथाभवितुमर्हतीत्यर्थः॥तदनेनाध्यायेनकर्मयोगस्यसंन्या

योगिनामपिसर्वेषांरुद्रादित्यादिध्यानपराणांमध्येमद्गतेनमयिवासुदेवेसमाहितेनांतरात्म
नांतःकरणेनश्रद्धावान्श्रद्दधानःसन्भजतेसेवतेयोमांसमेममयुक्ततमोअतिशयेनयु

योगिनामपिसर्वेषांमद्गतेनांतरात्मना॥श्रद्धावान्भजतेयोमांसमेयुक्ततमोमतः॥४७॥

क्तोमतोभिप्रेतइति॥ ॥इतिश्रीमद्भगवद्गीताभाष्यटीकायांषष्ठोध्यायः॥६॥ ॥ गव

सहेतोर्मर्यादांदर्शयितासांगंचयोगंविशृण्वतामनोनिग्रहोपायोपदेशेनयोगभ्रष्टस्यात्यंतिकनाशशंकां
चशिथिलयतापदार्थाभिज्ञस्यज्ञाननिष्ठालोक्त्यावाक्यार्थज्ञानान्मुक्तिरितिसाधितं॥४७॥ ॥इतिश्री
आनंदगीरीटीकाषष्ठोऽध्यायः॥६॥ ॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥श्रीरामचंद्रायनमः॥

कर्मसंन्यासात्मकसाधनप्रधानं त्वंपदार्थप्रधानं वा प्रथमं षट्कं व्याख्याय मध्यमषट्कमुपास्यनिष्ठं तत्पदार्थनिष्ठं वा व्याख्यातु
मारभमाणः समनंतराध्यायमवतारयति ॥ योगिनामिति ॥ अतीताध्यायांते मद्गतेनांतरात्मना यो भजते ॥ मामिति ॥ प्रश्न
बीजं प्रदर्श्य कीदृशं भगवतस्तत्त्वं कथं वा तद्गतांतरात्मा स्यादित्यर्जुनस्य प्रश्नद्वये जाते स्वयमेव भगवानपृष्टमेतद्वक्तुमि

योगिनामपि सर्वेषां मद्गतेनांतरात्मना श्रद्धावान् भजते यो मां स मे युक्ततमो मत इति प्रश्नबीजमुपन्यस्य स्वयमे
वेदृशं मदीयं तत्त्वमेवं मद्गतेनांतरात्मना स्यादित्येतद्विवक्षुः मयि वक्ष्यमाणविशेषणे परमेश्वरे आसक्तं मनो य

॥ ॥श्रीभगवानुवाच॥ मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः॥ ॥ ॥

श्रीभगवानुवाच

स्य स मय्यासक्तमनाः पार्थ योगं युंजन्मनःसमाधानं कुर्वन्मदाश्रयः ॥ अहमेव परमेश्वर आश्रयो यस्य स मदाश्रयः ॥

छन्नुक्तवानित्यर्थः ॥ परमेश्वरस्य वक्ष्यमाणविशेषणत्वं सकलजगदायतनत्वादिनानाविधविभूतिभागित्वं तत्रासक्तिः
मनसो विषयांतरपरिहारेण तन्निष्ठत्वं मनसो भगवत्येवासक्तौ हेतुमाह ॥ योगमिति ॥ विषयांतरपरिहारे हि गोचरमालो
च्य मनो भगवत्येव प्रतिष्ठितं भवतीत्यर्थः ॥ तथापि स्वाश्रये पुरुषो मनः स्थापयति नान्यत्रेत्याशंक्याह ॥ मदाश्रय इति ॥ ॥

योगिनो यदीश्वराश्रयत्वेन तस्मिन्नेवासक्तमनस्त्वमुपन्यस्तं तदुपपादयति योहीति ॥ ईश्वराख्याश्रयस्य प्रतिपत्तिमेव प्रकटयति हित्वेति ॥ अस्तु योगिनस्त्वदाश्रयप्रतिपत्त्या मनसस्त्वय्येवासक्तिस्तथा मम किमायातमित्याशंक्य द्वितीयार्द्धं व्याचष्टे यस्त्वमेवमिति ॥ एवंभूतो यथोक्तध्याननिष्ठपुरुषवदेव मय्यासक्तमना यस्त्वं स त्वं तथाविधः सन्न संशयमविद्यमानः संशयो यत्र ज्ञाने तद्यथा स्यात्तथा मां समग्रं ज्ञास्यसीति संबंधः समग्रमित्यस्यार्थमाह ॥ समस्तेति ॥ विभूतिर्नानाविधैश्व

योहि पुरुषार्थेन केनचिदर्थी स तत्साधनं कर्माग्निहोत्रादि तपो दानं वा किंचिदाश्रयं प्रतिपद्यते अयं तु योगी मामेवाश्रयं प्रतिपद्यते ॥ हित्वान्यत्साधनांतरं मय्येवासक्तमना भवति ॥ यस्त्वमेवंभूतः संशयं समग्रं समस्तविभूति

असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥ श्रीः ॥

बलशक्त्यैश्वर्यादिगुणसंपन्नं मां यथा येन प्रकारेण ज्ञास्यसि संशयमंतरेणैवमेव भगवानिति तत् शृणूच्यमानं

सन्न

मया ॥ १ ॥

र्योपायसंपत्तिः ॥ बलं शरीरगतं सामर्थ्यं शक्तिर्मनोगतं प्रागल्भ्यं ऐश्वर्यमीशितव्यविषयमीशनसामर्थ्यं ॥ आदिशब्देन ज्ञानेच्छादयो गृह्यंते ॥ असंशयमिति ॥ पदस्य क्रियाविशेषणत्वं विशदयन् क्रियापदेन संबंधं कथयति ॥ संशयमिति ॥ विना संशयं भगवत्तत्त्वपरिज्ञानमेव स्फोरयति ॥ एवमेवेति ॥ भगवत्तत्त्वे ज्ञातव्ये कथं मम ज्ञानमुपदेक्ष्यते न हि ताम्रते तदुपदेष्टा कश्चिदस्तीत्याशंक्याह ॥ तच्छृण्विति ॥ १ ॥ श्रीकृष्णायनमः ॥ श्रीरामचंद्रायनमः ॥ श्रीसीतारामचंद्रायनमः ॥

ज्ञास्यसीत्युक्त्वा परोक्षज्ञानशंकायां तन्निवृत्त्यर्थं तदुक्तिप्रकारमेव विवृणोति। तत्रेति। इदमपरोक्षं ज्ञानं चैतन्यं तस्य सविज्ञानस्य प्रतिलंभे किं स्यादित्याशंक्याह। यत्ज्ञात्वेति। इदमा चैतन्यस्यापरोक्षत्वं व्यावर्त्यते तदेव सविज्ञानमितीति विशेषणेन स्फुद्यते अवशेषेणत इदं न फलोपन्यासेन श्रोतारं तत्स्रवणं करोति। तत्ज्ञानमिति॥ एकविज्ञाने सर्वविज्ञानश्रुतिमाश्रित्योत्तर

तत्रमद्विषयं ज्ञानं ते तुभ्यमहं सविज्ञानं विज्ञानसहितं स्वानुभवसंयुक्तमिदं वक्ष्यामि कथयिष्याम्यशेषतः कात्स्न्येन तत्ज्ञानं विवक्षितं स्तौति श्रोतुरभिमुखीकरणाय यत् ज्ञानं ज्ञात्वा न इह भूयः पुनः ज्ञातव्यं पुरुषार्थसाधनमवशिष्यते नावशेषो भवतीति मत्तत्वज्ञो यः स सर्वज्ञो भवतीत्यर्थः। अतो विशिष्टफलत्वात् दुर्लभतरं ज्ञानं २

ज्ञानं तेहं सविज्ञानमिदं वक्ष्याम्यशेषतः। यत्ज्ञात्वा नेह भूयोन्यत्ज्ञातव्यमवशिष्यते॥ २॥

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥ ३॥

कथमित्युच्यते। मनुष्याणां मध्ये सहस्रेष्वनेकेषु कश्चित् यतति प्रयत्नं करोति सिद्धये सिद्ध्यर्थं तेषां यततामपि सिद्धानां सिद्धा एव हि ते ये मोक्षाय यतंते तेषां कश्चिदेव मां वेत्ति तत्त्वतो यथावत्॥ ३॥ श्रीकृष्णायनमः॥ ॥

ईतास्यर्यमाह मत्तत्वेति। भगवत्तत्वज्ञानस्य विशिष्टफलत्वमुक्त्वा फलितमाह। अतइति। २ ज्ञानस्य दुर्लभत्वं प्रश्नपूर्वकं प्रकटयति। कथमित्यादिना। सहस्रशब्दस्य बहुवाचकत्वमुपेत्य व्याकरोति। अनेकेष्विति। सिद्धये सत्वशुद्धिद्वारा ज्ञानोत्पत्त्यर्थमित्यर्थः। सिद्ध्यर्थं यतमानानां कथं सिद्धत्वमित्याशंक्याह। सिद्धा एवेति। सर्वेषामेव तेषां ज्ञानोदयात्तस्य सुलभत्वमित्याशंक्या

ज्ञानार्थप्रयत्नस्य तद्द्वारा ज्ञानलाभस्य तदुदयद्वारेण मुक्तेश्च दुर्लभत्वाभिधानस्य श्रोतृप्ररोचनं फलमितिमत्वाह॥ श्रोतारमिति॥ आत्मनः सर्वात्मकत्वेन परिपूर्णत्वमवतारयन्नादावपरां प्रकृतिमुपन्यस्यति॥ आहेति॥ भूमिशब्दस्य व्यवहारयोग्यस्थूलपृथिवीविषयत्वं व्यावर्त्तयति॥ भूमिरितीति॥ तत्र हेतुमाह॥ भिन्नेति॥ प्रकृतिसमभिव्याहारादृंधतन्मात्रमस्थूलपृथिवीप्रकृतिरुत्तरविकारो भूमिरित्युच्यते न विशेष इत्यर्थः॥ भूमिशब्दवदबादिशब्दानां अपि सूक्ष्मभूतविषयत्वमाह॥

श्रोतारं प्ररोचनेनाभिमुखीकृत्याह॥ भूमिरिति॥ पृथ्वीतन्मात्रमुच्यते न स्थूला भिन्ना प्रकृतिरष्टधा इति वचनात्तथा॥

भूमिरापोनलो वायुः खं मनो बुद्धिरेव च॥ श्री॥

अबादयोपि तन्मात्राण्येवाऽपोऽनलो वायुः खं मनो मन इति मनसः कारणमहंकारो गृह्यते बुद्धिरित्यहंकारकारणंम

इत्यर्थः॥

तथेति॥ तेषामपि प्रकृतिसमानाधिकृतत्वाद्विशेषात्तन्मात्राणां पूर्वपूर्वप्रकृतीनामुत्तरोत्तरविकाराणां न विशेषत्वसिद्धिरित्यर्थः॥ मनः शब्दस्य संकल्पविकल्पात्मककरणविषयत्वमाशंक्याह॥ मन इतीति॥ न खल्वहंकाराभावे संकल्पविकल्पयोरसंभवात्तदात्मकं मनः संभवतीत्यर्थः॥ निश्चयलक्षणा बुद्धिरित्यभ्युपगमाद्बुद्धिशब्दस्य निश्चयात्मककरणविषयत्वमाशंक्याह॥ बुद्धिरितीति॥ न हि हिरण्यगर्भसमष्टिबुद्धिरूपमंतरेण व्यष्टिबुद्धिः सिद्ध्यतीत्यर्थः॥ श्रीकृष्णायनमो नमः॥

अहंकारस्याभिमानविशेषात्मकत्वेनांतःकरणप्रभेदत्वं व्यावर्त्तयति॥ अहंकार इतीति॥ अविद्यासंयुक्तमित्यविद्यात्मकमि
त्यर्थः॥ कथं मूलकारणस्याहंकारशब्दत्वमित्याशंक्योक्तमर्थं दृष्टांतेन स्पष्टयति॥ यथेत्यादिना॥ मूलकारणस्याहंकारशब्द
त्वे हेतुमाह॥ प्रवर्त्तकत्वादिति॥ तस्य प्रवर्त्तकत्वं सूचयति॥ अहंकार एवेति॥ सत्येवाहंकारे ममकारो भवति॥ तयोश्चाभावे

अहंकार इत्यविद्यासंयुक्तमव्यक्तं यथा विषसंयुक्तमन्नं विषमित्युच्यते एवमहंकारवासनावदव्य
क्तं मूलकारणमहंकार इत्युच्यते प्रवर्त्तकत्वादहंकारस्याहंकार एव हि सर्वस्य प्रवृत्तिबीजं दृष्टं लोके

अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा॥ ४॥

इतीयं यथोक्ता प्रकृतिर्मम मैश्वरी माया शक्तिरष्टधा भेदमागता॥ ४॥ श्रीरामचंद्राय नमो नमः

सर्वा प्रवृत्तिरिति प्रसिद्धमित्यर्थः॥ उक्तां प्रकृतिमुपसंहरति॥ इयमिति॥ इयमित्यपरोक्षा साक्षिदृश्येति यावत्॥ ऐश्वरी तदा
श्रयात्तदैश्वर्योपाधिभूता प्रक्रियते महदाद्याकारेणेति प्रकृतिस्त्रिगुणं जगदुपादानं प्रधानमिति मतं व्युदस्यति॥ मामे
ति॥ तस्यास्तत्कार्याकारेण परिणामयोग्यत्वं द्योतयति॥ शक्तिरिति॥ अष्टधेति अष्टभिः प्रकारैरिति यावत्॥ ४॥ श्रीः॥

अचेतनवर्गमेकीकर्त्तुंप्रकृतेरष्टधापरिणाममभिधायविकारावच्छिन्नं कार्यकल्पं चेतनवर्गमेकीकर्त्तुंपुरुषस्य चैतन्य
स्याविद्याशक्त्यवच्छिन्नस्यापि प्रकृतित्वं उक्तां प्रकृतिमनूद्य दर्शयति अपरेति निकृष्टत्वं स्पष्टयति अनर्थकरीति अन
र्थकरणत्वमेव स्फोरयति संसारेति कथंचिदप्यनन्यत्वव्यावृत्त्यर्थस्तु शब्दः अन्यामत्यंतविलक्षणामितियावदन्यत्व

अपरा निकृष्टा अशुद्धाऽनर्थकरी संसारकरी बंधात्मिकेयमितोऽस्याः यथोक्तायाः त्वन्यां
विशुद्धां प्रकृतिं ममात्मभूतां विद्धि मे परां प्रकृष्टां जीवभूतां क्षेत्रज्ञलक्षणां प्राणधारणनिमित्तभूतां

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूतां महाबाहो ययेदं धार्यते जगत् ५

तां महाबाहो यया प्रकृत्या इदं धार्यते जगदंतः प्रविष्टया ॥५॥ श्रीकृष्णायनमोनमः॥ श्रीकृष्णाय॰॥

मेवस्पष्टयति॥ विशुद्धामिति॥ प्रकृतिशब्दस्यात्र प्रयुक्तस्यार्थांतरमाह ममेति॥ प्रकृष्टत्वमेव भोक्तृत्वेन स्पष्टयति॥ जी
वभूतामिति॥ प्रकृत्यंतरादस्याः प्रकृतेरवांतरविशेषमाह॥ ययेति॥ नहि जीवरहितं जगद्धारयितुं शक्यमित्याशयेनाह
अंतरिति॥५॥ श्रीकृष्णायनमः॥ श्रीसीतारामचंद्रायनमः॥ श्रीरामकृष्णायनमः॥ श्रीरामचंद्रायनमोनमः॥ ॥

उक्तप्रकृतिद्वये कार्यलिंगकमनुमानं प्रमाणयति ॥ एतद्योनीनीति ॥ प्रकृतिद्वयस्य जगत्कारणत्वे कथमीश्वरस्य जगत्कार
णत्वं तदुपगतमित्याशंक्याह ॥ अहमिति ॥ एतद्योनीनीत्युक्ते समनंतरप्रकृतजीवभूतप्रकृतावेतच्छब्दस्याव्यवधानात्प्रवृ
त्तिमाशंक्य व्याकरोति ॥ एते इति ॥ सर्वाणि चेतनाचेतनानि जनिमंतीत्यर्थः ॥ सर्वभूतकारणत्वेन प्रकृतिद्वयमंगीकृतं

एतद्योनीनि एते परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनी येषां भूतानां तान्येतद्योनीनि भूतानि सर्वाणीत्येवमुप
धारय जानीहि यस्मान्मम प्रकृती योनिः कारणं सर्वभूतानामतोऽहं कृत्स्नस्य समस्तस्य जगतः प्रभवउत्प

एतद्योनीनि भूतानि सर्वाणीत्युपधारय ॥ अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६

त्तिः प्रलयो विनाशस्तथा प्रकृतिद्वयद्वारेणाहं सर्वज्ञ ईश्वरो जगतः कारणमित्यर्थः ॥ ६ ॥ श्रीकृष्णायनमोनमः ॥

चेत्कथमहमित्याद्युक्तमित्याशंक्याह ॥ यस्मादिति ॥ मम प्रकृती परमेश्वरस्योपाधितया स्थिते इत्यर्थः ॥ तर्हि प्रकृतिद्वयं
कारणमीश्वरश्चेति जगतोनेकविधकारणांगीकरणं स्यादित्याशंक्याह ॥ प्रकृतीति ॥ अपरप्रकृतेरचेतनत्वात्परप्रकृ
तेश्चेतनत्वेपि किंचिज्ज्ञत्वादीश्वरस्यैव सर्वज्ञस्य सर्वकारणत्वं युक्तमित्याह ॥ सर्वज्ञ इति ॥ ६ ॥ श्रीरामायनमोनमः ॥

प्रधानात्परतोऽक्षरात्पुरुषवत्परमात्मनोपिपरदन्यत्परंस्यादित्याशंक्य प्रकृतिद्वयद्वारा सर्वकारणत्वमीश्वरस्योक्तमु
पजीव्यपरिहरति यस्मादिति नान्यदस्ति परमित्यत्र हेतुमाह मयीति परतरशब्दार्थमाह अन्यदिति स्वातंत्र्यमात्रस्य
र्थमेंनरशब्दः निषेधफलंकथयति अहमेवेति सर्वजगत्कारणत्वेन सिद्धमर्थं द्वितीयार्द्धव्याख्यानेन विशदयति य

यस्मात्तस्मात् मत्तः परमेश्वरात्परतरमन्यत्कारणांतरं किंचिन्नास्ति न विद्यते अतः अहमेव जगतः कार
णमित्यर्थः हे धनंजय यस्मादेवं तस्मान्मयि परमेश्वरे सर्वाणि भूतानि सर्वमिदं जगत्प्रोतमनुस्यूतमनु

मत्तः परतरं नान्यत्किंचिदस्ति धनंजय। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥७॥ श्रीः॥

गतं ग्रथितमित्यर्थः दीर्घतंतुषु पटवत् सूत्रे च मणिगणा इव ॥७॥ श्रीसीतारामचंद्राय नमो नमः॥

स्मादित्यादिना दीर्घेषु तिर्यक्षु च पटघटिते षु तंतुषु पटस्यानुगतिरवगम्यते तद्वन्मय्येवानुगतं जगदित्याह दीर्घेति यथा
च मणयः सूत्रेऽनुस्यूतास्तेनैव ध्रियंते तदभावे विकीर्यंते तथा मय्येवात्मभूतेन सर्वं व्याप्तं ततो निःकृष्टं विनष्टमेव स्यादिति
श्लोकोक्तं दृष्टांतमाह सूत्रे चेति ॥७॥ श्रीसीतारामचंद्राय नमो नमः॥ श्रीकृष्णाय नमः॥ श्रीरामचंद्राय नमो नमः॥

अवादीनांरसादिषुप्रोतत्वप्रतीतेस्त्वय्येवसर्वंप्रोतमित्ययुक्तमितिमत्वापृच्छति॥ केनेति॥ तत्रोत्तरमुत्तरग्रंथेनदर्शयति॥
उच्यतइति॥ सारोमधुरोहेतुरितियावत्‌रसोहमितिकथंतत्राह॥ तस्मिन्निति॥ अप्सुयोरसःसारस्तस्मिन्मयिमधुररसेकार
णभूतेप्रोताआपइतिवदुत्तरत्रसर्वत्रव्याख्यानंकर्त्तव्यमित्याह॥ एवमिति॥ उक्तमर्थंदृष्टांतंकृत्वाप्रभास्मीतिव्याचष्टे॥ यथेति
चंद्रादित्ययोर्याप्रभातद्भूतेमयितौप्रोतावित्यर्थः॥ तत्रवाक्यार्थंकथयति॥ तस्मिन्निति॥ प्रणवभूतेपरस्मिन्वेदानांप्रोतत्व

केनकेनधर्मेणविशिष्टेत्वयिसर्वंप्रोतमित्युच्यते॥ रसोहमप्सुकौंतेयरसोऽपांयःसारःसरसस्तस्मिन्रसभूतेमयि
आपःप्रोताइत्यर्थः॥ एवंसर्वत्रयथाहमप्सुरसएवंप्रभास्मिशशिसूर्ययोःप्रणवः॥ ॐकारःसर्ववेदेषुतस्मि

रसोऽहमप्सुकौंतेयप्रभास्मिशशिसूर्ययोः॥ प्रणवःसर्ववेदेषुशब्दःखेपौरुषंनृषु॥ ८॥ श्रीः॥

न्प्रणवभूतेमयिसर्वेवेदाःप्रोताः॥ तथाखेआकाशेशब्दःसारभूतस्तस्मिन्मयिखंप्रोतंतथापौरुषंपुरुषस्य
भावःपौरुषंयतःपुंबुद्धिर्नृषुतस्मिन्मयिपुरुषाःप्रोताः॥ ८॥ श्रीसीतारामचंद्रायनमः॥ श्रीकृष्णायनमः॥

वदाकाशेयःसारभूतःशब्दस्तद्रूपेपरमेश्वरेप्रोतमाकाशमित्याह॥ तथेति॥ पौरुषंनृष्वितिभागंपूर्ववद्विभजते॥ तथे
त्यादिना॥ पुरुषत्वमेवविशदयति॥ यतइति॥ पुंस्त्वसामान्यात्मकेपरस्मिन्नीश्वरेप्रोतास्तद्विशेषास्तदुपादानत्वेनतत्त्व
भावत्वादित्यर्थः॥ ८॥ श्रीरामजयरामसीतावल्लभप्रसन्नोस्तु॥ श्रीकृष्णायनमः॥ श्रीसीतारामचंद्रायनमोनमः॥

मयिसर्वमिदंप्रोतमित्यस्यैवपरिपूरणार्थंप्रकारांतरमाह॥ पुण्यइति॥ पृथिव्यांपुण्यशब्दितोयःसुरभिःगंधःसोहमस्मी
त्यत्रवाक्यार्थंकथयति॥ तस्मिन्निति॥ कथंपृथिव्यांगंधस्यपुण्यत्वंतत्राह॥ पुण्यत्वमिति॥ यत्तुपृथिव्यांगंधस्यस्वाभाविकं
पुण्यत्वंदर्शितंतदब्वादिषुरसादेरपिस्वाभाविकपुण्यत्वस्योपलक्षणार्थमित्याह॥ पृथिव्यामिति॥ प्रथमोत्पन्नाःपंचापि
गुणाःपुण्याएवसिद्धादिभिरेवभोग्यत्वादितिभावः॥ कथंतर्हिगंधादीनामपुण्यत्वप्रतिभानंतत्राह॥ अपुण्यत्वमिति॥

पुण्यःसुरभिःगंधःपृथिव्यांचाहंतस्मिन्मयिगंधभूतेपृथिवीप्रोतापुण्यत्वंगंधस्यस्वभावतएवपृथिव्यांदर्शितं
अबादिषुरसादेःपुण्यत्वोपलक्षणार्थंअपुण्यत्वंतुगंधादीनामविद्याधर्माद्यपेक्षंसंसारिणांभूतविशेष

पुण्योगंधःपृथिव्यांचतेजश्चास्मिविभावसौ॥ जीवनंसर्वभूतेषुतपश्चास्मितपस्विषु॥ ९॥

संसर्गनिमित्तंभवतीतितेजोदीप्तिश्चास्मिविभावसावग्नौतथाजीवनंसर्वभूतेषुयेनजीवंतिसर्वाणिभूतानित
ज्जीवनंतपश्चास्मितपस्विषुतस्मिन्तपसिमयितपस्विनःप्रोताः॥ ९॥ श्रीसीतारामचंद्रायनमोनमः॥ श्रीः॥

तदेवस्फुटयति॥ संसारिणांइति॥ गंधादयःस्वकार्यैर्भूतैःपरिणममाणाःप्राणिनांपापादिवशादपुण्याःसंपद्यंतइत्य
र्थः॥ यच्चाग्नौतेजस्तद्भूतेमयिप्रोतोग्निरित्याह॥ तेजइति॥ जीवनभूतेचमयिसर्वाणिभूतानिप्रोतानीत्याह॥ तथेति॥
जीवनशब्दार्थमाह॥ येनेति॥ अन्नरसेनामृताख्येनेत्यर्थः॥ तपश्चास्मीत्यादेस्तात्पर्यार्थमाह॥ तस्मिन्निति॥ चित्तैका
ग्र्यमनाशकादिस्तपस्तदात्मनीश्वरेप्रोतास्तपस्विनोविशेषणाभावेविशिष्टस्यवस्तुनोभावादित्यर्थः॥ ९॥ श्रीः॥

ननु सर्वाणि भूतानि स्वकारणे प्रोतानि कथं तेषां त्वयि प्रोतत्वं तत्राह। बीजमिति। बीजांतराद्यपेक्षयानवस्थां निवारयति। स
नातनमिति। चैतन्यस्याभिव्यंजकं तत्त्वनिश्चयसामर्थ्यं बुद्धिस्तद्वतां या बुद्धिस्तद्भूते मयि बुद्धिमंतः प्रोता भवंतीत्या
ह। किंचेति। प्रागल्भ्यवतां यत्प्रागल्भ्यं तद्भूते मयि तद्वंतः प्रोता इत्याह। तेजइति। तद्धि प्रागल्भ्यं यत्परा भिभवसामर्थ्यं

बीजं प्ररोहकारणं मां विद्धि सर्वभूतानां हे पार्थ सनातनं चिरंतनं किंच बुद्धिर्विवेकशक्तिरंतःकरणस्य बुद्धिमतां
विवेकशक्तिमतां अस्मि तेजः प्रागल्भ्यं तद्वतां तेजस्विनामहं॥१०॥ बलं सामर्थ्यमोजो बलवतामहं तच्च बलं कामरा
गविवर्जितं कामश्च रागश्च कामरागौ कामस्तृष्णा असन्निकृष्टेषु विषयेषु रागो रंजना प्राप्तेषु विषयेषु ताभ्यां का

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनं। बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहं॥१०॥ बलं
बलवतां चाहं कामरागविवर्जितं॥ धर्माविरुद्धो भूतेषु कामोस्मि भरतर्षभ॥११॥ श्रीः॥

मरागाभ्यां विवर्जितं देहादिधारणमात्रार्थं बलमहमस्मि न तु यत्संसारिणां तृष्णारागकारणं। किंच धर्माविरुद्धो ध
र्मेण शास्त्रार्थेनाविरुद्धो यः प्राणिषु भूतेषु यथा कामो देहधारणमात्राद्यर्थेऽशनपानादिविषयः कामोस्मि भरतर्ष

परैश्चाप्रधृष्यत्वं॥१०॥ यच्च बलवतां बलं तद्भूते मयि तेषां प्रोतत्वमित्याह। बलमिति। कामक्रोधादिपूर्वस्यापि बलस्या
नुमतिं वारयति। तच्चेति। कामरागयोरेकार्थत्वमाशंक्यार्थभेदमावेदयति। कामस्तृष्णेत्यादिना। विशेषणसामर्थ्य
सिद्धं व्यावर्त्यं दर्शयति। नत्विति। शास्त्रार्थाविरुद्धकामभूते मयि तथाविधकामवतां भूतानां प्रोतत्वं विवक्षित्वाह। किंचे
ति। धर्माविरुद्धं काममुदाहरति। यथेति॥११॥ श्रीः॥

विदानंदयोरभिव्यंजकानां भावानामीश्वरात्मत्वाभिधानादन्येषामतदात्मत्वप्राप्तावुक्तं ॥ किंचेति ॥ प्राणिनां त्रैविध्ये हे
तुं दर्शयन्वाक्यार्थमाह ॥ येकेचिदिति ॥ तर्हि पितुरिव पुत्राधीनत्वं त्वत्तो जायमानभावाधीनत्वं तवापि स्यादिति विक्रि
यावत्त्वदूष्यत्वप्रसक्तिरित्याशंक्याह ॥ यद्यपीति ॥ मम परमार्थत्वात्तेषां च कल्पितत्वान्न तद्गुणदोषो मयि स्यातामि

किंच ॥ ये चैव सात्विकाः सत्वेन निर्वृत्ता भावाः पदार्था राजसा रजो निर्वृत्ताः तामसास्तमो निर्वृत्ताश्च ये केचित्प्राणि
नां स्वकर्मवशाज्जायंते भावास्तान्मत्त एव जायमानानित्येवं विद्धि सर्वान्समस्तानेव यद्यपि ते मत्तो जायंते तथा

ये चैव सात्विका भावा राजसास्तामसाश्च ये ॥ मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२ ॥ श्रीः ॥

पि न त्वहं तेषु तदधीनस्तद्वशो यथा संसारिणस्ते पुनर्मयि मद्वशा मदधीनाः ॥ एवंभूतमपि परमेश्वरं नित्यशुद्धं
मुक्तस्वभावं सर्वभूतात्मानं निर्गुणं संसारदोषबीजप्रदाहाय मां नाभिजानाति जगदित्यनुक्रोशं दर्शयति भागवा

सर्थः ॥ तेषामपि तवैव स्वतंत्रतासंभवात्किमिति कल्पितत्वमित्याशंक्याह ॥ ते पुनरिति ॥ त्रिविधानां भावानां न स्वातं
त्र्यमीश्वरकार्यत्वेन तदधीनत्वात्तथा च कल्पितस्याधिष्ठानसत्ताप्रतीतिभ्यामेव तद्वत्त्वात्तन्मात्रत्वसिद्धिरित्यर्थः ॥ स
तीश्वरस्य स्वातंत्र्ये नित्यशुद्धत्वादौ च कुतो जगतस्तदात्मकस्य संसारित्वं दृश्यत इत्याशंक्य तदज्ञानादित्याह ॥ एवंभूतमपीति ॥ १२

यद्यप्रपंचोऽविक्रियश्चलंकस्मात्वामात्मभूतंस्वयंप्रकाशंसर्वोजनस्तथानजानातीतिमन्वानः शंकते ॥ तच्चेति ॥ श्लोके

तच्च किंनिमित्तंजगतोऽज्ञानमित्युच्यते ॥ त्रिभिर्गुणमयैर्गुणविकारैरागद्वेषमोहादिप्रकारैर्भावैः पदार्थैरेभिर्य
थोक्तैः सर्वमिदंप्राणिजातंजगन्मोहितमविवेकतामापादितंसन्नाभिजानातिमामेभ्योगुणेभ्यः परंव्यतिरिक्तंवि

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदंजगत् ॥ मोहितंनाभिजानातिमामेभ्यः परमव्ययं ॥ १३ ॥

लक्षणंचाव्ययंव्ययरहितंजन्मादिसर्वभावविकारवर्ज्जितमित्यर्थः ॥ १३ ॥ श्रीसीतारामचंद्रायनमोनमः ॥

नोत्तरमाह ॥ त्र्यतइति ॥ एभ्यः परमित्यप्रपंचकत्वमुच्यते ॥ अव्ययमिति ॥ सर्वविक्रियाराहित्यं ॥ १३ ॥ श्रीरामायनमः

यथोक्तानादिसिद्धमायापारवश्यपरिवर्जनायोगाज्जगतां न कदाचिदपि तत्त्वबोधसमुदयसंभावनेत्याशंकते। कथं पुनरिति। भगवदेकशरणतया तत्त्वज्ञानद्वारेण मायातिक्रमः संभवतीति परिहरति। उच्यत इति। कथं दुरत्ययत्वे तदत्ययः स्यादिति तत्राह। मामेवेति। प्रधानस्यैव स्वातंत्र्यं मायाया व्युदस्यति। देवस्येति। स्वातंत्र्ये मायात्वानुपपत्तिं हिशब्दो द्योतितां हेतुं करोति। यस्मादिति। अनुभवसिद्धाया सा नाकस्मादपलापमर्हतीत्याह। एषेति। जगतस्तत्त्वप्रतिपत्तिप्रतिबंधकीभूता गुणाः

कथं पुनर्दैवीमेतां गुणात्मिकां वैष्णवीं मायामतिक्रामंतीत्युच्यते। दैवी देवस्य ममेश्वरस्य विष्णोः स्वभावभूता हि यस्माद् एषा यथोक्ता गुणमयी मम माया दुःखेनात्ययो ऽतिक्रमणं यस्याः सा दुरत्यया तत्रैवं सति अतस्तत्र सर्व

दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥ १४ ॥ श्रीः ॥

धर्मान् परित्यज्य मामेव मायाविनं स्वात्मभूतं सर्वात्मना ये प्रपद्यंते ते मायामेतां सर्वभूतमोहिनीं तरंत्यतिक्रामंति संसारबंधनात् मुच्यंत इत्यर्थः ॥ १४ ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीकृष्णाय नमो नमः ॥ श्रीः ॥

सत्त्वाद्ययः ममेति प्रागुक्तमेव मायायाः संबंधमनूद्य विधित्सितं दुरत्ययत्वं विभजते। दुःखेनेति। मामेवेत्यादि व्याचष्टे तत्रेति। तस्मिन्मायारूपे यथोक्तरीत्या दुरत्यये सतीति यावत्। मामेवेत्येवकारेण मायायां वेद्यकोटिनिवेशाभावो विवक्ष्यते। सर्वात्मना कर्मानुष्ठानादिव्यग्रतामंतरेणेत्यर्थः। मायातिक्रमे मोहातिक्रमो भवतीति मत्वा विशिनष्टि। सर्वेति। मायातत्कार्यमोहातिक्रमे ऽपि कथं पुरुषस्य पुरुषार्थसिद्धिरित्याशंक्याह। संसारेति ॥ १४ ॥ श्रीकृष्णाय नमः ॥ श्रीः ॥

भगवन्निष्ठायाः मायातिक्रमहेतुत्वेतदेकनिष्ठत्वमेवसर्वेषामुचितमितिपृच्छति ॥ यदीति ॥ पापकारित्वेनाविवेकभूयस्त्वाहिंसानृतादिभूयस्त्वाद्भूयसांजंतूनांनभगवन्निष्ठत्वसिद्धिरित्याह ॥ उच्यतेति ॥ मोदांपापकारित्वेहेतुरतएवनिःकृष्टाः संमुषितमिवतिरस्कृतंज्ञानंस्वरूपचैतन्यमेषामिति ॥ १५ ॥ तथाकेषांतर्हित्वन्निष्ठतासुकरेतितत्राह ॥ येपुनरिति ॥ तेभजंते

यदित्वांप्रपन्नामायामेतांतरंतिकस्मात्त्वामेवसर्वेनप्रपद्यंतेइत्युच्यतेनमांपरमेश्वरंदुःकृतिनः पापकारिणोमूढाःप्रपद्यंतेनराधमाः नराणामधमानिःकृष्टास्तेचमाययापहृतज्ञानाःसंमुषितज्ञानाआसुरंभावंहिंसानृतादिलक्षणमाश्रिताः ॥ १५ ॥ येपुनर्नरोत्तमाःपुण्यकर्माणः ॥ चतुर्विधाश्चतुःप्रकाराभजंतेसेवंतेमांजनाःसुकृतिनः

नमांदुःकृतिनोमूढाःप्रपद्यंतेनराधमाः ॥ माययापहृतज्ञानाआसुरंभावमाश्रिताः ॥ १५ ॥ चतुर्विधाभजंतेमांजनाःसुकृतिनोऽर्जुन ॥ आर्त्तोजिज्ञासुरर्थार्थीज्ञानीचभरतर्षभ ॥ १६ ॥ १६ ॥

पुण्यकर्माणोहेऽर्जुनआर्तः आर्त्तिपरीगृहीतस्तस्कररव्याघ्ररोगादिनाअभिभूतःआपन्नोजिज्ञासुर्भगवत्तत्वंज्ञातुमिच्छतियोऽर्थार्थीधनकामोज्ञानीविष्णोस्तत्ववित्भरतर्षभ ॥ १६ ॥ श्रीकृष्णायनमः ॥ श्रीरामचंद्रायनमोनमः ॥

तेभगवंतमितिशेषः ॥ येत्वांभजंतेतेकिंसर्वेमायांतरंतिनैवंप्रार्थनावैचित्र्यादित्याह ॥ चतुर्विधाइति ॥ आपन्नस्तन्निवृत्तिमिच्छन्नितिशेषः तत्वविदितिशाब्दज्ञानवानात्मतत्वसाक्षात्कारमात्रार्थीमुमुक्षुरित्यर्थः ॥ १६ ॥ श्रीरामचंद्रायनमोनमः ॥

चतुर्विधानां तेषां सुकृतिनां भगवदभिमुखानां तुल्यत्वमाशंक्याह ॥ तेषामिति ॥ तस्य विशिष्यमाणत्वे हेतुमाह ॥ प्रियो हीति ॥ नित्ययुक्तत्वं भगवत्यात्मनि सदा समाहितचेतस्त्वं असारे संसारे भगवानेव सारः सोऽहमस्मीत्येकस्मिन्नद्वितीये स्वस्माद् त्यंतमभिन्ने भगवति भक्तिः स्नेह विशेषो यस्येत्येकभक्तिः तस्या आधिक्ये हेतुं विवृणोति प्रियो हीत्यादिना ॥ भगवतो ज्ञानिनश्च परस्परं

तेषां चतुर्णां मध्ये ज्ञानी तत्त्ववित् तत्त्ववित्वान्नित्ययुक्तो भगवत्येकभक्तिश्चान्यस्य भजनीयस्याभावदर्शनादतः स एकभक्तिर्विशिष्यते विशेषमाधिक्यमापद्यते ऽतिरिच्यत इत्यर्थः ॥ प्रियो हि यस्मादहमात्मा ज्ञानिनोऽत

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ॥ प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥ १७ ॥

तस्तस्याहमत्यर्थं प्रियः प्रसिद्धं हि लोके आत्मा प्रियो भवतीति तस्मात् ज्ञानेन आत्मत्वात् वासुदेवः प्रियो भवतीति स च ज्ञानी वासुदेवस्यात्मैवेति ममात्यर्थं प्रियः ॥ १७ ॥ श्रीसीतारामचंद्राय नमो नमः ॥ श्रीः ॥

प्रेमास्पदत्वे प्रसिद्धिं प्रमाणयति ॥ प्रसिद्धं हीति ॥ आत्मनो ज्ञानिनः प्रति प्रियत्वेपि भगवतो वासुदेवस्य कथं तं प्रति प्रियत्वमित्याशंक्याह ॥ तस्मादिति ॥ अहं ज्ञानिनो निरुपाधिप्रेमास्पदं परमपुरुषार्थत्वेन आत्मत्वेन च गृहीतत्वादित्यर्थः ॥ ज्ञानिनोपि भगवंतं प्रति प्रियत्वं प्रकटयति ॥ स चेति ॥ १७ ॥ श्रीकृष्णाय नमः ॥ श्रीरामचंद्राय नमः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥

ज्ञानीचेदत्यर्थमीश्वरस्यप्रियोभवतितर्हिविशेषणसामर्थ्यादितरेषामप्रियत्वंप्राप्तमितिशंकते नतर्हीति तेषांभगवंतंप्र तिप्रियत्वमत्रविवक्षितमित्याह नेति अत्यर्थमितिविशेषणस्यतर्हिकिंप्रयोजनमितिपृच्छति किंतर्हीति सर्वेषांभग वदभिमुखत्वादुत्कर्षेपिज्ञानिनितरदतिरेकमंगीकृत्यविशेषणमित्याह उदाराइति किंतत्रप्रमाणमित्याशंक्येश्वरज्ञान मित्याह मेमतमिति ज्ञानीत्वात्मैवेत्यत्रहेतुमाह आस्थितइति सर्वशब्दस्यज्ञानिव्यतिरिक्तविषयत्वमाह त्रयोपीति

नतर्ह्यार्त्तादयस्त्रयोवासुदेवस्यप्रियाः नकिंतर्हिउदाराउत्कृष्टाःसर्वएवैतेत्रयोपिममप्रियाएवेत्यर्थः नहिकश्चि न्मद्भक्तोममवासुदेवस्याप्रियोभवतीतिज्ञानीत्वत्यर्थंप्रियोभवतीतिविशेषःतत्कस्मादित्याह ज्ञानीत्वात्मैवनान्यो

उदाराः सर्वएवैतेज्ञानीत्वात्मैवमेमतं आस्थितःसहियुक्तात्मामामेवानुत्तमांगतिं॥१८॥

मत्तइतिमेममनिश्चयःआस्थितःआरोढुंप्रवृत्तःसज्ञानीहियस्मादहमेवभगवानवासुदेवोनान्योस्मीत्येव युक्तात्मासमाहितचित्तःसन्मामेवपरंब्रह्मगंतव्यमनुत्तमांगतिंगंतुंप्रवृत्तइत्यर्थः १८ श्रीरामायनमोनमः॥

ज्ञानिव्यतिरिक्तानांभगवदाभिमुख्येपिज्ञानाभावापराधान्नभगवत्प्रीतिविषयतेत्याशंक्याह नहीति कस्तर्हिज्ञानवतिवि शेषस्तत्राह ज्ञानीत्विति तमेवविशेषंप्रश्नपूर्वकंप्रकटयति तत्कस्मादित्यादिना सर्वमात्मानंपश्यतोपितस्यतवकथंयथोक्तो निश्चयःस्यादित्याशंक्याह आस्थितइत्येतद्व्याकरोति आरोढुमिति आरोहेहेतुंसूचयति सज्ञानीति आरोढुंप्रवृत्तत्वमेवस्फुटयति

उत्तरश्लोकस्यगतार्थत्वंपरिहरति ज्ञानीति ज्ञानार्थःसंस्कारोवासनातत्तज्जन्मनिपुण्यकर्मानुष्ठानजनिताबुद्धिस्तदाश्रयाणां
तद्भूतामनंतानांजन्मनामितियावत्ज्ञानवत्वंप्राक्तनेष्वपिजन्मसुसंभावितमित्याशंक्याह प्राप्नोति ज्ञानवतोभगवत्प्रतिपत्ति

ज्ञानीपुनरपिस्तूयते बहूनांजन्मनांज्ञानार्थसंस्काराजनाश्रयाणामंतेसमाप्तौज्ञानवान् प्राप्तप
रिपाकज्ञानोमांवासुदेवंप्रत्यगात्मानंप्रत्यक्षतःप्रपद्यतेकथंवासुदेवःसर्वमितियएवंसर्वात्मानं

बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते वासुदेवःसर्वमितिसमहात्मासुदुर्लभः॥ १९॥

प्रपद्यतेसमहात्माननत्समोन्योस्त्यधिकोवाअतःसुदुर्लभःसमनुष्याणांसहस्रेष्वितियुक्तं॥ १९॥
॥ आत्मैवसर्ववासुदेवइतिएवमप्रतिपत्तौकारणमुच्यते॥

प्रश्नद्वाराविवृणोति कथमिति यथोक्तज्ञानस्यतत्वतश्चदुर्लभत्वंसूचयति यएवमिति महत्सर्वोत्कृष्टमात्मयस्य वृत्तिंचित्तमस्ये
तिमहात्मत्वेफलितमाह अतइति तत्रवाक्योपक्रमानुकूल्यंकथयति मनुष्याणामिति १९ श्रीरामचंद्रायनमोनमः॥

किमितितर्हिसर्वेषांप्रत्यग्भूतेभगवतियथोक्तज्ञानंनोदेतीत्याशंक्यनमामित्यत्रोक्तंहृदिनिधायज्ञानानुदयेहेत्वंतरमाह॥ आ
त्मैवेति॥ कामैर्नानाविधैरपहृतविवेकविज्ञानस्यदेवतांतरनिष्ठत्वमेवप्रत्यग्भूतपरदेवताप्रतीत्यभावेकारणमित्याह॥ कामैरि
ति॥ देवतांतरनिष्ठत्वेहेतुमाह॥ तंतमिति॥ प्रसिद्धोनियमोजपोपवासप्रदक्षिणनमस्काराादिः नियमविशेषाश्रयणेकारणमाह

कामैस्तैस्तैःपुत्रपशुस्वर्गादिविषयैर्हृतज्ञानाअपहृतविवेकविज्ञानाः प्रपद्यंतेऽन्यदेवताःवासुदेवादात्मनोअन्यादेवताः
तंतंनियममास्थायदेवताराधनेप्रसिद्धोयोयोनियमस्तंतमास्थायाश्रित्यप्रकृत्यास्वभावेनजन्मांतरार्जितसंस्कार
विशेषेणनियताःनियमिताःस्वयाआत्मीयया॥ २०॥ तेषांचकामिनांयोयःकामीयांयांदेवतातनुंश्रद्धयासंयु

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेन्यदेवताः॥ तंतंनियममास्थायप्रकृत्यानियताःस्वया॥ २०॥
योयोयांयांतनुंभक्तः श्रद्धयार्चितुमिच्छति॥ तस्यतस्याचलांश्रद्धांतामेवविदधाम्यहं॥ २१॥ २१॥

क्तोभक्तश्चसन्नर्चितुंपूजयितुमिच्छतितस्यतस्यकामिनोऽचलांस्थिरांश्रद्धांतामेवविदधामिस्थिरीकरोमिययैवपू
र्वंप्रवृत्तःस्वभावतोयोयांदेवतातनुंश्रद्धयाअर्चितुंइच्छति॥ २१॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीः॥ ॥

प्रकृत्येति॥ २०॥ तत्तद्देवताप्रसादात्कामिनामपिसर्वेश्वरेसर्वात्मकेवासुदेवेक्रमेणभक्तिर्भविष्यतीत्याशंक्याह॥ तेषांचेति
स्वभावतोजन्मांतरीयसंस्कारवशादित्यर्थः भगवद्विहितयास्थिरयाश्रद्धयासंस्काराधीनयादेवताविशेषमाराधयतोपि
भगवदनुग्रहादेवफलप्राप्तिरित्याह॥ सोयामिति॥ २१॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीकृष्णायनमोनमः॥ श्रीः॥

प

ईहते निर्वर्त्तयतीत्यर्थः॥ आराधितदेवताप्रसादात्फलप्राप्तौ किमीश्वरेणेत्याशंक्य तस्य सर्वज्ञस्य कर्मफलविभागाभिज्ञस्य
देवताधिष्ठातृत्वात्तस्यैव फलदातृत्वमित्याह सर्वज्ञेनेति॥ एको बहूनां यो विदधाति कामानित्यादिश्रुतिमाश्रित्याह हितानितिप

स तया मद्विहितया श्रद्धया युक्तस्तस्या देवतायाः तन्वा आराधनमीहते चेष्टते लभते च ततस्तस्या
आराधिताया देवतातन्वाः कामानीप्सितान्मयैव परमेश्वरेण सर्वज्ञेन कर्मफलविभागज्ञतः

स तया श्रद्धया युक्तस्तस्याराधनमीहते॥ लभते च ततः कामान्मयैव विहितान् हितान्॥२२॥

या विहितान्निर्मितान्तान्हि यस्मात्ते भगवता विहिताः कामाः तस्मात्तानवश्यं लभत इत्यर्थः॥ हि
तानिति वा पदच्छेदे हितत्वं कामानामुपचरितं कल्प्यं न हि कामा हिताः कस्यचित्॥२२॥२२॥२२॥ ॥

तद्व्याख्यात॥२२॥

इदं व्याचष्टे॥ यस्मादिति॥ हितानित्येकं पदमिति पक्षं प्रत्याह॥ हितानिति॥ मुख्यत्वसंभवे किमित्यौपचारिकत्वमित्याशंक्याह

प्रेक्षापूर्वकारिणि कामानां हितत्वाभावे हेतुमाह यस्मादिति । किंच ये कामिनस्ते न विवेकिनस्ततश्चाविवेकपूर्वकत्वात्कामानां कुतो हितत्वाशंकेत्याह । अविवेकिन इति । कामानामनंतफलत्वेन हितत्वमाशंक्याह । अंतवदिति । तेषामविवेकपूर्वकत्वमतःशब्दार्थः कामफलस्य विनाशित्वे किं मितिकामनिष्टत्वं जंतूनामित्याशंक्याल्पप्रज्ञानामित्यादित्याह अल्पेति । किंतर्हि साधनमनंतफलाये

यस्मादंतवंतः तत्साधनव्यापाराः । अविवेकिनः कामिनश्च ते ऽतः । अंतवद्विनाशि तु फलं तेषां तद्भवत्यल्पमेधसां अल्पप्रज्ञानां देवान्देवयजो यांति देवान्यजंतीति देवयजः ते देवान्यांति मद्भक्ता यांति मामपि ए

अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसां । देवान्देवयजो यांति मद्भक्ता यांति मामपि २३ ॥

वं समाने ऽप्यायासे मामेव न प्रपद्यंते ऽनंतफलाय । अहो खलु कष्टं वर्त्तत इत्यनुक्रोशं दर्शयति भगवान् ॥ २३ ॥

त्याशंक्य भगवद्भक्तिरित्याह मद्भक्ता इति । अक्षरार्थमुक्त्वा श्लोकस्य तात्पर्यार्थमाह एवमिति । देवताप्राप्तौ भगवत्प्राप्तौ चेति शेषः मामेवेत्यादौ देवताविशेषं प्रपद्यंते ऽनंतफलायेति वक्तव्यं उक्ते वैपरीत्ये कारणमविवेकातिरिक्तं नास्तीत्यभिप्रेत्याह अहो खलु

भगवद्भजनस्योत्तमफलत्वेपिप्राणिनांप्रायेणतन्निष्ठत्वाभावेप्रश्नपूर्वकंनिमित्तंनिवेदयति॥ किंनिमित्तमित्यादिना॥अ
प्रकाशंशरीरग्रहणात्पूर्वमितिशेषः॥इदानींलीलाविग्रहावस्थायामित्यर्थः॥प्रकाशस्यतर्हिकादाचित्कत्वंभगवतिप्राप्तंनेत्या

किंनिमित्तंत्वामेवनप्रपद्यंतइत्युच्यते॥अव्यक्तमप्रकाशंव्यक्तिमापन्नंप्रकाशंगतंइदानींमन्यंतेमांनित्य
प्रसिद्धमीश्वरमपिसंतंअबुद्धयोऽविवेकिनःपरंभावंपरमात्मस्वरूपंअजानंतोऽविवेकिनोममाव्ययंव्य

अव्यक्तंव्यक्तिमापन्नंमन्यंतेमामबुद्धयः॥परंभावमजानंतोममाव्ययमनुत्तमं॥२४॥
यरहितंअनुत्तमंनिरतिशयंमदीयंभावमजानंतोमन्यंतइत्यर्थः॥२४॥श्रीरामचंद्रायनमोनमः॥

ह॥नित्येति॥कथंतर्हिभगवंतमागंतुकप्रकाशंमन्यंतेतत्राबुद्धयइत्युत्तरंतद्विवृणोति॥परमिति॥२४॥श्रीरामायनमः

परमनुत्तममिति विशेषणद्वयं सोपाधिकनिरुपाधिकभावार्थमविवेकरूपमज्ञानं भगवन्निष्ठाप्रतिबंधकमुक्तं तस्मिन्नपि
निमित्तं प्रश्नपूर्वकमनाद्यज्ञानमुपन्यस्यति तदज्ञानमित्यादिना त्रिभिर्गुणमयैरित्यनेनोपाधिकरूपस्याप्रतिपत्तौ कार
णमुक्तमत्र तु सोपाधिकस्यापीति विशेषं गृहीत्वा व्याचष्टे नाहमिति तर्हि भगवद्भक्तिरनुपयुक्तेत्याशंक्याह केषां
चिदिति सर्वस्य लोकस्य न प्रकाशोहमित्यत्र हेतुमाह योगेति अनाद्यनिर्वाच्याज्ञानाछन्नत्वादेवमद्विषये लोकस्य

तदज्ञानं किं निमित्तमित्युच्यते नाहं प्रकाशः सर्वस्य लोकस्य केषांचिदेवमद्भक्तानां प्रकाशोहमित्यभिप्रायः योगमा
यासमावृतः योगो गुणानां युक्तिर्घटनं सैव माया योगमाया तया योगमायया चित्तसमाधिर्वा योगो भगवतस्तत्कृ

नाहं प्रकाशः सर्वस्य योगमायासमावृतः मूढोयं नाभिजानाति लोको मामजमव्ययं ॥२५॥

ता माया तया योगमायया समावृतः संछन्न इत्यर्थः अत एव मूढो लोकोयं नाभिजानाति मामजमव्ययं यया योगमा
यया समावृतं मां लोको नाभिजानाति नासौ योगमाया मदीया सती ममेश्वरस्य मायाविनो ज्ञानं प्रतिबध्नाति यथान्यस्या
पि मायाविनो माया ज्ञानं तद्वत् ॥२५॥
मौढ्यं तन्नश्च मदीयस्वरूपविवेकाभावान्मन्निष्ठत्वराहित्यमित्याह अत एवेति मा
यया भगवानावृतश्चेत्तस्यापि लोकस्येव ज्ञानप्रतिबंधः स्यादित्याशंक्याह ययेति न हीयं मायामायाविनो विज्ञानं प्रति
बध्नाति मायात्वाल्लौकिकमायावदथवानेश्वरो मायाप्रतिबद्धज्ञानो मायावित्वाल्लौकिकमायाविवदित्यर्थः ॥२५॥ श्रीः ॥

भगवतो मायाप्रतिबद्धज्ञानत्वाभावे सर्वज्ञत्वमप्रतिबंधं सिद्धमित्याह ॥ यत इति ॥ लोकस्य मायाप्रतिबद्धविज्ञानत्वाद्देवभगवदाभिमुख्यशून्यत्वमित्याह ॥ मां त्विति ॥ कालत्रयपरिछिन्नापरिछिन्नसमस्तवस्तुपरिज्ञाने प्रतिबंधो नेश्वरस्यास्तीति द्यो

यत एवं अतः ॥ अहं तु वेद जाने समतीतानि समतिक्रांतानि भूतानि तथा वर्त्तमानानि चार्जुन भविष्याणि च

वेदाहं समतीतानि वर्त्तमानानि चार्जुन । भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६ ॥ श्रीः ॥

भूतानि वेदाहं मां तु वेद न कश्चन मद्भक्तं मच्छरणमेकं मुक्त्वा मत्तत्ववेदनाभावादेव न मां भजंते ॥ २६ ॥ श्रीः ॥

तनार्थस्तु शब्दः लोकस्य भगवत्तत्वविज्ञाने प्रतिबंधं द्योतयति ॥ तर्हि त्वद्भक्तिर्विफलेत्याशंक्याह ॥ मद्भक्तमिति ॥ तर्हि सर्वोपि त्वद्भक्तिद्वारा त्वां ज्ञास्यतिनेत्याह ॥ मत्तत्वेति ॥ विवेकवतो मद्भजनं न तु विवेकशून्यस्य सर्वस्यापीत्यर्थः ॥ २६ ॥ श्रीः ॥

भगवत्तत्वविज्ञानप्रतिबंधकं मूलाज्ञानातिरिक्तं प्रश्नद्वारेणोदाहरति। केनेत्यादिना। पुनः शब्दात्प्रतिबंधकांतरविवक्षागम्य
ते। अपरोक्षमवांतरप्रतिबंधकमिदमागद्यते विशेषमाकांक्षापूर्वकं निक्षिपति। केनेति द्वंद्वशब्देन गृहीतयोरपीच्छा
द्वेषयोर्ग्रहणं द्वंद्वशब्दार्थोपलक्षणार्थमित्यभिप्रेत्याह। तावेवेति। तयोरपर्यायमेकत्रानुपपत्तिं गृहीत्वा विशिन

केन पुनः मत्तत्ववेदनप्रतिबंधेन प्रतिबद्धानि संति जायमानानि सर्वभूतानि मां न विंदंतीत्यपेक्षायामिदमाह
इच्छा च द्वेषश्च इच्छाद्वेषौ ताभ्यां समुत्तिष्ठतीति इच्छाद्वेषसमुत्थस्तेन इच्छाद्वेषसमुत्थेन केनेति विशेषापेक्षायामि
दमाह्। द्वंद्वमोहेनेति द्वंद्वनिमित्तो मोहो द्वंद्वमोहस्तावेवेच्छाद्वेषौ शीतोष्णवत् परस्परविरुद्धौ सुखदुःखतद्धेतुविष

इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत॥ श्रीकृष्णाय॥

योयथाकालं सर्वभूतैः संबध्यमानौ द्वंद्वशब्देनाभिधीयेते तत्र यदा इच्छाद्वेषौ सुखदुःखतद्धेतुसंप्राप्त्यालब्ध्यात्मकौ
भवतः तदा तौ सर्वभूतानां प्रज्ञायाः स्ववशापादनद्वारेण परमार्थात्मतत्वविषयज्ञानोत्पत्तिं प्रतिबंधकारणं मोहं ज

नयतः॥

यियथाकालमिति। न च तयोरनधिकरणं किंचिदपि भूतं संसारमंडले संभवत्याह। सर्वभूतैरिति। तथापि कथं तयो
मोहहेतुत्वमित्याशंक्याह। तत्रेति। तयोराश्रयः सप्तम्यर्थः॥ श्रीरामचंद्राय नमः॥ श्रीसीतारामचंद्राय नमो नमः॥

उक्तमेवार्थंकैमुतिकन्यायेनप्रपंचयति ॥ नहीति ॥ पूर्वभागानुवादपूर्वकमुत्तरभागेनफलितमाह ॥ अतइति ॥ प्रत्यगात्मन्य
हंकारादिप्रतिबंधप्रभावतोज्ञानोत्पत्तेरसंभवोतः शब्दार्थैः कुलप्रयुक्तमहिम्नासरूपशक्त्याचयुक्तस्यैवयथोक्तप्रतिबं

नहीछाद्वेषवशीकृतचित्तस्यभूतार्थविषयंज्ञानमुत्पद्यतेबहिरपिकिमुवक्तव्यंताभ्यामाविष्टबुद्धेः संमूढस्यप्र
त्यगात्मनिबहुप्रतिबंधेज्ञानंनोत्पद्यतइत्यतस्तेनेछाद्वेषसमुत्थेन द्वंद्वमोहेनभारतभारतान्वयसर्वभूतानिसं
मोहितानिसंतिसंमोहंसंमूढतांसर्गेजन्मनुत्पत्तिकालइत्येतद्यांतिहेपरंतपमोहवशान्येवसर्वभूतानिजायमाना

सर्वभूतानिसंमोहंसर्गेयांतिपरंतप ॥ २७ ॥ श्रीकृष्णायनमः ॥

निजायंतेइत्यभिप्रायः यतएवमतस्तेनद्वंद्वमोहेनप्रतिबद्धप्रज्ञानानिसर्वभूतानिसंमोहितानिमामात्मभूतंन
जानंति ॥ अतएवात्मभावेनमांनभजंते ॥ २७ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमः ॥ श्रीकृष्णायनमोनमः ॥ ॥

धप्रतिविधानसामर्थ्यमितिद्योतनार्थंभारतपरंतपेतिसंबोधनद्वयं तत्वज्ञानप्रतिबंधेप्रकृतमवांतरकारणमुपसंहरति
मोहेति जायमानभूतानांमोहपरवशत्वेफलितमाह ॥ यतइति ॥ भगवत्तत्ववेदनाभावेतन्निष्ठत्ववैधुर्यंफलतीत्याह ॥ अतएवेति
॥ २७ ॥

यदि सर्वाणि भूतानि जन्मप्रतिपद्यमानानि संमूढानि संति भगवत्तत्त्वपरिज्ञानशून्यानि भगवद्भजनपराङ्मुखानि तर्हि शास्त्रार्थ
बोधेन भगवद्भजनमुच्यमानमधिकार्यभावादनर्थकमापद्येतेति शंकते ॥ केपुनरिति ॥ अनेकेषु जन्मसु कृतसुकृतवशादपा
कृतदुरितानां द्वंद्वप्रयुक्तमोहविरहिणां ब्रह्मचर्यादिनियमवतां भगवद्भजनाधिकारित्वान्न शास्त्रविरोधोस्तीति परिहरति

के पुनरनेन द्वंद्वमोहेन निर्मुक्ताः संतस्त्वां विदित्वा यथाशास्त्रमात्मभावेन भजंत इत्यपेक्षितमर्थं दर्शयि
तुमाह ॥ येषां तु पुनरंतगतं समाप्तप्रायं क्षीणं पापं जनानां पुण्यकर्मणां पुण्यं कर्म येषां सत्त्वशुद्धिकारणं

येषां त्वंतगतं पापं जनानां पुण्यकर्मणां ॥ ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः ॥ २८ ॥

विद्यते ते पुण्यकर्माणस्तेषां पुण्यकर्मणां ते द्वंद्वमोहनिर्मुक्ताः भजंते मां परमात्मानं दृढव्रताः एवमेव प
रमार्थतत्त्वं नान्यथेत्येवं निश्चितविज्ञानाद् दृढव्रता उच्यंते ॥ २८ ॥ श्रीकृष्णाय नमः ॥ श्रीरामाय नमः ॥

उच्यत इति ॥ तुशब्दद्योत्यमर्थमाह ॥ पुनरिति ॥ मुक्तेरर्वाक्कसिद्ध्यर्थं समाप्तप्रायमित्युक्तं प्रकृतोपयोगं पुण्यस्य कर्मणो दर्शयि
तुं विशिनष्टि ॥ सत्त्वेति ॥ उभयविधिशुद्धेर्द्वंद्वनिमित्तमोहनिवृत्तिः फलमाह ॥ तेद्वंद्वेति ॥ मोहनिवृत्तेर्भगवन्निष्ठापर्यंतत्वमाह ॥
भजंत इति ॥ तेषां नानापरिग्रहवतां भगवद्भजनप्रातिकूल्यमाशंक्याह ॥ दृढेति ॥ २८ ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥

यथोक्तानामधिकारिणां भगवद्भजनफलं प्रश्नद्वारा दर्शयति ॥ तेकिमर्थेति ॥ जरामरणादिलक्षणो यो बंधस्तद्विश्लेषार्थं भगवद्भजनमित्यर्थः ॥ संप्रति सगुणस्य सप्रपंचस्य मध्यमानुग्रहार्थं ध्येयत्वमाह ॥ मामाश्रित्येति ॥ जरादिसंसारनिवृत्त्यर्थं निर्गुणं निःप्रपंचं मा मुत्तमाधिकारिणो जानंतीत्युक्तं मामेव ये प्रपद्यंते इत्यादावित्याह ॥ जरेति ॥ मध्यमादिकारिणं प्रत्याह ॥ मा

तेकिमर्थं भजंते इत्युच्यते ॥ जरामरणमोक्षाय जरामरणयोर्मोक्षार्थं मां परमेश्वरमाश्रित्य मत्समाहितचित्ताः सं

जरामरणमोक्षाय मामाश्रित्य यतंति ये ॥ ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलं ॥ २९ ॥

तो यतंति प्रयतंते ये ते यद्ब्रह्म परं तद्विदुः कृत्स्नं समस्तमध्यात्मं प्रत्यगात्मविषयं वस्तु कृत्स्नं तद्विदुः कर्म चाखिलं समस्‌

विदुः

मिति ॥ परमेश्वराश्रयणं नाम विषयविमुखत्वेन भगवदेकनिष्ठत्वमित्याह ॥ मत्समाहितेति ॥ प्रयतनं भगवन्निष्ठासिद्ध्यर्थं बहिरंगानां यज्ञादीनामंतरंगानां च श्रवणादीनामनुष्ठानं प्रागुक्तं ॥ जगदुपादानं परं ब्रह्म ॥ कथं ब्रह्म विदुरित्यपेक्षायां समस्ताध्यात्मवस्तुत्वेन सकलकर्मत्वेन च तद्विदुरित्याह ॥ कृत्स्नमिति ॥ २९ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ ॥

नकेवलंभगवन्निष्ठानांसर्वोध्यात्मकर्मात्मकब्रह्मविस्त्वमेवकिंत्वधिभूताधिंसहितंतद्देहिलमपिसिद्धतीत्याह॥ साधि

साधिभूताधिदैवमधिभूतंचाधिदैवंचाधिभूताधिदैवंतेनसह अधिभूताधिदैवेनवर्त्ततइतिसाधिभू

साधिभूताधिदैवंमांसाधियज्ञंचयेविदुः॥ ॥

ताधिदैवंमांयेविदुःसाधियज्ञंचसहाधियज्ञेनसाधियज्ञंचयेविदुः॥ श्रीसीतारामचंद्रजीप्रसंन्नोम.

भूतेति॥ अध्यात्मंकर्माधिभूतंअधिदैवमधियज्ञश्चेतिपंचकमेतद्ब्रह्मयेविदुः॥ श्रीकृष्णायनमः॥ श्रीरामायनमः

तेषांयथोक्तज्ञानवतांसमाहितचेतसामापद्दवस्थायामपिभगवत्तत्त्वज्ञानमप्रतिहतंतिष्ठतीत्याह प्रयाणेति॥ अपिचेतिनि
पाताभ्यांतस्यामवस्थायांकरणग्रामस्यव्यग्रतयाज्ञानाभावेपिसमाहितचित्तानामुक्तज्ञानवतांभगवत्तत्त्वज्ञानमयत्न

कृत्स्नंप्रयाणकालेमरणकालेपिचमांतेविदुर्युक्तचेतसःसमाहितचित्ताः॥

प्रयाणकालेपिचमांतेविदुर्युक्तचेतसः॥३०॥श्रीः॥

॥३०॥ ॥इतिश्रीगीताभाष्यटीकायांसप्तमोध्यायः॥७॥ ॥ ॥

लभ्यंइतिद्योत्यते॥तदनेनसप्तमेनोत्तमाधिकारिणंप्रतिज्ञेयंनिरूपयतातदर्थमेवसर्वात्मकत्वादिकमुपदिशताप्रकृति
द्वयद्वारेणसर्वकारणत्वादिचवदतातत्पदवाच्यंतल्लक्ष्यंचोपक्षिप्तं॥३०॥इतिश्रीमद्भगवद्गीताआनंदगीरीटीका॥७॥

सप्तमाध्यायांते ये षां त्वं तगतं पापमित्यादिना येषां ब्रह्मादीनामनुसंधानमुक्तं यच्च प्रयाणकाले भगवतः स्मरणं दर्शितं तदिदं जिज्ञासमानः सन् पृच्छतीति प्रश्नसमुदायमवतारयति ॥ ते ब्रह्मेति ॥ प्रश्नबीजानि तद्विषयभूतानि ब्रह्मादीनि वक्तुनीति यावत् बुभुत्सित विषयप्रतिलंभानंतरं तेषां प्रश्नद्वारा निर्णयार्थं इत्याह ॥ अत इति ॥ यदुक्तं ब्रह्म तद्विदुरिति तत्किं सोपाधिकं निरुपाधिकं वा ब्रह्मशब्दस्योभयत्रापि सद्भावादिति मत्वाह ॥ किं तदिति ॥ यच्चोक्तं कृत्स्नमध्यात्ममिति ॥ तत्रात्मानं देहमधिकृत्यास्मिन्न धिष्ठानेति इतीत्यध्यात्मशब्देन श्रोत्रादिकरणग्रामो वा प्रत्यग्भूतं ब्रह्मैव वा विवक्षितमित्याह ॥ किमध्यात्ममिति ॥ विज्ञानं यज्ञं तनुते

ते ब्रह्म तद्विदुः कृत्स्नमित्यादिना भगवतार्जुनस्य प्रश्नबीजान्युपदिष्टानि अतस्तत्प्रश्नार्थं ॥ छ ॥

॥ अर्जुन उवाच ॥ किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ॥ अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥

॥ श्रीरामचंद्राय नमः ॥ श्रीरामाय नमः ॥ श्रीरामचंद्राय नमः ॥ श्रीरामाय नमः ॥ श्रीरामचंद्राय नमः ॥ ॥

कर्माणि तनुतेपि चेति श्रुतौ कर्मणां द्वैविध्यनिर्द्धारणात् कर्म चाखिलमित्यत्र कीदृक्कर्म गृहीतमिति पृच्छति ॥ किमिति ॥ क्षराक्षराभ्यां कार्यकारणाभ्यामतीतस्य भगवतो न किंचिद्वेद्यमस्तीति सूचयति ॥ पुरुषोत्तम इति ॥ साधिभूताधिदैवमित्यत्राधिभूतशब्देन पृथिव्यादिभूतेषु वर्त्तमानं किंचिदेव गृह्यते किं वा समस्तमेव कार्यमिति निर्धारयिषया पृच्छति ॥ अधिभूतमिति ॥ अधिदैवमिति च देवताध्यानं दैवतेषादित्यमंडलादिषु वर्त्तमानं चैतन्यं वा जिघृक्षितमिति प्रश्नांतरं प्रस्तौति ॥ अधिदैवमिति ॥ १

साधियज्ञं चेत्यत्राधियज्ञशब्देन यज्ञमधिगतो विज्ञानात्मा वा परदेवता वेति प्रश्नान्तरं प्रकरोति। अधियज्ञ इति स च क
थं केन प्रकारेण ब्रह्मत्वेनानुचिंतनीयः किं तादात्म्येन किं वात्यंताभेदेनेत्याह। कथमिति सर्वथापि स किमस्मिन्देहे वर्त्तते त
तो बहिर्वा देहे चेत्स कोऽत्र बुद्ध्यादिस्तद्व्यतिरिक्तो वेति जिज्ञासया ब्रुते कोऽत्रेति अधियज्ञः कथं कोऽत्रेति न प्रश्नभेदः कः क

अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन। प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः॥२॥

थमिति तु प्रकारभेदं विवक्षयेति द्रष्टव्यं। यत्तु समाहितचित्तानामुत्क्रमणकालेऽपि भगवदनुसंधानं सिध्यतीति
तदयुक्तमुत्क्रमणदशायां करणग्रामवैयग्र्याच्चित्तसमाधानानुपपत्तेरित्यभिप्रेत्याह। प्रयाणेति।२। ॥

व्याख्यातस्य प्रश्नसप्तकस्य प्रतिवचनं भागवतमवतारयति एषामिति क्रमेण कृतानां प्रश्नानां क्रमेणैव प्रतिवचने प्रष्टुरभीष्टप्रतिपत्ति
सौकर्यं सिध्यतीति बुद्ध्यमानो विशिनष्टि यथाक्रममिति ॥ तत्र प्रश्नत्रयं निर्णेतुं भगवद्वचनमुदाहरति अक्षरमिति ॥ किं तद्ब्रह्मे
ति प्रश्नप्रतिवचनमक्षरं ब्रह्म परममिति तत्राक्षरशब्दस्य निरुपाधिके परस्मिन्नात्मन्यविनाशित्वव्याप्तिमत्वसंबंधात्प्रवृत्तिं व्युत्पा
दयति अक्षरमित्यादिना क्षरमित्यादिना कथं पुनरक्षरशब्दस्य यथोक्ते परमात्मनि निरूढप्रयोगमंतरेण व्युत्पत्त्या प्रवृत्तिराश्रीय

॥ एषां प्रश्नानां यथाक्रमं निर्णयाय अक्षरं न क्षरतीति परमात्मा एतस्यैवाक्षरस्य प्रशासने गार्गि सूर्या
चंद्रमसौ विधृतौ तिष्ठत इति श्रुतेः ॥ ओंकारस्य चोमित्येकाक्षरं ब्रह्मेति परेण विशेषणात्तदग्रहणं परममि

॥ श्रीभगवानुवाच ॥ अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ॥ श्रीः ॥

ति च निरतिशयेऽक्षरे ब्रह्मण्युपपन्नतरं विशेषणं ॥ श्रीरामचंद्राय नमः ॥ श्रीरामाय नमः ॥ श्रीरामचंद्राय ॥

ते व्युत्पत्तेरर्थांतरेऽपि संभवादित्याशंक्य द्यावापृथिव्यादिविषयनिरंकुशप्रशासनस्य परस्मादन्यस्मिन्नसंभवात्तथाविधप्रशास
नकर्तृत्वेन श्रुतमक्षरं ब्रह्मैवेत्याह एतस्येति रूढिर्योगमपहरतीति न्यायादोंकारे वर्णसमुदायात्मन्यक्षरशब्दस्य रूढ्या प्रवृत्तिराश्र
यितुमुचितेत्याशंक्याह ओंकारस्येति प्रतिवचनोपक्रमे प्रक्रांतमोंकाराख्यमक्षरमेवोत्तरत्र विशेषितं भविष्यतीत्याशं
क्य परमविशेषणविरोधान्न तस्य प्रक्रमः संभवतीत्याह परममिति चेति ॥ श्रीरामाय नमः ॥ श्रीरामचंद्राय नमः ॥

किमध्यात्ममिति प्रश्नस्योत्तरं स्वभावोऽध्यात्ममित्यादि तद्व्याचष्टे ॥ तस्यैवेति ॥ स्वकीयो भावः स्वभावः श्रोत्रादिकरणग्रामः स चा
त्मनि देहेऽहंप्रत्ययवेद्यो वर्त्तत इति प्रतिभासंव्यावर्त्त्यं स्वभावपदं विगृह्णाति ॥ स्वभाव इति ॥ एवं विग्रहपरिग्रहे स्वभावोऽध्यात्म
मुच्यत इत्यस्यायमर्थो निष्पन्नो भवतीत्यनुवादपूर्वकं कथयति ॥ स्वभाव इति ॥ तस्यैव परस्येत्यादिनोक्तं न विस्मर्त्तव्यमिति वि
शिनष्टि ॥ परमार्थेति ॥ परमेव हि ब्रह्म देहादौ प्रविश्य प्रत्यगात्मभूतमनुभवति तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेरित्यर्थः ॥ किं कर्मे

भा

तस्यैव परस्य ब्रह्मणः प्रतिदेहं प्रत्यगात्मभावः स्वभावः स्वो भावः स्वभावोऽध्यात्ममुच्यते आत्मानं देहमधिकृत्य प्रत्यगात्म
तया प्रवृत्तं परमार्थब्रह्मावसानं वस्तु स्वभावोऽध्यात्ममुच्यते अध्यात्मशब्देनाभिधीयते भूतभावोद्भवकरः भूतानां भावो भू
तभावस्तस्योद्भवो भूतभावोद्भवस्तं करोतीति भूतभावोद्भवकरो भूतवस्तूत्पत्तिकर इत्यर्थः विसर्जनं देवतोद्देशेन चरुपुरो

भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥३॥

दिस्त

डाशादेः स्वस्य द्रव्यस्य वितरणं परित्यागः स एव विसर्गलक्षणो यज्ञः कर्मसंज्ञितः कर्मशब्दित इत्यर्थस्तस्माद्धि बीजभूताद्वृष्ट्या
दिक्रमेण स्थावरजंगमानि भूतान्युद्भवंति ॥३॥
ति प्रश्नस्योत्तरमुपादत्ते ॥ भूतेति ॥ भूतान्येव भावास्तेषामुद्भवः समुत्पत्तिस्तां करोतीति
व्युत्पत्तिं सिद्धवत्कृत्वा विधान्तरेण व्युत्पादयति ॥ भूतानामिति ॥ भावः सद्भावो वस्तु भावोऽतएव भूतवस्तूत्पत्तिकर इति वक्ष्यति वैदि
कं कर्मात्रोक्तविशेषणं कर्मशब्दितमिति विसर्गशब्दार्थं दर्शयन् विशदयति ॥ विसर्ग इत्यादिना कथं पुनर्यथोक्तस्य यज्ञस्य सर्वे
षु भूतेषु सृष्टिस्थितिप्रलयहेतुत्वेन तदुद्भवकरत्वमित्याशंक्याग्नौ प्रास्ताहुतिरित्यादिस्मृतिमनुस्मृत्याह ॥ तस्माद्धीजेति ॥३॥

संप्रतिप्रश्नत्रयस्योत्तरमाह। अधिभूतमिति। अधिभूतं च किं प्रोक्तमित्यस्य प्रतिवचनमधिभूतं क्षरो भाव इति तत्राधिभूतपदम
नूद्यवाच्यमर्थं कथयति। अधिभूतमित्यादिना तस्य निर्देशमंतरेण निर्ज्ञातुमशक्यत्वात् प्रश्नद्वारा तन्निर्दिशति कोसाविति का
र्यमात्रमत्र संगृहीतमिति वक्तुमुक्तमेव व्यनक्ति यत्किंचिदिति। अधिदैवं किमिति प्रश्ने पुरुषश्चेत्यादिप्रतिवचनं तत्र पुरु

अधिभूतं भूतं प्राणिजातमधिकृत्य भवतीति कोसौ क्षरः क्षरतीति क्षरो विनाशी भावः यत्किंचिज्जनिमद्वस्त्वित्यर्थः पुरु

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं॥

षः पूर्णमनेन सर्वमिति पुरि शयनाद्वा पुरुषः आदित्यांतर्गतो हिरण्यगर्भः सर्वप्राणिकरणानामनुग्राहकः सोधिदैवतं॥

षशब्दमनूद्य मुख्यमर्थं तस्योपन्यस्यति। पुरुष इति। तस्यैव संभावितमर्थांतरमाह पुरि शयनाद्वेति। वैराजं देहमासाद्यादित्यमं
डलादिषु देवतेष्वंतरवस्थितो लिंगात्माव्याष्टिकरणानुग्राहकोत्र पुरुषशब्दार्थः स चाधिदैवतमिति स्फुटयत्यादित्येति॥

अधियज्ञः कथमित्यादिप्रश्नं परिहरन्नधियज्ञशब्दार्थमाह अधियज्ञ इति कथमुक्तायां देवतायामधियज्ञशब्दः स्यादित्याशंक्य श्रुतिमनुसरन्नाह यज्ञो वै इति परैव देवताधियज्ञशब्देनोच्यते सा च ब्रह्मणः सकाशादत्यंताभेदेन प्रतिपत्तव्येत्याह सहि विष्णुरिति शास्त्रीयव्यवहारभूमिरत्रेत्युक्ता देहसामानाधिकरण्याद्यात्रेत्यस्य व्याख्यानमस्मिन्निति किमधियज्ञो बहिरंतर्वा देहादिति संदेहो माभूदित्याह देह इति ननु यज्ञस्य देहाधिकरणत्वाभावात्कथं तथाविधयज्ञाभिमानि देव

अधियज्ञः सर्वयज्ञाभिमानिनी देवता विष्णाख्या यज्ञो वै विष्णुरिति श्रुतेः सहि विष्णुरहमेवात्रास्मिन्देहे यो यज्ञः

अधियज्ञोहमेवात्र देहे देहभृतां वर ॥ ४ ॥

तस्याहमधियज्ञः यज्ञो हि देहनिर्वर्त्यत्वेन देहसमवायीति देहाधिकरणो भवति हे देहभृतां वर ॥ ४ ॥ ॥

तात्वं भगवतो विवक्ष्यते तत्राह यज्ञो हीति एतेन तस्य बुद्ध्यादिव्यतिरिक्तत्वमुक्तमवधेयं ॥ न हि परा देवता दर्शितरीत्याऽधियज्ञशब्दिता बुद्ध्यादिषु अंतर्भावमनुभवितुमलं देहान्विभ्रतीति देहभृतः सर्वे प्राणिनस्तेषां वरः श्रेष्ठः युक्तं हि भगवता साक्षादेव प्रतिक्षणं संवादं विदधानस्यार्जुनस्य सर्वेभ्यः श्रेष्ठ्यं ॥ ४ ॥ श्रीरामचंद्राय नमः ॥ श्रीरामाय नमः ॥ ॥

यत्तु प्रयाणकाले चेत्यादि चोदितं तत्राह ॥ अंतकाले चेति ॥ मामेवेत्यवधारणेनाध्यात्मादिविशिष्टत्वेन स्मरणं व्यावर्त्यते विशिष्टस्मर
णे हि चित्तविक्षेपान्न प्रधानस्मरणमपि स्यान्न च मरणकाले कार्यकारणपारवश्याद्भगवदनुस्मरणासिद्धिः सर्वदैव नैरंतर्येणांतरधिया
भगवति समर्पितचित्तस्य तत्काले पि कार्यकारणजातमगणयतो भगवदनुसंधानसिद्धेः शरीरं तस्मिन्नहंममाभिमानमिति
यावत् प्रयातीत्यत्र प्रकृतं शरीरमुपादानं ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुतिमाश्रित्येत्याह नास्तीति ॥ व्यासे ध्वंसे संशयमेवाभिन

अंतकाले च मरणकाले मामेव परमेश्वरं विष्णुं स्मरन्मुक्त्वा परित्यज्य कलेवरं शरीरं यः प्रयाति गच्छति स मद्भावं वैष्णवं तत्वं
याति ॥ नास्ति न विद्यतेऽत्रास्मिन्नर्थे संशयो याति वा न वेति ॥ ५ ॥ न मद्विषय एवायं नियमः किं तर्हि ॥ यं यं वापि यं यं भा

अंतकाले च मामेव स्मरन्मुक्त्वा कलेवरं ॥ यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ५ ॥ यं
यं वापि स्मरन् भावं त्यजत्यंते कलेवरं ॥ तं तमेवैति कौंतेय सदा तद्भावभावितः ॥ ६ ॥ ॥

वं देवताविशेषं स्मरं श्चिंतयन् त्यजति परित्यजति ॥ अंते अंतकाले प्राणवियोगकाले कलेवरं तं तमेवेति स्मृतं भावं एति
नान्यं कौंतेय सदा सर्वदा तद्भावभावितस्तस्मिन् भावस्तद्भावः स भावितो अभ्यस्तो येन स तद्भावभावितः सन् ॥ ६ ॥ श्रीः ॥ ॥

यतीत्याह ॥ यातीति ॥ ५ ॥ अंतकाले भगवंतमनुध्यायतो भगवत्प्राप्तिनियमवदन्यमपि तत्काले देवादिविशेषं ध्यायतो देहं
त्यजतस्तत्प्राप्तिरवश्यंभाविनीति दर्शयति ॥ नेत्यादिना ॥ कथं पुनरंतकाले परवशस्य नियतविषया स्मृतिर्भवितुमुत्सहते तत्राह
॥ सदेति ॥ देवादिविशेषस्तस्मिन्निति सप्तम्यर्थः ॥ भावो भावना वासना स भावो भावितः संपादितो येन पुंसा स तथाविधः स
यं यं भावं स्मरति तं तमेव देहत्यागादूर्ध्वं गच्छतीति संबंधः ॥ ६ ॥ श्रीरामायनमः ॥ श्रीरामचंद्रायनमः ॥ श्रीरामायनमः ॥

संततभावनाप्रतिनियतफलप्राप्तिनिमित्तांत्यप्रत्ययहेतुरित्थं गीतस्यानंतरश्लोकमवतारयति ॥ यस्मादिति ॥ विशेषणत्रयवतो भगवदनुस्मरणस्य भगवत्प्राप्तिहेतुत्वं तस्मादित्युच्यते ॥ सर्वेषु कालेष्वादरनैरंतर्याभ्यां सहेति यावत् भगवदनुस्मरणे विशेषणत्रयसाहित्यं यथाशास्त्रमिति द्योत्यते भगवदनुसंधानं कर्त्तव्यमुक्त्वा तेन सह स्वधर्ममपि कुरु युद्धमित्युपदिशता भगवतासमु

यस्मादेवमंत्याभावनादेहांतरप्राप्तौ कारणं ॥ तस्मात्सर्वेषु कालेषु मामनुस्मर यथाशास्त्रं युध्य च युद्धं च स्वधर्मं कुरु मयि वा

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ॥ मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ७ ॥

सुदेवेऽर्पिते मनोबुद्धी यस्य तव स त्वं मय्यर्पितमनोबुद्धिः सन्मामेव यथास्मृतमेष्यस्यागमिष्यसि असंशयो न संशयोऽत्र विद्यते ॥ ७ ॥ ॥

च्चयोर्ज्ञानकर्मणोरंगीकृतो भवतीत्याशंक्याह ॥ मयीति ॥ मनोबुद्धिगोचरं क्रियाकारकफलजातं सकलमपि ब्रह्मैवेति भावयन् युद्धस्वेति ब्रुवता क्रियादिकलापस्य ब्रह्मातिरिक्तस्याभावाभिलापान्नात्र समुच्चयो विवक्षित इत्यर्थः ॥ उक्तरीत्या स्वधर्ममनुवर्त्तमानस्य प्रयोजनमाह ॥ मामेवेति ॥ उक्तसाधनवशात्फलप्राप्तौ प्रतिबंधाभावं सूचयति ॥ असंशय इति ॥ ७ ॥ श्रीः ॥

इतश्च पूर्वश्लोकोक्तार्थानुष्ठायी भगवंतमंतकाले प्राप्नोतीत्याह॥ किंचेति॥ अभ्यासं विभजते॥ मयीति॥ नहि चित्तसमर्पणस्य विषय
भूतं भगवतोऽर्थांतरं वस्तु सदस्तीति मन्वानो विशिनष्टि॥ चित्तेति॥ अंतकालेपि विजातीयप्रत्ययेषु विछिद्य विछिद्य जायमानेष्व
पि सजातीयप्रत्ययावृत्तिर्योगिनोपि स्यादित्याशंक्याह॥ विलक्षणेति॥ अभ्यासाख्येन योगेन युक्तं चेतस्तो विवृणोति॥ तत्रैवेति॥
तृतीयया परामृष्टोभ्यासयोगः सप्तम्यापि परामृश्यते न तु प्राकृतानां चेतस्तथेति विशिनष्टि॥ योगिन इति॥ तच्चेतो विषयां
तरं परामृशेन्न तर्हि परमपुरुषार्थप्राप्तिहेतुः स्यादित्याशंक्याह॥ नान्यगामिनेति॥ ग्रामादिकं विषयांतरं पारवश्यं नाभ्यनुज्ञा

किंच॥ अभ्यासयोगयुक्तेन मयि चित्तसमर्पणविषयभूते एकस्मिन् तुल्यप्रत्ययावृत्तिलक्षणो विलक्षणप्रत्य
यानंतरितोभ्यासः स चासौ योगस्तेन युक्तं तत्रैव व्यापृतं प्रवृत्तं योगिनश्चेतस्तेन चेतसा नान्यगामिना नान्यत्र वि ना

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना॥ परमं पुरुषं दिव्यं याति पार्थानुचिंतयन्॥ ८॥

षयांतरे गंतुं शीलमस्येति नान्यगामि तेन नान्यगामिना परमं निरतिशयं पुरुषं दिव्यं दिवि सूर्यमंडले भवं
दिव्यं याति गछति हे पार्थानुचिंतयन् शास्त्राचार्योपदेशमनुध्यायन्नित्येतत्॥ ८॥ श्रीरामायनमः॥

यत्ते

तुं ताछील्यप्रत्ययांत्तेन ताम्पर्यादपरामृष्टार्थांतरेण परमपुरुषनिष्ठेनेत्यर्थः॥ तदेव पुरुषस्य निरतिशयत्वं यदपरामृष्टाखि
लानर्थत्वमनतिशयानंदत्वं च स च प्रागेव व्याख्यातो नेह व्याख्यानमपेक्षते यश्चासावादित्य इत्यादिश्रुतिमनुसृत्याह॥ दिवी
ति॥ तत्र विशेषतोभिव्यक्तिरेव भवनं॥ पूर्वोक्तेन चेतसा यो यक्तं पुरुषमनुचिंतयन् याति तमेवेति संबंधः॥ अनुचिंतयन्नि
त्यत्रानुशब्दार्थं व्याचष्टे॥ शास्त्रेति॥ चिंतयन्निति व्याकरोति॥ ध्यायन्निति॥ ८॥ श्रीरामचंद्रायनमः॥ श्रीरामायनमः॥

पुरुषमनुचिंतयन्निति संबंधः चकारात् कयावा नाड्योत्क्रामतीत्यनुकृष्यते तत्र ध्यानद्वारा प्राप्यपुरुषस्य विशेषणानि दर्शयति उच्यत इति क्रांतदर्शित्वमतीतादेरशेषस्य वस्तुनो दर्शनशीलत्वं तेन निष्पन्नार्थमाह सर्वज्ञमिति ॥ चिरंतनमनादिमतः सर्वस्य कारणत्वादनादिमित्यर्थः सूक्ष्ममाकाशादितत सूक्ष्मतरं तदुपादानत्वादित्यर्थः ॥ यो यथोक्तमनुचिंतयेत्स तमेवानुचिंतयन् यातीति पूर्वेणैव संबंध इति योजना ननु विशिष्टजात्यादिमतो यथोक्तमनुचिंतनं फलवद्भवति ॥ न तस्मदादीनामित्याशं

किं विशिष्टं च पुरुषं यातीत्युच्यते ॥ कविं क्रांतदर्शिनं सर्वज्ञं पुराणं चिरंतनं अनुशासितारं सर्वस्य जगतः प्रशासितारमणोः सूक्ष्मादप्यणीयांसं सूक्ष्मतरमनुस्मरेदनुचिंतयेद्यः कश्चित्सर्वस्य सर्वकर्मफलजातस्य धातारं विधातारं विचित्रतया प्राणिभ्यो विभक्तारं अचिंत्यरूपं नास्य विद्यमानमपि केनचिच्चिंतयितुं शक्यत इत्य

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ॥ सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात् ॥ ९

चिंत्यरूपस्तमादित्यवर्णमादित्यस्येव नित्यचैतन्यप्रकाशो वर्णो यस्य तमादित्यवर्णं तमसः परस्तादज्ञानलक्षणान्मोहांधकारात्परस्तात्परमनुचिंतयन्यातीति पूर्वेणैव संबंधः ॥ ९ ॥ श्रीरामचंद्राय नमः ॥ ॥

क्याह यः कश्चिदिति ॥ फलमत उपपत्तेरिति न्यायेनाह सर्वस्येति ॥ एतदप्रमेयं ध्रुवमिति श्रुतिमाश्रित्याह ॥ अचिंत्यरूपमिति ॥ न हि परस्य किंचिदपि रूपादि वस्तुतोऽस्ति अरूपवदेव हीति न्यायात् कल्पितमपि नास्मदादिभिः शक्यते चिंतयितुमित्याह नास्येति ॥ मूलकारणादज्ञानात्तत्कार्यात् पूर्णादुपरिष्टाद्व्यवस्थितं परमार्थतोऽज्ञानतत्कार्यास्पृष्टमित्याह ॥ तमस इति ॥ ९

इतश्चभगवदनुस्मरणंसफलत्वादनुष्ठेयमित्याह। किंचेति कदातदनुस्मरणेप्रयत्नातिरेकोऽभ्यर्थतेतत्राह। प्रयाणकालेति कथंतदनुस्मरणमित्युपकरणकलापमपेक्षमाणंप्रत्याह। मनसेत्यादिना। योनुस्मरेत्सकिमुपैतीतितत्राह। सतमिति। मरणकालेऽप्येवंबहुलेपिप्राचीनाभ्यासप्रसादादव्याहतबुद्धिवैभवोभगवंतमनुस्मरन्यथास्मृतमेवदेहाभिमाननिर्गमानंतरमुपगच्छतीत्यर्थः। भगवदनुस्मरणसाधनंमनसैवानुद्रष्टव्यमितिश्रुत्युपदिष्टमाचष्टे। मनसेति। तस्यचंचलत्वाच्चस्थैर्यमीश्वरेसिध्यतितत्कथंतेनतदनुस्मरतीत्याशंक्याह। अचलेनेति। ईश्वरानुस्मरणेप्रयत्नेनप्रवर्तितंवि

किंच प्रयाणकालेमरणकालेमनसाऽचलेनचलनवर्जितेनभक्त्यायुक्तोभजनंभक्तिस्तयायुक्तोयोगबलेन

प्रयाणकालेमनसाचलेनभक्त्यायुक्तोयोगबलेनचैव॥

चैवयोगस्यबलंयोगबलंसमाधिजसंस्कारजनितंचित्तस्थैर्यलक्षणंयोगबलंतेनचयुक्तइत्यर्थः॥ ॥

षयविमुखंतस्मिन्नेवानुस्मरणयोग्येपौनःपुन्येनप्रवृत्त्यानिश्चलीकृतंततश्चलनविकलंतेनेतिव्याचष्टे। चलनेति। संप्रत्यनुस्मरणाधिकारिणंविशिनष्टि भक्त्यापरमेश्वरेपरमेणप्रेम्णासहितोविषयांतरविमुखोनुस्मर्तेत्यर्थः। योगबलमेवस्फोरयति। समाधिजेति योगःसमाधिश्चित्तस्यविषयांतरनिरोधेनपरस्मिन्नेवस्थापनंतस्यबलंसंस्कारप्रचयोध्येयैकाग्र्यकारणंचतेनतत्रैवस्थैर्यमित्यर्थः। चकारसूचितमन्वयमन्वाचष्टे॥ तेनचेति॥ ॥

यत्तु कया नाड्योत्क्रामन्यातीति तत्राह॥ पूर्वमिति॥ चित्तं हि स्वभावतो विषयेषु व्याप्टतं तेभ्यो विमुखीकृत्य हृदयपुंडरीकाकारे परमा
त्मसंस्थाने यत्नतः स्थापनीयं अथ यदिदमस्मिन्नित्यादिश्रुतेस्तत्र चित्तं वशीकृत्य तदनंतरं कर्त्तव्यमुपदिशति॥ तत इति॥ इ
डापिंगले दक्षिणोत्तरे नाड्यौ हृदयान्निःसृते निरुध्य तस्मादेव हृदयाग्रादूर्द्ध्वगमनशीलया सुषुम्णया नाड्या हार्द्दं प्राणमानी

पूर्वं हृदयपुंडरीके वशीकृत्य चित्तं तत ऊर्द्ध्वगामिन्या नाड्या भूमिजयक्रमेण भ्रुवोर्मध्ये प्राणमावेश्य स्थापयित्वा सम्य

भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यं॥१०॥

ग ऽप्रमत्तः सन्स एवं विद्वान् योगी कविं पुराणमित्यादिलक्षणं तं परं पुरुषं उपैति प्रतिपद्यते दिव्यं द्योतनात्मकं॥१०॥ ॥

यकं त्वलंबितस्तनसदृशं मांसखंडप्रायं तेनाध्वना भ्रुवोर्मध्ये तमावेश्य ऽप्रमादवान् ब्रह्मरंध्रान्निःक्रम्य कविं पुराणमि
त्यादिविशेषणं परमपुरुषमुपगच्छतीत्यर्थः॥ भूमिजयक्रमेणेत्यत्र भूम्यादीनां पंचानां भूतानां जयो वशीकरणं तस्य
तस्य भूतस्य स्वाधीनत्वे एवं वैशिष्ट्यं तत्तद्द्वारेणैत्येतदुच्यते सतमित्यादि व्याचष्टे॥ स एवमिति॥१०॥ श्रीरामचंद्राय नमः॥

येनकेनचिन्मंत्रादिनाध्यानकाले भगवदनुस्मरणे प्राप्ते तस्याभिधानं निर्णयितुमनुस्मर्त्तव्यत्वेन प्रकृतपरमपुरुषस्य त्रैविद्यवृद्ध
प्रसिद्ध्या प्रामाणिकत्वमाह। पुनरपीति उपायो वक्ष्यमाण ओंकारः अविषये प्रतीचि ब्रह्मणि वेदार्थविदामपि कथं वचनमि
त्याशंक्याविषयत्वमस्त्येवेति मत्वा श्रुतिमुदाहरति तद्वा इति तथापि तस्मिन्नविषये सर्वविशेषशून्ये वचनमनुचितमित्याशं

योगमार्गानुगमनेनैव ब्रह्मविद्यामंतरेणापि ब्रह्म प्राप्यत इत्येवं प्राप्त इदमुच्यते। पुनरपि वक्ष्यमाणेनोपायेन प्रति
पित्सितस्य ब्रह्मणो वेदविद्वदनादिना विशेषणविशेष्यस्याभिधानं करोति भगवान्। यदक्षरं न क्षरतीति अविना
शि वेदविदो वेदार्थज्ञाः वदंति तद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंतीति श्रुतेः सर्वविशेषनिवर्त्तकत्वेनाभिवदंति

॥ यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः। यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥११॥

अस्थूलमनण्वह्रस्वमदीर्घमित्यादि किंच विशंति प्रविशंति सम्यग्दर्शनप्राप्तौ यद्यतयो यतनशीलाः संन्यासि
नो वीतरागाः विगतो रागो येभ्यस्ते वीतरागाः यच्चाक्षरमिच्छंतो ज्ञातुमिति वाक्यशेषः ब्रह्मचर्यं गुरौ चरंति तत्ते पदं तदक्षरा
ख्यं ब्रह्माख्यं पदनीयं ते तव संग्रहेण संग्रहः संक्षेपः तेन संक्षेपेण प्रवक्ष्ये कथयिष्यामि ॥११॥ ॥श्रीः॥ ॥

क्वाह। सर्वैति। न केवलं विद्वदनुभवसिद्धं यथोक्तं ब्रह्म किंतु मुक्तोपसृप्यतया मुक्तानामपि प्रसिद्धमित्याह। किंचेति
॥ तेषां पुनः संन्यासित्वं तदाह। वीतरागा इति। ज्ञानार्थं ब्रह्मचर्यविधानादपि ब्रह्मज्ञेयत्वेन प्रसिद्धमित्याह। यदिति
॥ कथं तर्हि यथोक्तं ब्रह्म ज्ञातुं शक्यमित्याकुलितचेतसमर्जुनं प्रत्याह तत्ते पदमिति ॥११॥ श्रीरामायनमः ॥ ॥

वक्ष्यमाणेनोपायेनेत्युक्तं व्यक्तीकुर्वन्नोंकारद्वाराब्रह्मोपासनं श्रुत्युक्तमनुक्रामति॥ स यो ह वेति॥ सत्यकामेनाभिध्यानफलं जिज्ञासुना
भगवन्निति पिप्पलादः संबोध्याभिमुखीक्रियते निपातौ तु प्रसिद्धमर्थमवद्योतयंतावभिध्यानस्य फलवत्त्वेन कर्त्तव्यत्वमावेदय
तः मनुष्येषु मध्ये यो धिकृतो मनुष्यस्तत्प्रसिद्धमभिध्यानं यथा सिध्यति॥ तथा सर्ववेदसारभूतमोंकारमाभिमुख्येन ध्यायी
तत तत्त्वाभिध्यानमाप्रायणादिति न्यायेन मरणांतमनुष्टेयं स नैवमनुतिष्टन् प्रकृतेनाभिध्यानेन लोकानां जेतव्यानां बहु
त्वात्कतमं लोकं जयतीति प्रश्नं पृष्टवते सत्यकामाय पिप्पलादनामा किलाचार्यः प्रतिवचनं प्रोवाचेत्यत्र प्रथममभिध्ये

स यो ह वै तद्भगवन्मनुष्येषु प्रायणांतमोंकारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति तस्मै स होवाच एत
द्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः इत्युपक्रम्य यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्या
यीत इत्यादिना वचनेनान्यत्र धर्मादन्यत्राधर्मादिति चोपक्रम्य सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि
च यद्वदंति यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतदित्यादिभिश्च वचनैः॥ ॥

यमोंकारं परापरब्रह्मत्वेन स्वीकरोत्येतद्वा इति त्रिमात्रेणाकारोकारमकारात्मनेति यावत्। यो भिध्यायीत तत एव सो भि
ध्यातं पुरुषमधिगच्छतीत्यादिवचनेनोपासनमोंकारस्योक्तमित्यर्थः॥ प्रकृतश्रुतिवत्कठवल्लीवचनं तत्रैवार्थे प्रवृत्तमित्या
ह॥ अन्यत्रेति॥ अव्यवधानेनोपनिषदां व्यवधानेन च कर्मश्रुतीनां परस्मिन्नात्मनि पर्यवसानं दर्शयति॥ सर्वे इति॥
तपसामपि सर्वेषां चित्तशुद्धिद्वारा तत्रैव पर्यवसानमित्याह॥ तपांसीति॥ तस्यैव च ज्ञानार्थमंगं ब्रह्मचर्यं तत्र तत्र विहि
तमित्याह॥ यदिच्छंत इति॥ तस्य पदनीयस्य ब्रह्मणः संक्षेपेण कथनमोंकारद्वारकमिति॥ ओमित्येतदिति॥ ॥ ॥

उदाहृतवचनानां तात्पर्यं दर्शयति ॥ परस्येति तस्य वाचकरूपेण प्रतीकरूपेण वा विवक्षितस्योंकारस्योपासनं यच्योक्तैर्वचनैरुक्तमि
तिसंबंधः ननु परस्मिन्ब्रह्मणि तत्त्वमस्यादिवाक्यादेव प्रतिपत्तिरधिकारिणो भविष्यति किमित्युपासनमोंकारस्योपन्यस्यते तत
त्राह परेति यद्यपि विशिष्टस्याधिकारिणो विनैवोपासनमुपनिषद्भ्यो ब्रह्मणि प्रतिपत्तिरुत्पद्यते तथापि मंदानां मध्यमानां तद्बु
हेतुत्वेनोंकारो विवक्षितस्तस्योपासनं ब्रह्मदृष्ट्या श्रुतिभिरुपदिष्टमित्यर्थः तस्य क्रममुक्तिफलत्वादनुष्ठेयत्वं सूचयति ॥ कालां

परस्य ब्रह्मणो वाचकरूपेण प्रतिमावत्प्रतीकरूपेण च परब्रह्मप्रतिपत्तिसाधनत्वेन मंदमध्यमबुद्धीनां विवक्षितस्योंका
रस्योपासनं कालांतरमुक्तिफलमुक्तं यत्तदेवेहापि कविं पुराणमनुशासितारं यदक्षरं वेदविदो वदंतीति चोपन्यस्य पर
स्य ब्रह्मणः पूर्वोक्तरूपेण प्रतिपत्त्युपायभूतस्योंकारस्य कालांतरमुक्तिफलमुपासनं योगधारणासहितं वक्तव्यं
प्रसक्तानुप्रसक्तं च यत्तु किंचिदित्येवमर्थ उत्तरो ग्रंथ आरभ्यते ॥ श्रीरामचंद्राय नमः ॥ ॥

तरेति भवत्वेवं श्रुतीनां प्रवृत्तिस्तावता प्रकृते किमायातमित्याशंक्याह यदिति तदेवेहापि वक्तव्यमित्युत्तरेण संबंधः उपासनमे
वोपास्योपन्यासद्वारा स्फोरयति कविमित्यादिना ॥ पूर्वोक्तरूपेणेत्यभिधानत्वेन प्रतीकत्वेन वेत्यर्थः श्रौतस्योपासनस्यानूद्य
मानस्य सोपस्कारत्वं संगिरते योगेति तर्हि कथमनन्यचेताः सततमित्यादि वक्ष्यते तत्राह प्रसक्तेति ओंकारोपासनं प्रसक्तं त
दनंतरं तत्फलमनुप्रसक्तं तत्द्वारा वा पुनरावृत्त्यादि वक्तव्यकोटिनिविष्टमित्यर्थः इत्येवमर्थ इति ॥ ॥

श्रोत्रादीनांकुत्रद्वारत्वंतत्राह। उपलब्धाविति। तेषांसंयमनंविषयेषुप्रवृत्तानांदोषदर्शनद्वारातेभ्योवैमुख्यापादनं। कोयंमनसोहृदयेनिरोधस्तत्राह। निःप्रचारमिति मनसोविषयाकारांवृत्तिंनिरुध्यहृदिवशीकृतस्यकार्यंदर्शयति। तत्रेति। ऊर्द्ध्वमित्यत्रापिहृदयादिति

सर्वद्वाराणिसर्वाणिचतानिद्वाराणि उपलब्धौतानिसर्वाणिसंयम्यसंयमनंकृत्वामनोहृदिहृदयपुंडरीकेनिरुध्यनिरोधंकृत्वानिःप्रचारमापाद्यतत्रवशीकृतेनमनसाहृदयादूर्द्ध्वगामिन्यानाड्योर्द्ध्वमा

सर्वद्वाराणिसंयम्यमनोहृदिनिरुध्यच। मूर्ध्न्याधायात्मनःप्राणमास्थितोयोगधारणां॥१२॥

रुह्यमूर्द्ध्निआधायात्मनःप्राणमास्थितःप्रवृत्तोयोगधारणांधारयितुं॥१२॥ श्रीः॥ ॥

संबध्यतेसर्वाण्युपलब्धेर्द्वाराणिश्रोत्रादीनिसन्निरुध्यवायुमपिसर्वतोनिगृह्यहृदयमानीयततोनिर्गतयासुषुम्णयाकंठभ्रूमध्यललाटक्रमेणप्राणंमूर्द्ध्न्याधाययोगधारणामारूढोब्रह्मव्याहरन्मांचतदर्थभूतमनुस्मरन्परमांगतिंयातीतिसंबंधः

यथोक्तयोगधारणार्थं प्रसक्तो मूर्द्ध्नि प्राणमाधाय धारयन् किं कुर्यादित्याशंक्यानंतरश्लोकमवतारयति ॥ तत्रैवेति ॥ एकं च तदक्ष
रं चेति एकाक्षरमोमित्येव तत् कथं ब्रह्मेति विशेष्यते तत्राह ॥ ब्रह्मण इति ॥ यः प्रयातीति मरणमुत्क्रान्त्या त्यजन् यः देहमिति ब्रुवता

तत्रैव धारयन् ॥ ॐमित्येकाक्षरं ब्रह्म ब्रह्मणोऽभिधानभूतं ॐकारं व्याहरन् उच्चरन् तदर्थभूतं मामीश्वरमनु
स्मरन् ॥ अनुचिंतयन् प्रयाति म्रियते स त्यजन् परित्यजन् देहं शरीरं त्यजन्निति प्रयाणविशेषणार्थं देहत्यागेन

ॐमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ॥ यः प्रयाति त्यजन्देहं स याति परमां गतिं ॥ १३ ॥

प्रयाणमात्मनो न स्वरूपनाशेनेत्यर्थः ॥ स एवं त्यजन् यः प्रयाति गच्छति परमां प्रकृष्टां गतिं ॥ १३ ॥ ॥ ॥

पुनरुक्तिराश्रितास्यादित्याशंक्य विशेषणार्थं विवृणोति ॥ देहेति ॥ एवमोंकारमुच्चारयन्नर्थं त्वभिध्यायन् ध्याननिष्ठः स
स पुमानित्यर्थः ॥ परमामिति ॥ गतिविशेषणं क्रममुक्तिविवक्षया द्रष्टव्यं ॥ १३ ॥ ॥ श्रीरामचंद्राय नमो नमः ॥

ननु वायुनिरोधविधुराणामुदितयारीत्या स्वेच्छया प्रयुक्तोत्क्रमणासंभवात् दुर्लभा परमा गतिराप्नेदिति तत्राह। किंचेति। इतश्च भगवदनुस्मरणे प्रयतितव्यमित्यर्थः। सततं नित्यश इति विशेषणयोरपुनरुक्तत्वमाह। सततमित्यादिना। उक्तमेवार्थं पौन

किंच अनन्यचेताः नान्यविषयं चेतो यस्य सोयमनन्यचेता योगी सततं सर्वदा यो मां परमेश्वरं स्मरति नित्यशः सततमिति नैरंतर्यमुच्यते नित्यश इति दीर्घकालत्वमुच्यते न षण्मासान्संवत्सरं वा किं तर्हि यावज्जीवं नैरंतर्येण यो मां स्मर

अनन्यचेताः सततं यो मां स्मरति नित्यशः। तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः १४ ॥

तीत्यर्थः तस्य योगिनोहं सुलभः सुखेन लभ्यः पार्थ नित्ययुक्तस्य समाहितस्य योगिनः यत एवमतोऽनन्यचेताः सन्मयि सदा स

माहितो भवेत्॥ १४

रुक्त्यं व्यक्तीकरोति। नेत्यादिना। जितासुरिच्छया देहं त्यजतीति तदितरस्तु कर्मक्षये णैवेति विशेषणं विवक्षन्नाह। यत इति। १४

अनन्यचेतसंसमाहितचित्तंप्रतीश्वरस्यसौलभ्यमेवनपृच्छति किंतुत्वांप्राप्तास्तत्रैवावतिष्ठंते किंवापुनरावर्त्तंतेवा चंद्रलोका
दिवेतिसंदेहात्पृच्छति ॥ तवेति ॥ तत्रोत्तरश्लोकेननिश्चयंदर्शयति ॥ उच्यतइति ईश्वरोपगमनंनसामीप्यमात्रमितिव्याचष्टे ॥

तवसौलभ्येनकिंस्यादित्युच्यते शृणुतन्ममसौलभ्येनयद्भवति ॥ मामीश्वरमुपेत्यमद्भावमापद्यपुनर्जन्मपुनरुत्पत्तिंना
प्नुवंति ॥ किंविशिष्टंपुनर्जन्मनाप्नुवंतितद्विशेषणमाह दुःखालयंदुःखादीनामाध्यात्मिकादीनामालयमाश्रयमा

मामुपेत्यपुनर्ज्जन्मदुःखालयमशाश्वतं ॥ नाप्नुवंतिमहात्मानःसंसिद्धिंपरमांगताः ॥ १५ ॥

लीयंतेयस्मिन्दुःखानितत्दुःखालयंजन्मनकेवलंदुःखालयंअशाश्वतंअनवस्थितस्वरूपंचनप्राप्नुवंतीदृशंपु
नर्जन्ममहात्मानोयतयःसंसिद्धिंमोक्षाख्यांपरमांप्रकृष्टांगताःप्राप्ताःयेपुनर्मांनप्राप्नुवंतितेपुनरावर्त्तंते ॥ १५ ॥

मद्भावमिति ॥ पुनर्जन्मनोऽनिष्टत्वंप्रश्नद्वारास्पष्टयति ॥ किमित्यादिना ॥ महात्मत्वंप्रकृष्टसत्त्ववैशिष्ट्यंयतयस्तस्मिन्नेवेश्वरे
समुत्पन्नसम्यग्दर्शनाभूत्वेतिशेषः भगवंतमुपगतानामपुनरावृत्तौतत्तोविमुखानामनुपजातसम्यग्धियांपुनरावृत्तिरर्थ

॥ गी॰भा॰ ॥
॥ २१७ ॥

अपामसोममभृता अभूमेतिश्रुतेः ॥ स्वर्गादिगतानामपिसमानैवानावृत्तिरिति शंकते ॥ किंपुनरिति ॥ अर्थवादश्रुतौ कर्मिणा ममृतत्वस्यापेक्षिकत्वंविवक्षितंपरिहरत्युच्यतेति ॥ एतेन भूरादिलोकचतुष्टयं प्रविष्टानांपुनरावृत्तावपिजनादिलोकत्रयं प्राप्तानामपुनरावृत्तिरिति विभागोक्तिरप्रामाणिकत्वादवहेयेत्यवधेयं ॥ तर्हितद्वदेवपरं प्राप्तानामपिपुनरावृत्तिः शंक्यतेनेत्या

किंपुनस्त्वत्तो अन्यतः प्राप्ताः पुनरावर्त्तंतइत्युच्यते ॥ आब्रह्मभुवनाद्भवंत्यस्मिन् भूतानीति भुवनंब्रह्मणो भुवनंब्रह्मभुवनंब्रह्मलोकइत्यर्थः ॥ आब्रह्मभुवनात्सहब्रह्मभुवनेनलोकाः सर्वेपुनरावर्त्तिनः पुनरावर्त्तनस्वभावाः हे अर्जुनमा

आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन ॥ मामुपेत्यतुकौंतेयपुनर्जन्मनविद्यते ॥ १६ ॥

मेकमुपेत्यतु हेकौंतेयपुनर्जन्मपुनरुत्पत्तिर्नविद्यतेब्रह्मलोकसहितालोकाः कस्मात्पुनरावर्त्तिनः कालपरिच्छिन्नत्वा

हमामिति ॥ यावत्संपातश्रुतिवदीश्वरंप्राप्तानां निवृत्ताविद्यानांपुनरावृत्तिरप्रामाणिकीत्यर्थः ॥ यस्यस्वाभाविकीवंशप्रयुक्ता चशुद्धिस्तस्यैवोक्तेऽर्थेबुद्धिरुदेतीतिमत्वासंबुद्धिद्वयं ॥ ब्रह्मलोकसहितानांपुनरावृत्तौहेतुंप्रश्नद्वारादर्शयति ॥ ब्रह्मेति ॥ १६ ॥

॥ आ॰टी॰ ॥
॥ ८ ॥

॥ शिव ॥
॥ २१७ ॥

उक्तमेव हेतुमाकांक्षापूर्वकमुत्तरश्लोकेन साधयति। कथमित्यादिना यथोक्ता होरात्रावयवमासर्त्वयनसंवत्सरावयवशतसंख्यापरिच्छिन्नत्वात्प्रजापतेस्तदंतर्वर्त्तिनामपि लोकानां यथायोग्यकालपरिच्छिन्नत्वेन पुनरावृत्तिरित्यभिप्रेत्य व्याचष्टे। सहस्रेत्यादिना। अक्षरार्थमुक्त्वा तात्पर्यार्थमाह। यत इति। १७। यत्प्रजापतेरहस्तद्युगसहस्रपरिमितं या च तस्य रात्रिः सापि तथेति कालविदामभिप्रायमनुसृत्य

कथं। सहस्रयुगपर्यंतं सहस्राणि युगानि पर्यंतः पर्यवसानं यस्याहस्तदहः सहस्रयुगपर्यंतं ब्रह्मणः प्रजापतेर्विराजो विदुः रात्रिमपि युगसहस्रांतां अहःपरिमाणामेव के विदुरित्याह। तेऽहोरात्रविदः ये कालसंख्याविदो जना इत्यर्थः। यत एवं कालपरिच्छिन्नाते अतः पुनरावर्त्तिनो लोकाः। १७। प्रजापतेः अहनि यद्भवति रात्रौ च तदुच्यते। अव्यक्ताद्व्यक्तं प्रजापतेः स्वापावस्थात्स्माद्व्यक्ता

सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः। रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः। १७। अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे। रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके। १८।

व्यक्तयः स्थावरजंगमलक्षणाः सर्वाः प्रजाः प्रभवंति अभिव्यज्यंते। अह्न आगमोऽहरागमस्तस्मिन्नहरागमे काले ब्रह्मणः प्रबोधकाले तथा रात्र्यागमे ब्रह्मणः स्वापकाले प्रलीयंते सर्वा व्यक्तयस्तत्रैव पूर्वोक्ते अव्यक्तसंज्ञके। १८। ॥

ब्राह्मस्याहोरात्रस्य कालपरिमाणं दर्शयित्वा तत्रैव विभज्य कार्यं कथयति। प्रजापतेरिति। अव्यक्तमव्याकृतमिति शंकां वारयति॥ अव्यक्तमित्यादिना। जातिप्रतियोगिभूता व्यक्तीर्व्यावर्त्तयति। स्थावरेति। असदुत्पत्तिप्रसक्तिं प्रत्यादिशति। अभिव्यज्यंत इति। पूर्वोक्तमव्यक्तसंज्ञकं स्वापावस्थं ब्रह्म प्रजापतिशब्दितं तस्मिन्निति यावत्। १८। श्री रामचंद्राय नमः। श्री रामाय नमः॥ श्री रामचंद्राय नमः॥

ननु प्रबोधकाले ब्रह्मणो यो भूतग्रामो भूत्वा तस्यैव स्वापकाले विलीयते तस्मादन्यो भूयो ब्रह्मणो ह रागमे भूत्वा पुनरा त्र्यागमे परवशो विनश्यतीति देवं प्र
सर्वांतरकल्पे भूतग्रामविभागो भवेदित्याशंक्यानंतरश्लोकतात्पर्यमाह ॥ अकृतेति ॥ प्रतिकल्पं प्राणिनिकायस्याभिनवत्वे सत्यकृताभ्यागमादि
दोषप्रसंगात्तत्परिहारार्थं भूतग्रामस्य प्रतिकल्पमैक्यमास्थेयमित्यर्थः ॥ यदि स्थावरजंगमलक्षणस्य प्राणिवर्गस्य प्रतिकल्पमन्यथात्वं तदैकस्यैवं
धमोक्षान्वयिनोऽभावात्कांउद्वयात्मनो बंधमोक्षार्थस्य शास्त्रस्य प्रवृत्तिरफला प्रसज्येत तस्मात्तत्साफल्यार्थमिति प्रतिकल्पं प्राणिवर्गस्य नवी
नतानुपपत्तिरित्याह ॥ बंधेति ॥ कथं पुनर्भूतसमुदायोऽस्वतंत्रः सन्नवशो भूत्वा प्रविलीयते तत्राह ॥ अविद्यादीति ॥ आदिशब्देनाऽस्मितारागा

अकृताभ्यागमकृतविप्रणाशदोषपरिहारार्थं बंधमोक्षशास्त्रप्रवृत्तिसाफल्यदर्शनार्थमविद्यादिक्लेशमूलकर्माशयराशिवशा
द्वावशो भूतग्रामो भूत्वा भूत्वा प्रलीयत इत्यतः संसारवैराग्यप्रदर्शनार्थं चेदमाह ॥ भूतग्रामो भूतसमुदायः स्थावरजंगमलक्षणो यः पूर्वस्मि

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥ श्रीः ॥

न्कल्पे आसीत्स एवायं नान्यो भूत्वा भूत्वाऽहरागमे प्रलीयते पुनः पुनः रात्र्यागमेऽह्नः क्षयेऽवशोऽस्वतंत्र एव पार्थ प्रभवति जायते स एवम

रागमे ॥ ७९ ॥

द्वेषाभिनिवेशा गृह्यंते यथोक्तं क्लेशपंचकं मूलं प्रतिलभ्य धर्माधर्मात्मककर्मराशिरुद्भवतीति ॥ तद्वशादेवास्वतंत्रो भूतसमुदायो जन्मविना
शावनुभवतीत्यर्थः ॥ प्राणिनिकायस्य जन्मनाशाभ्यासोक्तेरर्थसिद्धमर्थमाह ॥ इत्यत इति ॥ संसारे विपरिवर्त्तमानानां प्राणिनामस्वातंत्र्याद्वशा
नामेव जन्ममरणप्रबंधाद्दलमनेन संसारेणेति वैतृष्ण्यं तस्मिन्प्रदर्शनीयं तदर्थं चेदं भूतानामहोरात्रमावृत्तिवचनमित्यर्थः ॥ समनंतरवा
क्यमिदमापरामृश्यते रात्र्यागमे प्रलयमनुभवतोऽहरागमे च प्रभवं प्रतिपद्यमानस्य प्राणिवर्गस्य तुल्यं पारवश्यमित्याशयवानाह ॥ भूत इति ॥ १९ ॥

अक्षरं ब्रह्म परममित्युपक्रम्य तदनुपयुक्तं किमिदमन्यदुक्तमित्याशंक्य तदनन्तरमनूद्यानंतरग्रंथसंगतिमाह। यदुपन्यस्तमिति। अक्षरस्व
रूपे निर्दिदिक्षिते तस्मिन्पूर्वोक्तयोगमार्गस्य कथमुपयोगः स्यादित्याशंक्य तत्प्राप्त्युपायत्वेनेत्याह। अनेनेति। गंतव्यमिति योगमा
र्गोक्तिरुपयुक्तेति शेषः। पूर्वोक्तादव्यक्तादिति संबंधः। परशब्दस्यव्यतिरिक्तविषयत्वे तुशब्देन वैलक्षण्यमुक्तं पुनरन्यशब्दप्रयोगात्पौ
नरुक्त्यमित्याशंक्याह। व्यतिरिक्तत्वइति। तुद्योतितं वैलक्ष्यण्यमन्यशब्देन प्रकटितं यतो भिन्नेष्वपि भावभेदेषु सालक्षण्यमा

यदुपन्यस्तमक्षरं तस्य प्राप्त्युपायो निर्दिष्टः ॐमित्येकाक्षरं ब्रह्मेत्यादिना। अथेदानीमक्षरस्यैव स्वरूपं निर्दिदिक्षया इ
दमुच्यते तदनेन योगमार्गेणेदं गंतव्यमिति। परो व्यतिरिक्तो भिन्नः कुतस्तस्मात्पूर्वोक्तादव्यक्तात् तुशब्दो ऽक्षरस्यवि
वक्षितस्याव्यक्ताद्वैलक्षण्यविशेषणार्थः। भावो ऽक्षराख्यं परंब्रह्म व्यतिरिक्तत्वे सत्यपि सालक्षण्यप्रसंगो ऽस्तीति तद्विनि

परस्तस्मात्तु भावो ऽन्यो ऽव्यक्तो ऽव्यक्तात्सनातनः। यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति २०॥

वृत्त्यर्थमाह। अन्यइति। अन्यो विलक्षणः स चाव्यक्तो ऽनिंद्रियगोचरः परस्तस्मादित्युक्तं कस्मात्पुनः परः पूर्वोक्तात्भूतग्रा
मबीजभूतात् अविद्यालक्षणात् अव्यक्तादन्यो विलक्षणो जातइत्यभिप्रायः सनातनश्चिरंतनो यः स भावः सर्वेषु भूतेषु
लक्ष्यते तथाव्यक्ताद्भिन्नत्वेपि ब्रह्मणस्तेन सादृश्यमाशंक्यते तन्निवृत्त्यर्थमन्यपदमित्य ब्रह्मादिषु नश्यत्सु न विनश्यति २०
र्थः। यद्वा परशब्दस्य प्रकृष्टवाचिनो भावविशेषणार्थत्वे पुनरुक्तिराशंकैव नास्तीति द्रष्टव्यं अनादिभावस्याक्षरस्याविनाशित्व
मर्थसिद्धं समर्थयते। यः स भावइति। सर्वेषु विनाश्यत्सु विकारजातं पुरुषांतं विनश्यति स तु विनाशहेत्वभावान्न विनष्टुमर्हतीति

यथोक्तेऽव्यक्ते भावेश्रुतिसंमतिमाह। अव्यक्त इति। तस्य परमगतित्वं साधयति। यं प्राप्येति। योसावव्यक्तो भावोऽत्र दर्शितः स येनाक्षरं पुरुषं वेद सत्यमित्यादिश्रुतावक्षर इत्युक्तस्तं चाक्षरं भावं परमां गतिं पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरित्याद्याः श्रुतयो वेदयंतीत्याह। योसाविति। परमपुरुषस्य परमगतित्वमुक्तं व्यनक्ति। यं भावमिति। तत् विष्णोः परमं पदमिति श्रुतिं मंत्रं संवादयति। तद्धामेति। २१ नन्वव्यक्तादतिरिक्तस्य तद्विलक्षणस्य परमपुरुषस्य प्राप्तौ कश्चिदसाधारणो हेतुरेषितव्यो यस्मि

योसावव्यक्तोऽक्षर इत्युक्तस्तमेवाक्षरसंज्ञकमव्यक्तं भावमाहुः परां प्रकृष्टां गतिं यं भावं प्राप्य गता न निवर्त्तंते संसाराय तद्धाम स्थानं परमं प्रकृष्टं मम विष्णोः परमं पदमित्यर्थः। २१ तल्लब्धेरुपाय उच्यते। पुरुषः पुरि शयनात्पूर्णत्वाद्वा स परः पार्थ परो निरतिशयो यस्मा

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिं। यं प्राप्य न निवर्त्तंते तद्धाम परमं मम। २१। पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया। यस्यांतःस्थानि भूतानि येन सर्वमिदं ततं। २२। श्रीरामचंद्राय नमः॥ ॥ कार्यमिहि

पुरुषान्न परं किंचित्स भक्त्या लभ्यस्तु ज्ञानलक्षणया अनन्यया आत्मविषयया यस्य पुरुषस्यांतःस्थानि मध्यस्थानि कार्यभूतानि कारणस्यांतर्वर्तीनि भवति येन पुरुषेण सर्वमिदं जगत्ततं व्याप्तं आकाशेनेव घटादि तु शब्दो भक्तेरसाधारणोपायत्वद्योतनार्थः। २२। ॥ या

न्वेक्षापूर्वकारी तल्लेप्स्याः प्रवृत्तो विहन्योतेति तत्राह। तल्लब्धेरिति। परस्य पुरुषस्य सर्वकारणत्वं सर्वव्यापकत्वं च विशेषणद्वयं उदाहरति। यस्येति। निरतिशयत्वं विशदयति। यस्मादिति। तुशब्दोऽवधारणार्थः भक्तिर्भजनं सेवा प्रदक्षिणा प्रणामादिलक्षणा तो व्यावर्त्तयति। ज्ञानेति। उक्ताया भक्तेर्विषयतो वैशिष्ट्यमाह। अनन्ययेति। कोसौ पुरुषो यद्विषया भक्तिस्तल्लाभे पर्याप्तेत्याशंक्योत्तरार्द्धं व्याचष्टे। यस्येति। कथंभूतानां तदंतःस्थत्वं तत्राह। कार्येति। सपर्यगादिति श्रुतिमाश्रित्याह। येनेति। २२।

ननु ज्ञानायत्ता परमपुरुषप्राप्तिरुक्ता न च ज्ञानं मार्गमपेक्ष्य फलायकल्प्यते विदुषो गत्युत्क्रांतिनिषेधश्रुतेस्तथा च मार्गोक्तिरयुक्तेत्याशंक्य सगुणशरणानां तदुपदेशतोऽर्थवानित्यभिप्रेत्याह। प्रकृतानामिति। वक्तव्य इति यत्र काल इत्याद्युच्यत इति संबंधः स चेद्वक्तव्यस्तर्हि किमित्यध्यात्मादिभावेन सविशेषं ब्रह्म ध्यायतां फलाप्तये ऊर्ध्वनाडीसंबंधे देवयाने पथ्युपास्यत्वायवक्तव्ये कालो निर्दिश्यते तत्राह। विवक्षितेति। सोऽर्थो मार्गस्तदुक्तिशेषत्वेन कालोक्तिरित्यर्थः। पितृयानमार्गोपन्यासस्तर्हि किमिति कथ्यते तत्राह। आवृत्तीति

प्रकृतानां योगिनां प्रणवावेशितब्रह्मबुद्धीनां कालांतरमुक्तिभाजां ततः ब्रह्मप्रतिपत्तये उत्तरो मार्गो वक्तव्य इति यत्र काल इत्यादि विवक्षितार्थसमर्पणार्थमुच्यते आवृत्तिमार्गोपन्यास इतरमार्गस्तुत्यर्थः॥ यत्र काले प्रयाता इति व्यवहितेन संबंधः यत्र य

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः। प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ॥ २३॥ श्रीः॥ ॥

स्मिन्काले त्वनावृत्तिमपुनर्जन्म आवृत्तिं तद्विपरीतां चैव योगिनः कर्मिणश्चोच्यंते कर्मिणस्तु गुणतः कर्मयोगेन योगिनामिति विशेषणात्ते च विभज्यंते योगिनो यत्र काले प्रयाता मृता योगिनोऽनावृत्तिं यांति यत्र काले च प्रयाता मृता आवृत्तिं यांति तं कालं वक्ष्यामि

मार्गांतरस्यावृत्तिफलत्वादस्य चानावृत्तिफलत्वात्तदपेक्षया महीयानयमिति स्तुतिर्विवक्षितेति भावः। योगिन इति ध्यायिनां कर्मिणां च तंत्रेणाभिधानमित्याह। योगिन इति। कथं कर्मिषु योगिशब्दो वर्त्ततामित्याशंक्यानुष्ठानगुणयोगादित्याह। कर्मिणस्त्विति। गुणतो योगिन इति संबंधः। तत्रैव वाक्योपक्रमस्यानुकूल्यमाह। कर्मयोगेनेति। अवशिष्टान्यक्षराणि व्याचक्षाणो वाक्यार्थमाह। यत्रेति। योगिनो ध्यायिनोऽत्र विवक्षिताः आवृत्तावधिकृता योगिनः कर्मिण इति विभागः॥ २३॥ श्रीरामचंद्राय नमः॥ ॥

कालप्राधान्येन मार्गद्वयोपन्यासमुपक्रम्यतमेव प्रधानीकृत्य देवयानं पंथानमवतारयति तं कालमिति यथोक्तक्रमं व्याख्याय यथाश्रुतं व्याख्यास्यथ वेति कथं तर्हि देवतानामतिनेत्रीणां ग्रहणे कालप्राधान्येन निर्देशः श्लिष्यते तत्राह भूयस्त्वादिति मार्गद्वयेपि कालाद्यभिमानिनी देवता कालशब्देनोच्यते कालाभिमानिनां भूयस्त्वात्कालशब्देन सर्वासां देवतानामुपलक्षणत्वं विवक्षित्वा कालकथनमित्यर्थः यथाम्राणां भूयस्त्वाद्वियमानेष्वपि द्रुमांतरेष्वाम्रैरेव वनं निर्दिश्यते तद्वदित्युदाहरणमाह आम्रेति ननु मार्गचिह्नानां भोगभूमीनां वा तत्र छब्देरुपादान

तं कालमाह अग्निः कालाभिमानिनी देवता तथा ज्योतिर्देवतैव कालाभिमानिनी अथवा अग्निर्ज्योतिषी यथाश्रुते एते देवते भूयस्त्वात्तु निर्देशो यत्र काले तं कालमिति आम्रवनवत् तथाहर्देवता अहरभिमानिनी शुक्लः शुक्लपक्षदेवता तथा षण्मासा उत्तरायणं तत्रा

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥ श्रीरामायनमः ॥ ॥

पि देवतैव मार्गभूते तिस्थितो ऽन्यत्र न्यायस्तत्र तस्मिन्मार्गे प्रयाता गता गच्छंति ब्रह्म ब्रह्मविदो ब्रह्मोपासनपरा जनाः क्रमेणेति वाक्यशेषः न हि सद्योमुक्तिभाजां सम्यग्दर्शननिष्ठानां गतिरागतिर्वा क्वचिदस्तिन तस्य प्राणा उत्क्रामंतीति श्रुतेः ब्रह्मसंलीनप्राणा एवेति ब्रह्मभूता एव ते २४ ॥

तस्य प्राणा उ०

संभवे किमिति देवताग्रहणमित्याशंक्यातिवाहिकास्तल्लिंगादिति न्यायेन उत्तरमाह इति स्थित इति तेषामग्न्यादीनां समीपमिति सामीप्ये तत्रेति सप्तमी ब्रह्मकार्योपाधिकं परं वा ब्रह्म परं परयामुक्तपालंबनमत एव क्रमेणेत्युक्तं निर्गुणमप्रपंचं ब्रह्मास्मीति विद्यावतो व्यवच्छिनत्ति ब्रह्मोपासनेति ननु ब्रह्मशब्दस्य मुख्यार्थे परब्रह्मविदामेवेयं गतिरुच्यते न कार्यं बादरिरस्य गत्युपपत्तेरिति बादर्याधिकरणविरोधादित्या

र्थत्वा

प्रकृतं देवयानं पंथानं स्तोतुं पितृयानमुपन्यस्यति ॥ धूमइति ॥ अत्रापिमार्गेचिह्नानिभोगभूमीश्चावक्ष्यिद्यातिवाहकदेवताविषयत्वंधूमादि

धूमोरात्रिर्धूमाभिमानिनीरात्र्यभिमानिनी चदेवतातथाकृष्णःकृष्णपक्षदेवतापण्मासादक्षिणायनमितिपूर्ववद्देवते

धूमोरात्रिस्तथाकृष्णःषण्मासादक्षिणायनं ॥ तत्रचांद्रमसंज्योतिर्योगी प्राप्य निवर्त्तते ॥ २५ ॥ ॥

वतत्रचंद्रमसि भवंचांद्रमसंज्योतिः फलमिष्टादिकारीयोगीकर्मीप्राप्यभुक्तातत्क्षयादिह निवर्त्तते ॥ २५ ॥

पदानांविभजतेधूमेत्यादिना ॥ तत्रेति ॥ सप्तमी पूर्ववद्देवसामीप्यार्थाइष्टादीत्यादिशब्देनपूर्त्तदत्ते गृह्येते ॥ कृतात्ययेनुशयवानितिन्यायं

म्नयति तत्क्षयादिति ॥ २५ ॥

आरोह्यावरो हयोरभ्यासवाविनापुनः शब्देनसंसारस्यानादित्वंसूच्यते रात्र्यादौमृतानांब्रह्मविदामब्रह्मप्राप्तिशंकानिवृत्त्यर्थमभिमानिदे वताग्रहणायमार्गयोर्नित्यत्वमाह शुक्लेति ज्ञानप्रकाशकत्वादर्चिरादिप्रकाशोपलक्षितत्वाच्चशुक्लादेवयानाख्यागतिस्तदभावा त्ज्ञानप्रकाशत्वाभावाद्धूमाद्यप्रकाशोपलक्षितत्वादविद्याप्राप्यत्वाच्चकृष्णापितृयानलक्षणागतिस्तयोर्गत्योः श्रुतिस्मृतिसिद्धयोर्हि

शुक्लकृष्णेशुक्लाचकृष्णाचशुक्लकृष्णेज्ञानप्रकाशकत्वात् शुक्लातदभावात् कृष्णाएतेशुक्लकृष्णेहिगती जगतइत्यधिकृतानांज्ञानकर्मणोः नजगतः सर्वस्यैवैतेगती संभवतः शाश्वतेनित्येसंसारस्य नित्यत्वा

शुक्लकृष्णेगतीह्येतेजगतः शाश्वतेमते॥ एकयायात्यनावृत्तिमन्ययावर्ततेपुनः॥ २६॥ ॥

न्मतेभिप्रेतेतत्रैकया शुक्लयायात्यनावृत्तिमन्ययेतरयाआवर्ततेपुनर्भूयः॥ २६॥ ॥श्रीः॥ ।

शुक्ल=१

शब्दः जगच्छब्दस्यज्ञानकर्माधिकृतविषयत्वेनसंकोचेहेतुमाह नजगतइति अन्यथाज्ञानकर्मोपदेशानर्थक्यादित्यर्थः तयोर्नित्य त्वेहेतुमाह संसारस्येति मार्गयोर्यावत्संसारभावित्वेफलितमाह तत्रेति क्रममुक्तिरनावृत्तिः भूयो भोक्तव्यकर्मक्षयेशेषकर्मवश

गतेरुपास्यत्वायतद्विज्ञानंस्तौति ॥ नैते इति ॥ योगस्यमोहापोहकरत्वेफलितमाह तस्मादिति ॥ ज्ञानप्रकारमनुवदति संसारायेति ॥ मोक्षा
यक्रममुक्त्यर्थंइत्यर्थः ॥ योगीध्याननिष्ठोगतिमपिध्यायन्नैवमुह्यति केवलंकर्मदक्षिणमार्गप्रापकंकर्त्तव्यत्वेननप्रत्येतीत्यर्थः ॥

नैतेयथोक्तेसृतीमार्गौपार्थजानन्संसारायैकाऽन्यामोक्षायचेतिजानन्योगीनमुह्यतिकश्चनक

नैतेसृतीपार्थजानन्योगीमुह्यतिकश्चन ॥ तस्मात्सर्वेषुकालेषुयोगयुक्तोभवार्जुन ॥ २७ ॥

श्चिदपितस्मात्सर्वेषुकालेषुयोगयुक्तःसमाहितोभवार्जुन ॥ २७ ॥ श्रीरामचंद्रायनमः ॥ ० ॥ ॥

योगस्यापुनरावृत्तिफलत्वेनित्यकर्त्तव्यत्वंसिद्धमित्युपसंहरति ॥ तस्मादिति ॥ २७ ॥ श्रीरामायनमः ॥ श्रीरामचंद्रायनमः ॥ श्रीः ॥

श्रद्धाद्यर्थं योगं स्तौति ॥ वेदेष्विति ॥ पवित्रपाणित्वप्राङ्मुखत्वादिमाहितमध्ययनस्य सम्यक्त्वमंगोपांगोपेतत्वमनुष्ठानस्य साद्गुण्यं तप
सां शास्त्रोक्तानां सुतप्तत्वं मनोवुद्ध्याद्यैकाग्र्यपूर्वकत्वं दानस्य च सम्यक्त्वं देशकालपात्रानुगुणत्वं इदं विदित्वेत्यत्रेदं शब्दार्थमेव स्फुट
यति ॥ सप्तेति ॥ यद्यपि किं तद्ब्रह्मेत्यादावधियज्ञः कथं कोत्रेत्यत्र प्रश्नद्वयं प्रतिभासानुसारेण केश्चिदुक्तं तथापि प्रतिवचनालोचना
योद्भूतप्रतीत्यभावान्प्रकारभेदविवक्षया प्रश्नद्वयस्य प्रतिनियतत्वान्न सप्तेति विरुध्यते तेन चेदं वेदनमापातिकं किं त्वनुष्ठानप

र्यन्तं योगस्य माहात्म्यं ॥ वेदेषु सम्यगधीतेषु यज्ञेषु च साद्गुण्यानुष्ठितेषु तपःसु च सुतप्तेषु च दानेषु च सम्यग्दत्तेषु यदेतेषु पुण्यफ
लं पुण्यस्य फलं प्रदिष्टं शास्त्रेणात्येत्यतीत्य गच्छति तत्सर्वं फलजातमिदं विदित्वा सप्तप्रश्ननिरूपणद्वारेणोक्तं सम्यगवधार्यानुष्ठ

वेदेषु यज्ञेषु तपस्सु चैव दानेषु यत्पुण्यफलं प्रदिष्टं ॥ अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यं ॥२८॥

य योगी परं प्रकृष्टमैश्वरं स्थानमुपैति प्रतिपद्यते आद्यं आदौ भवं कारणं ब्रह्मेत्यर्थः ॥२८॥ इति श्रीगीताभाष्यटीकायामष्टमोऽध्यायः ॥८॥
२

र्यन्तमित्याह ॥ सम्यगिति ॥ प्रकृतो ध्याननिष्ठो योगी त्युच्यते ॥ ईश्वरं विष्णोः परमं पदं तदेवेति तस्मिन्नशेषमिति स्थानं योगानुष्ठानादशे
षफलातिशायि मोक्षलक्षणफलं क्रमेण लब्धुं शक्यमिति भावः तदेवं सप्तप्रश्नप्रतिवचनेन योगमार्गं दर्शयता ध्येयत्वेन तत्प
दार्थो व्याख्यातः ॥२८॥ ॥इति श्रीमद्भगवद्गीताटीकायामानंदगिरीटीकायामष्टमोऽध्यायः॥ ॥८॥ श्रीरामायनमः ॥

गतेनागामिनो ध्यायस्यागतार्थत्वं वर्णयितुं वृत्तमनुवदन्नस्मरति। नाडी सुषुम्णाख्या धारणाख्येनांगेन युक्तो योगो धारणायोगः सगुणः सर्वद्वारसंयमनादिगुणस्तेन सहित इत्यर्थः। तत्फलोत्तमर्थमनंतराध्यायारंभमाशंक्याह तस्य चेति। अग्निरर्चिरादिनोपलक्षितेन क्रमवता देवयानेन पथेति यावत् ज्ञानानंतरमेव यथोक्तफलला भादन्यमनेन मार्गेणेत्याशंक्याह। कालांतर इति। अर्चिरादिमार्गेण ब्र

अष्टमे नाडीद्वारेण धारणायोगः सगुण उक्तस्तस्य च फलमग्नि अर्चिरादिक्रमेण कालांतरे ब्रह्मप्राप्तिलक्षणमनावृत्तिरूपं निर्दिष्टं तत्रानेनैव प्रकारेण मोक्षप्राप्तिफलमधिगम्यते नान्यथेति तदाशंका व्यावृत्त्या इदं ब्रह्मज्ञानं वक्ष्यमाणमुक्तं च पूर्वेष्वध्या

॥श्री भगवानुवाच॥ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे। श्रीरामायनमः॥ ॥

येषु तत्त्वबुद्धौ सन्निधीकृत्येदमित्याह तु शब्दो विशेषनिर्द्धारणार्थः इदमेव तु सम्यग्ज्ञानं साक्षान्मोक्षप्राप्तिसाधनं॥ ॥ ॥

ह्मप्राप्तौ मुक्तेर्मार्गायत्तत्वान्न तस्येत्यादिश्रुति विरोधः स्यादित्याशयेनाशंकते तत्रेति। हत्तोऽर्थः सप्तम्यर्थः उक्ताशंकानिवृत्त्यर्थमनंतराध्यायमुत्थापयति। तदाशंकेति संप्रयुक्तत्वेनापरोक्षत्वाभावेऽपि पूर्वोत्तरग्रंथालोचनया बुद्धिसन्निधानादिदं शब्देन ब्रह्मज्ञानं गृहीतमित्याह। बुद्धाविति। प्रकृतात् ज्ञानात् ज्ञानस्य वैशिष्ट्यावद्योतीति तु शब्द इत्याह। तु शब्द इति। श्रीरामचंद्रायनमोनमः॥

निपातार्थमेव स्फुटयति ॥ इदमेवेति ॥ तस्मिन्नर्थे श्रुतिस्मृती दर्शयति ॥ वासुदेव इति ॥ अद्वैतज्ञानवद्द्वैतज्ञानमपि केषांचिन्मोक्षहेतुरित्याशंक्या-
ह ॥ नान्यदिति ॥ द्वैतज्ञानं मोक्षाय न क्षममित्यत्र श्रुतिमुदाहरति ॥ अथेति ॥ अविद्याप्रकरणोपक्रमार्थोऽथशब्दः अतो द्वैतादन्यथाभि-
न्नत्वेनेत्यर्थः विदुस्तत्त्वमिति शेषः ॥ द्वैतस्य दुर्निरूपत्वेन कल्पितत्वात्तत्ज्ञानं रज्जुसर्पादिज्ञानतुल्यत्वान्न क्षेमप्राप्तिहेतुरिति चका-

वासुदेवः सर्वमिति आत्मैवेदं सर्वमेकमेवाद्वितीयमित्यादिश्रुतिस्मृतिभ्यो नान्यत् ॥ अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका
भवंतीत्यादिश्रुतिभिश्च तेतु भ्यं गुह्यतमं गोप्यतमं प्रवक्ष्यामि कथयिष्यामि अनसूयवे असूयारहिताय असूया गुणेषु दोषाविः करणं तद्र-

ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥

हिताय ज्ञानाधिकृतायेत्यर्थः ॥ किं तत्ज्ञानं किंविशिष्टं विज्ञानसहितं अनुभवयुक्तं यत्ज्ञानं ज्ञात्वा मोक्ष्यसेऽशुभात्संसारबंधनात् ॥ १ ॥

रार्थः ॥ ज्ञानं ब्रह्म चैतन्यं तद्विषयं वा प्रमाणज्ञानं तस्य तेनैव विशेषितत्वानुपपत्तिमाशंक्य व्याकरोति ॥ अनुभवेति ॥ विज्ञानमनुभवः साक्षा-
त्कारस्तेन सहितमित्यर्थः ॥ उक्तज्ञानं प्राप्तस्य किं स्यादित्याशंक्याह ॥ यत्ज्ञानमिति ॥ १ ॥ श्रीरामचंद्राय नमः श्रीरामाय नमः ॥ श्रीरामचं॰

तदाभिमुख्यसिद्धयेतज्ज्ञानंस्तौति तच्चेति ब्रह्मविद्याविद्यानांराजा श्रेष्ठेत्यत्र हेतुमाह दीप्तीति कुतो ब्रह्मविद्याया विद्यांतरेभ्योदीप्त्यतिशयवत्त्वं तदाह दीप्यतेहीति दृश्यते हि विद्वदंतरेभ्यो लोके पूजातिरेकोब्रह्मविदामिति भावः उत्कृष्टतमंशुद्धिकारणंब्रह्मज्ञानमित्येतदुपपादयति अनेकेति अत्र च श्रुतिस्मृती प्रमाणयितव्ये न शास्त्रैकगम्यमिदंज्ञानं किंतु प्रत्यक्षप्रमेयमित्याह किंचेति प्रत्यक्षमवगमोमानमस्मिन्निति तथाय

तच्च राजविद्या विद्यानांराजा दीप्त्यतिशयत्वात्तद्दीप्यतेहीयमतिशयेनब्रह्मविद्यासर्वविद्यानांराजगुह्यं तथा गुह्यानांराजा पवित्रंपावनमिदमुत्तमंसर्वेषांपावनानांशुद्धिकारणानामिदंब्रह्मविज्ञानमुत्कृष्टतममनेकजन्मसहस्रसंचितमपि धर्माधर्मादिसमूलंकर्मक्षणमात्राद्भस्मीकरोति अतः किंतस्य पावनत्वं वक्तव्यं किंच प्रत्यक्षावगमंप्रत्यक्षेण सुखादेरिवावगमोयस्य तत्प्रत्यक्षावगमम

राजविद्याराजगुह्यंपवित्रमिदमुत्तमं प्रत्यक्षावगमंधर्म्यंसुसुखंकर्तुमव्ययं ॥ २ ॥

नेकगुणवतोपि धर्मविरुद्धत्वंदृष्टंनतथात्मज्ञानंधर्मविरोधि किंतु धर्म्यंधर्मादनपेतमेवमपि स्यात्तद्दुःसंपाद्यमित्यतआह सुसुखंकर्तुंयथारत्नविवेकविज्ञानंतत्रात्यायासेनान्येषांकर्मणांसुखसंपाद्यानामल्पफलत्वंदृष्टंदुःकराणांचमहाफलत्वंदृष्टमिति इदंतुसुखसंपाद्यत्वात्फलक्षयात्व्येतीतिप्राप्तेऽतआह अव्ययंनास्यफलतःकर्मवत्व्ययोस्तीत्यव्ययमतःश्रद्धेयमात्मज्ञानं ॥ २ ॥ ॥

द्वा अवगम्यते इत्यवगमः फलंप्रत्यक्षोऽवगमोस्येति दृष्टफलत्वंज्ञानस्योच्यते धर्म्यमित्येतद्व्याकरोति अनेकेति धर्म्यस्यैव तस्यत्के शसाध्यत्वमाशंक्याह एवमपीति रत्नविषयंविवेकज्ञानंसंप्रयोगादुपदेशापेक्षादनायासेनदृष्टंतथेदंब्रह्मज्ञानमित्याह यथेति अव्ययमितिविशेषणमाशंकापूर्वकंविवृणोति तत्रेत्यादिना व्यवहारभूमिःसप्तम्यर्थः ज्ञानस्याक्षयफलत्वेफलितमाह अतइति ॥ २ ॥ ॥

आत्मज्ञानाख्ये धर्मे श्रद्धावतां तन्निष्ठानां परमप्राप्तिमुक्त्वा ततो विमुखानां संसारप्राप्तिमाह। येपुनरिति। आत्मज्ञानतत्फलयोर्नास्ति

॥ ये पुनः अश्रद्दधानाः श्रद्धाविरहिताः आत्मज्ञानस्य धर्मस्यास्य स्वरूपे तत्फले च नास्तिकाः पापकारिणोऽसुराणामुपनिषद्भूतं देहमात्रात्मदर्शनमेव प्रतिपन्ना असुतृपः पुरुषाः परंतप अप्राप्य मां परमेश्वरं मत्प्राप्तौ नैवाशं

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप। अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ३ ॥

केति मत्प्राप्तिमार्गसाधनभेदभक्तिमात्रमप्यप्राप्तेत्यर्थः। निवर्तन्ते निश्चयेनावर्तन्त इत्यर्थः। क्व मृत्युसंसारवर्त्मनि मृत्युयुक्तः संसारो मृत्युसंसारस्तस्य वर्त्म नरकतिर्यगादिप्राप्तिमार्गस्तस्मिन्नेवावर्तन्त इत्यर्थः। ३ ॥

कानेव विशिनष्टि। अप्राप्येति। उक्तानामात्मभरीणां भगवत्प्राप्तिसंभावनाभावादप्राप्य मामित्यप्रसक्तप्रतिषेधः स्यादित्याशंक्याह। मत्प्राप्ताविति। ३॥

स्कृतिनिंदाभ्यां ज्ञाननिष्ठंमहीकृत्यज्ञानंव्याख्यातुमारभतेकृत्स्येति। सोपाधिकस्यव्याप्यसंभवमभिप्रेत्यविशिनष्टि ममेति। अनवछिन्नस्यभगवद्रूपस्यनिरुपाधिकत्वमेवसाधयति करणेति। व्याप्यव्यापकत्वेनजगतोभगवतश्चपरिछेदमाशंक्याह तस्मिंनिति। तथापिभगवतोभूतानांचाधाराधेयत्वेनभेदःस्यादित्याशंक्याह नहीति। निरात्मकस्यव्यवहा

॥ इतिज्ञानस्तुत्यार्जुनमभिमुखीकृत्याह मयाममयःपरोभावस्तेनततंव्याप्तंसर्वमिदंजगदव्यक्तमूर्तिना अव्यक्ताम्मूर्तिःस्वरूपंयस्यममसोहमव्यक्तमूर्त्तिस्तेनमयाऽव्यक्तमूर्त्तिनाकरणागोचरस्वरूपेणेत्यर्थः॥ तस्मिन्मय्यव्यक्तमूर्त्तौस्थितानिमत्स्थानिसर्वभूतानिब्रह्मादीनिस्थावरांतानिनहिनिरात्मकंकिंचितभूतंव्यव

मयाततमिदंसर्वंजगदव्यक्तमूर्त्तिना। मत्स्थानिसर्वभूतानिनचाहंतेष्ववस्थितः॥ ४॥

हारायकल्पते। अतोमत्स्थानिमयात्मनात्मत्वेनस्थितान्यतोमयिस्थितानीत्युच्यंते तेषांभूतानामहमेवात्मेतिअतस्तेष्ववस्थितइतिमूढबुद्धीनामवभासतेअतोऽहंब्रवीमिनचाहंतेषुभूतेषुअवस्थितोऽमूर्त्तत्वात्संश्लेषाभावेनाकाशस्याप्यंतरतमोऽहंनह्यसंसर्गिवस्तुक्वचिदाधेयभावेनावस्थितंभवति॥ ४॥ ॥ॐ॥ ॥ ॥

रानर्हत्वेफलितमाह। अतइति। ईश्वरस्यभूतात्मत्वेनतेषुस्थितिःस्यादित्याशंक्याह तेषामिति। तस्यतेषुस्थित्यभावंव्यवस्थापयति। अमूर्त्तत्वादिति। संश्लेषाभावेपिकिमितिनाधेयत्वमतआह नहीति॥ ४॥ श्रीरामायनमः॥ श्रीरामचंद्रायनमोनमः॥ ० ॥

परमेश्वरस्यास्थित्यभावेपिभूतानांतत्रस्थितिरास्थितेतिकुतोऽसंगत्वंतत्राह॥ अतएवेति॥ नचेत्यत्रचकारोवधारणार्थः॥ भूतानामी
श्वरेनैवस्थितिरित्यत्रहेतुमाह॥ पश्येति॥ आत्मनोसंगत्वंस्वरूपागतमित्यत्रप्रमाणमाह॥ तथा चेति॥ असंगश्चेदीश्वरस्तर्हि
कथंमत्स्थानि भूतानीत्युक्तंकथंचतयोक्तंनचमत्स्थानीतिविरुद्धमुदीरितमित्याशंक्याह॥ इदंचेति॥ तर्हि भूतसंबंधः
स्यादितिनेत्याह॥ नचेति॥ यथोक्तेनन्यायेनासंगत्वेनेतियावत्॥ असंगतयावस्तुतोभूतासंबंधेपिकल्पनयात

अतएवासंसर्गित्वान्ममनचमत्स्थानिभूतानिपश्यमेयोगंयुक्तिघटनंमेममैश्वरंईश्वरस्येदमैश्वरंयोगमात्मनोयाथा
त्म्यमित्यर्थः॥ तथाचश्रुतिरसंसर्गित्वादसंगतांदर्शयत्यसंगोनहिसज्जतइति इदंचैश्वर्यमन्यत्पश्यभूतभृदसंगो
पिसन्भूतानिबिभर्तिनचभूतस्थोयथोक्तेनन्यायेनदर्शितत्वात्भूतस्थत्वानुपपत्तेः कथंपुनरुच्यतेऽसौममात्मे

नचमत्स्थानिभूतानिपश्यमेयोगमैश्वरं॥ भूतभृन्नचभूतस्थोममात्माभूतभावनः॥ ५॥ ❁॥

तिविभज्यदेहादिसंघातंतस्मिन्नहंकारमध्यारोप्यलोकबुद्धिमनुसरन्व्यपदिशतिममात्मेतिनपुनरात्मनआत्माऽ
न्यइतिलोकवदविजानन्तथाभूतभावनोभूतानिभावयतिवर्द्धयत्युत्पादयतीतिभूतभावनः॥ ५॥ ❁॥

दविरोधान्नमिथोविरोधोस्तीतिभावः॥ आत्मनःसकाशादात्मनोऽन्यत्वायोगात्कुतःसंबंधोक्तिरित्याशंक्याह॥ असाविति॥
यथालोकोवस्तुतत्वमजानन्निदमारोप्यममायमितिसंबंधमनुभवति॥ नतथेहसंबंधव्यपदेशआत्मनिस्वतोभेदाभावाद
तोभेदेसत्येवलोकेसंबंधबुद्धिदर्शनाज्जामेवानुसरन्भगवानात्मनोदेहादिसंघातंविभज्याहंकारंतस्मिन्नारोप्यासौममेतिभे
दंव्यपदिशतितथाचसंघातस्यममेतिव्यपदेशात्ततोनिःकृष्टस्यस्वरूपस्यात्मशब्देननिर्देशान्नभूतस्थात्मावित्यर्थः॥ ५॥

पूर्वोक्तासंगत्वांगीकारेणैवात्मा भूतानि भावयतीत्याह। यथेति। सृष्टिस्थितिसंहाराणामसंगात्माधारत्वं मयाततमित्यादिश्लोकद्वयेनोक्तो
र्थस्तं दृष्टांतेनोपपादयन्नादौ दृष्टांतमाहेतियोजना। सदेत्युत्पत्तिस्थितिसंहारकालो गृह्यते आकाशादेर्महतोन्याधारत्वं कथमित्याशंक्या
ह। महानिति यथा सर्वगामित्वात्परिमाणतो महान्वायुराकाशे सदातिष्ठति तथाकाशादीनि महांत्यपि सर्वाणि भूतान्याकाशकल्पेपू
र्णेत्रतीच्यसंगेपरस्मिन्नात्मनि संश्लेषमंतरेण स्थितानीत्यर्थः। ६। आकाशेवाय्वादिस्थितिवदाकाशादीनि भूतानि स्थितिकाले परमेश्व

य योक्तेन श्लोकद्वयेनोक्तमर्थं दृष्टांतेनोपपादयन्नाह। यथालोकेऽकाशस्थित आकाशे स्थितो नित्यं सदा वायुः सर्वत्रग
छतीति सर्वत्रगो महान् परिमाणतस्तथाकाशवत्सर्वगते मयि असंश्लेषेणैव स्थितानि मत्स्थानीत्येवमुपधारय जानी

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान्। तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय। ६। स
र्वभूतानि कौंतेय प्रकृतिं यांति मामिकां। कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहं। ७।

हि। ६। एवं वायुराकाशइव मयि स्थितानि भूतानि स्थितिकाले सर्वभूतानि कौंतेय प्रकृतिं त्रिगुणात्मिकां अपरां यांति मा
मिकां मदीयां कल्पक्षये प्रलयकाले पुनर्भूयस्तानि भूतान्युत्पत्तिकाले कल्पादौ विसृजाम्युत्पादयाम्यहं पूर्ववत्। ७।

रे स्थितानीति चेत्तर्हि प्रलयकाले तत्तोन्यत्रतिष्ठेयुरित्याह। एवमिति। प्रकृतिशब्दस्य स्वभाववचनत्वं व्यावर्त्तयति। त्रिगुणात्मिकामिति। सा
चापरेयमिति प्रागेव सूचितेत्याह। अपरामिति। तस्याश्चेश्वराधीनत्वेनात्मत्वं त्र्यमाह। मदीयामिति। प्रलयकाले भूतानि यथोक्तां प्रकृ
तिं यांति चेदुत्पत्तिकालेपि ततस्तेषामुत्पत्तेरीश्वराधीनत्वं भूतसृष्टेर्नेत्यादित्याशंक्याह। पुनरिति। ७। ॥

तर्हि कीदृशी प्रकृतिः सा वा कथं स्रष्टा वु पृथु क्ताइत्याशंक्याह एवमिति संसारस्यानादित्वद्योतनार्थं पुनःपुनरित्युक्तं भूतसमुदायस्याविद्यास्मिताद्दिोषपरवशत्वे हेतुमाह स्वभाववशादिति ॥ यदि त्वाकृतं भूतग्रामं स्वभावादविद्यादितं त्वं विषमं विदधासि तर्हि त्वं नवविषमसृष्टिप्रयु

एवमविद्यालक्षणां प्रकृतिं स्वां स्वीयामवष्टभ्य वशीकृत्य विसृजामि पुनःपुनः प्रकृतितो जातं भूतग्रामं भूतसमुदायमिमं वर्त्तमानं कृत्स्नमवशमस्वतंत्रमविद्यादिदोषैः परवशीकृतं प्रकृतेर्वशात् स्वभाववशात् ॥ ८ ॥ तर्हि तस्य ते परमेश्वरस्य भूतग्रामं विषमं विदधतस्तन्निमित्ताभ्यां धर्माधर्माभ्यां संबंधः स्यादित्यत इदमाह भगवान् न च मामीशं तानि भूतग्रामस्य विषमविस

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनःपुनः ॥ भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥ न च मां तानि कर्माणि निबध्नंति धनंजय ॥ उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥ ॥ ॥

र्गे निमित्तानि कर्माणि निबध्नंति धनंजय तत्र कर्मणामसंबंधे कारणमाह उदासीनवत् आसीनं यथोदासीन उपेक्षकः कश्चित्तद्वदासीनमात्मनो विक्रियत्वमसक्तं फलसंगरहितमभिमानवर्जितं अहं करोमीति तेषु कर्मसु ततोऽन्यस्यापि कर्तृत्वाभिमानाभावः फलसंगाभावश्चाबंधकारणमन्यथा कर्मभिर्बध्यते मूढः कोशकारवदित्यभिप्रायः ॥ ९ ॥ ॥

क्तं धर्मादिमत्त्वमित्यनीश्वरत्वापत्तिरिति शंकते तर्हीति तत्रेति सप्तम्या परमेश्वरो गृह्यते ईश्वरस्य फलसंगाभावात्कर्तृत्वाभिमानाभावाच्च कर्मासंबंधवदीश्वरादन्यस्यापि तदुभयाभावो धर्माद्यसंबंधे कारणमित्याह अतोऽन्यस्येति यदि कर्मसु कर्तृत्वाभिमानो वा कस्यचित्स्या

ईश्वरेस्य त्वमौदासीन्यं च विरुद्धमिति शंकते । तन्नेति । पूर्वग्रंथः सप्तम्यर्थे । विरोधपरिहारार्थमुत्तरश्लोकमवतारयति । तदिति
तृतीया द्वयं समानाधिकरणमित्यभ्युपेत्य व्याचष्टे मयेत्यादिना प्रकृतिशब्दार्थमाह ममेति । तस्या अपि ज्ञानत्वं व्यावर्तयति ॥
त्रिगुणेति । पराभिप्रेतं प्रधानं व्युदस्यत्य विद्येति । साक्षित्वे प्रमाणमाह तथा चेति । मूर्तित्रयात्मनो भेदं वारयत्येक इति । अखंडं जा
ड्यं प्रत्याह देव इति आदित्यवत्तारस्थं मत्यादि शति । सर्वभूतेष्विति । किमिति तर्हि स सर्वैर्नोपलभ्यते तत्राह । गूढ इति । बुद्ध्यादिवत्स

तत्र भूतग्राममिमं विसृजाम्युदासीनवदासीनमिति च विरुद्धमुच्यत इति तत्परिहारार्थमाह मयासर्वतो दृशिमात्रस्वरूपे
णाविक्रियात्मनाध्यक्षेण मम माया त्रिगुणात्मिका विद्यालक्षणा प्रकृतिः सूयते उत्पादयति सचराचरं जगत् तथा च मंत्रवर्णः

मयाध्यक्षेण प्रकृतिः सूयते सचराचरं ॥ ॥

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति ॥

रिच्छिन्नत्वं व्यवच्छिनत्ति सर्वव्यापीति । तर्हि नभोवदनात्मकत्वं नेत्याह सर्वभूतेति । तर्हि तत्र तत्र कर्म तत्फलसंबंधित्वं स्यात्तत्रा
ह कर्मेति सर्वाधिष्ठानत्वमाह सर्वेति सर्वेषु भूतेषु सत्तास्फूर्तिप्रदत्वेन सन्निधिना वासोच्यते । न केवलं कर्मणामेवायमध्य
क्षोपि तु तत्कृतामपीत्याह साक्षीति । दर्शनकर्तृत्वशंकां शातयति । चेतेति । अद्वितीयत्वं केवलत्वं धर्माधर्मादिराहित्यमाह ॥
॥ निर्गुण इति किं बहुना निःशेषविशेषशून्यं इति चकारार्थः ॥

उदासीनस्यापीश्वरस्य साक्षित्वमात्रं निमित्तीकृत्य जगदेतत्सौनः पुन्येन सर्गसंहारावनुभवतीत्याह। हेतुनेति। कार्यवत्कारणस्यापि साक्ष्यधीना प्रवृत्तिरिति व्यक्ताव्यक्तात्मकमित्युक्तं। सर्वावस्थास्वित्यनेन सृष्टिस्थितिसंहारावस्था गृह्यंते। तथापि जगतः सर्गादिभ्यो भिन्ना प्रवृत्तिः स्वाभाविकी नेश्वरायत्तेत्याशंक्याह। दृशीति। नहि दृशाव्याप्यत्वं विना जडवर्गस्य कापि प्रवृत्तिरि

हेतुना निमित्तेनानेनाध्यक्षत्वेन हे कौंतेय जगत्सचराचरं व्यक्ताव्यक्तात्मकं विपरिवर्तते सर्वावस्थासु दृशिकर्मत्वापत्तिनिमि

हेतुनानेन कौंतेय जगद्विपरिवर्त्तते १०॥ ॥

त्ता हि जगतः सर्वा प्रवृत्तिरहमिदं भोक्ष्ये पश्यामीदं शृणोमीदं दुःखं सुखमनुभवामि। तदर्थमिदं करिष्यामि एतदर्थमिदं करिष्ये इ॥ त्याद्यामि॥

तिहि शब्दार्थः तामेव प्रवृत्तिमुदाहरत्यहमित्यादिना। भोगस्य विषयोपलंभाभावेऽसंभवान्नानाविधां विषयोपलब्धिं दर्शयति॥ पश्यामीति॥ भोगफलमिदानीं कथयति॥ सुखमिति॥ विहितप्रतिषिद्धाचरणनिमित्तं सुखं दुःखं चेत्याह॥ तदर्थमिति॥ न च विमर्शपूर्वकं विज्ञानं विनानुष्ठानमित्याह॥ इदमिति॥ इत्याद्या प्रवृत्तिरिति संबंधः॥ श्रीरामचंद्राय नमो नमः॥ ॥

सा च प्रवृत्तिः सर्वाहर्शिकर्मत्वमुररीकृत्यैव निर्दिष्टेतीत्युक्तं निगमयत्यवगतीति । तत्रैव च प्रवृत्तेरवसानमित्याह । अवगत्यवसानेति
। परस्याध्यक्षत्वमात्रेण जगद्वेष्टित्यत्र प्रमाणमाह । यो अस्येति । अस्य जगतो योऽध्यक्षो निर्विकारः स परमे प्रकृष्टे हार्दे व्योम्नि स्थि
तो दुर्विज्ञेय इत्यर्थः । ईश्वरस्य साक्षित्वमात्रेण स्रष्टृत्वे स्थिते फलितमाह । ततश्चेति । किंनिमित्ता परस्येयं सृष्टिर्न तावद्भोगार्थं परस्य
परमार्थतः भोगासंबंधित्वात्तस्य सर्वसाक्षिभूतचैतन्यमात्रत्वान्न चान्यो भोक्ता चेतनांतराभावादितरस्याभोक्तृत्वान्न

द्यवगतिनिष्ठा अवगत्यवसानैव यो अस्याध्यक्षः परमे व्योमन्नित्यादयश्च मंत्रा एतमर्थं द
र्शयंति ततश्चैकस्य देवस्य सर्वाध्यक्षभूतचैतन्यमात्रस्य परमार्थतः सर्वभोगानभिसंबं
धिनोऽन्यस्य च चेतनांतरस्याभावे भोक्तुरन्यस्याभावात् किंनिमित्तेयं सृष्टिरित्यत्र प्रश्न
प्रतिवचनेऽनुपपन्ने को अद्धा वेद क इह प्रवोचत् कुत आयाता कुत इयं विसृष्टिरित्यादिमं
त्रवर्णेभ्यो दर्शितं च भगवताऽज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतव इति ॥ १९ ॥

न सृष्टिरपवर्गार्था विबंधाभावादपवर्गविरोधित्वान्नैवं प्रश्नो वा तदनुरूपं प्रतिवचनं वा युक्तं परस्य मायानिबंधनसर्गेऽनस्यान
वकाशत्वादित्यर्थः । परस्यात्मनो दुर्विज्ञेयत्वे श्रुतिमुदाहरति । को अद्धेति तस्मिन्प्रवक्तापि संसारमंडले नास्तीत्याह क इह इति जगतः
सृष्टिकर्तृत्वेन परस्य ज्ञेयत्वमाशंक्य कूटस्थात्ततो न सृष्टिर्जातेत्याह । कुत इति । न हीयं विविधा सृष्टिरन्यस्मादपि कस्माच्चि
दुपपद्यते अन्यस्य वस्तुतोऽभावादित्याह । कुत इयमिति । कथं तर्हि सृष्टिरित्याशंक्यात्मानाधीनेत्याह । दर्शितं चेति ॥ १० ॥

सर्वाध्यक्षः सर्वभूताधिवासो नित्यमुक्तश्चेश्वरस्त्वं न हि किमिति त्वामेवात्मत्वेनाभेदेन वा सर्वे न भजंते तत्राह एवमिति ॥ विपर्ययस्त
बुद्धित्वं भगवदवज्ञायां कारणमित्याह मूढा इति ॥ भगवतो मनुष्यदेहसंबंधात्तस्मिन्विपर्यासः संभवतीत्याह मानुषीमिति ॥
अस्मदादिवद्देहे तादात्म्याभिमानं भगवतो व्यावर्त्तयति मनुष्येति ॥ भगवंतमजानतां मविवेके मूलाज्ञानं हेतुमाह परमि

एवं मां नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वजंतूनामात्मानमपि संतं अवजानंति अवज्ञां परिभवं कुर्वंति मां मूढा अविवे
किनो मानुषीं मनुष्यसंबंधिनीं तनुं देहमाश्रितं मनुष्यदेहेन व्यवहरंतमित्येतत् परं प्रकृष्टं भावं परमात्मतत्त्वमाकाशक

अवजानंति मां मूढा मानुषीं तनुमाश्रितं ॥ परं भावमजानंतो मम भूतमहेश्वरं ॥ ११ ॥

ल्पमाकाशादप्यंतरतममजानंतो मम भूतमहेश्वरं सर्वभूतानां महांतमीश्वरं स्वमात्मानं ततश्च तस्य ममावज्ञानेन नि

ति ॥ ईश्वरावज्ञानात् किं भवती त्यपेक्षायां तदवज्ञानप्रतिबद्धबुद्धयः शोच्या भवंतीत्याह ततश्चेति ॥ भगवदज्ञानादेव हेतो
रवजानंतस्ते जंतवो वराकाः शोच्याः सर्वपुरुषार्थबाह्याः स्युरिति संबंधः तत्र हेतुं सूचयति तस्येति ॥ प्रकृतस्य भगवतोऽवज्ञान
मनादरणं निंदनं वा तस्य भावनं पौनःपुन्यं तेनाहतात्तज्जनितदुरितप्रभावात् प्रतिबद्धबुद्धय इत्यर्थः ॥ ११ ॥ ॥

॥ तावानेवाकाशक ॥

भगवंतमवजानतां प्रश्नपूर्वकं शोच्यत्वं विशदयति कथमिति भगवन्निंदापराणां न कदाचिदपि प्रार्थना फलवतीत्याह ॥ इथेति ॥ ननु भगवंतं निंदतोपि नित्यं नैमित्तिकं वा कर्मानुतिष्ठंति तदनुष्ठानाच्च तेषां प्रार्थना सार्था भविष्यति नेत्याह तथेति परिभवस्तिरस्करणं अवज्ञानमनादरणं तेषामपि शास्त्रार्थविज्ञानवतां तद्वारा प्रार्थना फलवतीत्याशंक्याह तथा मोघेति तथापि यौक्तिकविवेकवशात्प्रार्थना

कथं मोघाशाः वृथा आशा आशिषो येषां ते मोघाशास्तथा मोघकर्माणो यानि चाग्निहोत्रादीनि तैरनुष्ठीयमानानि कर्माणि तानि तेषां भगवत्परिभवात्स्वात्मभूतस्यावज्ञानान्मोघान्येवेति निःफलानि कर्माणि भवंतीति मोघकर्माणस्तथा मोघज्ञाना निःफलविज्ञाना ज्ञानमपि तेषां निःफलमेव स्यात् विचेतसो विगतविवेकाश्च ते भवंतीत्यभिप्रायः किंच ते भवंति

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः १२

राक्षसीं रक्षसां प्रकृतिं स्वभावमसुराणां च प्रकृतिं मोहिनीं मोहकरीं देहात्माभिमानरूपां श्रिताः आश्रिताः छिंधि भिंधि पिब खाद परस्वमपहरेत्येवं वदनशीलाः क्रूरकर्म कुर्वाणा भवंतीत्यर्थः असुर्या नाम ते लोका इति श्रुतेः १२ श्रीः ॥

साफल्यमित्याशंक्याह विचेतस इति न केवलमुक्तविशेषणवत्त्वमेव तेषां किंतु वर्तमानदेहपातादनंतरं तत्तदति क्रूरयोनिप्राप्तिश्च निश्चितेत्याह किंचेति मोहकरीमिति प्रकृतिद्वयेपि तुल्यं विशेषणं छिंद्धि भिंधि पिब खादेति प्राणिहिंसारूपो रक्षसां स्वभावोऽसुराणां स्वभावस्तु न देहि न जुहुधि परस्वमेवापहरेत्यादिरूपः मोहो मिथ्याज्ञानं उक्तमेव स्फुटयति छिंधीति १२ ॥

केपुनर्भगवंतं भजंते तत्राह ॥ येपुनरिति ॥ महान् प्रकृष्टो यज्ञादिभिः शोधितः आत्मा सत्वमेषामिति व्युत्पत्तिमाश्रित्याह ॥ अक्षुद्रेति ॥ तु शब्दोवधारणे प्रकृतिं विशिनष्टि ॥ शमेति ॥ अनन्यस्मिन्नव्ययभूते परस्मिन्नेव मनो येषामिति व्युत्पत्त्या व्याकरोति ॥ अनन्यचित्ता इति ॥ अज्ञाते सेवानुपपत्तेः ॥ शास्त्रोपपत्तिभ्यामादौ ज्ञात्वा ततः सेवंते इत्याह ॥ ज्ञात्वेति ॥ अव्ययमविनाशनं भजनप्रकारं पृछति

येपुनः श्रद्धानाभगवद्भक्तिलक्षणे मोक्षमार्गे प्रवृत्ताः महात्मानस्त्वक्षुद्रचित्ता मामीश्वरं हे पार्थ दैवीं देवानां प्रकृतिं शमदमदयाश्रद्धादिलक्षणामाश्रिताः संतो भजंति सेवंतेऽनन्यमनसोऽनन्यचित्ताः ज्ञात्वा मां भूतानामादिकारणमव्ययं ॥ १३ ॥ कथं

॥ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ॥ भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं ॥ १३ ॥
सततं कीर्त्तयंतो मां यतंतश्च दृढव्रताः ॥ नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४ ॥ ॥

॥ सततं सर्वदा भगवंतं ब्रह्मरूपं मां कीर्त्तयंतो यतंतश्चेंद्रियोपसंहारशमदमदयाऽहिंसादिधर्मैः प्रयतंतश्च दृढव्रता दृढं स्थिरमचाल्यं व्रतं येषां ते दृढव्रताः नमस्यंतश्च मां हृदयेशयमात्मानं भक्त्या नित्ययुक्ताः सततं उपासते सेवंते ॥ १४ ॥ ॥

कथमिति तत्प्रकारमाह ॥ सततमिति ॥ सर्वदेति श्रवणावस्था गृह्यते ॥ कीर्त्तनं वेदांतश्रवणं प्रणवजपश्च व्रतं ब्रह्मचर्यादि नमस्यंतो मां प्रति चेतसा प्रह्वीभवंतो भक्त्या परेण प्रेम्णा नित्ययुक्ताः सदा संयुक्ताः उपासते ॥ १४ ॥ श्रीरामचंद्राय नमो नमः ॥

प्रकारभेदप्रतिपित्सया पृच्छति तेकेनेति तत्प्रकारभेदोदीरणार्थं श्लोकमवतारयति उच्यत इति इज्यते पूज्यते परमेश्वरोऽनेनेति
प्रकृते ज्ञानेयज्ञशब्दः ईश्वरं चेति चकारोऽवधारणे देवतांतरध्यानत्यागमपि शब्दसूचितं दर्शयति अन्य इति अन्ये ब्रह्मज्ञानि

तेकेनकेनप्रकारेणोपासत इत्युच्यते ज्ञानयज्ञेन ज्ञानमेव भगवद्विषयं यज्ञस्तेन ज्ञानयज्ञेन यजंतः पूजयंतो मामी
श्वरं चाप्यन्ये अन्यामुपासनां परित्यज्य उपासते तत्र ज्ञानमेकत्वेन एकमेव ब्रह्मेति परमार्थदर्शनेन यजंत उपासते केचिच्च

ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते ॥ ए
कत्वेन पृथक्त्वेन बहुधा विश्वतोमुखं ॥ १५ ॥

पृथक्त्वेन आदित्यचंद्रादिभेदेन स एव भगवान्विष्णुरादित्यादिरूपेणावस्थित इत्युपासते केचिद्बहुधावस्थितः स
एव भगवान्सर्वतोमुखो विश्वतोमुखो विश्वरूप इति तं विश्वरूपं सर्वतोमुखं बहुधा बहुप्रकारेणोपासते ॥ १५ ॥

ष्ण इति यावत् ज्ञानयज्ञमेव विभजते तत्त्वेति उत्तमाधिकारिणामुपासनमुक्त्वा मध्यमाधिकारिणामुपासनप्रकारमाह ॥ के
चिच्चेति तेषामेव प्रकारांतरेणोपासनमुदीरयति केचिदिति बहुप्रकारेणादित्यादिरूपेणेतियावत् ॥ १५ ॥ ॥

भगवदेकविषयमुपासनं तर्हि न सिध्यतीति शंकते । यदीति प्रकारभेदमादाय ध्यायंतोपि भगवंतमेव ध्यायंतीति तस्य सर्वात्मकत्वादि त्याह । अत आहेति । क्रतुयज्ञशब्दयोरपौनरुक्त्यं दर्शयन्व्याचष्टे । श्रौत इति । क्रियाकारकफलजातं भगवदतिरिक्तं नास्तीति समु

यदि बहुभिः प्रकारैरुपासते कथं त्वामेवोपासत इत्यत आह । अहं क्रतुः श्रौतः कर्मभेदोऽहमेव अहं यज्ञः स्मार्त्तः किं च स्वधा अन्नमहं पितृभ्यो यद्दीयते तदहमौषधं सर्वप्राणिभिर्यदद्यते तदौषधशब्दवाच्यं अथवा स्वधेति सर्वप्राणिसाधारणमन्नमौषधमिति व्याध्युपशमार्थं भेषजं मंत्रोहं येन पितृभ्यो देवताभ्यश्च हविर्दीयतेऽहमेवाज्यं ह

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधं । मंत्रोहमहमेवाज्यमहमग्निरहं हुतं ॥ १६ ॥
पिताहमस्य जगतो माता धाता पितामहः । वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥ १७ ॥

विश्चाहमग्निर्यस्मिंश्च हूयते सोप्यग्निरहं हुतं हवनकर्म च ॥ १६ ॥ किं च ॥ पिता जनयिताहमस्य जगतो माता जनयित्री धाता कर्मफलस्य प्राणिभ्यो विधाता पितामहः ॥ पितुः पिता वेद्यं वेदितव्यं पवित्रं पावनमोंकारश्च ऋक्साम यजुरेव च ॥ १७ ॥

दार्थः ॥ १६ ॥ इतश्च भगवतः सर्वात्मकत्वमनुमंतव्यमित्याह । किं चेति ॥ पवित्रं पूयतेऽनेनेति व्युत्पत्त्यापरिशुद्धिकारणं पुण्यं कर्मे त्याह ॥ पावनमिति ॥ वेदितव्ये ब्रह्मणि वेदनसाधनमोंकारस्तत्र प्रमाणमृगादि चकारादथर्वांगिरसो गृह्यंते ॥ १७ ॥ ॥

भगवतः सर्वात्मत्वे हेत्वंतरमाह किंचेति गम्यत इति प्रकृतिलयपर्यंतं फलं गतिरित्याह कर्मेति पोष्टा धर्मफलस्यैव प्रदाता कार्यकारण
प्रपंचस्याधिष्ठानमित्याह निवास इति शीर्यंते दुःखं अस्मिन्निति व्युत्पत्तिमाश्रित्याह शरणमिति प्रभवत्यस्माज्जगदिति व्युत्पत्ति
मादायोक्तमुत्पत्तिरिति कारणस्य कथमव्ययत्वमित्याशंक्याह यावदिति कारणमंतरेणापि कार्यं कदाचिदुदेष्यति किंका

किंच गतिः कर्मफलं भर्त्ता पोष्टा प्रभुः स्वामी साक्षी प्राणिनां कृताकृतस्य निवासो यस्मिन्प्राणिनो निवसंति शरणमार्त्ता
नां मत्प्रपन्नानामार्त्तिहरः सुहृत्प्रत्युपकारानपेक्षः सन्नुपकारी प्रभवः उत्पत्तिर्जगतः प्रलयः प्रलीयते यस्मिन्निति तथा

गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधानं बीजमव्ययं ॥ १८ ॥

स्थानं तिष्ठंत्यस्मिन्निति निधानं निक्षेपः कालांतरोपभोग्यं प्राणिनां बीजं प्ररोहकारणं प्ररोहधर्मिणां अव्ययं याव
त्संसारभावित्वादव्ययं न ह्यबीजं किंचित्प्ररोहति नित्यं च प्ररोहदर्शनात् बीजसंततिर्न व्येतीति अवगम्यते ॥ १८

रणेन नेत्याह नहीति माभूत्तर्हि संसारदशायामेव कदाचित्कार्योत्पत्तिरित्याशंक्याह नित्यं चेति कारणव्यक्तेर्नाशमंगीकृ
त्य तदस्य तमव्यक्तिशून्यत्वं पूर्वकालस्य नास्तीति सिद्धवत्कृत्य विशिनष्टि बीजेति ॥ १८ ॥ श्रीरामचंद्राय नमो नमः ॥

इत्थं च सर्वात्मत्वे भगवतो न विवदितव्यमित्याह किं चेति आदित्याज्जायते वृष्टिरिति स्मृतिमवष्टभ्य व्याचष्टे कैश्चिदिति वर्षोत्सर्ग निग्रहावेकस्यैकस्मिन्काले विरुद्धावित्याशंक्याह अष्टभिरिति ऋतुभेदेन वर्षस्य निग्रहोत्सर्गावेककर्तृकावविरुद्धावित्यर्थः॥ यस्य कारणस्य संबंधित्वेन यत्कार्यमभिव्यज्यते तदिह सदित्युच्यते कारणसंबंधेनानभिव्यक्तं कारणमेवानभिव्यक्तनामरूपमसदिति व्यवह्रियते तदेतदाह सदिति शून्यवादं निरस्यति नपुनरिति भगवतोऽत्यंतासत्त्वे कार्यकारणकल्पनानिरधिष्ठा

किंच तपाम्यहमादित्यो भूत्वा कैश्चिद्रश्मिभिस्तपामि अहं कैश्चिद्रश्मिभिरुत्सृजामि उत्सृज्य पुनर्निगृह्णामि कैश्चिद्रश्मिभिरष्टभिर्मासैः पुनरुत्सृजामि प्रावृषि अमृतं चैव देवानां मृत्युश्च मर्त्यानां सत् यस्य यत्संबंधितया विद्य

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च। अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन॥१९॥

मानं तद्विपरीतमसच्चाहमर्जुन न पुनरत्यंतमेवासद्भगवान्स्वयं कार्यकारणे वा सदसती ये पूर्वोक्ते निवृत्तिप्रकारैरेकत्वपृथक्त्वादिविज्ञानैर्यज्ञैर्मां पूजयंत उपासते ज्ञानविदः ते यथाविज्ञानं मामेव प्राप्नुवंति॥१९॥

नानतिष्ठेदित्यर्थः॥ तर्हि यथाश्रुतं कार्यस्य सत्त्वं कारणस्य चासत्त्वमास्थेयमित्याशंक्य वाशब्देन निषेधति कार्येति नहि कार्यस्यात्यंतिकसत्त्वं वाचारंभश्रुते नापीतरस्यात्यंतिकासत्त्वं कुतस्तु खल्वित्यादिश्रुतेरित्यर्थः॥ उक्तैर्ज्ञानयज्ञैर्भगवदभिध्यानाभिनिविष्टबुद्धीनां किं फलमित्याशंक्य सद्यो वा क्रमेण वा मुक्तिरित्याह यइति॥१९॥ श्रीरामचंद्राय नमः॥

भगवद्भक्तानामपि निःकामानामेव मुक्तिरिति दर्शयितुं सकामानां पुंसां संसारमवतारयति येपुनरिति। तिस्रो विद्या अधीयते विदंतीति वा त्रैविद्या वेदविदस्तदाह ऋगिति। वस्वादीसादिशब्देन सवनद्वयेशाना आदित्या रुद्राश्च गृह्यंते शुद्धकिल्बिषा निरस्तपापा इतियावत्॥२०॥ तर्हि स्वर्गप्राप्तिरपि भगवत्प्राप्तितुल्येत्याशंक्याह तेतमिति। पुण्ये स्वर्गप्राप्तिहेतावित्यावत्। प्रसिद्धार्थो हिशब्दः त्रयाणां होत्रादीनां वे ति

येपुनस्ताः कामकामाः त्रैविद्याः ऋग्यजुःसामविदः मां वस्वादिदेवरूपिणं सोमपाः सोमं पिबंतीति सोमपाः तेनैव सोमपानेन ते पूतपापाः शुद्धकिल्बिषाः यज्ञैरग्निष्टोमादिभिरिष्ट्वा पूजयित्वा स्वर्गतिं स्वर्गे गमनं स्वर्गतिस्तां स्वर्गतिं प्रार्थयंते याचंते ते च पुण्यं फलमासाद्य संप्राप्य सुरेंद्रलोकं शतक्रतोः स्थानं अश्नंति भुंजते दिव्यान् दिविभवान् अप्राकृतान्देवभोगान्देवानां भोगास्तान्देवभोगान्॥२०॥ तेतं भुक्त्वा स्वर्गलोकं विशालं विस्तीर्णं क्षीणे पुण्ये मर्त्यलोकं इमं विशंत्याविशंति हि एवं यथोक्तेन प्रकारेण त्रैधीधर्म्यं केवलं वैदिकं कर्मानुप्रपन्नाः ते गतागतं गतं चागतं च गतागतं गमनागमनं कामकामाः कामान्कामयंते इति कामकामाः लभंते गतागतमेव न तु स्वातंत्र्यं क्वचिल्लभंत इत्यर्थः॥२१॥

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ते पुण्यमासाद्य सुरेंद्रलोकमश्नंति दिव्यान्दिवि देवभोगान्॥२०॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति एवं त्रैधीधर्म्यमनुप्रपन्ना गतागतं कामकामा लभंते॥२१॥

त्रयविहितानां धर्माणां समाहारस्त्रिधर्म्यं तदेव त्रैधर्म्यं तदनुगताइतियावत्। कामकामानां गमनागमनद्वारा काम्यतत्फलाप्तिश्चेदिदमेव चेष्टितमित्याशंक्याह गतेति॥२१॥ श्रीरामचंद्रायनमोनमः॥ श्रीरामायनमः॥ श्रीरामचंद्रायनमः॥

फलमनभिसंधाय त्वामेवाराधयतां सम्यग्दर्शननिष्ठानामत्यंतनिःकामानां कथं योगक्षेमौ स्यातामित्याशंक्याह। ये पुनरिति तेषां योगक्षेमं वहामीत्युत्तरत्र संबंधः। येभ्योऽन्यो न विद्यत इति व्युत्पत्तिमाश्रित्याह। अपृथगिति। कार्यस्यैव कारणे तादात्म्यं व्यावर्त्तयति। परमिति। अहमेव वासुदेवः सर्वात्मा न मत्तोऽन्यत्किंचिदस्तीति ज्ञात्वा तमेव प्रत्यंचं सदा ध्यायंत इत्याह। चिंतयंत इति। प्रा

ये पुनर्निःकामाः सम्यग्दर्शिनः। अनन्या अपृथग्भूताः परं देवं नारायणमात्मत्वेन गताः संतश्चिंतयंतो मां ये जनाः संन्यासिनः पर्युपासते तेषां परमार्थदर्शिनां नित्याभियुक्तानां सतताभि

॥ अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं २२

योगिनां योगक्षेमं योगोऽप्राप्तस्य प्रापणं क्षेमस्तद्रक्षणं तदुभयं वहामि प्रापयाम्यहं। ३।

कृतान्व्यावर्त्त्य मुख्यानधिकारिणो निर्दिशति। संन्यासिन इति। पर्युपासते परितः सर्वतोऽनवच्छिन्नतया पश्यंतीत्यर्थः। नित्याभियुक्तानां नित्यमनवरतमादरेण ध्याने व्यापृतानामित्याह। सततेति। योगश्च क्षेमश्च योगक्षेमं तत्रापुनरुक्तमर्थमाह। यो

किमितिपरमार्थदर्शिनां योगक्षेमंवहतीत्याशंक्याह ज्ञानीत्विति इत्यतस्तेषां योगक्षेमंवहामीति संबंधः सम्यग्दर्शननि
ष्ठानामेव योगक्षेमंवहति भगवानितिविशेषणममृष्यमाणः शंकते नन्विति अन्येषामपि भक्तानां भगवान्योगक्षे
मंवहतीत्येतदंगीकरोति सत्यमिति नर्हि भक्तेषु ज्ञानिषु च विशेषो नास्तीति पृच्छति किंत्विति तत्र विशेषं प्रतिज्ञाय विवृणो

ज्ञानीत्वात्मैव मे मतं स च मे मम प्रियो यस्मात्ते मम आत्मभूताः प्रियाश्चेति नन्वन्येषामपि भक्ता
नां योगक्षेमं वहत्येव भगवान् सत्यं एवं वहत्येव किंतु अयं विशेषोऽन्ये ये भक्तास्ते स्वयमपि योगक्षेम
मीहंतेऽनन्यदर्शिनस्तु नात्मार्थे योगक्षेममीहंते न हि ते जीविते मरणे वात्मनो गृद्धिं कुर्वंति केवल
मेव भगवच्छरणास्तेऽतो भगवानेव तेषां योगक्षेमं वहतीति २२ श्रीरामाय नमः ॥

ति अयमित्यादिना योगक्षेममुद्दिश्य स्वयमीहंते चेष्टां कुर्वंतीति यावत् आत्मविदां स्वार्थे योगक्षेममुद्दिश्य चेष्टाऽ
भावं स्पष्टयति नहीति गृद्धिरपेक्षा कामना तामित्येतत् ज्ञानिनां तर्हि सर्वत्रानास्थित्याशंक्याह केवलमिति तेषां त
देकशरणत्वे फलितमाह अत इति इतिशब्दो विशेषणशब्देन संबध्यते २२ श्रीसीतारामचंद्राय नमो नमः ॥ ॥

तत्तद्देवतात्मनापरस्यैवात्मनः स्थित्यभ्युपगमेदेवतांतराणामपिभगवच्छरणत्वाविशेषात्तदेकनिष्ठत्वमकिंचित्करमितिमन्वा

ननुन्याअपिदेवतास्त्वमेवतद्भक्ताश्चत्वामेवभजंतेसत्यमेवयेप्यन्यदेवताभक्ताअन्यासुदेवतासुभक्ताअन्यदेवताभक्ताः संतोयेयजंतेपूजयंतेश्रद्धयाआस्तिक्यबुद्ध्यान्विताअनुगतास्तेपिमामेव

येप्यन्यदेवताभक्तायजंतेश्रद्धयान्विताः तेपिमामेवकौंतेययजंत्यविधिपूर्वकं २३॥

कौंतेययजंति अविधिपूर्वकंअज्ञानपूर्वकंयजंतइत्यर्थः २३ श्रीसीतारामचंद्रायनमः ॥

नःशंकते नन्विति उक्तमंगीकृत्यपरिहरति सत्यमित्यादिना देवतांतरयाजिनांभगवद्याजिभ्योविशेषमाह अविधीति

ननुवस्वादिसेंद्रादिज्ञानपूर्वकमेवतद्भक्तास्तद्याजिनो भवंतीतिकथमविधिपूर्वकंतेषांयजनमितिशंकते कस्मादिति देवतांतरया
जिनांयजनमविधिपूर्वकमित्यत्रहेतुत्वेनश्लोकमुत्थापयति उच्यतइति सर्वेषांहिविधानांयज्ञानांवस्वादिदेवतात्वेनाहमेवभोक्ता
स्वेनांतर्यामिरूपेणप्रभुश्चाहमेवेतिप्रसिद्धमेतदितिहिशब्दात् प्रभुरेवचेत्युक्तं विष्णोति मत्स्वामिकोहीति तत्रपूर्वाध्यायगतंवाक्यं
प्रमाणयति अधियज्ञोहमिति तथापिदेवतांतरयाजिनांयजनमविधिपूर्वकमितिकुतःसिद्धंतत्राह तत्येति ममैवयज्ञेषुभोक्तृत्वे

कस्मान्नैवविधिपूर्वकंयजंतइत्युच्यतेतस्मात् अहंहिसर्वयज्ञानांश्रौतानांस्मार्तानांचसर्वेषांयज्ञानांदेवतात्मत्वेनभोक्ता
चप्रभुरेवचमत्स्वामिकोहियज्ञोऽधियज्ञोहमेवात्रचोक्तं तथानतुमामभिजानंतितत्त्वेनयथावदतश्चाविधिपूर्वकमिष्ट्वाया

अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच नतुमामभिजानंतितत्त्वेनातश्च्यवंतिते ॥२४॥

गफलात्च्यवंतिप्रच्यवंतेतेयेप्यन्यदेवताभक्तिमत्त्वेनाविधिपूर्वकंयजंतेतेषामपियागफलमवश्यंभविष्यति ॥२४॥

प्रभुत्वेचसतीतियावत्तयोर्भोक्तृप्रभ्वोर्भावस्तत्वंतेनभोक्तृत्वेनप्रभुत्वेनचमांयथावद्यतोनजानंत्यतो भोक्तृत्वादिनाममाज्ञा
नान्मय्यनर्पितकर्माणश्च्यवंतेकर्मफलादित्याह अतश्चेति यद्यन्यदेवताभक्ताभगवत्तत्वात्कर्मफलाच्च्यवंतेतर्हितेषांदेवताय
जनमकिंचित्करमित्याशंक्याह येपीति देवतांतरयाजिनामनाहत्तिफलाभावेपितद्देवतायागानुरूपफलप्राप्तिर्ध्रौव्यान्नतद

किंचित्करमित्याशंक्याह ॥२४॥

देवतांतरयाजिनामावश्यकं तत्फलमाशंकापूर्वकमुदाहरति कथमित्यादिना। नियमो व्रत्युपहारप्रदक्षिणप्रह्वीभावादिः देवतांतराराधनस्यांतवत्फलत्वमुक्त्वा भगवदाराधनस्यानंतफलत्वमाह यांतीति भगवदाराधनस्यानंतफलत्वे देवतांतराराधनमुक्त्वा भगवदाराधनमेवयुक्तमायासस्साम्यात् फलातिरेकाच्चइत्याह समानेपीति अज्ञानाधीनत्वेन देवतांतराराधनवतां फलतो न्यूनतां द

कथं यांतिगच्छंति देवव्रता देवेषु व्रतं नियमो भक्तिश्च येषां ते देवव्रता यांति देवान् पितॄन् अग्निष्वात्तादीन् यांति पितृव्रताः श्राद्धादिक्रियापराः पितृभक्ताः भूतानि विनायकमातृगणचतुर्भगिन्यादीनि यांति भूतानि भूतेज्या भूतानां पूजकाः यांति मद्याजिनो मद्यजनशीलाः वैष्णवा मांएव यांतिसमानेप्यायासेमामेव न भजंते ऽज्ञानात्तेनते ऽल्पफलभाजो भवंतीत्यर्थः

यांतिदेवव्रतादेवान्पितॄन्यांतिपितृव्रताः भूतानियांतिभूतेज्यायांतिमद्याजिनोपिमां॥२५॥ ॥पत्रं पुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति॥ तदहंभक्त्युपहृतमश्नामिप्रयतात्मनः॥२६॥ ॥ ॥

॥नकेवलंमद्भक्तानामनावृत्तिलक्षणमनंतंफलंउक्तंसुखाराधनश्चाहं॥२५॥ कथं॥ पत्रंपुष्पंफलंतोयमुदकंयोमेमह्यं भक्त्याप्रयच्छतितदहंभक्त्याउपहृतंभक्तिपूर्वंप्रापितंभक्त्युपहृतमश्नामिगृण्हामिप्रयतात्मनःशुद्धबुद्धेः॥२६॥ ॥

र्शयति तेनेति। अनंतफलत्वाद्भगवदाराधनमेवकर्त्तव्यमित्युक्तंसुकरत्वाच्चतथेत्याह नकेवलमिति॥२५॥ भगवदाराधनस्यसुकरत्वमेव प्रश्नपूर्वकंप्रपंचयति कथमित्यादिना। यद्दिपुष्पादिकंभक्तिपूर्वकंमदर्थमर्पितंतेनायंशुद्धचेतास्तपस्वीमामाराधयतीत्यहमवधा

तदाराधनस्यसुकरत्वेतदेवावश्यकमित्याह। यतइति। स्वतः शास्त्राद्वतेप्राप्तंगमनादीतियावत्‌यदश्नासियत्‌ किंचिद्वोगंभुंक्षेहवन
स्यस्वतस्त्वंवारयति। श्रौतमिति। मत्समर्पणंतत्सर्वंमह्यंसमर्पयेत्यर्थः। २७। किमतोभवतितदाह। एवमिति। भगवदर्पणबुद्ध्याकुर्वतो

यतएवमतः। यत्करोषियदाचरसिस्वतः प्राप्तंयदश्नासियच्चजुहोषिहवनंनिर्वर्त्तयसिश्रौतंस्मार्त्तंवायद्ददासिब्राह्म
णादिभ्योहिरण्यान्नाज्यादियत्तपस्यसितपश्चरसिकौंतेयतत्कुरुष्वमदर्पणंमत्समर्प्पणं। २७। एवंकुर्वतस्तवयद्भव
तितच्छृणु। शुभाशुभफलैः शुभाशुभेइष्टानिष्टेफलेयेषांतानिशुभाशुभफलानिकर्माणितैः। शुभाशुभफलैः

यत्करोषियदश्नासियज्जुहोषिददासियत्‌। यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्प्पणं। २७। शुभा
शुभफलैरेवंमोक्ष्यसेकर्मबंधनैः। संन्याससयोगयुक्तात्माविमुक्तोमामुपैष्यसि। २८। ॥

कर्मबंधनैस्तान्येवबंधनानितैः कर्मबंधनैरेवंमत्समर्प्पणंकुर्वन्मोक्ष्यसेसोयंसंन्यासयोगोनामसंन्यासश्चासौ
मत्समर्प्पणतयाकर्मकृतत्वाद्योगश्चासावितितेनसंन्यासयोगेनयुक्तआत्मांतःकरणंयस्यततस्त्वंसंन्यासयो
गयुक्तात्मासन्‌विमुक्तः कर्मबंधनैः जीवन्नेवपतितेशरीरेचमामुपैष्यसिआगमिष्यसि। २८। ॥

जीवन्मुक्तस्यप्रारब्धकर्मावसानेविदेहकैवल्यमावश्यकमित्याह। शुभेत्यादिना। भगवदर्पणकरणान्मुक्तिः संन्यासयोगा
च्चेतिसाधनद्वयमाशंक्यप्रणातयति। सोयमिति। २८।

भगवतो रागद्वेषवत्त्वेनानीश्वरत्वमाशंक्य परिहरति समोऽहमित्यादिना तर्हि भगवद्भजनम किंचित्करमित्याशंक्याह अग्निवदिति तत्र
पंचयति यथेति भक्तान भक्तांश्चानुगृण्हतोऽननुगृण्हतश्च भगवतो न कथं रागादिमत्त्वमित्याशंक्याह ये भजंतीति येवर्णाश्रमा
दिधर्मैर्मां भजंति ते तेनैव भजनेनाचिंत्यमाहात्म्येन परिशुद्धबुद्धयो मयि मत्समीपे वर्त्तंते मदभिव्यक्तियोग्यचित्ता भवंति तु शब्दोऽस्य वि
शेषस्य द्योतनार्थः तेषु तत्समीपेतेषामहमपि स्वभावतो वर्त्तमानस्तदनुग्रहपरो भवामि यथाव्यापकमपि सावित्रं तेजः स्वच्छे दर्पे

रागद्वेषवांस्तर्हि भगवान्यतो भक्तानेवानुगृण्हाति नेतरानिति तत्र समस्त्वित्यो ऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः अग्निव
दहं दूरस्थानां यथा अग्निः शीतं नापनयति समीपमुपसर्पतां शीतमपनयति तथाहं भक्ताननुगृण्हामि नेतरान् ये भजंति तु
मामीश्वरं भक्त्या मयि ते स्वभावत एव न मम रागनिमित्तं मयि वर्त्तंते तेषु चाप्यहं स्वभावत एव वर्त्ते नेतरेषु २९ नैतावता तेषु द्वेषोम

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहं २९ ॥
अपि चेत्सुदुराचारो भजते मामनन्यभाक् साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः ३०

मश्रृणु मद्भक्तेर्माहात्म्यं अपि चेद्यद्यपि सुष्टु दुराचारोऽतीव कुत्सिताचारोऽपि भजते मामनन्यभागनन्यभक्तिः सन् साधुरेव सम्यग्वृ
त्त एव स मंतव्यो ज्ञातव्यः सम्यग्यथावद्व्यवसितो हि यस्मात्साधुनिश्चयः उत्सृज्य च बाह्यां दुराचारतां अंतः सम्यग्व्यवसाय सामर्थ्यात् ३०
णादौ प्रतिफलति न तथा परमेश्वरो वर्जनीयतया भक्तिनिरस्तसमस्तकलुषसत्त्वेषु पुरुषेषु सन्निधाते दैवीं प्रकृ
तिमाश्रितस्समां भजती सुक्तत्वादिसर्थः २९ प्रकृतां भगवद्भक्तिं स्तवन् पापीयसामपि तत्राधिकारोऽस्तीति सूचयति श्रृणु विति
सम्यग्वृत्त एव भगवद्भक्तो ज्ञातव्य इत्यत्र हेतुमाह सम्यगिति हेत्वर्थमेव प्रपंचयति उत्सृज्येति ३१ ॥ ॥

भगवंतं भजमानस्य कथं दुराचारता परित्यक्ता भवतीत्याशंक्याह ॥ क्षिप्रमिति ॥ सति दुराचारे कथं धर्मे चित्तं तत्राह ॥ शश्वदिति ॥ उपशमो दुराचारादुपरमः किमिति तद्भक्तस्य दुराचारादुपरतिरुच्यते दुराचारोपहततया किमित्यसौ नो नंक्ष्यतीत्याशंक्याह ॥ शृण्विति ॥ ३१ ॥ इतश्च भ

क्षिप्रं शीघ्रं भवति धर्मात्मा धर्मे चित्त एव शश्वन्नित्यं शांतिं चोपशमं निगच्छति प्राप्नोति शृणु परमार्थं कौंतेय प्रतिजानीहि निश्चितां प्रतिज्ञां कुरु न मे मम भक्तो मयि समर्पितांतरात्मा मद्भक्तो न प्रणश्यती

क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति ॥ कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥
मां हि पार्थ व्यपाश्रित्य येपि स्युः पापयोनयः ॥ स्त्रियो वैश्यास्तथा शूद्रास्तेपि यांति परां गतिं ॥ ३२ ॥

ति ॥ ३१ ॥ किंच ॥ मां हि यस्मात्पार्थ व्यपाश्रित्य मामाश्रयत्वेन गृहीत्वा येपि स्युर्भवेयुः पयोनयः पापायोनिर्येषां पापयोनयः पापजन्मानः के तदित्याह ॥ स्त्रियो वैश्यास्तथा शूद्रास्तेपि यांति गच्छंति परां प्रकृष्टां गतिं ॥ ३२ ॥ पा

गवद्भक्तिर्विधातव्येत्याह ॥ किंचेति ॥ न मे भक्तः प्रणश्यतीत्यत्र हेतुमाचक्षाणो भक्त्यधिकारे जातिनियमो नास्तीत्याह ॥ मां हीति ॥ ३२ ॥ ॥

मदिपापयोनिः पापा वा रस्त्वद्भक्त्या परां गतिं गच्छति तर्हि किमुत्तमजातिनिमित्तत्वेन संन्यासादिना किं वा सहकृतेनेत्याशंक्याह किं पुनरिति। उत्तमजातिमतां ब्राह्मणादीनां अतिशयेन परा गतिर्यतो लभ्यते अतो भगवद्भजनं तैरेकांतेन विधातव्यमित्याह यत इति मनुष्यदेहातिरिक्तेषु पश्वादिदेहेषु भगवद्भजनयोग्यताभावात्प्राप्ते मनुष्यत्वे भगवद्भजने प्रयतितव्यमित्याह दुर्लभमिति ३३ भगवद्भक्तेरित्थं भावं पृच्छति कथमिति ई श्वरसेवायामिति कर्त्तव्यतां दर्शयति मन्मना इति एवं भगवंतं भजमानस्य मम किं स्यादित्याशंक्याह मामेवेति समाधाय भगवत्येवेति

किं पुनर्ब्राह्मणाः पुण्याः पुण्ययोनयो भक्ता राजर्षयस्तथा राजानश्च ते ऋषयश्च राजर्षयः यत एवमतोऽनित्यं क्षणभंगुरं असुखवर्जितमिमं लोकं मनुष्यलोकं प्राप्य पुरुषार्थसाधनं दुर्लभं च मनुष्यत्वं लब्ध्वा भजस्व सेवस्व मां ३३ कथं मन्मना भव मयि मनो यस्य तव स त्वं मन्म

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा। अनित्यमसुखं लोकमिमं प्राप्य भजस्व मां॥ ३३॥ मन्मना भव
मद्भक्तो मद्याजी मां नमस्कुरु। मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥ ३४॥ ॥ ॥

ना भव तथा मद्भक्तो भव मद्याजी मद्यजनशीलो भव मामेव च नमस्कुरु मामेवेश्वरमेवैष्यसि आगमिष्यसि युक्त्वा समाधाय चित्तमेवमात्मानं अहं हि सर्वेषां भूतानां आत्मा परा च गतिः परमयनं तं मामेवं भूतमेष्यसीत्यतीतेन पदेन संबंधः मत्परायणः सन्नित्यर्थः ३४॥ इति गीताभाष्ये नवमोऽध्यायः॥९॥

शेषः एवमात्मानमित्येतद्विवृणोति॥ अहं हीति॥ अहमेव परमयनं तवेति मत्परायणस्तथाभूतः सन्मामेवात्मानमेष्यसीति संबंधः तदेवं मध्यमानां ध्येयं निरूप्य नवमेनाधमानामाराध्याभिधानमुखेन निजेन पारमार्थिकेन रूपेण प्रत्यक्त्वेन ज्ञानं परमेश्वरस्य परमाराधनमित्यभिदधता सोपाधिकं तत्पदवाच्यं निरुपाधिकं च तत्पदलक्ष्यं व्याख्यातं ३४॥ ॥इति श्रीआनंदगिरीटीकायां नवमोऽध्यायः॥ ॥९॥ ॥

संन्यस्त

अध्यायद्वये सिद्धमर्थं संक्षेपतो नुभाषते ॥ सप्तम इति ॥ तत्त्वं सोपाधिकं निरुपाधिकं च विभूतयः सविशेषनिर्विशेषरूपप्रतिपत्त्युपयोगिन्यः उत्तराध्याय
स्याध्यायद्वयेन संबंधं वदन्नध्यायांतरमवतारयति ॥ अथेति ॥ वक्तव्याः सविशेषध्यानेन निर्विशेषप्रतिपत्तौ च शेषत्वेनेति शेषः ॥ ननु सविशेषं निर्वि
शेषं च भगवतो रूपं प्रागेव तत्र तत्रोक्तं तत्किमिति पुनरुच्यते तत्राह ॥ उक्तमपीति ॥ यद्यपि तत्र तत्र तत्त्वमुक्तं तथापि पुनर्वक्तव्यं दुर्विज्ञेयत्वादिति य

सप्तमेध्याये भगवतस्तत्त्वं विभूतयश्च प्रकाशिता नवमे चाथेदानीं येषु येषु भावेषु चिंत्यो भगवांस्ते ते भावा वक्तव्यास्तत्त्वं च भगव
तो वक्तव्यं उक्तमपि दुर्विज्ञेयत्वादिति अतः ॥ भूय एव भूयः पुनः महाबाहो शृणु मे मदीयं परमं प्रकृष्टं निरतिशयं वस्तुनः प्रकाश

॥ श्रीभगवानुवाच ॥ भूय एव महाबाहो शृणु मे परमं वचः ॥ यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १ ॥

कं वचो वाक्यं यत्परमं ते तुभ्यं प्रीयमाणाय मद्वचनात्प्रीयसे त्वममृतमिवाम्वृत मिव पिबंस्ततो वक्ष्यामि हितकाम्यया हितेच्छया ॥ १ ॥

तो मन्यते इति यो जना प्रकृष्टत्वं वचसः स्पष्टयति ॥ निरतिशयमिति ॥ तदेव वचो विशिनष्टि यत्परममिति ॥ सकृदुक्तेरर्थसिद्धेः सकृदुक्तिरन
र्थिकेत्याशंक्याह ॥ प्रीयमाणायेति ॥ ततो वक्ष्यामीति तुभ्यमिति पूर्वेण संबंधः ॥ १ ॥ श्रीरामाय नमः ॥ श्रीरामचंद्राय नमो नमः ॥

हितं दुर्विज्ञेयतरं ज्ञानं कश्चिदन्योपि परमं वचो मह्यं वक्ष्यतीति तेन च ममतत्त्वज्ञानं भविष्यति अतो भगवद्वचनमकिंचित्करमिति शंकित्वा परिहरति
किमर्थमित्यादिना इंद्रादयो भृग्वादयश्च भगवत्प्रभावं न विंदंतीत्यत्र प्रश्नपूर्वकं हेतुमाह कस्मादिति निमित्तत्वेनोपादानत्वेन यतो देवा

किमर्थमहं वक्ष्यामीत्यत आह न मे विदुर्न जानंति सुरगणाः किं तेन विदुः मम प्रभवं प्रभुशक्त्यतिशयं अथवा प्रभवनमु
त्पत्तिं नापि महर्षयो भृग्वादयो विदुः कस्मात्तेन विदुरित्युच्यते अहमादिः कारणं हि यस्माद्देवादीनां महर्षीणां च सर्वशः
सर्वप्रकारैः ॥ २ ॥ किंच योमामजमनादिं च यस्मादहमादिर्हि देवानां महर्षीणां च ममान्यः आदिर्न विद्यते अतोऽह

न मे विदुः सुरगणाः प्रभवं न महर्षयः अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥ यो
मामजमनादिं च वेत्ति लोकमहेश्वरं असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥ ॥

मजो अनादिश्च अनादित्वमजत्वे हेतुस्तं मामजमनादिं च यो वेत्ति विजानाति लोकमहेश्वरं लोकानां महांतमीश्वरं अ
संमूढः संमोहवर्जितः स मर्त्येषु मनुष्येषु सर्वपापैः सर्वैः पापैर्मतिपूर्वकृतैः प्रमुच्यते प्रमोक्ष्यते ॥ ३ ॥ ॥ ॥

दीनां भगवानेव हेतुरतस्तद्विकारास्तेन तस्य प्रभवं शक्तिं विदुरित्यर्थः ॥ २ ॥ इतश्च कश्चिदेव भगवत्प्रभावं वेत्तीत्याह किं चेति कोसौ प्रभावो भगवतो
यं बहवो न विदुरित्यपेक्षायां पारमार्थिकं प्रभावं तद्धीफलं च कथयति योमामिति मद्दृयापौनरुक्त्यमाह अनादित्वमिति ॥ ३ ॥
भावं २

भगवतो लोकमहेश्वरत्वे हेतुंतरमाह इतश्चेति मुमुक्षुभिराराध्यत्वसिद्धये बंधमोक्षसाधनं पुरस्कृत्याशेषजगत्प्रकृत्यधिष्ठातृत्वल
क्षणं सोपाधिकं भगवत्तभावमभिधत्ते बुद्धिरिति सूक्ष्मादीत्यादिशब्देन सूक्ष्मतरः सूक्ष्मतमश्चार्थो गृह्यते उक्तं सामर्थ्यं बुद्धिरित्यस्मिन्न

इतश्चाहं महेश्वरो लोकानां बुद्धिरंतःकरणस्य सूक्ष्माद्यर्थावबोधनसामर्थ्यं तद्वंतं हि बुद्धिमानिति हि व
दंति ज्ञानमात्मादिपदार्थानामवबोधः असंमोहः प्रत्युत्पन्नेषु बोद्धव्येषु द्रव्येषु विवेकपूर्विका मतिः प्र
वृत्तिः क्षमा आकृष्टस्य ताडितस्य चाविकृतचित्तता सत्यं यथादृष्टस्य यथाश्रुतस्य चात्मानुभवस्य पर

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः सुखं दुःखं भवो भावो भयं चाभयमेव च ॥ ४ ॥ ॥

बुद्धिसंक्रांतयेन थैवोच्चार्यमाणा वाक् सत्यमुच्यते दमो बाह्येंद्रियोपशमः शमोंऽतःकरणस्य शांतिः
सुखं आह्लादो दुःखं संतापो भव उद्भवोऽभावः तद्विपर्ययः भयं च त्रासोऽभयमेव च तद्विपरीतं ॥ ४ ॥

र्थे प्रसिद्धिं प्रमाणयति तद्वंतमिति आत्मादीति तदवबोधवंतं हि ज्ञानिनं वदंति अंतःकरणस्योपशमो विषयेभ्यो व्यावृत्तिविशेषः ॥ ४ ॥ ॥

यथाशक्तीति पात्रे श्रद्धया स्वशक्तिमनतिक्रम्यार्थानां देशकालानुगुणेन प्रतिपादनमित्यर्थः उक्तानां बुद्ध्यादीनां साश्रयाणामीश्वरादुत्पत्तिं प्रतिजानीते भवंतीति नानाविधत्वे हेतुमाह स्वकर्मेति कथंचिदपि तेषां मामात्मातिरेकेणाभावान्मत्त एवेत्युक्तं ॥५॥ न केवलं भगवतः सर्वप्रकृतित्वमेव किंतु सर्वज्ञत्वसर्वेश्वरत्वरूपमधिष्ठातृत्वमपीत्याह किंचेति आद्या भृग्वादयो वसिष्ठांताः सर्वज्ञा विद्यासंप्रदायप्रवर्तकाः तथेति मनूनामपि पूर्व

अहिंसा अपीडा प्राणिनां समता समचित्तता तुष्टिः संतोषः पर्याप्तबुद्धिर्लाभेषु तपः इंद्रियसंयमपूर्वकं शरीरपीडनं दानं यथाशक्ति संविभागः यशो धर्मनिमित्ता कीर्तिः अयशस्त्वधर्मनिमित्ता कीर्तिर्भवंति भावा यथोक्ता बुद्ध्यादयो भूतानां प्राणिनां मत्त एवेश्वरात्पृथग्विधा नानाविधाः स्वकर्मानुरूपेण ॥५॥ किंच महर्षयः सप्त भृग्वादयः पूर्वे अतीतका

अहिंसा समता तुष्टिस्तपो दानं यशो यशः ॥ भवंति भावा भूतानां मत्त एव पृथग्विधाः ॥५॥ म

हर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ॥ मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥६॥

लसंबंधिनश्चत्वारो मनवस्तथा पूर्वे सावर्णा इति प्रसिद्धास्ते च मद्भावाः मद्गतभावना वैष्णवेन सामर्थ्येनोपेताः मानसा मनसैवोत्पादिताः मया जाता उत्पन्ना येषां मनूनां महर्षीणां च सृष्टिर्लोके इमाः स्थावरजंगमाः प्रजाः ॥६॥

तेनाद्यत्वमनुकृष्यते के ते मनवस्तत्राह सावर्णा इति प्रसिद्धाः पुराणेषु प्रजानां पालकाः स्वयमीश्वराश्चेति शेषः महर्षीणां मनूनां तुल्यं विशेषणं तेचेति मयि सर्वज्ञे सर्वेश्वरे गता भावना येषां ते तथा भावनाफलमाह वैष्णवेनेति वैष्णव्या शक्त्याधिष्ठितेन ज्ञानैश्वर्यवंत इत्यर्थः तेषां जन्मना वैशिष्ट्यमाचष्टे मानसेति मन्वादीनेव विशिनष्टि येषामिति विद्यया जन्मना च संततिभूता मन्वादीनामस्मिं

ल्लोक इमाः प्रजाः ॥ ६ ॥

सोपाधिकप्रभावं भगवतो दर्शयित्वा तज्ज्ञानफलमाह । एतामिति । बुद्ध्याद्युपादानत्वेन विविधा भूतिर्भवनं वैभवं सर्वात्मत्वं तदाह । विस्तारमिति । ईश्वरस्य तत्तदर्थसंपादनसामर्थ्यं योगः तदाह आत्मन इति । योगस्तत्फलमैश्वर्यं सर्वज्ञत्वं सर्वेश्वरत्वं च यदीयं शक्तिज्ञान

एतां यथोक्तां विभूतिं विस्तारं योगं च युक्तिं चात्मनो घटनं अथवा योगैश्वर्यसामर्थ्यं सर्वज्ञत्वं च योगजं योग उच्यते ॥ मम मदीयं योगं यो वेत्ति तत्त्वतस्तत्त्वेन यथावद्दिव्येत सोऽविकंपेन अप्रचलितेन योगेन

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ॥ सो
विकंपेन योगेन युज्यते नात्र संशयः ॥७॥

सम्यग्दर्शनस्थैर्यलक्षणेन युज्यते संबध्यते नात्र संशयः तस्मिन्नर्थे संशयो नास्ति ॥७॥ ॥

लेशमाश्रित्य मन्वादयो भृग्वादयश्चेशाते जानते च तदाह । अथवेति । यथा तौ विभूतियोगौ तथा निरंकुशत्वेनेति वेदनस्य निरंकुशत्वं दर्शयति । यथावदिति । सोपाधिकज्ञानं निरुपाधिकज्ञाने द्वारमित्याह । सोविकंपेनेति । उक्तेर्थे प्रतिबंधाभावमा

कथंतावकविभूत्यैश्वर्यज्ञानमुक्तयोगस्यहेतुरितिमत्वापृच्छति। कीदृशेनेति। उक्तज्ञानमाहात्म्यात्प्रतिष्ठितोभगवन्निष्पसि
ध्यतीत्याह। उच्यतेइति। प्रभवत्यस्मादितिप्रभवः सर्वप्रकृतिः सर्वात्मेत्याह उत्पत्तिरिति। सर्वज्ञात्सर्वेश्वरान्मत्तोनिमित्तात्सर्गस्थिति
नाशादिभवति मयाचांतर्यामिणाप्रेर्यमाणंसर्वंयथास्वमर्यादामनतिक्रम्यचेष्टतेतदाह मत्तइति। इत्थंममसर्वात्मत्वंसर्वप्रकृति

कीदृशेनाऽविकंपेनयोगेनयुज्यतइत्युच्यते। अहंपरंब्रह्मवासुदेवाख्यंसर्वस्यजगतः प्रभवउत्पत्तिर्मत्त
एवस्थितिनाशक्रियाफलोपभोगलक्षणांविक्रियारूपंसर्वंजगत्प्रवर्त्ततइत्येवंमत्वाभजंतेसेवंतेमां

अहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्त्तते। इतिमत्वाभजंतेमांबुधाभावसमन्विताः॥८॥

बुधाअवगततत्वार्थाः भावसमन्विताः भावोभावनापरमार्थतत्वाभिनिवेशः तेनसमन्विताःसंयुक्ताइत्यर्थः॥८॥

त्वंसर्वेश्वरत्वंसर्वज्ञत्वंचमहिमानंज्ञात्वामय्येवनिष्ठावंतोभवंतीत्याह। इत्येवमिति। संसारासारताज्ञानवतांभगवद्भजनेऽधिका
रंद्योतयति। अवगतेति। परमार्थतत्वेपूर्वोक्तरीत्याज्ञातेप्रेमादरावभिनिवेशाख्योभवतस्तेनसंयुक्तत्वंचभगवद्भजनेभवतिहे

नकेवलमुक्तमेव भगवद्भजनसाधनं साधनांतरं चास्तीत्याह किंचेति ईश्वरात्प्रतीचः प्रागुक्तादन्यत्र चित्तप्रकाररहित्यं भगवद्भजनोपा
यमाह मयीति चक्षुरादीनां भगवत्प्राप्तिस्तद्गोचरत्वात्तस्यैवाशंक्याह मय्युपसंहृतेति भगवद्व्यतिरेकेण जीवितेपि नास्त्याजी
वनमपि भक्तानां मय्येवार्पितमस्तीत्याह अथवेति आचार्येभ्यः श्रुतावादकथया परस्परं भगवंतं सब्रह्मचारिणो बोधयंतीति तद

किंच मच्चित्ता मयि चित्तं येषां ते मच्चित्ताः मद्गतप्राणाः मां गताः प्राप्ताः चक्षुरादयः प्राणा येषां ते मद्गतप्राणा
मय्युपसंहृतकरणा इत्यर्थः अथवा मद्गतप्राणा मद्गतजीवना इत्येतद्बोधयंतो अवगमयंतः परस्परमन्योन्यं क

मच्चित्ता मद्गतप्राणा बोधयंतः परस्परं कथयंतश्च मां नित्यं तुष्यंति च रमंति च ॥ ९ ॥

थयंतो ज्ञानबलवीर्यादिधर्मैर्विशिष्टं मां तुष्यंति च परितोषमुपयांति रमंति च रतिं च प्राप्नुवंति प्रियसंगत्येव ९

पि भगवद्भजनमित्याह बोधयंत इति आगमोपपत्तिभ्यां भगवंतमेव विशिष्टधर्माणं च शिष्येभ्यो गुरवो व्यपदिशंतीति तदपि भगवद्भजन
मेवेत्याह कथयंत इति भक्तानां तु स्थिती स्वरसतः स्यातामित्याह तुष्यंतीति मनोरथपूर्त्या रतिप्राप्तौ कामुकसंमतमुदाहरणमाह प्रियेति ९

यदुक्तं सोऽविकंपेनेत्यादि तदर्थं भूमिकां कृत्वा तदिदानीमुदाहरति ॥ येयथोक्तेति ॥ नित्याभियुक्तानामनवरतं भगवत्येकाग्रसंपन्नानामि
त्यर्थः ॥ पुत्रादिलोकत्रयहेत्वर्थित्वेन वाऽगर्भवासार्थत्वेन वा मत्स्वहं जीवनोपाय सिद्ध्येवा भजनमिति शंकित्वा दूषयति ॥ किमित्यादिना

येयथोक्तप्रकारैर्भजंते मां भक्ताः संतः प्रीतिपूर्वकं तेषां सततयुक्तानां नित्याभियुक्तानां भजतां सेवमानानां किमर्थित्वादि
कारणेनेनेत्याह ॥ प्रीतिपूर्वकं प्रीतिः स्नेहस्तत्पूर्वकं मां भजतामित्यर्थः ॥ ददामि प्रयच्छामि बुद्धियोगं बुद्धिः सम्यग्दर्शनं मत्त

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ॥ ददामि बुद्धियोगं तं येन मामुपयांति ते ॥ १० ॥

त्वविषयं तेन योगो बुद्धियोगस्तं बुद्धियोगं येन बुद्धियोगेन सम्यग्दर्शनलक्षणेन मां परमेश्वरमात्मभूतमात्मत्वेनोपयांति
प्रतिपद्यंते के ते ये मच्चित्तत्वादिप्रकारैर्मां भजंते ॥ १० ॥ श्री रामाय नमः ॥ श्रीसीतारामचंद्राय नमो नमः ॥ श्री रामाय नमः ॥

प्रागुक्तां ज्ञानाख्यां भक्तिं स्नेहेन कुर्वतामित्यर्थः ॥ तेभ्यो हं तत्त्वज्ञानं प्रयच्छामीत्याह ॥ ददामीति ॥ उक्तबुद्धिसंबंधस्य फलमाह ॥ येनेति ॥ ध्यानज
न्यप्रकृष्टकाष्ठां गतांतःकरणपरिणामे निरस्ताशेषविशेष भगवतद्रूपप्राप्तिहेतौ बुद्धियोगे प्रश्नपूर्वकमुक्तान् अधिकारिणो दर्शयति ॥ के तइ

भगवत्प्राप्तेर्बुद्धिसाध्यत्वे सत्यनित्यत्वोपपत्तेस्त्वं भक्तेभ्यो बुद्धियोगं ददासीत्ययुक्तमिति शंकते किमर्थमिति। तेषां बुद्धियोगं किमर्थं ददासीति
संबंधः भगवत्प्राप्तिप्रतिबंधकनाशको बुद्धियोगस्तेन नास्ति तत्प्राप्तेरनित्यत्वमित्याशंक्याह कस्यचेति। भक्तानां तत्प्राप्तिप्रतिबंधकं विविच्य
दर्शयति आकांक्षायामिति। अविवेकोऽनाद्यज्ञानं ततो जातं मिथ्याज्ञानं तदुभयमेकीकृत्य तमो विवक्ष्यते न च तन्नाशकत्वं जडस्य कस्यचि

किमर्थं कस्य वा तत्प्राप्तिप्रतिबंधहेतोर्नाशकं बुद्धियोगं तेषां त्वद्भक्तानां ददासीत्यपेक्षायामाह। तेषामेव कथं नाम
श्रेयः स्यादित्यनुकंपार्थं दयाहेतोरहमज्ञानजमविवेकतो जातं मिथ्याप्रत्ययलक्षणं मोहांधकारं तमो नाशयाम्या

तेषामेवानुकंपार्थमहमज्ञानजं तमः

त्मभावस्य आत्मनो भावोंऽतःकरणाशयः तस्मिन्नेवस्थितः सन् ज्ञानदीपेन विवेकप्रत्ययरूपेण ॥ ॥

तदंतर्भूतस्य युक्तं तेनाहं नाशयामीत्युक्तं केवलं चैतन्यस्य जडबुद्धिवृत्तेरिवाज्ञानाद्यनाशकत्वमाशंक्य विशिनष्टि आत्मेति। तस्याशयस्तन्निष्ठो वृ
त्तिविशेषो वा कोऽसौ बुद्धिवृत्त्यभिव्यक्तश्चिदाभासस्तस्य सामर्थ्यादज्ञानादिनिवृत्तिहेतुरित्यर्थः बुद्धीद्धबोधस्याज्ञानादिनिवर्तकत्वमुक्त्वा बो
धेद्धबुद्धेस्तन्निवर्तकत्वमिति पक्षांतरमाह ज्ञानेति। देहादिअव्यक्तांतानात्मवर्गातिरिक्तवस्तुगोचरत्वमाह विवेकेति ॥ ॥

त्मा कं

भगवति सदा विहितया भक्त्या तस्य प्रसादोनुग्रहः स एव स्नेहस्तेन सेचन द्वाराऽस्योत्पत्तिमाह भक्तीति मय्येव भावनाया मभिनिवेशो
वातस्तेन प्रेरितो यं जायते न हि वात प्रेरणमंतरेण दीपस्योत्पत्तिरित्याह मद्भावनेति ब्रह्मचर्यमष्टांगमादिपदाद्दशमादिग्रहस्तेन
हेतुना हितसंस्कारवती या प्रज्ञा तथाविधवर्त्तिनिष्पन्नो ऽयं न हि वर्त्तिरेकेण दीपो निर्वर्त्यते तदाह ब्रह्मचर्येति नन्वाधारादृते

भक्तिप्रसादस्नेहाभिषिक्तेन मद्भावनाभिनिवेशवातेरितेन ब्रह्मचर्यादिसाधनसंस्कारवत्प्रज्ञावर्त्तिना विरक्तांतःकरणा

नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

धारेण विषयव्यावृत्तरागद्वेषाकलुषितचित्तनिवातापवरकस्थेन नित्यप्रवृत्तैकाग्र्यध्यानजनितसम्यग्दर्शनेन भास्वता ज्ञान
दीपेनेत्यर्थः ॥ २२

दीपस्योत्पत्तिरदृष्टा दित्याह विविक्तेति यद्विषयेभ्यो व्यावृत्तं चित्तं रागाद्यकलुषितं तदेव निवातापवरकं तत्स्थितत्वमस्य दर्शयति
विषयेति भास्वतेति विशेषणं विशदयति नित्येति सदातनश्चित्तैकाग्र्यं तत्पूर्वकं ध्यानं तेन जनितं सम्यग्दर्शनं फलं तदेव भाः स्वत्वं तात्पर्यं
तेनेत्यर्थः तेनाज्ञाने सकार्ये निवृत्ते भगवद्भावः स्वयमेव प्रकाशी भवतीति मत्वा व्याख्यातमेव पदमनुवदति ज्ञानेति ॥ ११ ॥ ॥

नद्दत्ता

निरस्ताशेषविशेषनिरुपाधिकं सोपाधिकं च सर्वात्मत्वादिभगवतो रूपं तद्वीफलं च श्रुत्वा निरुपाधिकरूपस्य प्राकृतबुद्ध्यनवग्राह्यत्वोक्ति
पूर्वकं मंदानुग्रहार्थे सर्वदा सर्वबुद्धिग्राह्यं सोपाधिकं रूपं विस्तरेण श्रोतुमिच्छन् पृच्छतीत्याह यथोक्तामिति ॥ परं ब्रह्म भवानिति लक्ष्य
निर्देशस्तस्य लक्षणार्थं परं धामेत्यादि विशेषणत्रयं धामशब्दस्य स्थानवाचित्वं व्यावर्त्तयन् व्याचष्टे ॥ तेज इति ॥ तस्य चैतन्यस्य पर

यथोक्तां भगवतो विभूतियोगं च श्रुत्वा ॥ परं ब्रह्म परं धाम परं तेजः पवित्रं पावनं परमं प्रकृष्टं भवान् ॥ पुरु

॥ अर्जुन उवाच ॥ परं ब्रह्म परं धाम पवित्रं परमं भवान्
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं ॥ १२ ॥

षं शाश्वतं नित्यं दिव्यं दिवि भवं आदिदेवं सर्वदेवानामादौ भवं देवमजं विभुं विभवनशीलं ॥ १२ ॥ ॥ ॥

त्वं जन्मादिराहित्येन कौटस्थ्यं प्रकृष्टं पावनमत्यंतशुद्धत्वमुच्यते ॥ यदेवं लक्षणं परं ब्रह्म तद्भवानेव नान्य इत्यर्थः ॥ कुतस्त्वमेवं मेजा
नासीत्याशंक्याऽऽप्तवाक्यादित्याह ॥ पुरुषमिति ॥ दिवि परमे व्योम्नि भवतीति दिव्यस्तं सर्वप्रपंचातीतं दीव्यति द्योतत इति देवः स चा
॥ दिः सर्वमूलत्वादत एवाऽजः तं सर्वगतमाहुरिति संबंधः ॥ १२ ॥

उक्तविशेषणं त्वामृषयः सर्वे यस्मादाहुस्तस्मात्तेवचनात्तवोक्तं ब्रह्मत्वं युक्तमित्याह ईदृशमिति ॥ ऋषिग्रहणेन गृहीतानामपि नारदादी-
नां विशिष्टत्वात् पृथक्ग्रहणं असितो देवलस्य पिता किमन्यैस्त्वं स्वयमेवात्मानमुक्तरूपं मह्यं उक्तवानित्याह स्वयं चेति ॥ १३ ॥ ऋ-
षिभिस्त्वया चोक्तत्वादुक्तं सर्वं सत्यमेवेति मम मनीषेत्याह सर्वमिति ॥ किं तदित्याशंक्यात्मरूपमित्याह यन्मामिति देवादिभिः स्व

ईदृशं ॥ आहुः कथयंति त्वामृषयः वशिष्ठादयः सर्वे देवर्षिर्नारदस्तथा असितो देवलोऽप्येवमेवाह व्यासश्च स्वयं चैव ब्रवीषि मे मह्यं १३

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ॥ असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥
सर्वमेतदृतं मन्ये यन्मां वदसि केशव ॥ न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥

सर्वमेतद्यथोक्तं ऋषिभिस्त्वया चैतदृतं सत्यमेवमन्येयन्मां प्रति वदसि वक्ष्यसि भाषसे हे केशव न हि ते तव भगवन् व्यक्तिं प्रभवं विदुर्देवादानवाः ॥ १४ ॥

वैरुच्यमानतया तत्तद्रूपे विशिष्टव्यक्तिग्रहणमनर्थकमित्याशंक्याह नहीति ॥ प्रभवो नाम निरुपाधिकस्वभावः यदा देवादी-
नामपि दुर्विज्ञेयं तव रूपं तदा का कथा मनुष्याणामित्यर्थः ॥ १४

कश्चिदेव महता कष्टेनानेकजन्मसंसिद्धो जानाति त्वदनुगृहीतस्त्वद्रूपमित्यभिप्रेत्याह। यत इति। स्वयमेवोपदेशमंतरेणेत्यर्थः। आत्म
नाप्रत्यक्षेनाविषयतयेति यावत्। आत्मानं निरुपाधिकरूपं न चेतवसोपाधिकमपि रूपमन्यस्यगोचरेति ष्टतीत्याह। निर
तिशयेति। पुरुषश्चासावुत्तमश्चेति क्षराक्षरातीतपूर्णचैतन्यरूपत्वं संबोधनतयाबोध्यते सर्वप्रकृतित्वं सर्वकर्तृत्वं च कथय
ति। भूतानीति सर्वेश्वरत्वमाह। भूतानामिति। उक्तं ते सोपाधिकं रूपं देवादीनामाराध्यत्वमधिगच्छतीत्याह। हे देवेति जग

यतस्त्वं देवादीनामादिरतः। स्वयमेवात्मनात्मानं वेत्थ त्वं। कथं निरतिशयज्ञानैश्वर्यबलादिशक्ति
मंतमीशं पुरुषोत्तम भूतानि भावयतीति भूतभावन भूतेश भूतानामीश हे देवदेव जगत्पते। १५॥

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम। भूतभावन भूतेश देवदेव जगत्पते। १५॥ वक्तु
मर्हस्यशेषेण दिव्या ह्यात्मविभूतयः। याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि। १६॥

वक्तुं कथयितुं अर्हसि अशेषेण दिव्या ह्यात्मविभूतयः आत्मनो विभूतयो यास्ताः वक्तुमर्हसि याभिर्वि
भूतिभिरात्मनो माहात्म्यविस्तारैरिमांल्लोकान् त्वं व्याप्य तिष्ठसि। १६। श्री रामचंद्राय नमो नमः॥

तः सर्वस्य स्वामित्वेन पालयितृत्वमाह। जगदिति। १५। यस्मादस्मद्दृशामगोचरस्त्वमात्मानं जिज्ञासितश्चतस्मात्त्वयैव तद्रू
पं वक्तव्यमित्याह। वक्तुमिति। दिव्यत्वमप्राकृतत्वं संप्रत्यन्वयं व्याचष्टे। आत्मन इति। वक्तव्या विभूतीर्विशिनष्टि याभि
रिति। यतद्द्वारा लोकान्पूरयित्वा वर्तसे ताः विभूतीरशेषेण वक्तुमर्हसीत्यर्थः। १६। श्री सीतारामचंद्राय नमः॥ ॥

किमर्थं विभूतीः श्रोतुमिच्छसीत्याशंक्य ध्यानसौकर्यं प्रकारप्रश्नेन फलं कथयति । कथमिति । योगो नामैश्वर्यं तदस्यास्तीति योगी योगिन्नहं त्वां विद्यां विज्ञानीयां मतिस्त्वां केन प्रकारेण सततमनुसंदधानो विशुद्धबुद्धिर्भूत्वा निरुपाधिकं त्वां विजानीयामिति प्रश्नः प्रश्नानंतरं प्रश्नोति । केषु केष्विति । चेतनाचेतनभेदाद्रुपाधिबहुत्वाच्च बहुवचनं १७ प्रकृतं प्रश्नमुपसंहरति । विस्तरेणेति । अर्दतेर्गं

कथं विद्यां विजानीयामहं हे योगिन् त्वां सदा परिचिंतयन् केषु केषु च भावेषु वस्तुषु चिंत्योसि ध्येयोसि भगवन्मया १७ विस्तरेणात्मनो योगं योगैश्वर्यं शक्तिविशेषं विभूतिं च विस्तरं ध्येयपदार्थानां हे जनार्दन अर्दतेर्गतिकर्मणो रूपं असुरा

कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन् । केषु केषु च भावेषु चिंत्योसि भगवन्मया ॥ १७ ॥
विस्तरेणात्मनो योगं विभूतिं च जनार्दन । भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतं ॥ १८ ॥ ॥

णां प्रतिपक्षजनानां नरकादिगमयितृत्वाज्जनार्दन अभ्युदयनिःश्रेयसपुरुषार्थप्रयोजनं सर्वैर्जनैर्याच्यत इति वा जनार्दन भूयः पूर्वमुक्तमपि कथय तृप्तिर्हि परितोषो यस्मान्नास्ति मे मम शृण्वतः त्वन्मुखनिःसृतं वाक्यामृतं । १८ । ॥

तिकर्मणो जनार्दनेति रूपं तद्व्युत्पादयति । असुराणामिति । प्रकारांतरेण शब्दार्थं व्युत्पादयति । अभ्युदयेति । ननु पूर्वमेव सप्तमे नवमे च विभूतिरैश्वर्यं चेश्वरस्य दर्शितं तत्किमिति श्रोतुमिष्यते तत्राह । भूय इति । अमृतममृतप्रख्यमित्यर्थः । १८ ।

प्रश्नारं विश्रंभयितुं भगवानुक्तवानित्याह हंतेत्यनुमतिं व्यावर्त्यजिज्ञासावच्छिन्नं कालं दर्शयति इदानीमिति दिविभवत्वमप्राकृतत्वम स्मदगोचरत्वं वा व्याख्यानुरूपं द्योतयति यास्ताइति सर्वविभूतीनां वक्तव्यत्वं प्राप्तावुक्तं यत्रेति किमित्यनवशेषतो विभूतयो नोच्यं तेतत्राह अशेषतस्त्विति तत्र हेतुर्यत इति ॥१९॥ विभूतिप्रदर्शने प्रस्तुते सत्यादावेव पारमार्थिकं पारमेश्वरं रूपं दर्शयितुं श्रोतु रर्जुनस्य मनः समाधानार्थं यतते तत्रेति सोपाधिकमपि कात्स्न्यनिकं परस्य रूपं पश्चाद्वक्ष्यमाणं श्रोतुः चित्तसमाधानं कर्त्तुं

हंत इदानीं ते तव दिव्यादिवि भवा आत्मविभूतय आत्मनो मम विभूतयो यास्ताः कथयिष्यामीत्येतत्प्राधान्यतो यत्र यत्र प्रधाना या या विभूतिस्तां तां प्रधानां प्राधान्यतः कथयिष्याम्यहं ते कुरुश्रेष्ठ अशेषतस्तु वर्षशतेनापि न शक्यते वक्तुं यतो नास्त्यंतो विस्त रस्य मे मम विभूतीनामित्यर्थः ॥१९॥ तत्र प्रथममेतावत् शृणु अहमात्मा प्रत्यगात्मा गुडाकेश गुडाका निद्रा तस्या ईशो गुडाकेशो

श्रीभगवानुवाच ॥ ॥ हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे ॥१९॥
अहमात्मा गुडाकेश सर्वभूताशयस्थितः ॥ अहमादिश्च मध्यं च भूतानामंत एव च ॥२०॥ ॥श्रीः॥ ॥ ॥

जितनिद्र इत्यर्थः घनकेश इति वा सर्वभूताशयस्थितः सर्वेषां भूतानामाशये अंतर्हृदये स्थितो अहमात्मा प्रत्यगात्मा नित्यं ध्येयः त दशक्तेनो त्तरेषु भावेषु चिंत्योहं चिंतयितुं शक्यः यस्मादहमेवादिर्भूतानां कारणं तथा मध्यं च स्थितिरंतः प्रलयश्च ॥२०॥ ॥

व्यमेवेत्याह तेनावदिति आशेरते ऽस्मिन्नविद्याकर्मपूर्वप्रज्ञा इत्याशयो हृदयं सर्वेषां भूतानां हृदयेंतः स्थितो जैः प्रत्यगात्मा सोहमेवेति वा क्यार्थमाह सर्वेषामिति यस्तु मंदो मध्यमो वा परमात्मानमात्मत्वेन ध्यातुं नालं तं प्रत्याह तदशक्तेति वक्ष्यमाणादित्यादिषु परस्य न ध्येयत्व मन्यदेव कारणं किं चित्तत्र ध्येयमित्याशंक्याह यस्मादिति सर्वकारणत्वेन सर्वज्ञत्वेन सर्वेश्वरत्वेन परस्य ध्येयत्वमत्रेष्टं तन्नान्यस्य कस्य चि

उक्तध्यानाशक्तेभ्यो वक्तव्यं विभूतियोगमुपदिशति एवं चेति २१ तत्र तत्र प्रधानत्वेन परस्य ध्येयत्वमेवं शब्दार्थमेव दर्शितादित्यादि

एवं च ध्येयोहं आदित्यानां द्वादशानां विष्णुर्नामादित्योहं ज्योतिषां रविरंशुमान् प्रकाशयितॄणां अंशुमान् रश्मि
वान् मरीचिर्नाम मरुतां मरुद्देवताभेदानां अस्मि नक्षत्राणामहं शशी चंद्रमाः २१ वेदानां मध्ये सामवेदोस्मि
देवानां रुद्रादित्यादीनां वासवः इंद्रोस्मि इंद्रियाणामेकादशानां मनश्चास्मि भूतानामस्मि चेतना कार्यकार

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी २१
वेदानां सामवेदोस्मि देवानामस्मि वासवः इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना २२ रुद्रा
णां शंकरश्चास्मि वित्तेशो यक्षरक्षसां वसूनां पावकश्चास्मि मेरुः शिखरिणामहं २३ ॥

णसंघातेऽभिव्यक्ता बुद्धेर्वृत्तिश्चेतना २२ रुद्राणामेकादशानां शंकरश्चास्मि वित्तेशः कुवेरो यक्षरक्षसां य
क्षाणां च वसूनां अष्टानां पावकश्चास्मि अग्निः मेरुः शिखरिणामहं शिखरवतां अहं २३ ॥ ॥

ना॰ ऋग्यंत्रब्राह्मणसमुदायानामृगादीनां मध्ये सामवेदोस्मीति ध्यानांतरमुदाहरति वेदानामिति २२॥ ॥२३॥ ॥ ॥

संघाते जीवाधिष्ठिते या वृत्तित्वं सर्वत्रव्यापिनी तापि चैतन्याभिव्यंजिके विशेषः पुरोहितेषु बृहस्पतेर्मुख्यत्वे हेतुमाह सहीति ॥२४॥ एकमित्योंकारस्य ब्रह्मप्रतीकत्वेन तदभिधानत्वेन च प्रधानत्वमुच्यते जपयज्ञस्य यज्ञांतरेभ्यो हिंसादित्वेन प्राधान्यमुपेत्याह यज्ञानामिति शिखरवतामु

पुरोधसां राजपुरोहितानां मुख्यं प्रधानं मां विद्धि जानीहि पार्थ बृहस्पतिं स हि इंद्रस्याति मुख्यः स्यात् पुरोधाः सेनानीनां सेनापतीनां स्कंदो देवसेनापतिः सरसां यानि देवखातानि सरांसि तेषां सरसां सागरोस्मि ॥२४॥ महर्षीणां भृगुरहं गिरां वाचां पदलक्षणानां एकमक्षरमोंकारोस्मि यज्ञानां जपयज्ञोस्मि स्थावराणां स्थितिमतां हिमालयः ॥२५॥ अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः देवा एव संतः ऋषित्वं

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिं ॥ सेनानीनामहं स्कंदः सरसामस्मि सागरः ॥२४॥ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं ॥ यज्ञानां जपयज्ञोस्मि स्थावराणां हिमालयः ॥२५॥ अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ॥ गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥२६॥ उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं ॥ ऐरावतं गजेंद्राणां नराणां च नराधिपं ॥२७॥ श्रीरामचंद्राय नमः

प्राप्ताः मंत्रदर्शिनस्ते देवर्षयस्तेषां नारदोस्मि गंधर्वाणां चित्ररथो नाम गंधर्वोस्मि सिद्धानां जन्मनैव धर्मज्ञानवैराग्यैश्वर्यातिशय प्राप्तानां कपिलो नाम मुनिः ॥२६॥ उच्चैःश्रवसमश्वानां उच्चैःश्रवा नामाश्वस्तं मां विद्धि जानीहि अमृतोद्भवं ऐरावतमिरावत्या अपत्यं गजेंद्राणां हस्तीश्वराणां मां विद्धीत्यनुवर्त्तते नराणां च मनुष्याणां नराधिपं राजानं मां विद्धि ॥२७॥ ॥ ॥

च्छ्रितानां मध्ये मेरुरहमित्युक्तेपि स्थितिशीलानां तेषां एव हिमवान् पर्वतराजो स्मीत्यर्थभेदं गृहीत्वाह स्थितिमतामिति ॥२५॥ सर्ववृक्षाणामित्यत्र सर्वशब्देन वनस्पतयो गृह्यंते ॥२६॥ ॥२७॥ श्रीसीतारामचंद्राय नमो नमः ॥ श्रीरामाय नमः ॥ श्रीसीतारामचंद्राय नमः ॥ ॥

प्रजनयतीति व्युत्पत्तिमाश्रित्याह प्रजनयितेति ॥ २८ ॥ सर्पा नागाः च जातिभेदाद्भिद्यंते ॥ २९ ॥ ॥ ३० ॥ ३१ ॥ श्रीरामचंद्राय नमः ॥ ॥

आयुधानामहं वज्रं दधीच्यस्थिसंभवं धेनूनां दोग्ध्रीणां अस्मि कामधुक् वशिष्ठस्य सर्वकामानां दोग्ध्री सामान्या वा कामधुक् प्रजनः प्रजनयितास्मि कंदर्पः कामः सर्पाणां सर्पभेदानां अस्मि वासुकिः सर्पराजः ॥ २८ ॥ अनंतो नामचास्मि नागानां नागभेदानां नागराजो वरुणो यादसामहमब्देवतानां राजाहं पितॄणामर्यमा अर्यमा नाम पितृराजश्चास्मि यमः संयमतां संयमं कुर्वतामहं ॥ २९ ॥ प्रह्लादो नाम चास्मि दैत्यानां दितिवंश्यानां कालः कलयतां कल

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ॥ प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः ॥ २८ ॥
अनंतश्चास्मि नागानां वरुणो यादसामहं ॥ पितॄणामर्यमा चास्मि यमः संयमतामहं ॥ २९ ॥ प्र
ह्लादश्चास्मि दैत्यानां कालः कलयतामहं ॥ मृगाणां च मृगेंद्रोहं वैनतेयश्च पक्षिणां ॥ ३० ॥ प
वनः पवतामस्मि रामः शस्त्रभृतामहं ॥ झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥ ॥

नं गणनं कुर्वतामहं मृगाणां च मृगेंद्रः सिंहो व्याघ्रश्चाहं वैनतेयश्च गरुत्मान् विनतासुतः पक्षिणां पतत्रिणां राजा ॥ ३० ॥ पवनो वायुः पवतां पावयितॄणां अस्मि रामः शस्त्रभृतामहं शस्त्राणां धारयितॄणां दाशरथी रामोऽहं झषाणां मत्स्यादीनां मकरनाम जातिविशेषः स्रोतसां स्रवंतीनामस्मि जाह्नवी गंगा ॥ ३१ ॥ श्रीरामचंद्राय नमः ॥ ॥

अहमादिश्चेत्यादावुक्तमेवपुनरिहोच्यते । तथाचपुनरुक्तिरित्याशंक्याह । भूतानामिति । सर्गशब्देनसृज्यंतइतिसर्गाणिकार्याणिगृह्यं
ते अध्यात्मविद्येत्यात्मन्यंतःकरणपरिणतिरविद्यानिवर्तिकागृहीता । प्रवदतांसंबंधीवादोवीतरागकथाततत्त्वनिर्णयावसाना । य

सर्गाणांसृष्टीनांआदिरंतश्चमध्यंचैवाहमर्जुनउत्पत्तिस्थितिप्रलयाअहंभूतानांजीवाविष्टानांएवादिरंतश्चेत्याद्युक्तमु
पक्रमेइहतुसर्वस्यैवसर्गमात्रस्येतिविशेषः अध्यात्मविद्याविद्यानांमोक्षार्थत्वात्प्रधानमस्मिवादोऽर्थनिर्णयहेतुत्वात्प्रवद
तांप्रधानोऽतःसोहमस्मिप्रवक्तृद्वारेणवचनभेदानामेवेहवादजल्पवितंडानांग्रहणंप्रवदतामिति । ३१ । अक्षराणांवर्णा

सर्गाणामादिरंतश्चमध्यंचैवाहमर्जुन । अध्यात्मविद्याविद्यानांवादःप्रवदतामहं । ३२ । अ
क्षराणामकारोस्मिद्वंद्वःसामासिकस्यच । अहमेवाक्षयःकालोधाताहंविश्वतोमुखः । ३३ ।

नामकारोवर्णोस्मिद्वंद्वःसमासोस्मीतिसामासिकस्यचसमाससमूहस्यकिंचअहमेवाक्षयोऽक्षीणःकालःप्रसिद्धः
क्षणोलवाद्याख्यअथवापरमेश्वरःकालस्यापिकालोधाताहंकर्मफलस्यविधातासर्वस्यजगतोविश्वतोमुखः । ३३ ।

दाप्रवदतामितिलक्षणयाकथाभेदोपादानंतदानिर्द्धारणेषष्ठीत्याह । प्रवदतामिति । ३३ । । ३३ । श्रीसीरामचंद्रायनमः ।

सर्वहरशब्दस्यमुख्यमर्थांतरमाह अथवेति भाविकल्याणानामित्युक्तमेवस्पष्टयति उत्कर्षेति ॥ कीर्त्तिर्धार्मिकत्वनिमित्ताख्यातिः श्रीर्लक्ष्मीः कांतिः शोभावाग्वाणी सर्वस्यप्रकाशिका स्मृतिश्चिरानुभूतस्मरणशक्तिः मेधा ग्रंथधारणाशक्तिः धृतिः धैर्यं क्षमामानापमानयोरविकृतचित्तता स्त्रीषुकीर्त्यादीनुत्तमत्वमुपपादयति यासामिति ३४ वेदानां सामवेदोस्मीत्युक्तं तत्रावांतरविशेषमाह

मृत्युर्द्विधा धनहरः प्राणहरश्च सर्वहरः सउच्यते सोहमित्यथवा परईश्वरः प्रलये सर्वहरणात्सर्वहरः सोहमुद्भवउत्कर्षो ऽभ्युदयस्तत्प्राप्तिहेतुश्चाहंकेषांभविष्यतांभाविकल्याणानांउत्कर्षप्राप्तियोग्यानामित्यर्थः ॥ कीर्तिः श्रीर्वाक्नारीणांस्मृतिर्मेधा धृतिः क्षमेत्येताउत्तमाः स्त्रीणामहमस्मि यासामाभासमात्रसंबंधेनापिलोकाः कृतार्थमात्मानंमन्यंते ३४ बृहत्सामतथासाम्नांमोक्षप्रतिपादकसामविशेषः प्रधानमस्मि गायत्री छंदसामहंगायत्र्यादिछंदोविशिष्टानां ऋचांगायत्रीऋग् ऽहमित्यर्थः ॥ मासानांमार्गशीर्षो ऽहमृतूनांकुसुमाकरःवसंतः ३५ ॥

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यतां ॥ कीर्त्तिः श्रीर्वाक्चनारीणांस्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥
बृहत्सामतथासाम्नांगायत्रीछंदसामहं ॥ मासानांमार्गशीर्षोहमृतूनांकुसुमाकरः ॥ ३५ ॥

बृहत्सामेति छंदसांमध्येगायत्रीनामयत् छंदस्तदहमित्युक्तं छंदसामृग्भ्योतिरेकेणस्वरूपाभावादित्याशंक्याह गायत्र्यादिति द्विजातेर्द्वितीयजन्मजननीत्वादित्यर्थः मार्गशीर्षीमृगशीर्षायुक्तापौर्णमास्यस्मिन्निति मार्गशीर्षोमासः सोहंपक्वसस्याढ्यत्वादित्याह मासानामिति वसंतोरमणीयत्वादितिशेषः ३५ श्रीसीतारामचंद्रायनमः ॥

द्युतमुक्तलक्षणं सर्वस्वापहारकारणमन्यापदेशेन पराभिप्रेतं विघ्नतां स्वाभिप्रेतं वा संपादयतामस्म्यहं छलस्येति तेजोऽप्रतिहता
ऽऽज्ञा उत्कर्षो जयः व्यवसायः फलहेतुरुद्यमः धर्मज्ञानवैराग्यादि सत्वकार्यं सत्वं ३६ उशनाः शुक्रः कविशब्दोऽत्रयौगिको नरू

द्यूतमक्षदेवनादिलक्षणं छलयतां छलस्य कर्तृणां अस्मि तेजस्तेजस्विनामहं जयो जेतॄणां व्यवसायोऽस्मि व्यवसा
यिनां सत्वं सत्ववतां सात्विकानामहं ३६ वृष्णीनां वासुदेवोऽस्मि अयमेवाहं त्वत्सखः पांडवानां धनंजयस्त्वमेव मुनीनां

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहं ॥ जयोऽस्मि व्यवसायोऽस्मि सत्वं सत्ववतामहं ॥ ३६ ॥
वृष्णीनां वासुदेवोऽस्मि पांडवानां धनंजयः ॥ मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥
दंडो दमयतामस्मि नीतिरस्मि जिगीषतां ॥ मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहं ॥ ३८ ॥

मननशीलानां सर्वपदार्थज्ञानामप्यहं व्यासः कवीनां क्रांतदर्शिनामुशना कविरस्मि ॥ ३७ दंडो दमयतां दमयितॄणा
मस्मि अदांतानां दमनकारणं ॥ नीतिरस्मि जिगीषतां जेतुमिच्छतां मौनं चैवास्मि गुह्यानां गोप्यानां ज्ञानं ज्ञानवतामहं ॥ ३८

ढःपो नरुक्त्यात् ॥ ३७ ॥ अदांतानुत्पथान्पथि प्रवर्त्तयतां दंडोऽहमुत्पथप्रवृत्तो निग्रहहेतुरित्यर्थः ॥ नीतिर्न्यायो धर्मस्य जयोपा
यस्य प्रकाशकः मौनं वाक्संयमस्त्वमुत्तमावाचा वा चतुर्थाश्रमवृत्तिः श्रवणादिद्वारा परिपक्वसमाधिजन्यं सम्यग्ज्ञानं ३८ ॥

जाड्यमात्रप्रतिबंधितं चैतन्यंबीजं ॥ किमितिस्थावरजंगमंवात्वदतिरेकेणनभवतितत्राह॥ मयेति॥ तस्यापिस्वरूपेणसत्व
माशंक्योक्तं॥ शून्यंहीति॥ आत्मनोपकर्षादित्यर्थः॥ मयैवसच्चिदानंदस्वरूपेणसर्वस्यसिद्धेरित्यतःशब्दार्थः॥ ३९॥ दिव्यानां

यच्चापिसर्वभूतानांबीजंप्ररोहकारणंतदहंचार्जुनप्रकरणोपसंहारार्थंविभूतिसंक्षेपमाह॥ नतदस्ति
भूतंचरमचरंवामयाविनायत्स्यात्भवेन्मयाअपकृष्टंनिरात्मकंशून्यंहितत्स्यादतोमदात्मकंसर्वं

यच्चापिसर्वभूतानांबीजंतदहमर्जुन॥ नतदस्तिविनायत्स्यान्मयाभूतंचराचरं॥ ३९॥
नांतोस्तिममदिव्यानांविभूतीनांपरंतप॥ एषतूद्देशतःप्रोक्तोविभूतेर्विस्तरोमया॥ ४०॥

मित्यर्थः॥ ३९॥ नांतोस्तिममदिव्यानांविभूतीनांविस्तराणांपरंतपनहीश्वरस्यसर्वात्मनःदिव्यानां
विभूतीनांइयत्ताशक्यावक्तुंज्ञातुंवाकेनचित्एषतूद्देशतः एकदेशेनप्रोक्तोविभूतेर्विस्तरोमया॥ ४०॥

विभूतीनांपरिमितत्वशंकांवारयति॥ नेत्यादिना॥ तदेवोपपादयति॥ नहीति॥ कथंतर्हिविस्तरोदर्शितस्तत्राह॥ एषत्विति॥ ४०॥

अनुक्ताअपि परस्यविभूतीः संग्रहीतुंलक्षणमाह यद्यदिति वस्तुमात्रिजातंश्रीमत्समृद्धिमद्वाशोभावद्वाकांतिमद्वासप्राणंबलव

यद्यल्लोके विभूतिमद्विभूतियुक्तंसत्वंवस्तुजातंश्रीमदूर्जितमेववा श्रीलक्ष्मीस्तयासहितंश्रीमदूर्जितमेववाउत्साहोपेतंवा

यद्यद्विभूतिमत्सत्वंश्रीमदूर्जितमेववा तत्तदेवावगच्छत्वंममतेजोंशसंभवं ४१ ॥

तत्तदेवावगच्छत्वंजानीहिममेश्वरस्यतेजोंशसंभवंतेजसोंशएकदेशः संभवोयस्यतत्तेजोंशसंभवमित्यवगाच्छत्वं ४१

दूर्जितंतदाह उत्साहेति संभवत्यस्मादितिसंभवस्तेजसश्चैतन्यस्यैश्वरशक्तेर्वांशस्तेजोंशः संभवोऽस्येतितेजोंशसंभवंतदाह तेजसद

ऊर्जि

सर्वेषांसुगमत्वायावयवशो विभूतिमुक्त्वा भक्तानुग्रहार्थंसाकल्येनतामाह॥ अथवेति॥ पक्षांतरपरिग्रहार्थमथवेत्युक्तं बहुनाविस्तीर्णेनैतेनज्ञातेनसावशेषेणतवशक्तस्य न किंचित्फलंस्यादित्याह॥ बहुनेति॥ नहिविभूतिषूक्तासुज्ञातासु च सर्वेज्ञायतेकासांचिदेवविभूतीनामुक्तत्वादित्यर्थः॥ तर्हि केनोपदेशेनाल्पाक्षरेणसर्वार्थोज्ञातुंशक्यतेतत्राह॥ अशेषत इति॥ विशेषतस्तंभनंविधारणंसर्वभूतस्वरूपेणसर्वप्रपंचोपादानशक्त्युपाधिकेनैकेनपादेनकृत्स्नंजगद्विधृत्यस्थितोस्मी

अथवाबहुनाएतेनैवमादिनाकिंज्ञातेनतवार्जुनस्यात्सावशेषेण॥ अशेषत्वमिममुच्यमानमर्थंशृणुविष्टभ्यविशेषतस्तंभनंदृढंकृत्वाइदंकृत्स्नंजगदेकांशेनैकावयवेनएकपादेनसर्वभूतस्वरूपेणेत्येतत्तथाचमंत्रवर्णः॥ पादोस्यसर्वाभूता

अथवाबहुनैतेन किंज्ञातेनतवार्जुन॥ विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगत्॥ ४२॥

नीतिस्थितोऽहंजगदिति॥ ४२॥ ॥इतिश्रीगीताभाष्यटीकायांदशमोऽध्यायः॥ ॥ १०॥ ॥श्रीरामायनमः॥

तिसंबंधः तत्रैवश्रुतिंप्रमाणयति॥ तथा चेति॥ तदनेनभगवतोनानाविधविभूतीर्ध्येयत्वेनज्ञेयत्वेनचोपदिशति॥ सर्वप्रपंचात्मकंध्येयरूपंदर्शयित्वात्रिपादस्यामृतंदिवीतिप्रपंचातीतंनिरुपाधिकंतत्त्वमुपदिशतापरिपूर्णःसच्चिदानंदैकतानस्तत्पदलक्ष्योर्थोनिर्द्धारितः॥ ४२॥ ॥इतिश्रीमद्भगवद्गीताटीकाआनंदगीरीटीकायांदशमोऽध्यायः॥ ॥ १०॥ ॥श्रीरामायनमः॥ ॥

तेनतेनात्मना भगवदनुसंधानार्थमुक्ता विभूतीरनुवदति । भगवतेति । परस्य सोपाधिकं निरुपाधिकं च रूपं ध्येयत्वेन ज्ञेयत्वेन चोक्तमित्यर्थः ॥ सोपाधिकमैश्वरं रूपमशेषजगदात्मकं विश्वरूपाख्यमधिकृत्याध्यायांतरमवतारयन्ननंतरप्रश्नोपयोगित्वेन वृत्तं कीर्त्तयति । तत्र चे ति । यदेतदशेषप्रपंचात्मकमखिलस्य तस्य कारणं सर्वज्ञं सर्वैश्वर्यवद्रूपमुक्तं तदिदं श्रुत्वा तस्य साक्षात्कारं यियाचयिषुरादौ दृष्टवा

भगवता विभूतय उक्तास्तत्र च विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति भगवताभिहितं श्रुत्वा यज्जगदा त्मस्वरूपमाद्यमैश्वरं तत्साक्षात्कर्त्तुमिच्छन् मदनुग्रहाय ममानुग्रहार्थं परमं निरतिशयं गुह्यं गोप्यमध्यात्मसंज्ञित

॥ अर्जुन उवाच ॥ मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं । यत्त्वयोक्तं वचस्तेन मोहोयं विगतो मम ॥ १ ॥

मात्मानात्मविवेकविषयं निरतिशयज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नवैष्णवरूपविषयं च त्वयोक्तं वचो वाक्यं तेन वचसा मोहोयं विगतो मम अविवेकबुद्धिरपगता ममेत्यर्थः ॥ १ ॥ श्रीरामाय नमः ॥

नित्याह । श्रुत्वेति । मयि करुणां निमित्तीकृत्योपकारोनुग्रहस्तदर्थमिति वचसो विशेषणं ॥ निरतिशयत्वं परमपुरुषार्थसाधनत्वं । अशो च्यानित्यादित्वंपदार्थप्रधानं वाक्यं । मोहोयमित्यात्मसाक्षित्वं दर्शयति । अविवेकेति । अविवेकबुद्धिरज्ञानविपर्यासात्मिका ॥ १ ॥

सप्तमादारभ्य तत्पदार्थनिर्णयार्थमपि भगवदुक्तं वचो मया श्रुतमित्याह किं चेति त्वत्तो भूतानामुत्पत्तिप्रलयौ त्वत्तः श्रुतौ विस्तराभ्यां संबध्यते म
हात्मनस्तव भावो माहात्म्यं पारमार्थिकं वा सोपाधिकं वा सर्वात्मत्वादिरूपं श्रुतमिति परिणम्यानुवृत्तिं द्योतयितुमपि चेत्युक्तं ॥ २ ॥ त्वदुक्तेऽर्थे विश्वासाभा
वान्न तस्मिन् दिदृक्षा किं तु कृतार्थीबुभूषयेत्याह एवमेतदिति येन प्रकारेण सोपाधिकेन निरुपाधिकेन वेत्यर्थः यदिमम आत्मत्वं निश्चित्य मद्वाक्यं ते

किंच भवउत्पत्तिरप्ययः प्रलयो भूतानां तौ भवाप्ययौ श्रुतौ विस्तरशो न संक्षेपतो मया त्वत्तः सकाशात्कमलपत्राक्ष कमलस्य पत्रं कमलपत्रं
तद्वदक्षिणी यस्य तव स त्वं कमलपत्राक्षः हे कमलपत्राक्ष माहात्म्यं महात्मनो भावो माहात्म्यं अपि चाव्ययमक्षयं श्रुतमित्यनुवर्त्तते ॥ २
एवमेतन्नान्यथा यथा येन प्रकारेणात्थ त्वं कथयसि त्वमात्मानं हे परमेश्वर तथापि द्रष्टुमिच्छामि ते तव ज्ञानैश्वर्यशक्तिबलवीर्यतेजो

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं ॥ २ ॥ एव
मेतद्यथात्थ त्वमात्मानं परमेश्वर द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥ मन्यसे यदि त
च्छक्यं मया द्रष्टुमिति प्रभो योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययं ॥ ४ ॥ ॥ ॥

भिः संपन्नमैश्वरं वैष्णवं रूपं पुरुषोत्तम ॥ ३ ॥ मन्यसे यदि चिंतयसि यदि मया ऽर्जुनेन तच्छक्यं द्रष्टुमिति प्रभो स्वामिन् योगेश्वर योगिनो यो
गास्तेषामीश्वरो योगेश्वरः हे योगेश्वर यस्मादहमतीवार्थी द्रष्टुं ततस्तस्मान्मे मदर्थं दर्शय त्वमात्मानमव्ययं ॥ ४ ॥ एवं चोक्तेऽर्जुनेन ॥

मानं तर्हि किमिति मदुक्तं दिदृक्ष्यते कृतार्थीबुभूषये युक्तं मत्वाह तथापीति चतुर्भुजादिरूपनिवृत्त्यर्थमाह ऐश्वरमिति तद्व्याचष्टे ज्ञानेत्या दि
ना ॥ ३ ॥ द्रष्टुमयोग्ये कुतो दिदृक्षेत्याशंक्याह मन्यस इति प्रभवति सृष्टिस्थितिसंहारप्रवेशप्रशासनेभ्य इति प्रभुः लक्षणया योगशब्दा
र्थमाह योगिन इति ततः इत्यादि व्याचष्टे यस्मादिति ॥ ४ ॥ श्रीसीतारामचंद्राय नमो नमः श्रीरामाय नमः श्रीरामचंद्राय नमः

अर्जुनमतिभक्तं सखायं प्रार्थितश्रवणेनाश्वासयितुमाह एवमिति । ४ दिव्यानि रूपाणि पश्येत्युक्तं तान्येव लेशतोऽनुक्रामति पश्यादित्या

पश्य मे मम पार्थ रूपाणि शतशोऽथ सहस्रशोऽनेकश इत्यर्थः । तानि च नानाविधानि अनेकप्रकाराणि दिवि भवानि दिव्यानि अप्रा
कृतानि नानावर्णाकृतीनि च नाना विलक्षणा नीलपीतादिप्रकारा वर्णास्तथा आकृतयश्चावयवसंस्थानविशेषा येषां रू

॥ श्रीभगवानुवाच ॥ पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः । नानाविधानि दिव्यानि नानावर्णाकृतीनि
च ॥ ५ ॥ पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा । बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥

पाणां तानि नानावर्णाकृतीनि च । ५ पश्य आदित्यान्द्वादश वसूनष्टौ रुद्रानेकादश अश्विनौ द्वौ मरुतः सप्तसप्तगणोपेतांस्तथा बहू
न्यन्यान्यदृष्टपूर्वाणि मनुष्यलोके त्वया त्वत्तोऽन्येन वा केनचित् पश्याश्चर्याणि रूपाण्यद्भुतानि भारत ६ ॥ ॥

निति तान्मरुतस्तथा पश्येति संबंधः नानाविधानीत्युक्तं तदेव स्फुटयति । बहूनीति अदृष्टपूर्वाणि पूर्वमदृष्टानि नानावर्णाकृतीनीत्यु

ंक्यन्ति आश्चर्याणीति ॥ ६ ॥

नकेवलमादित्यवस्वाद्येवमत्स्वरूपं त्वया द्रष्टुं शक्यं किंतु समस्तं जगदपि मद्देहस्थं द्रष्टुमर्हसीत्याह नेत्यादिना सप्तमीद्वयं मिथः संबध्यते समा
सांतर्गतापि सप्तमी तत्रैवान्विता यदीच्छसि तर्हि हैव पश्येति संबंधः ७ मन्यसे यदि त्वयुक्तमनुवदति किंत्विति सप्रपंचमनवच्छिन्नं मां
स्वचक्षुषा न शक्नोषि द्रष्टुमित्याह नत्विति कथं तर्हि त्वां द्रष्टुं शक्नुयामित्याशंक्याह येनेति दिव्यस्य चक्षुषो वक्ष्यमाणयोगशक्तपति

नकेवलमेतावदेव इहएकस्थमेकस्मिन्स्थितं जगत्कृत्स्नं समस्तं पश्याद्येदानीं सचराचरं सह चरेणाचरेण वर्त्तमानं च मम देहे
हे गुडाकेश यच्चान्यत् जयपराजयादि यत् शंकसे यद्वा जयेम यदि वा नो जयेयुरिति यद्वोचस्तदपि द्रष्टुं यदीच्छसि ॥ ७ ॥ किंच ॥
नतु मां शक्यसे नमां विश्वरूपधरं शक्यसे द्रष्टुमनेन प्राकृतेन चक्षुषा स्वेन स्वकीयेन चक्षुषा येन तु शक्यसे द्रष्टुं दिव्येनत

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरं ॥ मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥ नतु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ॥ दिव्यं
ददामि ते चक्षुः पश्य मे योगमैश्वरं ॥ ८ ॥ संजय उवाच ॥ एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ॥ दर्शयामास पार्थाय परमं रूपमैश्व-

दिव्यं ददामि ते तुभ्यं चक्षुस्तेन पश्य मे मम योगमैश्वरं ईश्वरस्येदमैश्वरं योगं शक्त्यतिशयमित्यर्थः ॥ ८ ॥ एवं यथोक्तेन प्रकारेणोक्त्वा
ततोऽनंतरं हे राजन् धृतराष्ट्र महायोगेश्वरो हरिः महांश्चासौ योगेश्वरश्च महायोगेश्वरः हरिर्नारायणो दर्शयामास दर्शितवान्
पार्थाय पृथासुताय परमं रूपं विश्वरूपमैश्वरं ९ श्रीरामचंद्राय नमो नमः श्रीसीतारामचंद्राय नमो नमः ॥ ॥

र्यं ॥ ९ ॥

शय दर्शने विनियोगं दर्शयति तेनेति ८ इमं वृत्तांतं धृतराष्ट्राय संजयो निवेदितवानित्याह संजय इति मदीयं विश्वरूपाख्यं रूपं न प्रा
कृतेन चक्षुषा निरीक्षितुं क्षमं किंतु दिव्येनेत्यादियथोक्तप्रकारः अनंतरं दिव्यचक्षुषः प्रदानादिति शेषः हरत्यविद्यां सकार्यामिति
हरिः यदीश्वरस्य मायोपहितस्य परममुत्कृष्टं रूपं दर्शयांबभूवेत्याह परममिति ९ श्रीसीतारामचंद्राय नमः श्रीरामाय नमः ॥

तदेव रूपं विशिनष्टि ॥ अनेकेति ॥ दिव्याभरणानि हारकेयूरादिभूषणानि उद्यतान्युद्धृतानि ॥ १० ॥ उक्तरूपवंतं भगवंतं प्रकारांतरेण विशि

अनेकवक्त्रनयनमनेकानि च वक्त्राणि नयनानि च यत्र यस्मिन् रूपे तदनेकवक्त्रनयनं अनेकाद्भुतदर्शनं अनेकान्यद्भुतानि विस्मापकानि दर्शनानि तस्मिन् रूपे तदनेकाद्भुतदर्शनं रूपं तथा अनेकदिव्याभरणं अनेकानि दिव्यान्याभरणानि यस्मिन् रूपे तदनेकदिव्याभरणं तथा दिव्यानेकोद्यतायुधं दिव्यानेकान्यस्त्रादीन्युद्यतान्यायुधानि यस्मिन् तद्दि

अनेकवक्त्रनयनमनेकाद्भुतदर्शनं ॥ अनेकदिव्याभरणं दिव्यानेकोद्यतायुधं १० ॥ दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनं ॥ सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखं ॥ ११ ॥ ॥ ॥

व्यानेकोद्यतायुधं दर्शयामासेति पूर्वेण संबंधः १० ॥ किंच ॥ दिव्यमाल्यांबरधरं दिव्यानि माल्यानि पुष्पाण्यंबराणि च वस्त्राणि च ध्रियंते येनेश्वरेण तं दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनं यस्य तं दिव्यगंधानुलेपनं सर्वाश्चर्यमयं सर्वाश्चर्यप्रायं देवमनंतं नास्यांतोऽस्तीत्यनंतस्तं विश्वतोमुखं सर्वभूतात्मत्वात्तं दर्शयामासार्जुनो ददर्शेति वा ध्याह्रियते ॥ ११ ॥

न स्थि किंचेति ॥ अध्याहारस्यापि पदसंघटनासंभवात् ॥ ११ ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीरामचंद्राय नमः ॥ श्रीः ॥ ॥

ननु प्रकृतस्य भगवतो रूपस्य दीप्तिरस्ति न वा न चेत्काष्टादिसाम्यं यद्यस्ति कीदृशी सेत्याशंक्याह ॥ यापुनरिति ॥ सा यदि स्यात्तदा तद्भासः स
दृशी सेति यो जना असंभाविताभ्युपगमार्थो यदिशब्दः स्यात् बोनिश्चयार्था सा कथं चित्सदृशी संभवति न तु भवत्येवेति विवक्षि

यापुनर्भगवतो विश्वरूपस्य भासउपमा सोच्यते ॥ दिव्यंतरिक्षे तृतीयस्यां वा दिवि सूर्याणां सहस्रं सूर्यसहस्रं तस्य युगपदुत्थि
तस्य या युगपदुत्थिता भाः सा यदि सदृशी स्यात्तस्य महात्मनो विश्वरूपस्य भासो यदि वा न स्यात्ततो पि विश्वरूपस्यैव भा अ
तिरिच्यत इत्यभिप्रायः ॥१२॥ किंच ॥ तत्र तस्मिन्विश्वरूपे एकस्मिन्स्थितमेकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा दे

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ॥ यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥१२॥
तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ॥ अपश्यद्देवदेवस्य शरीरे पांडवस्तदा ॥१३॥ ॥

वपितृमनुष्यादिभेदैरपश्यत् दृष्टवान् देवदेवस्य हरेः शरीरे पांडवोऽर्जुनस्तदा ॥१३॥ श्रीसीतारामचंद्राय नमः ॥

ताह ॥ यदि वेति ॥१२॥ न केवलमुक्तं देवमर्जुनो दृष्टवान् किं तु तत्रैव विश्वरूपे सर्वं जगदेकस्मिन्नेवस्थितमनुभूतवानित्याह ॥ किंचे
ति ॥ तदा विश्वरूपस्य भगवद्रूपस्य दर्शनदशायामित्यर्थः ॥१३॥ श्रीसीतारामचंद्राय नमः ॥ श्रीरामचंद्राय नमो नमः ॥ ॥

विश्वरूपधरस्य भगवतस्तस्मिन्नेकीभूतजगतश्चोक्तविशेषणस्य दर्शनानंतरं किमकरोदित्यपेक्षायामाह ततइति । आश्चर्यबुद्धिर्विस्मयः रोम्णां हृष्टत्वं पुलकितत्वं प्रकर्षो भक्तिश्रद्धयोरतिशयः । १४ । कथं भगवंतं प्रत्यर्जुनो भाषितवानिति पृच्छति । तत्कथमिति । ततप्रश्नमपेक्षितं पूर्व

ततः । ततस्तं दृष्ट्वा स विस्मयेनाविष्टो विस्मयाविष्टः हृष्टरोमा हृष्टानि रोमाणि यस्य सोयं हृष्टरोमा धनंजयः प्रणम्य प्रकर्षेण नमनं कृत्वा प्रह्वीभूतः सन् शिरसा देवं विश्वरूपधरं कृतांजलिर्नमस्कारार्थं संपुटीकृतहस्तः सन्नभाषतउक्तवान् । १४ । ततकथं यत्त्वया दर्शितं विश्वरूपं तदहं पश्यामीति स्वानुभवमाविःकुर्वन् । पश्याम्युपालभे हे देवत

ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः प्रणम्य शिरसा देवं कृतांजलिरभाषत । १४ । अर्जुनउवाच । पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् । ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् । १५ ।

व देहे देवान् सर्वान् तथा भूतविशेषसंघान् भूतविशेषाणां स्थावरजंगमानां नानासंस्थानविशिष्टानां संघाः भूतविशेषसंघास्तान् किंच ब्रह्माणं चतुर्मुखमीशमीशितारं प्रजानां कमलासनस्थं पृथिवीपद्ममध्ये मेरुकर्णिकासनस्थमित्यर्थः ऋषींश्च वसिष्ठादींश्च सर्वानुरगांश्च वासुकिप्रभृतीन् दिव्यान् दिविभवान् । १५ । ॥

न्नवतारयति । यत्त्वयेति । भूतविशेषसंघेषु देवानामंतर्भावेपि पृथक्करणमुत्कर्षात् ब्रह्मणः सर्वदेवतात्मकत्वेपि तेभ्यो भेदकथनं तदुपादकत्वादिति मत्वाह । किंचेति । ऋषीणामुरगाणां च किंचिद्वैषम्यात् पृथक्त्वं दिव्यानि त्युभयेषां विशेषणं । १५ । ॥

यत्र भगवद्देहे सर्वमिदं दृष्टं तमेव विशिनष्टि अनेक इति आदिशब्देन मूलमुच्यते नांतं न मध्यमित्यत्रापि पश्यामीत्यस्य संबंधं सूचयति नांतं पश्यामीति १६ विश्वरूपवंतं भगवंतमत्र प्रकारांतरेण प्रपंचयति किंचेति परिच्छिन्नत्वं व्यावर्त्तयति सर्वत इति दुर्निरीक्ष्यं पश्यामीत्य

किंच अनेकबाहूदरवक्त्रनेत्रं अनेके बाहव उदराणि वक्त्राणि नेत्राणि च यस्य तव स त्वमनेकबाहूदरवक्त्रनेत्रस्तं त्वामनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वा त्वां सर्वतः सर्वत्र अनंतरूपं अनंतानि रूपाणि अस्येत्यनंतरूपस्तमनंतरूपं नांतमंतोवसानं न मध्यं मध्यं नामद्वयोः कोट्योरंतरं न पुनस्तवादिं न तव देव त्वां तं पश्यामि न मध्यं पश्यामि न पुनरादिं पश्यामि हे विश्वेश्वर विश्वरूप १६ किंच किरीटिनं किरीटं नाम शिरोभूषणविशेषस्तत् यस्यास्तीति स किरीटी तं किरीटिनं तथा गदिनं गदा विद्यते यस्येति गदिनं च चक्रिणं च च

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वा सर्वतोनंतरूपं नांतं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप १६ किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमंतं पश्यामि त्वां दुर्निरीक्ष्यं समंतात् दीप्तानलार्कद्युतिमप्रमेयं १७

क्रं यस्यास्तीति चक्री तं चक्रिणं तेजोराशिं तेजःपुंजं सर्वतो दीप्तिमंतं सर्वतो दीप्तिर्यस्यास्ति सर्वदीप्तिमान् तं सर्वतो दीप्तिमंतं पश्यामि त्वां दुर्निरीक्ष्यं दुःखेन निरीक्ष्यो दुर्निरीक्ष्यस्तं दुर्निरीक्ष्यं समंतात्समंततः सर्वत्र दीप्तानलार्कद्युतिम् अनलश्चार्कश्चानलार्कौ दीप्तौ अनलार्कौ तयोर्दीप्तानलार्कयोर्द्युतिस्तेजो यस्य तव स त्वं दीप्तानलार्कद्युतिस्तं त्वां दीप्तानलार्कद्युतिं अप्रमेयं न प्रमेयमशक्यपरिछेदमित्येतत् १७ श्रीसीतारामचंद्राय नमः श्रीरामचंद्राय नमः श्रीसीतारामचंद्राय नमो नमः ॥

धिकारिभेदादविरुद्धं पुरतो वा पार्श्वतो वा नास्य दर्शनं किंतु सर्वत्रेत्याह समंतादिति दीप्तिमत्त्वं दृष्टांतेन स्पष्टयति दीप्तेति १७ ॥

सप्रपंचे भगवद्रूपे प्रकृते प्रकरणविरुद्धं अक्षरमित्यादि निरुपाधिकवचनमित्याशंक्याह अत एवेति योगशक्तिरैश्वर्यातिशयः न क्षरतीति निः
प्रपंचत्वमुच्यते परमपुरुषार्थत्वात्परमार्थत्वाच्च ज्ञातव्यत्वं यस्मिन्द्यौः पृथिवी त्यादौ प्रपंचायतनस्यैव ततो निःकृष्टस्य ज्ञातव्यत्वश्रवणात्कु
तो ब्रह्मणो ज्ञातव्यत्वं तत्राह त्वमस्येति निःप्रपंचस्य ब्रह्मणो ज्ञेयत्वेहेत्वंतरमाह किंचेति अविनाशित्वात्तवैव ज्ञातव्यत्वात् अतिरिक्तस्यवि

अत एव ते योगशक्तिदर्शनादनुमिनोमि त्वमक्षरं न क्षरतीति परमं ब्रह्म वेदितव्यं मुमुक्षुभिस्त्वमस्य विश्वस्य जगतः परं प्रकृष्टं निधानं निधी
यतेऽस्मिन्निति निधानं परमाश्रय इत्यर्थः किंच त्वमव्ययो न तव व्ययो विद्यत इत्यव्ययः शाश्वतधर्मगोप्ता शश्वद्भवः शाश्वतो नि
त्यो धर्मस्तस्य गोप्ता सनातनश्चिरंतनस्त्वं पुरुषः परो मतोऽभिप्रेतो मे मम १८ किंच अनादिमध्यांतं आदिश्च मध्यं च अंतश्च न विद्यंते

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानं त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे १८ अनादि
मध्यांतमनंतवीर्यमनंतबाहुं शशिसूर्यनेत्रं पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपंतं १९ ॥

यस्य सोयमनादिमध्यांतस्तं त्वां अनादिमध्यांतमनंतवीर्यं तव वीर्यस्यांतो नास्तीत्यनंतवीर्यस्तमनंतबाहुं अनंता बाहवो यस्य तव स
त्वमनंतबाहुस्तं त्वामनंतबाहुं शशिसूर्यौ नेत्रे यस्य तं चंद्रादित्यनयनं पश्यामि त्वां दीप्तहुताशवक्त्रं दीप्तश्चासौ हुताशश्च स वक्त्रं यस्य
स त्वं दीप्तहुताशवक्त्रस्तं त्वां स्वतेजसा विश्वमिदं समस्तं तपंतं संतापयंतं १९ श्रीसीतारामचंद्रायनमः श्रीरामायनमः ॥

॥ नाशित्वेन हेयत्वादित्यर्थः ज्ञानकर्मात्मनो धर्मस्य नित्यत्वं वेदप्रमाणकत्वं धर्मसंस्थापनार्थाय संभवामीत्युक्तत्वात्तद्गोप्ता रक्षिता १८
॥ भगवतो रूपस्य विश्वरूपाख्यं रूपमेव पुनर्विवृणोति किंचेति हुतमश्नातीति हुताशो वह्निः १९ श्रीरामचंद्रायनमोनमः ॥

प्रकृतभगवद्रूपस्यव्याप्तिंव्यनक्ति द्यावापृथिव्योरिति तस्यैवभयंकरत्वमाचष्टे दृष्ट्वेति २० अमीहित्वामादिश्लोकमनंतरग्रंथतात्पर्यमाह अथेति तंभगवंतं पांडवजयमेकांतिकंदर्शयंतंपश्यन्नर्जुनोब्रवीतीत्याह तंपश्यन्निति विश्वरूपस्यैवप्रपंचनार्थमनंतरग्रंथजातमितिदर्शयति किंचेति उभयोरपिसे

द्यावापृथिव्योरिदमंतरंहिअंतरिक्षंव्याप्तंत्वयैकेनविश्वरूपधरेणदिशश्चसर्वाव्याप्ताःदृष्ट्वाउपलभ्याद्भुतंविस्मापकंरूपमिदंतवउग्रंक्रूरंलोकत्रयंप्रव्यथितंभीतंप्रचलितंवाहेमहात्मन्नक्षुद्रप्रभाव २० अथाधुनापुरायद्वाजयेमयदिवानोजयेयुरित्यर्जुनस्यसंशयआसीत्तन्निर्णयायपांडवानांजयमैकांतिकंदर्शयामीतिप्रवृत्तोभगवांस्तंपश्यन्नाह किंच अमीहियुध्यमानायोद्धारस्त्वासुरसंघायेअत्रभूभारावतारा

द्यावापृथिव्योरिदमंतरंहिव्याप्तंत्वयैकेनदिशश्चसर्वाः दृष्ट्वाद्भुतंरूपमुग्रंतवेदंलोकत्रयंप्रव्यथितंमहात्मन् २० अमीहित्वासुरसंघाविशंतिकेचिद्भीताःप्रांजलयोगृणंति स्वस्तीत्युक्त्वामहर्षिसिद्धसंघास्तुवंतित्वांस्तुतिभिःपुष्कलाभिः २१ ॥

र्थंअवतीर्णावसवादिदेवसंघामनुष्यसंस्थानाविशंतिप्रविशंतोदृश्यंते तत्रकेचिद्भीताःप्रांजलयःसंतोगृणंतिस्तुवंतित्वामन्येपलायनेप्यशक्ताःसंतोयुद्धेप्रत्युपस्थितेउत्पातादिनिमित्तान्युपलक्ष्यस्वस्त्यस्तुजगतइतिउक्त्वामहर्षिसिद्धसंघाःमहर्षीणांचसिद्धानांचसंघाः स्तुवंतित्वांस्तुतिभिःपुष्कलाभिःसंपूर्णाभि

नयोरवस्थितेषुयोद्धुकामेषुअवांतरविशेषमाह तत्रेति समरभूमौसमागतानांदृष्टुकामानां नारदप्रभृतीनांविश्वविनाशमाशंकमानानांतंपरिजिहीर्षतांस्तुतिपदेषुभगवद्विषयेषुप्रवृत्तिप्रकारंदर्शयति स्रुद्रइति २१ ॥

दृश्यमानभगवद्रूपस्यविस्मयकरत्वेहेत्वंतरमाह किंचेति एतएवोक्तारुद्रादयःसर्वेविस्मयमापन्नास्त्वांपश्यंतीतिसंबंधः ॥ २२ ॥ लोकत्रयंप्रव्य
थितमित्युक्तमुपसंहरति यस्मादिति ईदृशंयस्मात्तेरूपंतस्मात्तत्दृष्ट्वेतियोजना भयेनलौकिकवदहमपिव्यथांपीडांदेहेंद्रियप्रचलनंप्राप्तो

किंचान्यत् रुद्रादित्यावसवोयेचसाध्याविश्वेऽश्विनौविश्वेदेवाश्चअश्विनौचदेवौचमरुतश्चऊष्मपाश्चपितरोगंधर्वयक्षासुरसिद्धसंघाःगंधर्वा
हाहाहूहूप्रभृतयोयक्षाःकुबेरप्रभृतयोअसुराविरोचनप्रभृतयःसिद्धाःकपिलादयःतेषांसंघागंधर्वयक्षासुरसिद्धसंघाःवीक्ष्यंतेपश्यं
तित्वांविस्मिताःविस्मयमापन्नाःसंतस्तएवसर्वे ॥ २२ ॥ यस्मात् रूपंमहदतिप्रमाणंतेतवबहुवक्त्रनेत्रंबहूनिवक्त्राणिमुखानिनेत्राणिचचक्षूं
षियस्मिन्तत्रूपंबहुवक्त्रनेत्रंमहाबाहोबहुबाहूरुपादंबहवोबाहवःउरवःपादाश्चयस्मिन्रूपेतत्बहुबाहूरुपादंकिंचबहूदरंबहूनिउ

रुद्रादित्यावसवोयेचसाध्याविश्वेश्विनौमरुतश्चोष्मपाश्च ॥ गंधर्वयक्षासुरसिद्धसंघावीक्षंतेत्वांविस्मिताश्चैवसर्वे ॥ २२ ॥ रूपंम
हत्तेबहुवक्त्रनेत्रंमहाबाहोबहुबाहूरुपादं बहूदरंबहुदंष्ट्राकरालंदृष्ट्वालोकाःप्रव्यथितास्तथाहं ॥ २३ ॥ नभःस्पृशंदीप्तम
नेकवर्णंव्यात्ताननंदीप्तविशालनेत्रं ॥ दृष्ट्वाहित्वांप्रव्यथितांतरात्माधृतिंनविंदामिशमंचविष्णो ॥ २४ ॥ श्रीः ॥ ॥

दराणि अस्मिन्नितितद्बहूदरंबहुदंष्ट्राकरालंबहुभिःदंष्ट्राभिःकरालंविकृतंतद्बहुदंष्ट्राकरालंदृष्ट्वारूपमीदृशंलोकाःलौकिकाःप्राणिनःप्रव्य
थिताःप्रचलिताभयेनतथाहमपि ॥ २३ ॥ तत्रेदंकारणं नभःस्पृशंद्युस्पर्शमित्यर्थः दीप्तंप्रज्वलितमनेकवर्णंअनेकेवर्णाभयंकरानानासंस्थानाय
स्मिन्त्वयितंत्वामनेकवर्णंव्यात्ताननंव्यात्तानिविवृतानिआननानिमुखानियस्मिन्त्वयितंत्वांव्यात्ताननंदीप्तविशालनेत्रंदीप्तानिप्रज्वलितानिवि
शालानिविस्तीर्णानिनेत्राणियस्मिंस्त्वयितंत्वांदीप्तविशालनेत्रंदृष्ट्वाहित्वांप्रव्यथितांतरात्माप्रव्यथितअंतरात्मामनोयस्यसोऽहंप्रव्यथितांतरात्मा
सन्धृतिंनविंदामिधैर्यंनलभेशमंचोपशमंमनसस्तुष्टिंहेविष्णो ॥ २४
स्मीत्याहतथाऽहमिति ॥ २३ ॥ अर्जुनस्यविश्वरूपदर्शनेनव्यथितत्वेहेतुमाह नत्रेति ॥ २४ ॥

श्रीं

ति

दृश्यमानेपि भगवद्देहे परितोषाद्यभावे कारणांतरं प्रश्नपूर्वकमाह कस्मादिं दृष्ट्वेत्येवकारेण प्राप्तिर्व्यावर्त्यते अस्माकं जयं परेषां पराजयं दिदृक्षितं पश्यामीत्याह येभ्य इति ॥२५॥ तत्र हेतुत्वेन श्लोकमवतारयति ॥यत इति॥ नकेवलं दुर्योधनादीनामेव पराज

कस्मात् दंष्ट्राकरालानि च दंष्ट्राभिः करालानि विकृतानि तेतव मुखानि दृष्ट्वैवोपलभ्य कालानलसन्निभानि प्रलयकाले लोकानां दाहकोग्निः कालानलस्तत्सन्निभानि कालानलसदृशानि मुखानि दृष्ट्वेत्येतद्दिशः पूर्वापरविवेकेन नजाने दिग्मूढो जातोस्म्यतो नलभे च नोपलभे च शर्म सुखमतः प्रसीद प्रसन्नो भव देवेश जगन्निवास येभ्यो मम पराजयाशंका

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि ॥ दिशो न जाने न लभे च शर्म प्र
सीद देवेश जगन्निवास ॥२५॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः ॥
भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥२६॥ ॥श्रीः॥ ॥

प्रागेवासीत्साचापगता ॥२५॥ यतः ॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः दुर्योधनप्रभृतयः त्वरमाणा विशंतीति व्यवहितेन संबंधः ॥ सर्वे सहैव संहताः अवनिपालसंघैः अवनिं पृथ्वीं पालयंतीत्यवनिपालाः तेषां संघैः ॥ किंच ॥ भीष्मो द्रोणः सूतपुत्रः कर्णस्तथासौ सहास्मदीयैरपि धृष्टद्युम्नप्रभृतिभिर्योधमुख्यैः योधानां मुख्यैः प्रधानैः सह ॥२६॥ ॥

यः किंतु भीष्मादीनामपीत्याह ॥ किंचेति ॥२६॥ श्रीसीतारामचंद्राय नमः ॥ श्रीसीतारामचंद्राय नमो नमः ॥ ॥ ॥

भगवत्तरूपस्योग्रत्वे हेतुंतरमाह। किंचेति। प्रविष्टानां मध्ये केचिदिति संबंधः २७। उभयोरपि सेनयोरवस्थितानां राज्ञां भगवन्मुखप्रवे

किंच। वक्त्राणि मुखानि ते तव त्वरमाणास्त्वरायुक्ताः संतो विशंति किंविशिष्टानि दंष्ट्राकरालानि भयानकानि भयंकराणि किं
च केचित् मुखानि प्रविष्टानां मध्ये विलग्ना दशनांतरेषु दंतानां अंतरेषु मांसमिव भक्षितं संदृश्यंते उपलभ्यंते चूर्णितैरुत्तमांगैः
चूर्णीकृतैः शिरोभिः २७ कथं प्रविशंति मुखानीत्याह। यथा नदीनां स्रवंतीनां बहवोऽनेकेंबुनां वेगाः अंबुवेगास्त्वराविशे
षाः समुद्रमेवाऽभिमुखाः प्रतिमुखा द्रवंति विशंति तथा तद्वत् तवामी भीष्मादयो नरलोकवीरा मनुष्यलोके शूरा विशंति

वक्त्राणि ते त्वरमाणा विशंति दंष्ट्राकरालानि भयानकानि। केचिद्विलग्ना दशनांतरेषु संदृश्यंते चूर्णितैरुत्तमां
गैः। २७ यथा नदीनां बहवोंबुवेगाः समुद्रमेवाभिमुखा द्रवंति। तथा तवामी नरलोकवीरा विशंति वक्त्राण्यभिवि
ज्वलंति। २८ यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः। तथैव नाशाय विशंति लोकास्तवापि वक्त्रा
णि समृद्धवेगाः। २९ ॥

वक्त्राण्यभिविज्वलंति प्रकाशमानानि २८ ते किमर्थं विशंति कथं चेत्याह। यथा
प्रदीप्तं ज्वलितं अग्निं पतंगाः क्षुद्रपतंगाः पक्षिणो विशंति प्रविशंति नाशाय समृद्धवेगाः समृद्ध उद्भूतो वेगो गतिर्येषां ते स
मृद्धवेगास्तथैव नाशाय विशंति लोकाः प्राणिनः तवापि वक्त्राणि समृद्धवेगाः। २९ श्रीसीतारामचंद्राय नमः। ॥

शं निदर्शनेन विशदयति कथमित्यादिना। २८ प्रवेशप्रयोजनं तत्प्रकारविशेषं चोदाहरणेन स्फोरयति। ते किमर्थमित्यादिना २९। ॥

योद्धुकामा नोराज्ञां भगवन्मुखप्रवेशप्रकारं प्रदर्श्य तस्यां दशायां भगवतस्तद्भासां च प्रवृत्तिप्रकारं प्रत्यापयति त्वंपुनरिति ॥ भगवत्प्रवृत्तिमेवं प्रत्याय्य तदीयां भासां प्रवृत्तिं प्रकटयति किंचेति ३० भगवत्रूपस्यार्जुनेन दृष्टपूर्वत्वात्तस्य तस्मिन्न जिज्ञासेत्याशंक्याह

त्वंपुनः ॥ लेलिह्यसे आस्वादयसि ग्रसमानोऽतः प्रवेशयन् समंतात्समंततो लोकान्समग्रान्वदनैर्वक्त्रैर्ज्वलद्भिर्दीप्यमानैस्तेजोभिरापूर्य संव्याप्य जगत्समग्रं सहाग्रेण समस्तमित्येतत् ॥ किंच ॥ भासो दीप्तयस्तवोग्राः क्रूराः प्रतपंति संतापं कुर्वंति हे विष्णो व्यापनशील ॥ ३० ॥ यत एवमुग्रस्वभावोऽतः ॥ आख्याहि कथय मे मह्यं को भवानेवं उग्ररूपः ॥ अति क्रूरो नमो

लेलिह्यसे ग्रसमानः समंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ॥ तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति विष्णो ॥ ३० ॥ आख्याहि मे को भवानुग्ररूपो नमोस्तु ते देववर प्रसीद ॥ विज्ञातुमिच्छामि भवंतमाद्यं न हि प्रजानामि तव प्रवृत्तिं ॥ ३१ ॥

स्तु ते तुभ्यं हे देववर देवानां प्रधान प्रसीद प्रसादं कुरु विज्ञातुं इच्छामि विशेषेण ज्ञातुमिच्छामि भवंतमाद्यं आदौ भवमाद्यं न हि यस्मात्प्रजानामि तव त्वदीयां प्रवृत्तिं चेष्टां ॥ ३१ ॥ श्रीसीतारामचंद्रायनमोनमः ॥ श्रीरामचंद्रायनमोनमः ॥ ॥

॥ यत इति ॥ उपदेशं शुश्रूषमाणेन उपदेशकर्त्रे प्रह्वीभावो नमनं कर्तव्यमिति सूचयति ॥ नमोस्त्विति ॥ क्रौर्यत्यागमर्थयते ॥ प्रसादमिति ॥ त्वमेव मां जानीषे किमर्थमित्यमिदानीमर्थयसे मदीयां चेष्टां द्दष्ट्वात यैव प्रतिपद्यस्वेत्याशंक्याह ॥ न हीति ॥ ३१ ॥

यत्त्वं यदर्थाय च प्रवृत्तिः तत्सर्वं भगवानुक्तवानित्याह ॥ श्रीभगवानुवाच ॥ कालः क्रियाशक्त्युपहितः परमेश्वरः अस्मीति वर्तमानयुद्धापेक्षितत्वं कालस्य विवक्षितं लोकसंहारार्थं तत्प्रवृत्तावपि नासावर्थवती प्रतिपक्षाणां भीष्मादीनां मत्प्रवृत्तिं विना संहर्तुम् अशक्यत्वादित्याशंक्याह ऋतेपीति ३२ तवोदासीन्येपि प्रतिकूलानीकस्यामत्प्रतिकूल्यादेव न भविष्यंतीत्येवं यस्मान्निश्चितं तस्मात्त्वदो

कालोस्मि लोकक्षयकृल्लोकानां क्षयं करोति लोकक्षयकृत्प्रवृद्धो वृद्धिंगतो यदर्थं प्रवृत्तस्तत्शृणु लोकान्समाहर्तुं संहर्तुं इहास्मिंल्लोके प्रवृत्त ऋतेविनापित्वां न भविष्यंति भीष्मद्रोणकर्णप्रभृतयः सर्वेयेभ्यः तवाशंका येऽवस्थिताः प्रत्यनीकेषु योधा अनीकमनीकं प्रतिपक्षभूतेषु अनीकेषु योधा योद्धारः ३२ यस्मादेवं तस्मात्त्वमुत्तिष्ठ भीष्मप्रभृतयोऽतिरथा अजेया देवै

॥ श्रीभगवानुवाच ॥ कालोस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः ॥ ऋतेपि त्वां न भविष्यंति सर्वे येवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२ तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुंक्ष्व राज्यं समृद्धं मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ३३

रप्यर्जुनेन जिता इति यशोऽलभस्व केवलं पुण्यैर्हि तल्लभ्यते जित्वा शत्रून्दुर्योधनप्रभृतीन् भुंक्ष्व राज्यं असपत्नमकंटकं समृद्धं मया एवैते निहताः निश्चयेन हताः प्राणैर्वियोजिताः पूर्वमेव निमित्तमात्रं भव हे सव्यसाचिन्वामेनापि हस्तेन शराणां

दासीन्यमकिंचित्करमित्याह यस्मादिति उत्तिष्ठ युद्धायोन्मुखीभव यशो लाभमभिनयति भीष्मेति किं तेनापुमर्थेने त्याशंक्याह पुण्यैरिति राज्यभोगेपेक्षिते किमनपेक्षितेनेत्याशंक्याह जित्वेति भीष्मादिष्वतिरथेषु सत्सु कुतो जयाशंकेत्याशंक्याह मयेति तर्हि मृतमारणार्थं न मे प्रवृत्तिस्तत्राह निमित्तेति सव्यसाचिपदं विभजते वामेनेति ३३ श्रीरामायनमः ॥

मयैवेत्यादिनोक्तं प्रपंचयति द्रोणं चेति किमितिकतिचिदेवात्र द्रोणादयो गण्यंते तत्राह येष्विति द्रोणादिषु कुतः शंकेत्याशंक्य द्वयोः शंकानिमित्तमाह तत्रेत्यादिना जयद्रथे शंकानिमित्तमाह तथेति दिव्यास्त्रसंपन्न इति संबंधः तत्र शंकायां कारणांतरमाह तस्येति कर्णेपि तत्कारणं कथयति कर्णोपीति पूर्ववदेव संबंधः हेत्वंतरमाह वासवेति साखल्वमोघा पुरुषमेकमं

येषु येष्वर्जुनस्याशंका तान्तान् व्यपदिशति भगवान् मयाहतानिति तत्र द्रोण भीष्मयोस्तावत्प्रसिद्धमाशंकाकारणं द्रोणो धनुर्वेदाचार्यो दिव्यास्त्रसंपन्न आत्मनश्च विशेषतो गुरुर्गरिष्ठो भीष्मः स्वच्छंदमृत्यु दिव्यास्त्रसंपन्नश्च परशुरामेण द्वंद्वयुद्धमगमत् न च पराजितस्तथा जयद्रथोपि यस्य पिता तपश्चरति मम पुत्रस्य शिरो भू

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् मया हतां
स्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान् ३४ ॥ ॥

मौ पातयिष्यति यस्तस्यापि शिरः पतिष्यतीति कर्णोपि वासवदत्तया शक्त्या त्वमोघया संपन्नः सूर्यपुत्रः कानीनो यतोऽतस्तन्नाम्नैव निर्देशः मया हतान् त्वं जहि निमित्तमात्रेण मा व्यथिष्ठास्तेभ्यो भयं मा कार्षीर्युध्यस्व जेतासि दुर्योधनप्रभृतीन् रणे युद्धे सपत्नान् शत्रून् ३४

स्यं तत्समर्थे पातयिष्यत्येव निवर्तते जन्मनापि तस्य शंकनीयत्वमाह सूर्येति कुंती हि कन्यावस्थायां मंत्रप्रभावं ज्ञातुमादित्यमाजुहाव तस्यामेवावस्थायामयमुद्भूवत्तदाह कानीन इति एतदेवाभिप्रेत्य कर्णग्रहणमित्याह यत इति उक्तेष्वन्येषु च न त्वया शंकितव्यमित्याह मयेति ३४ श्री सीताराम चंद्राय नमो नमः ॥ ॥

पराजयभयात्करिष्यतिसंधिमितिबुद्ध्यासंजयोराज्ञेदृत्तांतमुक्तवानित्याह॥ संजयइति॥ पूर्वोक्तंवचनंकालोस्मीत्यादिविश्वरूपदर्शन
दशायामर्जुनस्यभगवतासंवादवचनंकिमितिसंजयोराज्ञेव्यजिज्ञपदित्याशंक्यतदुक्तेस्तात्पर्यमाह॥ अत्रेति॥ तमेवाभिप्रायंप्रश्नद्वा

एतनच्छ्रुत्वावचनंकेशवस्यपूर्वोक्तंकृतांजलिःसन्वेपमानःकंपमानःकिरीटीनमस्कृत्वाभूयःपुनरेवाहउ
क्तवान्कृष्णंसगद्गदंसहगद्गदयावाचामंदशब्देनभयाविष्टस्यदुःखाभिघातात्स्नेहाविष्टस्यचहर्षोद्भवात्
अश्रुपूर्णनेत्रत्वेसतिश्लेष्मणाकंठावरोधस्ततश्चवाचोऽपाटवंमंदशब्दत्वंयत्सगद्गदस्तेनसहवर्ततइति
सगद्गदंवचनमाहेतिवचनक्रियाविशेषणमेतत्भीतभीतःपुनःपुनर्भयाविष्टचेताःसन्प्रणम्यप्र

॥संजयउवाच॥ एतच्छ्रुत्वावचनंकेशवस्यकृतांजलिर्वेपमानःकिरी
टीनमस्कृत्वाभूयएवाहकृष्णंसगद्गदंभीतभीतःप्रणम्य॥ ३५॥ ॥

ह्वीभूत्वाआहेतिव्यवहितेनसंबंधः॥ अत्रावसरेसंजयवचनंसाभिप्रायंकथंद्रोणादिष्वर्जुनेननिहते
ष्वजेयेषुचतुर्षुशत्रुषुनिराश्रयोदुर्योधनोनिहतएवेतिमत्वाधृतराष्ट्रोजयंप्रतिनिराशःसन्संसं
धिंकरिष्यतिततःशांतिरुभयेषांभविष्यतीतितदपिनाश्रोषीत्धृतराष्ट्रोभवितव्यवशात्॥ ३५॥
राविशदयति॥ कथमित्यादिना॥ तर्हिसंजयवचनंश्रुत्वाकिमितिराजासंधिंनकारयामासेतितत्राह॥ तदपीति॥ ३५॥ ॥ ॥

किंतदर्जुनो भगवंतंप्रतिसगद्गदवचनमुक्तवानितितदाह अर्जुनइति विषयविशेषणत्वमेवव्यनक्ति युक्तइति भगवतोहर्षा
दिविषयत्वंयुक्तमित्यत्रहेतुमाह यतइति तवप्रकीर्त्योहर्षवदनुरागंचगच्छतिजगदित्याह तथेति तच्चेत्यनुरागागमनंरक्षःसु

स्थानेयुक्तं किंतत्तवप्रकीर्त्यात्वन्माहात्म्यकीर्त्तनेनश्रुतेनहृषीकेशयत्जगत्प्रहृष्यतिप्रहर्षमुपैतितत्स्थानेयुक्तमि
त्यर्थः अथवाविषयविशेषणपदंस्थानेइतियुक्तोहर्षादिविषयोभगवान्यतःईश्वरःसर्वात्मासर्वभूतसुहृच्चेतितथानुरज्य

अर्जुनउवाच॥ स्थानेहृषीकेशतवप्रकीर्त्याजगत्प्रहृष्यत्यनुरज्यतेच
रक्षांसिभीतानिदिशोद्रवंतिसर्वेनमस्यंतिचसिद्धसंघाः ३६॥ ॥

तेच अनुरागंचोपैतितत्त्वद्विषयइतिव्याख्येयं॥ किंच॥ रक्षांसिभीतानिभयाविष्टानिदिशोद्रवंतिगच्छंतितच्चस्था
नेतत्विषयेसर्वेनमस्यंतिनमस्कुर्वंतिच सिद्धसंघाः सिद्धानांसमुदायाःकपिलादीनांतच्चस्थाने॥३६॥ ॥

जगदेकदेशभूतेषुप्रतिपक्षेषुकुतोजगतोभगवतिहर्षानुरागावित्याशंक्याह किंचेति इतश्चजगतोभगवतिहर्षादियुक्त

उक्तेर्थे हेतुर्थत्वेनोत्तरश्लोकमवतारयति ॥ भगवत इति ॥ महात्मत्वमक्षुद्रचेतस्त्वं गुरुतरत्वान्नमस्कारादियोग्यत्वमाह ॥ गुरुतरायेति ॥ तत्रैव हेत्वंतरमाह ॥ यत इति ॥ महात्मत्वादिहेतूनामुक्तानां फलमाह ॥ अत इति ॥ तत्रैव हेत्वंतराणि सूचयति ॥ हे अनंतेति ॥ अनवच्छिन्नत्वं सर्वदेवनियंतृत्वं सर्वजगदाश्रयत्वं च तव नमस्कारादियोग्यत्वे कारणमित्यर्थः ॥ तत्रैव हेत्वंतरमाह ॥ त्वमिति

भगवतो हर्षादिविषयत्वे हेतुं दर्शयति ॥ कस्माच्च हेतोस्ते तुभ्यं न नमेरन्न नमस्कुर्युर्हे महात्मन्गरीयसे गुरुतराय यतो ब्रह्मणो हिरण्यगर्भस्यादिकर्त्ता कारणमतः तस्मादादिकर्त्रे कथमेते न नमस्कुर्युरतो हर्षादीनां नमस्कारस्य च स्थानं त्वमहो विषय इत्यर्थः ॥ हे अनंत देवेश जगन्निवास त्वमक्षरं तत्परं यद्वेदांतेषु श्रूयते किं तत्सदस

॥ कस्माच्च ते न नमेरन्महात्मन्गरीयसे ब्रह्मणोप्यादिक
र्त्रे ॥ अनंत देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥

त्सत् यद्विद्यमानमसच्च यत्र नास्तीति बुद्धिस्ते उपधानभूते सदसती यस्याक्षरस्य यत्तद्द्वारेण सदसदित्युपचर्यते परमार्थतस्तु सदसतः परं यदक्षरं वेदविदो वदंति तत्त्वमेव नान्यदित्यभिप्रायः ॥ ३७ ॥ ॥

तत्र मानमाह ॥ यदिति ॥ कथमेकस्यैव सदसद्रूपं तदाह ॥ त इति ॥ कथं सतोऽसतश्चाक्षरं प्रत्युपाधित्वं तमाह ॥ तत्द्वारेणेति ॥ तत्परं यदित्येतद्व्याचष्टे ॥ परमार्थतस्त्विति ॥ ३७ ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीरामायनमः ॥ श्रीरामचंद्रायनमः ॥

अनंतत्वादिना भगवतो नमस्कारादियोग्यत्वमुक्तं संप्रति जगत्स्रष्टृत्वादिना पि तद्योग्यत्वमस्तीति स्तुतिद्वारा दर्शयति ॥ पुनरपीति
जगतः स्रष्टा पुरुषो हिरण्यगर्भ इति पक्षं प्रत्याह ॥ पुराण इति ॥ स्रष्टृत्वं निमित्तत्वमेवेति तटस्थेश्वरवादिनस्तान् प्रत्युक्तं
त्वमेवेति ॥ महाप्रलयादावित्यादिपदमवांतरप्रलयार्थेश्वरस्योभयथाकारणत्वं सर्वज्ञत्वेन साधयति ॥ किंचेति ॥ वेद्यं वेदि

पुनरपि स्तौति ॥ त्वमादिदेवो जगतः स्रष्टृत्वात्पुरुषः पुरेशयनात्पुराणश्चिरंतनस्त्वमेवास्य विश्वस्य परं प्रकृष्टं निधानं
निधीयतेस्मिन् जगत्सर्वं महाप्रलयादाविति ॥ किंच वेत्ता असि वेदितासि सर्वस्यैव वेद्यजातस्य यच्च वेद्यं च वेदनार्हं तच्चा

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानं ॥ वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनंतरूप ॥ ३८ ॥

सि परं च धाम परमं पदं वैष्णवं त्वया ततं व्याप्तं विश्वं समस्तं अनंतरूप अंतो न विद्यते तव रूपाणां ॥ ३८ ॥ ॥

त्वभावेनाद्वैतानुपपत्तिमाशंक्याह ॥ यच्चेति ॥ मुक्त्यालंबनस्य जगतो ब्रह्मणोऽर्थांतरत्वं शंकित्वोक्तं ॥ परं चेति ॥ तत्परमं पदं त
दपि त्वमेवेति संबंधः ॥ तस्य पूर्णत्वमाह ॥ त्वयेति ॥ व्याप्यव्यापकत्वेन भेदं शंकित्वा कल्पितत्वात्तत्स्वमेवमित्याह ॥ अ

तस्य सर्वात्मकत्वे हेत्वंतरमाह किंचेति कश्यपादिरित्यादिशब्देन विराजादयो गृह्यंते पितामहो ब्रह्मा तस्य पिता सूत्रात्मा अंतर्यामी-
वेत्याह ब्रह्मण इति सर्वदेवनात्वमेवेत्युक्ते फलितमाह नम इति सहस्रकृत्व इति कृत्वसुचो विवक्षितमर्थमाह बहुश इति पुनरुक्तिताय

किंच॥ वायुस्त्वं यमश्चाग्निर्वरुणोऽपां पतिः शशांकश्चंद्रमाः प्रजापतिस्त्वं कश्यपादिः प्रपितामहश्च
पितामहस्यापि पिता प्रपितामहः पितामहो ब्रह्मा तस्य पिता ब्रह्मण इत्यर्थः॥ नमो नमस्तेतुभ्यमस्तु

वायुर्यमोऽग्निर्वरुणः शशांकः प्रजापतिस्त्वं प्रपितामहश्च॥
नमो नमस्तेस्तु सहस्रकृत्वः पुनश्च भूयोपि नमो नमस्ते॥ ३९॥

सहस्रकृत्वः पुनश्च भूयोपि नमो नमस्ते बहुशो नमस्कारक्रियाभ्यासावृत्तिगणनं कृत्वसुचोच्यते पु
नः भूयोपीति श्रद्धाभक्त्यतिशयापरितोषमात्मनो दर्शयति॥ ३९॥ ॥श्रीरामाय नमः॥

र्यमाह पुनरिति श्रद्धाभक्त्योरतिशयात् कृतेपि नमस्कारे परितोषाभावो बुद्धेरात्मनोऽलंप्रत्ययराहित्यं तद्दर्शनार्थं पुनरुक्तिरित्यर्थः

२६०

विधांतरेण भगवंतं स्तुत्वा नमस्कुर्वन्नभिमुखी करोति ॥ तथेति ॥ यस्यां दिशि सविता उदेति सा पूर्वा दिगुच्यते तस्यां व्यवस्थितं सर्वत्वमेवत स्मैतुभ्यं नमः पुरस्तादित्याह ॥ नमइति ॥ अथ शब्दः समुच्चये पश्चादपि स्थितं सर्वत्वमेवतस्मैतुभ्यं नमोस्त्वित्याह ॥ अथेति ॥ किंबहुना यावत्यो दिशस्तत्र सर्वत्र यद्यत्वर्त्तते तद्देशेषु त्वमेव तस्मैतुभ्यं प्रह्वीभावः स्यादित्याह ॥ नमोस्त्विति ॥ फलितं सर्वात्मत्वं सूचयति ॥ हेस

तथा नमः पुरस्तात्पूर्वस्यां दिशि तुभ्यमथ पृष्ठतोपि ते नमोस्तु ते सर्वत एव सर्वासु दिक्षु सर्वत्र स्थिताय हे सर्व अनंत॥ वीर्यामितविक्रमस्त्वं अनंतं वीर्यं यस्य वीर्यं सामर्थ्यं अमितो विक्रमो यस्य विक्रमः पराक्रमो वीर्यवानपि कश्चित् शत्रु

नमः पुरस्तादथ पृष्ठतस्ते नमोस्तु ते सर्वत एव सर्व ॥ अनंतवी
र्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोसि सर्वः ॥४०॥ ॥

विषये न पराक्रमते मंदपराक्रमो वा भवतीति त्वं तु अनंतवीर्यश्चामितविक्रमश्चेत्यनंतवीर्यामितविक्रमः सर्वं सम॥ ॥
स्तं जगत् समाप्नोषि सम्यगेकेनात्मना व्याप्नोषि यतस्ततस्तस्मादसि भवसि सर्वस्त्वया विनाभूतं न किंचिदस्तीत्यर्थः॥४०॥

र्वेति ॥ वीर्यविक्रमयोर्न यौनरुक्त्यमित्याह ॥ वीर्यमित्यादिना ॥ वीर्यवतो विक्रमाव्यभिचारादर्थपौनरुक्त्यमित्याशंक्याह ॥ वीर्यवा
निति ॥ भगवति लोकतो विशेषमाह ॥ त्वं त्विति ॥ उक्तं सर्वात्मत्वं प्रपंचयति ॥ सर्वमिति ॥ सप्रपंचत्वं वारयति ॥ त्वयेति ॥४०॥ ॥

अज्ञाननिमित्तमपराधं क्षमापयति यतइति इदंशब्दार्थमाह विश्वरूपमिति नहीदमित्यस्य महिमानमित्यत्र सामानाधिकरण्यं लिंग
व्यत्ययादित्याह तवेति पाठांतरसंभावनायां सामानाधिकरण्योपपत्तिमाह तवेत्यादि यदुक्तवानस्मि तदहं क्षामये त्वामिति संबंधः ॥४१॥
यदयुक्तं तत् क्षंतव्यमित्येव न किंतु यत्परिहासार्थे क्रीडादिषु त्वयि तिरस्करणं तदपि सोढव्यमित्याह यच्चेति विहरणं क्रीडा व्यायामो

यतो हं त्वन्माहात्म्यापरिज्ञानादपराध्यतः सखा समानं वयाइति मत्वा ज्ञात्वा विपरीतबुद्ध्या प्रसभमभिभूय प्रसह्य यदुक्तं किं
हे कृष्ण हे यादव हे सखेति अजानता अज्ञानिना मूढेन किमजानतेत्याह महिमानं माहात्म्यं तवेदमीश्वरस्य विश्वरूपं तवेदं म
हिमानं अजानतेति वैयधिकरण्येन संबंधः तवेममिति पाठे यद्यस्ति तदा सामानाधिकरण्यमेवमया प्रमादात् विक्षिप्तचित्तत
या प्रणयेन वा प्रणयो नाम स्नेहस्तन्निमित्तो विश्रंभस्तेनापि कारणेन यदुक्तवानस्मि ॥४१॥ यच्च अवहासार्थे परिहासप्र

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥४१॥ यच्चावहासा
र्थमसत्कृतोसि विहारशय्यासनभोजनेषु ॥ एकोथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयं ॥४२॥ ॥

योजनाय असत्कृतोसि परिभूतोसि भवसि क्व विहारशय्यासनभोजनेषु विहरणं विहारः पादव्यायामः शयनं शय्या आस
नमास्थायिका भोजनमदनमित्येतेषु विहारशय्यासनभोजनेषु एकः परोक्षः सन्नसत्कृतोसि परिभूतोसि अथवापि हे अ
च्युत तत्समक्षं तच्छब्दः क्रियाविशेषणार्थः प्रत्यक्षं वाऽसत्कृतोसि परिभूतोसि तत्सर्वं मपराधजातं क्षामये क्षमां कारये त्वा
वा शयनं तल्प्यादिकं आस्थायिका सिंहासनादेरुपलक्षणमेतेषु विषयभूतेष्विति यावत् एकशब्दो रहसि स्थितमेकाकिनं कथयतीत्याह परो
क्षः सन्निति प्रत्यक्षं परोक्षं वा तदसत्करणं परिभवनं यथा स्यात्तथा यन्मया त्वमसत्कृतोसि तत्सर्वमिति योजनामंगीकृत्याह तच्छब्द इति क्षमाका

महत्प्रमेयं प्रमाणानीति ॥४२॥

रचितव्यस्त्रापि मितं तेद्धमाह ॥ अप्रमेयमिति ॥४२॥

वाचनिकं मदीयमपराधजातं त्वया क्षंतव्यमित्युक्तमिदानीं मदीयोपराधो न त्वया गृहीतव्यो गृहीतोपि सोढव्य इत्याह यत इति । गुणाधिक्यात्पूजार्हत्वं धर्माधर्मात्मशास्त्रानसंप्रदायप्रवर्त्तकत्वेन शिक्षयितृत्वाद्गुरुत्वं गुरूणामपि सूत्रादीनां गुरुत्वाद्गरीयस्त्वं तदेव प्रश्नद्वारा साधयति कस्मादिति । ईश्वरांतरं तु त्वं भविष्यतीत्याशंक्याह नहीति । ईश्वरभेदे प्रत्येकं स्वातंत्र्यात्तदेकमतित्वे हेत्वभावान्नाना

यतस्त्वं पितासि जनयितासि लोकस्य प्राणिजातस्य चराचरस्य स्थावरजंगमस्य न केवलं पितासि त्वमस्य ज
गतः पूज्यश्च पूजार्होयतो गुरुर्गरीयान् गुरुतरः कस्माद्गुरुतरत्वमित्याह न च त्वत्समस्त्वत्तुल्योन्योस्तीति न हीश्वर
द्वयं संभवत्यनेकेश्वरत्वे व्यवहारानुपपत्तेः त्वत्सम एव तावदन्यो न संभवति कुत एवान्योऽधिकः स्यात्कस्मा॥

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ॥ न त्वत्स
मोस्त्यभ्यधिकः कुतोन्यो लोकत्रयेप्यप्रतिमप्रभाव ॥४३॥ ॥

ल्लोकत्रयेपि सर्वस्मिन्नप्रतिमप्रभाव प्रतिमीयते यया सा प्रतिमा न विद्यते प्रतिमा यस्य तव प्रभावस्य स
त्वमप्रतिमप्रभावः हे अप्रतिमप्रभाव निरतिशयप्रभाव इत्यर्थः ॥४३॥ श्रीसीतारामचंद्रायनमोनमः ॥ ॥

मतित्वे चैकस्य सिसृक्षाया मन्यस्य संजिहीर्षा संभवाद्व्यवहारलोपाद युक्तमीश्वरनानात्वमित्यर्थः ॥ अभ्यधिकाशस्त्वं केमुतिकन्यायेन दर्शयति ॥ त्वत्सम इति । तत्र हेतुमवतार्य व्याकरोति अप्रतिमेत्यादिना ॥४३॥ श्रीसीतारामचंद्रायनमोनमः ॥

निरतिशयप्रभाव त्वं हेतूक्तस्य प्रसादये प्रणाममपूर्वकं त्वामित्याह यतइति प्रसादनानंतरं भगवता कर्त्तव्यं प्रार्थयते त्वंपुनरिति ॥
प्रियइव प्रियायाइतीवकारोनुषज्यते प्रियायार्हसीति छांदसः संधिः क्षंतुंमदपराधजातमिति शेषः ४४ हेतूक्तिपूर्वकं वि

यतएवं तस्मात्प्रणम्यनमस्कृत्य प्रणिधायप्रकर्षेणनीचैर्धृत्वाकायंशरीरं प्रसादये प्रसादंकारये
त्वामहमीशितारमीड्यंस्तुत्यंत्वंपुनःपुत्रस्यापराधंपितायथाक्षमतेसर्वंसखाइवचसख्युरपराधंय
थावाप्रियःप्रियायाअपराधंक्षमतेएवमर्हसिदेवसोढुंप्रसहितुंक्षंतुमित्यर्थः ४४ अदृष्टपूर्वंकिदाचिद

तस्मात्प्रणम्यप्रणिधायकायंप्रसादयेत्वामहमीशमीड्यं पितेवपुत्रस्यसखेवस
ख्युःप्रियःप्रियायार्हसिदेवसोढुं ४४ अदृष्टपूर्वंहृषितोस्मिदृष्ट्वाभयेनचप्रव्य
थितंमनोमे तदेवमेदर्शयदेवरूपंप्रसीददेवेशजगन्निवास ४५ ॥

पिनदृष्टपूर्वमिदंविश्वरूपंतवमयाअन्यैर्वातदहंदृष्ट्वाहृषितोस्मिभयेनचप्रव्यथितंमनोमेअ
तस्तदेवमेममदर्शयदेवरूपंयन्मत्सखंप्रसीददेवेशजगतांनिवासोजगन्निवासः हेजगन्निवास ४५

श्वरूपोपसंहारंप्रार्थयते अदृष्टेति हृषितोहृष्टस्तुष्टइतियावत् भयेनतद्धेतुविकृतदर्शनेनेत्यर्थः ४५ ॥ ॥

तदेवदर्शयेत्युक्तं किंतदित्यपेक्षायामाह ॥ किरीटिनमिति ॥ चक्रंहस्तेयस्यतमितिव्युत्पत्तिंगृहीत्वाह ॥ चक्रेति ॥ मदीयेच्छाफल पर्यंताकर्त्तव्येत्याह यतइति ॥ चतुर्भुजत्वेकथंसहस्त्रबाहुत्वंतत्राह ॥ वार्त्तमानिकेनेति ॥ सतिविश्वरूपेकथंपूर्वरूपंभाक्तंतत्राह

किंच किरीटिनंकिरीटवंतंतथागदिनंगदावंतंचक्रहस्तमिच्छामित्वांप्रार्थयेद्रष्टुमहंतथैवपूर्ववदित्यर्थः ॥ यतएवं तस्मात्तेनैवरूपेणवसुदेवपुत्ररूपेणचतुर्भुजेनसहस्त्रबाहोनवार्त्तमानिकेनविश्वरूपेणभवविश्वमूर्त्तेउपसंहृत्य विश्वरूपंतेनैवपूर्वरूपेणभवेत्यर्थः ॥४६॥ अर्जुनंभीतंउपलभ्यसंहृत्यविश्वरूपंप्रियवचनेनाऽऽश्वासयन् ॥ मया

किरीटिनंगदिनंचक्रहस्तमिच्छामित्वांद्रष्टुमहंतथैव ॥ तेनैवरूपेणचतुर्भुजेनसहस्त्रबाहोभवविश्वमूर्त्ते ॥४६॥ श्री भगवानुवाच ॥ मयाप्रसन्नेनतवार्जुनेदंरूपंपरंदर्शितमात्मयोगात् ॥ तेजोमयंविश्वमनंतमाद्यंयन्मेत्वदन्येननदृष्ट पूर्वं ॥४७॥

प्रसन्नेनप्रसादोनामत्वय्यनुग्रहबुद्धिस्तद्वताप्रसन्नेनमयातवहेअर्जुनइदंपरंरूपंविश्वरूपंदर्शितमात्म योगादात्मनऐश्वर्यस्यसामर्थ्यात्तेजोमयंतेजःप्रायंविश्वंसमस्तंअनंतंअंतरहितंरूपमादौभवमाद्यंयद्रूपंमेम मत्वदन्येनत्वत्तोऽन्येनकेनचिन्नदृष्टपूर्वंममरूपदर्शनेनकृतार्थएवत्वंसंहृत्तइति ॥४७॥ श्रीरामायनमः ॥ ॥

उपसंहृत्येति ॥४६॥ अर्जुनेनस्थानेहृषीकेशेत्यादिनोक्तं भगवतोवचनमवतारयति ॥ अर्जुनमितिभगवत्प्रसादैकोपायलभ्यंचै सदैवनिमित्तमात्रेत्याह ममेति ॥४७॥

तच्छब्देन प्रकृतं दर्शनं परामृश्यते वेदाध्ययनादन्यस्य यज्ञाध्ययनग्रहणं पुनरुक्तेरयुक्तमित्याशंक्याह ॥ वेदेति ॥ न च वेदाध्ययनग्रहणा
देव यज्ञाध्ययनमपि गृहीतमध्ययनस्यार्थावबोधांतत्वादिति वाच्यं तस्याक्षरग्रहणांततायावृद्धैः साधितत्वादिति भावः ॥ श्लो

तवस्तौति । न वेदयज्ञाध्ययनैश्चतुर्णामपि वेदानामध्ययनैर्यथावत्यज्ञाध्ययनैश्च वेदाध्ययनैरेव यज्ञाध्ययनस्य सिद्धत्वात्पृ
थक्यज्ञाध्ययनग्रहणं यज्ञविज्ञानोपलक्षणार्थं न तथा न दानैः तुलादिभिर्न च क्रियाभिः अग्निहोत्रादिभिः श्रौतादिभिर्नापि त ॥ ता
पोभिरुग्रैश्चान्द्रायणादिभिरुग्रैर्घोरैरेवंरूपं यथा दर्शितं विश्वरूपं यस्य सोऽहमेवंरूपः शक्यः न शक्यः अहं नृलोके मनुष्यलोके द्रष्टुं त्व

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः ॥ एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८ ॥ मा ते व्य
था मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदं ॥ व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥ ॥

दन्येन त्वत्तोऽन्येन कुरुप्रवीर ॥ ४८ ॥ मा ते व्यथा मा भूत्ते भयं मा च विमूढभावो विमूढचित्तता दृष्ट्वा उपलभ्य रूपं घोरमीदृग्यथा
वद्दर्शितं ममेदं व्यपेतभीर्विगतभयः प्रीतमनाश्च सन् पुनर्भूयस्त्वं तदेव चतुर्भुजं रूपं शंखचक्रगदाधरं तवेष्टं रूपं इदं प्रपश्य ॥ ४९ ॥

कपूर्णार्थमसंहिताकरणं त्वत्तोऽन्येन मदनुग्रहविहीनेनेति शेषः ॥ ४८ ॥ विश्वरूपदर्शनमेवं स्तुत्वा यद्यस्मात्तद्दृश्यमानाद्विभेषि तर्हि
तदुपसंहरामीत्याह ॥ मा ते व्यथेति ॥ बहुतिथमनुभूतत्वमभिप्रेत्येदमिति प्रत्यक्षयोग्यत्वं ॥ ४९ ॥ श्रीरामचंद्राय नमो नमः ॥ ॥

तदिदं हत्तं राज्ञे संजयो निवेदितवानित्याह संजय इति ॥ तथा भूतं वचनं मया प्रसन्नेनेत्यादि ॥ चतुर्भुजांकितस्य रूपस्य परिचितपूर्वस्य दर्श नेन प्रसन्नदेहतेन चार्जुनं प्रत्याश्वासनं भगवतो युक्तमित्यत्र हेतुमाह ॥ महात्मेति ॥ ५० ॥ एवं भगवदाश्वासितः सन्नर्जुनस्तं प्रत्युक्तवानि

इत्येवमर्जुनं वासुदेवस्तथा भूतं वचनमुक्त्वा स्वकं वसुदेवगृहे जातं रूपं दर्शयामास दर्शितवान् भूय एव पुनराश्वासयामास चाश्वासितवांश्च भीतमेनं भूत्वा पुनः सौम्यवपुः प्रसन्नदेहो महात्मा ॥ ५० ॥ दृष्ट्वेदं मानुषं रूपं मत्सखं प्रसन्नं तव सौम्यं जनार्दन इति ॥ अर्दते र्गतिकर्मणोऽसुराणां देवप्रतिपक्षजनानां प्राणवियोजनान्नरकादिगमयितत्वाच्च जनार्दन अ

॥संजय उवाच॥ इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ॥ आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ५० ॥ अर्जुन उवाच ॥ दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ॥ इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ ५१ ॥ श्रीभगवानुवाच ॥ सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ॥ देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ॥ ५२ ॥

भ्युदयनिःश्रेयसपुरुषार्थप्रयोजनं सर्वैर्जनैर्याच्यत इति वा इदानीमधुना संवृत्तः संजातः किं सचेताः प्रसन्नचित्तः प्रकृतिं स्वभावं गतश्चास्मि ॥ ५१ ॥ सुदुर्दर्शं सुष्ठु दुःखेन दर्शनमस्येति सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम देवा अपि अस्य मम रूपस्य नित्यं सर्वदा दर्शनकांक्षिणो दर्शनेप्सवो ऽपि न त्वमिव दृष्टवंतो द्रक्ष्यंतीत्यभिप्रायः ॥ ५२ ॥ श्री रामचंद्राय नमः ॥ ॥

तिआह ॥ अर्जुन इति ॥ ५१ ॥ उपास्यत्वाय विश्वरूपं स्तोतुं भगवदुक्तिमुत्थापयति ॥ भगवानिति ॥ त्वद्व्यतिरिक्तानामिदं रूपं द्रष्टुमशक्यमित्ये

दर्शनोपायाभावात् दुर्दर्शत्वमिति शंकते कस्मादिति वेदादिषूपायेषु सत्स्वपि भगवानुक्तरूपेण शक्यो द्रष्टुमित्याह नाहमिति तर्हि द
र्शनायोग्यत्वात् द्रष्टुमशक्यत्वमित्याशंक्याह दृष्टवानिति ५३ केनोपायेन तर्हि द्रष्टुं शक्यो भगवानिति पृछति कथमिति शास्त्रीय

कस्मात् नाहं वेदैर्ऋग्यजुःसामाथर्ववेदैः चतुर्भिरपि न तपसा उग्रेण चांद्रायणादिना न दानेन गोभूमिहिरण्यादिना न
चेज्यया यज्ञेन पूजया वा शक्य एवंविधो यथा दर्शितप्रकारो द्रष्टुं मन्यैर्दृष्टवानसि मां यथा त्वं ५३ कथं पुनः शक्यतर
त्युच्यते भक्त्या तु किंविशिष्टयेत्याह अनन्यया ऽपृथग्भूतया भगवतो ऽन्यत्र पृथक् न कदाचिदपि या भवति सा अ

नाहं वेदैर्न तपसा न दानेन न चेज्यया ॥ शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥५३॥
भक्त्या त्वनन्यया शक्य अहमेवंविधो ऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥५४॥ ॥

नन्या भक्तिः सर्वैरपि करणैर्वासुदेवादन्यन्नोपलभ्यते यया सा ऽनन्या भक्तिस्तया शक्यो ऽहमेवंविधो विश्वरूप
प्रकारो हे ऽर्जुन ज्ञातुं शास्त्रतो न केवलं ज्ञातुं शास्त्रतः द्रष्टुं च साक्षात्कर्तुं तत्त्वेन तत्त्वतः प्रवेष्टुं च मोक्षं च गंतुं परंतप ५४

ज्ञानद्वारा तद्दर्शनं सफलं सिध्यतीत्याह उच्यत इति न भक्तिमात्रं तत्र हेतुरिति तु शब्दार्थं स्फुटयति किमित्यादिना अनन्यां भक्तिमेव व्यन

भक्त्यात्विति विशेषणाद्वैयर्थ्यमहेतुत्वमाशंक्याह। अधुनेति। समुच्चित्य संक्षिप्य पुंजीकृत्येति यावत्। मत्कर्मकृदित्युक्ते मत्परमत्वमार्थि
कमिति पुनरुक्तिमाशंक्याह। मत्परमः करोतीति। भगवानेव परमा गतिरिति निश्चयवतस्तत्रैव निष्ठा सिध्यतीत्याह। तथेति। न
तत्रैव सर्वप्रकारैर्भजनं धनादिस्नेहादृष्टत्वादित्याशंक्याह। संगेति। द्वेषपूर्वकमनिष्टाचरणं वैरं अनपकारिषु तदभावे पि भवत्ये

अधुना सर्वगीताशास्त्रस्य सारभूतोऽर्थो निःश्रेयसार्थोऽनुष्ठेयत्वेन समुच्चित्योच्यते। मत्कर्मकृन्मदर्थं कर्म मत्कर्म तत्क
रोतीति मत्कर्मकृत्। मत्परमः करोति भृत्यः स्वामिकर्म न त्वात्मनः परमा प्रतिगंतव्या गतिरिति स्वामिनं प्रतिपद्यते। ऽयं तु मत्क
र्मकृत् मामेव परां गतिं प्रतिपद्यते इति मत्परमो हं परमः परा गतिर्यस्य सो यं मत्परमः। तथा मद्भक्तः मामेव सर्वप्रकारैः सर्वात्म

मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः। निर्वैरः सर्वभूतेषु यः स मामेति पांडव॥५५॥ श्रीरामायनमः॥

ना सर्वोत्साहेन भजत इति मद्भक्तः संगवर्जितः धनपुत्रमित्रकलत्रबंधुवर्गेषु संगवर्जितः प्रीतिस्नेहवर्जितो निर्वैरो निर्ग
तवैरः अतः सर्वभूतेषु शत्रुभावरहितः आत्मनो ऽत्यंतापकारप्रवृत्तेष्वपि य ईदृशो मद्भक्तः स मामेति अहमेव तस्य परा गतिर्नो
न्या काचिदुवत्स्ययं तवेष्टोपदेशो मयोपदिष्टो हे पांडव इति॥५५॥ इति श्रीमद्भगवद्गीताभाष्यटीकायामेकादशोऽध्यायः॥

वपकारिष्विति शंकित्वाह। आत्मन इति। एतच्च सर्वं संक्षिप्यानुष्ठानार्थमुक्तमेव मनुतिष्ठतो भगवत्प्राप्तिरवश्यं भाविनी त्युपसंहर
ति। अयमिति। तदेवं भगवतो विश्वरूपस्य सर्वात्मनः सर्वज्ञस्य सर्वेश्वरस्य मत्कर्मकृदित्यादिन्यायेन क्रममुक्तिफलमभिध्यान
मभिवदता तत्पदवाच्यो र्थो व्यवस्थापितः॥५५॥ ॥इति श्रीआनंदगीरीटीकायामेकादशोऽध्यायः॥ ॥११॥ ॥ ॥

अशोच्यानित्यादिषु विभूत्यध्यायावसानेष्वध्यायेषु निरुपाधिकस्य ब्रह्मणो ध्येयत्वेनानुसंधानमुक्तमिति तत्संकीर्त्तयति द्वि
तीयेति अतिक्रांतेषु तत्तदध्यायेषु सोपाधिकस्यापि ब्रह्मणो ध्येयत्वेन प्रतिपादनं कृतमित्याह सर्वेति सर्वस्यापि प्रपंचस्य
योगाघटनाजन्मस्थितिभंगप्रवेशनियमनाख्यात त्रैश्वर्येसामर्थ्यं तेन सर्वत्र ज्ञेये प्रतिबंधविधुरया ज्ञानशक्त्या विशिष्टस्यस

द्वितीयप्रभृतिष्वध्यायेषु विभूत्यंतेषु परमात्मनो ब्रह्मणोऽक्षरस्याविध्वस्तसर्वविशेषपास्यो
पासनमुक्तं सर्वयोगैश्वर्यसर्वज्ञानशक्तिमत्सत्वोपाधीश्वरस्य तत्त्वोपासनं तत्र तत्रोक्तं वि
श्वरूपाध्याये चैश्वरमाद्यं समस्तजगदात्मरूपं विश्वरूपं त्वदीयं दर्शितमुपासनार्थमेवत्वयात दू
त्वदर्शयित्वोक्तवानसि मत्कर्मकृदित्यतो हमनयोरुभयोः पक्षयोर्विशिष्टतरबुभुत्सयात्वां पृच्छामि

त्वाद्युपहितस्य भगवतो ध्यानं तत्र तत्र प्रसंगमापाद्यमंदमध्यमयोरनुग्रहार्थमुक्तमित्यर्थः एकादशे वृत्तमनुवदति विश्व
रूपमिति अध्यायांते भगवदुपदेशमनुवदति तच्चेति यथाधिकारतारतम्योपेतानि साधनानि नियंतुमध्यायांतरमवतार
यन्नादौ प्रश्नमुत्थापयति अतइति सोपाधिकध्यानस्य निरुपाधिकज्ञानस्य चोक्तत्वादित्यर्थः ॥ ॥श्रीरामायनमः॥ ॥

एवं शब्दार्थमुक्त्वा तमनूद्य सततयुक्ता इति भागं विभजते एवमिति ये भक्ता इत्यनूद्य व्याचष्टे अनन्येति मंदमध्यमाधिकारिणः स
गुणशरणानुक्त्वा निर्गुणनिष्ठानुत्तमाधिकारिणो निर्दिशति ये चेति यथा विशेषितमनिर्देश्यं सर्वत्रगमचिंत्यं कूटस्थमित्यादि
वक्ष्यमाणविशेषणविशिष्टमित्यर्थः ॥ नक्षरत्यश्नुते वेति अक्षरमव्यक्तमित्येतत् व्याचष्टे निरस्तेति करणागोचरत्वं व्यतिरेकद्वारास्फो

एवमित्यतीतानंतरश्लोकेनोक्तमर्थं परामृशति मत्कर्मकृदित्यादिना एवं सततयुक्ताः नैरंतर्येण भगवत्कर्मादौ यथो
क्तेर्थे समाहिताः संतः प्रवृत्ता इत्यर्थः ॥ ये भक्ता अनन्यशरणाः संतः त्वां यथादर्शितं विश्वरूपं पर्युपासते ध्यायंति ये चा
प्यन्ये त्यक्तसर्वैषणाः संन्यस्तसर्वकर्माणो यथा विशेषितं ब्रह्माक्षरं निरस्तसर्वोपाधित्वादव्यक्तमकरणगोचरं य

अर्जुन उवाच ॥ एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ॥ ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १॥

द्धि लोके करणगोचरं तद्व्यक्तमुच्यते अंजेर्धातोस्तत्कर्मकत्वादिदं त्वक्षरं तद्विपरीतं शिष्टैश्चोच्यमानैर्विशेषणैर्वि
शिष्टं तद्ये चापि पर्युपासते तेषामुभयेषां मध्ये के योगवित्तमाः के अतिशयेन योगविद इत्यर्थः ॥ १॥ ॥

रयति ॥ यद्धीति ॥ यथाविशेषितमित्युक्तं स्पष्टयति ॥ शिष्टैश्चेति ॥ पूर्वार्द्धगतक्रियापदस्यानुषंगं सूचयति ॥ तदिति ॥ सर्वे तावदे
ते योगं समाधिं विदंतीति योगविदः के पुनरतिशयेनैषां मध्ये योगविदो योगिन इति पृच्छति ॥ के तिशयेनेति ॥ १॥ ॥ ॥

किमनयोर्योगयोः सुशको योगो वा प्रच्छ्यते किंवा साक्षान्मोक्षहेतुरिति विकल्पक्रमेणोत्तरं भगवानुक्तवानित्याह भगवानिति । यद्विद्विती यस्तयाविध योगस्य वक्ष्यमाणत्वान्न प्रच्छ्यतेत्याह येत्वक्षरेति यद्याद्यस्तत्राह येत्विति सर्वयोगेश्वराणां सर्वेषां योगमधिष्ठायतिष्ठतां योगिनामित्यर्थः विमुक्ताः सक्तारागाद्यास्य क्लेशनिमित्तभूतातिमिरशब्दिताऽ नाद्यज्ञानक्रू

येत्वक्षरोपासकाः सम्यग्दर्शिनः निवृत्तैषणाः तेनावत्तिष्ठंतु तान्प्रतियद्वक्तव्यं तदुपरिष्टाद्वक्ष्यामः येत्वितरेमयिविश्वरूपे परमेश्वरे आवेश्य समाधाय मनो ये भक्ताः संतो मां सर्वयोगेश्वराणामधीश्वरं सर्वज्ञं विमुक्तारागादि क्लेशतिमिर

॥ श्रीभगवानुवाच ॥ मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ॥ श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥

दृष्टिं नित्ययुक्ता अतीतानंतराध्यायांतोक्तश्लोकार्थन्यायेन सततयुक्ताः संत उपासते श्रद्धया परया प्रकृष्टया उपेता ये ते मे ममता अभिप्रेता युक्ततमा इति नैरंतर्येण हितेमच्चित्ततया अहोरात्राण्यतिवाहयंत्यतो युक्तं तान्प्रतियुक्ततमा इति वक्तुं २

तादृष्टिर विद्यामिथ्याधीर्यस्यतमिति विशिनष्टि विमुक्तेति । नित्ययुक्तत्वं साधयत्यतीतेति तत्रोक्तो योर्थो मत्कर्मकृदित्यादिस्तस्मिन्निश्रयेनायनं मायोगमनंतस्य नियमेनानुष्ठानं तेने त्यर्थः उपासते मयि स्मृतिं सदा कुर्वंतीत्यर्थः उक्तोपासकानां युक्ततमत्वं व्यनक्ति नैरंतर्येनेति । तदेव स्फुटयति अहोरात्राणीति अह्नि च रात्रौ चातिमात्रमतिशयेन मामेव विषयांतरविमुखाश्चिं

तत्वदीपि॰ २

वक्ष्यामस्तदुपरिष्टादित्युक्तं प्रश्नपूर्वकं प्रकटयति। किमित्यादिना। पूर्वेभ्यः फलतो विशेषार्थस्तुशब्दः। अव्यक्तत्वमनिर्देश्यत्वे हेतुरित्या-
ह अव्यक्तत्वादिति। यतो व्यक्तमतो निर्देश्यमिति योजना। निरुपाधिकेऽक्षरे कथमुपासनेति पृच्छति। उपासनमिति। शास्त्रतोऽक्ष-

किमितरे युक्ततमा न भवन्ति। न। किं तु तान्प्रति यद्वक्तव्यं तच्छृणु। येत्वक्षरमनिर्देश्यं अव्यक्तत्वादशब्दगो-
चरमिति न निर्देष्टुं शक्यतेऽतो निर्देश्यमव्यक्तं पर्युपासते परि समंतादुपासते उपासनं नाम यथाशास्त्रमुपा-

येत्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते॥

स्यस्यार्थस्य विषयीकरणेन सामीप्यमुपगम्य तैलधारावत्समानप्रत्ययप्रवाहकरणेन दीर्घकालं यदासनं
तदुपासनमाचक्षते अक्षरस्य विशेषणमाह। सर्वत्रगं व्योमवद्व्याप्यमचिंत्यं चाऽव्यक्तत्वादचिंत्यं च॥

रं ज्ञात्वा तदुपेयात्मत्वेनोपगम्योपासते तथैव निश्चितपूर्णविदेकतानमक्षरमात्मानमेव सदा भावयंतीत्येतदिह विवक्षितमि-

अव्यक्तत्वमेवाचिंत्यत्वेपि हेतुरित्याह। यद्वीति। कूटशब्दस्योक्तार्थत्वं रूढ्ययोगतः साधयति। कूटरूपकमिति। आदिपदमनृतार्थे। प्रकृतिः किंतदनृतं कूटशब्दितं इत्याशंक्याह। तथा चेति। उक्तरीत्या कूटशब्दस्यानृतार्थत्वे यदनेकस्य संसारस्य बीजं निरूप्यमाणं नानाविधदोषोपेतं तद्वेदं तद्वि अव्याकृतं मायां तु प्रकृतिं विद्यान्मममाया दुरत्यया इत्यादौ मायादिशब्दितया प्रसिद्धमविद्यादि तदिह कू

यद्धिकरणगोचरं तन्मनसापि चिंत्यं तद्विपरीतत्वादचिंत्यमक्षरं कूटस्थं दृश्यमानगुणकमंतर्दोषं वस्तु कूटं कूटरूपकं कूटसाक्ष्यमित्यादौ कूटशब्दः प्रसिद्धो लोके तथा चाविद्याद्यनेकसंसारबीजमंतर्दोषं माया व्याकृतादि

सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवं ॥ ३ ॥

शब्दवाच्यं तया मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं मम माया दुरत्ययेत्यादौ प्रसिद्धं यत्तत्कूटं तस्मिन्कूटे स्थितं कूटस्थं तदध्यक्षतया अथवा कूटो राशिरिव स्थितं कूटस्थमत एवाचलं तस्मात् ध्रुवं नित्यमित्यर्थः ॥ ३ ॥

टशब्दितमित्यर्थः। तत्रावस्थानं केनरूपेणेत्याकांक्षायामाह। तदध्यक्षतयेति। कूटस्थशब्दस्य निःक्रियत्वमर्थांतरमाह। अथवेति। पूर्वमुपजीव्यानंतरविशेषणद्वय प्रवृत्तिमाह। अत एवेति। ३। श्रीसीतारामचंद्रायनमः। श्रीरामचंद्रायनमः ॥ ॥

॥गी॰भा॰॥
॥२६६॥

कथमक्षरमुपासते तदुपासनेन वा किं स्यादिति तदाह ॥ संनियम्येति ॥ तुल्या हर्षविषादरागद्वेषादिरहिताः सम्यग्ज्ञानेनाज्ञानस्याऽपनीतत्वा
त्क्रमपरापेक्षयोरसंभवं विवक्षित्वाह ॥ त इति ॥ सर्वेभ्यो भूतेभ्यो हिते रता निरताः सर्वेभ्यो हितमेव चिंतयंतस्तदेवाचरंति ॥ ज्ञानवतां य

॥आ॰गी॰॥
॥१२॥

संनियम्य सम्यङ्नियम्य सम्यगुपसंहृत्य इंद्रियग्राममिंद्रियसमुदायं सर्वत्र सर्वस्मिन्काले स
मबुद्धयः समा तुल्या बुद्धिर्येषामिष्टानिष्टप्राप्तौ ते समबुद्धयः ते एवंविधाः प्राप्नुवंति मामेव स

संनियम्येंद्रियग्रामं सर्वत्र समबुद्धयः ॥ ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥ ४ ॥ ॥ त

र्वभूतहिते रताः ॥ न तु तेषां वक्तव्यं किंचिन्मां ते प्राप्नुवंतीति ज्ञानी त्वात्मैव मे मतमित्युक्तं ॥ ४ ॥

॥शिव॥
॥२६६॥

याज्ज्ञानं भगवत्प्राप्तेरर्थे सिद्धत्वादनुवादमात्रमेतदित्याह ॥ नतिति ॥ ज्ञानिनो भगवत्प्राप्तिः सिद्धैवेत्यत्र प्रमाणमाह ॥ ज्ञानीत्विति ॥ ४ ॥

ज्ञानवतां भगवत्प्राप्तौ तएव युक्ततमा वक्तव्याः ॥ कथं सगुणब्रह्मोपासका न युक्ततमा उक्तवानसीत्याशंक्याह ॥ नहीति ॥ सगुणोपासके
ष्वपि कथमित्याह ॥ किंत्विति ॥ अक्षरोपासनस्य दुःकरत्वादुपासनांतरस्य सुकरत्वादित्यभिप्रेत्याह ॥ क्लेशइति अधिकएवेतरेभ्यो द्वैतदर्शि
भ्यः कामिभ्य इति शेषः ॥ क्लेशस्याधिकतरत्वे हेतुमत्ता विशिनष्टि ॥ देहेति ॥ अव्यक्तमस्यंतं सूक्ष्मं निर्विशेषमक्षरं तस्मिन्नासक्तम

नहि भगवत्स्वरूपाणां सतां युक्ततमायुक्ततमत्वं वाच्यं किंतु ॥ क्लेशोधिकतरस्तेषां यद्यपि मत्कर्मादिपराणामधिकएव क्ले
शोधिकतरस्त्वक्षरात्मनां परमार्थदर्शिनां देहाद्यभिमानपरित्यागनिमित्त अव्यक्तासक्तचेतसां अव्यक्ते आसक्तं चेतो येषां ते
अव्यक्तासक्तचेतसस्तेषां अव्यक्तासक्तचेतसां ॥ अव्यक्ताहि यस्माद्या गतिरक्षरात्मिका दुःखं सा देहवद्भिर्देहाभिमानवद्भिरवाप्य

क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसां ॥ अव्यक्ताहि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥ येतु
सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ॥ अनन्येनैव योगेन मां ध्यायंत उपासते ६ ॥

तेऽतः क्लेशोधिकतरः अक्षरोपासकानां यद्वर्तनं तदुपरिष्टाद्वक्ष्यामः ॥ ५ ॥ येतु सर्वाणि कर्माणि मयीश्वरे संन्यस्य मत्पराः अहंप
रो येषां ते मत्पराः संतः अनन्येनैव अविद्यमानमन्यदालंबनं विश्वरूपं देवमात्मानं मुक्त्वा यस्य सोऽनन्यस्तेनानन्येनैव केनयो
गेन समाधिना मां ध्यायंतश्चिंतयंत उपासते ६

भिनिविष्टं चेतो येषां तेषामिति यावत् ॥ अक्षरोपासकानां क्लेशस्याधिकतर
त्वे भगवानेव हेतुमाह ॥ अव्यक्तेति ॥ दुःखं दुःखेन कृच्छ्रेणेति यावत् ॥ अतो देहाद्यभिमानत्यागादित्यर्थः ॥ ते कथं वर्तेनेत त्राह ॥ अक्षरेति ॥ ५ ॥
यद्यक्षरोपासका मामेवाप्नुवंतीति विशिष्यंते ॥ तत्किं सगुणोपासकास्त्वां नाप्नुवंति ॥ न तेषामपि क्रमेण मत्प्राप्तिरित्याह ॥ येत्विति ॥ तु

तेषां भगवद्ध्यायिनां किं फलमितीमांशंकामनुभाष्य फलमाह तेषामित्यादिना समुद्धर्त्ता सम्यगुद्धरणेन ज्ञानावष्टंभदानेनेत्यर्थः
मृत्युरज्ञानं मरणाद्यनर्थहेतुत्वात्तेन कार्यतयायुक्तः संसारः ७ भगवदुपासनाविशिष्टफले स्थैवंयतः सिद्धमतो भगवन्निष्ठायां प्रयतितव्य

तेषां किं तेषां मदुपासनैकपरायणानामहमीश्वरः समुद्धर्त्ता भवामि कुत इत्याह मृत्युसंसारसागरात् मृत्युयुक्तः संसारो मृ
त्युसंसारः स एव सागर इव सागरो दुस्तरत्वात् तस्मान्मृत्युसंसारसागरात् अहं तेषां समुद्धर्त्ता भवामि न चिरात् किं तर्हि क्षिप्र
मेव हे पार्थ मय्यावेशितचेतसां मयि विश्वरूपे आवेशितं समाहितं चेतो येषां ते मय्यावेशितचेतसस्तेषां ७ यत एवं तस्मा

तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् भवामि नचिरात्पार्थ मय्यावेशितचेतसां ॥७॥
मय्येव मन आधत्स्व मयि बुद्धिं निवेशय निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥८॥

त् मय्येव विश्वरूपे ईश्वरे मनः संकल्पविकल्पात्मकं आधत्स्व स्थापय मय्येवाध्यवसायं कुर्वतीं बुद्धिं चाधत्स्व निवेशय तत
स्ते किं स्यादिति शृणु निवसिष्यसि निवत्स्यसि निश्चयेन मदात्मना मयि वा संकरिष्यस्येवातः शरीरपातादूर्द्ध्वं न संशयः संशयो

मित्याह यत इति असंहिताकरणं श्लोकपूरणार्थं मनोबुद्ध्योर्भगवत्येव स्थापने प्रश्नपूर्वकं फलमाह तत इति भगवन्निष्ठस्य तस्यात्मो

अनेकनेज्यः ॥

प्रतिबंधाभावं सूचयति मय्येवेति ॥

मतभ्रदर्शनपूर्वकंभगवत्प्राप्तावुपायांतरमाह। अथेत्यादिना। एकमालंबनंस्थूलंप्रतिमादिसमाधानंततोऽन्यंतरेविश्वरूपेचित्तेकाग्र्यं ॥ ९॥ द्वैताभिनिवेशादभ्यासाधीनेयोगेपिसामर्थ्याभावेपुनरुपायांतरमाह। अभ्यासेपीति। अभ्यासयोगेनविनाभगवद

अथैवंयथावोचामस्तथामयिचित्तंसमाधातुंस्थापयितुंस्थिरमचलंनशक्नोषिचेत्ततःपश्चादभ्यासयोगेनचित्तस्यैकस्मिन्नालंबनेनसर्वतःसमाहृत्यपुनःपुनःस्थापनंअभ्यासस्तत्पूर्वकोयोगःचित्तसमाधानलक्षणःतेनाभ्यासयोगे

अथचित्तंसमाधातुंनशक्नोषिमयिस्थिरं। अभ्यासयोगेनततोमामिच्छाप्तुंधनंजय ॥ ९॥
अभ्यासेप्यसमर्थोसिमत्कर्मपरमोभव। मदर्थमपिकर्माणिकुर्वन्सिद्धिमवाप्स्यसि ॥ १०॥

नमांविश्वरूपंइच्छप्राप्तुंयत्नआप्तुंहेधनंजय ॥ ९॥ अभ्यासेप्यसमर्थोसिअशक्नोषितर्हिमत्कर्मपरमोभवमदर्थंकर्मतत्परमोभवमत्कर्मपरमोमत्कर्मप्रधानइत्यर्थः। अभ्यासेनविनापिमदर्थंकर्माणिकेवलंकुर्वन्सिद्धिंसत्वशुद्धियोगज्ञान

प्रसिद्धोणावाप्स्यसि ॥ १०॥

र्थंकर्माणिकुर्वाणस्यकिंस्यादित्याशंक्याह। अभ्यासेनेति। सिद्धिंब्रह्मभावंअपरेरभिव्याप्तसूचनार्थः ॥ १०॥ ॥

॥गी॰भा॰॥
॥२९५॥

भगवत्कर्मपरत्वमप्यशक्यमिति शंकते॥ अथेति॥ बहिर्विषयाकृष्टचेतस्त्वादित्यर्थः॥ तर्हि भगवत्प्राप्त्युपायशेषत्वेन संय

॥आ॰गी॰॥
॥१२॥

अथ पुनरेतदपि यदुक्तं मत्कर्मपरत्वं तत्कर्तुमशक्तोसि मद्योगमाश्रितो मयि क्रियमाणानि कर्माणि संन्यस्य यत्करणं तेषामनुष्ठानं स मद्योगस्तमाश्रितः सन् सर्वकर्मफलत्यागं सर्वेषां कर्मणां फलसं

अथैतदप्यशक्तोसि कर्तुं मद्योगमाश्रितः॥ सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥११॥

न्यासं सर्वकर्मफलत्यागं ततोऽनंतरं कुरु यतात्मवान् संयतचित्तः सन्नित्यर्थः॥११॥ ॥ ॥

॥शिव॥
॥२९८॥

त चित्तो भूत्वा कर्मफलसंन्यासं कुर्वित्याह मद्योगमिति॥१२॥ श्रीसीतारामचंद्राय नमो नमः॥ श्रीरामचंद्राय नमः॥ ॥

उत्तरश्लोकतात्पर्यमाह इदानीमिति ॥ ज्ञानं शब्दयुक्तिभ्यामात्मनिश्चयोऽभ्यासो ज्ञानार्थश्रवणाभ्यासो निश्चयपूर्वकोक्तध्यानाभ्यासो वा
तस्य विशिष्यमाणत्वे साक्षात्कारहेतुत्वं हेतुः ॥ त्यागस्य विशिष्टत्वे हेतुमाह ॥ एवमिति ॥ श्रीणा तु भगवानिति तस्मिन्कर्मसंन्यासपूर्वकमित्यर्थः
पूर्वे विशेषणवतो नियतचित्तस्य पुंसो यथोक्तत्यागादित्यर्थः ॥ अनंतरमेवेत्युक्तं व्यनक्ति नत्विति ॥ ननु कर्मफलत्यागस्य सद्यः शांतिक

इदानीं सर्वकर्मफलत्यागं स्तौति श्रेयो हि प्रशस्यतरं ज्ञानं कस्मादविवेकपूर्वकादभ्यासात्तस्मादपि ज्ञानात् ज्ञानपूर्वकं ध्या
नं विशिष्यते ज्ञानवतो ध्यानादपि कर्मफलत्यागो विशिष्यत इत्यनुषज्यते एवं कर्मफलत्यागात्पूर्वविशेषणवतः शांतिरु
पशमः सहेतुकस्य संसारस्यानंतरमेव स्यान्नतु कालांतरमपेक्षते ऽज्ञस्य कर्मणि प्रवृत्तस्य पूर्वोपदिष्टोपायानुष्ठाना

श्रेयो हि ज्ञानमभ्यासात् ज्ञानात् ध्यानं विशिष्यते ॥ ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरं ॥ १२ ॥ ॥

शक्तो ऽसर्वकर्मणां फलत्यागः श्रेयः साधनमुपदिष्टं न प्रथममेवातश्च श्रेयो हि ज्ञानमभ्यासादित्याद्युत्तरोत्तरविशि
ष्टतोपदेशेन सर्वकर्मफलत्यागः स्तूयते ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीरामायनमः ॥ श्रीरामचंद्रायनमः ॥ ॥

रत्वे सम्यग्धीरेव तथेति श्रुतिस्मृतिप्रसिद्धिविरुद्धो ततत्राह ॥ अज्ञस्येति ॥ दीर्घेण कालेनादरनैरंतर्यानुष्ठिताद्ध्यानाद्दृक्साक्षात्कारद्वारा
संसारदुःखोपशांतिस्तथाविधाद्ध्यानात्त्यागस्य विशिष्टत्वोक्तेस्तदीयस्तुतिरत्रेष्टा इत्याह ॥ अतश्चेति ॥ श्रीरामकृष्णायनमः ॥ ॥ ॥

तत्रहेतुमाह संपन्नेति संपन्नानिप्राप्तानिसाधनान्यक्षरोपासनादीनितेषांमध्येपूर्वपूर्वस्यानुष्ठानाशक्तावुत्तरोत्तरस्यानुष्ठेयत्वेनोपदेशात्यागेचोपदेशपर्यवसानादित्यर्थः त्यागेविशिष्टत्ववचनस्यकेनधर्मेणतंप्रतिस्तुतित्वमितिपृछति केनेति उत्तरमाह यदेति अमृतत्वमुक्तमथमर्त्योमृतोभवतीतिशेषादितिशेषः कामप्रहाणस्यामृतत्वार्थत्वमथाकामयमानइत्यादावपिसिद्धमित्याह तदिति कामत्यागस्यामृतत्वहेतुत्वेपिकथंकर्मफलत्यागस्यतद्धेतुतमित्याशंक्याह कामाश्चेति कर्मफलत्यागादेवशांतिश्चेत्तज्ज्ञाननिष्ठानापेक्षिते

संपन्नसाधनानुष्ठानाशक्तावनुष्ठेयत्वेनश्रुतत्वात्केनसाधर्म्येणस्तुतित्वंयदासर्वेप्रमुच्यंतइतिसर्वकामप्रहाणात् अमृतत्वमुक्तंतत्सिद्धंकामाश्चसर्वेश्रौतस्मार्त्तसर्वकर्मणांफलानितत्त्यागेचविदुषोज्ञाननिष्ठस्यानंतरैवशांतिरितिसर्वकर्मफलत्यागसामान्यमज्ञस्यकर्मफलत्यागस्याप्यस्तीतितत्सामान्यात्कर्मफलत्यागस्तुतिरियंप्ररोचनार्थायथाऽगस्त्येनब्राह्मणेनसमुद्रःपीतःइदानींतनाअपिब्राह्मणाःब्राह्मणत्वसामान्यात्स्तूयंतेएवंकर्मफलत्यागात्कर्मयोगस्यश्रेयःसाधनत्वमभिहितं १२ ॥ ॥

त्याशंक्याह तत्त्यागेचेति तथापिकथमज्ञस्यकर्मफलत्यागस्तुतिरित्याशंक्याहेतिसर्वेति विद्यावतस्त्यागवदविदुषस्त्यागस्यापित्यागत्वाविशेषाद्विशिष्टोक्तिर्युक्तेति स्तुतिमुपसंहरतीतितत्सामान्यादिति किमर्थास्तुतिरित्याशंक्यत्यागेरुचिमुत्पाद्यप्रवर्त्तयितुमित्याह प्ररोचनार्थेति त्यागस्तुतिंदृष्टांतेनस्पष्टयति यथेति फलत्यागःश्रेयोहेतुश्चेत्तत्कर्मत्यागादपिफलत्यागसिद्धेरलंकर्मानुष्ठानेनेत्याशंक्याह कर्मेति फलाभिलाषंयत्त्वाकर्मानुष्ठानस्यार्पितस्येश्वरेश्रेयोहेतुतायाविवक्षितत्वान्नानुष्ठानानर्थक्यमित्यर्थः १२ श्रीः ॥

संप्रत्युद्देशेस्याद्यवतारयितुं वृत्तं कीर्त्तयत्यत्र चेतिति यो श्वेदा संतिको ऽन्नेदो न तर्हीश्वरे मनः समाधानरूपो योगो ऽत्यंताभेदे ध्यातृ ध्येयत्वाभावा
न्न चात्यंताभेदे कर्मानुष्ठानं तत्फलत्यागो वा परस्य तद योगादित्यर्थः। भगवदुक्ति सामर्थ्यादपि कर्मयोगादिना भेददृष्टिमतो ऽभवतीत्याह।

अत्र चात्मेश्वर भेदमाश्रित्य विश्वरूपे ईश्वरे चेतः समाधानलक्षणो योगः उक्तः ईश्वरार्थ कर्मानुष्ठानादि
च। अथैतदप्यशक्तो ऽसीत्यादिना अज्ञानकार्यसूचनाच्चाभेददर्शिनो ऽक्षरोपासकस्य कर्मयोग उपपद्य
त इति दर्शयति। तथा कर्मयोगिनो अक्षरोपासनानुपपत्तिं दर्शयति भगवान् ते प्राप्नुवंति मामेवे॥

अथेति। अक्षरोपासकस्य कर्मयोगवत्कर्मयोगिनो ऽक्षरोपासनानुपपत्तिरपि दर्शितेत्याह। तथेति। अक्षरोपासकाः सम्यग्धी निष्ठाय
था ज्ञानं भगवंतमेवाप्नुवंतीति। न तथा कर्मिणः साक्षात्तदाप्ता अपि तेत यावच्च कर्मिणो नाक्षरोपासनसिद्धिरित्यर्थः॥ ॥

इतश्चाक्षरोपासनं कर्मानुष्ठानं च नैकत्र युक्तमित्याह । अक्षरेति । नन्वक्षरोपासकवदन्येषामपीश्वरात्मत्वाविशेषात्कुतस्तदधीनत्वं तत्राह । यदीति । कर्मयोगस्याक्षरोपास्तेश्च युगपदेकत्रायोगे हेत्वंतरमाह । यस्माच्चेति । कुरु कर्मैवेत्यादावितिशेषः । किंच । अक्षरोपासको वाक्यादीश्वरमात्मानं वेत्ति नासौ क्रियायां गुणत्वेन कर्तृत्वमनुभवति गुणत्वे श्वरत्वयोरेकत्र व्याघातादतोपि नाक्षरोपासनं कर्मानु

त्यक्षरोपासकानां कैवल्यप्राप्तौ स्वातंत्र्यमुक्तेतरेषां पारतंत्र्यमीश्वराधीनतां दर्शितवांस्तेषामहं समुद्धर्तेति । यदि हीश्वरस्यात्मभूतास्ते मता अभेददर्शित्वादक्षरस्वरूपा एव ते इति समुद्धरणकर्मवचनं तान्प्रत्यपेशलं स्याद्यस्माच्चार्जुनस्यात्यंतमेव हितैषी भगवांस्तस्य सम्यग्दर्शनानन्वितं कर्मयोगं भेददृष्टिमंतमेवोपदिशति । न चात्मानमीश्वरं प्रमाणतो बुद्ध्वा कस्यचिद्गुणभावं जिगमिषति विरोधात्तस्मादक्षरोपासकानां सम्यग्दर्शननिष्ठानां संन्यासिनां त्यक्तसर्वैषणानां अद्वेष्टा सर्वभूतानामित्यादि धर्मपूगं साक्षादमृतत्वकारणं वक्ष्यामीति प्रवर्त्तते । श्रीसीतारामचंद्राय नमः ॥

ष्ठानं नैकत्र युक्तमित्याह । न चेति । अक्षरोपास्तिकर्मयोगयोरेकत्र पर्यायायोगे फलितमाह । तस्मादिति । अज्ञानां कर्मिणां वक्ष्यमाणधर्मजातस्य साकल्येनायोगादक्षरनिष्ठानामेवेदमुच्यते अविरुद्धांशस्य तु सर्वार्थत्वमिष्टमित्यर्थः ॥ श्रीः ॥ ॥

सर्वेषां भूतानां मध्ये यो दुःखहेतुस्तं विद्वानपि द्वेष्येवेत्यत आह आत्मन इति तत्र हेतुः सर्वाणीति सर्वभूतानामित्युभयतः संबध्यते मम प्रत्ययव
र्जितो देहेपीति शेषः ॥ कृतस्वाध्यायकृताहंकारान्निःक्रांतत्वमाह निर्गतेति ॥ १३ अक्षरोपासकस्य ज्ञानवतो विशेषणांतराण्याह संतुष्ट

अद्वेष्टा सर्वभूतानां न द्वेष्टा आत्मनो दुःखहेतुमपि न कंचित् द्वेष्टि सर्वाणि भूतान्यात्मत्वेन हि पश्यति मैत्रः मित्रभावो मैत्रः मि
त्रतया वा वर्त्तत इति मैत्रः करुणः एव च कृपा दुःखितेषु दया तद्वान् करुणः सर्वभूताभयप्रदः संन्यासीत्यर्थः ॥ निर्ममो म
मप्रत्ययवर्जितो निरहंकारो निर्गतोऽहंकारप्रत्ययः समदुःखसुखः समे दुःखसुखे द्वेषरागयोरप्रवर्त्तके यस्य स स
मदुःखसुखः क्षमी क्षमावान् ॥ आक्रुष्टोहतो वाऽविक्रिय एवास्ते ॥ १३ ॥ संतुष्टः सततं नित्यं देहस्थितिकारणस्य

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ॥ निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ १३ ॥
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ॥ मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १४ ॥ ॥

लाभालाभे च उत्पन्नात्मप्रत्ययस्तथा गुणवल्लाभे विपर्यये च संतुष्टः सततं योगी समाहितचित्तः यतात्मा संय
तस्वभावो दृढनिश्चयो दृढः स्थिरो निश्चयोऽध्यवसायो यस्यात्मतत्त्वविषये स दृढनिश्चयः ॥ मय्यर्पितमनोबु
द्धिः संकल्पात्मकं मनोऽध्यवसायलक्षणा बुद्धिस्ते मय्यर्पिते स्थापिते यस्य संन्यासिनः स मय्यर्पितमनोबुद्धिर्य ई
दृशो मद्भक्तः स मे प्रियः प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रिय इति सप्तमे ध्याये सूचितं तदिह प्रपंच्यते ॥ १४ ॥

इति सततमिति सर्वत्र संबध्यते कार्यकरणसंघातः स्वभावशब्दार्थः स्थिरत्वं कुतार्किकादीनामनभिभवनीयत्वं मद्भक्तो मद्भज
नपरो ज्ञानवानिति यावत् ज्ञानवतो भगवत्प्रियत्वे प्रमाणमाह प्रियो हीति ॥ किमर्थं तर्हि पुनरुच्यते तदिहेति ॥ १४ ॥ ॥

उद्वेगादिराहित्यमपि ज्ञानवतो विशेषणमित्याह यस्मादिति न केवलमुद्वेगाप्रत्ययादानत्वमेव संन्यासिनोनुपपन्नं किंतु तत्कर्तृत्व मपीत्याह तथेति असहिष्णुता परकीयप्रकर्षस्येति शेषः त्रासस्तस्करादिदर्शनाधीनः उद्विग्नत्वमचेतनाश्चेतनाधीनस्य लोका दितियावत् १५ निरपेक्षत्वादिकमपि ज्ञानिनो विशेषणमित्याह अनपेक्ष इति आदिपदमपेक्षणीयसर्वसंग्रहार्थं प्रतिपत्तव्येषु

यस्मात्संन्यासिनो नोद्विजते उद्वेगं न गच्छति न संतप्यते न संक्षुभ्यते लोकस्तथा लोकान्नोद्विजते च यः हर्षामर्षभयोद्वेगै हर्षश्च अमर्षश्च भयं चोद्वेगश्च तैः हर्षामर्षभयोद्वेगैर्मुक्तो हर्षः प्रियलाभेंतःकरणस्योत्कर्षो रोमांचताश्रुपातादिलिंगः अमर्षो असहिष्णुता भयं त्रासः उद्वेग उद्विग्नता तैर्मुक्तो यः स मे प्रियः १५ अनपेक्षो देहेंद्रियविषयसंबंधादिष्वपे

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः॥ हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः १५॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः॥ सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः॥ १६॥

क्षाविषयेष्वनपेक्षो निःस्पृहः शुचिर्बाह्येनाभ्यंतरेण च शौचेन संपन्नो दक्षः प्रत्युत्पन्नेषु कार्येषु सद्यो यथावत्प्रतिप त्तुं समर्थः उदासीनो न कस्यचित्मित्रादेः पक्षं भजते यः स उदासीनो यतिर्गतव्यथो गतभयः सर्वारंभपरित्यागी आर भ्यंते इत्यारंभा इहामुत्रफलभोगार्थानि कर्माणि सर्वारंभास्तान् परित्यक्तुं शीलमस्येति सर्वारंभपरित्यागी यो मद्भक्तः स

प्रतिपत्तुं कर्त्तव्येषु कर्तृत्वं चेत्यर्थः परैस्ताडितस्यापि गता व्यथा भयमस्येति व्युत्पत्तिमाश्रित्याह गतेति न च क्षमीत्यने नपौनरुक्त्यं प्रत्युत्पन्नायामपि व्यथायामपकर्तृष्वनपकर्तृत्वं क्षमित्युपगमात् १६ श्रीसीतारामचंद्राय नमो नमः॥ ॥

द्वेषहर्षादिराहित्यमपि ज्ञानिनो लक्षणमित्याह॥ किंचेति॥ सर्वारंभपरित्यागीत्यनेन विहितकामत्यागस्योक्तत्वाद्धिहितादन्यत्र मा सं कोचीति विशि
नष्टि॥ शुभाशुभेति॥ १७ वैषम्यबुद्ध्यभावाद्यपि ज्ञानिनो विशेषणमित्याह॥ सम इति॥ अद्वेष्टेत्यादिनाद्वेषादिविशेषाभाव उक्तः संप्रति सर्व
त्रैवाविकृतचित्तत्वमुच्यते॥ सर्वत्रचेतनेष्वियादावचेतनेचंदनादावित्यर्थः॥ १८ वाचंयमत्वादिविशेषणमपि ज्ञानिनिष्यास्तीत्याह॥

किंच॥ यो न हृष्यति इष्टप्राप्तौ न द्वेष्ट्यनिष्टप्राप्तौ न शोचति प्रियवियोगेन न चाप्राप्तं कांक्षति शुभाशुभे कर्मणी परित्यक्तुं शी
लमस्येति शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥ १७॥ समः शत्रौ च मित्रे च तथा मानापमानयोः पूजापरिभवयोः
शीतोष्णसुखदुःखेषु समः सर्वत्र च संगवर्जितः॥ १८॥ किंच॥ तुल्यनिंदास्तुतिः निंदा च स्तुतिश्च निंदास्तुती ते तुल्ये य
स्य स तुल्यनिंदास्तुतिः मौनी मौनवान्संयतवाक् संतुष्टो येन केन चित् शरीरस्थितिहेतुमात्रेण तथा चोक्तं येन केन चि

योन हृष्यति न द्वेष्टि न शोचति न कांक्षति॥ शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥ १७॥ समः शत्रौ च
मित्रे च तथा मानापमानयोः॥ शीतोष्णसुखदुःखेषु समः संगविवर्जितः॥ १८॥ तुल्यनिंदास्तुतिर्मौनी संतु
ष्टो येन केन चित्॥ अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः॥ १९॥

दाच्छन्नो येन केन चिदाशितः यत्र क्वचन
शायी स्यात्तं देवा ब्राह्मणं विदुरिति॥ किंच॥ अनिकेतो निकेत आश्रयो निवासो नियतो न विद्यते यस्य सोयमनिकेतो नागार
इत्यादिस्मृत्यंतरात् स्थिरमतिः स्थिरा परमार्थवस्तुविषया मतिर्यस्य स स्थिरमतिः भक्तिमान्मे प्रियो नरः॥ १९॥ ॥

किंचेति॥ निंदादोषसंकीर्त्तनं स्तुतिर्गुणगणनं देहस्थितिमात्रफलेनाशनादिना ज्ञानिनः संतुष्टत्वे स्मृतिं प्रमाणयति तथा चेति॥ निय
तनिवासराहित्यमपि ज्ञानवतो विशेषणमित्याह॥ किंचेति॥ न कुड्यां नोदके संगो न चैले न त्रिपुष्करे नागारे नासने नान्ने यस्य वै मोक्षवि
त्तमइति स्मृतिं मुक्तेर्थे प्रमाणयति॥ नेत्यादिना॥ पुनः पुनर्भक्तेर्ग्रहणमपवर्गमार्गस्य परमार्थज्ञानस्योपायत्वार्थं॥ १९॥ ॥

अद्वेष्टेत्यादिधर्मजातं ज्ञानवतो लक्षणमुक्तं तदुपपादितमनूद्योपसंहारश्लोकमवतारयति । अद्वेष्टेत्यादिना । चतुर्थपादस्य तात्पर्यमाह । प्रियो हीति । यद्यपि यथोक्तं धर्मजातं ज्ञानवतो लक्षणं तथापि जिज्ञासूनां ज्ञानोपायत्वेन यत्नादनुष्ठेयमिति वाक्यार्थमुपसंहरति । यस्मादिति । तदेवं सोपाधिकात्मध्यानपरिपाकान्निरुपाधिकमनुसंदधानस्याद्वेष्टा सर्वभूतानामित्यादिधर्मो विशिष्ट

अद्वेष्टा सर्वभूतानामित्यादिनाक्षरस्योपासकानां संन्यासिनां निवृत्तसर्वैषणानां परमार्थज्ञाननिष्ठानां सर्वज्ञानां उपक्रान्तमुपसंह्रियते । इति ये तु संन्यासिनो धर्म्यामृतं धर्मश्चासौ अमृतं च तत् धर्मामृतं तदमृतत्वहेतुत्वादिदं यथोक्तमद्वेष्टा सर्वभूतानामित्यादिना पर्युपासते अनुतिष्ठंति श्रद्दधानाः संतो मत्परमा यथोक्तोऽहमक्षरात्मा परमो निरतिशयो गतिर्येषां ते मत्परमा मद्भक्ताश्च उत्तमां परमार्थज्ञानलक्षणां भक्तिमास्थितास्ते तीव मे प्रियाः । प्रियो हि ज्ञानिनोऽत्यर्थमिति

ये तु धर्मामृतमिदं यथोक्तं पर्युपासते । श्रद्दधाना मत्परमा भक्तास्तेतीव मे प्रियाः ॥२०॥

यत्सूचितं तद्व्याख्यायेहोपसंहृतं भक्तास्तेतीव मे प्रिया इति । यस्माद्धर्मामृतमिदं यथोक्तमनुतिष्ठन् भगवतो विष्णोः परमेश्वरस्यातीव प्रियो भवति तस्मादिदं धर्मामृतं मुमुक्षुणा यत्नतोऽनुष्ठेयं विष्णोः प्रियं धाम जिगमिषुणेति वाक्यशेषः ॥२०॥ ॥इति श्रीभगवद्गीताभाष्यटीकायां द्वादशोऽध्यायः ॥ ॥१२॥ ॥श्रीसीतारामचंद्राय नमः ॥

स्य मुख्यस्याधिकारिणः श्रवणाद्यावर्त्तयतस्तत्साक्षात्कारसंभवात्ततो मुक्त्युपपत्तेस्तद्धेतुवाक्यार्थधीविषयान्वयत्वयोग्यस्तत्पदार्थोऽनुसंधेय इति सिद्धं ॥२०॥ ॥इति श्रीगीताभाष्यटीकायामानंदगिरीये द्वादशोऽध्यायः ॥ ॥१२॥ ॥श्रीः॥ ॥

प्रथममध्यमयोः षट्कयोस्तत्त्वंपदार्थौ वुक्तावुत्तरस्मिन्षट्कोवाक्यार्थनिष्ठः सम्यग्धीप्रधानोधुनारभ्यते ॥ तत्रक्षेत्राध्यायमंतिमष
ट्काद्यमवतारयितुर्व्यवहितंवृत्तंकीर्त्तयति ॥ सप्तमइति ॥ प्रकृतिद्वयस्यखातंत्र्यंवारयति ॥ ईश्वरस्येति ॥ भूमिरित्यादिनोक्ता
सत्वादिरूपाप्रकृतिरपरेत्यत्रहेतुमाह ॥ संसारेति ॥ इतस्त्वन्यामित्यादिनोक्तांप्रकृतिमनुक्रामति ॥ पराचेति ॥ परत्वेहेतुंसूच
यति ॥ ईश्वरात्मिकेति ॥ किमर्थमीश्वरस्यप्रकृतिद्वयमित्याशंक्यकारणत्वार्थमित्याह ॥ याभ्यामिति ॥ वृत्तमनूद्यवर्त्तिष्यमा

सप्तमेऽध्यायेसूचितेद्वेप्रकृतीईश्वरस्यत्रिगुणात्मिकाष्टधाभिन्नाअपरासंसारहेतुत्वात्परा चान्याजीव
भूताक्षेत्रज्ञलक्षणाईश्वरात्मिकायाभ्यांप्रकृतिभ्यांईश्वरोजगदुत्पत्तिस्थितिप्रलयहेतुत्वंप्रतिपद्यते
तत्रक्षेत्रक्षेत्रज्ञलक्षणप्रकृतिद्वयनिरूपणद्वारेणतद्वतईश्वरस्यतत्त्वनिर्द्धारणार्थंक्षेत्राध्यायआर
भ्यते ॥ अतीतानंतराध्यायेचअद्वेष्टासर्वभूतानामित्यादिनायावदध्यायपरिसमाप्तिस्तावत्तत्त्वज्ञा
निनांसंन्यासिनांनिष्ठायथातेवर्त्ततइत्येतदुक्तंकेनपुनस्तत्त्वज्ञानेनयुक्तायथोक्तधर्माचरणात्भगव
तःप्रियाभवंतीत्येवमर्थश्चायमध्यायआरभ्यते ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीकृष्णायनमः

णाध्यायारंभप्रकारमाह ॥ तत्रेति ॥ व्यवहितेनसंबंधमुक्त्वाऽव्यवहितेनतंविवक्षुरव्यवहितमनुवदति ॥ अतीतेति ॥ निष्ठोक्ते
तिसंबंधः ॥ निष्ठामेवव्याचष्टे ॥ यथेति ॥ वर्त्ततेधर्मजातमनुतिष्ठतितथापूर्वोक्तेनप्रकारेणसर्वमुक्तमितियोजना ॥ अव्यव
हितमेवमनूद्यतेनोत्तरस्यसंबंधंसंगिरते ॥ केनेति ॥ ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ ॥

तत्वज्ञानेनोक्तार्थेनसमुच्चयार्थश्चकारः जीवानांसुखदुःखादिभेदभाजांप्रतिक्षेत्रंभिन्नानांनाक्षरेणैक्यमित्याशंकासंसारस्या
त्मधर्मत्वंनिराकृत्यसंघातनिष्ठत्वंवक्तुंसंघातोत्पत्तिप्रकारमाह॥प्रकृतिश्चेति॥भोगश्चापवर्गश्चार्थौतयोरेवकर्त्तव्यितयेति

प्रकृतिश्चत्रिगुणात्मिकासर्वकार्यकारणविषयाकारेणपरिणतापुरुषस्यभोगापवर्गार्थकर्त्तव्यतया
देहेंद्रियाद्याकारेणसंहन्यतेसोयंसंघातइदंशरीरंतदेतद्भगवानुवाच॥ श्रीकृष्णायनमोनमः॥श्रीः

यावत्॥नन्वनंतरेश्लोकेशरीरनिर्देशात्तस्योत्पत्तिर्वक्तव्याकिमितिसंघातस्योच्यतेतत्राह॥सोयमिति॥उक्तेर्थेभगवद्वचन
मवतारयति॥तदेतदिति॥श्रीरामचंद्रायनमः॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥श्रीरामकृष्णायनमोनमः॥श्रीः॥

तद्रूपत्वेन संघातात् दृश्यादन्यमात्मानं दिशति इदमिति उक्तं प्रत्यक्षदृश्यमविशिष्टं किंचिदिति शेषः शरीरास्यात्मनोन्यत्वं क्षेत्रनामनिरुक्त्याब्रूते क्षतेति क्षयो नाशः क्षरणमपक्षयः यथा क्षेत्रे बीजमुप्तं फलति तद्वदित्याह क्षेत्रवद्वेति क्षेत्रपदादुपरिस्थितमिति परं क्षेत्रशब्दविषयं अन्यथा वैयर्थ्यादित्याहेति शब्द इति क्षेत्रमित्येवमनेन क्षेत्रशब्देनेत्यर्थः दृश्यं देहमु

इदमिति सर्वनाम्नोक्तं विशिनष्टि शरीरमिति हे कौंतेय क्षतत्राणात् क्षयात् क्षरणात् क्षेत्रवत् वास्मिन् कर्मफलनिर्वृतेः क्षेत्रमितीति शब्दः एवं शब्दपदार्थकः क्षेत्रमित्येवमभिधीयते कथ्यते एतत् शरीरं क्षेत्रं यो वेत्ति विजानात्यापादत

श्रीभगवानुवाच ॥ इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते ॥ एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ १ ॥ श्री ः ॥

त्वमस्तकं ज्ञानेन विषयीकरोति स्वाभाविकेन औपदेशिकेन वा वेदनेन विषयीकरोति विभागशस्तं वेदितारं प्राहुः कथयंति क्षेत्रज्ञ इतीति शब्दः एवं शब्दपदार्थकः एवं पूर्ववत् क्षेत्रज्ञ इत्येवं आहुः के तद्विदः तौ क्षेत्रक्षेत्रज्ञौ ये विदंति ते तद्विदः १

स्वात्ततोतिरिक्तं द्रष्टारमाह एतदिति स्वाभाविकं मनुष्योहमिति ज्ञानमौपदेशिकं देहो नात्मा दृश्यत्वादित्यादि विभागशस्ततोतिरिक्तत्वेनेत्यर्थः क्षेत्रमित्यत्रेति शब्दवदत्रापीति शब्दस्य क्षेत्रज्ञशब्दविषयत्वमाह इति शब्द इति क्षेत्रज्ञ इत्येवं क्षेत्रज्ञशब्देन तं प्राहुरिति संबंधः प्रवक्तृप्रश्नपूर्वकमाह केतदित्यादिना ॥ १ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीकृष्णः

दृश्यानां दुःखादीनां भेदकानां यावद्देहभाविनामनात्मधर्मत्वसिद्धये द्रष्टारं देहादन्यमुक्त्वा सांख्यानामिव तन्मात्रेण मुक्तिं निवृ
त्तयेतस्य सर्वदेहेष्वेकत्वोक्तिपूर्वकं स्वेन परमार्थेनाक्षरेणैकत्वं वृत्तमनूद्य प्रश्नद्वारा दर्शयेत्येवमित्यादिना ॥ यथोक्तलक्षणं दृ
श्याद्देहान्निःकृष्टं द्रष्टारमित्यर्थः ॥ चापीति निपातो जीवस्याक्षरताज्ञानस्य देहादन्यत्वज्ञानेन समुच्चयार्थौ भिन्नक्रमो
न क्षेत्रज्ञं सांख्यवद्दृश्यादन्यमेव विद्धि ॥ किं तु मां चापि विद्धीति संबध्यते यः ॥ सर्वक्षेत्रेष्वेकः क्षेत्रज्ञस्तं मामेव विद्धीति संबंधं

एवं क्षेत्रक्षेत्रज्ञावुक्तौ ॥ किमेतावन्मात्रेण ज्ञानेन ज्ञातव्याविति नेत्युच्यते ॥ क्षेत्रज्ञं यथोक्तलक्षणं च अपि मां परमेश्व
रमसंसारिणं विद्धि जानीहि यो सो सर्वक्षेत्रेष्वेकः ॥ क्षेत्रज्ञो ब्रह्मादिस्तंबपर्यंतानेकक्षेत्रोपाधिप्रविभक्तस्तं च निरस्त
सर्वोपाधिभेदं सदसदादिशब्दप्रत्ययागोचरं विद्धि इत्यभिप्रायः हे भारत यस्मात्क्षेत्रक्षेत्रज्ञेश्वरयाथात्म्यव्य

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तत्ज्ञानं मतं मम ॥२॥ श्रीः

तिरेकेण न ज्ञानगोचरमन्यदवशिष्टमस्ति तस्मात्क्षेत्रक्षेत्रज्ञयोर्ज्ञेयभूतयोर्यत्ज्ञानं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयी
क्रियेते तत्ज्ञानं सम्यग्ज्ञानमिति ॥ मम मतमित्यभिप्रायः मम ईश्वरस्य विष्णोः ॥ श्रीकृष्णाय नमः ॥ श्रीरामाय नमः ॥

सूचयति ॥ सर्वेति ॥ तत्र तत्क्षेत्रोपाधिकभेदभाजस्तत्तद्बुधीगोचरस्य कथं तद्विपरीतब्रह्मत्वधीरित्याशंक्याह ॥ ब्रह्मादीति ॥ उत्तरा
र्द्धं विभजते ॥ यस्मादिति ॥ तदेव विशिनष्टि ॥ क्षेत्रेति ॥ न च भेदविषयत्वान्न सम्यग्ज्ञानं तदिति युक्तं तस्याविवेकज्ञानस्य वाक्यार्थ
ज्ञानद्वारा मोक्षौपयिकत्वेन सम्यक्त्वसिद्धेरिति भावः ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीरामाय नमः ॥ श्रीसीतारामचंद्राय नमः ॥

जीवेश्वरयोरेकत्वमुक्तमाक्षिपति नन्विति जीवेश्वरयोरेकत्वे जीवस्येश्वरे तदभावइश्वरस्यवा जीवेंतर्भावः नाद्यः जीवस्यपरस्मा
दन्यस्याभावे संसारस्य निरालंबनत्वानुपपत्त्यापरस्यैव तदाश्रयत्वप्रसंगादित्यर्थः अनश्नन्नन्यो अभिचाकशीतीति श्रुतेर्नतस्य
संसारित्वेत्याशंक्यद्वितीयं दूषयति ईश्वरेति जीवेचेदीश्वरोंतर्भवति तदापितत्वोन्यसंसार्यभावात्तस्यच संसारानिष्टेः संसारो
जगत्यस्तंगच्छेदित्यर्थः प्रसंगद्वयस्येष्टत्वं निराचष्टे तत्रेति संसाराभावेतयोरन्यः पिप्पलंस्वाद्वत्तीत्यादि बंधश्रुतस्तस्य तद्धेतु
कर्मविषयकर्मकांडस्यचानर्थक्यमीश्वराश्रितेच संसारेतदभोक्तृत्वश्रुतेर्ज्ञानकांडस्यमोक्षहेतुज्ञानार्थस्यानर्थक्यमतोनप्रसं

ननुसर्वक्षेत्रेष्वेक ईश्वरोनान्यस्तद्व्यतिरिक्तो भोक्ताविद्यते चेत्ततईश्वरस्यसंसारित्वंप्राप्तं ईश्वरव्यतिरेकेणवा संसारिणोन्य
स्याभावात्संसाराभावप्रसंगस्तच्चोभयमनिष्टं बंधमोक्षतद्धेतुशास्त्रानर्थक्यप्रसंगात् प्रत्यक्षादिप्रमाणविरोधाच्च प्र
त्यक्षेणतावत्सुखदुःखतद्धेतुलक्षणः संसार उपलभ्यते जगद्वैचित्र्योपलब्धेश्चधर्माधर्मनिमित्तः संसारोनुमीयते॥
सर्वमेतदनुपपन्नं आत्मेश्वरैकत्वे नज्ञानाज्ञानयोरन्यत्वेनोपपत्तेः दूरमेतेविपरीतेविषूचीअविद्यायाचविद्येतिज्ञा
ता तथाचतयोः विद्याविद्ययोर्विषययोर्ज्ञानकर्मणोः फलभेदोपिविरुद्धोनिर्दिष्टः श्रेयश्चप्रेयश्चेति॥ ॥

गयोरिष्टत्वेत्यर्थः संसाराभावप्रसंगस्यानिष्टत्वेहेत्वंतरमाह प्रत्यक्षादीति तत्रप्रत्यक्षविरोधंप्रकटयति प्रत्यक्षेणेति॥
आदिशब्दोपात्तमनुमानविरोधमाह जगदिति विमतंविचित्रहेतुकंविचित्रकार्यत्वात्प्रासादादिवदित्यर्थः प्रत्यक्षानुमा
नागमविरोधादयुक्तमैक्यमित्युपसंहरति सर्वमिति ऐक्येपिसंसारित्वमविद्यातोविद्यातोऽसंसारित्वमितिविभागान्ना
नुपपत्तिरित्युत्तरमाह नेत्यादिना तयोःस्वरूपतोविलक्षणत्वेश्रुतिमाह दूरमिति स्वरूपतोविरोधवत् फलतोपिसोस्ती

गीताभाष्य

फलभेदोक्तिमेवव्यनक्ति विद्येति तयोर्द्विधाविलक्षणत्वेवेदव्यासस्यापिसंमतिमाह तथाचेति ॥ उक्तेर्थेभगवतोपिसंमतिमाह इहत्वेति द्वयोरपिनिष्ठयोस्तुल्यमादेयत्वमितिशंकांशातयत्यविद्याचेति ॥ अविद्यासकार्याहातव्येत्यत्रश्रुतीरुदाहरति श्रुतयस्तावदिति इहेतिजीवदवस्थोच्यतेचेद्ब्रह्मविद्योदयदोर्लभ्ययोती अवेदीदहंब्रह्मेतिविदितवानित्यर्थः अथविद्यानंतरमेवसत्यमवितथंपुनरावृत्तिवर्जितंकेवल्यंस्यादित्याह अथेति ॥ अविद्याविषयेपिश्रुतिमाह नचेदिति ॥ जन्ममर

विद्याविषयः श्रेयः प्रेयस्त्वविद्याकार्यमिति ॥ तथाचव्यासः ॥ द्वाविमावथपंथानाविद्यादिद्भौद्वावेवपंथानाविद्यादिच ॥ इहत्वहेनिष्टेउक्ते अविद्याचसहकार्येणविद्ययाहातव्येतिश्रुतिस्मृतिन्यायेभ्योऽवगम्यते ॥ श्रुतयस्तावदिहचेदवेदीदथसत्यमस्तिनचेदिहावेदीन्महतीविनष्टिः ॥ तमेवंविद्वानमृतइहभवति ॥ नान्यःपंथाविद्यतेऽयनायविद्वान्नबिभेतिकुतश्चन ॥ श्रीरामचंद्रायनमः ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥

णादिरूपासंसृतिर्विनष्टिस्तस्यामहत्वंसम्यग्ज्ञानंविनानिवर्तयितुमशक्यत्वं॥ विद्याविषयेश्रुत्यंतरमाह ॥ तमेवमिति ॥ परमात्मानंप्रत्यक्त्वेनयः साक्षात्कृतवान्सदेहेजीवत्येवमुक्तोभवतीत्यर्थः ॥ विद्यांविनापिहेत्वंतरात्मुक्तिमाशंक्याह नेति ॥ भयहेतुमविद्यांनिराकुर्वेतीतज्जंभयमपिनिरस्यतिविद्येत्यत्रवाक्यांतरमाह ॥ विद्वानिति ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीः ॥

अविद्याविषयेवाक्यांतरमाह। अविदुष इति प्रतीच्येकरसेप्यल्पमपि भेदमभिमन्यमानस्य भेददृष्टेरनंतरमेव संसारध्रौव्य
मित्यर्थः। तत्रैव श्रुत्यंतरमाह। अविद्यायामिति तन्मध्येत्तस्वरवशतया स्थितास्तत्त्वं अजानंतो देहाद्यभिमानवंतो मूढाः संस
रंतीत्यर्थः। विद्याविषये श्रुत्यंतरमाह। ब्रह्मेति। अविद्याविषये श्रुत्यंतरमाह। अन्योसाविति। भेददृष्टिमनूद्य तन्निदान
मविद्येत्याह। नेति। स च मनुष्याणां पशुवद्देवादीनां प्रेष्यतां प्राप्नोतीत्याह। यथेति। विद्याविषये वाक्यांतरमाह। आत्म
विदिति। इदं प्रत्यग्भूतं पूर्णं ब्रह्मेत्यर्थः। ज्ञानादेव हि कैवल्यमित्यत्र श्रुत्यंतरमाह। यदेति। नखल्वाकाशं चर्मवन्मा

अविदुषस्त्वथ तस्य भयं भवत्यविद्यायामंतरे वर्त्तमाना ब्रह्म वेद ब्रह्मैव भवति। अन्योसावन्योहमस्मी
ति न स वेद यथा पशुरेवं स देवानां। आत्मविद्यः स इदं सर्वं भवति। यदा चर्मवदाकाशं वेष्टयिष्यंति मान
वाः तदा शिवमविज्ञाय दुःखस्यांतो भविष्यतीत्याद्याः सहस्रशः स्मृतयश्च अज्ञानेनावृतं ज्ञानं तेन मुह्यं
ति जंतवः इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः समं पश्यन् हि सर्वत्र इत्याद्या न्यायतश्च॥ ॥

न वो वेष्टयितुमीष्टे। तथा परमात्मानं प्रत्यक्त्वेनाननुभूय न मुच्यत इत्यर्थः। आदिशब्देनानुक्ता विद्याविद्याफलभे
दार्थाः श्रुतयो गृह्यंते तासां भूयस्त्वेन प्रामाण्यं सूचयति। सहस्रश इति। विद्याविद्याविषये स्मृतीरुदाहरति। स्मृ
तयश्चेति। तत्राविद्याविषये वाक्यमाह। अज्ञानेनेति। विद्याविषयं वाक्यद्वयमुदाहरति। इहेत्यादिना। विद्याफलमनर्थ
ध्वस्तिरविद्याफलमनर्थाप्तिरित्येतदन्वयव्यतिरेकाख्यन्यायादपि सिध्यतीत्याह। न्यायतश्चेति॥ ॥ ॥

तत्रैव पुराणसंमतिमाह सर्पानिति। उदपानं कूपः यथार्थज्ञाने विशिष्टं फलं स्यात्तथा पश्येतियोजना। न्यायतश्चेत्यन्वय
व्यतिरेकाख्यन्यायमुक्तं विवृणोति। तथा चेति। तत्रादावन्वयमाचष्टे देहादिष्विति। अनाद्यनिर्वाच्याविद्यावृतश्चेदात्मा
देहादावनात्मन्यात्मबुद्धिमादधाति तद्युक्तो रागादिना प्रेर्यते तत्प्रयुक्तश्च कर्मानुतिष्ठति तत्कर्त्ता च यथाकर्म नूतनदेहमा
दत्ते पुरातनं त्यजतीत्येवमविद्यावत्त्वे संसारित्वं सिद्धमित्यर्थः। व्यतिरेकमिदानीं दर्शयति। देहादीति। श्रुतियुक्तिभ्यां भे

सर्पान्कुशाग्राणि तथोदपानं ज्ञात्वा मनुष्याः परिवर्जयंति॥ अज्ञानतस्तत्र पतंति केचित्ज्ञाने फलं पश्य य
थाविशिष्टं तथा च देहादिष्वनात्मस्वात्मबुद्धिरविद्वान्रागद्वेषादिप्रयुक्तो धर्माधर्मानुष्ठानकृत्जायते म्रि
यते चेत्येवमवगम्यते देहादिव्यतिरिक्तात्मदर्शिनो रागद्वेषादिप्रहाणापेक्षधर्माधर्मप्रवृत्त्युपशमान्मुच्यंत
इति न केनचित्प्रत्याख्यातुं शक्यते न्यायतस्तत्रैवं सति क्षेत्रज्ञस्येश्वरस्यैव सतोऽविद्याकृतोपाधिभेदतः
संसारित्वमिव भाति॥ श्रीरामायनमः॥

देज्ञाते रागादिध्वस्त्या कर्मोपरमाद्शेषसंसारासिद्धिरित्यविद्याराहित्ये बंधध्वस्तिरित्यर्थः॥ उक्तान्वयादेरन्यथासिद्धिं शि थि
लयति। इतिनेति उक्तमन्वयादिद्वादिना केनचिदपि न्यायतो न शक्यं प्रत्याख्यातुं तदन्यथासिद्धिसाधकाभावादित्यर्थः
अन्वयादेरनन्यथासिद्धत्वे चोद्यमपि प्राचीनं प्रतिनीतमित्याह। तत्रेति। ज्ञानाज्ञानयोरुक्तन्यायेन स्वरूपभेदे कार्यभेदे च स्वा
रस्येन परापरयोरैक्ये पि बुद्ध्याद्युपाधिभेदादविद्यकमात्मनः संसारित्वमाभासरूपं प्रातिभासिकं सिद्ध्यतीत्यर्थः॥ ॥

आत्मनो ब्रह्मता स्वतश्चेदहमित्यात्मभावे ब्रह्मतापि भवेदित्याशंक्याह। यथेति देहाद्यतिरिक्तस्यात्मनो वैदिकपक्षे स्वतस्त्वे
पि तस्मिन्नहमिति भात्येव तदतिरिक्तत्वं न भाति किंत्वविद्यातो देहाद्यात्मत्वमेव विपरीतं भासते॥ तथात्मनो ब्रह्मत्वे स्वाभा
विकेपि तस्मिन् भात्येव ब्रह्मत्वं न भात्यविद्यातोऽब्रह्मत्वमेव तस्य भास्यतीत्यर्थः॥ आत्मनो देहाद्यात्मत्वमाविद्यकं भातीत्युक्त
मनुभवेन स्पष्टयति॥ सर्वेति॥ अतस्मिंस्तद्बुद्धिरविद्याकृते त्यत्र दृष्टांतमाह॥ यथेति॥ पुरःस्थिते वस्तुतः स्थाणावविद्यया पुमा
निति निश्चयो जायते॥ तथा देहादावनात्मन्यात्मधीरविद्यातो निश्चितेत्यर्थः॥ देहात्मनोरैक्यज्ञाने देहधर्मस्य जरादेरात्मन्या

यथा देहाद्यात्मत्वमात्मनः सर्वजंतूनां हि प्रसिद्धो देहादिष्वनात्मस्वात्मभावो निश्चितोऽविद्याकृतो यथा स्थाणौ
पुरुषनिश्चयो न चैतावता पुरुषस्य धर्मः स्थाणोर्भवति स्थाणुधर्मो वा पुरुषस्य तथा न चैतन्यधर्मः देहस्य देहधर्मो
वा चैतन्यस्य तथा प्रकृतेपि सुखदुःखमोहात्मकत्वादिरात्मनो न युक्तोऽविद्याकृतत्वाऽविशेषाज्जरामत्वुव॥ ॥

त्मधर्मस्य च न चैतन्यस्य देहे विनिमयः स्यादित्याशंक्याह॥ न चेति॥ स्थाणौ पुरुषत्वं भ्रांत्या भातीत्येतावता पुरुषधर्मः शिरः
पाण्यादिर्न स्थाणोर्भवति॥ तद्धर्मो वा वक्रत्वादिर्न पुंसो दृश्यते मिथ्याध्यस्ततादात्म्याद्वस्तुतो धर्मव्यतिकरादिति दृष्टांतमु
क्त्वा दार्ष्टांतिकमाह॥ तथेति॥ जरादेरनात्मधर्मत्वेपि सुखादेरात्मधर्मत्वमिति केचित् तान् प्रत्याह॥ सुखेति॥ कामः संकल्पा
दिश्च तेरनात्मधर्मत्वं ज्ञानादित्यर्थः॥ किंच॥ विमतोनाऽत्मधर्मोऽविद्याकृतत्वाज्जरादिवदिति न च हेत्वासिद्धिरतस्मिंस्तद्बुद्धि
विषयत्वेन स्थाणौ पुरुषत्ववदविद्याकृतत्वस्योक्तत्वादिति मत्वाह॥ अविद्येति॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ ॥

स्थाणौ पुरुषवदविद्यत्वं देहादेरयुक्तं दृष्टांतदार्ष्टांतिकयोर्वैषम्यादिति शंकते नेति ॥ तदेव प्रपंचयति ॥ स्थाणोरित्यादिना ॥ ज्ञेयस्य
ज्ञेयांतरेऽध्यासादत्र चोभयोर्ज्ञेयत्वव्यापकव्यावृत्त्या व्याप्याध्यासस्यापि व्यावृत्तिरित्यर्थः ॥ देहात्मबुद्धेर्भ्रमत्वाभावे फलितमा
ह ॥ तस्मादिति ॥ उपाधिधर्माणां सुखादीनामुपहिते जीवे वस्तुत्वमयुक्तमतिप्रसंगादिति परिहरति ॥ नेत्यादिना ॥ प्रसंगमे
व प्रकटयति ॥ यदीति ॥ सुखादीनामात्मधर्मत्वं चेदुपाधिधर्मत्वादचैतन्यं जरादिकं चात्मनो दुर्वारं स्यादित्यर्थः ॥ सुखादिरा

न्नाऽतुल्यत्वादिति स्थाणुपुरुषौ ज्ञेयावेव संतौ ज्ञात्रान्योन्यस्मिन्नध्यस्तावविद्यया देहात्मनोस्तु ज्ञेयज्ञात्रोरेवेत
रेतराध्यास इति न समो दृष्टांतः ॥ तस्माद्देहधर्मो ज्ञेयोपि ज्ञातुरात्मनो भवतीति चेन्नाऽचैतन्यादिप्रसंगाद्यदि
हि ज्ञेयस्य देहादेः क्षेत्रस्य धर्माः सुखदुःखमोहेच्छाद्वेषादयोपि ज्ञातुरात्मनो भवंतीति ज्ञेयस्य क्षेत्रस्य धर्माः केच
नात्मनो ज्ञातुर्भवंति ॥ अविद्याध्यारोपितो जरामरणादयस्तु न भवंतीति विशेषहेतुर्वक्तव्यो न भवंतीति
अस्त्यनुमानमविद्याध्यारोपितत्वाज्जरादिवदिति हेयत्वादुपादेयत्वाच्चेत्यादि ॥ तत्रैवं सति कर्तृत्वभोक्तृत्वल
क्षणः संसारो ज्ञेयस्थो ज्ञातर्यविद्ययाध्यारोपित इति न तेन ज्ञातुः किंचिद्दुष्यति ॥ श्रीकृष्णाय नमो नमः ॥

त्मधर्मो नेति पक्षेपि नास्ति विशेषहेतुरित्याशंक्याह ॥ नेति ॥ तदेवानुमानं स्मारयति ॥ अविद्येति ॥ विमतं नात्मधर्मः आ
गमापायित्वात्संमतवदित्यनुमानांतरमाह ॥ हेयत्वादिति ॥ आदिशब्दात् दृश्यत्वजडत्वादि गृह्यते ॥ सुखादीनां जरादिव
दात्मधर्मत्वाभावेन तस्य वस्तुतोऽसंसारित्वेति फलितमाह ॥ तत्रेति ॥ श्रीकृष्णाय नमः ॥ श्रीसीतारामचंद्राय नमो नमः

आरोपितेनाधिष्ठानस्य वस्तुतोऽस्पर्शे दृष्टांतमाह यथेति परभिन्नस्यात्मनः संसारित्वमध्यस्तमिति स्थिते यत्परस्य संसारित्वा
पादनं तद्युक्तमित्याह एवं चेति आत्मनि संसारस्यारोपितत्वात्तद्भिन्ने परस्मिन्नाशंकैव तस्याऽयुक्तेत्येतदुपपादयति नही
ति स्थाणौ पुरुषनिश्चयवदात्मनो देहाद्यात्मत्वनिश्चयस्याध्यस्तत्वेऽप्युक्तं दृष्टांतस्य ज्ञेयमात्रविषयत्वादितरस्य ज्ञेयज्ञातृवि
षयत्वाद्वियुक्तमनुवदति यदुक्तमिति वैषम्यं दूषयति तदिति तर्हि केन साधर्म्यमिति पृच्छति कथमिति अभीष्टसाधर्म्यं दर्श
यति अविद्येति तस्योभयत्रानुगतिमाह तत्रेति ज्ञेयांतरे ज्ञेयस्यारोपनियमात् ज्ञातरि नारोपः स्यादित्याशंक्याह यत्विति

यथा बालैरध्यारोपितेनाकाशस्य तलमलिनत्वादिना एवं च सति सर्वक्षेत्रेष्वपि सतो भगवतः क्षेत्रज्ञस्येश्वरस्य सं
सारित्वगंधमात्रमपि नाशंक्यं न हि क्वचिदपि लोकेऽविद्याध्यस्तेन धर्मेण कस्यचिदुपकारापकारौ दृष्टौ यदुक्तं न समो
दृष्टांत इति तदसत् कथमविद्याध्यासमात्रं दृष्टांतदार्ष्टांतिकयोः साधर्म्यं विवक्षितं तन्न व्यभिचरति यत्तु ज्ञातर्यव्यभिच
रतीति मन्यसे तस्याप्यनैकांतिकत्वं दर्शितं जरादिभिः अविद्यावत्त्वात् क्षेत्रज्ञस्य संसारित्वमिति चेन्न अविद्यायास्तामस

नायं नियमो ज्ञातरि जराद्यारोपस्योक्तत्वादित्याह तस्यापीति ज्ञेयस्यैव ज्ञेयांतरेऽध्यासनियमस्येति यावत् अतो ज्ञातरि
नारोपव्यभिचारशंकेत्यर्थः आत्मन्यविद्ययाध्यासे तत्राविद्यायाः स्वाभाविकत्वात्तदधीनं संसारित्वमपि तथा स्यादिति शंकते
अविद्यावत्त्वादिति काऽविद्या विपरीतग्रहणादिर्वा अनिर्वाच्यमज्ञानं वा नाद्यो विपरीतग्रहणादेस्तमःशब्दितानाद्यनिर्वाच्याज्ञा
नकार्यत्वात्तन्निष्ठस्यात्मधर्मत्वायोगादित्याह नेत्यादिना ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीरामकृष्णायनमोनमः ॥ श्रीः ॥

तदेव प्रपंचयति तामसो हीति ॥ आवरणात्मकत्वं वस्तुनि सम्यक्प्रकाशप्रतिबंधकत्वं ॥ विपरीतग्रहणादेरविद्याकार्यत्वं विद्यापो
ह्यत्वेन साधयति ॥ विवेकेति ॥ न च कारणाविद्यानादिरनिर्वाच्यात्मधर्मः स्यादिति युक्तमनिर्वाच्यत्वादेव तस्यास्तद्धर्मत्वस्य दुर्वच
त्वादिति भावः ॥ किंच ॥ विपरीतग्रहादेरन्वयव्यतिरेकाभ्यां दोषजन्यत्वावगमादपि नात्मधर्मत्वमित्याह ॥ तामसे चेति तमःशब्दि
ताज्ञानोऽस्य वस्तुप्रकाशप्रतिबंधकस्तिमिरकाचादिदोषस्तस्मिन्सत्यज्ञानं मिथ्याधीः संशयश्चेति त्रयस्योपलंभादसति तस्मि
न्नप्रतीतेरन्वयव्यतिरेकाभ्यां विपरीतज्ञानादेर्दोषाधीनत्वाधिगमान्न केवलात्मधर्मत्वमित्यर्थः ॥ दोषस्य निमित्तत्वाद्भावका

तामसो हि प्रत्ययो आवरणात्मकत्वादविद्या विपरीतग्राहकः संशयोपस्थापको वाऽग्रहणात्मको वा ॥ विवे
कप्रकाशभावे तदभावात्तामसे च आवरणात्मके तिमिरादिदोषे सति अग्रहादेरविद्यात्रयस्योपलब्धेः
अत्राहैवं तर्हि ज्ञातृधर्मोऽविद्या न करणे चक्षुषि तैमिरिकत्वादिदोषोपलब्धेः ॥ श्रीकृष्णायनमः

र्यस्योपादाननियमादनिर्वाच्याविद्याया आश्वासंमतेरात्मैव विपर्ययादेरुपादानमिति चोदयति ॥ अत्राहेति ॥ विपरीतग्रहणादे
र्दोषोत्थत्वं सप्तम्यर्थः ॥ अग्रहादित्रितयमविद्या ॥ विपर्ययादेः सत्योपादानत्वे सत्यत्वप्रसंगान्नात्मा तदुपादानं किंतु दोषस्य
चक्षुरादिधर्मत्वग्रहणादग्रहणादेरपि दोषत्वात्करणधर्मत्वे करणमविद्याश्रयमंतःकरणं न च तद्धेतुरविद्यासिद्धेति वाच्यमज्ञो
हमित्यनुभवात्स्वापेऽज्ञानपरामर्शात्तदवगमात्कार्यलिंगकानुमानादागमाच्च तत्प्रसिद्धेरिति परिहरति ॥ नेत्यादिना ॥ ॥

संगृहीतं चोद्यपरिहारयोश्चोद्यं विवृणोति ॥ यत्त्विति ॥ अविद्यावत्वेपि ज्ञातुरसंसारित्वाद्दुःखात दंष्ट्रोरगवदविद्या किं करिष्यतीत्याशं
क्याह ॥ तदेवेति ॥ मिथ्याज्ञानादिमत्त्वमेवात्मनः संसारित्वमिति स्थिते फलितमाह ॥ तत्रेति ॥ न करणे चक्षुषीत्यादिनोक्तमेव प
रिहारं प्रपंचयति ॥ तन्नेत्यादिना ॥ तिमिरादिदोषः तत्कृतो विपरीतग्रहादिश्च न ग्रहीतुरात्मनोऽस्तीत्यत्र हेतुमाह ॥ चक्षुष इति ॥ त
द्धृतेनांजनादिसंघर्षणेन तिमिरादौ पराकृते देवदत्तस्य ग्रहीतुर्दोषाद्यनुपलंभान्न तस्य तद्धर्मत्वमतो विमतं तत्त्वतो नात्मधर्मो

यत्तु मन्यसे ज्ञातृधर्मोऽविद्या तदेव चाविद्याधर्मवत्त्वं क्षेत्रज्ञस्य संसारित्वं तत्र यदुक्तमीश्वर एव क्षेत्रज्ञो न संसारी
त्येतदयुक्तमिति तन्न ॥ यथा करणे चक्षुषि विपरीतग्राहकादिदोषस्य दर्शनान्न विपरीतादिग्रहणं तन्निमित्तो
वा तैमिरिकत्वादिदोषो ग्रहीतुः चक्षुषः संस्कारेण तिमिरेऽपनीते ग्रहीतुरदर्शनान्न ग्रहीतुः धर्मो यथा तथा स
र्वत्रैवाग्रहणविपरीतसंशयप्रत्ययास्तन्निमित्ताः करणस्यैव कस्यचिद्भवितुमर्हंति न ज्ञातुः क्षेत्रज्ञस्य संवे
द्यत्वाच्च तेषां प्रदीपप्रकाशवन्न ज्ञातृधर्मत्वं तत्संवेद्यत्वादेव स्वात्मव्यतिरिक्तसंवेद्यत्वं ॥ श्रीकृष्णायनमः ॥

दोषत्वात् तत्कार्यत्वाच्चासंमतवदित्यर्थः ॥ किंच ॥ विपरीतग्रहादिस्तत्त्वतो नात्मधर्मो वेद्यत्वात्संप्रतिपन्नवदित्याह ॥ संवेद्यत्वा
च्चेति ॥ किंच ॥ यद्वेद्यं तत्स्वातिरिक्तवेद्यं यथा दीपादीति व्याप्तेर्विपरीतग्रहादीनामपि वेद्यत्वादतिरिक्तवेद्यत्वे संवेदितानसंवेद्यध
र्मवान्वेदितृत्वाद्यथा देवदत्तो न स्ववेद्यस्वरूपादिमानित्यनुमानांतरमाह ॥ संवेद्यत्वादेवेति ॥ श्रीसीतारामचंद्रायनमोनमः ॥

किंच ॥ विपरीतग्रहादयस्तत्वतो नात्मधर्मा व्यभिचारित्वात् तु कुशलादिवदित्याह ॥ सर्वैरिति ॥ उक्तमेव विवृण्वन्नात्मनो विपरीतग्रहादिः स्वाभाविको वा आगंतुको वा इति विकल्प्याद्यं दूषयति ॥ आत्मन इति ॥ अतोऽनिर्मोक्षोऽविद्यातत्कार्यध्वस्तेरभावादित्यर्थः आगंतुकोपि स्वतश्चेदमुक्तिः परतश्चेत्तत्राह ॥ अविक्रियस्येति ॥ विभुत्वादविक्रियत्वादमूर्तत्वाच्चात्मा व्योमवन्न केनचित्संयोगवियोगावनुभवति न हि विक्रियाभावे व्योम्नोपि वस्तुतः संयोगवियोगौ असंगत्वाच्चात्मनस्तद्योगान्न परतोपि तस्मि

सर्वकरणवियोगे च कैवल्ये सर्ववादिभिरविद्यादिदोषवत्वानभ्युपगमात् आत्मनो यदि क्षेत्रज्ञस्या
भ्युपगमवत्स्वो धर्मस्ततो न कदाचिदपि तेन वियोगः स्यादविक्रियस्य च व्योमवत्सर्वगतस्यामूर्तस्या
मूर्तस्यात्मनः केनचित्संयोगवियोगानुपपत्तेः सिद्धं च क्षेत्रज्ञस्य नित्यमेवेश्वरत्वमनादित्वान्निर्गुणत्वादि
त्यादीश्वरवचनाच्च ॥ नन्वेवं संसारसंसारित्वाभावे शास्त्रानर्थक्यादिदोषः स्यादिति चेत् न सर्वैरभ्यु
पगमात् सर्वैर्ह्यात्मवादिभिरभ्युपगतो दोषो नैकेन परिहर्तव्यो भवति ॥ ॥ ॥

न्विपरीतग्रहादीत्यर्थः ॥ तस्यात्मधर्मत्वाभावे फलितमाह ॥ सिद्धमिति ॥ आत्मनो निर्धर्मकत्वे भगवदनुमतिमाह ॥ अनादित्वादिति ॥ ईश्वरत्वे सत्यात्मनो संसारित्वे विधिशास्त्रस्य प्रसक्तादेश्चानर्थक्यात्तात्विकमेव तस्य संसारित्वमिति शंकते ॥ नन्विति विद्यावस्थायामविद्यावस्थायां वा शास्त्रानर्थक्यमिति विकल्प्याद्यं प्रत्याह ॥ न सर्वैरिति ॥ विदुषो मुक्तस्य संसारतदाधारत्वयो रभावस्य सर्ववादिसंमतत्वात्तत्र ॥ शास्त्रानर्थक्यादिति चोद्यं मयैव न प्रतिविधेयमित्यर्थः ॥ संग्रहवाक्यं विवृणोति ॥ सर्वैरिति

अभिप्रायापरिज्ञानात्प्रश्नेस्वाभिप्रायमाह॥ कथमित्यादिना॥ तर्हिमुक्तान्प्रतिविधिशास्त्रस्याध्यक्षादेश्चानर्थक्यमित्याशंक्याह॥
नचेति॥ नहिव्यवहारातीतेषुतेषुगुणदोषाशंकेत्यर्थः॥ द्वैतिनांमतेमुक्तात्मस्त्रिवास्मत्पक्षेपिक्षेत्रज्ञस्येश्वरत्वेतंप्रतिशास्त्रा॥ न
र्थक्यंविद्यावस्थायामास्थितमितिफलितमाह॥ तथेति॥ द्वितीयंदूषयत्य॰विद्येति॥ तदेवदृष्टांतेनविवृणोति॥ यथेति॥ एवमद्वैति
नामपिविद्योदयात्प्रागर्थवत्वंशास्त्रादेरितिशेषः॥ द्वैतिभिरद्वैतिनांनसाम्यमितिशंकते॥ नन्विति॥ अवस्थयोर्वस्तुत्वेतन्मते

कथमभ्युपगतइतिमुक्तात्मनांहिसंसारसंसारिव्यवहाराभावःसर्वैरेवात्मवादिभिरिष्यतेनचतेषांशा
स्त्रानर्थक्यादिदोषप्राप्तिरभ्युपगतातथानःक्षेत्रज्ञानामीश्वरैकत्वेसतिशास्त्रानर्थक्यंभवतु॥ अविद्या
विषयेचार्थवत्वंयथाद्वैतिनांसर्वेषांबंधावस्थायामेवशास्त्राद्यर्थवत्वंनमुक्तावस्थायामेवं॥ ननुआत्म
नोबंधमोक्षावस्थेपरमार्थतएववस्तुभूतेद्वैतिनांनसर्वेषां॥ अतोहेयोपादेयतत्साधनसद्भावेशास्त्रा
द्यर्थवत्वंस्यादद्वैतिनांपुनर्द्वैतस्यापरमार्थत्वादविद्याकृतत्वात्बंधावस्थायाश्चात्मनोऽपरमार्थत्वेनि
र्विषयत्वात्शास्त्रानर्थक्यमितिचेन्नआत्मनोवस्थाभेदानुपपत्तेः॥ श्रीरामचंद्रायनमोनमः॥

शास्त्रार्थवत्वेतिफलितमाह॥ अतइति॥ सिद्धांतेहिनावस्थयोर्वस्तुतेतिवैषम्यमाह॥ अद्वैतिनामिति॥ व्यावहारिकंचद्वैतंतन्मतेस्वी
कृतमित्याशंक्याह॥ अविद्येति॥ कल्पितद्वैतेनव्यवहारान्नवस्तुतेत्यर्थः॥ बंधावस्थायांवस्तुत्वाभावेदोषांतरमाह॥ बंधेति॥ आ
त्मनस्तत्वतोवस्थाभेदोद्वैतिनामपिनास्तीतिपरिहरति॥ नेति॥ श्रीसीतारामचंद्रायनमः॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥

अनुपपत्तिं दर्शयितुं विकल्पयति ॥ यदीति ॥ तत्राद्यं दूषयति ॥ युगपदिति ॥ द्वितीये क्रमभाविन्योरवस्थयोर्निर्निमित्तत्वं सनिमित्तत्वं वे
ति विकल्प्याद्ये सदा प्रसंगाद्बंधमोक्षयोरव्यवस्था स्यादित्याह ॥ क्रमेति ॥ कल्पांतरं निरस्यति अन्यनिमित्तत्वे चेति बंधमोक्षाव॥
स्थेऽपरमार्थेऽस्वाभाविकत्वात्स्फटिकलौहित्यवदिति स्थिते फलितमाह ॥ तथा चेति ॥ वस्तुत्वमिच्छतोवस्थयोरवस्तुतोपगमा
दित्यर्थः ॥ इतश्चावस्थयोर्नवस्तुत्वमित्याह ॥ किंचेति ॥ अवस्थयोर्वस्तुत्वमिच्छता तयोर्यौगपद्यायोगाद्वाच्ये क्रमे बंधस्य पूर्वत्वं
मुक्तेश्च पाश्चात्यमिति स्थिते बंधस्यानादित्वकृतं दोषमाह ॥ बंधेति ॥ तस्याश्चाकृताऽऽगमकृतविनाशनिवृत्तये अनादित्वमे

यदि तावदात्मनो बंधमुक्तावस्थे युगपत्स्यातां क्रमेण वा युगपत्तावद्विरोधान्न संभवतः स्थितिगती इवैकस्मिन् क्रम
भावित्वे च निर्निमित्तत्वेऽनिर्मोक्षप्रसंगोऽन्यनिमित्तत्वे च स्वतोऽभावादपरमार्थत्वप्रसंगस्तथा च सत्यभ्युपगमहानिः
किंच बंधमुक्तावस्थयोः पौर्वापर्यनिरूपणायां बंधावस्थां पूर्वं प्रकल्प्यानादिमत्यंतवती च तच्च प्रमाणविरुद्धं तथा
मोक्षावस्थादिमत्यनंतवती च प्रमाणविरुद्धैवाभ्युपगम्यते ॥ न चावस्थावतोवस्थांतरं गच्छतो नित्यत्वमुपपादयितुं श ॥शि॥

॥श्वत्वानुपपत्तिरित्याह ॥ नचेति ॥

क्यमंतवत्त्वं च मुक्तपर्यमास्थेयं तच्च यदनादिभावरूपं तन्नित्यं यथात्मेति व्याप्तिविरुद्धमित्यर्थः ॥ मोक्षस्य पाश्चात्यकृतं दोषमाह ॥
तथेति ॥ सा हि ज्ञानादिसाध्यत्वादादिमती पुनरावृत्त्यनंगीकारादनंता च तच्चायुक्तमादिभावरूपं तदंतवद्यथा घटादीति व्याप्त्यंतर
विरुद्धमित्यर्थः ॥ किंच ॥ क्रमभाविनीभ्यामवस्थाभ्यामात्मा संबध्यते न वा प्रथमे पूर्वावस्थया सहैवोत्तरावस्थां गच्छति चेदुत्तरा
वस्थायामपि पूर्वावस्थावस्थानादनिर्मोक्षो यदि पूर्वावस्थां त्यक्त्वोत्तरावस्थां गच्छति तदा पूर्वत्यागोत्तराश्रयात्मनः सातिशयत्वान्नि

आत्मनोऽवस्थाद्वयसंबंधो नास्तीति द्वितीयमनूद्य दूषयति ॥ अथेत्यादिना ॥ नहि पक्षद्वयेपि दोषाविशेषात् न्नाद्वैतमतानुरागे हेतुरि
त्याशंक्याऽविद्याविषये चेत्युक्तं विवृणोति ॥ नचेति तदेव स्फुटयति ॥ अविदुषां हीति ॥ फलं भोक्तृत्वं कर्तृत्वं हेतुर्यद्वा फलं देहवि
शेषः हेतुरदृष्टं तयोरनात्मनो भोक्ताहं कर्ताहं मनुष्योहमित्याद्यात्मदर्शनमधिकारकारणं तेनाविद्वद्विषयं विधिनिषे
धशास्त्रमित्यर्थः विदुषामपि मनुष्योहमित्यादिव्यवहारात्तद्विषयं शास्त्रं किं न स्यादित्याशंक्याह ॥ नेति ॥ भोक्तृत्वकर्तृत्वाभ्यां

मथ्यानिस्यत्वदोषपरिहाराय बंधमुक्तावस्थाभेदो न कल्प्यतेऽतो द्वैतिनामपि शास्त्रार्थानर्थक्यादिदोषोऽप
रिहार्य एवेति समानत्वान्नाद्वैतवादिनां परिहर्तव्यो दोषः ॥ नच शास्त्रानर्थक्यं यथा प्रसिद्धाऽविद्वत्पुरुषविषय ॥
त्वाच्छास्त्रस्य ॥ अविदुषां हि फलहेत्वोरनात्मनोरात्मदर्शनं न विदुषां विदुषां हि फलहेतुभ्यामात्मनोन्यत्वदर्श
ने सति तयोरहमित्यात्मदर्शनानुपपत्तेर्नह्यत्यंतमूढउन्मत्तादिरपि जलाऽग्न्योः छायाप्रकाशयोर्वैकात्मतां प
श्यति किमुत विवेकी तस्मान्न विधिप्रतिषेधशास्त्रं तावत्फलहेतुभ्यामात्मनोन्यत्वदर्शिनो भवति ॥ नहि देवद
त्त त्वमिदं कुर्विति कस्मिंश्चित्कर्मणि नियुक्ते विष्णुमित्रो हं नियुक्त इति तत्रस्थो नियोगं शृण्वन्नपि प्रतिपद्यते ॥ ॥त्र

त्राह्मण्यादिमतो देहाद्धर्माधर्माभ्यां चात्मनोन्यत्वं पश्यतो न विधिनिषेधाधिकारित्वमुक्तफलादावात्मात्मीयाभिमानासं
भवादित्यर्थः ॥ आत्मनो देहादेरन्यत्वदर्शिनो न देहादावात्मधीरित्येतदुपपादयति ॥ नहीति ॥ विदुषो न विधिनिषेधाधिकार
इत्युक्तमुपसंहरति ॥ तस्मादिति ॥ शास्त्रस्य विद्वद्विषयत्वमपीमं तत्रस्थमुभयोरपि शास्त्रश्रवणाविशेषादित्याशंक्याह ॥ नहीति
तत्रस्थो यस्मिन्देशे देवदत्तः स्थितस्तत्रैव वर्तमानः सन्निस्यर्थः ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीरामकृष्णाय नमो नमः

त्र

ननु देवदत्तेन नियुक्ते विष्णुमित्रोपि कदाचिन्नियुक्तोस्मीति प्रतिपद्यते सत्यं नियोगविषयान्नियोज्यादात्मनो विवेकाग्रहणान्नियोज्य
त्वभ्रांतेरित्याह ॥ नियोगेति ॥ अविवेकिनो नियोगधीर्भवतीति दृष्टांतमुक्त्वा फलहेतोर्वात्मदृष्टिविशिष्टस्याविदुषः संभ
त्येव विधिनिषेधाधिकारित्वमिति दार्ष्टांतिकमाह ॥ तथेति ॥ विधिनिषेधशास्त्रमविद्वद्विषयमिति वदता शास्त्रानर्थक्यं
समाहितं संप्रति शास्त्रस्य विद्वद्विषयत्वेनैवार्थवत्त्वं शंकासमर्थनमिति शंकते ॥ नन्विति ॥ प्रकृतिरविद्या ततो जातो यो देहा
दावभिमानात्मा संबंधो विद्योदयात्प्रागनुभूतस्तदपेक्षया विधिना प्रवर्त्तितो निषेधेन निवर्त्तितोस्मीति विधिनिषेधविष
यासत्यामपि विद्यायां धीर्युक्तैवेत्यर्थः ॥ विदुषोपि पूर्वमाविद्यं संबंधमपेक्ष्य विधिनिषेधविषयां धियमुक्तामेव व्यनक्ति ॥

नियोगविषयविवेकाग्रहणादुपपद्यते प्रतिपत्तिस्तथा फलहेत्वोरपि ननु प्राकृतसंबंधापेक्षया युक्तैव प्रतिपत्तिः
शास्त्रार्थविषया फलहेतुभ्यामन्यात्मत्वदर्शनेपि सति ॥ इष्टफलहेतोः प्रवर्त्तितोस्म्यनिष्टफलहेतोश्च निवर्त्तितो
स्मीति ॥ यथा पितृपुत्रादीनामितरेतरात्मान्यत्वदर्शने सत्यप्यन्योन्यनियोगप्रतिषेधार्थप्रतिपत्तिः ॥ ॥

इष्टेति ॥ नन्वविदुषो मिथ्याभिमानवन्न विदुषः सोनुवर्त्तते ॥ तथा च विद्यासंबंधापेक्षयानयुक्ता विदुषो यथोक्ता धीरि
तित्त्राह ॥ यथेति ॥ पितापुत्रो भ्रातेत्यादीनां मिथोन्यत्वदृष्टावप्यन्योन्यनियोगार्थस्य निषेधार्थस्य च धीर्दृष्टा पितरमधिकृ
त्य विधौ निषेधे च तस्य तदनुष्ठानाशक्तौ पुत्रस्य तद्विषया धीरिष्टा पतिसंप्रति पितरमधिकृत्य विधौ निषेधे वा तदनुष्ठाना
शक्तौ पुत्रस्य तद्विषया धीर्दृष्टा अप्यातः संप्रतिर्यदा प्रेष्यन्मन्यतेथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इत्यादिश्रुत्या शेषानुष्ठा
नस्य पुत्रकार्यताप्रतिपादनात्पुत्रं चाधिकृत्य विधिनिषेधप्रवृत्तौ तस्य तदशक्तौ पितुस्तदर्थाधीरुपगता तथा भ्रात्रादिष्वपि
द्रष्टव्यं ॥ एवं विदुषो हेतुफलाभ्यामन्यत्वदर्शनेपि प्राक्कालीनाविद्यदेहादिसंबंधादविरुद्धा विधिनिषेधार्थाधीरित्यर्थः ॥

श्रु

पुत्रादीनां मिथ्याभिमानान्मिथो नियोगधीयुक्तात्तत्वदर्शिनस्तु तदभावान्न देहादिसंबंधाधीननियोगधीरिति परिहरति ॥ नेत्यादिना ॥ किंच ॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति सर्वापेक्षाधिकरणे सम्यग्ज्ञानस्यादृष्टसाध्यत्वोक्ते र्विधिनिषेधार्थानुष्ठानं सम्यग्ज्ञानात्पूर्वमितिकुतो विदुषस्तदनुष्ठानमित्याह ॥ प्रतिपन्नेति ॥ सत्यदृष्टे सम्यग्धीरदृष्टेऽसति चाशुद्धबुद्धेस्तदभावादन्वयव्यतिरेकाभ्यां विविदिषावाक्याच्च विधिनिषेधानुष्ठानात्पूर्वेन सम्यग्धीरित्याह ॥ न पूर्वमिति ॥ विधिनिषेधयोर्विद्वद्विषयत्वायोगे फलितमाह ॥ तस्मादिति ॥ शास्त्रस्याविद्वद्विषयत्वेनोक्तमर्थबलमाक्षेपसमाधिभ्यां प्रपंचयितुमाक्षिपति

नेव्यतिरिक्तात्मदर्शनप्रतिपत्तेः प्रागेव फलहेत्वोरात्माभिमानस्य प्रासिद्धत्वात्प्रतिपन्ननियोगप्रतिषेधार्थो हि फलहेतुभ्यामात्मनोन्यत्वं प्रतिपद्यते न पूर्वं तस्माद्विधिप्रतिषेधशास्त्रमविद्वद्विषयमिति सिद्धं ॥ ननु स्वर्गकामो यजेत कलंजं न भक्षयेदित्यादावात्मव्यतिरेकदर्शिनामप्रवृत्तौ केवलदेहाद्यात्मदृष्टीनां चातः कर्तुरभावात् शास्त्रानर्थक्यमिति चेन्न यथाप्रसिद्धित एव प्रवृत्तिनिवृत्त्युपपत्ते ॥ श्रीरामचंद्राय नमो नमः ॥

नन्विति ॥ चकारादूर्ध्वमप्रवृत्तिरिति संबध्यते ॥ आत्मनो देहाद्यतिरेकं पश्यतां देहाद्यभिमानरूपाधिकारहेत्वभावाद्विधितो यागादावप्रवृत्तिर्निषेधाच्चाभक्ष्यभक्षणादेर्न निवृत्तिरतस्तेषां प्रवृत्तिनिवृत्त्योरभावे देहादावात्मत्वमनुभवतामपि न ते युक्ते तेषां पारलौकिकभोक्तृप्रतिपत्त्यभावादित्यर्थः ॥ विदुषामविदुषां च प्रवृत्तिनिवृत्त्यभावे फलितमाह ॥ अत इति ॥ आत्मनो देहाद्यतिरेकं परोक्षमपरोक्षं च देहाद्यात्मत्वं पश्यतः ॥ शास्त्रानुरोधादेव प्रवृत्तिनिवृत्त्युपपत्तेर्न शास्त्रानर्थक्यमित्युत्तरमाह ॥ नेत्यादिना ॥ प्रसि

इहत्वप्रसाधाभिमता ॥

एतदेव विवृण्वन् ब्रह्मविदो वा नैरात्म्यवादिनो वा परोक्षज्ञानवतो वा प्रवृत्तिनिवृत्ती वक्ष्यसीति विकल्प्याद्यं दूषयति ईश्वरेति न प्र
वर्त्तेन निवर्त्तते चेत्यपि द्रष्टव्यं द्वितीयं निरस्यति तथेति पूर्ववदत्रापि संबंधः तृतीयमंगीकरोति यथेति विधिनिषे
धाधीनां प्रसिद्धिमनुरुंधानः सन्निति यावच्छकारान्निवर्त्तते चेत्यनुकृष्यते ब्रह्मविदं नैरात्म्यवादिनं च सत्का देहाद्यतिरि
क्तात्मानं परोक्षमपरोक्षं च देहाद्यात्मत्वं पश्यतो विधिनिषेधाधिकारित्वे सिद्धे फलितमाह अत इति विधांतरेण शास्त्रा

रीश्वरः क्षेत्रज्ञैकत्वदर्शी ब्रह्मवित्तावन्न प्रवर्त्तते तथा नैरात्म्यवाद्यपि नास्ति परलोक इति न प्रवर्तते यथाप्र
सिद्धस्तु विधिप्रतिषेधशास्त्रश्रवणाऽन्यथानुपपत्त्यानुमितात्मास्तित्वआत्मविशेषानभिज्ञः कर्मफ
लसंजाततृष्णः श्रद्दधानतया च प्रवर्त्तत इति सर्वेषां नः प्रत्यक्षमतो न शास्त्रानर्थक्यं विवेकिनाम
प्रवृत्तिदर्शनात्तदनुगामिनामप्रवृत्तौ शास्त्रानर्थक्यमिति चेत् ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥

नर्थक्यं चोदयति विवेकिनामिति दृष्टा हि तेषां विधिनिषेधयोरप्रवृत्तिर्न हि देहादिभ्यो निःकृष्टमात्मानं दृष्टवतां त
योरधिकारस्तेन तान्प्रति शास्त्रं नार्थवत् न च देहाद्यात्मत्वदृशस्तत्राधिक्रियंते ते षां यद्यदाचरतीति न्यायेन विवेकिनोऽनु
गच्छतां विध्यादावप्रवृत्तेरतोऽधिकार्यभावाद्विध्यादिशास्त्रस्य तदनुसारिशिष्टाचारस्य वानर्थक्यमित्यर्थः किं सर्वेषां वि
वेकित्वादधिकार्यभावादानर्थक्यं शास्त्रस्योच्यते किं वा कस्यचिदेव विवेकित्वे पि तदनुवर्त्तित्वादन्येषामप्यप्रवृत्तेरानर्थक्यं

तत्रप्रथमंप्रस्याह ॥ नकस्यचिदिति ॥ मनुष्याणांसहस्रेष्विति न्यायेनोक्तमेवस्फुटयति ॥ अनेकेष्विति ॥ तत्रानुभवानुरोधेनदृ
ष्टांतमाह ॥ यथेति ॥ द्वितीयंदूषयति ॥ नचेति ॥ किंच ॥ विवेकिनामप्रवृत्तावन्येषामप्रवृत्तिरित्यानर्थक्यंनियंतुंनशक्यंभयेनादो
नदप्रवृत्तावपीतरप्रवृत्तेरित्याह ॥ अभिचरणादौचेति ॥ अविवेकिनांरागादिद्वाराप्रवृत्त्यादेः सर्वेषांसंग्रहीतुमादिपदंइतश्च
विवेकिनांप्रवृत्त्यभावेपिनाज्ञस्याप्रवृत्तिरित्याह ॥ स्वाभाव्याच्चेति ॥ प्रवृत्तेःस्वाभाव्याख्याऽज्ञानकार्यत्वेभगवद्वाक्यमनुकू
लयति ॥ स्वभावस्त्विति ॥ प्रवृत्तेरज्ञानजत्वेविधिनिषेधाधीनप्रवृत्तिनिवृत्त्यात्मकबंधस्याविद्यामात्रत्वादविद्वद्विषयत्वंशा

न्नकस्यचिदेवविवेकोपपत्तेरनेकेषुहि प्राणिषुकश्चिदेवविवेकीस्याद्यथेदानींनचविवेकिनमनु
प्रवर्त्ततेमूढारागादिदोषतंत्रत्वात्प्रवृत्तेरभिचरणादौचप्रवृत्तिदर्शनात् ॥ स्वाभाव्याच्चप्रवृत्तेःस्व
भावस्तुप्रवर्त्ततइत्युक्तं ॥ तस्मादविद्यामात्रसंसारोयथादृष्टविषयएवनक्षेत्रज्ञस्यकेवलस्या
विद्यातत्कार्येणचमिथ्याज्ञानंपरमार्थवस्तुदूषयितुंसमर्थं॥ ॥श्रीसीतारामचंद्रायनमः॥

स्त्रस्यसिद्धमितिफलितमाह ॥ तस्मादिति ॥ दृष्टमेवानुसरन्नविद्वान्यथादृष्टस्तद्विषयः तदाश्रयः संसारस्तथाचप्रवृत्तिनिवृत्त्या
त्मकसंसारस्याविद्वद्विषयत्वात्तद्धेतुविधिशास्त्रस्यापितद्विषयत्वमित्यर्थः ॥ नन्वविद्याक्षेत्रज्ञमाश्रयंतीस्वकार्यंसंसारमपित
स्मिन्नाधत्तेयेनतस्यैवशास्त्राधिकारत्वंनेत्याह ॥ नेति ॥ अविद्यादेःशुद्धेक्षेत्रज्ञेवस्तुतोऽसंबंधेपितत्तस्मिन्नारोपितंतमेवदुः
खीकरोतीत्याशंक्याह ॥ नचेति ॥ श्रीकृष्णायनमः॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीरामकृष्णायनमोनमः॥ ॥

॥गी·भा·॥ २८३

तदेवदृष्टांतेनस्पष्टयति नहीति ॥ क्षेत्रज्ञस्यवस्तुतोअविद्याद्यसंबंधेभगवद्वचोपिद्योतकमित्याह अतइति ॥ क्षेत्रज्ञेश्वरयो
रैक्येकिमित्ययमात्मानमहमितिबुद्ध्यमानोपिस्वस्येश्वरत्वमीश्वरोस्मीतिनबुध्यते तत्राह अज्ञानेनेति ॥ आत्मनोवस्तुतः
संसारास्पर्शेविद्वदनुभवविरोधःस्यादितिचोदयति अथेति ॥ एवमित्यभिज्ञात्वादिवैशिष्ट्यमुक्तं इदमाक्षेत्रकलत्रादिपंडि
तानामपिप्रतीतेःसंसारित्वमितिशेषः ॥ किंपांडित्यंदेहाद्यात्मदर्शनं किंवाकूटस्थात्मदृष्टिराद्येसंसारित्वादिधीरितिवि
कल्प्याद्यंनिराकरोति शृण्विति ॥ तच्चवस्तुतोसंसारित्वाविरोधिप्रातिभासिकंसंसारित्वमनिष्टमितिशेषः द्वितीयंदूषयति

नह्यूषरदेशंस्नेहेनपंकीकर्तुंशक्नोतिमरीच्युदकंतथाऽविद्याक्षेत्रज्ञस्यनकिंचित्कर्तुंशक्नोत्यतइदमुक्तं क्षेत्रज्ञं
चापिमांविद्धि अज्ञानेनावृतंज्ञानमितिच ॥ अथकिमिदंसंसारिणामिवाहमेवंममैवेदमितिपंडितानामपि
शृण्विदंतत्पांडित्यंयत्क्षेत्रएवात्मदर्शनं यदिपुनःक्षेत्रज्ञमविक्रियंपश्येयुस्ततोनभोगंकर्मवाकांक्षेयुर्म
मस्यादितिविक्रियैवहिभोगकर्मणीत्वथेवंसतिफलार्थित्वादविद्वान्प्रवर्तते ॥ ॥ ॥

यदीति ॥ नहिकूटस्थात्मधियःसंसारित्वंप्रतीयतेयेनवस्तुतोअसंसारित्वंविरुध्येतकूटस्थात्मधीविरुद्धायाःसंसारि
त्वबुद्धेरनवकाशादित्यर्थः ॥ आत्मानमक्रियंपश्यतोपिकुतोभोगकर्मणीनस्यातामित्याशंक्याह विक्रियेति ॥ अविक्रि
यात्मबुद्धेर्भोगकर्माकांक्षयोरभावेकस्यशास्त्रेप्रवृत्तिरित्याशंक्याह अथेति ॥ फलार्थित्वाभावाद्विदुषोनकर्मणिप्र
वृत्तिरित्येवंस्थितेसत्यनंतरमविद्वान्फलार्थित्वात्तदुपायेकर्मणिप्रवृत्तःशास्त्राधिकारीत्यर्थः ॥ श्रीकृष्णायनमः ॥

॥आ·गी·॥ १३

॥शिव॥ २८३

विदुषांवैधप्रवृत्त्यभावेपिनिषेधाधीननिवृत्तेरपिदुर्वचत्वात्तस्यनिवृत्तिनिष्ठत्वासिद्धिरित्याशंक्याह॥ विदुषइति॥ तृतीय
मुत्थापयति॥ इदंचेति॥ सिद्धांतादविशेषमाशंक्यक्षेत्रस्यक्षेत्रज्ञाद्वस्तुतोभिन्नत्वेनतद्विषयत्वांगीकारान्मैवमित्याह॥
क्षेत्रंचेति॥ अहंधीवेद्यस्यात्मनोवस्तुतःसंसारित्वस्वीकाराच्चासिद्धांताद्भेदोस्तीत्याह॥ अहंत्विति॥ संसारित्वमेवस्फोर

विदुषःपुनरविक्रियात्मदर्शिनःफलार्थित्वाभावात्प्रवृत्त्यनुपपत्तौकार्यकारणसंघातव्यापा
रोपरमेनिवृत्तिरुपचर्यते॥ इदंचान्यत्वांडित्यंकस्यचिदस्तुक्षेत्रज्ञईश्वरएवक्षेत्रंचान्यत्क्षेत्रज्ञस्यवि
षयः॥ अहंतुसंसारीसुखीदुःखीचमूढोजातोमृतोवियुक्तःक्षीणःवृद्धोहंममैवमित्येवमादयःस
र्वेआत्मनिअध्यारोप्यंतेसंसारोपरमश्चममकर्त्तव्यः॥ क्षेत्रक्षेत्रज्ञविज्ञानेनध्यानेन॥ श्रीरामः॥

यति॥ सुखीति॥ संसारित्वस्यवस्तुत्वेतदनिवृत्त्यापुमर्थासिद्धिरित्याशंक्याह॥ संसारेति॥ कथंतदुपरमस्यहेतुंविनाकर्त्त
व्यत्वमित्याशंक्याह॥ क्षेत्रेति॥ क्षेत्रंज्ञात्वाततोनिःकृष्टस्यक्षेत्रज्ञस्यज्ञानंकथंसंसारोपरतिमुत्पादयतीत्याशंक्याह॥
ध्यानेनेति॥ श्रीकृष्णायनमः॥

संसारित्वमात्मनो बुध्यमानस्य तद्रहितादीश्वरादन्यत्वं व्यक्तमिति वक्तुमितिशब्दः तदेवान्यत्वमुपपादयति॥ यश्चेति॥ मम संसारिणोऽसंसारीश्वरस्त्वं कर्त्तव्यमित्येवं यो बुध्यते यो वा तथाविधं ज्ञानं तव कर्त्तव्यमित्युपदिशति स क्षेत्रज्ञादीश्वरादन्यो ज्ञेयः अन्यथोपदेशानर्थक्यमित्यर्थः॥ आत्मा संसारी परस्मादात्मनोऽन्यस्तस्य ध्यानाधीनज्ञानेनेश्वरत्वं कर्त्तव्यमित्येतत् ज्ञानं पांडित्यमिति मतं दूषयति॥ एवमिति॥ अयमात्मा ब्रह्मेत्यात्मनो ब्रह्मत्वश्रुति विरोधादित्यर्थः॥ ननु संसारस्य वस्तुत्वांगीकारात्तत्प्रतीत्यवस्थायां कर्मकांडस्यार्थवत्त्वं संसारनिरासेनात्मनो ब्रह्मत्वे ध्यानादिना साधिते मोक्षावस्थायां ज्ञा

नेश्वरं क्षेत्रज्ञं साक्षात्कृत्वा तत्स्वरूपावस्थानेनेति यश्चैवं बुध्यते यश्चैवं बोधयति नासौ क्षेत्रज्ञ इत्येवं
मन्वानो यः स पंडितापसदः संसारमोक्षयोः शास्त्रस्य चार्थवत्त्वं करोमीत्यात्महा॥ ॥

नकांडस्यार्थवत्त्वं तत्कथं ययोक्तज्ञानवान्पंडितापसदत्वेनाक्षिप्यते तत्राह॥ संसारेति॥ करोमीति मन्यमानो यः स पंडितापसद इति पूर्वेण संबंधः॥ कर्मकांडं हि कल्पितसंसारित्वमधिकृत्य साध्यसाधनसंबंधं बोधयदर्थवदिष्टं ज्ञानकांडमपि तथाविधं संसारित्वं पराकृत्याखंडैकरसे प्रत्यग्ब्रह्मणि पर्यवस्यदर्थवद्भवेदित्यर्थः॥ किंचात्मनः शास्त्रसिद्धं ब्रह्मत्वं त्यक्त्वाऽब्रह्मत्वं कल्पयन्नात्महा भूत्वा लोकद्वयबहिष्कृतः स्यादित्याह॥ आत्महेति॥ श्रीकृष्णायनमो नमः॥ श्रीः॥

ननु क्षेत्रज्ञं चापि मां विद्धीत्यनेन सर्वक्षेत्रान्तर्यामी परो जीवादन्यो निरूप्यते न जीवस्येश्वरत्वमत्र प्रतिपाद्यते तत्कथमिह
मा क्षिप्यते तत्राह ॥ स्वयमिति ॥ किंच ॥ तत्त्वमसीतिवत्त्वसिद्धक्षेत्रज्ञानुवादेनाप्रसिद्धं तस्येश्वरत्वमिहोपदेशतः श्रु
तं तस्य हानिमश्रुतस्य च जीवेश्वरयोस्तात्विकभेदस्य कल्पनां कुर्वन् कथं न व्यामूढः स्यादित्याह ॥ श्रुतेति ॥ ननु के
चन व्याख्यातारो यथोक्तं पाण्डित्यं पुरस्कृत्य क्षेत्रज्ञं चापीत्यादिश्लोकं सोपाधिकं व्याख्यातवंतस्तत्कथमुक्तं पाण्डित्य

स्वयं मूढोऽन्यांश्च व्यामोहयति शास्त्रार्थसंप्रदायरहितत्वात् ॥ श्रुतहानिमश्रुतकल्पनं कु
र्वन् ॥ तस्मादसंप्रदायवित् सर्वशास्त्रविदपि मूर्खवदेवोपेक्षणीयः ॥ यदुक्तमीश्वरस्य क्षेत्रज्ञैक
त्वे संसारित्वं प्राप्नोति क्षेत्रज्ञानां चेश्वरैकत्वे संसारिणोऽभावात्संसाराभावप्रसंग इति तौ
दोषौ प्रत्युक्तौ विद्याविद्ययोर्वैलक्षण्याभ्युपगमादिति कथं ॥ ॥श्रीः॥ ॥ ॥श्रीः॥ ॥

मास्थात्तुर्व्यामूढत्वं तत्राह ॥ तस्मादिति ॥ क्षेत्रज्ञं चापीत्यत्र क्षेत्रज्ञेश्वरयोरैक्यं स्वाभीष्टस्य रूपितुं प्रत्युक्तमेव चोद्यमनुद्रवति ॥
यदुक्तमिति ॥ तात्विकं एकत्वमतात्विकं संसारित्वमित्यंगीकृत्योक्तमेव समाधिं स्मारयत्येतावितिरीश्वरस्य संसारित्वं संसा
र्यभावेन संसाराभावश्चेत्युक्तौ दोषौ विद्याविद्ययोर्वैलक्षण्येऽपि कथं प्रत्युक्तावितिपृच्छति ॥ कथमिति ॥ ॥ ॥

कल्पितसंसारेण कल्पनाधिष्ठानमद्वयं वस्तु वस्तुतो न संबध्यमिति परिहरति॥ अविद्येति॥ तद्विषयं कल्पनास्पदमधिष्ठानमिति यावत् कल्पितेनाधिष्ठानस्य वस्तुतोऽस्पर्शे दृष्टांतं स्मारयति॥ तथा चेति॥ ईश्वरस्य संसारित्वाप्रसंगं प्रकटीकृत्य प्रसंगांतरं निरा समनुस्मारयति॥ संसारिण इति॥ न तावदविद्यासंसारं संसारिणं च कल्पयंती स्वतंत्रा तत्त्व्याघातात् पारतंत्र्ये वाश्रयांतरा

मविद्यापरिकल्पितदोषेण तद्विषयं वस्तु पारमार्थिकं न दुष्यतीति॥ तथा च दृष्टांतो [illegible]र्पितो मरीच्यंभसा ऊरवरदेशो नार्द्रीक्रियत इति संसारिणो भावात् संसाराभावप्रसंगदोषोपि संसारः संसारिणोरविद्या कल्पितत्वोपपत्त्या प्रत्युक्तो नन्वविद्यावलमेव क्षेत्रज्ञस्य संसारित्वदोष उक्तस्तत्कृतं च दुःखित्वादिप्रत्यक्षमुपलभ्यते न ज्ञेयस्य क्षेत्रधर्मत्वात् ज्ञातुः क्षेत्रज्ञस्य तत्कृतदोषानुपपत्तेर्यावत्॥ श्रीकृष्णः॥ ॥

भावात् क्षेत्रज्ञस्य तद्वत्त्वे संसारित्वमिति शंकते॥ नन्विति॥ न चाविद्यावलमविद्याकृतमनवस्थानादिति भावः॥ यत्तूक्तात दंष्ट्रोरगवदविद्या किं करिष्यतीति तत्राह॥ तदिति॥ अविद्यातज्जयोर्ज्ञेयत्वात् नात्मनो धर्मता भवतीति समाधत्ते॥ नेत्यादिना॥ तदेव प्रपंच्यते॥ यावदिति॥

ज्ञेयस्य क्षेत्रधर्मत्वेपि क्षेत्रद्वारा क्षेत्रज्ञस्य तत्कृतदोषवत्तेत्याशंक्याह नचेति क्षेत्रस्यापि ज्ञेयत्वान्न तेनान्वितो वस्तुतः स्पृष्टोस्तीत्युप
पादयति यदीति धर्मधर्मित्वेन संसर्गेपि ज्ञेयत्वे का क्षतिरित्याशंक्याह यदीति आत्मधर्मस्यात्मना ज्ञेयत्वे स्वस्यापि स्वज्ञेयत्वा
पत्त्या कर्मकर्तृविरोधः स्यादित्यर्थः किंच विमतं न क्षेत्रज्ञाश्रितं तद्दृश्यत्वात् रूपादिवदित्याह कथमिति किंच महाभूतानीत्या
दिना ज्ञेयमात्रस्य क्षेत्रांतर्भावान्नाविद्यादेर्ज्ञातृधर्मतेत्याह ज्ञेयंचेति किंच एतद्यो वेत्तीत्युक्तत्वात् क्षेत्रज्ञस्य ज्ञातृत्वनिर्णयाच्च तत्
याज्ञेयं किंचित्त्वविशतीत्याह ज्ञातैवेति क्षेत्रक्षेत्रज्ञयोरेवं स्वाभाव्ये सिद्धे सिद्धं क्षेत्रधर्मत्वमविद्यादेरिति फलितमाह इतिअव

किंचित् क्षेत्रज्ञस्य दोषजातमविद्यमानमासंजयसि तस्य ज्ञेयत्वोपपत्तेः क्षेत्रधर्मत्वमेव न क्षेत्रज्ञधर्मत्वं न च ते
न क्षेत्रज्ञो दुष्यति ज्ञेयेन ज्ञातुः संसर्गानुपपत्तेर्यदि संसर्गः स्यात् ज्ञेयत्वमेव नोपपद्येत यद्यात्मनो धर्मोऽविद्या
वत्त्वं दुःखित्वादि च कथं भोः प्रत्यक्षमुपलभ्यते कथं वा क्षेत्रज्ञधर्मः ज्ञेयं च तत् ज्ञातैव क्षेत्रज्ञ इत्यवधारितेऽ
विद्यादुःखित्वादेः क्षेत्रज्ञविशेषणत्वं क्षेत्रज्ञधर्मत्वं तस्य च प्रत्यक्षोपलभ्यत्वमिति विरुद्धमुच्यते ॥ अविद्या
मात्रावष्टंभात् केवलमत्राह साविद्या कस्येति यस्य दृश्यते तस्यैव ॥ ॥ श्रीरामचंद्राय नमो नमः ॥ ॥

धारित इति विरोधाच्च न क्षेत्रज्ञधर्मत्वमविद्यादेरित्याह क्षेत्रज्ञेति विरुद्धवादित्वे मूलं दर्शयत्यविद्येति मात्रपदस्य व्यावर्त्यं
मानयुक्त्याख्यमवष्टंभांतरमिति वक्तुं केवलपदं ययाऽविद्यया विरुद्धमपि निर्वोढुं शक्यते तस्याः स्वातंत्र्याभावाच्चितोऽ
न्यस्याविद्यकत्वेनाऽतदाश्रयत्वात्तस्या विद्यास्वभावतया तदाश्रयत्वव्याघातात् तदाश्रयजिज्ञासया पृच्छति अत्राहेति आश्र
यमात्रं पृच्छ्यते तद्विशेषो वा प्रथमे प्रश्नस्यानवकाशत्वमित्याह यस्येति अविद्या दृश्याऽदृश्या वा दृश्यत्वे पारतंत्र्यात् किंचिन्नि
ष्ठत्वेनैव तत् दृष्टेर्नाश्रयमात्रं प्रष्टव्यमदृश्यत्वे वा स्वप्रकाशत्वात् सिद्धिविधिरेव स्यादित्यर्थः ॥ श्रीरामचंद्राय नमः ॥ ॥

द्वितीयमालंबते कस्येति ॥ अविद्यायाः दृश्यमानत्वादाश्रयविशेषस्यात्मनोपि स्वानुभवसिद्धत्वात् प्रश्नस्य निरवकाशते सुत्तरमाह
अत्रेति ॥ प्रश्नानर्थक्यं प्रश्नद्वारा स्फोरयति कथमिति ॥ तथापि कथं प्रश्नासिद्धिस्तत्राह ॥ न चेति ॥ तदेव दृष्टांतेन स्पष्टयति ॥ नहीति ॥
दृष्टांतदार्ष्टांतिकयोर्वैषम्यं चोदयति ॥ नन्विति ॥ अज्ञानाश्रयणस्य परोक्षत्वेपि प्रश्ननैरर्थक्यमित्याह अप्रत्यक्षेणेति ॥ अविद्यावतोऽप्र
त्यक्षत्वेपि तेनाविद्यासंबंधे सिद्धे प्रष्टुस्तव प्रश्नानर्थक्यं समाधिर्न कश्चिदित्यर्थः ॥ अबुद्धपराभिसंधिः शंकते ॥ अविद्याया इति ॥
अविद्यावतस्तत्परिहारान्नान्येन प्रयतितव्यमित्याह ॥ यस्येति ॥ ममैवाविद्यावत्वात्तत्परिहारे मया प्रयतितव्यमिति शंकते ॥ न

कस्य दृश्यत इत्यत्रोच्यते ॥ अविद्या कस्य दृश्यत इति प्रश्नो निरर्थकः ॥ कथं दृश्यते चेदविद्या तद्वंतमपि पश्यसि ॥ न च तद्वदु
पलभ्यमाने सा कस्येति प्रश्नो युक्तो न हि गोमत्युपलभ्यमाने गावः कस्येति प्रश्नो युक्तो भवेत् ॥ ननु विषमो दृष्टांतो कथं
गवां तद्वतश्च प्रत्यक्षत्वात्संबंधोपि प्रत्यक्ष इति प्रश्नो निरर्थकः ॥ न तथा अविद्या तद्वांश्च प्रत्यक्षौ यतः प्रश्नो निरर्थकः ॥
स्याद प्रत्यक्षेणाविद्यावतोऽविद्यासंबंधे ज्ञाते किं तव स्यादविद्याया अनर्थहेतुत्वात्परिहर्त्तव्या सा स्यात् यस्याविद्या
सतां परिहरिष्यति ॥ ननु ममैवाविद्या जानासि तर्ह्यविद्यां तद्वंतमात्मानं च जानामि न तु प्रत्यक्षेणानुमानेन चेत्
जानासि कथं संबंधग्रहणं न हि तव ज्ञातुर्ज्ञेयभूतयाविद्यया तत्काले संबंधो ग्रहीतुं शक्यते ॥ ॥

न्विति ॥ तर्हि प्रश्नानर्थक्यमिति सिद्धांती स्वाभिसंधिमाह ॥ जानासीति ॥ आत्मानमविद्यावंतं जानन्नपि तद्विषयाध्यक्षाभावा
त् एच्छामीति शंकते ॥ जानामीति ॥ अविद्यावतोऽप्रत्यक्षत्वं वदता तस्याहमविद्यावानविद्याकार्यवत्वाद्व्यतिरेकेण मुक्तात्मव
दित्यनुमेयत्वमित्युपेत्य दूषयति ॥ अनुमानेनेति ॥ आत्मनोऽविद्यया संबंधग्रहे कानुपपत्तिरित्याशंक्य ज्ञातैवात्मा स्वस्याविद्यासं
बंधं बुध्यतेऽन्यो वा ज्ञातेति विकल्प्याद्यं दूषयति ॥ नहीति ॥ तत्काले स्वस्याविद्यां प्रतिज्ञातृत्वावस्थायामिति यावत् ॥ श्री कृष्णः ॥

ने

अविद्याविषयित्वेनाविद्यांगृहीत्वा तत् ज्ञातृत्वेनैवोपयुक्तस्यात्मनस्तस्याः स्वात्मनि कुतः संबंधज्ञातृत्वमेकस्य कर्मकर्तृत्वविरोधा
दित्याह ॥ अविद्येति ॥ द्वितीयं निरस्यति ॥ न चेति ॥ योग्रहीतासन संभवतीति संबंधः ॥ तद्विषयमिति ॥ ज्ञातुरविद्यायाः संबंधस्तच्छ
ब्दार्थः ॥ अनवस्थामेव प्रपंचयति ॥ यदीति ॥ आत्मनः स्वपरज्ञेयत्वयोरयोगात्तस्मिन्नविद्यासंबंधस्याप्रामाणिकत्वान्नित्या
नुभवगम्यतेतिस्थिते फलितमाह ॥ यदि पुनरिति ॥ यदा चैवं तदेत्सध्याहार्यं ज्ञातुरात्मनो न किंचित् दुष्यतीत्येतदमृष्यमाणः

ऽविद्यायां विषयित्वेनैव ज्ञातुरुपयुक्तत्वान्न च ज्ञातुरविद्यायाश्च संबंधस्य योग्रहीता ज्ञानं चान्यत्तद्विषयं संभ
वत्यनवस्थाप्राप्तेर्यदि ज्ञातापि ज्ञेयसंबद्धो ज्ञायेतान्यो ज्ञाता कल्प्यः स्यात्तस्याप्यन्यस्तस्याप्यन्य इत्यनवस्था
ऽपरिहार्या यदि पुनरविद्याज्ञेयान्यद्वा ज्ञेयं ज्ञेयमेव तथा ज्ञातापि ज्ञातैव न ज्ञेयं भवति ॥ यदा चैवमविद्यादुः
खित्वाद्यैर्न ज्ञातुः क्षेत्रज्ञस्य किंचित् दुष्यति ॥ नन्वयमेव दोषो यत् दोषवत् क्षेत्रविज्ञातृत्वं न विज्ञानस्वरूप
स्यैवाविक्रियस्य विज्ञातृत्वोपचारात् यथोष्णतामात्रेणाग्नेस्तापक्रियोपचारस्तद्वद्यथात्र भगवताक्रि
याकारकफलात्मत्वाभावआत्मनिस्वत एव दर्शितोऽ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीः ॥

शंकते ॥ नन्विति ॥ किं ज्ञातृत्वं ज्ञानक्रियाकर्तृत्वं ज्ञानस्वरूपत्वं वा नाद्यः तदनभ्युपगमात् तत्प्रयुक्तदोषाभावात् ॥ द्विती
ये ज्ञातृत्वस्योपचारिकत्वान्न तत्कृतो दोषोस्तीत्याह ॥ नेत्यादिना ॥ प्रागसत्यामपि क्रियायां क्रियोपचारं दृष्टांतेन स्फुटय
ति ॥ यथेति ॥ आत्मनि वस्तुतो विक्रियत्वाभावे भगवदनुमतिं दर्शयति ॥ यथात्रेति ॥ गीताशास्त्रे सप्तम्यर्थः ॥ स्वत एवात्म
नि क्रियाद्यात्मत्वाभावो भगवता शास्त्रे यथोक्तः ॥ तथैव व्याख्यातमस्माभिरिति संबंधः ॥ श्रीरामकृष्णायनमः ॥

स्वाभाविकं कथं तर्हि क्रियादिरात्मनि भाति तत्राह ॥ अविद्येति ॥ यथावस्तुतो नास्त्यात्मनि क्रियादि रूपचारात्तु भाति तथा तत्र तत्रा
नीतप्रकरणेषु भगवता कृतोयलं द्रष्टव्य इत्याह ॥ तथेति ॥ न केवलमतीतेष्वेव प्रकरणेषु वास्तवक्रियाद्यभावादात्मन्यध्यासिकी
तत्तत्सिद्धिरुक्ता किंतु वक्ष्यमाणप्रकरणेष्वपि तथैव भगवदभिप्रायदर्शनं भविष्यतीत्याह ॥ उत्तरेष्वपीति ॥ आत्मनि वास्त
वक्रियाद्यभावेऽध्यासात्तु तत्तत्सिद्धौ कर्मकांडस्याविद्वदधिकारित्वप्राप्तौ विद्वानपि यजते ज्ञात्वा कर्मारभेतेत्यादिशा

विद्याध्यारोपितैरेव क्रियाकारकाद्यात्मनि उपचर्यते तथा तत्र तत्र य एनं वेत्ति हंतारं प्रकृतेः॥
क्रियमाणानि गुणैः कर्माणि सर्वशः नादत्ते कस्यचिदित्यादिप्रकरणेषु दर्शितं तथैव च व्या
ख्यातमस्माभिरुत्तरेषु च प्रकरणेषु दर्शयिष्यामः॥ हंत तर्ह्यात्मनि क्रियाकारकफलात्मता याः
स्वतोभावेऽविद्यया चाध्यारोपितत्वे कर्माण्यविद्वत्कर्तव्यान्येव न विदुषामिति प्राप्तं सत्यमेवं प्राप्तमे
तदेव च न हि देहभृता शक्यमित्यत्र दर्शयिष्यामः॥ सर्वशास्त्रार्थोपसंहारप्रकरणे च समासेनैव कौंते
य निष्ठा ज्ञानस्य या परेत्यत्र विशेषतो दर्शयिष्यामः॥ अलमिह बहुप्रपंचेनेत्युपसंह्रियते ॥२॥ ॥

स्त्रविरोधः स्यादिति शंकते ॥ हंतेति ॥ शास्त्रस्य देहव्यतिरेकविज्ञानाभिप्रायत्वाद्दर्शनाद्यात्मधी विधुरस्यैव कर्मकां
डाधिकारित्वं गीकरोति ॥ सत्यमिति ॥ कथमज्ञस्यैव कर्माधिकारित्वमुपपन्नमित्याशंक्याह ॥ एतदेवेति ॥ ज्ञानिनो
ज्ञाननिष्ठायामेवाधिकारो निश्चितं तरेत्वज्ञस्यैवेत्युपसंहारप्रकरणे विशेषतो भविष्यतीत्याह ॥ सर्वेति ॥ तदेवानुक्राम
ति ॥ समासेति ॥ जीवब्रह्मणोरैक्याभ्युपगमे वचनाकिं विरुद्धमित्युपसंहरति ॥ अलमिति ॥ ॥२॥ श्रीरामचंद्राय नमः॥

एवं श्लोकद्वयं व्याख्याय श्लोकांतरमवतारयति ॥ इदमिति ॥ कुत्र संग्रहोक्तिरुपयुज्यते तत्राह ॥ व्याचिख्यासितस्येति ॥ प्रतिपत्तिसौ
कर्यार्थं संग्रहोक्तिरर्थवती स्यर्थः ॥ वक्ष्यमाणेर्थे श्रोतुर्मनःसमाधानार्थं सूचितवाक्यार्थोपायविवरणे प्रतिज्ञामभिप्रेत्या
ह ॥ यन्निर्दिश्यमिति ॥ इदं शरीरमिति यन्निर्दिष्टं तच्छरीरं तच्छब्देन परामृश्यत इति प्रकृतार्थत्वात्तस्येति योजनात् तत्क्षेत्रं ज्ञातव्यमि
सध्याहारः ॥ यच्चेति ॥ येन रूपेण रूपवदिति तदेव क्षेत्रं विशिष्यते तस्य क्षेत्रस्य स्वकीया धर्मा जन्मादयस्तैर्विशिष्टस्य ज्ञेयत्वे

इदं शरीरमित्यादिश्लोकोपदिष्टस्य क्षेत्राध्यायार्थस्य संग्रहः श्लोकोयमुपन्यस्यते तत् क्षेत्रं यच्चेत्यादिव्याचिख्या
सितस्य ह्यर्थस्य संग्रहोपन्यासो न्याय्य इति यन्निर्दिष्टं इदं शरीरं इति ॥ यन्निर्दिष्टं इदं शरीरमिति तत्तच्छब्देन परामृश्य
ति यच्चेदं निर्दिष्टं क्षेत्रं तद्यादृक् यादृशं स्वकीयैर्धर्मैश्च चशब्दः समुच्चयार्थो यद्विकारि यो विकारोस्य तत् यद्विकारि य

तत् क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ॥ स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥

तो यस्माच्च यत् कार्यमुत्पद्यत इति वाक्यशेषः ॥ स च यः क्षेत्रज्ञो निर्दिष्टः स यत्प्रभावः ये प्रभावा उपाधिकृताः शक्तयो
यस्य स यत्प्रभावश्च तत् क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं यथा विशेषितं तत् समासेन संक्षेपेण मे मम वाक्यतः शृणु श्रुत्वा

हेयत्वं फलमिति ॥ चशब्दः पंचकस्येतरेतरसमुच्चयार्थत्वमाह ॥ चशब्देति ॥ विकारित्वेनापि हेयत्वं सूचयति ॥ विकारीति ॥ यत्का
र्यं तत्सर्वं यस्मादुत्पद्यते तत् कारणत्वात् ज्ञातव्यमित्याह ॥ यतश्चेति ॥ क्षेत्रमिव क्षेत्रज्ञं ज्ञातव्यं दर्शयति ॥ स चेति ॥ स ज्ञातव्य इ
ति संबंधः ॥ चक्षुराद्युपाधिकृतदृष्ट्यादिशक्तिवशात्तस्य ज्ञातव्यत्वं सूचयति ॥ यत्प्रभाव इति ॥ तेनोक्तेन प्रकारेण तस्य ज्ञात
व्यतेति शेषः ॥ कथं यथा विशेषितं क्षेत्रं क्षेत्रज्ञो वा शक्यो ज्ञातुमित्याशंक्य भगवद्वाक्यादित्याह ॥ तदिति ॥ ३ ॥ श्रीकृष्णः

श्लोकांतरस्य तात्पर्यमाह तदित्यादिना विवक्षितं जिज्ञासितमित्यर्थः स्तुतिफलमाह श्रोत्रिति न केवलमाप्तोक्तेरेव क्षेत्रादियाथार्थ्यं संभावितं किंतु वेदवाक्यादपीत्याह छंदोभिरिति ऋगादीनां चतुर्णामपि वेदानां नानाप्रकारत्वं शाखाभेदादिष्टं न केवलं श्रुतिस्मृतिसिद्धमुक्तं याथार्थ्यं किंतु योक्तिकं चेत्याह किंचेति कानि तानि सूत्राणीत्याशंक्याह आ

तत् क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं विवक्षितं स्तौति श्रोतृबुद्धिप्ररोचनार्थं ऋषिभिर्वशिष्ठादिभिर्बहुधा बहुप्रकारं गीतं कथितं छंदोभिः छंदांसि ऋगादीनि तैर्मंत्रैः॥ छंदोभिर्विविधैः नानाप्रकारैः पृथग्विवेकतो गीतं किंच ब्रह्मसूत्रपदैश्च एव ब्रह्मणः सूचकानि वाक्यानि ब्रह्मसूत्राणि तैः पद्यते ज्ञायते ब्रह्मेति

ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः पृथक्॥ ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः॥४॥

तानि ब्रह्मसूत्रपदान्युच्यंते तैरेव क्षेत्रक्षेत्रज्ञयाथात्म्यं गीतमिति अनुवर्तते॥ आत्मेत्येवोपासीतेत्यादिभिर्ब्रह्मसूत्रपदैरात्मा ज्ञायते हेतुमद्भिर्युक्तियुक्तैर्विनिश्चितैर्न संशयरूपैर्निश्चितप्रत्ययोत्पादकैरित्यर्थः॥४॥

तमेत्यैवेति॥आ

दिपदेन ब्रह्मविदाप्नोति परमथ योन्यां देवतामित्यादीनि विद्याऽविद्यासूत्राण्युक्तानि॥ आत्मेति क्षेत्रज्ञोपादानं तच्च क्षेत्रोपलक्षणं॥ अथातो ब्रह्मजिज्ञासेत्यादीन्यपि सूत्राण्यत्र गृहीतानि अन्यथा छंदोभिरित्यादिना पौनरुक्त्यादिति मत्वा विशिनष्टि॥

क्षेत्रादियाथात्म्यस्तस्या प्रलोभितायकिंतदितिजिज्ञासवेयथोद्देशंक्षेत्रंनिर्दिशति स्तस्येति महत्वेहेतुमाह सर्वे
ति भूतशब्देनस्थूलानामपिविशेषाभावात्ग्रहणेकाहानिरित्याशंक्याह स्थूलानीति अहंकारोऽहंप्रत्ययलक्ष
णइतिसंबंधः॥भूतानांप्रातीतिकत्वेनाभिमानमात्रात्मत्वंमत्वाहंकारंविशिनष्टि महाभूतेति महतःपरमित्यादौ

स्तस्याभिमुखीभूतायार्ज्जुनायआहभगवान् महाभूतानिमहांतिचतानिसर्वविकारव्यापक
त्वाद्भूतानिचसूक्ष्माणिनस्थूलानि स्थूलानितानिइंद्रियगोचरशब्देनाभिधायिष्यंतेएवंअहंकारो
महाभूतकारणमहंप्रत्ययलक्षणोऽहंकारकारणंबुद्धिरध्यवसायलक्षणातत्कारणमव्यक्तमे

महाभूतान्यहंकारोबुद्धिरव्यक्तमेवच॥ श्रीरामाय॥

वचनव्यक्तमव्यक्तमव्याकृतमीश्वरशक्तिर्ममायादुरत्ययेत्युक्ताएवशब्दःप्रकृत्यवधारणा
र्थएतावत्येवाष्टधाभिन्नाप्रकृतिःचशब्दोभेदसमुच्चयार्थः॥ श्रीरामचंद्रायनमोनमः॥ ॥

प्रसिद्धंमहच्छब्दार्थमहंकारहेतुमाह॥अहंकारेति ईश्वरशक्तिरित्युक्तेचैतन्यमपिशंक्यतेतदर्थमाह॥ममेति॥प्र
वधारणरूपमर्थमेवस्फुटयत्येतावत्येवेति॥पंचतन्मात्राण्यहंकारोमहदव्याकृतमित्यष्टधाभिन्नत्वंमूलप्रकृत्या
सहतन्मात्रादिभेदानांसमुच्चयश्चकारार्थः॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥श्रीरामचंद्रायनमोनमः॥

दशेंद्रियाण्येवविभज्यत्युत्पादयमति ॥श्रोत्रेत्यादि तदेवप्रश्नद्वारास्फुटयति ॥किंतदिति ॥शब्दादिविषयशब्देनस्थूलानिभूता
निगृह्यंते ॥उक्तेषुतन्मात्रादिषुतंत्रांतरीयसंमतिमाह ॥नानीति ॥मूलप्रकृतिरविकृतिर्महदाद्याःप्रकृतिविकृतयःस

इंद्रियाणिदशश्रोत्रादीनिपंचबुध्युत्पादकत्वात् बुद्धींद्रियाणिवाक्पाणिपादपायूपस्थाख्यानिपंच
कर्मनिर्वर्त्तकत्वात् कर्मेंद्रियाणितानिदशैकंचकिंतन्मनएकादशंसंकल्पात्मकंपंचचेंद्रियगोच

इंद्रियाणिदशैकंचपंचचेंद्रियगोचराः॥५॥

राःशब्दादयोविषयास्तान्येतानिसंख्याश्चतुर्विंशतितत्वानिआचक्षते॥५॥श्रीरामचंद्रायनमः॥

प्तषोडशकश्चविकारइतिपठंति ॥अव्यक्ताहंकारादीनांत्रैगुण्याभिमानादिधर्मकत्वंप्रसिद्धमिति ॥स्थूलानींद्रियगोचरशब्देन
सन्निधार्य्यंतेनतद्विषयशब्दादीनामेवग्रहणंकर्मेंद्रियाणांविषयानुक्तेर्वैरूप्यप्रसंगात्क्षेत्रनिरूपणस्यचप्रकृतत्वात्॥५॥

स्वरूपनिर्देशेनैव तत्क्षेत्रं यच्च यादृक्चेति व्याख्यातमिदानीमिच्छादीनामात्मविकारत्वनिवृत्तये क्षेत्रविकारत्वनिरूपणेन य
द्विकारी स्येतन्निरूपयन्मतांतरनिवृत्तिपरत्वेन श्लोकमवतारयति ॥ अथेति ॥ सर्वज्ञोक्तिविरोधाद्धेयं वैशेषिकमतमिति मत्वो
क्तं ॥ भगवानिति ॥ उपलब्धजातीयस्योपलभ्यमानस्यादानेच्छायां हेतुमाह ॥ सुखेति ॥ इति शब्दो हेत्वर्थः ॥ सुखहेतुत्वाच्च तस्मि
न्निच्छेत्यर्थः ॥ इच्छां सुखतद्धेतुविषयत्वेन व्याख्यायात्मधर्मत्वं तस्याः व्युदस्यति ॥ सेयमिति ॥ तथापि कथं क्षेत्रांतर्भूतत्वं तत्राह ॥

अथेदानीमात्मगुणा इति यानाऽऽचक्षते वैशेषिकास्तेपि क्षेत्रधर्मा एव न तु क्षेत्रज्ञस्येत्याह भगवान् ॥ इ
च्छा यज्जातीयं सुखात्मकमर्थमुपलब्धवान् पूर्वं पुनस्तज्जातीयमनुपलभमानस्तमादातुमिच्छति सु
खहेतुरिति सेयमिच्छांतःकरणधर्मो ज्ञेयत्वात् क्षेत्रं तथा द्वेषो यज्जातीयमर्थं दुःखहेतुत्वेनानुभूत

इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ॥ श्रीः ॥

वान् पुनस्तज्जातीयमुपलभमानस्तं द्वेष्टि सोयं द्वेषो ज्ञेयत्वात् क्षेत्रमेव तथा सुखमनुकूलं प्रसन्नं सत्वात्म
कं ज्ञेयत्वात् क्षेत्रमेव दुःखं प्रतिकूलात्मकं ज्ञेयत्वात् तदपि क्षेत्रं संघातो देहेंद्रियाणां संहतिः ॥

ज्ञेयत्वादिति ॥ इच्छावत् द्वेषोपि धर्मो बुद्धेरित्याह ॥ तथेति ॥ कोसौ द्वेषो यस्य बुद्धिधर्मत्वं तत्राह ॥ यज्जातीयमिति ॥ तस्यापीच्छावत्
क्षेत्रांतर्भावमाह ॥ सोयमिति ॥ इच्छाद्वेषवत् बुद्धिधर्मः सुखमपीत्याह ॥ तथेति ॥ तस्यापि स्वरूपोक्त्या क्षेत्रांतःपातित्वमाह ॥ अनुकूलं
इति ॥ दुःखस्यापि स्वरूपोक्त्या क्षेत्रमध्यवर्त्तित्वमाह ॥ दुःखमिति ॥ देहेंद्रियात्मवादो व्युदसितुं क्षेत्रांतर्भूतमेव संघातं विभजते देहेति ॥

विज्ञानवादं प्रत्याह तस्मिन्निति ॥ तप्तेलोहपिंडेवन्हेरभिव्यक्तिवदुक्तसंहतौबुद्धिवृत्तिरभिव्यजते ॥ तत्रचाग्निरभिव्यक्तोलोहपिंडमेवाग्नि
बुद्ध्याग्राहयति ॥ तथात्मचैतन्यंबुद्धिवृत्तावभिव्यक्तंतामेवात्मतयाबोधयत्यतस्तदाभासानुविद्धासैवचेतनेत्युच्यते ॥ सान्वमुख्यंचे
तनंप्रतिज्ञेयत्वादनतद्रूपत्वात्क्षेत्रमेवेत्यर्थः ॥ धृतिस्वरूपोक्त्याक्षेत्रत्वंतस्यादर्शयति ॥ धृतिरित्यादिना ॥ नन्वन्येपिसंकल्पादयोये
मनोधर्माःसंतितेकिमित्यत्रक्षेत्रधर्मत्वेननोच्यंतेतत्राह ॥ सर्वेति ॥ तस्योपलक्षणार्थत्वेहेतुमाह ॥ यदिति ॥ इच्छादिवदस्मिन्नव
सरेसंकल्पादीनामपिदर्शितत्वंसिद्धवत्कृत्यप्रकरणविभागार्थंयतोभगवानुक्तंक्षेत्रमुपसंहरत्यतोयुक्तमिच्छादिग्रहस्य ॥

त३

स्तस्मिन्नभिव्यक्तांतःकरणवृत्तिस्तप्तवल्लोहपिंडेअग्निरात्मचैतन्याभासरसविद्धाचेतनासाचक्षेत्रंज्ञेयत्वात् ॥ धृतिर्यया
वसादंप्राप्तानिदेहेंद्रियाणिध्रियंतेसाचज्ञेयत्वात्क्षेत्रंसर्वांतःकरणधर्मोपलक्षणार्थमिच्छादिग्रहणंयतउक्तंतदुपसंहर ॥
ति ॥ एतत्क्षेत्रंसमासेनसविकारंसहविकारेणमहदादिनोदाहृतंउक्तं यस्यक्षेत्रभेदजातस्यसंहतिरिदंशरीरंक्षेत्रमित्यु

एतत्क्षेत्रंसमासेनसविकारमुदाहृतं ॥ ६ ॥

क्तं ॥ तत्क्षेत्रंव्याख्यातंमहाभूतादिभेदभिन्नंधृत्यंतंक्षेत्रज्ञोवक्ष्यमाणविशेषणोयस्यसप्रभावस्यक्षेत्रज्ञस्यप
रिज्ञानादमृतत्वंभवतितंज्ञेयंयत्तत्प्रवक्ष्यामीत्यादिनासविशेषणंस्वयमेववक्ष्यतिभगवान् ॥ ६ ॥ श्रीकृष्णायनमः ॥

सर्वानुक्तबुद्धिधर्मोपलक्षणार्थत्वमित्यर्थः ॥ विरक्तस्यज्ञानेधिकारायवैराग्यार्थंक्षेत्रंव्याख्यातमित्यनुवदति ॥ यस्येति ॥
क्षेत्रभेदजातस्यव्यष्टिदेहविभागस्यसर्वस्येत्यर्थः ॥ संहतिःसमष्टिशरीरं ॥ ननूक्तेक्षेत्रेक्षेत्रज्ञोवक्तव्यस्तंहित्वाकिमित्यन्यदुच्य
तेतत्राह ॥ क्षेत्रज्ञइति ॥ अनादिमदित्यादिनावक्ष्यमाणविशेषणंक्षेत्रज्ञंस्वयमेवभगवान्विवक्षितविशेषणसहितंज्ञेयं
यत्तदित्यादिनावक्ष्यतीतिसंबंधः ॥ किमिति ॥ क्षेत्रज्ञोवक्ष्यतेतत्राह ॥ यस्येति ॥ ६ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥

ज्ञेयं यत्तदित्यतः प्राक्तनग्रंथस्य तात्पर्यमाह ॥ अधुनेति ॥ अमानित्वादिलक्षणं विदधातीत्युत्तरत्र संबंधः ॥ ज्ञानसाधनसमुदायबो
धनं कुत्रोपयुज्यते तत्राह ॥ यस्मिन्निति ॥ योग्यमधिकृतमेव विवृणोति ॥ यत्यरइति ॥ एतज्ज्ञानमिति वचनात्कथमिदं ज्ञानमित्याशं
क्याह ॥ तमिति ॥ तद्विधानस्य वक्तृद्वारा दार्ढ्यं सूचयति ॥ भगवानिति ॥ अमानित्वादिनिष्ठस्यांतर्धियो ज्ञानमिति नियमार्थमाह ॥
अमानित्वमिति ॥ मानस्तिरोहितोवलेपः स चात्मन्युत्कर्षारोपहेतुः सोस्येति मानी न मान्यमानी तस्य भावोऽमानित्वमिति व्याकरो

साधन २

अधुना तु तत्ज्ञानसाधनगणममानित्वादिलक्षणं यस्मिन्सति ज्ञेयविज्ञाने योग्योऽधिकृतो भवति ॥ यत्यरः संन्या
सी ज्ञाननिष्ठ उच्यते ॥ तममानित्वादिगणं ज्ञानसाधनत्वाज्ज्ञानशब्दवाच्यं विदधाति भगवान् ॥ अमानित्वं मानिनो

अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं ॥

भावो मानित्वमात्मनः श्लाघित्वं तदभावो अमानित्वं अदंभित्वं स्वधर्मप्रकटीकरणं दंभित्वं तदभावोऽदंभित्वं अहिं
सा अहिंसनं प्राणिनामपीडनं क्षांतिः परापराधप्राप्तावविक्रिया ॥ आर्जवमृजुभावो वक्रत्व ॥ ॥ ॥

ति ॥ अमानित्वमित्यादिना ॥ प्रतियोगिमुखेनादंभित्वं विवृणोति ॥ अदंभित्वमिति ॥ वाङ्मनोदेहैरपीडनं प्राणिनामहिंसनं तदे
वाहिंसेत्याह ॥ अहिंसेति ॥ परापराधस्य चित्तविकारकारणस्य प्राप्तावेवाविकृतचित्तत्वेनापकारसहिष्णुत्वं क्षांतिरित्याह ॥ क्षां
तिरिति ॥ अवक्रत्वमकौटिल्यं यथाहृदयं व्यवहारः ॥ सदैकरूपप्रवृत्तिनिमित्तत्वं चेत्यर्थः ॥ श्रीरामकृष्णायनमोनमः ॥ ॥

उपनीयतु यः शिष्यमित्यादिनोक्तमाचार्यमव्यवछिनत्ति॥ मोक्षेति॥ शुश्रूषादीत्यादिशब्देन नमस्काराद्यर्थः॥ बाह्यमंतरंचद्विप्रका
रंशौचंक्रमेणविभजते॥ शौचमित्यादिना॥ मनसोरागादिमलानामिति संबंधः॥ तदपनयोपायमुपदिशति॥ प्रतिपक्षेति॥ रा

माचार्योपासनंमोक्षसाधनोपदेष्टुराचार्यस्यशुश्रूषादिप्रयोगेणसेवनंशौचंकायमलानांमृज्जलाभ्यांप्र
क्षालनंअंतःकरणस्यप्रतिपक्षभावनयारागादिमलानामपनयंशौचंस्थैर्यंस्थिरभावोमोक्षमार्गएवकृ

आचार्योपासनंशौचंस्थैर्यमात्मविनिग्रहः॥७॥

ताध्यवसायत्वमात्मविनिग्रहः आत्मनोपकारकस्यात्मशब्दवाच्यस्यकार्यकरणसंघातस्यविनिग्रहः
स्वभावेनसर्वतःप्रवृत्तस्यसन्मार्गएवनिरोधआत्मविनिग्रहः॥७॥ श्रीसीतारामचंद्रायनमोनमः॥

गादिप्रतिकूलस्यभावनाविषयेषुदोषदृष्ट्याऽवृत्तिस्तयेतियावत्॥ स्थिरभावमेवविशदयति॥ मोक्षेति॥ स्वात्मनोनि
त्यसिद्धस्यानादेयातिशयस्यकुतो विनिग्रहस्तत्राह॥ आत्मनइति॥७॥ श्रीसीतारामचंद्रायनमः॥ श्रीकृष्णायनमः॥

नकेवलममानित्वादीन्येवज्ञानस्यांतरंगसाधनानि किंतुवैराग्यादीन्यपितथाविधानिसंतीत्याह॥ किंचेति॥ दृष्टानुश्राविकार्थेषुरागेतस्मतिबहुज्ञानंनोत्पद्यतइतिमत्वाव्याकरोति॥ इंद्रियेति॥ आविर्भूतोगर्वोहंकारस्तदभावोपिज्ञानहेतुरित्याह

किंच॥ इंद्रियार्थेषुशब्दादिषुदृष्टादृष्टेषुविषयभोगेषुविरागभावोवैराग्यंअनहंकारोहंकाराभाव एवच॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनंजन्मचमृत्युश्चजराचव्याधयश्चदुःखानिच

इंद्रियार्थेषुवैराग्यमनहंकारएवच॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं॥ ८॥

तेषुजन्मादिदुःखांतेषुप्रत्येकंदोषानुदर्शनंजन्मनिगर्भवासयोनिद्वारनिःसरणंदोषस्तस्यानुदर्शनमालोचनंतथामृत्यौदोषानुदर्शनं॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीकृष्णः॥

अनहंकारइति॥ इंद्रियार्थेषुवैराग्यमुक्तमुपपादयति॥ जन्मेति॥ प्रत्येकंदोषानुदर्शनमित्युक्तं तत्रजन्मनिदोषानुदर्शनंविशदयति॥ जन्मनीति॥ यथाजन्मनिदोषानुसंधानंतथामृत्योदोषस्यसर्वमर्मनिकृंतनादेरालोचनंकार्यमित्याह॥ तथेति॥ ॥

जन्मनि मृत्यौ च दोषानुसंधानवज्जरादावपि कार्यमित्याह ॥ जरेति ॥ व्याधिषु दोषस्यासह्यतारूपस्यानुसंधानं दुःखेषु त्रिविधे
ष्वपि दोषानुसंधानं प्रसिद्धं व्याख्यानांतरमाह ॥ अथवेति ॥ यथा जन्मादिषु दुःखं तेषु दोषदर्शनमुक्तं तथा तेष्वेव दुःखाख्य
दोषस्य दर्शनं स्फुटयति दुःखमित्यादिना ॥ कथं जन्मादीनां बाह्येंद्रियग्राह्याणां दुःखत्वं तत्राह ॥ दुःखेति ॥ जन्मादिषु दोषानु

तथा जरायां प्रज्ञाशक्तितेजोनिरोधदोषानुदर्शनं परिभूतता चेति ॥ तथा व्याधिषु शिरोरोगादिषु दोषानुदर्शनं त
था दुःखेष्वध्यात्माधिभूताधिदैवनिमित्तेषु अथवा दुःखान्येव दोषो दुःखदोषस्तस्य जन्मादिषु पूर्ववद्दर्शनं दुः
खं जन्म दुःखं मृत्युर्दुःखं जरा दुःखं व्याधयो दुःखनिमित्तत्वाज्जन्मादयो दुःखं न पुनः स्वरूपेणैव दुःखमित्येवं ज
न्मादिषु दुःखदोषानुदर्शनाद्देहेंद्रियविषयाणां भोगेषु वैराग्यमुपजायते ॥ ततः प्रत्यगात्मनि प्रवृत्तिः कर
णानामात्मदर्शनायैवं ज्ञानहेतुत्वात् ज्ञानमुच्यते जन्मादिषु दुःखदोषानुदर्शनं ॥ ८ ॥ श्रीकृष्णायनमः ॥

दर्शनकृतं फलमाह ॥ एवमिति ॥ वैराग्ये सत्यात्मदृष्ट्यर्थं करणानां तदाभिमुख्येन प्रवृत्तिरिति वैराग्यफलमाह ॥ तत इति
जन्मादिदुःखदोषानुदर्शनं ज्ञानहेतुषु किमित्युपसंख्यातमित्याशंक्य वैराग्यद्वाराधीहेतुत्वादित्याह ॥ एवमिति ॥ ८ ॥

ज्ञानस्यांतरंगमेव हेत्वंतरमाह॥ किंचेति॥ नन्वसक्तिरेवाभिष्वंगाभावः तथाच पुनरुक्तिरित्याशंक्याभिष्वंगोक्तिद्वारा निरस्यति॥ अभिष्वंगो नामेति॥ अन्यस्मिन्नेव पुत्रादावनन्यत्वधियातद्गते सुखादावात्मनि तद्भावनाख्यं शक्तिविशेषमेवोदाहर

किंच॥ असक्तिः सक्तिः संगनिमित्तेषु विषयेषु प्रीतिमात्रं तदभावोऽसक्तिरनभिष्वंगो नामाभिष्वंगाभावोऽभिष्वंगो नाम सक्तिविशेष एवानन्यात्मभावनालक्षणः यथान्यस्मिन्सुखिनि दुःखिनि वाहमेव सुखी दुःखी च जीवति मृते वाहमेव जीवामि मरिष्यामि चेति॥ केत्याह॥ पुत्रदारगृहादिषु पुत्रेषु दारेषु गृहेषु आदिग्रहणादन्येष्वप्यत्यंतेष्टेषु दासवर्गादिषु तच्चोभयं ज्ञानार्थत्वात् ज्ञानमु

असक्तिरनभिष्वंगः पुत्रदारगृहादिषु॥ नित्यंच समचित्तत्वमिष्टानिष्टोपपत्तिषु॥ ९॥

च्यते नित्यंच समचित्तत्वं तुल्यचित्तता क्व इष्टानिष्टोपपत्तिषु इष्टानामनिष्टानां चोपपत्तयः संप्राप्तयस्तास्विष्टानिष्टोपपत्तिषु नित्यमेव तुल्यचित्तता इष्टोपपत्तिषु न हृष्यति न कुप्यति वा निष्टोपपत्तिषु तच्चैतन्नित्यं समचित्तत्वं ज्ञानं॥ ९॥ श्रीरामचंद्रायनमः॥ श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु॥ ॥

ति॥ पद्येति॥ उक्तविशेषणयोराकांक्षाद्वारा विषयमाह॥ क्वेत्यादिना॥ उक्तविशेषणयोर्ज्ञानशब्दस्योपपत्तिमाह॥ तच्चेति॥ सदा हर्षविषादशून्यमनस्त्वमपि ज्ञानहेतुरित्याह॥ नित्यंचेति॥ तदेव विभजते॥ इष्टेति॥ तस्य ज्ञानहेतुत्वं निगमयति॥ तच्चैतदिति

॥ ९

साधनांतरमाह॥ किंचेति॥ अनन्ययोगमेवसंक्षिप्तंव्यनक्तिमेत्यादिना॥ उक्तधीद्वाराजातायाभक्तेर्भगवतिस्थैर्यंदर्शयति॥ नेति॥ तत्रापिज्ञानशब्दोज्ञानहेतुत्वादित्याह॥ साचेति॥ देशस्यविविक्ततांद्विधाद्दर्शयाह॥ विविक्तेति॥ तदेवस्पष्टयति॥ अरण्येति

किंच मयिचेश्वरेऽनन्ययोगेनाऽपृथक्समाधिनानान्योभगवतोवासुदेवात्परोऽस्यतःसएवनोगतिरित्येवंनिश्चिताऽव्यभिचारिणीबुद्धिरनन्ययोगस्तेनभजनंभक्तिर्नव्यभिचरणशीलाअव्यभिचारिणीसाचज्ञानंविविक्तदेशसेवित्वंविविक्तःस्वभावतःसंस्कारेणवाशुध्यादिभिःसर्पव्याघ्रभयादिभिश्चरहितअरण्यनदीपुलिनदेवगृहादिर्विविक्तोदेशस्तंसेवितुंशीलमस्येतिविविक्तदेशसेवीतस्यभावोविविक्तदेशसेवित्वंविविक्तेषुदेशेषुचि

मयिचानन्ययोगेनभक्तिरव्यभिचारिणी॥ विविक्तदेशसेवित्वमरतिर्जनसंसदि॥ १०॥

त्तंप्रसीदतियतः॥ ततःआत्मादिभावनाविविक्तेसंजायतेऽतोविविक्तदेशसेवित्वंज्ञानमुच्यतेअरतिररमणंजनसंसदिजनानांप्राकृतानांसंस्कारशून्यानांअविनीतानांकलहोन्मुषितचित्तानांसमवायोजनसंसत्नसंस्कारवतांविनीतानांसंसत्तस्याज्ञानोपकारित्वादतःप्राकृतजनसंसद्यरतिःज्ञानार्थत्वात्ज्ञानं॥ १०॥ श्रीरामः॥

उक्तदेशातत्सेवाकुतोज्ञानहेतुस्तत्राह॥ विविक्तेष्विति॥ आत्मादीत्यादिशब्देनपरमात्मवाक्यार्थश्चोच्यते॥ नन्वरतिविषयत्वेनाविशेषतोजनसंसन्मात्रंकिमितिनगृह्यतेतत्राह॥ नत्स्यादिति॥ संतःसंगस्यभेषजमितिउपलंभादित्यर्थः॥ १०॥ ॥

साधनांतरमाह॥ किंचेति॥ आत्मादीत्यादि॥ शब्दोऽनात्मार्थस्तद्विषयं ज्ञानं विवेकः तन्नित्यत्वं तत्रैव निष्ठावत्त्वं विवेकनिष्ठो वा
क्यार्थज्ञानसमर्थो भवति॥ तेषां भावनापरिपाको नाम यत्नेन साधितानां प्रकर्षपर्यंतत्वं तन्निमित्तं तत्त्वज्ञानमैक्यसाक्षात्कारस्त
त्फलालोचनं किमर्थमित्याशंक्याह॥ तत्त्वेति॥ प्रवृत्तिः स्यादित्यतस्तत्त्वज्ञानार्थदर्शनमर्थवदिति शेषः॥ ज्ञानस्यांतरंगहेतु

किंच॥ अध्यात्मज्ञाननित्यत्वमात्मादिविषयं ज्ञानमध्यात्मज्ञानं तस्मिन्नित्यभावो नित्यत्वं अमानित्वादीनां ज्ञान
साधनानां भावनापरिपाकनिमित्तं तत्त्वज्ञानं तस्यार्थो मोक्षः संसारोपरमस्तस्यालोचनं तत्त्वज्ञानार्थदर्शनं तत्त्व
ज्ञानफलालोचने हि तत्साधनानुष्ठाने प्रवृत्तिः स्यादिति एतदमानित्वादि तत्त्वज्ञानार्थदर्शनांतमुक्तं ज्ञानमिति प्रो

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं॥ एतत् ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥ ११॥

क्तं ज्ञानार्थत्वाद् ज्ञानं यदतोस्माद्यथोक्तादन्यथा विपर्ययेण मानित्वं दंभित्वं हिंसाक्षांतिरनार्जवमित्याद्यज्ञानं विज्ञेयं
परिहरणाय संसारप्रवृत्तिकारणत्वादिति॥ ११॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु॥ श्रीरामकृष्णायनमो नमः॥

मुक्तमुपसंहरति॥ एतदिति॥ किमिति तस्याविज्ञेयत्वमित्याशंक्याह॥ परिहरणायेति॥ तत्र हेतुराह॥ संसारेति तस्य प्रवृत्त्यु
त्पत्तिहेतुत्वान्मानित्वादि त्याज्यं ज्ञाते च त्याज्यत्वं तेन तस्य ज्ञेयत इत्यर्थः॥ इति शब्दः साधनाधिकारसमाप्त्यर्थः॥ ११॥

उत्तरग्रंथमवतारयति॥ यथोक्तेनेति॥ अमानित्वादीनां ज्ञानत्वमाक्षिपति॥ नन्विति॥ वस्तुपरिच्छेदकत्वात् ज्ञानत्वमाशंक्याह
नहीति॥ परिच्छेदकत्वात् ज्ञानत्वं ज्ञानत्वात् परिच्छेदकत्वमित्यन्योन्याश्रयादित्यभिप्रेत्याह॥ सर्वत्रेति॥ स्वार्थस्यैव ज्ञानं परि
च्छेदकमित्येतद् व्यतिरेकद्वाराविशदयति॥ नहीति॥ व्यतिरेकदृष्टांतमाह॥ यथेति॥ अमानित्वादीनां ज्ञानत्वमाक्षिप्तं प्रतिक्षि

यथोक्तेन ज्ञानेन ज्ञातव्यं किमित्याकांक्षायामाह॥ ज्ञेयं यत्तदित्यादि॥ ननु यमानियमाश्चामानित्वादयो न तैर्ज्ञेयं
ज्ञायते॥ नह्यमानित्वादिकस्यचित् वस्तुनः परिच्छेदकं दृष्टं सर्वत्रैव च यद्विषयं ज्ञानं तदेव तस्य ज्ञेयस्य परिच्छेदकं
दृश्यते नह्यन्यविषयेण ज्ञानेनान्यदुपलभ्यते॥ यथा घटविषयेण ज्ञानेनाग्निः॥ नैष दोषः ज्ञाननिमित्तत्वात् ज्ञा

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते॥

नमुच्यत इति ह्यवोचाम ज्ञानसहकारिकारणत्वाच्च ज्ञेयं ज्ञातव्यं यत्तत्प्रवक्ष्यामि प्रकर्षेण यथावत् वक्ष्यामि
किं फलं तदिति प्ररोचनेन श्रोतुरभिमुखीकरणायाह यत् ज्ञेयं ज्ञात्वा अमृतममृतत्वमश्नुते न पुनर्म्रियत इ

पति॥ नैष दोष इति॥ तत्र हेतुत्वेनोक्तं स्मारयति॥ ज्ञानेति॥ तेषु ज्ञानशब्दे हेत्वंतरमाह॥ ज्ञानेति॥ अमानित्वादीनां ज्ञानत्वमु
क्त्वा ज्ञातव्यमवतारयति॥ ज्ञेयमिति॥ प्रश्नद्वारा ज्ञेयवचनस्य फलमुक्त्वा प्ररोचनं कृत्वा तेन श्रोतुराभिमुख्यमापादयि
तुं प्रवचनफलोक्तिपरमनंतरवाक्यमित्याह॥ किमित्यादिना॥ श्रीसीतारामचंद्रजीप्रसंन्नो मस्तु॥ श्रीरामायनमः॥

तदेव विशिनष्टि ॥ अनादिमदिति ॥ आदिमत्त्वराहित्यमव्याकृतस्यापीत्यतो विशेषं दर्शयति ॥ किं तदिति ॥ भोक्तुरपि भोग्यायस्त्व
मित्यतो विशिनष्टि ॥ ब्रह्मेति ॥ अनादीत्येकं पदं मत्परमिति चापरमिति पदच्छेदान्न पुनरुक्तिरिति मतांतरमुत्थापयति ॥ अत्रेति
एकपदत्वसंभवे किमिति पदद्वयमित्याशंक्याह ॥ बहुव्रीहिणेति ॥ आदिरस्य नास्तीति यो बहुव्रीहिणोक्तोर्थस्तस्मिन्नादि
मत्त्वनिषेधेनास्ति मतुपोर्थवत्त्वे त्वानर्थक्यमनिष्टं स्यादिति मत्वा पदं छिंदंतीति पूर्वेण संबंधः आदिरस्य नास्तीत्यनादीत्यु

अनादिमत् ॥ आदिरस्यास्तीत्यादिमन्न आदिमदनादिमत् किं तत्परं निरतिशयं ब्रह्म यज्ज्ञेयमिति प्रकृतम
त्र केचित् ॥ अनादिमत्परमिति पदं छिंदंति बहुव्रीहिणोक्तेऽर्थे मतुप आनर्थक्यमनिष्टं स्यादित्यर्थविशे
षं च दर्शयितुमहं वासुदेवाख्या परा शक्तिर्यस्य तन्मत्परमिति सत्यमेवमपुनरुक्तं स्यादर्थश्चेत्संभवति ॥ न

अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥

त्वर्थः संभवति ब्रह्मणः सर्वविशेषप्रतिषेधेनैव विजिज्ञापयिषितत्वान्न सत्तन्नासदुच्यत इति विशिष्टश
क्तिमत्त्वप्रदर्शनं विशेषप्रतिषेधश्चेति विप्रतिषिद्धं तस्मान्मतुपा बहुव्रीहिणा समानार्थत्वेपि प्रयोगः श्लोकपूर्ण

त्वा मत्परमित्युच्यमाने कोर्थः स्यादित्याशंक्याह ॥ अर्थेति ॥ उक्तव्याख्यानस्यायुक्तत्वान्नायं पुनरुक्तिसमाधिरित्याह ॥ सत्यमिति
अर्थासंभवं समर्थयते ॥ ब्रह्मण इति ॥ तथापि विशिष्टशक्तिमत्त्वं किं न स्यादित्याशंक्याह ॥ विशिष्टेति ॥ तथापि मतुपो बहुव्रीहिणा
तुल्यार्थस्य कथं नानर्थक्यं तत्राह ॥ तस्मादिति ॥ अनादिमत्परं ब्रह्मेत्यत्र पक्षांतरं प्रतिक्षिप्य स्वपक्षः समर्थितः ॥ ॥ ॥

संप्रति ब्रह्मणो ब्रह्मत्वादेव कार्यकारणात्मकत्वप्राप्तावुक्तानुवादद्वारा न सत्तन्नासदित्याद्यवतारयति ॥ अमृतत्वेति ॥ सत्कार्यमभिव्यक्तनाम
रूपत्वात् ॥ असत्कारणं तद्विपर्ययादिति विभागः ज्ञेयप्रवचनमनिर्वाच्यविषयत्वात् प्रक्रमप्रतिकूलमित्याक्षिपति ॥ नन्विति ॥ निर्वि
शेषस्य वस्तुनो ज्ञेयत्वात्तद्विषयं प्रवचनं प्रकृतानुकूलमित्युत्तरमाह ॥ नेत्यादिना ॥ अनिर्वाच्यत्वेन सत्तन्नासदित्युच्यमाने कथमि
दमनुरूपमिति पृच्छति ॥ कथमिति ॥ ब्रह्मात्मप्रकाशस्य सिद्धत्वात्तदर्थं विधिमुखेनोपदेशाऽयोगाद्ध्यस्तात्तद्धर्मनिवृत्तये निषे

अमृतत्वफलं ज्ञेयं मयोच्यत इति प्ररोचनेनाभिमुखीकृत्याह ॥ न सत्तन्न ज्ञेयमुच्यते नाप्यसत्तदु
च्यते ॥ ननु महता परिकरबंधेन कंठरवेणोद्घोष्य ज्ञेयं प्रवक्ष्यामीति ॥ अननुरूपमुक्तं न सत्तन्नासदुच्य
त इति ॥ न अनुरूपमेवोक्तं कथं सर्वासूपनिषत्सु ज्ञेयं ब्रह्म नेति नेत्यस्थूलमनण्वित्यादिविशेषप्र
तिषेधेनैव निर्दिश्यते नेदं तदिति वाचो गोचरत्वात् ॥ ननु न तदस्ति यद्वस्त्वस्तिशब्देन नोच्यते ॥ अ
थास्तिशब्देन नोच्यते नास्तितन्तु विज्ञेयं विप्रतिषिद्धं च ज्ञेयं तदस्तिशब्देन नोच्यत इति च मैवं नता
वद्ब्रह्मास्ति अस्ति बुद्ध्यविषयत्वात् न तावन्नास्ति ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ ॥

धद्वारोपदेशस्य वेदांतेषु प्रसिद्धेरारोपितविशेषनिषेधरूपमिदं प्रवचनमुचितमिति परिहरति ॥ सर्वास्विति ॥ ज्ञेयस्य ब्रह्मणो
विधिमुखोपदेशाऽयोगे हेतुमाह ॥ वाच इति ॥ ब्रह्मणोऽस्तिशब्दाऽवाच्यत्वेन नरविषाणवन्नास्तित्वमित्यनिष्टत्वमाशंकते
नन्विति ॥ एवमुत्सर्गेपि ब्रह्मणि किं मायातमित्याशंक्याह ॥ अथेति ॥ ज्ञेयस्यास्तिशब्दावाच्यत्वे व्याघातश्चेत्याह ॥ विप्रति
षिद्धं चेति ॥ अस्तिशब्दाऽवाच्यत्वादवस्तु ब्रह्मेत्यत्राप्रयोजकत्वमाह ॥ न तावदिति ॥ ॥ ॥

नास्ति धीविषयत्वमेवावस्तुत्वे निमित्तं तदभावाद्ब्रह्मणो नावस्तुतेत्येतदेवव्यक्तीकर्तुं चोदयति ॥ नन्विति ॥ सर्वासां धियामस्ति धीत्वेन नास्ति धीत्वेनानुगतत्वेऽन्यतरधीगोचरत्वाभावे ब्रह्मणोऽनिर्वाच्यत्वं दुर्वारमिति फलितमाह ॥ तत्रेति ॥ ब्रह्मणो घटादिवैलक्षण्यादुभयबुद्ध्यविषयत्वेपि नानिर्वाच्यतेत्याह ॥ नेत्यादिना ॥ घटादेरिंद्रियग्राह्यस्योभयबुद्धिविषयत्वेपि ब्रह्मणस्तदग्राह्यस्य नोभयधीविषयत्वं ॥ तथापि नानिर्वाच्यत्वं सच्चिदेकतानस्य शब्दप्रमाणाद्विषयत्वेन दृष्टत्वादित्युक्तमेव प्र

नास्ति बुद्ध्यविषयत्वान्ननु सर्वा बुद्धयोस्ति नास्ति बुद्ध्यनुगता एव तत्रैवं सति ज्ञेयमप्यस्ति बुद्ध्यनुगतप्रत्ययविषयं वास्यान्नास्ति बुद्ध्यनुगतप्रत्ययविषयं वास्यान्न तदतींद्रियत्वेनोभयबुद्ध्यनुगतप्रत्ययाऽविषयत्वाद्यद्धींद्रियगम्यं वस्तु घटादिकं तदस्ति बुद्ध्यनुगतप्रत्ययविषयं वास्यान्नास्ति बुद्ध्यनुगतप्रत्ययविषयं वास्यात् ॥ इदं तु ज्ञेयमतींद्रियत्वेन शब्दैकप्रमाणगम्यत्वान्न घटादिवदुभयबुद्ध्यनुगतप्रत्ययविषयमित्यतो न सन्नासदित्युच्यते ॥ यदुक्तं विरुद्धमुच्यते ज्ञेयं तन्न सन्नासदुच्यत इति न विरुद्धमन्यदेव तद्विदितादथो अविदितादधीति श्रुतेः ॥ श्रुतिरपि विरुद्धार्थेति यथा यज्ञाय शालामारभ्य को हि तद्वेद यद्यमुष्मिंल्लोकेस्ति वा न वेतीत्येवमिति चेत् ॥ श्रीकृष्णः ॥

पंचयति ॥ यद्वीति ॥ परोक्तं विरोधमनुवदति ॥ यदिति ॥ श्रुत्यवष्टंभेन निराचष्टेन विरुद्धमिति ॥ सापि विरुद्धार्थत्वान्न मानं वोधकत्वस्याविरोधापेक्षत्वादिति शंकते ॥ श्रुतिरिति ॥ तस्या विरोधार्थत्वेनाप्रामाण्ये दृष्टांतमाह ॥ यथेति ॥ प्राचीनवंशं करोतीति पारलौकिकफलयज्ञानुष्ठानार्थं शालानिर्माणं प्रस्तुत्य को हि तद्वेदेत्याद्या पारलौकिकसत्त्वे संदिहाना यथा विरुद्धार्था श्रुतिरप्रमाणमेवं विदिताविदितादन्यत्व श्रुतिरपीत्यर्थः ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीः ॥ ॥

ना

नेयंश्रुतिर्विरुद्धार्थतयाऽप्रमाणत्वेनहातव्याब्रह्मण्यद्वितीयेप्रत्यक्षप्रतिपादनेनमानत्वादित्युत्तरमाह॥ नविदितेति॥ यत्तु
विरुद्धार्थत्वेकोहीत्युदाहृतंतदसद्‍दर्थवादस्यविधिशेषस्यस्वार्थेऽतात्पर्यादित्याह॥ यदीति॥ यत्रजात्यादिमत्त्वंतत्रवाच्यत्वं
यथागवादौनब्रह्मणिजात्यादिमत्त्वमतस्तस्यावाच्यत्वान्निषेधेनैवबोध्यत्वमित्याह॥ उपपत्तेश्चेति॥ नोच्यत इति निषे

नविदिताविदितान्यश्रुतेरवश्यंविज्ञेयार्थप्रतिपादनपरत्वात्‌यद्यमुष्मिन्नित्या
दितुविधिशेषोर्थवादः उपपत्तेश्चसदसदादिशब्दैर्ब्रह्मनोच्यतइतिसर्वोहिशब्दोर्थ
प्रकाशनायप्रयुक्तःश्रूयमाणश्चश्रोतृभिर्जातिक्रियागुणसंबंधद्वारेणसंकेतग्रह
णसव्यपेक्षोर्थंप्रख्यापयतिनान्यथाऽदृष्टत्वात्तद्यथागौरश्वइतिवाजातितःपचतिप
ठतीतिवाक्रियातःशुक्लःकृष्णइतिवागुणतोधनीगोमानितिवासंबंधतः॥

धेनैवतस्योपदेशइतिशेषः जात्यादिमतोर्थस्यैववाच्यत्वंतत्रैवसंगतिग्रहादितिप्रपंचयतिसर्वोहीति॥ अश्रुतस्यजात्यादि
द्वारेणाज्ञातसंगतेर्वाशब्दस्यनबोधकत्वमदृष्टेरित्याह॥ नान्यथेति॥ जात्यादेःशब्दविषयत्वमुदाहरति॥ तद्यथेत्यादिना॥

ब्रह्मणस्त्वगोत्रमवर्णमित्यादिश्रुतेर्जातिमत्त्वाभावान्नशब्दवाच्यतेत्याह॥ नत्विति॥ केवलो निर्गुणश्चेति श्रुतेर्गुणद्वाराब्र
ह्मणोनवाच्यतेत्याह॥ नापीति॥ निःक्रियत्वेमानमाह॥ निःकलंनिष्क्रियमिति ब्रह्मणोऽद्वयत्वस्याशेषोपनिषत्सुप्रसिद्ध

नतुब्रह्मजातिमदतोनसदादिशब्दवाच्यंनापिगुणवत्येनगुणशब्देनो
च्येतनिर्गुणत्वान्नापिक्रियाशब्दवाच्यंनिःक्रियत्वात्॥ निष्कलंनिष्क्रियंशांत
मितिश्रुतेर्नचसंबंधिएकत्वादद्वयत्वादविषयत्वादात्मत्वाच्चनकेनचिच्छब्देनो
च्यतेइतियुक्तंयतोवाचोनिवर्त्ततेइत्यादिश्रुतिभ्यश्च॥ १२॥ श्रीरामः॥

त्वाद्विशिष्टस्यसंबंधस्यतस्मिन्नसिद्धेस्तन्द्वारापिनतस्यवाच्यतेत्याह॥ नचेति॥ ब्रह्मण्यभिधातृत्वाशब्दाप्रवृत्तौहेत्वं
तराण्याह॥ अविषयत्वादिति ब्रह्मणोऽवाच्यत्वेश्रुतिमपिसंवादयति॥ यतइति॥ १२॥ श्रीरामचंद्रायनमोनमः॥

सर्वविशेषरहितस्यावाङ्मनसगोचरस्यादृष्टेः दृष्टेश्चाविपरीतस्य प्राप्ते ब्रह्मणः शून्यत्वेप्रसक्तेनेंद्रियप्रवृत्त्यादिहेतुत्वेनकल्पितद्वैतसत्तास्फूर्तिप्रदत्वेनेश्वरत्वेनचसत्वंदर्शयन्नादौदेहादीनांप्रवृत्तिमतांरथादिवदचेतनानांप्रेक्षापूर्वकप्रवृत्तिमत्वाच्चेतनाधिष्ठितत्वमनुमिमानस्ततःप्रत्यक्चेतनंब्रह्मेत्याह॥ सर्वत इति॥ तदस्तित्वमितितच्छब्दोक्तेयज्ञ्ब्रह्मार्थःतदाशंकेतितच्छब्देनासत्वमुच्यते॥ ननुसर्वदेहेषुपाणिपादमस्येतिकथंपाणीनांपादानांचदेहस्थत्वेनात्मधर्मत्वंतत्रा

सच्छब्दप्रत्ययाविषयत्वादसत्वाशंकायांज्ञेयस्यसर्वप्राणिकरणोपाधिद्वारेणतदस्तित्वंप्रतिपादयंस्तदाशंकानिवृत्त्यर्थमाह॥ सर्वतःपाणिपादंतत्सर्वतःपाणयःपादाश्चास्येतिसर्वतःपाणिपादंतत्ज्ञेयंसर्वप्राणिकर

सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं॥ ॥

णोपाधिभिःक्षेत्रज्ञास्तित्वंविभाव्यतेक्षेत्रज्ञश्चक्षेत्रोपाधितउच्यतेक्षेत्रंचपाणिपादादिभिरनेकधाभिन्नंक्षेत्रोपाधिभेदकृतंचविशेषजातंमिथ्यैवक्षेत्रज्ञस्येतिचतदपनयनेनज्ञेयत्वमुक्तंनसत्तन्नासदुच्यतइति॥ ॥

ह॥ सर्वेति॥ करणप्रवृत्तीरथादिप्रवृत्तिवत्प्रेक्षापूर्वकप्रवृत्तित्वाच्चेतनाधिष्ठानपूर्विकेत्यर्थः उक्तप्रवृत्त्याचेतनास्तित्वसिद्धावपिकथंक्षेत्रज्ञास्तित्वमित्याशंक्यचेतनस्यैवक्षेत्रोपाधिनाक्षेत्रज्ञत्वाच्चेतनास्तित्वंतदास्तित्वमेवेत्याह॥ क्षेत्रज्ञश्चेतितस्यक्षेत्रोपाधित्वेपिकथंपाणिपादाक्षिशिरोमुखादिमत्वमित्याशंक्याह॥ क्षेत्रंचेति॥ अतश्चोपाधितस्तस्मिन्विशेषोक्तिरितिशेषः कथंतर्हिनसन्नासदितितान्निर्विषयत्वोक्तिरित्याशंक्याह॥ क्षेत्रेति॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु

पाणिपादादिमत्त्वमौपाधिकं मिथ्या चेत् ज्ञेयप्रवचनाधिकारे कथं तदुक्तिरित्याशंक्याह ॥ उपाधीति ॥ मिथ्यारूपमपि ज्ञेयव
स्तु ज्ञानोपयोगीत्यत्र वृद्धसंमतिमाह ॥ तथा हीति ॥ पाणिपादादीनामन्यगतानामात्मधर्मत्वेनारोप्य व्यपदेशे को हेतु
रिति चेत्तत्राह ॥ सर्वत्रेति ॥ ज्ञेयस्य ब्रह्मणः शक्तिः संनिधिमात्रेण प्रवर्त्तनसामर्थ्यं तत्सत्त्वं निमित्तीकृत्य स्वस्वकार्येषु तोभ

उपाधिकृतं मिथ्यारूपमप्यस्तित्वाधिगमाय ज्ञेयधर्मवत्परिकल्प्योच्यते सर्वतः पाणिपादमित्यादि तथा
हि संप्रदायविदां वचनमध्यारोपापवादाभ्यां निःप्रपंचं प्रपंच्यत इति सर्वत्र सर्वदेहावयवत्वेन गम्यमानाः
पाणिपादादयो ज्ञेयशक्तिसद्भावनिमित्ताः स्वस्वकार्या इति ज्ञेयसद्भावे लिंगानि ज्ञेयस्येत्युपचारत उच्यंते तत

सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥

श्री व्याख्येयमन्यत् सर्वतः पाणिपादं तत् ज्ञेयं सर्वतोक्षिशिरोमुखं सर्वत्राक्षीणि शिरांसि मुखानि च यस्य त
त्सर्वतोक्षिशिरोमुखं सर्वतः श्रुतिमत् श्रुतिः श्रवणेंद्रियं तद्यस्य तत् श्रुतिमल्लोके प्राणिनिकाये सर्वमावृ
त्य संव्याप्य तिष्ठति स्थितिं भजते ॥ १३ ॥ श्रीरामचंद्राय नमः ॥ श्रीरामकृष्णाय नमः ॥ श्रीरामचंद्राय नमो नमः

वंति पाण्यादमत् इति कृत्वेति योजना ॥ सर्वतोक्षीत्यादावुक्तमतिदिशति ॥ तथेति ॥ तत् ज्ञेयं यथा सर्वतः पाणिपादमिति व्याख्यातं त
थेत्युक्तमेव स्फुटयति ॥ सर्वत इति ॥ सर्वतोक्षीत्यादावक्षरार्थमाह ॥ सर्वतोक्षीति ॥ अक्षिश्रवणत्वमविशिष्टज्ञानेंद्रियवत्त्वस्य
पाणिपादमुखवत्त्वं चाविशिष्टकर्मेंद्रियवत्त्वस्य मनोबुद्ध्यादिमत्त्वस्य चोपलक्षणं एकस्य सर्वत्र पाण्यादिमत्त्वं साधयति ॥

सर्वतमिति ॥ १३ ॥

९२

आरोपाद्धृते साक्षादेव ज्ञेयस्य पाण्यादिमत्त्वमाशंक्याह॥ उपाधीति॥ इंद्रियविशेषणीभूतसर्वशब्दात् ज्ञेयोपाधित्वन्यायाविशे
षाच्चात्र बुद्ध्यादेरपि ग्रहणमित्याह॥ अंतःकरणे चेति॥ श्रोत्रादीनां ज्ञेयोपाधित्वस्य मनोबुद्धिद्वारत्वादर्पितयोरिह ग्रहणमित्याह॥
अपि चेति॥ तयोरपीह्योपादाने फलितमाह॥ इत्यत इति॥ अक्षरार्थमुक्त्वा वाक्यार्थमाह॥ सर्वेति॥ उपाधिद्वारा कल्पितत्वा

उपाधिभूतपाणिपादादींद्रियाध्यारोपणात् ज्ञेयस्य तद्वत्ताशंका माभूदित्येवमर्थः श्लोकारंभः॥ सर्वेंद्रियगुणाभा
संसर्वाणि चेंद्रियाणि श्रोत्रवागादीनि बुद्धींद्रियकर्मेंद्रियाख्यानि चेति॥ अंतःकरणे च बुद्धिमनसी ज्ञेयोपाधित्वस्य तुल्य
त्वात् सर्वेंद्रियग्रहणेन गृह्येते॥ अपि चांतःकरणोपाधिद्वारेणैव श्रोत्रादीनामप्युपाधित्वं इत्यतोंतःकरणबहिःकरणो
पाधिभूतैः सर्वेंद्रियगुणैरध्यवसायसंकल्पश्रवणवचनादिभिरवभासत इति सर्वेंद्रियगुणाभासं सर्वेंद्रियव्यापारैर्व्यापृ

सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं॥

तमिव तत् ज्ञेयमित्यर्थः॥ ध्यायतीव लेलायतीवेति श्रुतेः कस्मात्पुनः कारणान्न व्यापृतमेवेति गृह्यते इत्यत आह॥
सर्वेंद्रियविवर्जितं सर्वकरणरहितमित्यर्थः॥ अतो न करणव्यापारैर्व्यापृतं तत् ज्ञेयं यत्स्वयं मंत्रोऽपाणिपादो ज
वनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महांतं इत्यादिः॥

पारवत्त्वे मानमाह॥ ध्यायतीति॥ कल्पितमेवास्य व्यापारवत्त्वं न वास्तवमित्यत्र भगवतोपि संमतिमाकांक्षाद्वारा दर्शयति
कस्मादित्यादिना॥ सर्वकरणराहित्ये फलितमाह॥ अत इति॥ साक्षादेव ज्ञेयस्य वेगवद्विहरणादिक्रियावत्तायां मंत्रवर्णि
कत्वात् कुतोस्य करणव्यापारैर्व्यापृतत्वमित्याशंकानुवादपूर्वकं मंत्रस्य प्रकृतानुगुणत्वमाह॥ यत्स्विति॥ ॥ ॥

करणगुणानुगुण्यभजनमंतरेणसाक्षादेवजवनादिक्रियावत्वप्रदर्शनपरत्वेमंत्रस्यमुख्यार्थत्वंस्यादित्याशंक्यतदसंभवान्नैव
मित्याह॥ अंधइति॥ अर्थवादस्यश्रुतेर्थेतात्पर्याभावान्नप्रकृतप्रतिकूलतेत्यर्थः सर्वकरणराहित्यंतद्व्यापाराराहित्यस्योपल
क्षणमित्यंगीकृत्योक्तमेवहेतुंकृत्वावस्तुतः सर्वसंगवर्जितत्वमाह॥ यस्मादिति॥ वस्तुतः सर्वसंगाभावेपिसर्वाधिष्ठानत्वमा
ह॥ यद्यपीति॥ स्वसत्तामात्रेणाधिष्ठानतयासर्वंपुष्णातीत्येतदुपपादयति॥ सदिति॥ विमतंसतिकल्पितंप्रत्येकंसदनुविद्धधी

सर्वेंद्रियोपाधिगुणानुगुण्यभजनशक्तिमत्तत्ज्ञेयमित्येवंप्रदर्शनार्थेनितुसाक्षादेवजवनादिक्रियावत्वप्रदर्शनार्थः॥
अंधोमणिमविंददित्यादिमंत्रार्थवत्तस्यार्थः यस्मात्सर्वकरणवर्जितंज्ञेयंतस्मादसक्तंसर्वसंश्लेषवर्जितंयद्यप्येवंतथा
पिसर्वभृच्चसदास्पदंहिसर्वंसर्वत्रसद्बुद्ध्यनुगमान्नहिमृगतृष्णिकादयोपिनिरास्पदाभवंत्यतः सर्वभृत्तत्सर्वंबिभर्ती

असक्तंसर्वभृच्चैवनिर्गुणंगुणभोक्तृच॥ १४॥ श्रीः॥

तिस्यादिरंचान्यत्ज्ञेयस्यसत्वाधिगमद्वारंनिर्गुणंसत्वरजस्तमांसिगुणास्तैर्विवर्जितंतत्ज्ञेयंतथापिगुणभोक्तृ॥
चगुणानांसत्वरजस्तमसांशब्दादिद्वारेणसुखदुःखमोहाकारपरिणतानांभोक्तृचोपलब्धृतत्ज्ञेयमित्यर्थः॥ १४॥

बोध्यत्वात्प्रत्येकंचंद्रभेदानुविद्धधीबोध्यचंद्रभेदवदित्यर्थः सर्वंसदास्पदमित्ययुक्तंमृगतृष्णिकादीनांतदभावादित्याशं
क्याह॥ नहीति॥ तेषामपिकल्पितत्वेननिरधिष्ठानत्वायोगान्निरूप्यमाणेतदधिष्ठानेसद्रूपेसर्वस्यसतिकल्पितत्वमवि
रुद्धमित्यर्थः सर्वाधिष्ठानत्वेनज्ञेयस्यब्रह्मणोस्तित्वमुक्तमुपसंहरति॥ अतइति॥ इतश्चज्ञेयंब्रह्मास्तीत्याह॥ इदंचेति॥
नहितस्योपलब्धिरसत्वेसिद्ध्यतीत्यर्थः॥ १४॥ श्रीरामचंद्रायनमः॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीरामायनमः॥

भ्रतम

त्वगि

इतोपि ज्ञेयं ब्रह्मास्तीत्याह किंचेति ॥ बहिरिति व्याख्येयमादाय व्याचष्टे देहमिति ॥ भूतेभ्यो बहिर्बाह्यं विषयाद्यात्मकमित्यर्थः ॥
कथमनात्मन एवात्मत्वं कल्पनयेत्याह आत्मत्वेनेति ॥ अंतःशब्दार्थमाह तथेति ॥ भूतानां चराचराणामंतर्मध्ये प्रत्यग्भूतमित्यर्थः
द्वितीयपादमवतार्य व्याचष्टे बहिरित्यादिना ॥ यन्मध्ये भूतात्मकं नानाविधदेहात्मनाभासमानं तदपि ज्ञेयांतर्गतं नत्वसदित्य

किंच ॥ बहिस्त्वक्पर्यंतं देहमात्मत्वेनाविद्याकल्पितमपेक्ष्य तमपेक्ष्य तमेवावधिं कृ-
त्वा बहिरुच्यते ॥ तथा प्रत्यगात्मानमपेक्ष्य देहमेवावधिं कृत्वांतरुच्यते बहिरंतश्च

बहिरंतश्च भूतानामचरं चरमेव च ॥ ॥

सुक्तेमध्येऽभावेप्राप्ते इदमुच्यतेऽचरं चरमेव च यच्चराचरं देहाभासमपि तदेव
ज्ञेयं यथा रज्जुः सर्पाभासा ॥ श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु ॥ श्रीरामायनमः ॥

र्थः कथं चराचरात्मनो भूतजातस्य ज्ञेयत्वं तत्राह ॥ यथेति ॥ अधिष्ठाने रज्ज्वां कल्पितसर्पादेरंतर्भाववद्देहाभासस्य विज्ञेयांत
र्भावान्नासत्वं मध्ये ज्ञेयस्य शंकितव्यमित्यर्थः ॥ श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु ॥ श्रीरामचंद्रायनमोनमः ॥ श्रीकृष्णायनमः

सर्वात्मकं चेत् ज्ञेयं सर्वैरिदमितिकिमितिनगृह्यत इति शंकते यदीति इदं इति ग्राह्ययोग्यत्वाभावान्नेत्याह उच्यत इति सर्ववस्त्वा
त्मनाभासतस्तदयोग्यत्वं कथमित्याशंक्याह सत्यमिति सूक्ष्मत्वेपि किं स्यादित्याशंक्याह अत इति सूक्ष्मत्वमतींद्रियत्वं त
स्याविज्ञेयत्वे कुतस्तत् ज्ञानान्मुक्तिस्तत्राह अविदुषामिति विशेषणफलमाह विदुषामिति विदुषां हि तेषामात्मत्वेनज्ञा

यदिचराचरमेवव्यवहारविषयं सर्वं ज्ञेयं किमर्थमिदमिति सर्वैर्नविज्ञेयमिति उच्यते सत्यं सर्वाभासं तथा
पिव्योमवत् सूक्ष्ममतः सूक्ष्मत्वात् स्वेनरूपेण तत् ज्ञेयमप्यविज्ञेयमविदुषां विदुषां तु आत्मैवेदं सर्वं ब्रह्मै

सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् ॥ १५ ॥

वेदं सर्वमित्यादिप्रमाणतो नित्यं विज्ञातमविज्ञाततया अत एव दूरस्थं वर्षसहस्रकोट्याप्यविदुषामप्रा
प्यत्वादंतिके च तदात्मत्वाद्विदुषां ॥ १५ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामचंद्रायनमोनमः ॥

ननुचेत्कथं दूरस्थत्वमित्याशंक्याह ॥ अविज्ञाततयेति ॥ कथं तर्हि तस्य प्रत्यक्त्वं तत्राह ॥ अंतिके चेति ॥ विद्वदविद्वद्द्रष्ट्रपेक्षया
दूरात्सुदूरे तद्वहांतिके चेति विंबश्रुतिस्तदर्थोऽत्र प्रसंगादनूदित इत्यर्थः ॥ १५ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ १५ ॥

ज्ञेयस्यास्तित्वे हेत्वंतरमाह ॥ किंचेति ॥ तद्धि प्रतिदेहं नभोवदेकं तद्देहे देमानाभावाद्भिन्नत्वे च घटवदनात्मत्वापाताद्यतो द्वितीयं स॥
र्वत्र प्रत्यग्भूतं ज्ञेयं नास्तीत्यतिसाहसमित्याह ॥ अविभक्तं चेति ॥ कथं तर्हि देहभेदे भेदधीरित्याशंक्य कल्पनयेत्याह ॥ भूतेष्विति

किंच ॥ अविभक्तं च प्रतिदेहं व्योमवत्तदेकं भूतेषु सर्वप्राणिषु विभक्तमिव च स्थितं देहेष्वेव विभा
व्यमानत्वाद्भूतभर्तृ च भूतानि बिभर्तीति तत्ज्ञेयं भूतभर्तृ च स्थितिकाले प्रलयकाले ग्रसिष्णु ग्र॥

अविभक्तं च भूतेषु विभक्तमिव च स्थितं ॥ भूतभर्तृ च तत्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १६ ॥

सनशीलं उत्पत्तिकाले प्रभविष्णु च प्रभवनशीलं यथा रज्ज्वादिः सर्पादेर्मिथ्याकल्पितस्य ॥ १६ ॥

ति ॥ तत्र हेतुः देहेष्विति ॥ कार्याणां स्थितिहेतुत्वाच्च ज्ञेयमस्तीत्याह ॥ भूतेति ॥ निमित्तोपादानतया तेषां प्रलये प्रभवे च कार
णत्वाच्च तदस्तीत्याह ॥ प्रलयेति ॥ तर्हि कार्यकारणत्वस्य वस्तुत्वान्नाद्वैतमित्याशंक्याह ॥ यथेति ॥ १६ ॥ श्रीकृष्णायनमोनमः॥

इतोपि ज्ञेयस्यास्तित्वमित्याह॥ किंचेति॥ हेतुंतरमेव स्फोरयितुं शंकयति॥ सर्वत्रेति॥ नतत्तमोमंतव्यमित्याह॥ नेति॥ तर्हि किंतस्यरू
पमिति पृच्छति॥ किंतर्हीति॥ तत्रोत्तरं॥ ज्योतिषामिति॥ सूर्यादीनां बुद्ध्यादीनांच प्रकाशकत्वादस्तित्वं ज्ञेयं ब्रह्मेत्याह॥ ज्योतिषामिति॥ त
देवोपपादयति॥ आत्मेति॥ तत्र श्रुतिद्वयं प्रमाणयति॥ येनेति॥ उक्तेर्थे वाक्यशेषमनुकूलयति॥ स्मृतेश्चेति ज्ञेयस्यात्मनोऽ

किंच सर्वत्र विद्यमानं सन्नोपलभ्यते चेत् तत् ज्ञेयं तमस्तर्हि न किंतर्हि॥ ज्योतिषामादित्यादीनामपि तत् ज्ञेयं ज्योति
रात्मचैतन्यज्योतिषेद्धानि हि आदित्यादीनि ज्योतींषि दीप्यंते येन सूर्यस्तपति तेजसेद्धस्तस्य भासा सर्वमिदं विभा
तीत्यादिश्रुतिभ्यः स्मृतेश्च यदादित्यगतं तेज इत्यादितस्तमसोऽज्ञानात्परमसंस्पृष्टमुच्यते ज्ञानादेर्दुःसंपाद

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते॥ ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितं॥ १७॥

न बुद्ध्याप्राप्त्यावसादस्योत्तंभनार्थमाह॥ ज्ञानममानित्वादि ज्ञेयं यत्तत्प्रवक्ष्यामीत्यादिनोक्तं ज्ञानगम्यं ज्ञेयमेव
ज्ञातं सत् ज्ञानफलमिति ज्ञानगम्यमुच्यते ज्ञायमानं तु ज्ञेयं तदेतत्त्रयमपि हृदि बुद्धौ सर्वस्य प्राणिजातस्य धिष्ठि
तं विशेषेण स्थितं तत्रैव हि त्रयं विभाव्यते॥ १७॥ श्रीरामचंद्राय नमः॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥ श्रीः॥ ॥

तमस्त्वेपि तमस्पृष्टत्वमाशंक्योक्तं॥ तमस इति॥ उत्तरार्द्धस्य तात्पर्यमाह॥ ज्ञानादेरिति॥ उत्तंभनमुद्दीपनं प्रकटीकरणमिति यावत्
ज्ञानममानित्वादिकरणव्युत्पत्त्येति शेषः ज्ञानगम्यं ज्ञेयमिति पुनरुक्तिं शंकित्वोक्तं॥ ज्ञेयमिति॥ उक्तत्रयस्य बुद्धिस्थतया प्राक
ट्यं प्रकटयति॥ तदेतदिति॥ तत्रानुभवमनुकूलयति॥ तत्रैवेति॥ १७॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥ श्रीरामचंद्राय नमः॥

वि

त्वमर्थशुद्ध्यर्थं सविकारं क्षेत्रं परवाक्यार्थविवेकसाधनं चामानित्वादि तत्पदार्थं च शुद्धं तद्भावोक्त्यर्थमुक्त्वा तेषां फलमुपसंहर
ति ॥ यथोक्तेति ॥ पूर्वोर्द्धं विभजते ॥ इत्येवमिति ॥ वक्तव्यांतरे सतिकिमिति त्रितयमेव संक्षिप्योपसंहृतं तत्राह ॥ एतावानिति ॥ उत्त

यथोक्तार्थोपसंहारार्थोयं श्लोक आरभ्यते ॥ इत्येवं क्षेत्रं महाभूतादि धृत्यंतं तथा ज्ञानममानित्वादि तत्त्वज्ञा
नार्थदर्शनपर्यंतं यज्ज्ञेयं ज्ञेयं यत्तदित्यादि तमसः परमुच्यत इति पर्यंतमुक्तं समासतः संक्षेपत एतावान्
हि सर्वो वेदार्थो गीतार्थश्चोपसंहृत्योक्तोस्मिन्सम्यग्दर्शने कोधिक्रियत इत्युच्यते मद्भक्तो मयीश्वरे सर्वज्ञे प

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ॥ मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८ ॥

रमगुरौ वासुदेवे समर्पितसर्वात्मभावो यत्पश्यति शृणोति स्पृशति वा सर्वमेव भगवान्वासुदेव इत्येवं ग्र
हाविष्टबुद्धिर्मद्भक्तः स एतद्यथोक्तं सम्यग्दर्शनं विज्ञाय मद्भावाय मम भावो मद्भावः परमात्मभावस्तस्मै प
रमात्मभावायोपपद्यते मोक्षं गच्छति ॥ १८ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामचंद्राय नमो नमः ॥

राईमाकांक्षाद्वारावतारयति ॥ अस्मिन्निति ईश्वरे समर्पितसर्वात्मभावमेवाभिनयति ॥ यत्पश्यतीति ॥ विज्ञाय लब्धे
सर्थः ॥ १८ ॥ श्रीरामः ॥ ॥

प्रकृतिमित्यादिवक्ष्यमाणानंतरग्रंथः पूर्वग्रंथसंबंधीत्याशंक्याव्यवहितेनसंबंधार्थंव्यवहितमनुवदति ॥ तत्रेति ॥ तयोश्चप्रकृत्योरुक्तं
भूतकारणत्वमित्याह ॥ एतदिति ॥ भूतानामिवप्रकृत्योरपिप्रकृत्यंतरापेक्षयानवस्थानान्नभूतयोनितेतिशंकते ॥ क्षेत्रेति ॥ त
त्राकृताभ्यागमादिवारणायवंधस्यनिदानज्ञानार्थमात्मनोविक्रियावत्वादिदोषनिरासार्थंचप्रकृतिपुरुषयोरनादित्वंक्षे
त्रत्वेनोक्तानांप्रकृतिंप्रतिविकारभावंचदर्शयत्यऽयमर्थइतिसच्चयोयत्प्रभाववश्चेत्युपदिष्टंव्याचष्टे ॥ प्रकृतिमिति ॥ ईश्वर

तत्रसप्तमेईश्वरस्यद्वेप्रकृतीउपन्यस्तेपरापरेक्षेत्रक्षेत्रज्ञलक्षणेएतद्योनीनिभूतानीतिचोक्तंक्षेत्रक्षत्रज्ञप्रकृतिद्वय
योनित्वंकथंभूतानामित्ययमर्थोधुनोच्यते ॥ प्रकृतिंपुरुषंचैवेश्वरस्यप्रकृतीतौप्रकृतिपुरुषावुभावप्यनादीविद्धिन
विद्यतेआदिर्ययोस्तावनादीनित्येनित्यत्वादीश्वरस्यतत्प्रकृत्योरपियुक्तंनित्यत्वेनभवितुंप्रकृतिद्वयवत्वमेवहीश्व

प्रकृतिंपुरुषंचैवविद्ध्यनादीउभावपि ॥

रस्येश्वरत्वंयाभ्यांप्रकृतिभ्यांईश्वरोजगदुत्पत्तिस्थितिप्रलयहेतुस्तेद्वेअनादीसत्यौसंसारस्यकारणंभवतः न
आदीअनादीइतितत्पुरुषसमासंकेचिद्वर्णयंतितेनहिकिलेश्वरस्यकारणत्वंसिद्ध्यति ॥ यदिपुनः प्रकृतिपुरुषावेवनित्यौ

स्यापराप्रकृतिरत्रप्रकृतिशब्देनोक्तापरातुप्रकृतिर्जीवाख्यापुरुषशब्देनविवक्षितेतिव्याकरोति ॥ ईश्वरस्येति ॥ तयोरना
दित्वंस्तुत्यारयति ॥ नेत्यादिनातत्रयुक्तिमाह ॥ नित्यत्वादिति ॥ ईश्वरस्योक्तप्रकृतिद्वयवत्वंकथमित्याशंक्याह ॥ प्रकृतीति ॥ न
स्यजगज्जन्मादौस्वातंत्र्यमेवेश्वरत्वंनप्रकृतिद्वयवत्वमित्याशंक्याह ॥ याभ्यामिति ॥ प्रकृत्योरनादित्वंकुत्रोपयुक्तमित्याशं
क्याह ॥ तेइति ॥ मतांतरमाह ॥ नेत्यादिना ॥ तयोर्मूलकारणत्वाभावेकस्यविदेष्टव्यमित्याशंक्याह ॥ तेनहीति ॥ ॥ ॥

प्रकृत्योरेतन्मूलकारणत्वेश्रुतिस्मृतिसिद्धमीश्वरस्यतथात्वंनस्यादित्याह॥ यदीति॥ प्रकृतिद्वयस्यकार्यत्वपक्षंप्रत्याह॥ तदसदिति॥ किं
चप्रकृतिद्वयमनपेक्ष्येश्वरस्यसंसारहेतुत्वेस्वातंत्र्यान्मुक्तानामपिततःसंसारात्पुनरनिषेधान्मोक्षशास्त्राप्रामाण्यंतेननतस्यैव
संसारहेतुतेत्याह॥ संसारस्येति॥ निर्निमित्तत्वंप्रकृतिद्वयापेक्षामृतेपरस्यैवनिमित्तत्वमितियावत्॥ किंचकार्यत्वेप्रकृत्योस्तदुद

स्यातांतत्कृतमेवजगत्त्वेश्वरस्यजगतःकर्तृत्वंतदसत्प्राक्प्रकृतिपुरुषयोरुत्पत्तेरीशितव्याभावादीश्वरस्यानीश्व
रत्वप्रसंगात्संसारस्यचनिर्निमित्तत्वेऽनिर्मोक्षप्रसंगात्शास्त्रानर्थक्यप्रसंगाद्बंधमोक्षाभावप्रसंगाच्च॥ नित्यत्वेपु
नरीश्वरस्यप्रकृत्योःसर्वमेतदुपपन्नंभवेत्कथं॥ विकारांश्चगुणांश्चैववक्ष्यमाणान्बुद्ध्यादिदेहेंद्रियांतान्गुणांश्चसुख

विकारांश्चगुणांश्चैवविद्धिप्रकृतिसंभवान्॥ १९॥

दुःखमोहप्रत्ययाकारपरिणतान्विद्धिजानीहिप्रकृतिसंभवान्प्रकृतिरीश्वरस्यविकारकारणशक्तिस्त्रिगुणात्मिका
मायासंभवोयेषांविकाराणांगुणानांचतान्विकारान्गुणांश्चविद्धिप्रकृतिसंभवान्प्रकृतिपरिणामान्॥ १९॥

यात्पूर्वंबंधाभावेतद्विश्लेषात्मनोमोक्षस्याभावात्कदाचिदुभयाभावेपुनस्तदप्रसंगाच्चप्रकृतिद्वयस्यकार्यत्वेत्याह॥ बंधेति
प्रकृत्योर्मूलकारणत्वेनानुपपत्तिरित्याह॥ नित्यत्वइति॥ स्वपक्षेदोषाभावंप्रश्नपूर्वकंप्रपंचयति॥ कथमित्यादिना॥ संभवः
सत्ताप्रापकोहेतुःप्रकृतेस्तादित्वेविकाराणांगुणानांचतत्कार्यत्वादात्मनोनिर्विकारत्वंनिर्गुणत्वंचसिद्ध्यतीतिभावः॥ १९॥

विकाराणां गुणानां प्रकृतेश्च स्वरूपमाकांक्षाद्वारा निर्णेतुमुत्तरश्लोकपूर्वार्द्धं पातयति। के पुनरिति। पुरुषस्यानादित्वकृतं बंधहेतुत्वमाह। पुरुष इति। पूर्वार्द्धं व्याचष्टे। कार्यमित्यादिना। ज्ञानेंद्रियपंचकं कर्मेंद्रियपंचकं मनो बुद्धिरहंकारश्चेति त्रयोदश करणानि। तथापि भूतानां विषयाणां चाग्रहणात्कथं तेषां प्रकृतिकार्यत्वमित्याशंक्याह। देहेति। तथापि गुणानामिहाग्रहणान्न प्र

के पुनर्ये विकारा गुणाश्च प्रकृतिसंभवाः। कार्यकरणकर्तृत्वे कार्यं शरीरं करणानि तत्स्थानि त्रयोदश देहस्यारंभकाणि भूतानि विषयाश्च प्रकृतिसंभवाः विकाराः पूर्वोक्ता इह कार्यग्रहणेन गृह्यंते गुणाश्च प्रकृतिसंभवाः सुखदुःखमोहात्मकाः करणाश्रयत्वात्करणग्रहणेन गृह्यंते तेषां कार्यकरणानां कर्तृत्वमुत्पादकत्वं यत्तत्कार्यकरणकर्तृत्वं तस्मिन्कार्यकरणकर्तृत्वे हेतुः कारणमारंभकत्वेन प्रकृतिरुच्यते। एवं कार्यकरणकर्तृत्वेन संसारस्यका

कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते॥

रणं प्रकृतिः कार्यकारणकर्तृत्व इत्यस्मिन्नपि पाठे कार्यं यत्तस्य परिणामस्तत्तस्य कार्यं विकारो विकारि कारणं तयोर्विकारविकारिणोः कार्यकारणयोः कर्तृत्व इति तान्येव कार्यकारणान्युच्यंते। अथवा षोडश विकाराः कार्यं सप्त प्रकृतिविकृतयः कारणं तेषां कर्तृत्वे हेतुः प्रकृतिरुच्यते आरंभकत्वेनैव। पुरुषश्च संसारस्य कारणं यथा स्यात्तदुच्य॥॥

कृतिकार्यत्वं तत्राह। गुणाश्चेति। उक्तरीत्या निष्पन्नमर्थमाह। एवमिति। पाठांतरमनूद्य व्याख्यानपूर्वकमर्थाभेदमाह॥ कार्येत्यादिना। व्याख्यांतरमाह। अथेति। एकादशेंद्रियाणि पंचविषया इति षोडशसंख्याको विकारोऽत्र कार्यशब्दार्थः। महानहंकारो भूततन्मात्राणीति प्रकृतिविकृतयः सप्त कारणं तेषामारंभकत्वेन कर्तृत्वे न हेतुराश्रयो मूलप्रकृतिरित्यर्थः॥

उत्तरार्द्धस्य तात्पर्यमाह पुरुषश्चेति॥ तस्य परमात्मत्वं व्यावर्त्तयति॥ जीव इति॥ तस्य प्राणधारणनिमित्तस्य तदर्थं चेतनत्वमाह
क्षेत्रज्ञ इति॥ तस्यानोपाधिकत्वं वारयति॥ भोक्तेति तयोः संसारकारणत्वमुपपादयितुं शंकयति॥ कथमिति॥ अन्वयव्यतिरेका
भ्यां तयोस्तथात्वमित्याह॥ अत्रेति॥ तत्र व्यतिरेकं दर्शयति॥ कार्येति॥ नहि नित्यमुक्तस्यात्मनः स्वतः संसारोस्तीत्यर्थः॥ इदानी

पुरुषो जीवः क्षेत्रज्ञः भोक्ता सुखदुःखानां भोग्यानां भोक्तृत्वे उपलब्धृत्वे हेतुरुच्यते॥ कथं पुनरनेन कार्य
कारणकर्तृत्वेन सुखदुःखभोक्तृत्वेन च प्रकृतिपुरुषयोः संसारस्य कारणत्वमुच्यते इति अत्रोच्यते कार्य
कारणसुखदुःखरूपेण हेतुफलात्मना प्रकृतेः परिणामाभावे पुरुषस्य च चेतनस्यासति तदुपलब्धृत्वे
कुतः संसारः स्यात् यदा पुनः कार्यकारणरूपेण हेतुफलात्मना परिणतया प्रकृत्या भोग्यया पुरुषस्य त

पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते॥२०॥

द्विपरीतस्य भोक्तृत्वेनाविद्यारूपः संयोगः स्यात्तदा संसारः स्यादित्यतो यत्प्रकृतिपुरुषयोः कार्यकारण
कर्तृत्वेन सुखदुःखभोक्तृत्वेन च संसारकारणत्वमुक्तं तत्र युक्तमुक्तं कः पुनरयं संसारो नाम सुखदुः
खसंभोगः संसारः पुरुषस्य च सुखदुःखानां भोक्तृत्वं संसारित्वमिति॥२०॥ श्रीरामचंद्राय नमो नमः॥

मन्वयमाह॥ यदेति॥ अन्वयादिफलमुपसंहरति॥ इत्यत इति॥ आत्मनोऽविक्रियस्य संसरणं नोचितमित्याक्षिपति॥ कः पुन
रिति॥ सुखदुःखान्यतरसाक्षात्कारो भोगः स चाक्रियस्यैव द्रष्टुः संसारस्तथाविधं भोक्तृत्वमस्य संसारित्वमित्युत्तरमाह
सुखेति श्लोकव्याख्यासमाप्ताविति शब्दः॥२०॥ श्रीरामायनमः॥ श्रीकृष्णायनमः॥ श्रीसीतारामचंद्रजिप्रसंन्नोमस्तु॥ श्रीः॥ ॥

श्लोकांतरं प्रश्नोत्तरत्वेनावतारयति। यदिति। निमित्तं वक्तुमादौ संसारित्वमस्याविद्यैकाध्यासादित्याह। पुरुषइति। यस्मात् प्रकृति
मात्मत्वेनगतस्तस्माद्भुंक्त इतियोजना। गुणविषयभोगमभिनयति। सुखीति। अविद्यायाभोगहेतुत्वात् किंकारणमन्वेषणाये

यत्पुरुषस्य सुखदुःखानां भोक्तृत्वं संसारित्वं इत्युक्तं तस्य तत् किं निमित्तमित्युच्यते। पुरुषो भोक्ता प्रकृ
तिस्थः प्रकृतौ कार्यकारणरूपेण परिणतायां स्थितः प्रकृतिस्थः प्रकृतिमात्मत्वेनगत इत्येतत् हिय
स्मात्तस्माद्भुंक्ते उपलभत इत्यर्थः प्रकृतिजान्प्रकृतितो जातान्सुखदुःखमोहाकाराभिव्यक्तान् गुणा
न्सुखी दुःखी मूढः पंडितो हमित्येवं सत्यामप्यविद्यायां सुखदुःखमोहेषु गुणेषु भुज्यमानेषु यः सं

पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान्॥

ग आत्मभावः स प्रधानं कारणं संसारस्य जन्मनः स यथा कामो भवति तत्क्रतुर्भवतीत्यादिश्रुतेः
तदेतदाह कारणं हेतुर्गुणसंगः गुणेषु संगोस्य पुरुषस्य भोक्तुः सदसद्योनिजन्मसु सत्सश्चासत्य
श्चयोनयः सदसद्योनयस्तासु सदसद्योनिषु जन्मानि सदसद्योनिजन्मानि तेषु सदसद्योनिज
न्मसु विषयभूतेषु कारणं गुणसंगः॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥ श्रीरामायनमः॥

त्याशंक्याह। सत्यामपीति। संगस्य जन्मादौ संसारे प्रधानहेतुत्वे मोह। यथेति। उक्तेर्थे द्वितीयार्द्धमवतार्यव्याचष्टे। तदे

नमा१

तत्त्वदि॥

साध्याहारं योजनांतरमाह॥ अथवेति॥ सदसद्योनीविविच्य व्याचष्टे॥ सदसद्योनय इति यो निद्वय निर्देशान्मध्यवर्तिन्यो मनुष्ययो
नयोपिध्वनितादृत्याह॥ सामर्थ्यादिति॥ संगस्य संसारकारणत्वेनाविद्यायास्तत्कारणत्वमेकस्मादेव हेतोस्तदुपपत्तेरित्या
शंक्याह॥ एतदिति॥ अविद्योपादानं संगो निमित्तमित्युभयोरपि कारणत्वसिद्धिरित्यर्थः॥ द्विविधहेतूक्तेर्विवक्षितं फलमाह॥

अथवा सदसद्योनिजन्मसु अस्य संसारस्य कारणं गुणसंग इति संसारपदमध्याहार्यं सदसद्योनयः सद्योनयो दे
वादियोनयः असद्योनयः पश्वादियोनयः सामर्थ्यात्सदसद्योनयो मनुष्ययोनयोवरुद्धा द्रष्टव्या एतदुक्तं भवति
प्रकृतिस्थत्वाख्याविद्या गुणेषु च संगः संसारस्य कारणमिति तत्परिवर्जनाय उच्यते॥२१॥ अस्य च निवृत्तिकार

कारणं गुणसंगोस्य सदसद्योनिजन्मसु॥२१॥ श्रीः॥

णं ज्ञानवैराग्ये ससंन्यासे गीताशास्त्रे प्रसिद्धं तत्त्वज्ञानं पुरस्तादुपन्यस्तं क्षेत्रक्षेत्रज्ञविषयं यत् ज्ञात्वामृतमश्नु
त इत्युक्तं चान्यापोहेनातद्धर्माध्यारोपणेन च॥ ॥

तत्त्वेति॥ २१॥ ससंगस्याज्ञानस्य स्वतोऽनिवृत्तेस्तन्निवर्तकं वाच्यमित्याशंक्याह॥ अस्येति॥ वैराग्ये सति संन्यासस्तत्पूर्वकं ज्ञानं ससंगा
ज्ञाननिवर्तकमित्यर्थः॥ उक्ते ज्ञाने मानमाह॥ गीतेति॥ अध्यायादौ चोक्तं ज्ञानमुदाहृतमित्याह॥ तत्त्वेति॥ तदेव ज्ञानं यत् ज्ञात्वेत्या
दिना न सत्तन्नासदित्यंतेनान्यनिषेधेन सर्वतःपाणिपादमित्यादिना चातद्धर्माध्यासेनोक्तमित्याह॥ यत् ज्ञात्वेति॥ ॥ ॥

प्रकृतस्यैवमुक्तिहेतोर्ज्ञानस्य साक्षान्निर्देशाय्योत्तरश्लोकमुत्थापयति ॥ तस्येति ॥ कार्यकारणानां व्यापारवतां समीपे स्थितः
सन्निधिमात्रेण तेषां साक्षी त्येवमर्थत्वेनोपद्रष्टेति पदं व्याचष्टे समीपस्थ इति ॥ लौकिकस्येव द्रष्टुरस्यापि स्वव्यापारावि
ष्टतया निःक्रियत्वविरोधमाशंक्याह स्वयमिति ॥ स्वव्यापारादृते सन्निधेरेव द्रष्टृत्वं दृष्टांतेन स्पष्टयति ॥ यथेति ॥ उ
पद्रष्टेत्यस्यार्थांतरमाह ॥ अथवेति ॥ बहूनां द्रष्टृत्वेपि कस्योपद्रष्टृत्वं तत्राह ॥ तेषामिति ॥ उपोपसर्गस्य सामीप्यार्थ

तस्यैव पुनः साक्षान्निर्देशः क्रियते ॥ उपद्रष्टा समीपस्थः सन् द्रष्टा स्वयमव्यापृतो यथा ऋत्विग्यजमानेषु यज्ञक
र्मव्यापृतेषु तटस्थोन्योऽव्यापृतो यज्ञविद्याकुशल ऋत्विग्यजमानव्यापारे गुणदोषाणामीक्षिता तद्वत्कार्यकार
णव्यापारेष्वव्यापृतोन्यो विलक्षणस्तेषां कार्यकारणानां सव्यापाराणां सामीप्येन द्रष्टोपद्रष्टा ॥ अथवा देहचक्षु

उपद्रष्टानुमंता च भर्त्ता भोक्ता महेश्वरः ॥

र्मनोबुद्ध्यात्मानो द्रष्टारस्तेषां बाह्यो द्रष्टा देहस्ततः आरभ्यांतरतमश्च प्रत्यक् समीप आत्मा द्रष्टा उपद्रष्टा यतः
परोंतरो नास्ति द्रष्टा सोतिशयसामीप्येन द्रष्टृत्वादुपद्रष्टा स्यात् यज्ञोपद्रष्टृवद्वा सर्वविषयीकरणादुपद्रष्टा ॥

त्वेन प्रत्यगर्थत्वात् तत्रैव सामीप्यावसानात् प्रत्यगात्मा च द्रष्टा चेत्युपद्रष्टा सर्वसाक्षी प्रत्यगात्मेत्यर्थः ॥ उक्तमेव व्यनक्ति
यत इति ॥ यथा यजमानस्य ऋत्विगँ्च यज्ञकर्मणि गुणं दोषं वा सर्वयज्ञाभिज्ञः सन्नुपद्रष्टा विषयीकरोति तथायमात्मा
चिन्मात्रस्वभावः सर्वगोचरयतीत्युपद्रष्टेति पक्षांतरमाह ॥ यत्तेति ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीरामाय ॥

श्री

अनुमंता चेत्येतद्व्याकरोत्यनुमंतेति ॥ ये स्वयं कुर्वतो व्यापारवंतो भवंति तेषु कुर्वत्सु सत्सु यास्तेषां क्रियास्तासु पार्श्वस्थस्य परितो
षोनुमननं तच्चानुमोदनं तस्य सन्निधिमात्रेण कर्त्ता यः सोनुमंतेत्यर्थः व्याख्यांतरमाह ॥ अथवेति ॥ तदेव स्पष्टयति ॥ कार्येति ॥
अर्थांतरमाह ॥ अथवेत्यादिना भर्त्तेति पदमादाय किं भरणं नामेति पृच्छति ॥ भर्त्तेति ॥ तद्रूपं निरूपयन्नात्मनो भर्तृत्वं सा

अनुमंतानुमोदनमनुमननं कुर्वत्सु तत्तत्क्रियासु परितोषस्तत्कर्त्तानुमंता च ॥ अथवा अनुमंता
कार्यकारणप्रवृत्तिषु स्वयमप्रवृत्तोपि प्रवृत्त इव तदनुकूलो विभाव्यते तेनानुमंताऽथवा प्रवृत्तान्स्व
व्यापारेषु तत्साक्षिभूतः कदाचिदपि न निवारयतीत्यनुमंता भर्त्ता भरणं नाम देहेंद्रियमनोबुद्धीनां सं
हतानां चैतन्यात्मपरार्थत्वेन पारार्थ्येन निमित्तभूतेन चैतन्यात्मना चैतन्याभासानां यत्स्वरूपावधा
रणं तच्चैतन्यात्मकृतमेवेति भर्त्तात्मोच्यते भोक्ताग्न्युष्णवन्नित्यचैतन्यस्वरूपेण बुद्धेः सुखदुःख
मोहात्मकाः प्रत्ययाः सर्वे विषयविषयाश्चैतन्यात्मग्रस्ता इव जायमाना अविभक्ता विभाव्यंते
इति भोक्तात्मोच्यते महेश्वरः सर्वात्मत्वात्स्वतंत्रत्वाच्च महानीश्वरश्चेति महेश्वरः ॥ ॥ श्रीः ॥ ॥

धयति ॥ देहेति ॥ भोक्तेत्युक्ते क्रियावत्वेप्राप्ते भोगश्चिद्वसानतेति न्यायेन विभजते ऽग्नीति विशेषणांतरमादाय व्या
चष्टे महेश्वर इति ॥ श्रीरामचंद्राय नमः ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीरामकृष्णाय नमः ॥ श्रीकृष्णाय नमः ॥ ॥

परमात्मत्वमुपपादयति ॥ देहादीति ॥ अविद्ययाविकल्पितानामिति संबंधः परमत्वं प्रकृष्टत्वं सपूर्वोक्तविशेषणवानिति यावत् ॥ प
रमात्मशब्दस्य प्रकृतात्मविषयत्वे श्रुतिमनुकूलयति ॥ अंतरिति ॥ तस्य ताटस्थ्यं प्रश्नद्वारा प्रत्याचष्टे ॥ क्वेति ॥ कस्मात्परत्वं तदाह

परमात्मा देहादिबुद्ध्यंतानां प्रत्यगात्मत्वेन कल्पितानामविद्यया परम उपद्रष्टृत्वादिलक्षण आत्मेति परमात्मा सों
तः परमात्मेत्यनेन शब्देन चाप्युक्तः कथितः श्रुतौ क्वासौ अस्मिन्देहे पुरुषः परोऽव्यक्तादुत्तमः पुरुषस्त्वन्यः प

परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥ २२ ॥

रमात्मेत्युदाहृत इति यो वक्ष्यमाणः क्षेत्रज्ञं चापि मां विद्धीत्युपन्यस्तो व्याख्यायोपसंहृतश्च ॥ २२ ॥ श्रीरामः ॥

अव्यक्तादिति ॥ तत्रैव वाक्यमाह ॥ उत्तम इति ॥ सोऽस्मिन्देहे परः पुरुष इति संबंधः शोधितार्थयोरैक्यज्ञानं प्रागुक्तं फलोत्पयात्मेति ॥

क्षेत्रज्ञं चापि ॥ २२ ॥

यथोक्तेन प्रकारेण जीवेश्वरादिसर्वकल्पनाधिष्ठानत्वेनेत्यर्थः साक्षादपरोक्षत्वेनेति यावत् ॥ यथोक्तामनाद्यनिर्वाच्यां सर्वा
नर्थोपाधिभूतामित्यर्थः विद्यया प्रागुक्तैकत्वगोचरया प्रकृतिमविद्यारूपां सकार्यामभावमापादितां यो वेत्तीति संबंधः स
र्वप्रकारेण विहितेन निषिद्धेन वेत्यर्थः पुनर्नकारोन्वयार्थः निपातसूचितं न्यायमाह ॥ अपीति ॥ न स भूयोऽभिजायत इत्यु
क्तमाक्षिपति ॥ नन्विति ॥ ज्ञानोत्पत्त्यनंतरं जन्माभावस्योक्तत्वात् पुनर्देहारंभमुपेत्य नाक्षेपः स्यादित्याशंक्याह ॥ यद्यपीति

तमेतं यथोक्तलक्षणमात्मानं ॥ य एवं यथोक्तप्रकारेण वेत्ति पुरुषं साक्षादात्मभावेनायमहमिति प्रकृतिं च यथो
क्तामविद्यालक्षणां गुणैः स्वविकारैः सह निवर्तितामभावमापादितां विद्यया सर्वथा सर्वप्रकारेण वर्तमानोपि भू
यः पुनः पतितेस्मिन्विद्वच्छरीरे देहांतराय नाभिजायते नोत्पद्यते देहांतरं न गृह्णातीत्यर्थः ॥ अपिशब्दात्किमुवक्त

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ॥ सर्वथा वर्तमानोपि न स भूयोऽभिजायते ॥ २३ ॥

व्यं स्ववृत्तस्थो न जायत इत्यभिप्रायः ननु यद्यपि ज्ञानोत्पत्त्यनंतरं पुनर्जन्माभावः उक्तस्तथापि प्राक् ज्ञानोत्पत्तेः कृतानां
कर्मणामुत्तरकालभाविनां च यानि चातिक्रांतानेकजन्मकृतानि तेषां च फलमदत्त्वा नाशो न युक्त इति स्युस्त्रीणि जन्मानि निक्र

न विप्रनाशो हि न युक्त इति ॥ ॥

तथापि स्युस्त्रीणि जन्मानीति संबंधः वर्तमाने देहे ज्ञानात्पूर्वोत्तरकालानां कर्मणां फलमदत्त्वा ॥
नाशायोगाज्जन्मद्वयमावश्यकमतीतानेकदेहेष्वपि कृतकर्मणां नाभुक्तं क्षीयते कर्मेति स्मृतेरदत्वा फलमनाशादस्तितृतीयं
जन्मेत्याह ॥ प्रागिति ॥ फलदानं विनापि कर्मनाशे दोषमाह ॥ कृतेति ॥ न युक्त इति कृत्वा फलमदत्वा कर्मनाशो नेति संबंधः ॥ ॥

विमतानिकर्माणि फलमदत्वा न क्षीयंते वैदिककर्मत्वादारब्धकर्मवदिति मत्वाह॥ यथेति॥ नाशो न ज्ञानादिति शेषः॥ नन्वनारब्ध
कर्मणां ज्ञानान्नाशो युक्तोऽप्रवृत्तफलत्वादारब्धकर्मणां तु प्रवृत्तफलत्वेन बलवत्वान्न ज्ञानान्निवृत्तिर्न्नैत्याह॥ नचेति॥ अज्ञा
नोत्थत्वेन ज्ञानविरोधित्वाविशेषात् प्रवृत्ताप्रवृत्तफलत्वमनुपयुक्तमिति भावः कर्मणां फलमदत्वा नाशाभावे फलितमाह॥
तस्मादिति॥ ननु कर्मणां वहुत्वात् तत्फलेषु जन्मसु कुतस्त्रित्वमारंभकर्मणां त्रिः प्रकारत्वादिति चेन्नानारब्धत्वेनैकप्रकारक
त्वसंभवात्तत्राह॥ संहतानीति॥ नास्ति ज्ञानस्यैकांतिकफलत्वमिति शेषः उक्तकर्मणां जन्मानारंभकत्वे प्रागुक्तं दोषमनुभा

यथा फले प्रवृत्तानामारब्धजन्मनां कर्मणां नवकर्मणां विशेषो वगम्यते तस्मात् त्रिः प्रकाराण्यपि कर्माणि त्री
णि जन्मान्यारभेरन् संहतानि वा सर्वाण्येकं जन्मारभेरन् अन्यथा कृतविप्रनाशो सति सर्वत्रानाश्वास प्रसंगः शा
स्त्रानर्थक्यं चस्यादित्यतइदम युक्तमुक्तं नस भूयो भिजायत इति न क्षीयंते चास्य कर्माणि ब्रह्मवेद ब्रह्मैव भवति
तस्य तावदेव चिरामिषी कातूलवत्सर्वाणि कर्माणि प्रदूयंते इत्यादिश्रुतिशतेभ्य उक्तो विदुषः सर्वकर्मदाह इहा
पि चोक्तो यथैधांसीत्यादिना सर्वकर्मदाहो वक्ष्यति चोपपत्तेश्च॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥ ॥

ष्यतस्यातिप्रसंजकत्वमाह॥ अन्यथेति॥ सर्वत्रेत्यारब्धकर्मस्वपीति यावत्॥ फलजनकत्वानिश्चयोऽनाश्वासः कर्म
णां जन्मानारंभकत्वे कर्मकांडानर्थक्यं दोषांतरमाह॥ शास्त्रेति॥ अनारब्धकर्मणां सत्यपि ज्ञाने जन्मारंभकत्वध्रौव्ये फ
लितमाह॥ इत्यत इति॥ श्रुत्यवष्टंभेन परीहरति॥ नेत्यादिना॥ ज्ञानादनारब्धकर्मदाहे भगवतोपि संमतिमाह॥ इहापीति॥
ज्ञानाधीनसर्वकर्मदाहे सर्वधर्मान्परित्यज्येत्यादिवाक्यशेषोपि प्रमाणीभवतीत्याह॥ वक्ष्यति चेति॥ ज्ञानादनारब्धाशेषक
र्मक्षये युक्तिरपि वक्तुं शक्येत्याह॥ उपपत्तेश्चेति॥ श्रीसीतारामचंद्रायनमः॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥ ॥

तामेवविवृणोति॥ अविद्येति॥ अज्ञस्याविद्यास्मितारागद्वेषाभिनिवेशाख्यक्लेशात्मकानिसर्वानर्थवीजानितानिनिमित्ती कृत्ययानिधर्माधर्मकर्माणितानिजन्मारंभकाणियानितुविदुषोविद्यादग्धक्लेशबीजस्यप्रतिभासमात्रशरीराणिकर्माणिनतानिशरीरारंभकाणिदग्धपटवदर्थक्रियासामर्थ्याभावादित्यर्थः प्रतीतिमात्रदेहानांकर्माभासानांनफलारंभकत्वेत्यस्मिन्नर्थेभगवतोपिसंमतिमाह॥ इहापीति॥ तत्त्वज्ञानादूर्द्ध्वप्रातीतिकक्लेशानांकर्मद्वारादेहानारंभकत्वेवाक्यांतरमपि

विद्याकामक्लेशबीजनिमित्तानिहिकर्माणिफलारंभकानिजन्मांतरांकुरमारभंते॥ इहापि चसाहंकाराभिसंबंधानिकर्माणिफलारंभकाणिनेतराणीति तत्रतत्रभगवतोक्तं बीजान्यग्न्युपदग्धानिनरोहंति यथापुनः॥ ज्ञानदग्धैस्तथाक्लेशैर्नात्मासंपद्यतेपुनरितिचा अकृतावत् ज्ञानोत्पत्त्युत्तरकालकृतानांकर्मणांज्ञानेनदाहोज्ञानसहभावित्वान्नतुतिर्हिजन्मनिज्ञानोत्पत्तेः प्राक्कृतानांअतीतानेकजन्मांतरकृतानांचदाहोयुक्तः नसर्वकर्माणीतिविशेषणात्तुज्ञानोत्तरकालभाविनामेवसर्वकर्मणामितिचेन्नसंकोचेकारणानुपपत्तेः॥ श्रीरामायनमः॥

प्रमाणयति॥ बीजानीति॥ ज्ञानानंतरभाविकर्मणांज्ञानेनदाहमंगीकरोति॥ अस्त्विति॥ विरोधिग्रस्तानामेवोत्पत्तेरिति हेतुमाह॥ ज्ञानेति॥ अस्मिन्जन्मनिजन्मांतरेवाज्ञानात्पूर्वभाविकर्मणांनततोदाहोविरोधिनंविनाप्रवृत्तेरित्याह॥ नत्विति श्रुतिस्मृतिविरोधान्नैवमितिपरिहरति॥ नेत्यादिना॥ सर्वशब्दश्रुतेःसंकोचंशंकते॥ ज्ञानेति॥ प्रकरणादिसंकोचकाभावान्नैवमित्याह॥ नेति॥ ॥ श्रीः॥

आक्षेपदशायामुक्तमनुमानमनुवदति। यत्त्विति। आभासत्वादिदमसाधकमिति दूषयति। तदसदिति। व्याप्त्यादिमत्त्वे कथमा
भासत्वमिति पृच्छति। कथमिति। प्रवृत्तफलत्वोपाधिनाहेतोर्व्याप्तिभंगादाभासत्वधीरित्याह। तेषामिति। तदेव प्रपंचयति
यथेत्यादिना। धनुषः सकाशादिषुर्मुक्तो बलवत्प्रतिबंधकाभावे मध्ये न पतति। तथा प्रबलं प्रतिबंधकं विना प्रवृत्तफलानां
कर्मणां भोगादृते न क्षयो न च तत्त्वज्ञानं तादृक्प्रतिबंधकमुत्पत्तावेव पूर्वप्रवृत्तेन कर्मणा प्रतिबद्धशक्तित्वादित्यर्थः। यत्त्वज्ञाने

यत्तूक्तं यथा वर्त्तमानशरीरजन्मारंभकाणि कर्माणि न क्षीयंते फलदानाय प्रवृत्तान्येव सत्यपि ज्ञाने तथा अनारब्धफ
लानामपि कर्मणां क्षयो न युक्त इति तदसत्। कथं तेषां मुक्तेषुवत्प्रवृत्तफलत्वात् यथा पूर्वं लक्ष्यवेधाय मुक्त इषुर्धनुषो ल
क्ष्यवेधोत्तरकालमप्यारब्धवेगक्षयात्पतनेनैव निवर्त्तते एवं शरीरारंभकं कर्म शरीरस्थितिप्रयोजने निवृत्ते प्यासंस्का
रवेगक्षयात्पूर्ववत् वर्त्तत एव यथा स एवेषुः प्रवृत्तिनिमित्तानारब्धवेगस्त्वमुक्तो धनुषि प्रयुक्तोऽप्युपसंह्रियते तथा
नारब्धफलानि कर्माणि स्वाश्रयस्थान्येव ज्ञानेन निर्बीजीक्रियंते। पतितेऽस्मिन्विद्वच्छरीरे न स भूयोऽभिजायत इति यु
क्तमेवोक्तमिति सिद्धं भवति ॥२३॥ श्रीरामकृष्णाय नमः। श्रीरामचंद्राय नमः॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥

नादाह्यत्वं तत्र प्रवृत्तफलत्वमित्यन्वयेपि यत्राप्रवृत्तफलत्वं तत्र ज्ञानदाह्यत्वमिति न व्यतिरेकसिद्धिरित्याशंक्याह। स एवेति
प्रवृत्तौ निमित्तभूतोऽनारब्धो वेगोऽनेनेति विग्रहः स्वाश्रयस्थानि साभासांतःकरणनिष्ठानीति यावत् विमतानि तत्त्वधीनि
मित्तनिवृत्तीनि तत्कृतकारणनिवृत्तत्वात् रज्जुसर्पादिवदिति व्यतिरेकसिद्धिरिति भावः॥ विदुषो वर्त्तमानदेहपाते देहांतरे हेत्व
भावात्तत्त्वधीरैकांतिकफलेत्युपसंहरति। पतित इति॥२३॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥ श्रीरामकृष्णाय नमो नमः॥ ॥

पु

ज्ञेयं यत्तदित्यादिना तत्पदार्थस्त्वंपदार्थश्चानंतरमेव शोधितौ तयोरैक्यं च क्षेत्रज्ञं चापि मां विद्धीत्युक्तमिदानीं तद्दृष्टिहेतून्यथाधिकारं कथयति ॥ अत्रेति ॥ ध्यानाख्यं साधनं किंरूपमिति पृच्छति ॥ ध्यानं नामेति ॥ तत्तद्रूपं वदन्नुत्तरमाह ॥ शब्दादिभ्य इति ॥ एकाग्रतयोपसंहृत्येति संबंधः ॥ यच्चिंतनं प्रत्यक्चेतयितरीति पूर्वेणान्वयः ॥ किं तच्चिंतनमित्युक्ते दृष्टांतद्वारा स्फुटयन्प्रपंचयति ॥ तथेति ॥ विवक्षितध्यानानुरोधेनेति यावत् ॥ आत्मानं पश्यंति परमात्मतयेति शेषः ॥ केचिदुत्तमाधिकारिणो गृह्यंते ॥ मध्यमान

अत्रात्मदर्शन उपायविकल्पा इमे ध्यानादय उच्यंते ॥ ध्यानेन ध्यानं नाम शब्दादिभ्यो विषयेभ्यः श्रोत्रादीनि करणानि मनस्युपसंहृत्य मनश्च प्रत्यक्चेतयितर्येकाग्रतया यच्चिंतनं तद्ध्यानं तथा ध्यायतीव बकः ध्यायतीव पृथिवी ध्यायंतीव पर्वता इत्युपमोपादानात्तैलधारावत्संततोऽविच्छिन्नप्रत्ययो ध्यानं तेन ध्यानेनात्मनि बुद्धौ पश्यंत्यात्मानं प्रत्यक्चेत

ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना ॥ अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥२४॥

नमात्मना ध्यानसंस्कृतेनांतःकरणेन केचिद्योगिनः ॥ अन्ये सांख्येन योगेन सांख्यं नाम इमे सत्त्वरजस्तमांसि गुणा मया दृश्या अहं तेभ्योन्यस्तद्व्यापारसाक्षिभूतो नित्यो गुणविलक्षण आत्मेति चिंतनमेष सांख्यो योगस्तेन पश्यंत्यात्मानमात्मनीति वर्तते ॥ कर्मयोगेन कर्मैव योग ईश्वरार्पणबुद्ध्यानुष्ठीयमानं घटनरूपं योगार्थत्वात् योग उच्यते गुणतस्तेन सत्त्वशुद्धिज्ञा

धिकारिणो निर्दिशत्यन्य इति ॥ सांख्यशब्दितसाधनं किं नामेत्युक्ते विचारजन्यं ज्ञानं तदेव ज्ञानहेतुतया योगतुल्यत्वात् योगशब्दितमित्याह ॥ सांख्य इति ॥ अधमानधिकारिणो संगिरते ॥ कर्मेति ॥ चित्तैकाग्र्यं योगस्तादर्थ्यं कर्मणः शुद्धिहेतोरस्ति तेन गौण्या वृत्त्या योगशब्दितं कर्मेत्याह ॥ गुणत इति ॥ अपरे पश्यंत्यात्मानमात्मनेति पूर्ववदनुषंगमंगीकृत्याह ॥ तेनेति ॥ २४ ॥ श्रीरामचंद्रायनमः ॥

अधमतमाधिकारिणं मोक्षमार्गप्रवृत्तिं प्रतिलंभयति ॥ अन्ये त्विति ॥ आचार्याधीनां श्रुतिमेवाभिनयति ॥ इदमेवेति ॥ उपास
नमेव विवृणोति ॥ श्रद्दधाना इति ॥ परोपदेशमात्रवृत्तानामपि प्रवृत्तेः साफल्यमाह ॥ तेपीति ॥ तेषां मुख्याधिकारित्वं व्यावर्त्तय

अन्ये तेषु विकल्पेष्वन्यतमेनाप्येवं यथोक्तमात्मानमजानंतोऽन्येभ्य आचार्येभ्यः श्रुत्वा इदमेव चिंतयते
त्युक्ता उपासते श्रद्दधानाः संतश्चिंतयंति ते पि चातितरंत्येवातिक्रामंत्येव मृत्युयुक्तं संसारमित्येतत् श्रुति

अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते ॥ तेपि चातितरंत्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥

परायणाः श्रुतिः श्रवणं परमयनं मोक्षमार्गप्रवृत्तौ परं साधनं येषां ते श्रुतिपरायणाः केवलपरोपदेशज्ञानप्र
माणाः स्वयं विवेकरहिता इत्यर्थः ॥ किमुवक्तव्यं प्रमाणं प्रति स्वतंत्रा विवेकिनो मृत्युं अतितरंतीत्यभिप्रायः ॥ २५ ॥

ति ॥ श्रुतीति ॥ तेपीत्यपिना सूचितमर्थमाह ॥ किंत्विति ॥ २५ ॥ श्रीरामचंद्राय नमः ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ ॥

ऐक्यधीर्मुक्तिहेतुरिति प्रागुक्तमनूद्य प्रश्नपूर्वकं जिज्ञासितहेतुपरत्वेन श्लोकमवतारयति ॥ अत्रक्षेत्रज्ञेति ॥ सर्वस्य प्राणिजातस्य क्षेत्रक्षेत्रज्ञसंबंधाधीना यस्मादुत्पत्तिस्तस्मात् क्षेत्रज्ञात्मक परमात्मातिरेकेण प्राणिनिकायस्याभावादैक्यज्ञानादेव मुक्तिरित्याह ॥ कस्मादिति ॥ क्षेत्रक्षेत्रज्ञसंबंधमुक्तमाक्षिपति कः पुनरिति ॥ क्षेत्रज्ञस्य क्षेत्रेण संबंधः संयोगो वा समवायो वेति विकल्प्या

अत्रक्षेत्रज्ञं चापि मां विद्धीति क्षेत्रज्ञेश्वरैकत्वविषयं ज्ञानं मोक्षसाधनं यत् ज्ञात्वामृतमश्नुत इत्युक्तं तत् कस्माद्धेतो रिति तद्धेतुप्रदर्शनार्थः श्लोक आरभ्यते ॥ यावत् किंचित्सं जायते समुत्पद्यते सत्त्वं वस्तु किमविशेषेणेत्याह स्थावरजंगमं स्थावरं च जंगमं च निर्विशेषेण क्षेत्रक्षेत्रज्ञसंयोगात्तत् स्थावरजंगमं च जायत एवं विद्धि जानीहि हे भरतर्षभ ॥ कः पुन

यावत्संजायते किंचित् सत्त्वं स्थावरजंगमं ॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥२६॥ श्रीः ॥

रयं क्षेत्रक्षेत्रज्ञयोः संयोगोऽभिप्रेतो न तावत् रज्ज्वेव घटस्यावयवसंश्लेषद्वारकः संबंधविशेषः संयोगः क्षेत्रेण क्षेत्रज्ञस्य संभवति ॥ आकाशवन्निरवयवत्वान्नापि समवायलक्षणः तंतुपटयोरिव क्षेत्रक्षेत्रज्ञयोरितरेतरकार्यकारणभावानभ्युपगमादिति ॥ उच्यते क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणोर्भिन्नस्वभावयोरितरेतरधर्माध्यासलक्षणः सं

बंधं दूषयति ॥ नतावदिति ॥ द्वितीयं निरस्यति ॥ नापीति ॥ वास्तवसंबंधाभावेऽपि तयोरध्यासरूपः सोऽस्तीति परिहरति ॥ उच्यत इति भिन्नस्वभावत्वे हेतुमाह ॥ विषयेति ॥ इतरेतरत्र क्षेत्रे क्षेत्रज्ञे वा तद्धर्मस्य क्षेत्रानधिकरणस्य क्षेत्रज्ञगतस्य चैतन्यस्य क्षेत्रज्ञानाधारस्य च क्षेत्रनिष्ठस्य जाड्यादेरारोपरूपो योगस्तयोरित्याह ॥ इतरेति ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्री रामाय नमः ॥

तत्र निमित्तमाह क्षेत्रेति । अविवेकादारोपितसंयोगे दृष्टांतमाह रज्ज्विति । उक्तं संबंधं निगमयति सोयमिति । तस्य निवृत्तियोग्यत्वं सूचयति मिथ्येति कथं तर्हि मिथ्याज्ञानस्य निवृत्तिरित्याशंक्याह यथेति योयं विज्ञानमयः प्राणेष्विति त्यादिलं पदार्थविषयं शास्त्रमनुसृत्य विवेकज्ञानमापाद्य महाभूतादिधृत्यंतात् क्षेत्राद् उपद्रष्टृत्वादिलक्षणं प्रागुक्तं क्षेत्रज्ञं मुंजेषीकान्यायेन विविच्य सर्वोपाधिविशेषविनिर्मुक्तं ब्रह्मस्वरूपेण ज्ञेयं योऽनुभवति तस्य मिथ्याज्ञानमपगच्छतीति संबंधः कथमस्य निर्विशेषत्वं क्षेत्रस्य विशेषहेतोः

क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबंधनो रज्जुशुक्तिकादीनां तद्विवेकविज्ञानाभावादध्यारोपितसर्परजतादिसंयोगवत्सोयमध्यासरूपः क्षेत्रक्षेत्रज्ञसंयोगो मिथ्याज्ञानलक्षणो यथाशास्त्रं क्षेत्रक्षेत्रज्ञलक्षणभेदपरिज्ञानपूर्वकं प्राग्दर्शितरूपात् क्षेत्रात् मुंजादिवेषीकां यथोक्तलक्षणं क्षेत्रज्ञं विभज्य न सत्तन्नासदुच्यत इत्यनेन निरस्तसर्वोपाधिविशेषणं ज्ञेयं ब्रह्मस्वरूपेण यः पश्यति क्षेत्रं च मायानिर्मितहस्तिस्वप्नदृष्टवस्तुगंधर्वनगरादिवदसदेव सदिवाभासत इत्येवं निश्चितविज्ञानो यः तस्य यथोक्तसम्यग्दर्शनविरोधादपगच्छति मिथ्याज्ञानं तस्य जन्महेतोरपगमात् य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सहेत्यनेन विद्वान्भूयो नाभिजायत इति यदुक्तं तदुपपन्नमुक्तं ॥ २६ ॥ श्रीरामचंद्राय नमः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ ॥

सत्त्वादित्याशंक्याह ॥ क्षेत्रं चेति ॥ बहुदृष्टांतोक्तेर्बहुविधत्वं क्षेत्रस्य द्योत्यते उक्तज्ञानान्मिथ्याज्ञानापगमे हेतुमाह ॥ यथोक्तेति ॥ तथापि कथं पुरुषार्थसिद्धिः कालांतरे तुल्यजातीयमिथ्याज्ञानोदयसंभवादित्याशंक्याह ॥ तस्येति ॥ सम्यग्ज्ञानादज्ञानतत्कार्यनिवृत्त्या मुक्तिरिति स्थिते फलितमाह ॥ य एवमिति ॥ २६ ॥ श्रीरामकृष्णाय नमः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीकृष्णाय

ऐक्यधीर्मुक्तिहेतुरिति प्रागुक्तमनूद्य प्रश्नपूर्वकं जिज्ञासितहेतुपरत्वेन श्लोकमवतारयति ॥ अत्रक्षेत्रज्ञेति ॥ सर्वस्य प्राणिजातस्य क्षेत्रक्षेत्रज्ञसंबंधाधीना यस्मादुत्पत्तिस्तस्मात् क्षेत्रज्ञात्मकपरमात्मातिरेकेण प्राणिनिकायस्याभावादैक्यज्ञानादेव मुक्तिरित्याह ॥ कस्मादिति ॥ क्षेत्रक्षेत्रज्ञसंबंधमुक्तमाक्षिपति कः पुनरिति ॥ क्षेत्रज्ञस्य क्षेत्रेण संबंधः संयोगो वा समवायो वेति विकल्प्या

अत्र क्षेत्रज्ञं चापि मां विद्धीति क्षेत्रज्ञेश्वरैकत्वविषयं ज्ञानं मोक्षसाधनं यत् ज्ञात्वामृतमश्नुत इत्युक्तं तत् कस्माद्धेतो रितितद्धेतुप्रदर्शनार्थः श्लोक आरभ्यते ॥ यावत्किंचित्संजायते समुत्पद्यते सत्त्वं वस्तु किमविशेषेणेत्याह स्थावरजंगमं स्थावरं च जंगमं च निर्विशेषेण क्षेत्रक्षेत्रज्ञसंयोगात्तत्स्थावरजंगमं च जायत एवं विद्धि जानीहि हे भरतर्षभ ॥ कः पुन

यावत्संजायते किंचित्सत्वं स्थावरजंगमं ॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ २६ ॥ श्रीः ॥

रयं क्षेत्रक्षेत्रज्ञयोः संयोगोभिप्रेतो न तावत् रज्ज्वेव घटस्यावयवसंश्लेषद्वारकः संबंधविशेषः संयोगः क्षेत्रेण क्षेत्रज्ञस्य संभवति ॥ आकाशवन्निरवयवत्वान्नापि समवायलक्षणः तंतुपटयोरिव क्षेत्रक्षेत्रज्ञयोरितरेतरकार्यकारणभावानभ्युपगमादिति ॥ उच्यते क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणोर्भिन्नस्वभावयोरितरेतरधर्माध्यासलक्षणः सं

योगः

घं दूषयति ॥ न तावदिति ॥ द्वितीयं निरस्यति ॥ नापीति ॥ वास्तवसंबंधाभावेपि तयोरध्यासरूपः सोस्तीति परिहरति ॥ उच्यत इति भिन्नस्वभावत्वे हेतुमाह ॥ विषयेति ॥ इतरेतरस्त्र क्षेत्रे क्षेत्रज्ञे वा तद्धर्मस्य क्षेत्रानधिकरणस्य क्षेत्रज्ञगतस्य चैतन्यस्य क्षेत्रज्ञानाधारस्य च क्षेत्रनिष्ठस्य जाड्यादेरारोपरूपो योगस्तयोरित्याह ॥ इतरेति ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामाय नमः ॥

तत्रनिमित्तमाह क्षेत्रेति । अविवेकादारोपितसंयोगेदृष्टांतमाह रज्विति । उक्तंसंबंधंनिगमयति सोयमिति । तस्यनिवृत्तियोग्यत्वंसू
चयति । मिथ्येति कथंतर्हिमिथ्याज्ञानस्यनिवृत्तिरित्याशंक्याह यथेति । योयंविज्ञानमयःप्राणेष्वित्यादित्वंपदार्थविषयंशास्त्र
मनुसृत्यविवेकज्ञानमापाद्यमहाभूतादिधृत्यंतात्क्षेत्रादुपद्रष्टृत्वादिलक्षणंप्रागुक्तंक्षेत्रज्ञंमुंजेषीकान्यायेनविविच्यसर्वोपा
धिविशेषविनिर्मुक्तंब्रह्मस्वरूपेणज्ञेयंयोऽनुभवतितस्यमिथ्याज्ञानमपगच्छतीतिसंबंधःकथमस्यनिर्विशेषत्वंक्षेत्रस्यविशेषहेतोः

क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबंधनोरज्जुशुक्तिकादीनांतद्विवेकविज्ञानाभावादध्यारोपितसर्प्परजता
दिसंयोगवत्सोयमध्यासरूपःक्षेत्रक्षेत्रज्ञसंयोगोमिथ्याज्ञानलक्षणोयथाशास्त्रंक्षेत्रक्षेत्रज्ञलक्षणभेद
परिज्ञानपूर्वकंप्राग्दर्शितरूपात्क्षेत्रात्मुंजादिवेषीकांयथोक्तलक्षणंक्षेत्रज्ञंविभज्यनसत्तन्नासदुच्य
तइत्यनेननिरस्तसर्वोपाधिविशेषणंज्ञेयंब्रह्मस्वरूपेणयःपश्यतिक्षेत्रंचमायानिर्मितहस्तिस्वप्नदृष्टवस्तु
गंधर्वनगरादिवदसदेवसदिवाभासतइत्येवंनिश्चितविज्ञानोयःतस्ययथोक्तसम्यग्दर्शनविरोधादपग
च्छतिमिथ्याज्ञानंतस्यजन्महेतोरपगमात्यएवंवेत्तिपुरुषंप्रकृतिंचगुणैःसहेत्यनेनविद्वान्भूयोनाभि
जायतइतियदुक्तंतदुपपन्नमुक्तं ॥ २६ ॥ श्रीरामचंद्रायनमः ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ ॥

सत्वादित्याशंक्याह ॥ क्षेत्रंचेति ॥ बहुदृष्टांतोक्तेर्बहुविधत्वंक्षेत्रस्यद्योत्यतेउक्तज्ञानान्मिथ्याज्ञानापगमेहेतुमाह ॥ यथोक्तेति ॥ त
थापिकथंपुरुषार्थसिद्धिःकालांतरेतुल्यजातीयमिथ्याज्ञानोदयसंभवादित्याशंक्याह ॥ तस्येति ॥ सम्यग्ज्ञानादज्ञानतत्कार्यनिवृ
त्यामुक्तिरितिस्थितेफलितमाह ॥ यएवमिति ॥ २६ ॥ श्रीरामकृष्णायनमः ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीकृष्णाय

उत्तरग्रंथमवतारयितुं व्यवहितं वृत्तं कीर्त्तयति॥ नेत्यादिना॥ अविद्यानाद्यनिर्वाच्यमज्ञानं मिथ्याज्ञानं तत्संस्कारश्चादिशब्दार्थः॥ व्य
वहितमनूद्याव्यवहितमनुवदति॥ जन्मेति॥ व्यवधानाव्यवधानाभ्यां सर्वानर्थमूलत्वादज्ञानस्य तन्निवर्त्तकं सम्यग्ज्ञानं वक्तव्यमित्या
ह॥ अत इति॥ तस्यासकृदुक्तत्वात्तदुक्त्यर्थो प्रवृत्तिर्व्यर्थेत्याशंक्याति सूक्ष्मार्थस्य शब्दभेदेन पुनःपुनर्वचनमधिकारिभेदानुग्रहा
येति मत्वाह॥ उक्तमपीति॥ सर्वत्र परस्यैकत्वान्नोत्कर्षापकर्षत्वमित्याह॥ सममिति॥ परमत्वमीश्वरत्वं चोपपादयति॥ देहेति॥ आ

नस भूयो भिजायत इति सम्यग्दर्शनफलमविद्यादिसंसारबीजनिवृत्तिद्वारेण जन्माभाव उक्तः जन्मकारणं चाविद्यानिमित्तकः
क्षेत्रक्षेत्रज्ञसंयोग उक्तः॥ अतस्तस्या अविद्यायाः निवर्त्तकं सम्यग्दर्शनमुक्तमपि पुनः शब्दांतरेणोच्यते॥ समं निर्विशेषं ति॥
ष्ठंतं स्थितिं कुर्वंतं क सर्वेषु समस्तेषु ब्रह्मादिषु स्थावरांतेषु प्राणिषु कं परमेश्वरं देहेंद्रियमनोबुद्ध्यव्यक्तात्मनोपेक्ष्य परमश्चा

समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरं॥ विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति॥ २७॥ श्रीकृष्णः॥

सावीश्वर ईशनशील इश्चेति परमेश्वरस्तं सर्वेषु भूतेषु समं तिष्ठंतं तानि विशिनष्टि विनश्यत्स्विति तं च परमेश्वरमविनश्यंतमि
ति भूतानां परमेश्वरस्य चात्यंतवैलक्षण्यप्रदर्शनार्थं कथं सर्वेषां हि भावविकाराणां जनिलक्षणो भावविकारो मूलं जन्मोत्तर
कालभाविनो न्ये सर्वे भावविकारा विनाशांताः
त्मा जीवस्तमित्यादिना न्वयोक्तिः॥ आश्रयनाशादाश्रितस्यापि नाशमाशंक्याह॥ तं चेति॥
अविनश्यंतमिति विशिनष्टीति संबंधः उभयत्र विशेषणद्वयस्य तात्पर्यमाह॥ भूतानामिति॥ नाशनाशाभ्यां वैलक्षण्येपि कथमत्यंतवैलक्षण्यं
सविशेषत्वभिन्नत्वयोस्तुल्यत्वादिति शंकते॥ कथमिति॥ भूतानां सविशेषत्वादिभावेपि परस्य तदभावादत्यंतवैलक्षण्यमिति वक्तुं जन्मनो
भावविकारेष्वाद्यत्वमाह॥ सर्वेषामिति॥ तत्र हेतुमाह॥ जन्मेति॥ न हि जन्मांतरेणेतरे भावविकाराः युज्यंते जन्मवतस्तदुपलंभादित्यर्थः॥ ॥

विनाशानंतरभाविनोपिविकारस्यकस्यचिदुपपत्तेर्नतस्यांतत्वमित्याशंक्याह विनाशादिति तस्यांत्यविकारत्वेसिद्धेफलितमाह अतइ
ति तेषांजन्मादीनांकार्याणिकादाचित्कसत्वानितदधिकरणानितैःसहेतियावत् परमेश्वरस्यभूतेभ्योत्यंतवैलक्षण्यमुपसंहरति
तस्मादिति निर्विशेषत्वंसर्वभावविकाररहितत्वंकूटस्थत्वमेकत्वमद्वितीयत्वं यःपश्यतीत्यादिव्याचष्टे यएवमिति उक्तविशेष

विनाशात्परोनकश्चिदस्तिभावविकारः भावाभावात्सतिहिधर्मिणिधर्माभवंति अतोंत्यभावविका
राभावानुवादेनपूर्वभाविनःसर्वेभावविकाराःप्रतिषिद्धाभवंतिसहकार्यैः तस्मात्सर्वभूतेवैलक्षण्यमत्यंत
मेवपरमेश्वरस्यसिद्धंनिर्विशेषत्वमेकत्वंच यएवंयथोक्तंपरमेश्वरंपश्यतिसपश्यति ननुसर्वोलोकःपश्य
तिसपश्यतीतिकिंविशेषणेनेति सत्यंपश्यतिकिंतुविपरीतंपश्यत्यतोविशिनष्टिसएवपश्यतीतियथाति
मिरदृष्टिरनेकचंद्रंपश्यतितमपेक्ष्यैकचंद्रदर्शीविशिष्यतेसएवपश्यतीतितथैवेहाप्येकमविभक्तंय
थोक्तमात्मानंयःपश्यतिसविभक्तानेकात्मविपरीतदर्शिभ्योविशिष्यतेसएवपश्यतीति इतरेपश्यं
तोपिनपश्यंतिविपरीतदर्शित्वादनेकचंद्रदर्शिवदित्यर्थः ॥ २७ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥

णमीश्वरंपश्यन्नेवपश्यतीत्युक्तमाक्षिपति नन्विति ईश्वरपराङ्मुखस्यानात्मनिष्ठस्यतद्दर्शित्वेपिविपरीतदर्शित्वादीश्वर
प्रवणस्यैवसम्यग्दर्शित्वमितिविवक्षित्वाविशेषणमितिपरिहरति सत्यमिति उक्तमेवदृष्टांतेनविवृणोति यथेत्यादिना यः
पश्यतीत्यादेरर्थमुपसंहरति इतरइति परवस्तुनिष्ठेभ्योव्यतिरिक्ता इत्यर्थः ॥ २७ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥

प्रकृतसम्यग्ज्ञानेन किमित्यपेक्षायां तत्फलोक्त्या तस्यैव स्तुत्या तद्वैतौ पुरुषं प्रवर्त्तयितुं श्लोकांतरमित्याह ॥ यथोक्तस्येति ॥ यस्मा
दित्यस्य ततः शब्देन संबंधः सर्व भूतेषु तुल्यतया स्थितं पूर्वोक्तलक्षणमीश्वरं निर्विशेषं पश्यन्नात्मानमात्मना यस्मान्न हिनस्ति
ततस्तस्मान्मोक्षाख्यां परां गतिं यातीति योजना तत्र पादत्रयेण ज्ञानादज्ञानध्वस्तौ ध्वस्तिरनर्थस्योक्ता ॥ अज्ञानमिथ्याज्ञान

यथोक्तस्य सम्यग्दर्शनस्य फलवचनेन स्तुतिः कर्त्तव्येति श्लोक आरभ्यते ॥ समं पश्यन्नुपलभमानो हि
यस्मात्सर्वत्र सर्वभूतेषु समवस्थितं तुल्यतयावस्थितमीश्वरमतीतानंतरश्लोकोक्तलक्षणमित्यर्थः
समं पश्यन्नू किं न हिनस्ति हिंसां न करोति ॥ आत्मना स्वेनैव स्वमात्मानं ततस्तदहिंसनात् याति परां प्रकृ

समं पश्यन्नूहि सर्वत्र समवस्थितमीश्वरं ॥ श्रीः ॥

ष्टांगतिं मोक्षाख्यां ननु नैवं कश्चित्प्राणी स्वयं स्वमात्मानं हिनस्ति कथमुच्यते अप्राप्तं न हिनस्तीति यथा
न पृथिव्यामग्निश्चेतव्यो नांतरिक्ष इत्यादि ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामायनमः ॥

योरावरणयोर्न्नाशे सर्वोत्कृष्टां गतिं परमपुरुषार्थं परमानंदमनुभवति विद्वानिति चतुर्थपादार्थः ॥ न हिनस्त्यात्मनात्मान
मितियथाश्रुतमादाय चोदयति ॥ नन्विति ॥ न पृथिव्यामिति प्राप्तिद्वारा निषेधवन्नांतरिक्षे न दिवीति प्राप्त्यभावाच्चायं निषेधो
मुख्यो नेष्यते ॥ तथेहापि प्राप्तिं विना निषेधो न युक्तिमानित्याह ॥ यथेति ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामायनमः

अज्ञानामात्मनैवात्महिंसासंभवाद्विदुषां तदभावोक्तिर्युक्तेति समाधत्ते। नैषइति। संग्रहवाक्यं विवृणोति। सर्वो हीति। अना
त्मज्ञो देहादिविषयः अविदुषामारोपितात्महंतृत्वं निगमयति। आत्महेति। तथापि पारमार्थिकस्यात्मनो हननाभावान्न
तेषां सर्वेषामात्महंतृत्वमित्याशंक्याह। यस्त्विति। उक्तरीत्या सर्वेषामविदुषामात्महंतृत्वं सिद्धमित्युपसंहरति। सर्वइति॥ ॥

मा

नैषदोषः। अज्ञानाद्धि आत्मतिरस्करणोपपत्तेः सर्वो ह्यज्ञोत्यंतप्रसिद्धं साक्षादपरोक्षमप्यात्मानं तिरस्कृत्या
नात्मानमात्मत्वेन परिगृह्य तमपि धर्माधर्मौ कृत्वोपात्तमात्मानं हत्वान्यमात्मानमुपादत्ते नवं तं हत्वान्य
मित्येवमुपात्तं उपात्तमात्मानं हंतीत्यात्महा सर्वोज्ञो यस्तु परमार्थात्मासावपि सर्वदाऽविद्यया हत एव

न हिनस्त्यात्मनात्मानं ततो याति परां गतिं ॥२८॥

विद्यमानफलाभावादिति। सर्वेआत्महन एवाविद्वांसो यस्त्वितरो यथोक्तात्मदर्शी स तूभयथाप्यात्म
नात्मानं न हिनस्ति ततो याति परां गतिं यथोक्तं फलं तस्य भवतीत्यर्थः॥२८॥ श्रीकृष्णायनमः॥ ॥

आत्मनैवात्महननमविदुषां दृष्टं तदिह विद्वद्विषये शंकांनिषेद्धुमित्याह। यस्त्वितरइति। उभयथापीत्यारोपानारोपा
भ्यामित्यर्थः॥ ज्ञानादनर्थभ्रमध्वंसे पूर्वोक्तपरमानंदप्राप्त्या परितृप्तत्वं युक्तमित्याह। ततइति॥२८॥ श्रीरामचंद्रायनमः॥

ष्पा

श्लोकांतरं शंकोत्तरत्वेनावतारयितुमुक्तमनुवदति सर्वेति प्रतिदेहं धर्माधर्मादिमत्वेनात्मनो भेदभानात्तत्समत्वदर्शनमितिशं
कते तदिति स्वगुणैः सुखदुःखादिभिः स्वकर्मभिश्च धर्माधर्माख्यैर्वैलक्षण्यात् प्रतिदेहं भेदेतद्विशिष्टे आत्मसु कथं सा॥
म्येनदर्शनमित्येतदाशंकां परिहरति इत्याह एतदिति प्रकृतिशब्दस्य स्वभाववाचित्वं व्यावर्त्तयति प्रकृतिरिति मायाशब्द
स्यसंवित्पर्यायत्वं प्रत्याह त्रिगुणेति उक्तापरस्य शक्तिर्मायेत्यत्रश्रुतिसंमतिमाह मायांत्विति अन्येनकेनचित्क्रियमाणा

सर्वभूतस्थमीश्वरं समं पश्यन्नहिनस्तिआत्मनात्मा नमित्युक्तं तदनुपपन्नं स्वगुणकर्मवैलक्ष
ण्यभेदभिन्नेष्वात्मस्वित्येतदाशंक्याह प्रकृत्या प्रकृतिर्भगवतोमायात्रिगुणात्मिका मायांतुप्रकृ
तिंविद्यादित्यादिमंत्रवर्णात् तयाप्रकृत्यैवचनान्येनमहदादिकार्यकरणाकारपरिणतयाकर्माणिवा

प्रकृत्यैवचकर्माणि क्रियमाणानिसर्वशः॥ यःपश्यतितथात्मानमकर्त्तारंसपश्यति॥२९॥

ङ्मनःकायारभ्याणि क्रियमाणानिनिर्वर्त्यमानानिसर्वशःसर्वप्रकारैर्यःपश्यतिउपलभ्यतेतथात्मा
नंक्षेत्रज्ञमकर्त्तारंसर्वोपाधिविवर्जितंपश्यति सपरमार्थदर्शीत्यभिप्रायः निर्गुणस्याकर्तुर्निर्विशे
षस्याकाशस्येवभेदेप्रमाणानुपपत्तिरित्यर्थः॥२९॥ श्रीसीतारामचंद्रजीप्रसन्नोमस्तु॥श्रीकृष्णः॥

त्रिगुणात्मिकेति २९

ना

निनभवंतिकर्माणीत्येवकारार्थमाह नान्येति किंतदन्यन्निषेध्यमित्युक्ते सांख्याभिप्रेतंप्रधानाख्याप्रकृतिरित्याह॥ म
हदादीति सर्वप्रकारत्वं काम्यनिषिद्धत्वादिनाप्रकारबाहुल्यं आत्मानमुक्तविशेषणंयः पश्यतीति पूर्वेण संबंधः पश्यती
सयुक्तं पुनरुक्तेरित्याशंक्याह परमार्थेति आत्मनां प्रतिदेहं भिन्नत्वे तेषु समदर्शनमयुक्तमित्युक्तस्यकःसमाधिरित्याशंक्या

प्रकृतेर्विकाराणां च सांख्यवत्पुरुषादन्यत्व प्रसक्तौ प्रत्याह। पुनरपीति। उपदेशजनितं प्रत्यक्षदर्शनमनुवदति। आत्मैवेति॥
भूतानां विकाराणां नानात्वं प्रकृत्या सहात्ममात्रतया प्रलीनं पश्यति। नहि भूतपृथक्त्वं सत्यां प्रकृतौ केवले परस्मिन्विला॥
पयितुं शक्यत इत्यर्थः। परिपूर्णाद्धात्मन एव प्रकृत्यादेर्विशेषांतस्य स्वरूपलाभमुपलभ्य तन्मात्रतां पश्यतीत्याह। तत एव

पुनरपि तदेव सम्यग्दर्शनं शब्दांतरेण प्रपंच्यते। यदा यस्मिन्काले भूतपृथग्भावं भूतानां पृथग्भा
वं पृथक्त्वमेकस्मिन्नात्मनि स्थितमेकस्थमनुपश्यति शास्त्राचार्योपदेशतो मत्वा त्मप्रत्यक्षत्वेन
पश्यत्यात्मैवेदं सर्वमिति तत एव च तस्मादेव च विस्तारमुत्पत्तिं सविकासमात्मनः प्राण आत्म

यदा भूतपृथग्भावमेकस्थमनुपश्यति॥ तत एव च विस्तारं ब्रह्म संपद्यते तदा॥ ३०॥

त आशा आत्मतः स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभा॥
वावात्मतो न्नमित्येवमादिप्रकारैर्विस्तारं यदा पश्यति स ब्रह्म संपद्यते ब्रह्मैव भवति तदा तस्मिन्का
ल इत्यर्थः॥ ३०॥ श्रीरामायनमः॥

वेति॥ उक्तमेव विस्तारं स्फुटयन्वक्ष्यमाणं स्पष्टयति॥ आत्मन इति॥ ब्रह्मसंपत्तिर्नाम पूर्णत्वेनाभिव्यक्तिरपूर्णत्वहेतोः सर्वस्या
त्मसात्कृतत्वादित्याह। ब्रह्मैवेति ज्ञानेन समानकाले वमुक्तिरिति सूचयति॥ तदेति॥ ३०॥ श्रीरामचंद्राय नमो नमः॥

परिपूर्णत्वेनसर्वात्मत्वेप्राप्तमात्मनोदेहादिगतेनकर्तृत्वादिनातद्गतंदुष्टंहिपवित्रस्यापिपंचगव्यादेरपवित्रसंसर्गात्तद्दोषेण
दुष्टत्वमित्याशंकामनूद्योत्तरत्वेनश्लोकमवतारयति॥एकस्येति॥अनादित्वमेवसाधयति॥आदिरिति॥तथापिकिंस्या
दित्याशंक्यकार्यत्वकृतव्ययाभावःसिद्धतीत्याह॥यद्धीति॥तथापिगुणापकर्षद्वारकोव्ययोभविष्यतीत्यत्याह॥न
थेति॥निरवयवत्वादवयवत्वद्वारकस्यनिर्गुणत्वाद्गुणत्वद्वारकस्यचव्ययस्याभावेपिस्वभावतोव्ययःस्यादित्याशं

एकस्यात्मनःसर्वदेहात्मत्वेतद्दोषसंबंधेप्राप्तइदमुच्यते॥अनादित्वात्॥अनादेर्भावोऽनादित्वमादिःकारणं
तद्यस्यनास्तितदनादियध्यादिमत्तत्स्वेनात्मनाव्येत्ययंत्वनादित्वान्निरवयवइतिकृत्वानव्येतितथानिर्गुणत्वा
त्सगुणोगुणव्ययाद्व्येत्ययंतुनिर्गुणत्वाच्चनव्येतीतिपरमात्मायमव्ययोनास्यव्ययोविद्यतइत्यव्ययोयतएवम

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः॥शरीरस्थोपिकौंतेयनकरोतिनलिप्यते॥३१॥श्री॥

तःशरीरस्थोपिशरीरेष्वात्मनउपलब्धिर्भवतीतिशरीरस्थउच्यतेतथापिनकरोति॥तदकरणादेवतत्फलेननन
लिप्यतेयस्तुकर्त्तासकर्मफलेनलिप्यतेअयंत्वकर्त्तातःफलेननलिप्यतइत्यर्थः॥कःपुनर्देहेषुकरोतिलिप्यतेच

क्याह॥परमात्मेति॥परमात्मनःस्वतोवापरतोवाव्ययस्याभावेफलितमाह॥यतइति॥स्वमहिमप्रतिष्ठस्यकथंशरी
रस्थत्वंतत्राह॥शरीरेष्विति॥सर्वगतत्वेनसर्वात्मत्वेनचदेहादौस्थितोपिस्वतोदेहाद्यात्मनावानकरोतिकूटस्थत्वाद्देहा
देश्चकल्पितत्वादित्यर्थःकर्तृत्वाभावेपिभोक्तृत्वंस्यादित्याशंक्याह॥तदकरणादिति॥तदेवोपपादयति॥यस्त्विति॥प
रस्यकर्तृत्वादेरभावेकस्यतदिष्टमितिपृच्छति॥कःपुनरिति॥श्रीसीतारामचंद्रायनमः॥श्रीकृष्णायनमोनमः॥

परस्मादन्यस्य कस्यचिज्जीवस्य कर्तृत्वादीत्याशंकामनुवदति ॥ यदीति ॥ तस्मिन् पक्षे प्रक्रमभंगः स्यादिति दूषयति ॥ नतदिति ॥ ईश्वरातिरिक्तजीवानंगीकारान्नोपक्रमविरोधोस्तीति शंकते ॥ अथेति ॥ तर्हि प्रतीतकर्तृत्वादेरधिकरणं वक्तव्यमिति पूर्ववाद्याह ॥ कइति ॥ परस्य कर्तृत्वाद्याधारत्वान्नास्ति वक्तव्यमित्याशंक्याह ॥ परो वेति ॥ नास्तीति वाच्यमिति पूर्वेण संबंधः नहि कर्तृत्वादिभाक्तृत्वे परस्यास्मदादिवदीश्वरत्वमिति भावः ॥ परस्यान्यस्य वा कर्तृत्वादिविशिष्टत्वे शरीरस्थोपीत्यादिश्रुतिमूलमपि ज्ञातुं वक्तुं चाशक्य

यदितावदन्यः परमात्मनो देही करोति लिप्यते च ततदिदमनुपपन्नमुक्तं क्षेत्रज्ञं चापि मां विद्धीत्याद्यथ नास्तीश्वरादन्यो देही कः करोति लिप्यते चेति वाच्यं परो वा नास्तीति कर्तृत्वं भोक्तृत्वं च परस्यास्मदादिवद्भवेदनीश्वरत्वप्रसंगो दुर्वारस्तदातस्मात्सर्वथा दुर्विज्ञेयं दुर्वाच्यं चेति भगवत्प्रोक्तमौपनिषदं दर्शनं अत एवौपनिषदः सिद्धांतो परित्यक्तो वैशेषिकैः सांख्यैः बौद्धैश्च तत्रायं परिहारो भगवता स्वेनैवोक्तः स्वभावस्तु प्रवर्तत इत्यविद्यामात्रं स्वभावो हि करोति लिप्यत इति व्यवहारो भवति ॥ न तु परमार्थत एकस्मिन् परमात्मनि तदस्त्यत एव तस्मिन् परमार्थसांख्यदर्शने स्थितानां ज्ञाननिष्ठानां परमहंसपरिव्राजकानां तिरस्कृताविद्याव्यवहाराणां कर्माधिकारो नास्तीति तत्र तत्र प्रदर्शितं भगवता ॥ ३१ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामचंद्राय नमः ॥

त्वात्त्याज्यमेवेति परीक्षकसंमत्योपसंहरति ॥ सर्वथेति ॥ परस्य वस्तुतोऽकर्तुरभोक्तुश्चाविद्ययात्तदारोपादादेयमेव भगवन्मतमिति परिहरति ॥ तत्रेति ॥ तमेव परिहारं प्रपंचयति ॥ अविद्येति ॥ व्यावहारिककर्तृत्वादावपि पारमार्थिकमेव किं नेष्यते तत्राह ॥ नत्विति ॥ वास्तवकर्तृत्वाद्यभावे लिंगमुपन्यस्यत्यत इति ॥ ३१ ॥ श्रीकृष्णाय नमः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीः ॥ ॥

किमिवेति सूक्ष्मभावादप्रतिहतस्वभावत्वादित्यर्थः॥ नसंबध्यते पंकादिभिरिति शेषः ३२॥ नकरोतिनलिप्यतेइत्यत्र दृष्टांतेन दृश्यधर्मशून्यत्वं हेतुमाह॥ किंचेति दृष्टांते विवक्षितमंशं दर्शयति रवीति उभयविधमर्थमेवस्पष्टयति॥ रविवदिति ३३॥ अध्यायार्थं सफलमुपसंहरति॥

किमिव नकरोति नलिप्यते इत्यत्र दृष्टांतमाह॥ यथासर्वगतं व्याप्यपि सत् सौक्ष्म्यात्सूक्ष्मभावात् आकाशं खं नोपलिप्यते न संबध्यते सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ३२॥ किंच॥ यथाप्रकाशयति अवभासयति एकः कृत्स्नं लोकमिमं रविः सविता आदित्यः तथा तद्वन्महाभूतादिधृत्यंतं क्षेत्रं एकः सन्प्रकाशयति कः क्षेत्री परमात्मेत्यर्थः॥ रविदृष्टांतोऽत्रात्मन उभयार्थोपि भवति॥ रविवत्सर्वक्षेत्रेष्वेक आत्मा अलेपकश्चेति ३३॥ समस्ताध्यायार्थोपसंहारार्थः श्लोकः॥ क्षेत्रक्षे

यथासर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते॥ सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥ ३२॥
यथाप्रकाशयत्येकः कृत्स्नं लोकमिमं रविः॥ क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥ ३३॥
क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा॥ भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परं॥ ३४॥ श्रीः॥ ॥

त्रज्ञयोर्यथाव्याख्यातयोरेवं यथाप्रदर्शितप्रकारेणांतरमितरेतरवैलक्षण्यविशेषं ज्ञानचक्षुषा शास्त्राचार्योपदेशजनितमात्मप्रत्ययिकं ज्ञानं चक्षुस्तेन ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च भूतानां प्रकृतिरविद्यालक्षणाऽव्यक्ताख्या तस्याः भूतप्रकृतेर्मोक्षणमभावगमनं च ये विदुः विजानंति यांति गच्छंति ते परं परमार्थतत्वं ब्रह्म न पुनर्देहमाददत इत्यर्थः॥
॥३४॥ ॥इति श्रीगीताभाष्ये शंकराचार्यटीकात्रयोदशोऽध्यायः॥१३॥ ॥श्रीरामकृष्णायनमः॥ श्रीरामायनमः

॥समस्तेति॥
विशेषं कोटस्थ्यं परिणामादिलक्षणं तदेवममानित्वादिनिष्ठातया क्षेत्रक्षेत्रज्ञयाथार्थ्यविज्ञानवतः सर्वानर्थनिवृत्त्या परिपूर्णपुरुषार्थसिद्धिरिति सिद्धं ३४॥ ॥इति श्रीमद्भगवद्गीतायां आनंदगीरीटीकात्रयोदशोध्यायः॥१३॥ ॥श्रीकृष्णायनमोनमः॥

क्षेत्रक्षेत्रज्ञसंयोगस्यसर्वोत्पत्तिनिमित्तत्वमज्ञातंज्ञापयितुमध्यायांतरमवतारयन्नध्याययोरुत्थाप्योत्थापकत्वरूपांसंगति
माह। सर्वमिति। विधांतरेणाध्यायारंभंसूचयति। अथवेति। तदेववक्तुमुक्तमनुवदति। ईश्वरेति। प्रकृतिस्थत्वंपुरुषस्यप्रकृ।

सर्वमुत्पद्यमानंक्षेत्रक्षेत्रज्ञसंयोगादुत्पद्यतइत्युक्तंतत्कथमितितत्प्रदर्शनार्थंपरंभूयइत्यादिरध्यायआरभ्य
ते। अथवेश्वरपरतंत्रयोःक्षेत्रक्षेत्रज्ञयोर्जगत्कारणत्वंनतुसांख्यानामिवस्वतंत्रयोरित्येवमर्थंप्रकृतिस्थत्वं

॥श्रीभगवानुवाच॥ परंभूयःप्रवक्ष्यामिज्ञानानांज्ञानमुत्तमं॥ ॥
यत्ज्ञात्वामुनयःसर्वेपरांसिद्धिमितोगताः॥१॥ श्रीरामायनमः॥

गुणेषुचसंगःसंसारकारणमित्युक्तंकस्मिन्गुणेकथंसंगःकेवागुणाःकथंवाबध्नंतीतिगुणेभ्यश्चमोक्षणं
कथंस्यात्मुक्तस्यचलक्षणंवक्तव्यमित्येवमर्थंच॥ श्रीसीतारामचंद्रायनमः॥ श्रीकृष्णायनमोनमः॥ ॥

त्यासहैक्याध्यासस्तस्यैवगुणेषुशब्दादिविषयेषुसंगोभिनिवेशःषड्विधामाकांक्षांनिक्षिप्यतदुत्तरत्वेनाध्यायारंभे।
पूर्ववदेवपूर्वाध्यायसंबंधसिद्धिरित्याह। कस्मिन्निति। पूर्वोक्तेनार्थेनास्यार्थस्यसमुच्चयार्थश्चकारः। श्रीकृष्णायनमः।

परमित्यस्य भाविकालार्थत्वं व्यावर्त्तयितुं संगतिमाह॥ परमिति॥ भूयःशब्दस्याधिकार्थत्वमिह नास्तीत्याह॥ पुनरिति॥ पुनःशब्दार्थ
मेव विवृणोति॥ सर्वेष्विति॥ पुनरुक्तिस्तर्हि इत्याशंक्य सूक्ष्मत्वेन दुर्बोधत्वात्पुनर्वचनमर्थवदित्याह॥ तत्रैवेति॥ विशेषं प्रश्नद्वार
निर्दिशति॥ किं तदिति॥ निर्द्धारणार्थां षष्ठीमादाय प्रकर्षं दर्शयति॥ सर्वेषामिति॥ परमुत्तममिति पुनरुक्तिमाशंक्य विषय
फलभेदान्मैवमित्याह॥ उत्तमेति॥ ज्ञानं ज्ञेयमित्यादौ ज्ञानशब्देनामानित्वादीनामुक्तत्वात्तन्मध्ये च ज्ञानस्य साध्यत्वेनोत्तमत्वा

परं ज्ञानमिति व्यवहितेन संबंधः॥ भूयः पुनः पूर्वेष्वध्यायेषु असकृदुक्तमपि प्रवक्ष्यामि तच्च
परं परवस्तुविषयत्वात्॥ किं तत् ज्ञानानां सर्वेषां ज्ञानमुत्तमं उत्तमफलत्वात् ज्ञानाना
मिति नाऽमानित्वादीनां किं तर्हि यज्ञादिज्ञेयवस्तुविषयाणामिति तानि न मोक्षायेदं तु मो
क्षायेति परोत्तमशब्दाभ्यां स्तौति श्रोतृबुद्धिरुच्युत्पादनार्थं यत् ज्ञात्वा यत् ज्ञानं प्राप्य मुन
यः संन्यासिनो मननशीलाः सर्वे परां सिद्धिं मोक्षाख्यां इतोऽस्माद्देहबंधनादूर्ध्वं गताः प्राप्ताः॥१॥

त्वं तस्य वक्तव्यं तेष्वित्याशंक्याह॥ ज्ञानानामिति॥ नामानित्वादीनां ग्रहणमिति शेषः इतिशब्दादूर्ध्वं पूर्ववदेवशब्दो द्रष्टव्यः॥ यथोक्तज्ञा
नापेक्षयापि कुतोऽस्य ज्ञानस्य प्रकर्षस्तत्राह॥ तानीति॥ स्तौति फलमाह॥ श्रोतृबुद्धीति॥ ज्ञानं ज्ञात्वेति ज्ञानस्य ज्ञेयत्वोपगमादनव
स्थेत्याशंक्याह॥ प्राप्येति॥ मुनिशब्दस्य चतुर्थाश्रमविषयत्वे तन्मात्रादेव ज्ञानायोगात् कुतस्तेषां मुक्तिरित्याशंक्याह॥ मननेति॥
सिद्धेर्ज्ञानत्वं परामिति विशेषणाद्व्यावर्त्य मुक्तित्वमाह॥ मोक्षाख्यामिति॥ देहारब्धस्य बंधनस्याध्यक्षत्वमाह॥ अस्मादिति॥१॥

ज्ञानफलस्यकर्मफलवैलक्षण्यमाह। तस्याश्चेति। कथंज्ञानाश्रयणंतद्धेतुश्रवणादिसामग्रीसंपत्तिद्वारेत्याह। ज्ञानेति। साधर्म्यं
योर्गोगवययोरिवविरुद्धेश्वरयोरपिभेदःस्यादित्याशंक्याह। मतद्रूपतामिति। साधर्म्यस्यमुख्यत्वेभेदघ्रौव्याद्गीताशास्त्रविरो

तस्याश्चसिद्धेरैकांतिकत्वंदर्शयति। इदंज्ञानंयथोक्तमुपाश्रित्यज्ञानसाधनमनुष्ठायेत्येतन्ममपरमेश्वर
स्यसाधर्म्यंमत्स्वरूपतामागताःप्राप्ताइत्यर्थः। ननुसमानधर्मतांसाधर्म्यंक्षेत्रज्ञेश्वरयोर्भेदानभ्युप

इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः। सर्गेऽपिनोपजायंतेप्रलयेनव्यथंतिच। २।

गमात् गीताशास्त्रेफलवादश्चायंस्तुत्यर्थउच्यते। सर्गेपिसृष्टिकालेपिनोपजायंतेप्रलयेब्रह्मणो
विनाशकालेनव्यथंतिनचलीयंतइत्यर्थः। २। श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु। श्रीरामायनमः।

धःस्यादित्याह। नत्विति। ज्ञानस्तुतयेतत्फलस्यविवक्षितत्वाच्चनात्रसारूप्यमिष्टमित्याह। फलेति। सारूप्येधीफलंहित्वाध्यानफलमप्र
स्तुतंप्रसज्येतेत्यर्थः। ईश्वरात्मतांगतानानामवांतरसर्गादौजन्माद्यभावेपिमहासर्गादौतद्भविष्यतीत्याशंक्याह। सर्गेपीति। २।

सर्वेति

ज्ञानसुखात्तदभिमुखायावहितचेतसे विवक्षितमर्थमाह क्षेत्रेति स्वरूपत्वेन स्वभूतत्वं वारयति मदीयेति ऐश्वरीं विभक्तिं वारयति त्रिगुणात्मिकेति सांख्यीयप्रकृतिरपि मदीयेति पदेन व्यावर्तिता योनिशब्देन सर्वाणि भवनयोग्यानि कार्याणि प्रत्युपादानत्वमभिप्रेतमित्याह सर्वभूतानामिति प्रकृतेः महत्त्वं साधयति सर्वकार्यव्याप्तिमादाय योनावेव ब्रह्मशब्दो लिंगवैषम्यान्महत् ब्रह्मेत्य

क्षेत्रक्षेत्रज्ञसंयोग ईदृशो भूतकारणमित्याह मम स्वभावभूता मदीया माया त्रिगुणात्मिका प्रकृतिर्योनिः सर्वभूतानां सर्वकार्यकरणेभ्यो महत्त्वाद्भरणत्वाच्च स्वविकाराणां महद्ब्रह्मेति च योनिरेव विशिष्यते तस्मिन्महति ब्रह्मणि योनौ गर्भं हिरण्यगर्भस्य जन्मनो बीजं सर्वभूतजन्मकारणं बीजं दधामि निक्षिपामि क्षेत्रक्षेत्रज्ञप्रकृतिद्वयशक्तिमानीश्व

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहं संभवः सर्वभूतानां ततो भवति भारत ३ ॥ श्रीः

रोऽहमविद्याकामकर्मोपाधिस्वरूपानुविधायिनं क्षेत्रज्ञं क्षेत्रेण संयोजयामीत्यर्थः ब्रह्मादिस्थावरान्तानां संभव उत्पत्तिः सर्वभूतानां ततस्तस्मात् हिरण्यगर्भोत्पत्तिद्वारेण ततस्तस्मात् मूलकारणात् हिरण्यगर्भाभिधानाद्भवति हे भार ॥८॥

॥शिव॥
॥३३६॥

र्भान्तरं किं विदित्याशंक्याह योनिरिति गर्भमित्यादि व्याचष्टे तस्मिन्निति ईदृशस्य क्षेत्रक्षेत्रज्ञसंयोगस्य भूतकारणत्वमिति वक्तुमुपक्रम्य किमिदमन्यदादर्शितामित्याशंक्याह क्षेत्रेति गर्भशब्दितोक्तसंयोगस्य फलं दर्शयति संभवइति आदिकर्त्ता स भूतानामिति स्मृत्या हिरण्यगर्भकार्यत्वावगमाद्भूतानां कथं यथोक्तगर्भाधाननिमित्तत्वमित्याशंक्याह हिरण्यगर्भेति ३

ननुकथमुक्तकारणानुरोधेनहिरण्यगर्भद्वारवत्वमभ्युपेत्यभूतानामुत्पत्तिरुच्यतेदेवादिजातिभेदेषुदेहविशेषाणांकारणांतरसंभ

मूर्छितांगावयवा

देवपितृमनुष्यपशुमृगादिसर्वयोनिषुकौंतेयमूर्त्तयोदेहसंस्थानलक्षणाऊर्जितावयवांगौमूर्त्तयःसंभवंति॥ यासा

सर्वयोनिषुकौंतेयमूर्त्तयःसंभवंतियाः॥ तासांब्रह्ममहद्योनिरहंबीजप्रदःपिता॥ ४॥

सांमूर्त्तीनांब्रह्ममहत्सर्वावस्थंयोनिःकारणंअहमीशोबीजप्रदःगर्भाधानस्यकर्त्तापिता॥ ४॥ श्रीरामायनमोनमः॥

वात्तत्राह॥ सर्वयोनिष्विति॥ तत्रतत्रहेत्वंतरप्रतिभासेकुतोस्यहेतुत्वमित्याशंक्यतत्तद्रूपेणास्यैवावस्थानादित्याह॥ सर्वावस्थमिति॥

क

क्षेत्रक्षेत्रज्ञसंयोगाज्जगदुत्पत्तिं दर्शयता ब्रह्मैवाविद्यया संसरतीत्युक्तमिदानीमध्यायादावुक्तमाकांक्षाद्वयमनूद्यानंतरश्लोकेनोत्तरमाह॥
केगुणा इति॥ सत्वादिषु कथं गुणशब्दप्रवृत्तिरित्याशंक्य परतंत्रत्वादित्याह॥ गुणा इति॥ रूपादिष्विव गुणशब्दः सत्वादिषु द्रव्याश्रितत्वं नि
मित्तीकृत्य किं न स्यादित्याशंक्य प्रकृत्यात्मकानां तेषां सर्वाश्रयत्वान्नैवमित्याह॥ न रूपादीति॥ गुणानां प्रकृतेश्च पृथगुक्तेरन्यत्वे कु
तस्तेषां प्रकृत्यात्मत्वमित्याशंक्याह॥ न च गुणेति॥ अत्यंतभेदे गवाश्ववत्तद्भावासंभवादित्यर्थः भेदेऽभेदे च तद्भावासंभवाविशेषा
कुतस्तेषां गुणपरिभाषेत्याशंक्याह॥ तस्मादिति॥ क्षेत्रज्ञं प्रति नित्यपारतंत्र्ये हेतुमाह॥ अविद्येति॥ के गुणा इत्यस्योत्तरमुक्तं कथं बध्नं

के गुणाः कथं बध्नंतीत्युच्यते॥ सत्वं रजस्तम इत्येवंनामानो गुणा इति पारिभाषिकः शब्दो न रूपादिवत् द्रव्याश्रिता न च गुणगुणिनोर
न्यत्वमत्र विवक्षितं तस्माद्गुणा इव नित्यपरतंत्राः क्षेत्रज्ञं प्रत्यविद्यात्मकत्वात् क्षेत्रज्ञं निबध्नंतीव तमास्पदीकृत्यात्मानं प्रतिलभंते

सत्वं रजस्तम इति गुणाः प्रकृतिसंभवाः॥ निबध्नंति महाबाहो देहे देहिनमव्ययं॥ ५॥ श्रीरामाय नमः॥

इति निबध्नंतीत्युच्यते ते च प्रकृतिसंभवा भगवन्मायासंभवा निबध्नंतीव हे महाबाहो महांतौ समर्थतरावाजानुप्रलंबौ बाहू य
स्य स महाबाहुः हे महाबाहो देहे शरीरे देहिनं देहवंतं अव्ययं अस्मिन् शास्त्रे अव्ययत्वं चोक्तमनादित्वादिति श्लोकेन॥ ॥

तीत्यस्योत्तरमाह॥ क्षेत्रज्ञमिति॥ तमेवोपपादयति॥ तमास्पदीकृत्येति॥ संभवत्यस्मादिति संभवः प्रकृतिः संभवो येषां ते तथेति प्राकृतानां गुणा
नां प्रकृत्यात्मकत्वमाह॥ ते चेति॥ सांख्यीयां प्रकृतिं प्रधानाख्यां व्यावर्त्तयति॥ भगवदिति॥ इवकारानुबंधेन नितरां बध्नंति स्वविकारवत्तयोप
दर्शयंतीति क्रियापदं व्याख्याय महाबाहुपदं व्याचष्टे॥ महांताविति॥ देहवंतं देहमात्मानं मन्यमानं देहस्वामिनमित्यर्थः कूटस्थे कथं बध्यमा
नत्वमित्याशंक्य कुर्यान्मेरावणुधियमपीति न्यायेन मायामाहात्म्यमिदमित्याह॥ अव्ययमिति॥ स्वतो धर्मतो वाव्ययत्वादित्यमित्यपेक्षामाह॥

॥ प्रिय ॥
॥ ३९७ ॥

(margin) क्षेत्रज्ञमिति

लिप्यतेनसपापेनेत्यनेनविरुद्धमिदंनिबध्नंतीतिवचनमितिशंकते नन्विति इवकारानुबंधेनक्रियापदंव्याचक्षाणेरस्माभि
रस्यचोद्यस्यपरिहृतत्वान्नैवमित्याह परिहृतमिति ५ किंलक्षणोगुणः केनबध्नातीत्यपेक्षायामाह तत्रेति निर्द्धारणार्थे
तयासप्तमीव्याचष्टे तत्रसत्वादीनामिति पुनस्तत्रेत्यनुवादमात्रंनिर्मलत्वंस्वच्छत्वमावरणनिवारणक्षमत्वंतस्मात्प्रका
शकंचैतन्याभिव्यंजकंनिरुपद्रवमितिनिर्मलंसत्सुखस्याभिव्यंजकमित्यर्थः केनद्वारेणतदात्मानंनिबध्नातीतिपृच्छ

ननुदेहीनलिप्यतेइत्युक्तंतत्कथमिहनिबध्नंतीत्यन्यथोच्यतेपरिहृतमस्माभिरिवशब्देननिबध्नंतीवेति॥५॥
तत्रसत्वादीनांसत्वस्यैवतावल्लक्षणमुच्यतेनिर्मलत्वात्स्फटिकइवमणिःप्रकाशकमनामयंनिरुपद्रवंचस

तत्रसत्वंनिर्मलत्वात्प्रकाशकमनामयं॥

त्वंतन्निबध्नातिकथंसुखसंगेनसुख्यऽहमितिविषयभूतस्यसुखस्यविषयिण्यात्मभूतेसुखेसंजयतीवसक्तमि
वकरोतिआत्मनिसंश्लेषापादनंमृषैवसुखेसंजननंसेषाअविद्यानहिविषयधर्मोविषयिणोभवति॥ ॥

ति कथमिति सुखसंगेनबध्नातीत्युत्तरंतदेवविवृणोति सुख्यहमित्यादिना मुख्यसुखस्याभिव्यंजकःसत्वपरिणामोत्रविषय
भूतंसुखमुच्यतेसंश्लेषापादनमेवविशदयति मृषैवेति किमितिमृषैवेतिविशेषणंसंगस्यवस्तुत्वसंभवादित्याशंक्याह सैं
षेति नन्विच्छासंघाभिनिवेशश्चेत्येकार्थत्वेतत्रेच्छादेरात्मधर्मत्वात्किमविद्ययेत्याशंक्यमनोधर्मत्वादिच्छादेर्नात्मधर्मतेत्याह

गो

गीता

इच्छादेरनात्मधर्मत्वे किं प्रमाणमित्याशंक्याह। इच्छाद्वेति। तस्यात्मधर्मत्वासंभवे फलितमाह। अत इति। संजयतीवाविद्वांसमिति
इवकारप्रयोगे हेतुमाह। अविद्ययेति। तस्यावस्तुतो नात्मसंबंधस्तथापि संबंधांतराभावात्तु स्वातंत्र्याच्चात्मधर्मत्वमापाद्य दृष्ट
त्वमाचष्टे। स्वकीयेति। वृत्तिमदंतःकरणस्य विषयत्वादात्मनः साधकत्वेन तद्विषयित्वे पि तदविवेकरूपाविद्येतितत्स्वरूप
माह। विषयेति। यथोक्ताविद्यामाहात्म्यमिदं यदस्वरूपे ऽतद्धर्मे च शक्तिसंपादनमित्याह। अस्वेति। तदेव स्पष्टयति। असक्त

इच्छादिवद्धत्वं तं क्षेत्रस्यैव विषयस्य धर्म इत्युक्तं भगवता ऽतो विद्ययैव स्वकीयधर्मभूतया विषयविषय्यविवेकलक्ष
णया ऽस्वात्मभूते सुखे संजयतीवासक्तं सक्तमिव करोत्यसुखिनं सुखिनमिव तथा ज्ञानसंगेन च देहिनं ज्ञानामिति सु

सुखसंगेन बध्नाति ज्ञानसंगेन चानघ॥ ६॥ श्रीः॥

खसाहचर्यात्तु क्षेत्रस्यैवांतःकरणस्य धर्मो नात्मनः आत्मधर्मत्वे संगानुपपत्तेर्बंधानुपपत्तेश्च सुखदुःखज्ञानादौ सं
गो मंतव्यः हे अनघ अव्यसन॥ ६॥ ॥

मिति॥ प्रकारांतरेण सत्वस्य निबंधकत्वमाह। तथेति॥ ज्ञायते ऽनेनेति सत्वपरिणा॥
मो ज्ञानं तेन ज्ञान्यहमिति विपरीताभिमानेन सत्वमात्मानं निबध्नातीत्याह। ज्ञानमित्यादिना। विपक्षे दोषमाह। स्वेति स्वाभा
विकत्वेन प्राप्तत्वात्तत्र स्वतः संयोगात्तद्द्वारा बंधे च तन्निवृत्त्यनुपपत्तेर्नात्मधर्मत्वमित्यर्थः। ज्ञानैश्वर्यादावपि क्षेत्रधर्मे सं
गस्य पूर्ववद्बाधकत्वं सूचयति। सुख इवेति। पापादिदोषहीनस्यैवात्र शास्त्रे ऽधिकार इति द्योतयति। अनघेति॥ ६॥ ॥

रजः किंलक्षणं कथं वा पुरुषं निबध्नातीत्याशंक्याह । रज इति । रज्यते संसज्यते अनेन पुरुषो दृश्येष्विति रागो सावात्मा ऽस्येति रागात्मकं रजो जानीहीत्याह् । रंजनादिति । समुद्भवस्तस्मादिति समुद्भवस्तृष्णा चैव संगश्च तृष्णासंगौ तयोः समुद्भवस्तमिति विग्रहं

रजो रागात्मकं रंजनाद्रागो गैरिकादिवत् रागात्मकं विद्धि जानीहि तृष्णासंगसमुद्भवं तृष्णा अप्राप्ताभिलाषः आसंगः प्राप्ते विषये मनसः प्रीतिलक्षणः संश्लेषः तृष्णासंगयोः समुद्भवं तन्निबध्नाति तद्रजः कौंतेय कर्मसंगेन दृष्टा ऽदृ

रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवं ॥ तन्निबध्नाति कौंतेय कर्मसंगेन देहिनं ॥ ७ ॥

ष्टार्थेषु कर्मसु संजननं संगस्तत्परता कर्मसंगस्तेन निबध्नाति रजो देहिनं ॥ ७ ॥ श्रीरामकृष्णाय नमो नमः ॥

कृत्वा कार्यद्वारा रजो विवक्षुः तृष्णासंगयोरर्थभेदमाह । तृष्णेत्यादिना । रजोलक्षणमुक्त्वा निबंधकत्वप्रकारमाह । तद्रज इति । कर्मसंगं विभजते दृष्टेति । अकर्त्तारमेव पुरुषं करोमीत्यभिमाने प्रवर्त्तयतीत्यर्थः ॥ ७ ॥ श्रीरामायनमः ॥

तमस्तर्हि किंलक्षणं कथं वा पुरुषं निबध्नातीति तत्राह तमस्त्विति गुणानां प्रकृतिसंभवत्वाविशेषेपि तमसोऽज्ञानजत्वविशेषणं त
द्विपरीतस्वभावानापत्तेरिति मत्वाह अज्ञानादिति मुह्यंति हिताहितेन विविंतयंत्यनेनेति विद्धि मोहनं विवेकप्रतिबंधकमिति
कार्यद्वारा तमो निर्दिशति मोहनमित्यादिना लक्षणमुक्त्वा तमसो बंधनप्रकारत्वं दर्शयति प्रमादेति कार्यांतरासक्ततया
चिकीर्षितस्य कर्त्तव्यस्याकरणं प्रमादः निरीहतयोत्साहप्रतिबंधस्त्वालस्यं स्वापो निद्रा ताभिरात्मानमविकारमेव तमोपि

तमस्त्विती योगुणोऽज्ञानजं अज्ञानाज्जातमज्ञानजं विद्धि मोहनं मोहकरमविवेककरं सर्वदेहिनां सर्वेषां देहवतां प्र
मादालस्यनिद्राभिः प्रमादश्चालस्यं च निद्रा च प्रमादालस्यनिद्रास्ताभिस्तत्तमो निबध्नाति भारत ॥८॥ पुनर्गुणानां॥

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां ॥ प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥८॥ सत्वं
सुखे संजयति रजः कर्मणि भारत ॥ ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥९॥ श्रीकृष्णः॥

व्यापारः संक्षेपत उच्यते ॥ सत्वं सुखे संजयति संश्लेषयति रजः कर्मणि भारत संजयतीति अनुवर्त्तते ज्ञानं स
त्वकृतं विवेकमावृत्याछाद्य तु तमः स्वेनावरणात्मना प्रमादे संजयत्युत प्रमादो नाम प्राप्तकर्त्तव्याकरणं ॥९॥ श्रीः

विकारयतीत्यर्थः ॥८॥ उक्तानां मध्ये कस्मिन्कार्ये कस्य गुणस्योत्कर्षस्तत्राह पुनरिति ॥ सुखे साध्ये विषये समुत्कृष्यते स
त्वमित्याह सत्वमिति ॥ संजयतीत्यस्यार्थमाह ॥ संश्लेषयतीति ॥ कर्मणि साध्ये रजः समुत्कृष्यत इत्याह रज इति
प्रमादे प्राधान्यं तमसो दर्शयति ॥ ज्ञानमिति ॥९॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामकृष्णायनमो नमः ॥

इतरेतरविरोधेनैवसत्वादयोगुणायुगपदुत्कृष्यंतेविरोधेनवाक्रमेणवेतिसंदेहात्स्पृछति॥ उक्तमिति॥ सत्वोत्कर्षार्थिनामितरा
भिभवार्थंक्रमपक्षमाश्रित्योत्तरमाह॥ उच्यतइति॥ सत्वाभिवृद्धिमेवविवृणोति॥ रजइति॥ रजस्तमसोस्तिरोधानदशायामि

उक्तंकार्यंकदाकुर्वंतिगुणाइत्युच्यते॥ रजस्तमश्चोभावप्यभिभूयसत्वंभवतिउद्भवतिवर्द्धतेयदातदालब्धात्मकं
सत्वंस्वकार्यंज्ञानसुखाद्यारभतेहेभारत॥ तथारजोगुणःसत्वंतमश्चैवोभावप्यभिभूयवर्द्धतेयदातदाकर्मतृष्णा
दिस्वकार्यमारभत्तेतमआख्योपिगुणःसत्वंरजश्चोभावप्यभिभूयतथैववर्द्धतेयदातदाज्ञानावरणादिस्वकार्य

रजस्तमश्चाभिभूयसत्वंभवतिभारत॥ रजःसत्वंतमश्चैवतमःसत्वंरजस्तथा॥ १०॥ सर्वद्वारे
षुदेहेस्मिन्प्रकाशउपजायते॥ ज्ञानंयदातदाविद्याद्विवृद्धंसत्वमित्युत॥ ११॥ श्रीरामायनमः॥

मारभते॥ १०॥ यदायोगुणउद्भूतोभवतितदातस्यकिंलिंगमित्युच्यते॥ सर्वद्वारेष्वात्मनउपलब्धिद्वाराणिश्रोत्रा
दीनिसर्वाणिकरणानितेषुसर्वद्वारेष्वंतःकरणस्यबुद्धेर्वृत्तिःप्रकाशोदेहेस्मिन्प्रकाशशब्दवाच्यंउपजायतेतदेव
ज्ञानंयदैवप्रकाशोज्ञानाख्यउपजायतेतदाज्ञानप्रकाशेनलिंगेनविद्यात्विवृद्धमुद्भूतंसत्वमित्युतापि॥ ११॥ श्री

तियावत्॥ रजसोवृद्धिप्रकारंतत्कार्यंचदर्शयति॥ तथेति॥ तमसोपिवृद्धिंतत्कार्यंचनिर्दिशतितमइति॥ १०॥ उत्तरश्लोकत्रयस्याकांक्षां
दर्शयति॥ यदेति॥ सत्वोद्भवलिंगप्रदर्शनार्थमनंतरश्लोकमुत्थापयति॥ उच्यतइति॥ सर्वद्वारेष्वित्यादिसप्तमीनिमित्तेनेतव्या॥ उतशब्दो

अतिशयेनोद्भूतस्य रजसो लिंगमाह॥ रजस इति॥ उपक्रमपर्यायस्यारंभस्य विषयं पृच्छति॥ केषामिति॥ काम्यानि निषिद्धानि च लौकिकानि कर्माणि विषयत्वेन निर्दिशति॥ कर्मणामिति॥ अनुपशमो वाह्यांतःकरणानामिति शेषः॥ लोभाद्युपलंभाद्र जो वृद्धिर्बोद्धव्येति भावः॥१२॥ उद्भूतस्य तमसो लिंगमाह॥ अप्रकाश इति॥ सर्वथैव ज्ञानकर्मणोरभावो विशेषणाभ्यामुक्त

रजस उत्भूतस्येदं चिन्हं॥ लोभः परद्रव्यादिषु इच्छा प्रवृत्तिः प्रवर्त्तनं सामान्यचेष्टा आरंभ उद्यमः केषां कर्मणां अश मः अनुपशमो हर्षरागादिप्रवृत्तिः स्पृहा सर्वसामान्यवस्तु विषया तृष्णा रजसि गुणे विवृद्धे एतानि लिंगानि जा

लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा॥ रजस्येतानि जायंते विवृद्धे भरतर्षभ॥१२॥ अप्र काशोऽप्रवृत्तिश्च प्रमादो मोह एव च॥ तमस्येतानि जायंते विवृद्धे कुरुनंदन॥१३॥ श्रीकृष्णः॥

यंते हे भरतर्षभ॥१२॥ अप्रकाश अविवेको त्यंत मप्रवृत्तिश्च प्रवृत्त्यभावः तत्कार्यं प्रमादो मोह एव चाविवेको मूढ चित्तते त्यर्थः॥ तमसि गुणे प्रवृद्धे एतानि लिंगानि जायंते हे कुरुनंदन॥१३॥ श्रीसीतारामचंद्राय नमो नमः॥ ॥

तच्छब्दो दर्शितो विवेकार्थः॥ प्रमादो व्याख्यातः॥ मोहो वेदितव्यस्यान्यथावेदनं तस्यैव मोढ्यात्तत्त्वमाह॥ अविवेक इति॥ अविवेकादतिशयादिना प्रवृद्धं तमो ज्ञेयमिति भावः॥१३॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु॥ श्रीरामचंद्राय नमो नमः॥ ॥

सात्विकादीनां भावानां पारलौकिकं फलविभागमुदाहरति ॥ मरणेति ॥ संगः सक्तिः रागस्तस्मात्तद्बलात् तदनुष्ठानद्वारा लभ्यमानमित्यर्थः ॥ गौणं सत्वादिगुणप्रयुक्तमितियावत् ॥ तत्र सत्वगुणवृद्धिकृतं फलविशेषमाह ॥ यदेति ॥ मलरहितान् रजस्तमसोरन्यतरस्योद्भवो मलं तेन रहितानागमसिद्धान् ब्रह्मलोकादीनित्यर्थः ॥ १४ ॥ रजः समुद्रेके मृतस्य फलविशेषं दर्श

मरणद्वारेणापि यत्फलं प्राप्यते तदपि सहेतुकं सर्वं गौणमेवेति दर्शयन्नाह ॥ यदा सत्वे प्रवृद्धे तु उद्भूते प्रलयं मरणं याति प्रतिपद्यते देहभृदात्मा तदा उत्तमविदां महदादितत्वविदां दूरसेतल्लोकान् अमलान् मलरहितान् प्र

यदा सत्वे प्रवृद्धे तु प्रलयं याति देहभृत् ॥ तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥ १४ ॥
रजसि प्रलयं गत्वा कर्मसंगिषु जायते ॥ तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥

तिपद्यते ॥ १४ ॥ रजसि गुणे प्रवृद्धे प्रलयं मरणं गत्वा प्राप्य कर्मसंगिषु कर्मासक्तियुक्तेषु मनुष्येषु जायते उत्पद्यते तथा तद्वदेव प्रलीनो मृतस्तमसि विवृद्धे मूढयोनिषु पश्वादिषु जायते ॥ १५ ॥ श्रीरामायनमः ॥

यति ॥ रजसीति ॥ जायते शरीरं गृह्णातीत्यर्थः ॥ यथा सत्वे रजसि च प्रवृद्धे मृतो ब्रह्मलोकादिषु मनुष्यलोके च जायते देवादिषु मनुष्येषु च जायते तथेत्याह ॥ तद्वदिति ॥ १५ ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीरामचंद्रायनमो नमः ॥ ॥

भावानां फलमुक्त्वा सात्विकादीनां कर्मणां फलमाह ॥ अतीतेति ॥ सुकृतस्य शोभनस्य कृतस्य पुण्यस्येत्यर्थः ॥ सात्विकस्याशुद्धिरहितस्येत्यर्थः ॥ सात्विकं सत्वेन निर्वृत्तं निर्मलं रजस्तमः समुद्भवान्मलान्निःक्रांतं ॥ रजःशब्दस्य राजसे कर्मणि कुतो वृत्तिस्तत्राह ॥ कर्मेति ॥ दुःखमेव दुःखबहुलं सुखमेवेत्यर्थः ॥ कथमित्थं व्याख्याय तेतत्राह ॥ कारणेति ॥ पापमिश्रस्य

अतीतश्लोकार्थस्यैव संक्षेप उच्यते ॥ कर्मणः सुकृतस्य सात्विकस्येत्यर्थः ॥ आहुः शिष्टाः सात्विकमेव निर्मलं फलमिति रजसस्तु राजसस्य कर्मण इत्यर्थः ॥ कर्माधिकारात्फलमपि दुःखमेव कारणानुरूप्याद्राजसमेव तथाऽज्ञानं

कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलं ॥ रजसस्तु फलं दुःखमज्ञानं तमसः फलं ॥ १६ ॥
सत्वात्संजायते ज्ञानं रजसो लोभ एव च ॥ प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १७ ॥

तामसस्य कर्मणोऽधर्मस्य पूर्ववत् ॥ १६ ॥ किंच ॥ गुणेभ्यो भवति ॥ सत्वाल्लुब्धात्मकात्संजायते समुत्पद्यते ज्ञानं रजसो लोभ एव च ॥ प्रमादमोहौ प्रमादश्च मोहश्च भौ तमसो भवतः अज्ञानमेव च भवति ॥ १७ ॥ किंच ॥ ॥ ॥

पुण्यस्य रजोनिमित्तस्य कारणत्वात्तदनुरोधात् फलमपि रजोनिमित्तं यथोक्तं युक्तमेवेत्यर्थः ॥ अज्ञानमविवेकप्रायं दुःखं तामसधर्मफलमित्याह ॥ नयेति ॥ १६ ॥ विहितप्रतिषिद्धज्ञानकर्माणि सत्वादीनां लक्षणानि संक्षिप्य दर्शयति ॥ किंचेति ॥ ज्ञानं सर्वकरणद्वारकमज्ञानं विवेकाभावः ॥ १७ ॥ श्रीकृष्णाय नमः ॥ श्रीरामचंद्राय नमः ॥ श्रीसीतारामचंद्राय नमः ॥ ॥

सात्विकादिज्ञानकर्मफलान्युक्तान्यनुक्तसंग्रहार्थंसामान्येनोपसंहरति ॥ किंचेति ॥ वक्ष्यमाणफलद्वारापिसत्वादिगुणान

ऊर्द्ध्वंगच्छंति देवलोकादिषुउत्पद्यंतेसत्वस्थाःसत्वगुणवृत्तस्थाः मध्येतिष्टंतिमनुष्येषुराजसाजघन्यगुणवृत्तस्थाः
जघन्यश्चासौगुणश्चजघन्यगुणस्तमस्तस्यवृत्तंनिद्रालस्यादितस्मिन्स्थिताजघन्यगुणवृत्तस्थाः ॥ मूढाअ

ऊर्द्ध्वंगच्छंतिसत्वस्थामध्येतिष्टंतिराजसाः ॥ जघन्यगुणवृत्तस्थाअधोगच्छंतितामसाः ॥ १८ ॥

धोगच्छंतिपश्वादिषूत्पद्यंतेतामसाः ॥ १८ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीसीतारामचंद्रायनमः ॥

मित्यर्थः ॥ सत्वगुणस्यवृत्तंशोभनंज्ञानंकर्मवा तत्रतिष्टंतीतितथाराजसारजोगुणनिमित्तेज्ञानेकर्मणिवानिरताः ॥ १८ ॥ श्रीः ॥

कस्मिन्गुणे कथमित्यादि प्रश्नान् प्रत्याख्याय गुणेभ्यो मोक्षणं कथमिति प्रत्याख्यानार्थं वृत्तानुवादपूर्वकं मिथ्याज्ञाननिवर्त्तकं सम्यग्ज्ञानं प्रस्तौति ॥ पुरुषस्येत्यादिना ॥ पुरुषस्य या गतिः सा चेति शेषः मोक्षो गुणेभ्यो विश्लेषपूर्वको ब्रह्मभावः ॥ सम्यग्ज्ञानोक्तिपरं श्लोकं व्याख्यातुं प्रतीकमादत्ते ॥ नान्यमिति ॥ सत्वादिविषयस्य गुणशब्दस्य विवक्षितमर्थमाह ॥ कार्येति ॥ विधानंतर्यमनुशब्दार्थः

पुरुषस्य प्रकृतिस्थत्वरूपेण मिथ्याज्ञानेन युक्तस्य भोग्येषु गुणेषु सुखदुःखमोहात्मकेषु सुखी दुःखी मूढोहमस्मी त्येवं रूपो यः संगस्तत्कारणं पुरुषस्य सदसद्योनिजन्मप्राप्तिलक्षणस्य संसारस्येति समासेन पूर्वाध्याये यदुक्तं तदि हसत्वं रजस्तम इति गुणाः प्रकृतिसंभवा इत्यत आरभ्य गुणस्वरूपं गुणवृत्तं स्ववृत्तेन च गुणानां बंधकत्वं गुणवृत्त निबद्धस्य च पुरुषस्य या गतिरित्येतत्सर्वं मिथ्याज्ञानमूलं च बंधकारणं विस्तरेणोक्त्वाऽधुना सम्यग्दर्शनान्मो

नान्यं गुणेभ्यः कर्त्तारं यदा द्रष्टानुपश्यति ॥ गुणेभ्यश्च परं वेत्ति मद्भावं सोधिगच्छति ॥ १९ ॥ ॥

क्षो वक्तव्य इत्याह भगवान् ॥ नान्यं कार्यकारणविषयाकारपरिणतेभ्यो गुणेभ्यः कर्त्तारमन्यं यदा द्रष्टा विद्वान् ॥ सन्नानुपश्यति गुणा एव सर्वावस्थासु सर्वकर्मणां कर्त्तार इत्येवं पश्यति गुणेभ्यश्च परं गुणव्यापारसाक्षिभूतं वे त्ति मद्भावं मम भावं वासुदेवत्वं स द्रष्टाऽधिगच्छति ॥ १९ ॥

अक्षरार्थमुक्त्वा पूर्वार्द्धस्यार्थिकमर्थमाह ॥ गुणा एवेति ॥ सर्वावस्था ॥ स्तत्तत्कार्यकारणाकारपरिणता इति यावत् सर्वकर्मणां कायिकवाचिकमानसानां विहितप्रतिषिद्धानामित्यर्थः ॥ परं व्यतिरि क्तमेव स्फुटयति ॥ गुणेति ॥ निर्गुणं ब्रह्मात्मानमित्यर्थः ॥ मद्भावं ब्रह्मात्मतामसौ प्राप्नोतीति ब्रह्मभावोऽस्याभिव्यज्यत इत्यर्थः ॥ १९

अनर्थेभ्रात मयो हि विद्वान्ब्रह्मत्वं प्राप्नोतीत्येतत्प्रश्नद्वारा विवृणोति ॥ कथमित्यादिना ॥ यथोक्तानित्येतद्देवव्याचष्टे मायेति
मायैवोपाधिस्तद्भूतां स्तदात्मनः सत्वादीननर्थरूपानित्यर्थः ॥ एभ्यः समुद्भवंतीति समुद्भवाः देहस्य समुद्भवास्तानिति व्यु
त्पत्तिं गृहीत्वा व्याचष्टे ॥ देहोत्पत्तीति ॥ यो विद्वान् अविद्यामयान् गुणान् जीवन्नेवातिक्रम्य स्थितस्तमेव विशिनष्टि ॥ ज
न्मेति ॥ पुरस्ताद्विस्तरेणोक्तस्य प्रसंगात्संक्षिप्तस्य सम्यग्ज्ञानस्य फलमुपसंहरति ॥ एवमिति ॥ २० ॥ सम्यग्धीफलं गुणा

कथमधिगच्छतीत्युच्यते ॥ गुणानेतान् यथोक्तानतीत्य जीवन्नेवातिक्रम्य मायोपाधिभूतांस्त्रीन् देही देहसमु॥
द्भवान्देहोत्पत्तिबीजभूतान् ॥ जन्ममृत्युजरादुःखैर्जन्म च मृत्युश्च जरा च दुःखानि च तैर्जीवन्नेव विमुक्तः सन् वि
द्वानऽमृतमश्नुते एवं समद्भावमधिगच्छतीत्यर्थः ॥ जीवन्नेवेतान् गुणानतीत्यामृतमश्नुत इति प्रश्नबीजं

गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान् ॥ जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥ अर्जुन उवा
च ॥ कैर्लिंगैस्त्रीन् गुणानेतानतीतो भवति प्रभो ॥ किमाचारः कथं चैतांस्त्रीन् गुणानतिवर्त्तते ॥ २१ ॥

प्रतिलभ्य कैर्लिंगैश्चिन्हैस्त्रीनेतान्व्याख्याता तान् गुणानतीतो निःक्रांतो भवति हे प्रभो किमाचारः कोऽस्या
चार इति किमाचारः ॥ कथं केन प्रकारेणैतांस्त्रीन् गुणानतिवर्त्तते ॥ २१ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥

तिक्रमणपूर्वकममृतत्वयुक्तं श्रुत्वा मुक्तस्य लक्षणं वक्तव्यमिति प्रकृतं विवक्षित्वा प्रश्नमुत्थापयति ॥ जीवन्नेवेति ॥ ये व्या
ख्याताः सत्वादयो गुणास्तत्परिणामभूतानध्यासानतिक्रांतः सन् कैर्लिंगैर्ज्ञातो भवतीति ता निवृत्तव्यानि सिद्ध्यर्थे पूर्वमनुष्टे
यानि पश्चाद्यत्नलभ्यानि लिंगानि तानि कानीति पृच्छति ॥ कैरिति ॥ यथेष्टचेष्टाव्यावृत्यर्थे प्रश्नांतरं ॥ किमाचार इति ॥ ज्ञान ॥
ल

स्य गुणात्ययोपायस्योक्तत्वात्तदुपायप्रकारजिज्ञासया
प्रश्नांतरं ॥ कथमिति ॥ २१ ॥

प्रश्नस्वरूपमनूद्यतदुत्तरंदर्शयति ॥ गुणातीतस्येति ॥ दृष्टोभगवानितिसंबंधः ॥ किंवृत्तस्यत्रिधाप्रयोगदर्शनात्प्रश्नद्वयार्थमित्युप
लक्षणंप्रश्नत्रयार्थमितिद्रष्टव्यंउत्तरमवतार्यानंतरश्लोकतात्पर्यमाह ॥ यत्तावदिति ॥ तानिसम्यग्दर्शीनद्वेष्टीत्युक्तमेवस्प
ष्टयितुंनिषेध्यमसम्यग्दर्शिनोद्वेषंतेषुप्रकटयति ॥ ममेत्यादिना ॥ सम्यग्दर्शिनःसंप्रवृत्तेषुप्रकाशादिषुद्वेषाभावमप

गुणातीतस्यलक्षणंगुणातीतत्वोपायश्चार्जुनेनपृष्टोऽस्मिन्श्लोकेप्रश्नद्वयार्थेप्रतिवचनंश्रीभगवानुवाच
यत्तावत्कैर्लिंगैर्युक्तोगुणातीतोभवतीतितत्शृणुप्रकाशंचसत्त्वकार्यंचप्रवृत्तिंरजःकार्यंमोहमेवचतमः
कार्यंइत्येतानिनद्वेष्टिसंप्रवृत्तानिसम्यग्विषयभावेनोद्भूतानिममतामसःप्रत्ययोजातःतेनाहंमूढस्तथाराज
सीप्रवृत्तिःममोत्पन्नादुःखात्मिकातेनाहंरजसाप्रवर्तितःप्रचलितःस्वरूपात्कष्टंममवर्त्ततेयोयंस्वरूपाव

॥श्रीभगवानुवाच॥ प्रकाशंचप्रवृत्तिंचमोहमेवचपांडव ॥ नद्वेष्टिसंप्रवृत्तानिननिवृत्तानिकांक्षति ॥२२॥

स्थानात्भ्रंशस्तथासात्त्विकोगुणःप्रकाशात्मामांविवेकिनमापादयन्सुखेनचसंजयन्मांबध्नातीतिता
निनद्वेष्टिसम्यग्दर्शित्वेनतदेवंगुणातीतोनद्वेष्टिसंप्रवृत्तानियथाचसात्त्विकादिःपुरुषःसत्त्वादिकार्याण्यात्मानं
प्रतिप्रकाश्यनिवृत्तानिकांक्षतिनतथागुणातीतोनिवृत्तानिकांक्षतीत्यर्थः ॥ एतन्नपरप्रत्यक्षंलिंगंकिंतर्हिस्वा
त्मप्रत्यक्षत्वादात्मविषयमेवतल्लक्षणं ॥ नहिस्वात्मविषयंद्वेषमाकांक्षांवापरःपश्यति ॥२२॥ श्रीरामायनमः ॥

संहरति ॥ तदेवमिति ॥ ननिवृत्तानीत्यादिव्याचष्टे ॥ यथाचेति ॥ तेषामनात्मीयत्वंसम्यक्पश्यन्नात्मानुकूलप्रतिकूलारोपणेन
नोद्विजतेतेभ्यश्चनस्पृहयतीत्यर्थः ॥ स्वानुभवसिद्धंगुणातीतस्यलक्षणमुक्तमित्याह ॥ एतन्नेति ॥ परप्रत्यक्षत्वाभावंप्रपंचय

॥नद्वेष्टीति॥आत्मविषयः॥२४

केर्लिंगैरित्यादि परिहृतसद्वितीयं प्रश्नं परिहरति ॥ अथेति ॥ दृष्टांतं व्याचष्टे यथेति ॥ उपेक्षकस्य पक्षपातित्वायोगादित्यर्थः ॥ आत्मविदात्मनः कौटस्थ्यज्ञानेनासीनो निवृत्तकर्तृत्वाभिमानोऽप्रयतमानो भवतीति दार्ष्टांतिकमाह ॥ तथेति ॥ गुणाती तत्वोपायमार्गो ज्ञानमेव शब्दादिभिर्विषयैः कूटस्थज्ञानात्प्रच्यवनमाशंक्याह ॥ गुणैरिति ॥ उपनतानां विषयाणां रागद्वे

अथेदानीं गुणातीतः किमाचार इति प्रश्नस्य प्रतिवचनमाह ॥ उदासीनवत् यथोदासीनो न कस्यचित्पक्षं भजते तथा अयं गुणातीतत्वोपायमार्गेऽवस्थितः ॥ आसीनः आत्मविद्गुणैर्यः संन्यासी न विचाल्यते वि वेकदर्शनावस्थातः ॥ तदेतत्स्फुटीकरोति गुणाः कार्यकरणविषयाकारपरिणता अन्योन्यस्मिन्व

उदासीनवदासीनो गुणैर्यो न विचाल्यते ॥ गुणा वर्त्तंत इत्येवं योऽवतिष्ठति नेंगते ॥ २३ ॥

र्त्तंत इति योऽवतिष्ठति छंदोभंगभयात्परस्मैपदप्रयोगो योऽनुतिष्ठतीति वा पाठांतरं ते न चनेंगते न च लति स्वरूपावस्थ एव भवतीत्यर्थः ॥ २३ ॥ श्रीकृष्णायनमः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो भवतु ॥ ॥

षद्वाराप्रवर्त्तकत्वामित्येतत्प्रपंचयति ॥ तदेतदिति ॥ योऽवतिष्ठति स गुणातीत इत्युत्तरत्र संबंधः ॥ अवपूर्वस्य तिष्ठतेरात्म नेपदे प्रयोक्तव्ये कथं परस्मैपदमित्याशंक्याह ॥ छंदोभंगेति ॥ पाठांतरे तु वाधितानुवृत्तिमात्रमनुष्ठानं ॥ करणाकारपरि णतानां गुणानां विषयाकारपरिणतेषु प्रवृत्तिर्न मम मेति पश्यन्नचलतया कूटस्थदृष्टिमात्मनो न जहातीत्याह ॥ नेंगतेति ॥ २३ ॥

गुणातीतस्यलिंगांतरमाह॥ किंचेति॥ तयोःसमत्वंरागद्वेषानुत्पादकतयास्वकीयत्वाभिमानानास्पदत्वंप्रसन्नत्वंस्वार्थादप्रच्युति॥
रविक्रियत्वंविद्वद्दृष्ट्याप्रियाप्रिययोरसंभवेपिलोकदृष्टिमाशंक्याह॥ प्रियंचेति॥ प्रियाप्रियग्रहणेनगृहीतानांकांचनादी

किंच॥ समदुःखसुखःसमेदुःखसुखेयस्यससमदुःखसुखःस्वस्थःस्वेआत्मनिस्थितःप्रसन्नःसम
लोष्टाश्मकांचनःलोष्टंचाश्माचकांचनंचसमानियस्यसतुल्यप्रियाप्रियःप्रियंचाप्रियंचतुल्येसमे

समदुःखसुखःस्वस्थःसमलोष्टाश्मकांचनः॥तुल्यप्रियाप्रियोधीरस्तुल्यनिंदात्मसंस्तुतिः॥२४॥

प्रियाप्रियेयस्यसोयंतुल्यप्रियाप्रियोधीरोधीमान्तुल्यनिंदात्मसंस्तुतिःनिंदाचात्मसंस्तुतिश्चतुल्येनिं
दात्मसंस्तुतीयस्ययतेःसतुल्यनिंदात्मसंस्तुतिः॥२४॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीरामायनमः॥

नांब्राह्मणपरिव्राजकवत्स्वस्थकृत्यग्रहणंनिंदादोषोक्तिः॥आत्मसंस्तुतिरात्मनोगुणकीर्त्तनं॥२४॥श्रीरामायनमः॥ ॥

इत्थंभूतश्च गुणातीतः शक्यो ज्ञातुमित्याह ॥ किंचेति ॥ मानः सत्कारस्तिरस्कारोऽवमानः पर द्दष्ट्या यौ सखिशत्रू तयोः पक्षयोर्निर्विशेषो न कस्यचित्पक्षेतिष्ठतीत्याह ॥ तुल्य इति ॥ विदुषो मित्रादिबुध्यभावात्तुल्यो मित्रारिपक्षयोरित्ययुक्तमित्याशंक्याह ॥ यद्यपीति सर्वकर्मत्यागे देहधारणमपि निमित्ताभावान्नस्यादित्याशंक्याह ॥ देहेति ॥ उक्तविशेषणो गुणातीतो ज्ञातव्य इत्याह ॥ गुणेति

किंच ॥ मानापमानयोस्तुल्यः समो निर्विकारस्तुल्यो मित्रारिपक्षयोः यद्यप्युदासीना भवंति केचित्स्वाभि॥
प्रायेण तथापि पराभिप्रायेण मित्रारिपक्षयोरिव भवंतीति अयं तुल्यो मित्रारिपक्षयोरित्याह भगवान्
उदासीनेष्वपि तुल्यत्वासंभवादिति वा सर्वारंभपरित्यागी दृष्टादृष्टार्थानि कर्माण्यारभ्यंत इत्यारंभाः सर्वा

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ॥ सर्वारंभपरित्यागी गुणातीतः स उच्यते ॥ २५ ॥

रंभान्परित्यक्तुंशीलमस्येति सर्वारंभपरित्यागी देहधारणमात्रनिमित्तव्यतिरेकेण सर्वकर्मपरित्यागीत्य
र्थः गुणातीतः स उच्यते उदासीनवदित्यादीत्येतदंतमुक्तं यावद्यत्नसाध्यं तावत्संन्यासिनानुष्ठेयं गुणाती
तत्वसाधनं मुमुक्षोः स्थिरीभूतं तु स्वसंवेद्यं सन् गुणातीतस्य यतेर्लक्षणं ॥ २५ ॥ श्रीरामचंद्राय नमः ॥ ॥

यदुक्तमुपेक्षकत्वादित द्दिग्योदयात्पूर्वं यत्नसाध्यं विद्याधिकारिणा साधनत्वेनानुष्ठेयमुत्पन्नायां तु विद्यायां जीवन्मुक्तस्योक्तं
धर्मजातं स्थिरीभूतं स्वानुभवसिद्धं लक्षणत्वेन तिष्ठतीत्युक्ते धर्मजाते विभागं दर्शयति ॥ उदासीनवदित्यादिना ॥ २५ ॥

प्रश्नद्वयमेवंपरिहृत्यतृतीयंप्रश्नंपरिहरति॥अधुनेति॥मच्छब्दस्यसंसारिविषयत्वंव्यावर्त्तयति॥ईश्वरमिति॥तत्रैवनारायणश
ब्दान्मूर्त्तिभेदोव्यावर्त्त्यतेतस्यताटस्थ्यंव्यवछिनत्ति॥सर्वेति॥मुख्यामुख्याधिकारिभेदेनविकल्पःभक्तियोगस्ययादृछिकत्वं
र्त्ते

अधुनाकथंत्रीन्गुणानतिवर्त्ततइतिप्रश्नस्यप्रतिवचनमाह॥मांचेश्वरंनारायणंसर्वभूतहृदयाश्रितंयोयतिःक
र्मीवाऽव्यभिचारेणनकदाचिद्योव्यभिचरतिभक्तियोगोभजनंभक्तिःसेवयोगस्तेनयःसेवतेतस्यभगवदनु

मांचयोव्यभिचारेणभक्तियोगेनसेवते॥सगुणान्समतीत्यैतान्ब्रह्मभूयायकल्पते॥२६॥

ग्रहःप्रसादज्ञोभवतितस्मात्भक्तियोगेनज्ञानसमुद्भवेनसेवतेसगुणान्समतीत्यैतान्यथोक्तान्ब्रह्म
भूयायभवनंभूयः॥ब्रह्मभूयायब्रह्मभवनायमोक्षायकल्पतेसमर्थो भवतीत्यर्थः॥२६॥श्रीरामः॥

पराक्
व्यवछेत्तुमव्यभिचारेणेत्युक्तंतद्व्याचष्टे॥नेति॥भजनंपरप्रेमणासएवयुज्यतेनेनेतियोगेनसेवतेप्राक्चित्ततांविनासदा
नुसंदधातीत्यर्थः॥२६॥श्रीसीतारामचंद्रायनमः॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥श्रीरामकृष्णायनमोनमः॥ ॥

सभगवदनुग्रहकृतसम्यग्धीसंपन्नोविद्वान्जीवन्ब्रह्मैवेत्यत्रहेतुंपृच्छति ॥ कुतइति ॥ तत्रोत्तरमाह ॥ उच्यतइति ॥ ब्रह्मशब्दस्यास
तिबाधकेमुख्यार्थग्रहणमभिप्रेत्याह ॥ परमात्मनइति ॥ तंप्रतिप्रत्यगात्मनोयत्प्रतिष्ठात्वंतदुपपादयति ॥ प्रतितिष्ठतीति
यतब्रह्मप्रत्यगात्मनिप्रतितिष्ठतिननुकिंविशेषणमित्यपेक्षायामुक्तममृतस्येत्यादितत्रामृतशब्दस्याव्ययशब्दस्यपौ

कुतएतदित्युच्यते ॥ ब्रह्मणःपरमात्मनोहियस्मात्प्रतिष्ठाहंप्रतितिष्ठतिअस्मिन्निति प्रतिष्ठाअहंप्रत्यगात्माकी ॥
दृशाभूतस्यब्रह्मणःअमृतस्यअविनाशिनः ॥ अव्ययस्यअविकारिणःशाश्वतस्यनित्यस्यचधर्मस्यज्ञाननिष्ठा ॥

ब्रह्मणोहिप्रतिष्ठाहममृतस्याव्ययस्यच ॥

लक्षणस्यज्ञानयोगधर्मप्राप्यस्यसुखस्यआनंदरूपस्यऐकांतिकस्यअव्यभिचारिणःअमृतादिस्वभावस्य
परमात्मनःप्रत्यगात्माप्रतिष्ठासम्यग्ज्ञानेनपरमात्मतयानिश्चीयते ॥ श्रीकृष्णायनमः ॥ श्रीरामायनमः ॥ ॥

नरुक्तत्वंपरिहरति ॥ अविकारिणइति ॥ नित्यत्वमपक्षयराहित्यंतेनपूर्वाभ्यामपौनरुक्त्यंप्रसिद्धार्थस्यधर्मशब्दस्यब्रह्मण्यनु
पपत्तिमाशंक्याह ॥ ज्ञानेति ॥ अर्थेंद्रियसंबंधोत्थसुखंव्यावर्त्तयितुमैकांतिकस्येत्युक्तंअक्षरार्थमुक्त्वावाक्यार्थमाह ॥ अमृता
दीति ॥ प्रतिष्ठायस्मादितिपूर्वेणसंबंधः ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामायनमः ॥ श्रीरामचंद्रायनमोनमः ॥

तस्मात्स्वस्य गात्मापरमात्मत्वयानिश्चीयते सम्यग्ज्ञानेनेतियोजना॥ अस्यश्लोकस्य पूर्वश्लोकेनैकवाक्यतामाह॥ तदेतदिति विवक्षितं वाक्यार्थं प्रपंचयति॥ ययेति॥ साशक्तिर्ब्रह्मैवेति कथं सामानाधिकरण्यं तत्राह॥ शक्तीति॥ व्याख्यानांतरमाह॥ अथवेति॥ विशेषणानि पूर्ववद्पुनरुक्तानि नेतव्यानि॥ तदनेनाध्यायेन क्षेत्रक्षेत्रज्ञसंयोगस्य संसारकारणत्वं पंचप्रश्न

तदेतद्ब्रह्मभूयाय कल्पत इत्युक्तं॥ ययेश्वरशक्त्या भक्तानुग्रहादिप्रयोजनाय ब्रह्मप्रतिष्ठते प्रवर्त्तते सा शक्तिः॥ ब्रह्मैवाहं शक्तिशक्तिमतोरनन्यत्वादित्यभिप्रायः॥ अथवाब्रह्मशब्दवाच्यत्वात्सविकल्पकं ब्रह्म तस्य ब्रह्मणो निर्विकल्पोहमेव नान्यः प्रतिष्ठाश्रयः किं विशिष्टस्यामृतस्यामरणधर्मकस्याव्ययस्य रहितस्य किंच शाश्वतस्य च नित्य

पंसस्य

॥ शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च॥ २७॥

स्य धर्मस्य ज्ञाननिष्ठालक्षणस्य सुखस्य तज्जनितस्य ऐकांतनियतस्य च प्रतिष्ठाहमिति वर्त्तते॥ २७॥ ॥

इति श्रीगीताभाष्यटीकायां चतुर्दशो अध्यायः॥ १४॥ ॥ श्रीकृष्णायनमः॥ श्रीरामचंद्रायनमो नमः॥ ॥

निरूपणद्वारेण च सम्यग्ज्ञानस्य फलं संसारनिवर्त्तकत्वमित्येतदुपपादयता मुमुक्षोर्यत्नसाध्यं गुणैरस्वाल्यत्वादिमुक्तस्यायत्नसिद्धं लक्षणमिति निर्द्धारितं॥ २७॥ ॥ इति श्रीमद्भगवद्गीताभाष्ये श्रीमदानंदगिरिटीकायां चतुर्दशोऽध्यायः॥ १४॥

ज्ञानेन गुणात्ययेदर्शितेनाशित्वे तेषां विनाज्ञानेनात्ययादनाशित्वे तेनापि तद्योगान्न ज्ञानं गुणात्ययहेतुरित्याशंकां निरस्य
साक्षादेव श्रवणादिहेतुं संन्यासं विधित्सुर्ब्रह्मत्वस्य परमपुरुषार्थतां चाविवक्षुरध्यायांतरमारभते ॥ यस्मादिति ॥ कर्मिणो
ज्ञानिनश्च शास्त्रेधिकृतास्तत्र कर्मिणां कर्मानुकूलं फलमीश्वरायत्तं फलमत इति न्यायात् ज्ञानिनामपि तत्फलमीश्वरा
यत्तमेव ततो ह्यस्य बंधविपर्यया विमुक्तत्वात् ॥ यस्मादेवं तस्माद्यो भक्त्याख्येन योगेन मामेव सेवंते ते मत्प्रसादद्वारा ज्ञा
नं प्राप्य तेन गुणातीता मुक्ता भवंतीति स्थितमित्यर्थः ॥ ये त्वात्मतत्त्वमेव संदेहाद्यपोहेन जानंतितेज्ञानेन गुणातीताः सं

यस्मान्मदधीनं प्राणिनां कर्मफलं ज्ञानिनां च ज्ञानफलं अतो भक्तियोगेन मां ये सेवंते ते मत्प्रसादात् ज्ञानप्राप्ति
क्रमेण गुणातीताः संतः मोक्षं गच्छंति ॥ किमु वक्तव्यमात्मनस्तत्त्वमेव सम्यग्विजानंतो इत्यतो भगवानर्जुनेना
पृष्टमप्यात्मनस्तत्त्वं विवक्षुरुवाच ऊर्द्ध्वमूलमधःशाखमित्यादि तत्र तावत् वृक्षरूपकल्पनया वैराग्यहेतोः संसार
स्वरूपं वर्णयति ॥ विरक्तस्य हि संसाराद्भगवत्तत्त्वज्ञानेधिकारो नान्यस्येति ॥ श्रीरामकृष्णायनमः ॥ श्रीरामः ॥ ॥

तो मुक्तिं गच्छंतीति किं वक्तव्यमित्यर्थसिद्धमाह ॥ किमु वक्तव्यमिति ॥ आत्मतत्त्वमज्ञातं यतः संसारहेतुर्ज्ञातं मोक्षानुकूलमतो
ऽर्जुनेन किं तदित्यपृष्टमपि तत्त्वं भगवानुक्तवान् श्रश्राभावेपि तस्य तत्त्वुत्सादनाभिमानादित्याह ॥ अत इति ॥ तत्त्वे विवक्षिते
किमिति संसारो वर्ण्यते तत्राह ॥ तत्रेति ॥ अध्यायादिः सप्तम्यर्थः वैराग्यमपि किमिति मृग्यते तत्राह ॥ विरक्तस्येति ॥ इति
वैराग्याय संसारवर्णन ॥ मिति शेषः ॥ श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु ॥ श्रीरामकृष्णायनमः ॥ श्रीरामचंद्रायनमोनमः ॥

नाशसंभावनायवृक्षरूपकंबंधहेतोर्दर्शयति ऊर्द्ध्वमूलमिति कथंकालतः सूक्ष्मत्वंतदाह कारणत्वादिति तदेवकथंकार्यापेक्षया
नियतपूर्वभावित्वादित्याह नित्यत्वादिति सर्वव्यापित्वाच्चोत्कर्षसंभावयति महत्वाच्चेति ऊर्द्ध्वमुच्छ्रितमुत्कृष्टमितियावत्
तस्यैवकूटस्थस्यकथंमूलत्वमित्याशंक्याह अव्यक्तेति स्मृतिमूलत्वेनश्रुतिमुदाहरति श्रुतेश्चेति अर्वाचोनिकृष्टाः शाखा
इवमहदाद्यायस्यसतथा प्रकृतेसंसारवृक्षेपुराणसंमतिमाह पुराणेचेति अव्यक्तमव्याकृतंतदेवमूलंतस्मात्प्रभवनंप्र
भवोयस्यसतथातस्यैवमूलस्याव्यक्तस्यानुग्रहादतिदृढत्वादुस्थितः संवर्द्धितस्तस्यलौकिकवृक्षसाधर्म्यमाह बुद्धीत्यादिना

ऊर्द्ध्वमूलंकालतःसूक्ष्मत्वात्कारणत्वान्नित्यत्वान्महत्वाच्चोर्द्ध्वमुच्यतेब्रह्मअव्यक्तमायाशक्तिमत्तत्कारणत्वान्नित्यत्वा
च्चमूलमस्येतिसोयंसंसारवृक्षऊर्द्ध्वमूलः श्रुतेश्चोर्द्ध्वमूलोवाक्शाखइतिपुराणेचअव्यक्तमूलप्रभवस्तस्यैवानुग्रहो

॥ ऊर्द्ध्वमूल ॥ श्रीः ॥ ॥

त्थितः बुद्धिस्कंधमयश्चैवइंद्रियांतरकोटरः महाभूतप्रशाखश्चविषयैःपत्रवांस्तथा धर्माधर्मसुपुष्पश्चसुखदुः
खफलोदयः ॥ आजीव्यःसर्वभूतानांब्रह्मवृक्षःसनातनः ॥ वृक्षस्यहिशाखास्कंधादुद्भवंतिसंसारस्यचबुद्धेःसकाशात्

नानापरिणामाजायंतेतेनबुद्धिरेवस्कंधःतन्मयस्तत्प्रचुरोयंसंसारतरुः इंद्रियाणामंतराणिछिद्राणिकोटराणियस्यतथाम
हांतिभूतानिदृष्टिव्यादीन्याकाशांतानिविशाखस्तंभोपमायस्यसतथा आजीव्यत्वमुपजीव्यत्वंब्रह्मणाधिष्ठितोवृक्षोब्रह्मवृ
क्षस्तथाविज्ञानंविनाछेत्तुमशक्यतयासनातनश्चिरंतनः एतच्चब्रह्मणः परस्यात्मनोवनंवननीयंसंभजनीयमत्रहिब्रह्मप्रति
ष्ठितंतस्यवृक्षस्यसंसाराख्यस्यतदेवब्रह्मसारभूतं अथवास्यब्रह्मवृक्षस्यानवछिन्नस्यसंसारमंडलस्यतदेतत्ब्रह्मवनमि
ववनंवननीयंसंभजनीयंनहिब्रह्मातिरिक्तंसंसारस्यास्पदमस्ति ब्रह्मैवाविद्ययासंसरतीत्यभ्युपगमादित्यर्थः ॥

वि

शिव
२२७

अहंब्रह्मेति दृढज्ञानेनोक्तं संसारवृक्षं छित्वा प्रतिबंधकाभावादात्मनिष्ठो भूत्वा पुनरावृत्तिरहितं कैवल्यं प्राप्नोतीत्याह ॥ एतदिति ॥
अधःशाखमित्येतत्व्याचष्टे ॥ महदिति ॥ आदिशब्देनेंद्रियादिसंग्रहः संसारवृक्षस्यातिचंचलत्वे प्रमाणमाह ॥ प्राडुरिति ॥ क्षणध्वं

एतत्ब्रह्मवनं चैवब्रह्माचरति साक्षिवत् एतत् छित्वा च भित्वा च ज्ञानेन परमासिनां ततस्त्वात्मरतिं प्राप्य यस्मान्नावर्त्तते पुनरित्यादि ऊर्द्ध्वमूलं संसारमायामयं वृक्षमधःशाखं महदहंकारतन्मात्रादयः शाखा इव शाखा अधो भवंती

मधःशाखमश्वत्थं प्राहुरव्ययं ॥

तिसोयमधःशाखस्तमधःशाखं न श्वोपि स्थास्यतीत्यश्वत्थः तं क्षणध्वंसिनमश्वत्थं प्राहुः कथयंति अव्ययं संसारमायाया अनादिकालप्रवृत्तत्वात् सोयं संसारवृक्षोऽव्ययः अनाद्यनंतदेहादिसंतानाश्रयो हि प्रसिद्धस्तमव्ययं ॥

सिनोऽव्ययत्वं विरुद्धमित्याशंक्याह ॥ संसारेति ॥ तदेवोपपादयति ॥ अनादीति ॥ छादनं रक्षणं प्रावरणं वा कर्मकांडानि स्वर्गारोहफलानि नानाविधानुवादयुक्तानि संसारवृक्षं रक्षंतीति तन्निष्टदोषं च्छावृण्वंतीति तेन तानि छंदांसि पर्णानीव भवंतीत्यर्थः ॥ तदेवप्र

पंचपतिपंचति

उक्तेर्थेहेतुमाह॥ धर्मेति॥ कर्मकांडात्मनांवेदानामितिशेषः कर्मब्रह्माख्यस्यसर्ववेदार्थस्यतत्रांतर्भावमुपेत्यव्याचष्टे॥ वेदा
र्थेति॥ समूलसंसारवृक्षज्ञानेतुफलंहित्वामूलमेवानिः कृष्यज्ञातुंशक्यमितितत्ज्ञानार्थंप्रयतितव्यमितिमत्वातत्ज्ञा

तस्यैवसंसारवृक्षस्यइदमन्यद्विशेषणांतरंछंदांसियस्यपर्णानिछंदांसिछादनाहग्यजुःसामलक्षणानि
यस्यसंसारवृक्षस्यपर्णानीवपर्णानियथावृक्षस्यपरिरक्षणार्थानिपर्णानितथावेदाःसंसारवृक्षपरिर
क्षणार्थाः धर्माधर्मतद्धेतुफलप्रकाशनार्थत्वात्तथाव्याख्यातंसंसारवृक्षंसमूलंयस्तंवेदसवेदविद्वेद्य

छंदांसियस्यपर्णानियस्तंवेदसवेदवित्॥१॥श्रीः॥

र्थविदित्यर्थः नहिसंसारवृक्षादस्मात्समूलात्ज्ञेयोऽन्योऽणुमात्रोप्यवशिष्टोऽस्तिअतःसर्वज्ञःसयोवेदार्थ
विदिति॥यस्मात्संसारवृक्षेसमूलेसर्वंज्ञेयमंतर्भवतीतिसमूलवृक्षज्ञानंस्तौति॥१॥श्रीरामायनमः॥

नस्तुतिरत्रविवक्षितेत्याह॥ नहीति॥१॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥श्रीसीतारामचंद्रायनमः॥श्रीरामायनमः

अवयवसंबंधित्वपराप्रागुक्तादतिरिक्ताकल्पनेतियावत् ॥ आमनुष्यलोकादर्वाचरित्यधःशब्दार्थमाह ॥ मनुष्यादिभ्य इति ॥
तस्माद्देवादिभ्यः सत्यलोकादिस्थूर्ध्वशब्दार्थमाह ॥ यावदिति ॥ शाखाशब्दार्थं दर्शयति ॥ ज्ञानेति ॥ तेषां हेत्वनुगुणत्वेन बहु
विधत्वं सूचयति ॥ यथेति ॥ प्रत्यक्षाणां शब्दादिविषयाणां प्रवालत्वं शाखासु पल्लववत्वमंकुरत्वं स्फोरयति ॥ देहादीति ॥ ऊ
र्ध्वमूलमित्यत्र संसारवृक्षस्य मूलमुक्तं किमिदानीमधश्च मूलानि इत्युच्यते तत्राह ॥ संसारेति ॥ अनुप्रविष्टत्वं सर्वेषु लिं

तस्यैव संसारवृक्षस्यावयवकल्पनोच्यते ॥ अधो मनुष्यादिभ्यो यावत्स्थावरं ऊर्ध्वं च यावद्ब्रह्मा विश्वसृजो धर्म इत्ये
तदंतं यथाकर्म यथाश्रुतं ज्ञानकर्मफलानि तस्य वृक्षस्य शाखा इव शाखाः प्रसृताः प्रगता गुणप्रवृद्धाः गुणैः सत्वर
जस्तमोभिः प्रवृद्धाः स्थूलीकृता उपादानभूतैर्विषयप्रवालाः शब्दादयः प्रवाला इव देहादिकर्मफलेभ्यः शाखा
भ्यः अंकुरीभवंतीव तेन विषयप्रवालाः शाखाः संसारवृक्षस्य परमं मूलमुपादानमूर्ध्वमुक्तं ॥ अथ इदानीं कर्मफ

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ॥ अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलो
के ॥ २ ॥

लजनित रागद्वेषादिवासनामूलानीव धर्माधर्मप्रवृत्तिकारणान्यवांतरभावीनि इति ॥ तानि अधश्च देवा
द्यपेक्षया मूलान्यनुसंततानि व्याप्तानि अनुप्रविष्टानि कर्मानुबंधीनि कर्म धर्माधर्मलक्षणमनुबंधः पश्चाद्भा
वि येषां उद्भूतिमनुभवंति ॥ तानि कर्मानुबंधीनि मनुष्यलोके विशेषतो त्र हि मनुष्याणां कर्माधिकारः प्रसिद्धः ॥ २ ॥

गेष्वनुगतत्वया संततम विच्छिन्नत्वं रागादीनां कर्मफलजन्यत्वं प्रकटयति ॥ कर्मेति ॥ कर्मणां रागादीनां च मिथो हेतुमत्वं तेषां त
यात्वेनाविच्छिन्नतया प्रवृत्तिर्विशेषतो मनुष्यलोके भवति ॥ तत्र हेतुमाह ॥ अत्र हीति ॥ कर्मस्वयस्या प्राणिनिकायो लोकः
मनुष्यश्चासौ लोकश्चेत्यधिकृतो ब्राह्मणादिविशिष्टो देहो मनुष्यलोकः ॥ २ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ ॥

स

पुनःपुनः रागादिना प्रवृत्तत्वेनानादित्वान्न संसारवृक्षः स्वयमुच्छिद्यते नेन्न च्छेत्तुं शक्यते केनापीत्याशंक्याह ॥ यत्त्विति ॥ यथा पूर्वं वर्णितं यथा बालो के प्रसिद्धं तथास्य रूपं शास्त्रेणानो पलभ्यते इत्याह ॥ न रूपमिति ॥ नानुमीयते ॥ यथा चास्य ज्ञानापनोद्यत्वं युक्तमित्याह ॥ यथेति ॥ तस्याप्रमितत्वे हेतुमाह ॥ स्वप्नेति ॥ तस्य स्वप्नादिसमत्वे दृष्टनष्टस्वरूपत्वं हेतूकरोति ॥ दृष्टेति दृश्यमेयते तिशेषेः तदेवामेयत्वं हेतूकृत्यावसानमपि तस्य न भातीत्याह ॥ अत एवेति ॥ ज्ञानं विना भ्रांतिवासनाकर्म

यस्त्वयं संसारवृक्षो वर्णितः ॥ न रूपमस्येह यथा वर्णितं तथा नैवोपलभ्यते स्वप्नमरीच्युदकमायागंधर्वनगर समत्वात् दृष्टनष्टस्वरूपो हि स इत्यत एव नांतो न पर्यंतो निष्ठा समाप्तिर्वा विद्यते तथा न चादिरित आरभ्यायं प्रवृत्त इति न केनचिद्गम्यते न च संप्रतिष्ठा स्थितिर्मध्यमस्य न केनचिदुपलभ्यते ॥ अश्वत्थमेनं यथोक्तं सुविरूढमू

न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा ॥ अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्त्वा ३

लं सुष्ठु विरूढानि विरोहं गतानि सुदृढानि मूलानि अस्य तमेनं सुविरूढमूलं असंगशस्त्रेण असंगः असंगता पुत्रवित्तलोकैषणादिभ्यो व्युत्थानं तदेव शस्त्रं तेनासंगशस्त्रेण दृढेन परमात्माभिमुख्यनिश्चय दृढीकृते न पुनःपुनर्विवेकाभ्यासाश्मनिशितेन छित्त्वा संसारवृक्षं सबीजमुद्धृत्य ३ श्रीरामचंद्राय नमो नमः ॥

णामन्योन्यनिमित्तत्वान्नावसानमस्तीत्यर्थः ॥ इदं प्रथमत्वमपि नास्य परिच्छेत्तुं शक्यमित्याह ॥ तथेति ॥ आद्यंतवन्मध्यमपि नास्य प्रामाणिकमित्याह ॥ मध्यमिति ॥ संसारवृक्षस्याश्वत्थशब्दितस्य क्षणभंगुरस्य स्वयमेवोच्छेदसंभवात्तदुच्छेदार्थं न प्रयतितव्यमित्याशंक्याह ॥ अश्वत्थमिति ॥ व्युत्थानं वैराग्यपूर्वकं पारिव्राज्यं दृढीकृतत्वमेव विवेकपूर्वकत्वेन स्फुटयति ॥

पुनःपुनरिति ३

उच्छ्रयस्य किं कर्त्तव्यं तत्राह ॥ तत इति ॥ पश्चाद्दृढस्थानादूर्द्ध्वमवस्थितमित्यर्थः ॥ किं तत्पदं परान्विष्यज्ज्ञातव्यं तदाह ॥ यस्मिन्निति ॥ येन सर्वे

ततः पश्चाद्यस्य दृढैः स्थवं तत्परिमार्गितव्यं परिमार्गणमन्वेषणं ज्ञातव्यमित्यर्थः ॥ यस्मिन्पदे गताः प्रविष्टा न निव
र्त्तिते ना वर्त्तते भूयः पुनः संसाराय कथं परिमार्गितव्यमित्याह ॥ तमेव च यः पदशब्देनोक्तः ॥ आदौ भवं आद्यं च

॥ ❀ ॥ ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्त्तंति भूयः ॥
॥ तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥ ॥

पुरुषं प्रपद्ये इत्येवं परिमार्गितव्यं तच्छरणतयेत्यर्थः ॥ कोसौ पुरुष इत्युच्यते यतो यस्मात्पुरुषात्संसारमाया
वृक्षस्य प्रवृत्तिः प्रसृता निःसृता ऐंद्रजालिकादिव माया पुराणी चिरंतनी ॥ ४ ॥ श्रीरामचंद्राय नमो नमः ॥

पूर्णपुरुषैर्वा प्राप्यानं पुरुषं प्रपद्ये शरणं गतोस्मीत्यर्थः ॥ विवर्त्तवादानुरोधिनं दृष्टांतमाह ॥ ऐंद्रेति ॥ ४ ॥ श्रीरामः ॥

परिमार्गणपूर्वकं वैष्णवं पदं गच्छतामंगांतराण्याकांक्षापूर्वकं कथयति। कथमित्यादिना॥ मानोऽहंकारः मोहोऽविवेकः जितसं
गदोषाः शत्रुमित्रसन्निधावपि द्वेषप्रीतिवर्जिता इत्यर्थः॥ तत्परत्वं श्रवणादिनिष्ठत्वं संन्यासिनो वैराग्यद्वारा त्यक्तसर्वकर्मा

कथंभूतास्तत्पदं गच्छंतीत्युच्यते॥ निर्मानमोहा मानश्च मोहश्च मानमोहौ निर्गतौ येभ्यस्ते निर्मानमोहा मानमोहवर्जि
ताः जितसंगदोषाः संग एव दोषः संगदोषः जितः संगदोषो यैस्ते जितसंगदोषाः॥ अध्यात्मनित्याः परमात्मस्वरू॥
पालोचने नित्याः तत्पराः विनिवृत्तकामा विशेषतो निःशेषेण निर्लेपेन निवृत्ताः कामा येषां ते विनिवृत्तकामाः यत
यः संन्यासिनो द्वंद्वैः प्रियाप्रियादिभिर्विमुक्ताः सुखदुःखसंज्ञैः परित्यक्ता गच्छंत्यमूढा मोहवर्जिताः परमव्ययं तत॥

निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः॥ द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पदम॥
व्ययं तत्॥५॥ न तद्भासयते सूर्यो न शशांको न पावकः॥ यद्गत्वा न निवर्त्तंते तद्धाम परमं मम॥६॥ श्रीरामायनमः॥

द्यथोक्तं॥५॥ तदेव पदं पुनर्विशिष्यते॥ तद्धामेति व्यवहितेन धाम्ना संबंधः धाम तेजोरूपं पदं न भासयते सूर्य आदित्यः
सर्वावभासनशक्तिमत्वेपि स तितथा न शशांकश्चंद्रो न च पावकोग्निरपि यद्धाम वैष्णवं पदं गत्वा प्राप्य न निवर्त्तंते
यच्च सूर्यादिभिर्न भास्यते तद्धाम परमं पदं श्रीविष्णोर्मम॥६॥ श्रीसीतारामचंद्रायनमः॥ श्रीरामकृष्णायनमः॥ ॥

ण इत्यर्थः॥ आदिशब्देन तद्धेतुग्रहः मोहवर्जितत्वमुक्तहेतुतः संजातसम्यग्धीत्वं॥५॥ तच्चेत्पदं वेद्यं कर्तुरन्यत्कर्मेति द्वैतापातो
ऽवेद्यं चेत्तदपुमर्थत्वात् प्रेप्सितत्वासिद्धिरित्याशंक्याह॥ तदेवेति॥६॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥ श्रीकृष्णायनमः॥

उक्तमनूद्याक्षिपति ॥ नन्विति ॥ तत्र प्रसिद्धिं प्रमाणयति ॥ संयोगा इति ॥ गमनस्यागमनांतत्वप्रसिद्धेरयुक्तं यत्तु गत्वेत्यादीत्युपसंहरति
कथमिति ॥ आक्षेपं परिहरति ॥ शृण्विति ॥ भगवत्प्राप्तेर्नित्यत्वं तत्त्वाभावः सप्तम्यर्थः ॥ जीवस्य परांशत्वेपि कथमुक्तदोषस

नन्तु यद्गत्वा न निवर्त्तंत इत्युक्तं सर्वा हि गतिरागत्यंता संयोगा विप्रयोगांता इति प्रसिद्धं कथमुच्यते तद्धामगतानां नास्ति
निवृत्तिरिति शृणु तत्रैव कारणं ॥ ममैव परमात्मनों ऽशो भागो ऽवयव एकदेश इत्यनर्थांतरं जीवलोके जीवानां लोके ॥

ममैवांशो जीवलोके जीवभूतः सनातनः ॥

संसारे जीवभूतो भोक्ता कर्त्तेति यः प्रसिद्धः सनातनः पुरातनः यथा जलसूर्यकः सूर्यांशो जलनिमित्तापाये सूर्यमे
व गत्वा न निवर्त्तते तेनैवात्मना संगच्छते एवमेवैतत् ॥ तथायमप्यंशः तेनैवात्मना संगच्छत्येवमेव ॥ ॥

माधिरित्यांशं क्वप्रतिबिंबपक्षमादाय दृष्टांतेन प्रत्याचष्टे ॥ यथेति ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीकृष्णाय नमः ॥

अवछेदपक्षमाश्रित्य दृष्टांतांतरेणोक्तदोषसमाधिं दर्शयति ॥ यथा वेति ॥ आक्षेपसमाधिमुपसंहरति ॥ अत इति ॥ परस्य निरवयवत्वादंशत्वं जीवस्यायुक्तमिति शंकते ॥ नन्विति ॥ तस्य निरवयवत्वं साधयति ॥ सावयवत्वे चेति ॥ वस्तुतो निरंशस्यापि परस्य कल्पनया जीवांशो भविष्यतीति परिहरति ॥ नैष दोष इति ॥ वस्तुतस्तु जीवस्यानंशत्वं परमात्मत्वं चिन्मात्रतया दर्शि

यथा वा घटाद्युपाधिपरिछिन्नो घटाद्याकाशः आकाशांशः सन्घटादिनिमित्तापाये आकाशं प्राप्य न निवर्तत इत्येवमेवातउपपन्नमुक्तं यद्गत्वा न निवर्तंत इति ॥ ननु निरवयवस्य परमात्मनः कुतोवयव एकदेशोंश इति सावयवत्वे च नाशप्रसंगो वयवविभागात् नैष दोषः ॥ अविद्याकृतोपाधिपरिछिन्न एकदेशोंश इव कल्पितो

मनः षष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति ॥७॥

यथा दर्शितश्चायमर्थः क्षेत्राध्याये विस्तरशः स च जीवो ममांशत्वेन कल्पितः कथं संसरत्युत्क्रामति चेत्युच्यते ॥
मनः षष्ठानींद्रियाणि श्रोत्रादीनींद्रियाणि प्रकृतिस्थानि स्वस्थाने कर्णशष्कुल्यादौ प्रकृतौ स्थितानि कर्षत्याकर्षति

तत्वादिना हदर्शितश्चेति ॥ यदि परस्यांशत्वेन कल्पितो जीवो वस्तुतस्तदात्मैव तर्हि कथं तस्य संसारित्वमुत्क्रांतिर्वेति शंकते ॥ स चेति ॥ जीवस्य संसरणमुत्क्रमणं चोपपादयितुमुपक्रमते ॥ उच्यत इति ॥७॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामाय नमः ॥ ॥

स्वस्थाने स्थितानामिंद्रियाणां जीवेनाकर्षणकालं एच्छति कस्मिन्निति जीवस्योत्क्रांतिर्नेश्वरस्येत्याशंक्येश्वरशब्दार्थमाह देहादीति उत्क्रांत्यनंतरभाविनी गतिरित्येतदर्थवशादित्युक्तं अवशिष्टानि श्लोकाक्षराणि व्याचष्टे यदात्विति ॥ ८ ॥ मनःषष्ठानींद्रिया

कस्मिन्काले यच्चापि यदा शरीरादप्युत्क्रामतीश्वरो देहादिसंघातस्वामी जीवस्तदाकर्षतीति श्लोकस्य द्वितीयः पादोर्थवशात्प्राथम्येन संबध्यते यदा तु पूर्वस्माच्छरीराच्छरीरांतरमाप्नोति तदा गृहीत्वैतानि मनःषष्ठानींद्रियाणि सं

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ॥ गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ॥ ८ ॥ श्रो
त्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ॥ अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ ९ ॥ श्रीरामाय नमः

याति सम्यग्याति गच्छति किमिवेत्याह वायुः पवनो गंधानिवाशयात्पुष्पादेः ॥ ८ ॥ कानि पुनस्तानि ॥ श्रोत्रं चक्षुः स्पर्शनं च
त्वगिंद्रियं रसनं जिह्वा घ्राणमेव च मनश्च षष्ठं प्रत्येकमिंद्रियेण सहाधिष्ठाय देहस्थो विषयान् शब्दादीनुपसेवते ॥ ९ ॥

प्येवप्रश्नद्वारा विशेषतो दर्शयति ॥ कानीति ॥ शरीरमित्यादिश्लोके देहादात्मनोतिरेकमुक्त्वा श्रोत्रं चक्षुरित्यादौ स्वाभिल
षिते विषये यथायथं प्रथक्करणानां प्रवर्त्तकत्वात्तेभ्योतिरिक्तश्चात्मेत्युक्तं ॥ ९ ॥ श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु ॥ ॥

तर्हि तमुत्क्रांत्यादि कुर्वंतं स्वरूपत्वात् किमिति सर्वे न पश्यंतीत्याशंक्याह एवमिति सन्निहिततमत्वेन दर्शनयोग्यमपि विषयपारव
श्यादात्मानं सर्वे न पश्यंतीति भगवतोऽनुक्रोशं दर्शयति एवंभूतमिति तर्हि केषामात्मदर्शनं तदाह येतु पुनरिति १० ज्ञान
चक्षुः शब्देन न्यायानुगृहीतं शास्त्रं ज्ञानसाधनमुक्तं तत् किमिदानीं शास्त्रमात्रेण न्यायानुगृहीतेनात्मानं पश्यंति नेत्याह

एवं देहगतं देहात् उत्क्रामंतं परित्यजंतं देहं पूर्वोपात्तं स्थितं वा देहे तिष्ठंतं भुंजानं वा शब्दादींश्चोपलभमानं गुणान्वितं
सुखदुःखमोहाद्यैर्गुणैरन्वितमनुगतं संयुक्तमित्यर्थः॥ एवंभूतमप्येनमत्यंतदर्शनगोचरप्राप्तं विमूढा दृष्टादृष्ट
विषयभोगबलाऽऽकृष्टचेतस्तयानेकधा मूढा नानुपश्यंत्यहो कष्टं वर्त्तत इति अनुक्रोशति भगवान् येतु पुनः प्रमा
णजनितज्ञानचक्षुषस्त एवैनं पश्यंति ज्ञानचक्षुषो विवेकदृष्टय इत्यर्थः॥१०॥ केचित्तु॥ यतंतो यत्नं प्रयत्नं कुर्वं

उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितं॥ विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः॥१०॥ यतंतो
योगिनश्चैनं पश्यंत्यात्मन्यवस्थितं॥ यतंतोप्यकृतात्मानो नैनं पश्यंत्यचेतसः॥११॥ श्रीरामायनमः॥

तो योगिनश्च समाहितचित्ता एनं प्रकृतमात्मानं पश्यंति अयमहमस्मीत्युपलभंते॥ आत्मनि स्वस्यां बुद्धाववस्थितं
यतंतोपि शास्त्रादिप्रमाणैरकृतात्मानोऽसंस्कृतात्मानस्तपसेंद्रियजयेन च दुश्चरितादनुपरता अशांतदर्पाः प्रयत्नं कु
र्वंतोपि नैनं पश्यंत्यचेतसोऽविवेकिनः॥११॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥ श्रीरामचंद्राय नमो नमः॥ श्रीः॥

केचित्त्विति॥ प्रयत्नः श्रवणमननात्मकः शास्त्रादिप्रमाणैः यतंतोपीति संबंधः॥ असंस्कृतात्मत्वं प्रकटयति तपसेति॥ दुश्च
रितादविरतिफलं कथयति॥ अशांतेति॥ अशुद्धबुद्धीनामविवेकिनां सदपि श्रवणादि न फलवदिति मत्वाह प्रयत्नमिति॥११॥

अनंतरश्लोकचतुष्टयस्य वृत्तानुवादद्वारा तात्पर्यमाह यस्त्वमिति। जीवात्मत्वेन चिद्रूपत्वमुक्त्वा तदीयचैतन्येनादित्यादीना
मवभासकत्वाच्च ब्रह्मणश्चिद्रूपत्वमित्याह यदादित्येति। चिद्रूपस्यैव ब्रह्मणः सर्वात्मकत्वप्रतिपादकत्वेन श्लोकं व्याच
ष्टे यदित्यादिना। आदित्यादौ तत्र तत्र स्थितं ब्रह्मचैतन्यज्योतिः सर्वावभासकमित्यर्थः। ब्रह्मणः सर्वात्मत्वेन चिद्रूप

यत्पदं सर्वस्यावभासकमप्यादित्यादिकं ज्योतिर्न विभासयति यत्प्राप्ताश्च मुमुक्षवः पुनः संसाराभिमुखा न निवर्त्तंते य
स्य च पदस्योपाधिभेदमनुविधीयमाना जीवा घटाकाशादयश्चाकाशस्यांशास्तस्य पदस्य सर्वात्मत्वं सर्वव्यवहारा
स्पदत्वं च विवक्षुश्चतुर्भिः श्लोकैर्विभूतिसंक्षेपमाह यदादित्यगतमादित्याश्रयं किं तत्तेजो दीप्तिः प्रकाशः स जगद्भा
सयते प्रकाशयति। अखिलं समस्तं यच्चंद्रमसि यच्च शशिप्रभृति तेजोऽवभासकं वर्त्तते यच्चाग्नौ हुतवहे तत्तेजो
विद्धि जानीहि मामकं मदीयं मम विष्णोस्तज्ज्योतिः। अथवा यदादित्यगतं तत्तेजश्चैतन्यात्मकं ज्योतिः यच्चंद्रम

यदादित्यगतं तेजो जगद्भासयतेऽखिलं। यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं ॥१२॥ श्रीः॥

सि यच्चाग्नौ तत्तेजो विद्धि मामकं मदीयं विष्णोस्तज्ज्योतिः ननु स्थावरेषु जंगमेषु च तत्समानं चैतन्यात्मकं ज्योतिस्त
त्र कथमिदं विशेषणं यदादित्यगतमित्यादि नैष दोषः सत्त्वाधिक्यादाविस्तरत्वोपपत्तेः। आदित्यादिषु सत्त्वम
त्यंतप्रकाशं अत्यंतभास्वरं अतस्तत्रैवाविस्तरां ज्योतिरिति तद्विशिष्यते न तु तत्रैव तदधिकमिति। यथा हि लो
के तुल्येपि मुखसंस्थाने न काष्ठकुड्यादौ मुखमाविर्भवति। आदर्शादौ तु स्वच्छे स्वच्छतरे च तारतम्येनाविर्भवति तद्वत् ॥१२॥

त्वमत्र विवक्षितमिति व्याख्यानांतरमाह अथवेति। चैतन्यज्योतिषः सर्वत्राविशेषादादित्यगतत्वविशेषणमयुक्तमिति शंक
ते नन्विति। सर्वत्र सत्त्वेपि क्वचिदेवाभिव्यक्तिविशेषाद्विशेषणमिति परिहरति नैष इति। तदेव प्रपंचयति आदित्यादि
ष्विति। सर्वत्र चैतन्यज्योतिषस्तुल्यत्वेपि क्वचिदेवाभिव्यक्त्या विशेषणोपपत्तिं दृष्टांतेन स्पष्टयति यथा हीति ॥१२॥

वेत्र

दृतश्चसर्वात्मत्वंप्रकृतपदस्ययुक्तमित्याह॥ किंचेति॥ ईश्वरोहिपृथिवीदेवतारूपेणपृथिवींप्रविश्यभूतशब्दितंजगदैश्वरे
णैवबलेनविभर्त्तितत्तोगुर्व्यपिपृथिवीविदीर्यनाधोनिपततीत्यत्रप्रमाणमाह॥ तथाचेति॥ परस्यैवहिरण्यगर्भात्मनाव
स्थानात्॥ नमंत्रयोरन्यपरतेतिभावः॥ देवतात्मनाद्यावापृथिव्योर्दृढत्वंसमुद्धरणत्वसामर्थ्यंतथापीश्वरायत्तमेवस्व

किंच॥ गांपृथिवीमाविश्यप्रविश्यधारयामिभूतानिजगदहमोजसाबलेनयद्बलंकामरागवर्जितंऐ॥
श्वरंजगद्विधारणायपृथिव्यामाविष्टंयेनगुर्वीपृथिवीनाधःपततिनविशीर्यतेचतथाचमंत्रवर्णः
येनद्यौरुग्रापृथिवीचदृढेतिसदाधारपृथिवीमित्यादिश्रुतेश्च॥ अतःगामाविश्यभूतानिचराचरा

गामाविश्यचभूतानिधारयाम्यहमोजसा॥ पुष्णामिचौषधीःसर्वाःसोमोभूत्वारसात्मकः॥१३॥

णिधारयामि॥ किंच॥ पृथिव्यांजाताओषधीःसर्वाव्रीहियवाद्याःपुष्णामिपुष्टिमतीरसस्वादुमतीश्च
करोमिसोमोभूत्वारसात्मकःसोमःसन्सर्वरसात्मकोरसस्वभावःसहिसर्वरसानामाकरःसोमःसहि
सर्वाओषधीःस्वात्मरसानुप्रवेशेनपुष्णाति॥१३॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीरामायनमः॥

रूपधारणं॥ नदपेक्ष्यदुर्बलत्वादितिद्रष्टव्यं॥ ईश्वरस्यसर्वात्मत्वेहेत्वंतरमाह॥ किंचेति॥ रसात्मकसोमरूपतापत्त्याव
पिकिमोषधीरीश्वरःसर्वाःपुष्टिमतीःकरोतीत्याशंक्याह॥ सर्वेति॥१३॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ ॥

भगवतः सर्वात्मत्वे हेत्वंतरमाह किंचेति अहमेवेत्यहंशब्देन परो लक्ष्यते भूत्वा पचामीति संबंधः परस्यैव जाठरात्मना स्थितौ श्रुतिं प्रमाणयति अयमिति बाह्यं भौमाग्निं व्यावर्त्तयति योयमिति देहांतरारंभकं तृतीयं भूतं व्यवच्छिनत्ति येनेति जाठरात्मना परः स्थितश्चेत्तस्य देहाश्रितत्वं सिद्धमिति न पृथग्वक्तव्यमित्याशंक्य पुरुषविधं पुरुषेंतः प्रतिष्ठितं

किंच ॥ अहमेव वैश्वानर उदरस्थोग्निर्भूत्वाऽयमग्निर्वैश्वानरो योयमंतः पुरुषे येनेदमन्नं पच्यते इत्यादिश्रुतेर्वैश्वानरः सन् प्राणिनां प्राणवतां देहमाश्रितः प्रविष्टः प्राणापानसमायुक्तः प्राणापानाभ्यां स

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ॥ प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधं ॥ १४ ॥

मायुक्तः संयुक्तः पचामि पक्तिं करोम्यन्नं चतुर्विधं चतुःप्रकारं ॥ भोज्यं भक्ष्यं चोष्यं लेह्यं च भोक्ता वैश्वानरोग्निर्भोज्यमन्नं सोमस्तदेवं तदुभयमग्नीषोमौ सर्वमिति पश्यतो अन्नदोषलेपो न भवति ॥ १४ ॥ श्रीः ॥

वेदेति श्रुतिमाश्रित्याह प्रविष्ट इति परस्य जाठरात्मनान्नपाकसहकारिकारणमाह प्राणेति संयुक्तत्वं संधुक्षितत्वं अन्नस्य चातुर्विध्यं प्रकटयति भोज्यमिति भोक्तरि वैश्वानरदृष्टिर्भोज्ये सोमदृष्टिरेवं भोक्तृभोज्यरूपं सर्वं जगदग्नीषोमात्मना भुक्तिकाले ध्यायतो भ्यो कुरन्नकृतो दोषो नेति प्रासंगिकं सफलं ध्यानं दर्शयति भोक्तेति १४ श्रीरामायनमः

इतश्च सर्वात्मत्वेन सर्वव्यवहारास्पदत्वमीश्वरस्येत्याह। किं चेति। प्राणिजातं ब्रह्मादिपुत्तिकांतमात्मतया बुद्धौ संनिविष्टत्वं
तद्गुणदोषाणामशेषेण द्रष्टृत्वमतो बुद्धिमध्यस्थ गुणदोषद्रष्टृत्वादितियावत् मत्तः सर्वकर्माध्यक्षात् जगत् यंत्रसूत्रधारा
दित्यर्थः। प्राणिनां स्मृतिज्ञानयोस्तदुपायस्य च भगवदधीनत्वे भगवतो वैषम्यं स्यादित्याशंक्याह। येषामिति स्मृतिर्ज

किंच॥ सर्वस्य च प्राणिजातस्याहमात्मा सन् हृदि बुद्धौ सन्निविष्टोऽतो मत्तः आत्मनः सर्वप्राणिनां स्मृ॥
तिर्ज्ञानं तदपोहनं च येषां यथा पुण्यकर्मिणां पुण्यकर्मानुरोधेन ज्ञानस्मृती भवतस्तथा पापकर्मिणां

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च॥ वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहं॥१५॥

पापकर्मानुरूपेण स्मृतिज्ञानयोरपोहनं चापनयोऽपगमनं च वेदैश्च सर्वैरहमेव परमात्मा वेद्यो वे॥
दितव्यो वेदांतकृद्वेदांतार्थसंप्रदायकृदित्यर्थः॥ वेदविद्वेदार्थविदेव चाहं॥१५॥श्रीरामायनमः॥

न्मांतरादावनुभूतस्य परामर्शः देशकालस्वभावविप्रकृष्टस्यापि ज्ञानमनुभवः॥ धर्माधर्माभ्यां विचित्रं कार्यं कुर्वतो ने
श्वरस्य वैषम्यमिति भावः॥ वेदवेद्यं परं ब्रह्म भगवतोऽन्यदिति शंकां वारयति। वेदैरिति वेदांतानां पौरुषेयत्वं परिह
रति॥ वेदेति॥ तदर्थसंप्रदायप्रवर्त्तकत्वार्थं तदर्थयाथार्थ्यज्ञानवत्वमाह॥ वेदार्थेति॥॥१५॥श्रीरामचंद्रायनमोनमः॥

उत्तरश्लोकानां तात्पर्यं वक्तुं वृत्तं कीर्त्तयति भगवतइति विशिष्टोपाधिरादित्यादिः संप्रत्याध्यायसमाप्तेः उत्तरसंदर्भस्य तात्पर्यमा
ह अधुनेति न केवलं निरुपाधिकात्मस्वरूपनिर्द्धारणायोत्तरो ग्रंथः किंतु सर्वस्यैव गीताशास्त्रस्यार्थनिर्णयार्थमित्याह त
त्रेति क्षराक्षरोपाधिभ्यां परमात्मनाचराशित्रयं उक्तेन सर्वात्मत्वेनाशुद्ध्यादिदोषप्रसक्त्या वुक्तं द्वाविमाविति पुरुषोपाधि
त्वात्पुरुषत्वं न साक्षादिति विवक्षित्वाह पुरुषाविति इति परंपुरुषं व्यावर्त्तयति भगवतइति तत्र कार्यलिंगकमनुमानं स्

भगवतईश्वरस्य नारायणाख्यस्य विभूतिसंक्षेप उक्तः विशिष्टोपाधिकृतः यदादित्यगतं तेजइत्यादिना ऽधुनात
स्यैव क्षराक्षरोपाधिविभक्ततया निरुपाधिकस्य केवलस्य स्वरूपनिर्द्धारयिषयोत्तरे श्लोका आरभ्यंते तत्र सर्वमे
वातीतानागताध्यायार्थजातं त्रिधा राशीकृत्याह द्वाविमौ पृथक्राशीकृतौ पुरुषाविति उच्येते तौ लोके संसारे क्षरः
क्षरतीति क्षरो विनाशी एको राशिर परः पुरुषो ऽक्षरः तत्विपरीतो भगवतो मायाशक्तिः क्षराख्यस्य पुरुषस्योत्पत्तिबी

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ॥ क्षरः सर्वाणि भूतानि कूटस्थो ऽक्षर उच्यते ॥ १६ ॥ श्रीरामायनमः ॥

जनिमित्तं अनेकसंसारिजंतुकामकर्मादिसंस्काराश्रयो ऽक्षरः पुरुष उच्यते कौ तौ पुरुषाविति आह स्वयमेव भगवान्
क्षरः सर्वाणि भूतानि समस्तं विकारजातमित्यर्थः कूटस्थः कूटो राशिरिव स्थितः अथवा कूटो माया वंचना जिह्म
कुटिलतेति पर्यायाः अनेकमायादिप्रकारेण स्थितः कूटस्थः संसारबीजानंत्यान्न क्षरतीत्यक्षर उच्यते ॥ १६ ॥

चयतिक्षराख्यस्येति मायाशक्तिं विना भोक्तॄणां कर्मादिसंस्कारादेवोत्तरकार्योत्पत्तिरित्याशंक्य तस्य निमित्तत्वेपि मायाशक्ति
रुपादानमिति मत्वाह अनेकेति कामकर्मादित्यादिशब्देन ज्ञानं गृह्यते प्रकृतिं पुरुषं चैवेति प्रकृत्योरिहग्रहणमिति शंका
मा कांक्षाद्वारा निवारयति कौ ताविति कूटशब्दार्थमुक्त्वा तेन स्थितस्य कूटस्थ इति संपिंडितमर्थमाह अनेकेति तस्य क
थमक्षरत्वं विना ब्रह्मज्ञानमनाशादित्याह संसारेति ॥ १६ ॥ श्रीसीतारामचंद्रायनमः श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥

कार्यकारणाख्यौराशी दर्शयित्वा राश्यंतरं दर्शयति॥ आभ्यामिति॥ वैलक्षण्यफलमाह॥ क्षरेति॥ उपाधिद्वयकृतगुणदोषास्प
र्शफलितमाह॥ नित्येति॥ आभ्यां क्षराक्षराभ्यामितियावत्॥ उत्तमोन्य इति पदद्वयं वस्तुतः सर्वथैव क्षराक्षरात्मकत्वाभावद
र्शनार्थं॥ जडवर्गस्यान्यत्वकृतं स्वातंत्र्यं निरस्यति॥ स एवेति॥ लोकत्रयमित्युपलक्षणं सर्वं जगत् विवक्षितं॥ चैतन्यमेव व

आभ्यां क्षराक्षराभ्यां विलक्षणः क्षराक्षरोपाधिद्वयदोषेणास्पृष्टो नित्यशुद्धबुद्धमुक्तस्वभावः॥ उत्तमः उ
त्कृष्टतमः पुरुषस्त्वन्यः अत्यंतं विलक्षणः आभ्यां परमात्मेति परमश्चासौ आत्मा च देहाद्यविद्याकृतात्म
भ्यो अन्नमयादिभ्यः पंचकोशेभ्यो परम आत्मा च सर्वभूतानां प्रत्यक्चेतन इत्यतः परमात्मेत्युदाहृतः उक्तो वे

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः॥ यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ १७॥

देषु स एव विशिष्यते यो लोकत्रयं भूर्भुवः स्वराख्यं स्वकीयया मायाबलशक्त्या॥ आविश्य प्रविश्य बिभर्त्ति॥
स्वरूपसद्भावमात्रेण बिभर्त्ति धारयत्यव्ययो नास्य व्ययो विद्यत इत्यव्यय ईश्वरः सर्वज्ञो नारायणाख्य ईशनशीलः॥ १७॥

लं तत्र शक्तिर्मायातयेतियावत्॥ जगद्धारणे परस्यव्यापारांतरं वारयति॥ स्वरूपेति॥ न चास्यान्यो धारयिता स्वतोऽचल
त्वादित्याह॥ अव्यय इति॥ संयुक्तमेतत् क्षरमक्षरं च व्यक्ताव्यक्तं भासते विश्वमीश इति श्रुत्यर्थं गृहीत्वाह॥ ईश्वर इति॥ १७॥
श्रीकेशवनारायणमाधवगोविंदमधुसूदनयोर्जयति॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीरामकृष्णायनमोनमः

किंच । लोकवेदयोर्भगवतो नाम प्रसिद्ध्या सिद्धमप्रपंचत्वमित्याह । यथेति । अश्वकर्णादिवदस्य नाम्नो रूढत्वाद्दर्थविशेषाभावाद्भ
गवतोपि लोकिकेश्वरवदीश्वरत्वं सातिशयमिति नेत्याह । तस्येति । यस्मादित्यस्यापेक्षितं निक्षिपति । अत इति स उत्तमः पुरु
ष इति वाक्यशेषः ॥ १८ ॥ आत्मनोऽप्रपंचत्वं ज्ञानफलोक्त्यास्तौति । य एवेति । यथोक्तविशेषणं सर्वात्मत्वादिविशेषणोपेतमि

यथा व्याख्यातस्येश्वरस्य पुरुषोत्तम इत्येतन्नाम प्रसिद्धं तस्य नाम निर्वचनप्रसिद्धार्थवत्त्वं नाम्नो दर्शयन्निरतिश
यो हमीश्वर इत्यात्मानं दर्शयति भगवान् । यस्मात्क्षरमतीतोऽहं संसारमायावृक्षमश्वत्थाख्यं अतिक्रांतः अहं
अक्षरादपि संसारवृक्षबीजभूतादपि चोत्तम उत्कृष्टतमः ऊर्ध्वतमो वा अतस्ताभ्यां क्षराक्षराभ्यां उत्तमत्वादस्मिन्
वामि लोके वेदे च प्रथितः प्रख्यातः पुरुषोत्तम इत्येवं मां भक्तजनाः विदुः कवयः काव्यादिषु चेदं नाम निवध्नंति पुरु

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ १८ ॥ यो
मामेवमसंमूढो जानाति पुरुषोत्तमं । स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥ श्रीकृष्णः ॥

षोत्तम इत्यनेनाभिधानेनाभिगृणंति ॥ १८ ॥ अथेदानीं यथानिरुक्तमात्मानं यो वेद तस्येदं फलमुच्यते यो मामी
श्वरं यथोक्तविशेषणमेवं यथोक्तेन प्रकारेणाऽसंमूढः संमोहवर्जितः सन् जानात्ययमहमस्मीति पुरुषोत्तमं स
सर्ववित् सर्वात्मना सर्वं वेत्तीति सर्वज्ञः सर्वभूतस्थं भजति मां सर्वभावेन सर्वात्मतया भारत ॥ १९ ॥ श्रीरामायनमः ॥

तियावत् । क्षराक्षरातीतत्वं यथोक्तप्रकारः संमोहवर्जितः संमोहेन देहादिष्वात्मात्मीयत्वबुद्ध्या रहित इत्यर्थः । भगवंतं जानतः
सर्ववित्त्वं तस्यैव सर्वात्मना मेयत्वादित्याह । सर्वविदिति । सर्वात्मनि मय्येवासक्तचित्तत्वेनेत्यर्थः ॥ १९ ॥ श्रीकृष्णायनमः ॥ ॥

अध्यायार्थमनूद्योपसंहारश्लोकमवतारयति ॥ अस्मिन्निति ॥ सर्वस्यां गीतायां शास्त्रशब्दे वक्तव्ये कथमस्मिन्नेवाऽध्याये तत्प्रयोगः स्यादित्याशंक्याह ॥ यद्यपीति ॥ सन्निहितमध्यायं स्तोतुमपि कुतस्तत्र शास्त्रशब्दस्तदर्थाभावात्तत्राह ॥ सर्वो हीति ॥ गीताशास्त्रार्थस्य सर्वस्यात्र संक्षिप्तत्वादेव केवलं शास्त्रशब्दो न भवति किंतु वेदार्थस्यापि सर्वस्यात्र समाप्तेर्युक्तं शास्त्रपदमित्यर्थो नेति ॥ तत्रगमकमाह ॥ यस्तमिति ॥ भगवत्तत्वज्ञाने कृतकृत्यस्तेसुपपादयति ॥ विशिष्टेति ॥ नान्यथेत्युक्तं प्रपंचयति ॥ नचेति ॥ सत्यपि तत्वज्ञाने कर्मणां कर्त्तव्यत्वा

अस्मिन्नध्याये भगवत्तत्वज्ञानं मोक्षफलमुक्त्वाथेदानीं तत्स्तोति इत्येतद्गुह्यतमं गोप्यतमममत्यंतरहस्यमित्येतत् किं तच्छास्त्रं यद्यपि गीताख्यं समस्तं शास्त्रमुच्यते तथाप्ययमेवाध्याय इह शास्त्रमित्युच्यते स्तुत्यर्थं प्रकरणात् सर्वो हि गीताशास्त्रार्थोऽस्मिन्नध्याये समासेनोक्तो न केवलं सर्वश्च वेदार्थ इह परिसमाप्तो यस्तं वेद स वेदवित् वेदैश्च सर्वैरहमेव वेद्य इति चोक्तं इदमुक्तं कथितं मयाहेऽनघ एतच्छास्त्रं यथा दर्शितार्थं बुद्ध्वा बुद्धिमान् स्याद्भवेन्नान्यथा कृतकृत्यश्च भारत कृतं

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ॥ एतत् बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारत ॥ २० ॥ श्रीः ॥

कृत्यं कर्त्तव्यं येन स कृतकृत्यः ॥ विशिष्टजन्मप्रसूतेन ब्राह्मणेन यत्कर्त्तव्यं तत्सर्वं भगवत्तत्वे विदिते कृतं भवेदित्यर्थः नचान्यथा कर्त्तव्यं परिसमाप्यते कस्यचिदित्यभिप्रायः सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते इति चोक्तमेतद्धि जन्मसामग्र्यं ब्राह्मणस्य विशेषतः प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथेति च मानवं वचनं यत एतत्परमार्थतत्वं मत्तः श्रुतवानसि अतः कृतार्थस्त्वं हे भारत ॥ २० ॥ ॥ इति श्रीमद्भगवद्गीताभाष्यटीकायां पंचदशोऽध्यायः ॥ १५ ॥ ॥

न्न कर्त्तव्यसमाप्तिरित्याशंक्याह ॥ सर्वमिति ॥ तत्वज्ञाने कृतार्थते यत्र मनोरपि संमतिमाह ॥ एतद्धीति ॥ भारतेति संबोधनतात्पर्यमाह ॥ यत इति ॥ तदनेनात्मनो देहाद्यतिरिक्तत्वं चित्रूपत्वं सर्वज्ञत्वं सर्वात्मत्वं कार्यकारणविनिर्मुक्तत्वेनाप्रपंचत्वं तस्याखंडैकरसब्रह्मात्मत्वज्ञानादशेषपुरुषार्थपरिसमाप्तिरित्युक्तं ॥ २० ॥ इति श्रीमद्भगवद्गीताभाष्ये श्रीमदानंदगिरिटीकायां पंचदशोऽ

व्यवहितेन संबंधं वदन्नध्यायांतरमवतारयति दैवीति सूचिता राक्षसीमासुरीं चैव प्रकृतिं मोहिनीमित्यादाविति शेषः प्रकृतीनां वि
स्तरेण दर्शनं कुत्रोपयोगीत्याशंक्याविभक्त्योपयोगमाह संसारेति अतीते चाध्याये कर्मानुबंधीनि अधश्च मूलान्यनुसंतता
नीत्यत्र कर्मव्यंग्या वासनाः संसारस्यावांतरमूलत्वेनोक्तास्ता मनुष्यदेहे प्राग्भवीयकर्मानुसारेण व्यज्यमानाः सात्विकादिभेदे

दैव्यासुरी राक्षसी चेति प्राणिनां प्रकृतयो नवमेऽध्याये सूचितास्तासां विस्तरेण प्रदर्शनाय अभयं सत्वसंशु
द्धिरित्यादिरध्याय आरभ्यते तत्र संसारमोक्षाय दैवी प्रकृतिः निबंधनायासुरी राक्षसी चेति दैव्या आदा
नाय प्रदर्शनं क्रियते इतरयोः परिवर्जनाय ॥श्रीभगवानुवाच॥ अभयं अभीरुता सत्वसंशुद्धिः सत्वस्यां

॥श्रीभगवानुवाच॥ अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः॥ ॥

तःकरणस्य व्यवहारेषु परवंचनमायानृतादिपरिवर्जनं संशुद्धिः शुद्धस्वभावेन व्यवहार इत्यर्थः॥ ज्ञान
योगव्यवस्थितिः ज्ञानं शास्त्रत आचार्यतश्चात्मादिपदार्थानामवगमोऽवगतानामिंद्रियाद्युपसंहारेणै
काग्र्यतया स्वात्मसंवेद्यतापादनं योगस्तयोर्ज्ञानयोगयोर्व्यवस्थितिर्व्यवस्थानं तन्निष्ठता॥ ॥ ॥

न दैव्यादिप्रकृतित्रयत्वेन विभक्ता आविस्तितीर्षुर्भगवानित्युक्तवानित्याह भगवानिति॥ अभीरुता शास्त्रोपदिष्टेऽर्थे संदेहं हि
त्वाऽनुष्ठाननिष्ठत्वं परवंचना परस्य व्याजेन वशीकरणं माया हृदयेऽन्यथा कृत्वा बहिरन्यथा व्यवहरणं॥ अनृतं यथादृष्टाक
थनं॥ आदिपदेन विप्रलंभविभ्रमादिग्रहः उक्तमर्थं संक्षिप्याह शुद्धेति॥ ॥

एषेत्यभयाद्याज्ञानादिस्थिसंताद्विधोक्तेतियावत् तामेवसात्विकींप्रकृतिंप्रकटयति यत्रेति ज्ञानेकर्मणिवाधिकृतानाम
भीरुतयायाप्रकृतिःसातेषांसात्विकीसंपदित्यर्थः महाभाग्यानामसुत्तमादैवीसंपदुक्तासंप्रतिसर्वेषांयथासंभवंसं

एषाप्रधानादैवीसात्विकीसंपद्यत्रयत्रयेषामधिकृतानांयाप्रकृतिःसंभवतिसात्विकीसोच्यते॥
दानंयथाशक्तिसंविभागोन्नादीनांदमश्चबाह्यकरणानामुपशमोंतःकरणस्योपशमंशांतिंवक्ष्य

दानंदमश्चयज्ञश्चस्वाध्यायस्तपआर्जवं॥१॥

तियज्ञश्चश्रौतोग्निहोत्रादिःस्मार्त्तश्चदेवयज्ञादिःस्वाध्यायःऋग्वेदाद्यध्ययनमदृष्टार्थं॥तपोव
क्ष्यमाणंशारीरादिआर्जवंऋजुत्वंसर्वदा॥१॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥श्रीकृष्णः॥

परंव्यपदिशति दानमिति बाह्यकरणविशेषणेकारणमाह अंतःकरणस्येति देवयज्ञादि[illegible]रित्यादिशब्देनपितृय
ज्ञोभूतयज्ञोमनुष्ययज्ञश्चेतित्रयमुक्तंब्रह्मयज्ञस्यस्वाध्यायेनपृथक्करणात् ॥१॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥॥

दैवीसंपदमभिजातस्यविशेषणांतराणिदर्शयति । किंचेति । त्यागशब्देनयागदानंकस्मान्नोच्यतेतत्राह । पूर्वमिति । लज्जा

किंच । अहिंसाऽहिंसनंप्राणिनांपीडावर्जनंसत्यमप्रियानृतवर्जितंयथाभूतार्थवचनं
अक्रोधःपरैराक्रुष्टस्याभिहतस्यवाप्राप्तस्यक्रोधस्योपशमनंत्यागःसंन्यासःपूर्वंदानस्यो
क्तत्वात्शांतिरंतःकरणस्योपशमःअपैशुनंअपिशुनतापरस्मैपररंध्रप्रकटीकरणंपै

अहिंसासत्यमक्रोधस्त्यागःशांतिरपैशुनं । दयाभूतेष्वलोलुत्वंमार्दवंह्रीरचापलं ॥ २ ॥

शुनंतदभावोऽपैशुनंदयाकृपादुःखितेषुभूतेषु । अलोलुत्वंइंद्रियाणांविषयसन्निधा
वविक्रियामार्दवंमृदुताऽक्रौर्यंह्रीर्लज्जा । अचापलमसतिप्रयोजनेवाक्पाणिपादादीना
मव्यापारयितृत्वं ॥ २ ॥ श्रीकेशवनारायणमाधवगोविंदमधुसूदनयोर्जयति ॥ ॥

अकार्यनिवृत्तिहेतुर्गर्हानिमित्तामनोवृत्तिः ॥ २ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु । श्रीरामचंद्रायनमोनमः ॥ ॥

दैवीसंपदं प्राप्तस्य विशेषणांतराण्यपि संतीत्याह् किंचेति व्यावर्त्यं कीर्तयति नेति अध्यात्माधिकारादिति शेषः क्षमाऽक्रो
धयोरेकार्थत्वेन पौनरुक्त्यमाशंक्य परिहरति उत्पन्नायामिति तयोरेवं विशेषादपौनरुक्त्यं फलतीत्याह् इत्थमिति वृ
त्तिविशेषमेव विशदयति येनेति शौचस्य द्वैविध्यं प्रकटयति मृज्जलेत्यादिना नैर्मल्यमेव स्फोरयति मायेति उक्तमु

किंच तेजः प्रागल्भ्यं न त्वग्गतादीप्तिः क्षमा आकृष्टस्य ताडितस्य वांतर्विक्रियानुत्पत्तिरुत्पन्नायां विक्रि
यायां प्रशमनमक्रोध इत्यवोचाम इत्थं क्षमायाः अक्रोधस्य च विशेषः धृतिः देहेंद्रियेषु अवसादं प्राप्तेषु
तस्य प्रतिषेधकों ऽतःकरणवृत्तिविशेषो येनोत्तंभितानि करणानि देहश्च नावसीदंति शौचं द्विविधं मृज्जल
कृतं बाह्यमाभ्यंतरं मनोबुद्ध्योर्नैर्मल्यं मायारागादिकालुष्याभावः एवं द्विविधं शौचमद्रोहः परजिघांसा

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता भवंति संपदं दैवीमभिजातस्य भारत ॥३॥

भावो नातिमानिता अत्यर्थं मानोऽतिमानः स यस्य विद्यते सोऽतिमानी तद्भावोऽतिमानिता नातिमानिता आ
त्मनः पूज्यतातिशयभावनाभाव इत्यर्थः भवंत्यभयादीन्येतदंतानि संपदमभिजातस्य किं विशिष्टां सं
पदं दैवीं देवानां संपदमभिलक्ष्य जातस्य दैवी विभूत्यर्हस्य भाविकल्याणस्येत्यर्थः हे भारत ॥३॥ ॥

पसंहरति एवमिति अतिमानित्वाभावमेव व्यनक्त्यात्मन इति कस्यैतानि विशेषणानीत्यपेक्षायामाह् भवंती
ति सोपाधिकस्य मनुष्यदेहस्यैव कथं संपदमभिलक्ष्य जातत्वमित्याशंक्याह् दैवीति ३ श्रीरामचंद्राय नमः ॥ ॥

आदेयत्वेनदैवीसंपदमुक्त्वा हेयत्वेनासुरीसंपदमाह ॥ अथेति ॥ उत्सेकोमदोमहद्वधीरणाहेतुः ॥ आत्मन्युत्कृष्टत्वाध्यारोपो
तिमानः क्रोधस्तुकोपापरपर्यायः स्वपरापकारप्रवृत्तिहेतुर्नेत्रादिविकारलिंगोंतःकरणवृत्तिविशेषः परुषोनिष्ठुरः प्रत्य
क्षरूक्षवाक् तस्यभावः पारुष्यंतदुदाहरति ॥ यथेति ॥ तामभिजातस्यदंभादीन्यज्ञानांतानिभवंतीत्यनुषज्यते ॥ ४ ॥ का

अथेदानीमासुरीसंपदुच्यते ॥ दंभोधर्मध्वजित्वं दर्पः धनस्वजनादिनिमित्तः उत्सेकः अभिमानः पूर्वोक्तः अति
मानः पूर्वोक्तः क्रोधश्च पारुष्यमेव च परुषवचनं यथा काणं चक्षुष्मान् विरूपं रूपवान् हीनाभिजातमुत्तमा
भिजात इत्यादि अज्ञानमविवेकज्ञानं मिथ्याप्रत्ययः कर्तव्याऽकर्तव्यादिविषयं अभिजातस्य पार्थ किमभिजा
तस्येत्याह ॥ असुराणां संपदासुरी तामभिजातस्येत्यर्थः ॥ ४ ॥ अनयोः संपदोः कार्यमुच्यते ॥ देवी संपद्या सावि

दंभोदर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ॥ अज्ञानं चाभिजातस्य पार्थ संपदमासुरीं ॥ ४ ॥ दैवी सं
पद्विमोक्षाय निबंधायासुरी मता ॥ मा शुचः संपदं दैवीमभिजातोसि पांडव ॥ ५ ॥ श्रीरामायनमः ॥

मोक्षाय संसारबंधनान्निवंधाय नियतो बंधो निबंधस्तदर्थमासुरी संपत् मताभिप्रेता तथा राक्षसी च तत्रैवमुक्ते
सत्यर्जुनस्यांतर्गतं भावं किं अहमासुरीसंपद्युक्तः किं वा दैवीसंपद्युक्तः इत्येवमालोचनास्वरूपं भावमालक्ष्याह
भगवान् माशुचः शोकं मा कार्षीः संपदं दैवीं अभिजातोसि अभिलक्ष्य जातोसि भाविकल्याणस्त्वमसीत्यर्थः ॥

र्य फलविभागः आसुरी सुपलक्षणं राक्षसी चेति द्रष्टव्यमित्याह ॥ तयेति ॥ फलविभागे संपदोरेवमुक्ते प्रतीत्याऽर्जु
नस्याभिप्रायं भगवतोक्तनमित्याह ॥ तत्रेति ॥ तत्राभिजात्यं हेतुं करोति ॥ हे पांडवेति ॥ ५ ॥ श्रीरामचंद्रायनमः ॥

गीताभाष्य

रक्षसां संपत्तृतीयास्ति सा कस्मान्नोक्तेत्याशंकासु यो मंतर्भावादित्याह ॥ द्वाविति ॥ भूतानां द्वैविध्ये मानत्वेनोद्दीथब्रा
ह्मणमुदाहरति ॥ द्वयाहेति ॥ संपत्द्वययुक्तेभ्योतिरिक्तानामपि प्राणिभेदानां संभवात् कुतो भूतानां द्वित्वनियतिरित्या

द्वौ द्विसंख्याकौ भूतसर्गौ भूतानां मनुष्याणां सर्गौ सृष्टी भूतसर्गौ सृज्येते इति सर्गौ भूतान्येव सृज्यमानानि दै॥
व्यासुरसंपद्द्वययुक्तानीति द्वौ भूतसर्गौ इत्युच्येते द्वयाह प्राजापत्या देवाश्चाऽऽसुराश्चेति श्रुतेः लोकेस्मिन् सं॥
सारइत्यर्थः ॥ सर्वेषां द्वैविध्युपपत्तेः लोकेस्मिन्मनुष्यलोके कौतौ भूतसर्गौ इत्युच्येते प्रकृतावेव दैव आसु
र एव च उक्तयोरेव पुनरनुवादप्रयोजनमाह दैवो भूतसर्गोऽभयं सत्वसंशुद्धिरित्यादिना विस्तरशो विस्तरप्र॥

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ॥ दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे श्रृणु ॥ ६ ॥

कारैः प्रोक्तः कथितः न त्वासुरो विस्तरशोऽतस्तत्परिवर्जनार्थमासुरं पार्थ मे मम वचनादुच्यमानं विस्तर
शः श्रृणु अवधारय अध्यायपरिसमाप्तेः आसुरी संपत्प्राणिविशेषविषयत्वेन प्रदर्श्यते ॥ प्रत्यक्षीक
रणे न च शक्यतेऽस्याः परिवर्जनं कर्त्तुमिति ॥ ६ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामायनमः ॥ ॥

शंक्याह ॥ सर्वेषामिति ॥ नन्वध्यायशेषेणासुरसंपदुपदर्शनमयुक्तं तस्यास्त्याज्यत्वेन पंकप्रक्षालनन्यायापातावता
रादित्याशंक्याह ॥ प्रत्यक्षीकरणेन चेति ॥ ६ ॥ श्रीरामायनमः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामायनमः

वर्जनीयामासुरीं संपदं विवृणोति ॥ प्रवृत्तिं चेति ॥ तां विहितां प्रवृत्तिं न जानंतीत्यर्थः ॥ तां च निषिद्धां क्रियां न जानंतीति संबंधः न शौचमित्यादेस्तात्पर्यमाह ॥ अनाचारा इति ॥ शौचसत्ययोराचारांतर्भावेपि ब्राह्मणपरिव्राजकन्यायेन पृथगुपादानं ॥७॥ आसुराणां

प्रवृत्तिं च प्रवर्त्तनं यस्मिन्पुरुषार्थसाधने कर्त्तव्ये या प्रवृत्तिः तां निवृत्तिं च तद्विपरीतां यस्मादनर्थहेतोर्निवर्त्तितव्यं सा निवृत्तिस्तां च जना आसुरा न विदुः न जानंते न केवलं प्रवृत्तिनिवृत्ती एव न विदुः न शौचं नापि चाचारो न सत्यं तेषु विद्यते अशौचाः अनाचाराः मायाविनो अनृतवादिनो ह्यासुराः ॥७॥ किंच असत्यं यथा वयमनृतप्रायास्तथेदं जगत्सर्वमसत्यमप्रतिष्ठं च नास्य धर्माधर्मौ प्रतिष्ठाऽतोप्रतिष्ठं चेति ते आसुरा जनाः जगदाहुरनीश्वरं च धर्माधर्मसव्यपेक्षो

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ॥ न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥७॥ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं ॥ अपरस्परसंभूतं किमन्यत्कामहैतुकं ॥८॥ श्रीरामचंद्राय नमः ॥ ॥

स्य शासिता ईश्वरो न विद्यत इति ॥ अतो अनीश्वरं जगदाहुः ॥ किंच ॥ अपरस्परसंभूतं कामप्रयुक्तयोः स्त्रीपुरुषयोः अन्योन्यसंयोगाज्जगत्सर्वं संभूतं किमन्यत्कामहैतुकं कामहैतुकमेव कामहैतुकं किमन्यज्जगतः कारणं न किंचिददृष्टं धर्माधर्मादि कारणांतरं विद्यते जगतः काम एव प्राणिनां कारणमिति लोकायतिकदृष्टिरियं ॥८॥ श्रीः ॥

विशेषणांतराण्यपि संतीत्याह ॥ किंचेति ॥ विद्यत इत्याहुरिति पूर्वेण संबंधः ॥ शास्त्रैकगम्यमदृष्टं निमित्तीकृत्य प्रकृत्यधिष्ठात्रा लकेन ब्रह्मणा रहितं जगदिष्यते चेत्कथं तदुत्पत्तिरित्याशंक्याह ॥ किंचेति ॥ किमन्यदित्यादेराक्षेपस्य तात्पर्यमाह ॥ न किंचिदिति ॥८

यथोक्ता दृष्टिर्ब्रह्मदृष्टिवद्दिष्टे वेत्याशंक्याह एतामिति प्रागुपदिष्टामेतां लोकायतिकदृष्टिमवलंब्येति यावत् नष्टस्वभावत्वमेवस्य
ष्टयति विभ्रष्टेति विषयबुद्धेरल्पत्वं दृष्टमात्रोद्देशेन प्रवृत्तत्वं जगतः प्राणिजातस्येति यावत् ९ तानेव दुराचारानासुरान् प्रका

एतां दृष्टिमवष्टभ्याश्रित्य नष्टात्मानो नष्टस्वभावा विभ्रष्टपरलोकसाधना अल्पबुद्धयो विषयविषयाल्पैव बुद्धिर्येषां
तेऽल्पबुद्धयः प्रभवंत्युग्रकर्माणः क्रूरकर्माणो हिंसात्मकाः क्षयाय जगतः प्रभवंतीति संबंधः जगतोऽहिताः शत्रव इत्य
र्थः ९ तेच कामं इच्छाविशेषमाश्रित्यावष्टभ्य दुःपूरमशक्यपूरणं दंभमानमदान्विताः दंभश्च मानश्च मदश्चैतैर
न्विता दंभमानमदान्विताः मोहादविवेकतः गृहीत्वोपादायासद्ग्राहानशुभनिश्चयान्प्रवर्त्तंते इहैव ते इह लोकेऽशुचिव्र

एतां दृष्टिमवष्टभ्य नष्टात्मानोल्पबुद्धयः ॥ प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥९॥
काममाश्रित्य दुःपूरं दंभमानमदान्विताः ॥ मोहाद्गृहीत्वासद्ग्राहान् प्रवर्त्तंतेऽशुचिव्रताः ॥१०॥
चिंतामपरिमेयांच प्रलयांतामुपाश्रिताः ॥ कामोपभोगपरमा एतावदिति निश्चिताः ॥११॥

ताः अशुचीनि व्रतानि येषां तेऽशुचिव्रताः १० किंच चिंतामपरिमेयांच परिमातुं न शक्यते यस्याश्चिंताया इयत्ता साऽ
परिमेया तामपरिमेयां तां प्रलयांतां मरणांतामाश्रिताः सदा चिंतापरा इत्यर्थः कामोपभोगपरमाः काम्यंत इति का
माः शब्दादयः तदुपभोगपरमा अयमेव परमः पुरुषार्थो यः कामोपभोग इत्येवं निश्चितात्मानः एतावदिति निश्चिताः

गं तरेण विशिनष्टि तेचेति १० तानेव विधांतरेण विशिनष्टि किंचेति चिंता मात्मीययोगक्षेमोपायालोचनात्मिका मपरिमेयवि
षयत्वात्परिमातुमशक्यामाश्रिता इति संबंधः एष कामोपभोगः परमयनं सुखस्यैतावत् पारत्रिकं तु नास्ति सुखमिति निश्चय

वंत इत्याह ॥ एतावदिति ॥ १२ ॥

आसुरानेव पुनर्विशिनष्टि। आशेति। अशक्योपायार्थविषया ऽनवगतोपायार्थविषया वा प्रार्थना आशास्ताः पाशा इव पाशास्तैर्बंधितैर्बद्धा इव श्रेयसः प्रच्याव्येत स्ततो नीयमाना इत्याह। आशा एवेति १२ तेषामभिप्रायोऽपि विवेकविरोधीत्याह। ईदृशश्चेति। द्रव्यं गो हिरण्यादि इदमन्यत् बुद्धौ प्रार्थ्यमानत्वेन विपरिवर्त्तमानमित्येतत्॥ १३॥ यथोक्तेऽस्मदभिप्राये प्रतिबंधक शत्रुरपि न संभ

आशापाशशतैराशा एव पाशा आशापाशाः तच्छतैर्बद्धाः संतः सर्वतः आकृष्यमाणाः कामक्रोधौ परमयनं परमाश्रयो येषां ते कामक्रोधपरायणा ईहंते चेष्टंते कामभोगार्थं कामभोगप्रयोजनाय न धर्मार्थं अन्यायेनार्थसंचयान् अर्थप्रचयान् अर्थप्रचयं प्रति अन्यायेन परस्वापहरणादिनेत्यर्थः॥ १२॥ ईदृशश्च तेषामभिप्रायः॥ इदं द्रव्यं अद्य मये दानीं लब्धं इदमन्यत्प्राप्स्ये मनोरथं मनस्तुष्टिकरं प्राप्स्ये इदं चास्ति इदमपि मे भविष्यति आगामिनि संवत्सरे पुनर्द्दनं तेनाहं धनी वि

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ईहंते कामभोगार्थमन्यायेनार्थसंचयान्॥ १२॥ इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथं॥ इदमस्तीदमपि मे भविष्यति पुनर्द्धनं॥ १३॥ असौ मया हतः शत्रुर्हनिष्ये चापरानपि॥ ईश्वरोहमहं भोगी सिद्धोहं बलवान् सुखी॥ १४॥ श्रीरामचंद्राय नमो नमः॥

ख्यातो भविष्यामि॥ १३॥ असौ देवदत्तो मया हतः दुर्ज्जयः शत्रुर्हनिष्ये चान्यान्वराकान ऽपि किमेते करिष्यंति तपस्विनः सर्वथा नास्ति कश्चित् मम तुल्य ईश्वरोहमहं भोगी सर्वप्रकारेण सिद्धोहं संपन्नः पुत्रैः पौत्रैः स्त्रीभिर्न केवलं मनुष्यो हं बलवान् सुखी चाहमेव अन्ये तु भूमिभारावतारा॥ १४॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥ श्रीरामचंद्राय नमो नमः॥

वतीत्याह। असाविति। त्वत्तो विहीनानां त्वया परिभवेऽपि त्वत्तुल्यानां शत्रूणां परिभवो निश्चितो न भवतीत्याशंक्याह। सर्वथेति। ऐश्वर्यातिरेकेऽपि कुतस्तेषां भोगसामर्थ्यमित्याशंक्याह। अहमिति। सिद्धत्वमेव स्फुटयति। संपन्न इति। बलवानोजस्वी रोगरहितः॥ १४॥

विद्यावृत्तधनाभिजनैर्मत्तुल्यो नास्तीत्याह। आढ्येति। तथापि यागदानाभ्यां तत्फलेन वा कश्चिदधिको भविष्यतीत्याह। किं चेति
न च तेषामेषोऽभिप्रायः साधीयानित्याह। इत्येवमिति १५ उक्तप्रकारविपर्ययेण कृत्याकृत्यविवेकविकलानां किं स्यादित्यपेक्षा
यामाह। अनेकेति। कामा विषयास्तेषां भोगेषु तत्प्रयुक्तेषूपभोगेषु इति यावत् १६ ननु तेषामपि केषांचिद्वैदिककर्मणि या

आढ्यो धनेनाभिजनवान् सप्तपुरुषं श्रोत्रियत्वादिसंपन्नस्तेनापि न मत्तुल्योऽस्ति कश्चित् कोन्योऽस्ति सदृशस्तुल्यो मया।
किं च। यक्ष्ये यागेनान्यानप्यभिभविष्यामि दास्यामि नटादिभ्यो मोदिष्ये हर्षं विविधं प्राप्स्यामीत्येवमज्ञानविमोहिताः चा
तिशयं। अविवेकभावमापन्नाः १५ अनेकचित्तविभ्रांता उक्तप्रकारैरनेकैश्चित्तैः विविधं भ्रांताः। अनेकचित्तविभ्रां
ता मोहजालसमावृताः मोहो विवेकोऽज्ञानं तदेव जालमिवावरणात्मकत्वात्तेन समावृताः प्रसक्ताः कामभोगेषु तत्रैव नि

आढ्योऽभिजनवानस्मि कोन्योऽस्ति सदृशो मया। यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥१५॥ अने
कचित्तविभ्रांता मोहजालसमावृताः। प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ ॥१६॥ आत्मसंभावि
तास्तब्धा धनमानमदान्विताः। यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकं ॥१७॥ श्रीरामचंद्राय नमो नमः॥

बंधनाः संतस्तेनोपचितकल्मषाः पतंति नरकेऽशुचौ वैतरण्यादौ १६ आत्मसंभाविताः सर्वगुणविशिष्टतयात्मनैव
आत्मन्येव आत्मसंभाविताः स्तब्धा अप्रणतात्मानो धनमानमदान्विताः। धननिमित्तो मानो मदश्च ताभ्यां धनमानम
दाभ्यां अन्विताः यजंते नामयज्ञैर्नाममात्रैर्यज्ञैस्ते दंभेन धर्मध्वजितया अविधिपूर्वकं विहितांगेतिकर्तव्यतारहितैः ॥१७॥

गदानादौ प्रवृत्तिप्रतिपत्तेरयुक्तं वैतरण्यादौ पतनमिति चेत्तत्राह। आत्मेति। आसुरीं संपदमभिजातैरधर्मजातमेव संची
यते प्रवृत्तिरपि वैदिके वर्त्मनि नैव पुण्यामित्युक्तं १७ श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु ॥ श्रीरामकृष्णायनमोनमः ॥

असज्ज्ञानायुनरासुरादूरादेवोद्विग्नं तद्दृश्याह। अहंकारमिति। अहंकारमेव स्फोरयति। विद्यमानैरिति। अध्यारोपितत्वे शिष्टविषय
त्वादहंकारस्याविद्यामूलत्वेनाविद्यात्मकत्वमाह। अविद्याख्य इति। विवेकिभिरतियत्नोद्वहेयत्वं सूचयति कष्टतम इति। तद्दे
वस्पष्टयति। सर्वेति। तं संश्रिता इति संबंधः। कार्यकारणसामर्थ्यमुक्तविशेषणं बलं अहंकार एवमहद्दवधीरणापर्यंतत्वेन
परिणतो दर्पस्तं व्याकरोति। दर्पोनामेत्यादिना। अन्यांश्च दोषान्मात्सर्यादीन्न केवलमुक्तमेव तेषां विशेषणं किंतु कष्टतममस्ति

अहंकारमहंकरणमहंकारः विद्यमानैरविद्यमानैश्च गुणैरात्मन्यध्यारोपितैर्विशिष्टमात्मानमहमिति मन्यते सोऽहंकार
अविद्याख्यः कष्टतमः सर्वदोषाणां मूलं सर्वानर्थप्रवृत्तीनां च मूलं तं तथा बलं पराभिभवनिमित्तं कामरागान्वितं दर्पं द
र्पोनाम यस्योद्भवे धर्ममतिक्रामति सोऽयमंतःकरणाश्रयो दोषविशेषः कामं स्त्र्यादिविषयं क्रोधमनिष्टविषयं एतानन्यां

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः। मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः॥ १८॥ श्रीरामः॥

श्च महतो दोषान्संश्रिताः किंच ते मामीश्वरं आत्मपरदेहेषु स्वदेहेषु परदेहेषु च तत्तद्बुद्धिकर्मसाक्षिभूतं मां प्रद्विषंतो म॥
च्छासनातिवर्तित्वं प्रद्वेषस्तं कुर्वंतः अभ्यसूयकाः सत्कर्मस्थानां गुणेष्वसहमानाः॥ १८॥ श्रीरामचंद्राय नमो नमः॥

विशेषणांतरमित्याह। किंचेति। यद्यपीश्वरं प्रतिद्वेषः तेषां संभाव्यते तथापि कथं स्वदेहेषु परदेहेषु च तं प्रतिद्वेषः नहि तत्र भो
क्तारमंतरेणेश्वरस्यावस्थानमित्याशंक्याह। तत्तद्बुद्धीति। तेषामीश्वरप्रद्वेषमेव प्रकटयति। मच्छासनेति। ईश्वरस्य शास
नं श्रुतिस्मृतिरूपं तदतिवर्तित्वं [illegible] तदुक्तार्थज्ञानानुष्ठाने पराङ्मुखत्वं॥ १८॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥

गी॰भा॰ ३४२

तेषामुक्तविशेषणानामासुराणां किं स्यादिति तत्राह तानिति भगवतो नैर्घृण्यप्रसंगं प्रसादिशति अधर्मेति १९ ननु तेषाम
पिक्रमेण बहूनां जन्मनामंते श्रेयो भविष्यतीनेत्याह आसुरीमिति तेषामीश्वरप्राप्तिशंकाभावे कथं तन्निषेध्यस्याशंका

तानहं सन्मार्गप्रतिपक्षभूतान् साधुद्वेषिणो द्विषतश्च मां क्रूरान् संसारेष्वेव नरकसंसरणमार्गेषु नराधमा
न धर्मदोषवत्त्वात् क्षिपामि प्रक्षिपाम्यजस्रं संततं अशुभानशुभकर्मकारिण आसुरीष्वेव क्रूरकर्मप्रायासु
सिंहव्याघ्रादियोनिषु क्षिपामीत्यनेन संबंधः १९ आसुरीं योनिमापन्नाः प्रतिपन्नाः मूढा अविवेकिनो ज

तानहं द्विषतः क्रूरान्संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु १९
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। मामप्राप्यैव कौंतेय ततो यांत्यधमां गतिं ॥२०

न्मनि जन्मनि प्रतिजन्म तमोबहुलास्वेव योनिषु जायमाना अधो गच्छंति ते मूढा मामीश्वरमप्राप्यानासा
द्यैव कौंतेय ततस्तस्मादपि यांति अधमां निकृष्टतमां गतिं मामप्राप्यैवेति न मत्प्राप्तौ कदाचिदाशंकास्ति
ततो मच्छिष्टसाधुमार्गप्राप्तिमप्राप्यैवेत्यर्थः २० श्रीसीतारामचंद्रजी प्रसन्नो मस्तु श्रीकृष्णायनमः

आ॰गी॰ ९६

शिव ३४२

स्यादित्याशंक्याह मामित्यादिना यस्मादासुरी संपदनर्थपरिपंथिनी तस्माद्यावत्पुरुषः स्वतंत्रो न कां चित्यारव्यप करी योनि
मापन्नस्तावदेव तेनासौ परिहरणीयेति समुदायार्थः २० श्रीसीतारामचंद्रायनमः श्रीरामकृष्णायनमोनमः श्री

कथमासुरी संपदनंतभेदवती पुरुषेणापि परिहर्तुं शक्यत इत्याशंक्याह सर्वस्या इति संक्षेपोक्तिफलमाह यस्मिन्निति कामादौ
त्रिविधे सर्वस्यासुरी संपद्भेदस्यांतर्भावे पि कथमसौ परिह्रियते तत्राह यत्परिहारेणेति कामादिपरिहारेणासुरी संपद्भेदपरिहारे
पि कथं सर्वानर्थपरिवर्जनमित्याशंक्याह यन्मूलमिति कथमात्मनो नित्यस्य नाशः शंकेति तत्राह कस्मैचिदिति त्रिविधमि

सर्वस्या आसुर्याः संपदः संक्षेपोयमुच्यते यस्मिंस्त्रिविधे सर्व आसुरी संपद्भेदोऽनंतो प्यंतर्भवति यत्परिहारेण प
रिहृतश्च भवति यन्मूलं सर्वस्यानर्थस्य तदेतदुच्यते त्रिविधं त्रिःप्रकारं नरकस्य नरकप्राप्तौ इदं द्वारं नाशनमात्मनः
यत् द्वारं प्रविशन्नेव नश्यति आत्मा कस्मैचित्पुरुषार्थाय योग्यो न भवति इत्येतत् उच्यते द्वारं नाशनं आत्मन इति किं तत् ॥
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् यत एतत् द्वारं नाशनमात्मनस्तस्मात्कामादित्रयमेतत्त्यजेत् २१ त्यागस्तु

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ॥ कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ २१ ॥ एतैर्विमु
क्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः ॥ आचरत्यात्मनः श्रेयस्ततो याति परां गतिं ॥ २२ ॥ श्रीः ॥ ॥

तिरियं एतैर्विमुक्तः कौंतेय तमोद्वारैस्तमसो नरकस्य दुःखमोहात्मकस्य द्वाराणि कामादयस्तैरेतैस्त्रिभिर्विमुक्तो न
र आचरत्यनुतिष्ठते किं आत्मनः श्रेयो यत्प्रतिबद्धः पूर्वं नाचरति तदपगमादाचरति ततस्तदाचरणाद्याति परां गतिं मो
क्षमपि २२ सर्वस्यैतस्यासुरी संपत्परिवर्जनस्य श्रेय आचरणस्य च शास्त्रं कारणं शास्त्रप्रमाणादुभयं शक्यं कर्तुं ना

तिसामान्यतो दर्शितमाकांक्षाद्वारा विशेषतो दर्शयति किं तदिति तस्मादिति व्याचष्टे यत इति २१ कामादित्यागे सत्यनर्थाचरण
श्रेयःप्रतिबंधनिवृत्तिः स्यात्तां इति भावः न केवलं श्रेयः समाचरन्नासुरीं संपदं च वर्जयन्मोक्षमेव सम्यग्धीद्वारा लभते किं तु लौ
किकमपि सुखमित्यपेरर्थः आसुर्याः संपदो वर्जने श्रेयसः करणे किं कारणं तदाह सर्वस्येति तस्य कारणत्वं साधयति शास्त्रे

उक्तमुपजीव्यानंतरश्लोकं प्रवर्त्तयति॥ अतइति॥ शिष्यतेऽनुशिष्यतेबोध्यतेऽनेनापूर्वोर्थइतिशास्त्रं तच्च विधिनिषेधात्म
कमित्युपेत्यव्याचष्टे॥ कर्त्तव्येति॥ कामस्यकरणंकामकारस्तस्माद्धेतोरित्युपेत्यकामाधीनाशास्त्रविमुखस्यप्रवृत्तिरि
त्याह॥ कामेति॥ कामाधीनप्रवृत्तेःसदापुमर्थायोगस्यसर्वपुरुषार्थासिद्धिरित्याह॥ नापीति॥ २३॥ शास्त्रादृतेकर्मणो
निःफलत्वेफलितमाह॥ तस्मादिति॥ कर्त्तव्याकर्त्तव्योधर्माधर्मौतत्रशास्त्रस्यप्रमाणत्वेपिममकिंकर्त्तव्यमित्याशंक्या

अतःयःशास्त्रविधिंकर्त्तव्याकर्त्तव्यज्ञानकारणंविधिप्रतिषेधाख्यंउत्सृज्यत्यक्त्वावर्त्ततेकामकारतःका
मप्रयुक्तःसन्नसससिद्धिंपुरुषार्थयोग्यतामाप्नोतिनाप्यस्मिंल्लोकेसुखंनापिपरांप्रकृष्टांगतिंस्वर्गंमोक्षंवा॥ २३॥
तस्माच्छास्त्रंप्रमाणंज्ञानसाधनंतेतवकार्याकार्यव्यवस्थितौकर्तव्याकर्त्तव्यव्यवस्थायामतोज्ञात्वाबुद्ध्वाश

यःशास्त्रविधिमुत्सृज्यवर्त्ततेकामकारतः॥ नससिद्धिमवाप्नोतिनसुखंनपरांगतिं॥ २३॥ ॥
तस्माच्छास्त्रंप्रमाणंतेकार्याकार्यव्यवस्थितौ॥ ज्ञात्वाशास्त्रविधानोक्तंकर्मकर्तुमिहार्हसि॥ २४॥

स्त्रविधानोक्तंविधिर्विधानंशास्त्रमेवविधानंशास्त्रविधानंकुर्यान्नकुर्यादित्येवंलक्षणंतेनोक्तंस्वकर्मयत्त
त्कर्त्तुमिहार्हसिइहेतिकर्माधिकारभूमिप्रदर्शनार्थमिति॥ २४॥ इतिश्रीमद्भगवद्गीताभाष्यटीकायांषोडशो
ऽध्यायः॥ १६॥

ह॥ अतइति॥ स्वकर्मक्षत्रियस्ययुद्धादिरितिशब्दोऽध्यायपरिसमाप्त्यर्थः तदनेनाध्यायेनप्राग्भ
वीयकर्मवासनानुसारेणाभिव्यज्यमानसात्विकादिप्रकृतित्रयविभागेनदैव्यासुरीसंपत्द्वयमादानहानाभ्या
मुपदिश्यकामक्रोधलोभानपहायपुरुषार्थार्थिनाशास्त्रश्रवणेनतदुक्तकारिणाभवितव्यमितिनिर्द्धारितं॥ २४॥
॥ इतिश्रीमद्भगवद्गीताभाष्यमानंदगिरीटीकायांषोडशोऽध्यायः॥ १६॥ ॥ श्रीसीतारामायनमः॥ श्रीः॥ ॥

प्र

आस्तिकानांनास्तिकानांचशास्त्रैकचक्षुषांगतिरुक्तासंप्रतिआस्तिकानामेवशास्त्रानभिज्ञानांगतिजिज्ञासयापृच्छ
तीत्याह्तस्मादिति॥यजंतइतियागग्रहणंदानादेरुपलक्षणं॥यदिवेदोक्तंविधिमुत्सृज्यस्तमुत्सृजंतिकथंतर्हिश्रद्ध

मधुसूदन

तस्मात्शास्त्रंप्रमाणंतेइतिभगवद्वाक्याल्लब्धप्रश्नबीजो॥अर्जुनउवाच॥येकेचिदविशेषिताःशास्त्र
विधिंशास्त्रविधानंश्रुतिस्मृतिशास्त्रचोदनामुत्सृज्यपरित्यज्ययजंतेदेवादीन्पूजयंतिश्रद्धयाआ
स्तिक्यबुद्ध्यान्विताःसंयुक्ताःसंतःश्रुतिलक्षणंस्मृतिलक्षणंवाकंचिच्छास्त्रविधिमपश्यंतोवृद्धव्यवहा

॥अर्जुनउवाच॥येशास्त्रविधिमुत्सृज्ययजंतेश्रद्धयान्विताः॥ ॥

रदर्शनादेवश्रद्दधानतयायेदेवादीन्पूजयंतितेइहयेशास्त्रविधिमुत्सृज्ययजंतेइतिश्रद्धयान्वि
ताइतिसंगृह्यंतेयेपुनःकेचिच्छास्त्रविधिमुपलभमानाएवतमुत्सृज्यअयथाविधिदेवादीन्
पूजयंतितेत्रयेशास्त्रविधिमुत्सृज्ययजंतइतिनपरिगृह्यंते॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥

धानायागादिकुर्वंतिनहिमानंविनाश्रद्धयायागादिकर्तुंशक्यमित्याशंक्याह्श्रुतीति॥ननुशास्त्रीयंविधिंपश्यंतोपिके
चित्तमुपेक्ष्यस्वोत्प्रेक्षयायागादिकुर्वंतोदृश्यंतेतेषामिह्येशास्त्रविधिमुत्सृज्येतिग्रहोभविष्यतीतिनेत्याह॥येपुनरिति॥

तेषामत्रापरिग्रहे प्रश्नपूर्वकं हेतुमाह। कस्मादिति। शास्त्रज्ञानां तदुपेक्षावतां ग्रहे पि विशेषणमविरुद्धमित्याशंक्य व्याघातान्मैवमित्याह। देवादीति। अश्रद्दधानतया तदुत्सृज्येति संबंधः। शास्त्रोक्तं विधिमधिगच्छतामपि तमवधीर्य स्वेच्छया देवपूजादौ प्रवृत्तानाममसुरेष्वेवांतर्भावो यस्मादनंतराध्याये सिद्धस्तस्मादास्तिकैरेतेषां प्रसंगो नास्तीत्यु

कस्मात् श्रद्धयाऽन्वितत्वविशेषणात् देवादिपूजाविधिपरं किंचिच्छास्त्रविधिं पश्यंत एव तत् उत्सृज्याश्रद्दधानतया तद्विहितायां देवादिपूजायां श्रद्धयान्विताः प्रवर्तंत इति न शक्यं परिकल्पयितुं यस्मात्तस्मात्पूर्वोक्ता एव ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विता इत्यत्र गृह्यंते तेषामेवंभूतानां निष्ठा तु

तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः ॥१॥

का कृष्ण सत्वमाहो रजस्तमः। किं सत्वं निष्ठा अवस्थानमाहोस्वित् रजो ऽथवा तम इति एतदुक्तं भवति या तेषां देवादिविषया पूजा सा किं सात्विकाहोस्विद्राजसी उत तामसीति ॥१॥ श्रीकृष्णाय नमः॥

पसंहरति। यस्मादिति। पूर्वोक्ताः शास्त्रानभिज्ञा वृद्धव्यवहारानुसारिण इति यावत्ते ऽश्रद्धया क्रियमाणं कर्म कुत्र पर्यवस्यतीति पृच्छति। तेषामिति। कानिष्ठेत्येतद्विवृणोति। सत्वमिति। कार्याणां कारणे ऽर्थ्यपदेशमाश्रित्य तात्पर्यमाह। एतदिति।

विशेषनिष्ठमुत्तरं सामान्येन वक्तुं न शक्यमित्याशयेन परिहरति ॥ सामान्येति ॥ किमिति श्रद्धात्रैविध्यं प्रश्नानुपयुक्तमुच्यते तत्राह
यस्यामिति ॥ श्रद्धापूर्विकायां क्रियायामिति यावत् ॥ श्रद्धात्रैविध्ये हेतुमाह ॥ सा स्वभावजेति ॥ स्वभावशब्दार्थं प्रकृतोपयोगित

सामान्यविषयः प्रश्नो नाप्रविभज्य प्रतिवचनमर्हतीति ॥ श्रीभगवानुवाच ॥ त्रिविधा त्रिःप्रकारा भवति श्रद्धा यस्यां नि
ष्ठायां त्वं पृच्छसि देहिनां पुंसां सा स्वभावजा जन्मांतरकृतो धर्माधर्मादिसंस्कारो मरणकालेभिव्यक्तः स्वभाव उच्यते

॥ श्रीभगवानुवाच ॥ त्रिविधा भवति श्रद्धा देहिनां सा
स्वभावजा ॥ सात्विकी राजसी चैव तामसी चेति तां शृणु ॥ २ ॥

ततो जाता स्वभावजा सात्विकी सत्वनिर्वृत्ता देवपूजादिविषया राजसी रजसो निर्वृत्ता यक्षरक्षःपूजादिविषया ताम
सी तमोनिर्वृत्ता प्रेतपिशाचादिपूजाविषया इति ॥ एवं त्रिविधां तां उच्यमानां श्रद्धां शृणु ॥ २ ॥ श्रीरामायनमः ॥

याकथयति ॥ जन्मांतरेति ॥ कथं त्रिविधेत्यपेक्षायामाह ॥ सात्विकीत्यादिना ॥ कथमुक्ता श्रद्धा स्वभावजेति तत्राह ॥ तामिति ॥ २ ॥

प्राचीनकर्मोद्बोधितात्रिविधावासनास्वभावशब्दितात्त्रिविधायाः श्रद्धायाः निमित्तमित्युक्तमिदानीमुपादानं तस्यादर्शयति ॥ सैवमिति ॥ विशिष्टचि
त्तोपादानकारणाश्रद्धा तस्त्रैविध्ये त्रिविधेति पूर्वार्द्धस्यार्थः कथं निष्ठायाः सत्वादिप्रकारप्रश्नद्वारा श्रद्धायास्त्रैविध्यनिरूपणमुपयुक्तमिति
मन्वानः शंकते ॥ यद्यप्येवमिति ॥ श्रद्धेयं विषयमभिध्याय संतया तत्रैव प्रवर्त्तत इति मत्वापरिहरति ॥ उच्यत इति ॥ श्रद्धामयत्वप्रश्नपू
र्वकं कथयति ॥ कथमिति ॥ श्रद्धास्वत्वधिकृते पुरुषे प्राचुर्येण प्रकृतेति तस्य श्रद्धामयत्वसिद्धिरित्यर्थः ॥ ३ ॥ तथापि कथं सत्वादिनिष्ठा

सैवं त्रिविधा भवतीति ॥ सत्वानुरूपा पूर्वजन्मकृतपुण्यापुण्यविशिष्टसंस्कारोपेतांतःकरणानुरूपा सर्वस्य प्राणिजातस्य
श्रद्धा भवति भारत यद्यप्येवं ततः किं स्यादित्युच्यते श्रद्धामयः श्रद्धाप्रायः अयं पुरुषो योयं संसारी जीवः कथं यो यच्छ्रद्धः या
श्रद्धा यस्य जीवस्य स यच्छ्रद्धः स एव तच्छ्रद्धानुरूप एव स जीवः ॥ ३ ॥ ततश्च कार्येण लिंगेन देवादिपूजया सत्वादिनिष्ठानुमेये

सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत ॥ श्रद्धामयोयं पुरुषो यो यच्छ्रद्धः स एव सः ॥ ३ ॥ यजंते सा
त्विका देवान्यक्षरक्षांसि राजसाः ॥ प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः ॥ ४ ॥ श्रीः ॥

त्याह ॥ यजंते पूजयंति सात्विकाः सत्वनिष्ठा देवान्यक्षरक्षांसि राजसाः प्रेतान्भूतगणांश्च सप्तमातृकादींश्चान्ये यजंते ता
मसा जनाः एवं कार्यतो निर्णीताः सत्वादिनिष्ठाः शास्त्रविध्युत्सर्गे ॥ ४ ॥ तत्र कश्चिदेव सहस्रेषु देवपूजादितत्परः सत्वनिष्ठो
भवति बाहुल्येन तु रजोनिष्ठास्तमोनिष्ठाश्चैव प्राणिनो भवंति ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीकृष्णायनमोनमः ॥ ॥

यथोक्तपुरुषस्य ज्ञातुं शक्यादित्याशंक्याह ॥ ततश्चेति ॥ अधिकृतस्य पुरुषस्य श्रद्धाप्रधानत्वादितियावत् ॥ देवा वस्वादयः यक्षाः कुबेरा
दयः रक्षांसि निर्ऋत्यादयः ॥ स्वधर्मात्प्रच्युता विप्रादयो देहपाता दूर्ध्वं वायुदेहमापन्नाः प्रेताः ॥ एभ्यश्चयथा यथमाराध्या देवादयः सा
त्विकराजसतामसान्प्रकारान्प्रयच्छंतीति सामर्थ्यादवगंतव्यं ॥ ननु सत्वादिनिष्ठाः शास्त्रेण ज्ञातुं शक्यंते कृतं कार्यलिंगकानुमा
नेनेति तत्राह ॥ एवमिति ॥ ४ ॥ सत्वादिनिष्ठानां जंतूनामवांतरविशेषं प्रचुरत्वाप्रचुरत्वरूपं दर्शयति ॥ तत्रेत्यादिना ॥ ॥ ॥

बलमवस्य मिदं साधयिष्यामीत्याग्रहः ३

राजसानां तामसानां च प्राणिनां प्राचुर्यं प्रश्नद्वारा विवृणोति ॥ कथमित्यादिना ॥ कामश्च काम्यमानविषयो रागश्च तद्विषयभोगाभि-
लाषस्तत्कृतं तत्प्रयुक्तं तन्निमित्तमिति यावत् ५ रजो निष्ठान् प्राधान्येन प्रदर्श्य तमो निष्ठान् प्राधान्येन दर्शयति ॥ कर्षयंत इ-

कथं ॥ अशास्त्रविहितं न शास्त्रविहितमशास्त्रविहितं घोरं पीडाकरं प्राणिनामात्मनश्च तप्यंते निर्वर्त्तयंतीति ये तपो जना-
स्ते च दंभाहंकारसंयुक्ताः दंभश्चाहंकारश्च दंभाहंकारौ ताभ्यां संयुक्ताः कामरागबलान्विताः कामश्च रागश्च कामरागौ
तत्कृतं बलं कामरागबलं तेनान्विताः कामरागबलैर्वान्विताः ॥ ५ ॥ कर्षयंतः कृशीकुर्वंतः शरीरस्थं भूतग्रामं भूतकृत

अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः ॥ दंभाहंकारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥ कर्षयं-
तः शरीरस्थं भूतग्राममचेतसः ॥ मां चैवांतःशरीरस्थं तान् विद्ध्यासुरनिश्चयान् ॥ ६ ॥ श्रीरामः ॥

करणसमुदायमचेतसोऽविवेकिनो मां चैवांतःशरीरस्थं तत्कर्मबुद्धिसाक्षिभूतं अंतःशरीरस्थं कर्षयंतो मदनुशा-
सनातिक्रमणकरणमेवमत्कर्षणं तान् विद्ध्यासुरनिश्चयान् आसुरो निश्चयो येषां ते आसुरनिश्चयास्तान् परिहरणार्थं वे-

ति कथं शरीरादिसाक्षिणमीश्वरं प्रति कृशीकरणं प्राणिनां प्रकल्प्यते तत्राह ॥ मदनुशासनेति ॥ तेषां विपर्यासनिश्चयवतां परि-
ज्ञानं कुत्रोपयुज्यते तत्राह ॥ परिहरणार्थमिति ॥ ६ ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ ॥

उत्तरश्लोकपूर्वार्द्धतात्पर्यमाह आहाराणामिति रस्यादिवर्गस्यसात्विकपुरुषप्रियत्वंकट्वादिवर्गस्यराजसप्रियत्वंयाततयामादिवर्गस्यतामसप्रियत्वमितिप्रदर्शनंकुत्रोपयुज्यतेतत्राह रस्येति श्लोकोत्तरार्द्धतात्पर्यमाह तथेति आहारस्त्रैविध्यवदितियावत् कथमेतेषांप्रत्येकंत्रैविध्यंतत्राह तेषामिति ॥७॥ सात्विकप्रीतिविषयमाहारमुदाहरति आयुरिति आयुर्जीवनंसत्वंचि

आहाराणांच रस्यस्निग्धादिवर्गत्रयरूपेणभिन्नानांयथाक्रमंसात्विकराजसतामसपुरुषप्रियत्वदर्शनमिहक्रियते रस्यस्निग्धादिष्वाहारविशेषेष्वात्मनःप्रीत्यतिरेकेणलिंगेनसात्विकत्वंराजसत्वंतामसत्वंचबुध्वाराजसतामसलिंगानामाहाराणांपरिवर्जनार्थंसत्वलिंगानांचोपादानार्थंतथायज्ञादीनामपिसत्वादिगुणभेदेनत्रिविधत्वप्रतिपादनंइहराजस

आहारस्त्वपिसर्वस्यत्रिविधोभवतिप्रियः यज्ञस्तपस्तथादानंतेषांभेदमिमंशृणु ॥७॥ आयुः
सत्वबलारोग्यसुखप्रीतिविवर्द्धनाः रस्याःस्निग्धाःस्थिराहृद्या आहाराःसात्विकप्रियाः ॥८॥

तामसान्बुद्ध्वाकथंतुनामनपरित्यजेत्सात्विकानेवानुतिष्ठेदित्येवमर्थं आहारस्त्वपिसर्वस्यभोक्तुःत्रिविधोभवतिप्रियःइष्टस्तथायज्ञस्तथातपस्तथादानंतेषामाहारादीनांभेदमिमंवक्ष्यमाणंशृणु ॥७॥ आयुश्चसत्वंचबलंचारोग्यंचसुखंचप्रीतिश्चतासांविवर्द्धनाः तेचरस्यारसोपेताःस्निग्धाःस्नेहवंतःस्थिराःचिरकालस्थायिनोदेहेहृद्याहृदयप्रियाआहाराःसा

॥८॥ [illegible]

त्धैर्यवीर्यवाबलंकार्यकरणसामर्थ्यंआरोग्यंनीरोगतासुखमंतराह्लादःप्रीतिःपरेषामपिसंपन्नानांदर्शनात्परमोहर्षस्तासांविवर्द्धनाविवर्द्धयंतीतितथुस्तत्तेःरसोपेतारसयितव्याःसरसाःदेहेचिरकालस्थायित्वंचिरंतरशरीरोपकारहेतुत्वं ॥८॥ श्रीरामः

राजसप्रीतिविषयमाहारविशेषं दर्शयति। कट्विति। कटुस्तिक्तः कटुकस्य तीक्ष्णशब्देनोक्तत्वात् रूक्षो विस्नेहः विदाही संतापकः। अतिश ब्दस्य सर्वत्र योजनामेवाभिनयति। अतिकटुरिति दुःखं तात्कालिकी पीडा इष्टवियोगजं दुःखं शोकः आमयो रोगः। ९। तामसप्रीतिविष याहारमुदाहरति। यातयाममिति। ननु निर्वीर्यं यातयाममित्युच्यते न पुनः सामि पक्वमिति तत्राह। निर्वीर्यस्येति। १०। हानादानार्थ

कटुः अम्लः लवणः अत्युष्णः अतिशब्दः कट्वादिषु सर्वेषु योज्यः अतिकटुरतिविदाहिन इत्येवं कट्वम्ललवणात्युष्णतीक्ष्णरूक्ष विदाहिनः एवंविधा आहारा राजसस्येष्टाः प्रिया दुःखशोकामयप्रदाः दुःखं च शोकं चाऽमयं च प्रयच्छंतीति दुःखशोकामयप्र दाः। ९। यातयामं मंदपक्वं निर्वीर्यस्य गतरसेनोक्तत्वात् गतरसं रसविमुक्तं पूति दुर्गंधि पर्युषितं च पक्वं सद्रात्र्यंतरितं च यदुच्छि

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः। आहारा राजसस्येष्टा दुःखशोकामयप्रदाः। ९। यातयामं ग तरसं पूति पर्युषितं च यत्। उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं। १०। अफलाकांक्षिभिर्यज्ञो वि धिदृष्टो य इज्यते। यष्टव्यमेवेति मनः समाधाय स सात्विकः। ११। श्रीसीतारामचंद्रायनमोनमः।

ष्टमपि च भुक्तशिष्टं अमेध्यं अयज्ञार्हं भोजनमीदृशं तामसस्येष्टं। १०। अथेदानीं यज्ञास्त्रिविधा उच्यंते। अफलाकांक्षि भिरफलार्थिभिः यज्ञो विधिदृष्टः शास्त्रचोदनादृष्टो यो यज्ञ इज्यते निर्वर्त्यते। यष्टव्यमेवेति यज्ञस्वरूपनिर्वर्त्तनमेव कार्यमि ति मनः समाधाय नानेन पुरुषार्थो मम कर्त्तव्य इत्येवं निश्चित्य स सात्विको यज्ञ उच्यते। ११। श्रीरामकृष्णायनमोनमः। ॥

माहारत्रैविध्यं एवं विभज्य क्रमप्राप्तं यज्ञत्रैविध्यं कथयति। अथेति। तत्र सात्विकयज्ञं ज्ञापयति। अफलेति। फलाभिसंधिं विना यज्ञस्वरूपमेव भाव्यमिति बुध्या शास्त्रतोऽनुष्टीयमानो यज्ञः सात्विक इत्यर्थः। ११। श्रीसीतारामचंद्रजीप्रसन्नोमस्तु। श्रीः। ॥

राजसं यज्ञं हानार्थं दर्शयति ॥ अभिसंधायेति ॥ स्वर्गाद्युद्दिश्य धार्मिकत्वख्यापनार्थं च यद्यजनं क्रियते तद्यजनं राजसं रजसा निर्वृत्तं त्या
ज्यमवगच्छेदित्यर्थः ॥१२॥ तामसं यज्ञं हानार्थमेवोदाहरति ॥ विधीति ॥१३॥ सात्विकादिभावं निरूपयितुं सर्वस्य तपसः स्वरूपं त्रिविधं
निरूपयति ॥ अथेति ॥ तत्र शारीरं तपो निर्दिशति ॥ देवेति ॥ देवा ब्रह्मविष्णुशिवादयः द्विजाः पूज्याः पूज्यत्वात् द्विजोत्तमाः गुरवः पित्राद

अभिसंधाय फलं उद्दिश्य दंभार्थं अपि च यदिज्यते भरतश्रेष्ठ तं यज्ञं विद्धि रजोगुणनिर्वर्त्यं राजसं ॥१२॥ विधिहीनं यथा
चोदितविपरीतं असृष्टान्नं ब्राह्मणेभ्यो न सृष्टमन्नं यस्मिन्यज्ञे सो सृष्टान्नस्तमसृष्टान्नं मंत्रहीनं मंत्रतः स्वरतो वर्णतश्च
नैर्विर्युक्तं मंत्रहीनं अदक्षिणं उक्तदक्षिणारहितं श्रद्धाविरहितं यज्ञं तामसं परिचक्षते तमोनिर्वृत्तं कथयंति ॥१३॥ अथे

अभिसंधाय तु फलं दंभार्थमपि चैव यत् ॥ इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं ॥१२॥ विधिही
नमसृष्टान्नं मंत्रहीनमदक्षिणं ॥ श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥१३॥ देवद्विजगुरु
प्राज्ञपूजनं शौचमार्जवं ॥ ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥१४॥ श्रीकृष्णायनमोनमः

दानी तपस्त्रिविधमुच्यते ॥ देवाश्च द्विजाश्च गुरवश्च प्राज्ञाश्च देवद्विजगुरुप्राज्ञास्तेषां पूजनं देवद्विजगुरुप्राज्ञपूज
नं शौचमार्जवं ऋजुत्वं ब्रह्मचर्यमहिंसा च शरीरनिर्वर्त्यं शारीरं शरीरप्रधानैः सर्वैरेव कार्यकरणैः कर्त्रादिभिः सा
ध्यं शारीरं तप उच्यते पंचेते तस्य हेतव इति वक्ष्यति ॥१४॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीरामचंद्राय नमः ॥ ॥

यः प्राज्ञाः पंडिताः विदितवेदितव्यास्तेषां पूजनं प्रणामशुश्रूषादि शौचं मृज्जलाभ्यां शरीरशोधनं ऋजुत्वं विहितप्रतिषिद्धयोरेव
रूपप्रवृत्तिनिवृत्तिमत्वं ब्रह्मचर्यं मैथुनासंचरणं ॥ अहिंसा प्राणिनामपीडा शरीरमात्रनिर्वर्त्यत्वमस्य तपसो न संभवतीति मन्वानो
विशिनष्टि ॥ शारीरेति ॥ कथं कर्त्रादिसाध्यत्वेन तपसः शारीरत्वं शारीरत्वे वा कथं कर्त्रादिसाध्यत्वमित्याशंक्याह ॥ पंचेति ॥१४॥ श्रीः

संप्रतिवाङ्मयंतपोव्यपदिशति अनुद्वेगकरमिति सत्यंयथादृष्टार्थवचनंप्रियंश्रुतिसुखंहितंपरिणामपथ्यंप्रियहितयोर्विध्यंतरेणविभागमाह प्रियेति कथमत्रविशेषणविशेष्यत्वंतदाह अनुद्वेगेति विशेषणानांधर्माणामनुद्वेगकरत्वादीनांविशेष्येणवाक्येनसमुच्चितानांपरस्परमपिसमुच्चयद्योतीचकारइत्याह विशेषणेति किमितिवाक्यमेतैर्विशेष्यतेकिमितिवातेषामिथःसमुच्चयस्तत्राह परेति यद्यपिविधायकवाक्यमात्रस्याविशेषितस्यवाङ्मयतपस्त्वानुपपत्तिस्तथापिसत्यवाक्यस्यविशेषणांतरा

अनुद्वेगकरंप्राणिनामदुःखकरंवाक्यंसत्यंप्रियंहितंचयत् प्रियहितेदृष्टादृष्टार्थेअनुद्वेगकरत्वादिभिर्ईश्वैर्वाक्यंविशिष्यतेविशेषणधर्मसमुच्चयार्थश्चशब्दःपरप्रत्यायनार्थंप्रयुक्तस्यवाक्यस्यसत्यप्रियहितानुद्वेगकरत्वादीनामन्यतमेनद्वाभ्यांत्रिभिर्वाहीनतास्याद्यदिनतद्वाङ्मयंतपःतथासत्यवाक्यस्यैवेतरेषांअन्यतमेनद्वाभ्यांत्रिभिर्वाहीनतायांनवाङ्मयतपस्त्वंतथाप्रियवाक्यस्याप्यन्यतमेनद्वाभ्यांत्रिभिर्वाहीनस्यनवाङ्मयतपस्त्वंतथाहि

अनुद्वेगकरंवाक्यंसत्यंप्रियहितंचयत् स्वाध्यायाभ्यसनंचैववाङ्मयंतपउच्यते ॥ १५ ॥ श्रीः ॥

तवाक्यस्याप्यन्यतमेनद्वाभ्यांत्रिभिर्वावियुक्तस्यनवाङ्मयतपस्त्वंकिंपुनस्तत्तपोयत्सत्यंवाक्यमनुद्वेगकरंप्रियंहितंचतत्तपोवाङ्मयंयथाशांतोभवत्वंस्वाध्यायंयोगंचानुतिष्ठ तथातेश्रेयोभविष्यतीति स्वाध्यायाभ्यसनं

चैवयथाविधिवाङ्मयंतपउच्यते १५ ॥

भावेपिवाङ्मयतपस्त्वमित्याशंक्याह तथेति तथापिप्रियवाक्यमात्रस्यत

थात्वंस्यादित्याशंक्याह तथाप्रियेति तथापिपरिणामपथ्यंवाक्यमात्रंतथाभविष्यतिनेत्याह तथाहितेति कीदृक्तर्हितपोवाङ्मयमितिप्रश्नपूर्वकंविशदयति किंपुनरिति विशिष्टेवाङ्मयेतपसिदृष्टांतमाह यथेति प्राङ्मुखत्वंपवित्रपाणित्वमित्यादिविधानमनतिक्रम्यस्वाध्यायस्यावर्तनमपिवाङ्मयेतपस्यंतर्भवतीत्याह स्वाध्यायेति वाग्प्राचुर्येणप्रस्तुतास्मिन्निति वाङ्मयंवाग्प्रधानमित्यर्थः १५ श्रीसीतारामचंद्रायनमः श्रीरामकृष्णायनमः श्रीरामायनमः

मानसंतपः संक्षिपति मनइति प्रसादमेवव्यनक्ति स्वछेति मनःस्वास्थ्यमव्याकुलतानैर्मल्यमित्यर्थः सौमनस्यंसर्वेभ्योहितै
षित्वमाविहितावितननंचतत्कथंगम्यतेतत्राह मुखादीति तस्यस्वरूपमाह अंतःकरणेति ननुमौनंवाङ्नियमनंवाङ्मये
तपस्यंतर्भवति तत्कथंमानसेतपासिव्यपदिश्यतेतत्रवाचःसंयमस्यकार्यत्वान्मनःसंयमस्यकारणत्वात्कार्येणकारणग्रह
णान्मानसेतपासिमौनमुक्तमित्याह वागिति यद्वामौनंमुनिभावोमननमात्मनोमनसोविनिग्रहोनिरोधः नन्वेवंमौनस्यम

मनःप्रसादोमनसःप्रशांतिः स्वछतापादनंमनःप्रसादःसौम्यत्वंचयत्सौमनस्यमाहुर्मुखादिप्रसादकार्यांतःकरणस्य
वृत्तिर्मौनंवाक्संयमोपिमनःसंयमपूर्वकोभवतीतिकार्येणकारणमुच्यतेमनःसंयमोमौनमित्यात्मविनिग्रहोमनो
निरोधःसर्वतःसामान्यरूपआत्मविनिग्रहोवाग्विषयस्येवमनसःसंयमोमौनमितिविशेषःभावसंशुद्धिः परैर्व्यव
हारकालेऽमायावित्वंभावसंशुद्धिरितिएतत्तपोमानसमुच्यते १६ यथोक्तंकायिकंवाचिकंमानसंचतपस्तप्तंनरैः

मनःप्रसादःसौम्यत्वंमौनमात्मविनिग्रहः॥भावसंशुद्धिरित्येतत्तपोमानसमुच्यते॥१६॥ श्रद्धया
परयातप्तंतपस्तत्त्रिविधंनरैः॥अफलाकांक्षिभिर्युक्तैःसात्विकंपरिचक्षते॥१७॥ श्रीरामः॥

सत्वादिभेदेनकथंत्रिविधंभवतीत्युच्यते श्रद्धयास्तिक्यबुद्ध्यापरयोत्कृष्टयातप्तमनुष्ठितंतपस्तत्प्रकृतंत्रिविधंत्रिः
प्रकारंअधिष्टानंनरैरनुष्टातृभिरफलाकांक्षिभिःफलाकांक्षारहितैर्युक्तैःसमाहितैःयदीदृशंतपस्तत्सात्विकं
सत्वनिर्वर्त्यंपरिचक्षतेकथयंतिशिष्टाः॥१७॥

नोविनिग्रहस्यचमनसःसंयमत्वेनैकत्वात्सौनरुक्त्यंनेत्याह सर्वतइति भा
वस्यहृदयस्यसंशुद्धीरागादिमलविकलतेतिव्याचष्टे परैरिति मानसंमनसःप्राधान्येननिर्वर्त्यमित्यर्थः॥१६॥ त्रिविधस्यत
पसोयथासंभवंसात्विकादिभावेनत्रैविध्यमाकांक्षाद्वारातत्रैवनिक्षिपति यथोक्तमिति अधिष्टानंदेहवाङ्मनोभ्यःनिर्वर्त्य
मित्यर्थः समाहितैःसिद्ध्यसिद्ध्योर्निर्विकारैरितियावत् १७ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीरामचंद्रायनमोनमः॥

म

राजसं तपो निर्दिशन्ति सत्कारेति साधुकारमेवस्फोरयंति साधुरिति दंभेनचैवनास्तिकोनकेवलधर्मध्वजित्वेनेत्यर्थः तदि
हप्रोक्तमस्मिन्नेवलोकेफलप्रदमित्यर्थः कदाचित्फलत्वं क्षणिकफलत्वमध्रुवमनियतमनैकांतिकफलमितियावत् १८
तामसं तपः संगृह्णाति मूढेति मूढोयंतावविवेकीतस्यग्राहोनामग्रहोभिनिवेशस्तेनेत्याह अविवेकेति आत्मनः स्वस्य देहा

सत्कारमानपूजार्थंसत्कारः साधुकारः साधुरयंतपस्वीब्राह्मणइत्येवमर्थंमानोमाननंप्रत्युत्थानाभिवादनादित
दर्थंपूजापादप्रक्षालनार्चनातिशयितत्वादितदर्थंचतपःसत्कारमानपूजार्थंदंभेनचैवयत्क्रियतेतपस्तदिहप्रो
क्तंकथितंराजसंचलंकादाचित्कफलत्वेनाध्रुवं १८ मूढग्राहेणाविवेकनिश्चयेनात्मनःपीडयाक्रियतेतपः

सत्कारमानपूजार्थंतपोदंभेनचैवयत् ॥ क्रियतेतदिहप्रोक्तंराजसंचलमध्रुवं ॥ १८ ॥ मूढग्राहेणा
त्मनोयत्पीडयाक्रियतेतपः ॥ परस्योत्सादनार्थंवातत्तामसमुदाहृतं ॥ १९ ॥ दातव्यमितियद्दानंदी
यतेनुपकारिणे ॥ देशेकालेचपात्रेचतद्दानंसात्विकंस्मृतं ॥ २० ॥ श्रीरामचंद्रायनमोनमः ॥

परस्योत्सादनार्थंविनाशार्थंवातत्तामसंतपउदाहृतं ॥ १९ ॥ इदानींदानभेदउच्यते ॥ दातव्यमित्येवंमनः कृत्वायद्दानंदी
यतेऽनुपकारिणेप्रत्युपकारासमर्थायसमर्थायापिनिरपेक्षंदीयतेपुण्यदेशेकुरुक्षेत्रादौकालेसंक्रांत्यादौपात्रेचषडं
गविद्वेदपारगइत्यादौतद्दानंसात्विकंस्मृतं ॥ २० ॥

देरित्यर्थः ॥ १९ ॥ क्रमप्राप्तंदानस्यगुणनिमित्तंभेदमाह ॥ इदानीमिति ॥ ॥
दातव्यमित्येवंमनःकृत्वादानमेवमयाभाव्यंनफलमित्यभिसंधायेत्यर्थः ॥ २० ॥ श्रीसीतारामचंद्रजीप्रसन्नोमस्तु ॥ श्रीः ॥

राजसतामसदानविभजनंस्पष्टार्थं २१ २२ विहितानांकर्मणांप्रमादप्रयुक्तेवैगुण्येकथंपरिहारःस्यादित्याशंक्याह मन्त्रेति ॐइति
ब्रह्मेत्यादिश्रुतेरोमितितावतब्रह्मणोनामनिर्देशः तत्त्वमसीतिश्रुतेस्तदित्यपिब्रह्मणोनामनिर्देशःसदेवसोम्येतिश्रुतेःसदित्य

यत्तुदानंप्रत्युपकारार्थंकालेत्वयंमांप्रत्युपकरिष्यतीत्येवमर्थंफलंवाअस्यदानस्यमेभविष्यतिअदृष्टमितितच्चोद्दिश्य
पुनर्दीयतेचपरिक्लिष्टंखेदसंयुक्तंतद्दानंराजसंस्मृतं २१ अदेशकालेयद्दानंअपुण्यदेशेम्लेंछाऽशुच्यादिसंकीर्णेअ
कालेपुण्यहेतुत्वेनाप्रख्यातेसंक्रांत्यादिविशेषरहितेवाअपात्रेभ्यश्चमूर्खतस्करादिभ्यश्चदेशादिसंपत्तौवाअस

यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः दीयतेचपरिक्लिष्टंतद्दानंराजसंस्मृतं २१ अ
देशकालेयत्दानमपात्रेभ्यश्चदीयते असत्कृतमवज्ञातंतत्तामसमुदाहृतं २२ ॐ
तत्सदितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतः ब्राह्मणास्तेनवेदाश्चयज्ञाश्चविहिताःपुरा २३

त्कृतंप्रियवचनपादप्रक्षालनपूजादिरहितंअवज्ञातंपात्रपरिभवयुक्तंचयद्दानंतामसमुदाहृतं २२ यज्ञदानतपः
प्रभृतीनांसाद्गुण्यकरणायायमुपदेशउच्यते ॐतत्सदित्येषःनिर्देशःनिर्दिश्यतेऽनेनेतिनिर्देशःत्रिविधोनाममनिर्दे
शोब्रह्मणःस्मृतःचिंतितोवेदांतेषुब्रह्मविद्भिर्ब्राह्मणास्तेननिर्देशेनत्रिविधेनवेदाश्चयज्ञाविहितानिर्मिताःपुरापूर्वमिति

दिष्टस्य ब्रह्मणो २३

पितस्यनामेतिमत्वाह ओमिति कथंनिर्देशेनतेषांविधानमित्याशंक्याह निर्दिश्यतइति यज्ञादीनांवैगुण्यप्रतीतिकालेय
थोक्तनाम्नामन्यतमोच्चारणाद्वैगुण्यंसिद्ध्यतीतिभावः कर्मसाद्गुण्यकारणंत्रिविधंनामस्तीति ब्राह्मणाइति २३

पूर्वसर्गादौनिर्माणंचप्रजापतिकर्तृकंयस्मात्‌ब्राह्मणादीनांकारणंयस्माच्चब्रह्मणोनिर्देशस्तस्मादित्युपसंहरति ।ब्रह्मवादिनामि

तस्मादोमित्युदाहृत्यउच्चार्ययज्ञदानतपःक्रियाः ॥ यज्ञादिस्वरूपाःक्रियाःप्रवर्त्तंतेविधानोक्ताःशास्त्रनोदिताःसततं ॥
सर्वदाब्रह्मवादिनांब्रह्मवदनशीलानां ॥ २४ ॥ तदित्यनभिसंधायतदितिब्रह्माभिधानमुच्चार्यअनभिसंधायकर्मणः
फलंयज्ञतपःक्रियायज्ञक्रियास्तपःक्रियाश्चयज्ञतपःक्रियादानक्रियाश्चविविधाःक्षेत्रहिरण्यप्रदानादिलक्षणाः
क्रियंतेनिर्वर्त्यंतेमोक्षकांक्षिभिर्मोक्षार्थिभिर्मुमुक्षुभिः ॥ २५ ॥ ॐतत्सद्ब्रह्मणोविनियोगउक्तोऽथेदानींसच्छब्दस्य ॥

तस्मादोमित्युदाहृत्ययज्ञदानतपःक्रियाः ॥ प्रवर्त्तंतेविधानोक्ताःसततंब्रह्मवादिनां ॥ २४ ॥
तदित्यनभिसंधायफलंयज्ञतपःक्रियाः ॥ दानक्रियाश्चविविधाःक्रियंतेमोक्षकांक्षिभिः ॥ २५ ॥
सद्भावेसाधुभावेचसदित्येतत्प्रयुज्यते ॥ प्रशस्तेकर्मणितथासच्छब्दःपार्थयुज्यते ॥ २६ ॥

विनियोगःकथ्यते ।सद्भावेऽसतःसद्भावेयथाऽविद्यमानस्यपुत्रस्यजन्मतथासाधुभावेऽसद्वृत्तस्यासाधोःसद्वृत्
तासाधुभावःतस्मिन्साधुभावेचसदित्येतदभिधानंब्रह्मणःप्रयुज्यतेतत्रोच्यतेऽभिधीयतेप्रशस्तेकर्मणिविवा
हादौचतथासच्छब्दःपार्थयुज्यतेएतत्‌ ॥ २६ ॥ श्रीसीतारामचंद्राजीप्रसंन्नोमस्तु ॥ श्रीरामचंद्रायनमोनमः ॥

स्तत्रब्रह्मवेदः ॥ २४ ॥ ओंशब्दस्यविनियोगमुक्त्वातच्छब्दस्यविनियोगमाह ।तदित्यादिना ॥ २५ ॥ वृत्तमनूद्यानंतरश्लोकतात्पर्यमाह ॥ ॥

ओंतत्सदिति ॥ २६ ॥

प्रकारांतरेण सच्छब्दस्य विनियोगमाह ॥ यज्ञ इति ॥ नाममंत्रयोच्चारणात्साद्गुण्यं सिध्यतीति प्रकरणार्थमुपसंहरति ॥ तदेतदिति ॥ २७ ॥
अश्रद्धान्वितस्यापि कर्मणो नाममंत्रयोच्चारणाद्वैगुण्ये श्रद्धाप्राधान्यं न स्यादित्याशंक्याह ॥ तत्र चेति ॥ सप्तमीभ्यां प्रकृतं यज्ञादिगृह्यते सर्वं यज्ञादि सगुणमिति शेषः ॥ तस्यासत्वं साधयति ॥ सत्यातीति ॥ ऐहिकमामुष्मिकं च फलमश्रद्धितेनापि कर्मणा संपत्स्यते कुतोस्या सत्वमित्याशंक्याह ॥ न चेति ॥ तस्योभयविधिविफलहेतुत्वे हेतुमाह ॥ साधुभिरिति ॥ निंदंति हि साधवः श्रद्धारहितं कर्मातो नेतरोभय

यज्ञे यज्ञकर्मणि या स्थितिः तथा तपसि च या स्थितिर्दाने च या स्थितिः सा च सदित्युच्यते विद्वद्भिः कर्म च एव तदर्थीयं यज्ञदानत पोर्थीयं अथवा यस्याभिधानत्रयं प्रकृतं तदर्थीयमीश्वरार्थीयमित्येतत्सदित्येवाभिधीयते तदेतद्यज्ञदानतपआदि कर्म असात्विकं विगुणमश्रद्धापूर्वकमपि ब्रह्मणोभिधानत्रयप्रयोगेण सद्गुणं सात्विकं सश्रद्धं च संपादितं भवति ॥ २७ ॥ तत्र च स

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ॥ कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७ ॥ अ
श्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ॥ असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २८ ॥ श्रीः ॥

र्वत्र श्रद्धाप्रधानतया सर्वं संपद्यते यस्मात् तस्मात् ॥ अश्रद्धया हुतं हवनं कृतं दत्तं च ब्राह्मणेभ्योऽश्रद्धया तपस्तप्तं अनुष्ठि तमश्रद्धया तथाऽश्रद्धयैव कृतं च यत्स्तुतिनमस्कारादि तत्सर्वमसदित्युच्यते सत्प्राप्तिसाधनमार्गबाह्यत्वात् पार्थ न च तत् हक्षायासमपि प्रेत्य फलाय नो अपीहार्थं साधुभिर्निंदितत्वादिति ॥ २८ ॥ इति श्रीमद्भगवद्गीताटीकायां सप्तदशोऽध्यायः ॥ १७

फलोपायिकमित्यर्थः ॥ तदनेन शास्त्रानभिज्ञानामपि श्रद्धावतां श्रद्धया सात्विकादित्रैविध्यभाजां राजसतामसाहारादित्यागेन सात्विकाहारादिसेवया सत्वैकशरणानां प्राप्तमपि यज्ञादिवैगुण्यं ब्रह्मनामनिर्देशेन परिहरतां परिशुद्धबुद्धीनां श्रवणादिसामग्रीसंजाततत्व साक्षात्कारवतां मोक्षोपपत्तिरिति स्थितं ॥ २८ ॥ ॥ इति श्रीभगवद्गीतानंदगीरीटीकायां सप्तदशोऽध्यायः ॥ १७ ॥ ॥

पूर्वैरध्याये विस्तरेण यतस्ततो विक्षिप्ततयोक्तमर्थं सुखप्रतिपत्त्यर्थं संक्षेपेणोपसंहृत्याभिधातुमध्यायांतरमवतारयति ॥ सर्वस्यैवेति ॥ उपसंहृत्य वक्तव्य इति संबंधः किंचोपनिषत्सु यतस्ततो विस्तृतस्यार्थस्य बुद्धिसौकर्यार्थमस्मिन्नध्याये संक्षिप्याभिधानं कर्त्तव्यमुपनिषदां गीतानां चैकार्थत्वादित्याह ॥ सर्वश्चेति ॥ कथं सर्वोपि गीताशास्त्रार्थोऽस्मिन्नध्याये संक्षिप्यो

सर्वस्यैव गीताशास्त्रस्यार्थोऽस्मिन्नध्याये उपसंहृत्य सर्वश्च वेदार्थो वक्तव्य इत्येवमर्थोयमध्याय आरभ्यते स वोद्यतीतेष्वध्यायेषूक्तोर्थोऽस्मिन्नध्यायेऽवगम्यते अर्जुनस्तु संन्यासत्यागशब्दार्थयोरेव विशेषं बुभुत्सुरुवाच ॥ संन्यासस्य संन्यासशब्दार्थस्येत्येतन्महाबाहो तत्त्वं तस्य भावस्तत्त्वं याथात्म्यमित्येतदिच्छामि वेदितुं ज्ञातुं त्यागस्य च

॥ अर्जुन उवाच ॥ संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुं ॥
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥ श्रीकृष्णाय नमः ॥

त्यागशब्दार्थस्येत्येतत् हृषीकेश पृथगितरेतरविभागतः हे केशिनिषूदन केशीनामा कश्चित् हयच्छद्मासुरस्तं निषूदितवान् भगवान् वासुदेवः तेन तन्नाम्नासंबोध्यतेऽर्जुनेन ॥ १ ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीः ॥

पसंह्रियते तत्राह ॥ सर्वोहीति ॥ ननु वेदार्थश्चेदत्रोपसंजिहीर्षितस्तर्हि किमिति त्यागेनैकेसंन्यासयोगादितिश्च वेदार्थैकदेशविषयं प्रश्नप्रतिवचनं तत्राह ॥ अर्जुनस्त्विति ॥ पृथक्तयोस्तत्त्वं वेदितुमिच्छामीति विशेषणाद् पृथगर्थत्वयोरस्तीति गम्यते बुभुत्सितस्य प्रष्टव्यत्वादेकदेशे तज्ज्ञावादुक्त प्रश्नोपपत्तिरिति भावः ॥ १ ॥ श्रीरामचंद्राय नमः ॥ श्रीरामकृष्णाय नमो नमः ॥

छ्यतेत्रा

ननु पूर्वेष्वेवाध्यायेषु तत्र तत्र संन्यासत्यागयोरुक्तत्वात् किमिति पुनस्तौ पृच्छ्येते तद्योगात्तत्राह् तत्र तत्रेति नर्निर्लुठिता
र्थौ नानिःकृष्टार्थौ न विविक्तार्थौ विसर्यः बुभुत्सया प्रश्नस्य प्रवृत्तत्वात्स्तुरभिप्रायं प्रश्नेन प्रतिपद्य भगवानुत्तरमुक्तवा

तत्र तत्र निर्दिष्टौ संन्यासत्यागशब्दौ न निर्लुठितार्थौ पूर्वेष्वध्यायेष्वतोऽर्जुनाय पृष्टवते तन्निर्णयाय काम्यानाम
श्वमेधादीनां कर्मणां न्यासं परित्यागं संन्यासं संन्यासशब्दार्थमनुष्ठेयत्वेन प्राप्तस्याननुष्ठानं कवयः पंडिताः के
चिद्विदुः विजानंति नित्यनैमित्तिकादीनां अनुष्ठीयमानानां सर्वकर्मणां आत्मसंबंधितया प्राप्तस्य फलस्य प॥

॥श्रीभगवानुवाच॥ काम्यानां कर्मणां न्यासं संन्यासं कव
यो विदुः॥ सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥ २॥ ॥

रित्यागः सर्वकर्मफलत्यागस्तं प्राहुः कथयंति त्यागं त्यागशब्दार्थं विचक्षणाः पंडिताः यदि काम्यकर्मपरित्या
गः फलपरित्यागो वार्थो वक्तव्यः सर्वथापि परित्यागमात्रं संन्यासत्यागशब्दयोरेकोर्थः न घटपटशब्दादिवज्जात्यं

नित्याह् अत इति पक्षद्वयोपन्यासेन संन्यासत्यागशब्दयोरर्थभेदं कथयति काम्यानामिति तत् किमिदानीं संन्यासत्याग
शब्दयोरसंति कं भिन्नार्थत्वं तथात्वे प्रसिद्धिविरोधः स्यादित्याशंक्यावांतरभेदेपि नात्यंतिकभेदोस्तीत्याह् यदीति॥ ॥

पुत्राभावाद्वंध्यायास्तत्त्यागायोगवन्नित्यनैमित्तिककर्मणामफलानां फलत्यागानुपपत्तेरुक्तत्यागशब्दार्थो न सिध्यतीति शंकते । नन्विति । नित्यनैमित्तिककर्मफलस्य वंध्यापुत्रसादृश्याभावात्त्यागसंभवादुक्तत्यागशब्दार्थः संभवतीति समाधत्ते । नैष दोष इति भगवता तेषां फलवत्त्वमिष्टमित्यत्र वाक्यशेषमनुकूलयति । वक्ष्यतीति । तर्हि संन्यासिना

ननु नित्यनैमित्तिकादीनां कर्मणां फलमेव नास्तीत्याहुः कथमुच्यते तेषां फलपरित्याग इति यथा वंध्यायाः पुत्रत्यागः नैष दोषः । नित्यानामपि कर्मणां भगवता फलवत्त्वस्येष्टत्वात् वक्ष्यति हि भगवानऽनिष्टमिष्टं मिश्रं चेति न तु संन्यासिनामिति च तत्र संन्यासिनामेव हि केवलं कर्मफलाऽसंबंधं दर्शयन् असंन्यासिनां नित्यकर्मफलप्राप्तिर्भवति अत्यागिनां प्रेत्येति दर्शयति ॥ २ ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीसीतारामचंद्राय नमो नमः

मसंन्यासिनां च नित्याद्यनुष्ठायिनामविशेषेण तत्फलं स्यादिति चेन्नेत्याह । नन्विति । वक्ष्यतीत्यनुकर्षणं चकारार्थः प्रयुक्तस्य वचसोऽर्थे प्रकृतोपयोगित्वेन संगृह्य स्मारयति ॥ संन्यासिनामिति ॥ २ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥

काम्यानि वर्जयित्वा नित्यनैमित्तिकानि फलाभिलाषादृते कर्तव्यानीत्युक्तपक्षं प्रतिपक्षनिरासेन दृढयितुं विप्रतिपत्तिमाह ।
त्याज्यमिति कर्मणः सर्वस्य दोषवत्त्वे हेतुमाह बंधेति दोषवदित्येतत् दृष्टांतेन व्याचष्टे अथवेति कर्मण्यनधिकृतानामक
र्मिणामेव कर्मत्याज्यं कर्मिणां तत्त्यागे प्रत्यवायादित्याशंक्याह अधिकृतानामिति न हि तेषामपि कर्मत्यजतां प्रत्यवायो

त्याज्यं त्यक्तव्यं दोषवद्दोषोऽस्यास्तीति दोषवत् किं तत्कर्म बंधहेतुत्वात् सर्वमेव च अथवा दोषो यथा रागादि
स्त्यज्यते तद्वत्त्याज्यमित्येके कर्म प्राहुर्मनीषिणः पंडिताः सांख्यादिदृष्टिमाश्रिताः अधिकृतानां तु कर्मिणामपी

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः यज्ञदानतपःकर्म न त्याज्यमिति चापरे ३

ति तत्रैव यज्ञदानतपःकर्म न त्याज्यमिति चापरे कर्मिण एवाधिकृतानपेक्ष्यैते विकल्पा न तु ज्ञाननिष्ठान् व्युत्थायिनः
संन्यासिनोपेक्ष्य ज्ञानयोगेन सांख्यानां निष्ठा मया पुरा प्रोक्तेति कर्माधिकारादुद्धृता ये न तान् प्रति चिंता ॥ ॥

हिंसादियुक्तस्य कर्मणोऽनुष्ठाने परं प्रत्यवायादिति भावः सांख्यादिपक्षसमाप्ताविति शेषः मीमांसकपक्षमाह तत्रैवेति
कर्माधिकृतेष्वेवेति यावत् कर्मेति नित्यनैमित्तिकं च काम्यानां कर्मणामित्यारभ्य श्लोकाभ्यां कर्मिणोऽकर्मिणोऽधिकृता
ननधिकृतांश्चापेक्ष्य दर्शितविकल्पानां प्रवृत्तिरित्याशंक्याह कर्मिण इति एवकारव्यवच्छेद्यमाह न त्विति तदेव स्फुटयति

कर्माधिकृतानां ज्ञाननिष्ठातो विभक्तनिष्ठावत्वेन पूर्वत्रोक्तानामपि शास्त्रार्थोपसंहारे पुनर्विचार्यत्ववत् ज्ञाननिष्ठानामपि विचार्यत्वम
त्राविरुद्धमिति शंकते ॥ नन्विति ॥ सांख्यानां परमार्थज्ञाननिष्ठानां नात्र विचार्यतेत्युत्तरमाह ॥ न तेषामिति ॥ ननु तेषामप्यात्मनि क्लेश
दुःखानि पश्यतां तदनुरोधेन राजसकर्मत्यागासिद्धेर्विचार्यत्वं नेत्याह ॥ न कायेति ॥ तत्र क्षेत्राध्यायोक्तं हेतुं करोति ॥ इच्छादीनामिति
स्वात्मनि सांख्यादीनां क्लेशाद्यप्रतीतौ फलितमाह ॥ अत इति ॥ ननु तेषां क्लेशाद्यदर्शनेपि स्वात्मनि कर्माणि पश्यतां तत्त्यागो युक्त

ननु कर्मयोगेन योगिनामित्यधिकृताः पूर्वं विभक्तनिष्ठा अपि इह सर्वशास्त्रोपसंहारप्रकरणे यथा विचार्यंते तथा
सांख्या अपि ज्ञाननिष्ठा विचार्यंतामिति ॥ न तेषां मोह क्लेशदुःखनिमित्तत्यागानुपपत्तेः न काय क्लेशदुःखानि सां
ख्या आत्मनि पश्यंति इच्छादीनां क्षेत्रधर्मत्वेनैव दर्शितत्वात् अतस्तेन कायक्लेशदुःखभयात्कर्म परित्यजंति नापि ते क
र्माण्यात्मनि पश्यंति येन नियतं कर्म मोहात्परित्यजेयुः गुणानां कर्म नैव किंचित्करोमीति हि ते संन्यस्यंति सर्वक
र्माणि मनसा संन्यस्येत्यादिभिर्हि तत्त्वविदः संन्यासप्रकार उक्तः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्त ॥ श्रीः ॥

तेषां कायक्लेशादिकरत्वान्नेत्याह ॥ नापीति ॥ अज्ञानं मोहमाहात्म्यान्नियतमपि कर्म सक्तं कुशकं नतत्त्वविदां स्वात्मनि कर्मादर्श
नेत त्यागे हेत्वभावादिति मत्वाह ॥ मोहादिति ॥ कथं तर्हि स्वात्मनि कर्माण्यपश्यतां प्राप्तभावे तत्त्यागः संन्यासस्तत्राह ॥ गुणाना
मिति ॥ अविवेकप्राप्तानां कर्मणां त्यागस्तत्त्वविदामित्युक्तं स्मारयन्नप्राप्तप्रतिषेधं प्रत्यादिशति ॥ सर्वेति ॥ ॥ श्रीकृष्णः ॥

तत्वविदामविचार्यत्वेफलितमाह। तस्मादिति। येऽनात्मविदस्तएवेत्युत्तरत्रसंबंधः कर्मण्यधिकृतानामनात्मविदांकर्मत्याग
संभावनांदर्शयति। येषांचेति। तन्निंदाकुत्रोपयुज्यतेइत्याशंक्याह। कर्मिणामिति। किंचपरमार्थसंन्यासिनःप्रशस्यत्वो
पलंभान्ननिंदाविषयत्वमित्याह। सर्वेति। किंचात्रापिसिद्धिंप्राप्तोयथेत्यादिनाज्ञाननिष्ठायावक्ष्यमाणत्वान्नतद्भतांनेह
विचार्यतेत्याह। वक्ष्यतीतिकर्माधिकृतानामेवात्रविवक्षितत्वान्नज्ञाननिष्ठानामित्युपसंहरति। तस्मादिति। ननुसंन्यास

तस्माद्येऽधिकृताःकर्मण्यनात्मविदोयेषांचमोहात्त्यागःसंभवतिकायक्लेशभयाच्चतेएवतामसाःत्यागिनोरा
जसाश्चेतिनिंद्यंतेकर्मिणामनात्मज्ञानांकर्मफलत्यागस्तुस्त्वर्थेसर्वारंभपरित्यागीमौनीसंतुष्टोयेनकेनचिद
निकेतःस्थिरमतिरितिगुणातीतलक्षणेनचपरमार्थसंन्यासिनोविशेषितत्वाद्वक्ष्यतिचज्ञानस्ययापरानिष्ठे
ति तस्माज्ज्ञाननिष्ठाःसंन्यासिनोनेहविवक्षिताःकर्मफलत्यागएवसात्विकत्वेनगुणेनतामसत्वाद्यपेक्षया
संन्यासउच्यतेनमुख्यःसर्वकर्मसंन्यासःसर्वकर्मसंन्यासासंभवेचनहिदेहभृतेतिहेतुवचनात्मुख्यए
वेतिचेन्नहेतुवचनस्यस्तुत्यर्थत्वाद्यथात्यागाच्छांतिरनंतरमितिकर्मफलत्यागस्तुतिरेव॥ ॥

शब्देनसर्वकर्मसंन्यासोग्राह्यस्तथाविधसंन्यासिनामिहविवक्षितत्वंप्रतिभातितत्राह। कर्मेति। संन्यासशब्देनमुख्य
स्यैवसंन्यासस्यग्रहणंगौणमुख्ययोर्मुख्येकार्यसंप्रत्ययादन्यथातदसंभवेहेतूक्तिर्वैयर्थ्यादप्राप्तप्रतिषेधादितिशंक
ते सर्वेति। नेदंहेतुवचनंसर्वकर्मसंन्यासासंभवसाधकंकर्मफलत्यागस्तुतिपरत्वादितिपरिहरति। नेत्यादिना। एतदेव
दृष्टांतेनस्पष्टयति। यथेति॥ ॥श्रीः॥ ॥

दृष्टांतेपि यथाश्रुतसर्थत्वं किं न स्यादित्याशंक्याह ॥ यथोक्तेति ॥ नहि फलत्यागादेव ज्ञानविरहान्मुक्तिरिति युक्तं मुक्तेर्ज्ञानाधीनत्व
साधकश्रुतिस्मृतिविरोधाद्द्वेष्टेत्यादिना चानंतरमेव ज्ञानसाधनविधानानर्थक्याद्‍तस्त्यागस्तुतिरेवात्र ग्राह्येत्यर्थः ॥ दृष्टांत
गतमर्थं दृष्टांतिकेपि योजयति ॥ तथेति ॥ प्रागुक्तपक्षापवादविवक्षया हेतूक्तेर्मुख्यार्थत्वमेव किं न स्यादित्याशंक्य तदपवादे हेत्व

यथोक्तानेकपक्षानुष्ठानाशक्तिमंतमर्जुनं प्रति विधानात्तथेदमपि न हि देहभृता शक्यं इति कर्मफलत्याग
स्तुत्यर्थं वचनं न सर्वकर्माणि मनसा संन्यस्यनैव कुर्वन्न कारयन्नास्त इत्यस्य पक्षस्यापवादः केनचिद्दर्शयि
तुं शक्यस्तस्मात्कर्मण्यधिकृतान्प्रत्येवैष संन्यासत्यागविकल्पः ये तु परमार्थदर्शिनः सांख्यास्तेषां ज्ञाननि
ष्ठायामेव सर्वकर्मसंन्यासलक्षणायां अधिकारो नान्यत्रेति न ते विकल्पार्हाः ॥ तथोपपादितमस्माभिर्वे
दाविनाशिनमित्यस्मिन्प्रदेशे तृतीयादौ च ॥ ३ ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीरामायनमः ॥

भावान्नैवमित्याह ॥ न सर्वेति ॥ नन्वेयमेव हेतूक्तिस्तदपवादिकान्यथासिद्धेरुक्तत्वादिति भावः मुख्यसंन्यासापवादासंभवे संन्या
सत्यागविकल्पस्य कथं सावकाशतेत्याशंक्याह ॥ तस्मादिति ॥ ज्ञाननिष्ठान्प्रति उक्तविकल्पानुपपत्तौ कुत्र तेषामधिकारस्तत्राह
ये त्विति संन्यासिनां विकल्पानर्हत्वेन ज्ञाननिष्ठायामेवाधिकारो भूयःसु प्रदेशेषु साधितत्वान्न साधनीयत्वापेक्षेत्याह ॥ तथेति ॥ ३ ॥

कर्माधिकृतान्प्रत्येवोक्तविकल्पप्रवृत्तावपिकुतोनिर्द्धारणसिद्धिस्तत्राह तत्रेति तमेवनिश्चयंदर्शयितुमादौत्यागगतमेवावांतरविभा
गमाह त्यागोहीति ननुत्यागसंन्यासयोरुभयोरपिप्रकृतत्वाविशेषेत्यागस्यैवावांतरविभागाभिधानेसंन्यासस्योपेक्षत्वमाप
द्येतनेत्याह त्यागेति सात्विकोराजसस्तामसश्चेत्युक्तेर्थत्रैविध्येपित्वयमेवनिश्चयसंभवात् किमत्रभागवतेननिश्चयेनेत्या

तत्रतेषुविकल्पभेदेषु निश्चयंशृणुअवधारयमेममवचनात्तत्रत्यागेत्यागसंन्यासविकल्पेयथादर्शितेभरतसत्तम
भरतानांसाधुतमत्यागोहित्यागसंन्यासशब्दवाच्योहियोऽर्थःसएकएवेत्यभिप्रेत्याह त्यागोहिहेपुरुषव्याघ्रत्याग
स्त्रिविधःत्रिःप्रकारःतामसादिभेदैःसंप्रकीर्त्तितःशास्त्रेषुकथितोयस्मात्तामसादिभेदेनत्यागसंन्यासशब्दवाच्योर्थोऽधि

निश्चयंशृणुमेतत्रत्यागेभरतसत्तम ॥ त्यागोहिपुरुषव्याघ्रत्रिविधःसंप्रकीर्त्तितः ॥ ४ ॥ यज्ञ
दानंतपःकर्मनत्याज्यंकार्यमेवतत् ॥ यज्ञोदानंतपश्चैवपावनानिमनीषिणां ॥ ५ ॥ ५ ॥

कृतस्यकर्मिणोऽनात्मज्ञस्यत्रिविधःसंभवतिनपरमार्थदर्शिनइत्ययमर्थोदुर्ज्ञानस्तस्मात्तत्त्वंनान्योवक्तुंसमर्थस्तस्मान्नि
श्चयंपरमार्थशास्त्रार्थविषयमध्यवसायमेश्वरंशृणु ४ कःपुनरसौनिश्चयइत्याह यज्ञोदानंतपइत्येतत्त्रिविधंकर्मनत्याज्यं
नत्यक्तव्यंकार्यंकरणीयमेवतत् कस्माद्यज्ञोदानंतपश्चैवपावनानिविशुद्धिकराणिमनीषिणांफलानभिसंधीनामित्येतत् ५

र्थंक्याह यस्मादिति भगवतोऽन्येनोक्तविभागेतत्त्वानिश्चियाद्भागवतनिश्चयस्यश्रोतव्यतेतिनियमयति ४ तमेवभगवतोनि
श्चयंविशेषतोनिर्द्धारयितुंप्रश्नपूर्वकमनंतरश्लोकप्रवृत्तिंदर्शयति कःपुनरिति यज्ञादीनांकर्त्तव्यत्वेहेतुमाह यज्ञइति नकेवलं
नत्याज्यंकिंतुकर्त्तव्यमेवेत्याह कार्यमिति प्रतिज्ञामेवविभज्यकार्येहेतुंविभजते कस्मादिति ५ श्रीसीतारामचंद्रायनमः

प्रतिज्ञातमर्थमुपसंहरति॥ एतान्यपीति॥ उपसंहारश्लोकाक्षराणि व्याकरोति॥ एतानीत्यादिना॥ अपिशब्द विवक्षितमर्थं दर्शय
ति॥ ससंगस्येति॥ व्यावर्त्यं कीर्त्तयति॥ नत्विति॥ एतान्यपीत्यादिवाक्यं न नित्यकर्मविषयमिति मतमुपन्यस्यत्य न्यश्रुतिन वेदं नि

एतान्यपि तु कर्माणि यज्ञदानतपांसि पावनानीत्युक्तानि संगं त्यक्त्वा संगमासक्तिं तेषु त्यक्त्वा फलानि च तेषां परित्यज्य
कर्त्तव्यानीत्यनुष्ठेयानीति मे मम निश्चितं मतमुत्तमं निश्चयं शृणु मे तत्रेति प्रतिज्ञाय पावनत्वं च हेतुमुक्त्वा एतान्यपि
कर्माणि कर्त्तव्यानीत्येतन्निश्चितं मतमुत्तमं ममेति प्रतिज्ञातार्थोपसंहार एव नापूर्वार्थं वचनं एतान्यपीति प्रकृतसन्नि

एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च॥ कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं॥ ६॥

कृष्टार्थत्वोपपत्तेः॥ ससंगस्य फलार्थिनो बंधहेतून्येतान्यपि मुमुक्षोः अपि कर्त्तव्यानीत्यपिशब्दस्यार्थो न तन्या निका
म्यानि कर्माण्यपेक्ष्यैतान्यपीत्युच्यंते अन्ये वर्णयंति॥ नित्यानां कर्मणां फलाभावात्संगं त्यक्त्वा फलानि चेति नोपपद्यते॥ अ
त एतान्यपीति या निकाम्यानि कर्माणि नित्येभ्योऽन्यानि एतान्यपि कर्त्तव्यानि किमुत यज्ञदानतपांसि नित्यानीति॥ ॥

त्यकर्मविषयं किं विषयं तर्हीत्याशंक्य वाक्यमवतार्य व्याकरोति॥ अत एतानीत्यादिना॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु॥

नित्यानामफलत्वमुपेत्य यत्नोद्यं तदयुक्तमिति दूषयति तदसदिति यत्काम्यान्यपि कर्त्तव्यानीति तन्निरस्यति नित्यान्यपीति
किंच काम्यानां भगवता निंदितत्वान्न तेषु मुमुक्षोरनुष्ठानमित्याह दूरेणेति किंच मुमुक्षोरपेक्षितमोक्षापेक्षया विरुद्धफल
वतां काम्यकर्मणां नैव तेषु तस्यानुष्ठानमित्याह यज्ञार्थादिति काम्यानां कर्मणां बंधहेतुत्वं निश्चितमित्यत्रैव पूर्वोत्तरवाक्यानु

तदसत् ॥ नित्यानामपि कर्मणां फलस्योपपादितत्वाद्यज्ञो दानं तपश्चैव पावनानीत्यादिवचनेन नित्यान्यपि क
र्माणि बंधहेतुत्वाशंकया जिहासोर्मुमुक्षोः कुतः काम्येषु संगो दूरेण ह्यवरं कर्मेति च निंदितत्वाद्यज्ञार्थात्कर्म
णोऽन्यत्रेति च काम्यकर्मणां बंधहेतुत्वस्य निश्चितत्वात्त्रैगुण्यविषया वेदास्त्रैविद्याः क्षीणे पुण्ये मर्त्यलो
कं विशंतीति च दूरे व्यवहितत्वाच्च न काम्येष्वेतान्यपीति व्यपदेशः ॥ ६ ॥ श्रीसीतारामचंद्राय नमो नमः ॥ ॥

कूल्यं दर्शयति त्रैगुण्येति ॥ किंच पूर्वश्लोके यज्ञादिनित्यकर्मणां प्रकृतत्वादेतच्छब्देन सन्निहितवाचिना परामर्शात्काम्यकर्म
णां च काम्यानां कर्मणामिति व्यवहितानां सन्निहितपरामर्शके तच्छब्दाविषयत्वान्न काम्यकर्माण्येतान्यपीति व्यपदेशमर्ह
तीत्याह दूरेति ॥ ६ ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामकृष्णाय नमो नमः ॥ श्रीः ॥

नित्यकर्मणामवश्यकर्त्तव्यत्वमुक्तमुपजीव्यापेक्षितं पूरयन्ननंतरश्लोकमवतारयति तस्मादिति ननु कश्चिन्नियतमपि त्यजन्नुपलभ्यते तत्राह मोहादिति अज्ञानं पावनत्वापरिज्ञानं अज्ञस्य नित्यकर्मत्यागो मोहादित्येतदुपपादयति नियतं चेति नित्यकर्मत्यागस्य मोहकृतत्वे कुतस्तामसत्वमित्याशंक्याह मोहश्चेति ७ इतश्च नित्यकर्मत्यागोऽज्ञस्य न संभवतीत्याह ॥

तस्मादज्ञस्याधिकृतस्य मुमुक्षोः नियतस्य तु नित्यस्य संन्यासः परित्यागः कर्मणो नोपपद्यते ऽज्ञस्य पावनत्वस्येष्टत्वा न्मोहादज्ञानात्तस्य नियतस्य परित्यागो नियतं चावश्यंकर्त्तव्यं त्यज्यते चेति प्रतिषिद्धमतो मोहनिमित्तः परित्यागस्ताम सः परिकीर्त्तितो मोहश्च तमइति ७ किंच दुःखमित्येव यत्कर्म कायक्लेशभयात् शरीरदुःखभयात्त्यजेत्परित्यजे

नियतस्य तु संन्यासः कर्मणो नोपपद्यते मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ७ ॥ दुःख मित्येव यत्कर्म कायक्लेशभयात्त्यजेत् सकृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥ ८ ॥

त् सकृत्वा राजसं रजोनिर्वर्त्यं त्यागं नैव त्यागफलं ज्ञानपूर्वकस्य सर्वकर्मत्यागस्य फलं मोक्षाख्यं लभेत् ॥ ८ ॥

किंचेति ननु मोहं विनैव दुःखात्मकं कर्म कायक्लेशभयात्त्यजति करणानि हि कार्यं जनयंति श्राम्यंति तथा च न तत्त्यागस्तामसो युक्त स्तत्राह दुःखमित्येवेति यत्कर्म दुःखात्मकमशक्यसाध्यमित्येवालोच्य तन्निर्वर्त्तने देहस्येंद्रियाणां च क्लेशात्मनोभयात्त्यजति स तत्त्यक्ता रजोनिमित्तं त्यागं कृत्वापि न तत्फलं मोक्षं लभते किंतु कृते नैव राजसेन त्यागेन तदनुरूपं नरकं प्रतिपद्यते त्याह दुःखमित्ये

य

कर्मत्यागस्तामसो राजसश्चेति द्विविधो दर्शितः संप्रति सात्विकं त्यागं प्रश्नपूर्वकं वर्णयति कः पुनरिति कर्त्तव्यमित्येवकारेणानि
त्यस्य भाव्यांतरं निषिध्यते ॥ नित्यानां विध्युद्देशे फलाश्रवणात्तेषां फलं त्यक्त्वेत्ययुक्तमित्याशंक्याह ॥ नित्यानामिति ॥ फलं त्य
क्त्वेत्यस्य विधांतरेण तात्पर्यमाह ॥ अथवेति ॥ नहि विधिनाकृतं कर्मानर्थकं विध्यानर्थक्यात् ॥ तेन श्रौतफलाभावेपि नित्यं क

कः पुनः सात्विकस्त्यागः ॥ कार्यं कर्त्तव्यमित्येव यत्कर्म नियतं नित्यं क्रियते निर्वर्त्यते अर्जुन संगं त्यक्त्वा फ
लं च एतद्धेव नित्यानां कर्मणां फलवत्त्वे भगवद्वचनं प्रमाणमवोचाम ॥ अथवा यद्यपि फलं न श्रूयते नि
त्यस्य कर्मणस्तथापि नित्यं कर्म कृतमात्मसंस्कारं प्रत्यवायपरिहारं वा फलं करोत्यात्मन इति विकल्पयेत्

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ॥ संगं त्यक्त्वा फलं चैव स त्यागः सात्विको मतः ॥९॥ ॥

वाज्ञस्तत्रतामपि कल्पनां निवारयति फलं त्यक्त्वेत्यनेन अतः साधूक्तं संगं त्यक्त्वा फलं चेति स त्यागो
नित्यकर्मसु संगफलपरित्यागः सात्विकः सत्वनिर्वृत्तो मतोभिमतः ॥ श्रीरामचंद्राय नमो नमः ॥

र्मे विधिनातिष्ठन्नात्मानमज्ञानन्नः ऽनुपहितमनस्त्वोत्त्यात तस्मिन्कर्मण्यात्मसंस्कारफलं कल्पयति ॥ तदकरणे प्रत्यवायस्मृत्या
तत्करणं कर्तुरात्मनः तन्निवृत्तिं करोतीति वा नित्ये कर्मण्युक्तां कल्पनामनुनिष्पादितफलकल्पनां च फलं त्यक्त्वेत्यनेन भ
गवान्निवारयतीत्यर्थः ॥ नित्यकर्मसु फलत्यागोक्तेः संभवे फलितमाह ॥ अत इति ॥ श्रीसीतारामचंद्राय नमो नमः ॥ ॥

कर्मतत्फलत्यागस्य त्यागसंन्यासशब्दाभ्यां प्रकृतस्य त्यागो हीतित्रैविध्यं प्रतिज्ञाय प्रतिज्ञानुरोधेन द्वे विधे उक्त्वा द्यतृतीयां ॥
विधां तद्विरोधेनानुक्त्वा दयतो भगवतोऽकौशलमापततीति शंकते ॥ नन्विति ॥ प्रक्रमप्रतिकूलमुपसंहारवचनमनुचितमि
त्यत्र दृष्टांतमाह ॥ यथेति ॥ पूर्वोत्तरविरोधेन प्राप्तमकौशलं प्रत्यादिशति ॥ नैष इति ॥ कर्मत्यागफलत्यागयोस्त्यागत्वेन सा

ननु कर्मफलत्यागस्त्रिविधः संन्यास इति च प्रकृतस्तत्र तामसो राजसश्चोक्तस्त्यागः ॥
कथमिह संगफलत्यागस्तृतीयत्वेनोच्यते ॥ यथा त्रयो ब्राह्मणा आगतास्तत्र षडंग
विदौ द्वौ क्षत्रियस्तृतीय इति तद्वत् ॥ नैष दोषः त्यागसामान्येन स्तुत्यर्थत्वात् अस्ति हि क
र्मसंन्यासस्य फलाभिसंधित्यागस्य च त्यागत्वं सामान्यं तत्र राजसतामसत्वेन कर्मत्या
गनिंदया कर्मफलाभिसंधित्यागः सात्विकत्वेन स्तूयते स त्यागः सात्विको मत इति ९ ॥

दृश्यात्कर्मत्यागनिंदया तत्फलत्यागस्तुत्यर्थमिदं वचनमित्यभ्युपगमान्न विरोधोस्तीत्युक्तमेव व्यक्तीकुर्वन्नादौ त्यागसा
मान्यं विशदयति ॥ अस्तीति ॥ सतिसामान्ये निर्देशस्य स्तुत्यर्थत्वं समर्थयति ॥ तत्रेति ॥ ९ ॥ श्रीसीतारामचंद्रायनमोनमः ॥

एवं पूर्वापरविरोधं परिहृत्यानंतरश्लोकार्थमाह यस्त्विति फलरागादिनेत्यादिशब्देन कर्मस्वरूपासंगो गृह्यते अंतःकरणम
कलुषीक्रियमाणमिति छेदः विशुद्धेंतःकरणे किं स्यादित्याशंक्याह विशुद्धमिति मलविकलत्वं विशुद्धत्वं संस्कारवत्वं प्रस
न्नत्वमिति भेदः क्रमेण श्रवणाद्यावृत्तिक्रमेणेत्यर्थः तन्निष्ठस्यात्मज्ञाननिष्ठोक्ता काम्ये कर्मणि त्याज्यत्वेन द्वेषमभिनयति
किमिति उभयत्र प्रीतिं द्वेषं च न करोतीति सामान्येनोक्तं कर्त्तारं प्रश्नपूर्वकं विशेषतो निर्दिशति कः पुनरिति त्यागीत्युक्तं त्या

यस्त्वधिकृतः संगं त्यक्त्वा फलाभिसंधिं च नित्यं कर्म करोति तस्य फलरागादिनाऽकलुषीक्रियमाणमंतःकरणं
नित्यैश्च कर्मभिः संस्क्रियमाणं विशुद्ध्यति तद्विशुद्धं प्रसन्नमात्मालोचनक्षमं भवतीति तस्यैवं नित्यकर्मानुष्ठानेन
विशुद्धांतःकरणस्यात्मज्ञानाभिमुखस्य क्रमेण यथा तन्निष्ठा स्यात्तद्वक्तव्यमित्याह न द्वेष्ट्यकुशलं अशोभनं काम्यं
कर्म शरीरारंभद्वारेण संसारकारणं किमनेनेत्येवं कुशले शोभने नित्ये कर्मणि सत्वशुद्धिज्ञानोत्पत्तितन्निष्ठाहेतु

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्यते

त्वेन मोक्षकारणमिदमित्येवं नानुषज्यते तत्रापि प्रयोजनमपश्यन्ननुषंगं प्रीतिं न करोतीत्येतत् कः पुनरसौ त्यागी
पूर्वोक्तेन संगफलत्यागेन तद्वान् त्यागी यः कर्मणि संगं त्यक्त्वा तत्फलं च नित्यकर्मानुष्ठायी स त्यागी कदा पुनरसा
वकुशलं कर्म न द्वेष्टि कुशले नानुषज्यते इत्युच्यते

गिनमभिव्यनक्ति पूर्वोक्तेनेति कर्मणि संगस्य तत्फलस्य च त्यागे
नेति यावत् उक्तमेव त्यागिनं विवृणोति यः कर्मणीति तत्फलं च त्यक्त्वेति संबंधः काम्ये निषिद्धे च कर्मणि बंधहेतुरिति न द्वे
ष्टि नित्ये नैमित्तिके च मोक्षहेतुरिति न प्रीयते तत्र कालविशेषं पृच्छति कदेति नित्यादिकर्मणा फलाभिसंधिवर्जितेन क्ष
पितकल्मषस्य सत्वं यथार्थग्रहणसामर्थ्यमुद्बुध्यते तेन समावेशदशायामुक्तप्रीतिद्वेषयोरभावो भवतीत्याह उ

अत एवेति ॥ समुद्बुद्धयथार्थग्रहणसामर्थ्यसमाविष्टत्वादित्यर्थः ॥ छिन्नसंशयत्वमेव विशदयति ॥ आत्मेति ॥ परं निःश्रेयसं तस्य च साधनं सम्यग्ज्ञानमेवेति योजना ॥ न द्वेष्टीत्यादिना श्लोकेनोक्तमर्थं संक्षिप्यानुवदति ॥ योधिकृत इति ॥ पूर्वोक्तप्रकारेणेति

सत्वसमाविष्टो यदा सत्वेनात्मानात्मविवेकविज्ञानहेतुना समाविष्टः संव्याप्तः संयुक्त इत्येतत् ॥ अत एव मेधावी मेधया आत्मज्ञानलक्षणया प्रज्ञया संयुक्तस्तद्वान्मेधावी मेधावित्वादेव छिन्नसंशयः छिन्नो विद्याकृतः संशयो यस्यात्मस्वरूपावस्थानमेव परं निःश्रेयससाधनं नान्यत् किंचिदित्येवं निश्चयेन छिन्नसंशः ॥

त्यागी सत्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १० ॥

योयोऽधिकृतः पुरुषः पूर्वोक्तेन प्रकारेण कर्मयोगानुष्ठानेन क्रमेण संस्कृतात्मा सन् जन्मादिविक्रियार ॥ हितत्वेन निःक्रियमात्मानमात्मत्वेन संबुद्धः सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन् आसीनो नैः कर्म्यलक्षणां ज्ञाननिष्ठामश्नुत इति एतत् पूर्वोक्तस्य कर्मयोगस्य प्रयोजनमनेन श्लोकेनोक्तं ॥ १० ॥

कर्मणि तत्फले च संगत्यागेनेत्यर्थः ॥ कर्मत्मिनो योगस्यानुष्ठानेन संस्कृतात्मा सन् क्रमेण श्रवणाद्यनुष्ठानद्वारेण कूटस्थं ब्रह्मप्रत्य त्वेन संबुद्ध इति संबंधः ॥ परस्य निःक्रियत्वे हेतुमाह ॥ जन्मादीति ॥ उक्तज्ञानवतः सर्वकर्मत्यागद्वारा मुक्तिभाक्त्वं दर्शयति सर्वेति ११

आत्मज्ञानवतः सर्वकर्मत्यागसंभावनामुक्त्वा तद्धीनस्य तदसंभवे हेतुवचनत्वेनानंतरश्लोकमवतारयति ॥यः पुनरिति॥ नवाधितमात्मनि कर्तृत्वविज्ञानमस्येत्यज्ञस्तस्यात स्वभावस्तत्तातयेतियावत् ॥ अतएतमर्थं दर्शयितुमज्ञस्य सर्वकर्मसंन्याससासंभवे हेतुमाहेतियोजना ॥यस्मादित्यस्य तस्मादित्युत्तरेण संबंधः॥ विवेकिनोपि देहधारित्वया देहभृत्त्वाविशेषेकर्मोधिकारः स्यादित्याशंक्याह ॥सहीति॥ कर्तृत्वाधिकारत्वस्पूर्वकं कर्मानुष्ठानं तस्मादितियावत् ज्ञानवतो देहधारणेपि तदभिमानित्वाभावोऽतः शब्दार्थः

यः पुनरधिकृतः सन् देहात्माभिमानित्वेन देहभृदज्ञोऽबाधितात्मकर्तृत्वविज्ञानतयाऽहंकर्त्तेति निश्चितबुद्धिस्तस्याशेषकर्मपरित्यागस्याशक्यत्वात् ॥ कर्मफलत्यागेन चोदितकर्मानुष्ठान एवाधिकारो न त्यागइत्येवमर्थं दर्शयितुमाह नहि यस्माद्देहभृतादेहं बिभर्त्तीति देहभृत् देहात्माभिमानवान् देहभृदुच्यते नहि विवेकी सहि वेदाविनाशिनमित्यादिना ॥

नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ॥ यस्तु कर्मफलत्यागी सत्यागीत्यभिधीयते ॥ ११ ॥

कर्तृत्वाधिकारान्निवर्त्तितोऽतः योज्ञस्तेन देहभृताज्ञेन न शक्यं त्यक्तुं संन्यसितुं कर्माण्यशेषतो निःशेषेण तस्मात् यस्त्वज्ञोधिकृतो नित्यानि कर्माणि कुर्वन् कर्मफलत्यागी कर्मफलाभिसंधिमात्रसंन्यासी सत्यागीत्यभिधीयते कर्म्यपि सन्निति स्तुत्यभिप्रायेण तस्मात् परमार्थदर्शित्वेनैवाऽदेहभृता देहात्मभावरहितेनाशेषकर्मसंन्यासः कर्त्तुं शक्यते मुमुक्षुणा ॥ ११ ॥

अज्ञस्य सर्वकर्मत्यागायोगमुक्तं हेतुं कृत्यफलितमाह ॥तस्मादिति॥ कर्मानुष्ठायिनस्त्यागित्वोक्तिरयुक्तेत्याशंक्याह ॥ कर्म्यपीति कर्मिणोपि फलत्यागेन त्यागित्ववचनं फलत्यागस्तुत्यर्थमित्यर्थः ॥ कस्य तर्हि सर्वकर्मत्यागः संभवतीत्याशंक्याविवेकवैराग्यादिमतो देहाभिमानहीनस्येति वक्तुं निगमयति ॥तस्मादिति॥ ॥ ११ ॥ श्रीसीतारामचंद्रजीप्रसन्नोमस्तु ॥ श्रीरामायनमः ॥

उक्ताऽधिकारिणः सर्वकर्मसंन्याससंभवेपिफलाभावेकुतस्तस्यकर्त्तव्यतेतिशंकते किंपुनरिति गौणस्यमुख्यस्यवासंन्यासस्य
फलंपिपृछिषितंविकल्पयति उच्यतइति सर्वकर्मत्यागोनामतदनुष्ठानेपितत्फलाभिसंधित्यागःसचामुख्यःसंन्यासस्त
स्यफलमाह अनिष्टमिति मुख्येतुसंन्यासेसर्वकर्मत्यागेसम्यग्धीद्वारासर्वसंसारक्षतिरेवफलमित्याह नत्विति पादत्रयं
व्याकरोति अनिष्टमित्यादिना तिर्यगादीत्यादिपदमवशिष्टनिकृष्टयोनिसंग्रहार्थंदेवादीत्यादिपदमवशिष्टोत्कृष्टयोनि

किंपुनस्तत्प्रयोजनंयत्सर्वकर्मपरित्यागात्स्यादित्युच्यते अनिष्टंनरकतिर्यगादिलक्षणंइष्टंदेवादिलक्ष
णंमिश्रंइष्टानिष्टसंयुक्तंमनुष्यलक्षणंचैवंत्रिविधंत्रिप्रकारंकर्मणोधर्माधर्मलक्षणस्यफलंबाह्यानेक

अनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफलं॥

कारकव्यापारनिष्पन्नंसदविद्याकृतमिंद्रजालमायोपमंमहामोहकरंप्रत्यगात्मोपसर्पीवफल्गुतया
लयमदर्शनंगछतीतिफलमितिफलनिर्वचनंतदेवंलक्षणंचफलं॥ श्रीरामचंद्रायनमोनमः॥

ग्रहार्थेतिविभागःफलशब्दंव्युत्पादयति बाह्येति कारकद्वारकमनेकविधत्वमुक्त्वामिथ्यात्वमाह अविद्येति ततकृतत्वे
नदृष्टिमात्रदेहत्वेदृष्टांतमाह इंद्रेति प्रतीतितोरमणीयत्वंसूचयति महामोहेति अविद्योत्थितस्याविद्याश्रितत्वादात्माश्रि
तत्वंवस्तुतोनास्तीत्याह प्रत्यगिति॥

उक्तं फलं कर्मिणामिष्यते चेरमुख्यसंन्यासफलोक्तिपरत्वं पादत्रयस्य कथमिष्टमित्याशंक्याह ॥ अपरमार्थेति ॥ फलाभिसं
धिविकलानां कर्मिणां देहपाताद्दूर्द्ध्वं कर्मानुरोधिफलमावश्यकमित्यर्थः ॥ कर्मिणामेव सतामफलाभिसंधीनाममु
ख्यसंन्यासित्वात्तदीयामुख्यसंन्यासस्य फलमुक्त्वा चतुर्थपादं व्याचष्टे ॥ नत्विति ॥ अमुख्यसंन्याससमनंतरं प्रकृतं व्य
वच्छिनत्ति ॥ परमार्थेति ॥ तेषां प्रधानं धर्ममुपदिशति ॥ केवलेति ॥ क्वचिद्देशे काले वा नास्ति यथोक्तं फलं तेषामिति संबंधः

भवत्यत्यागिनामज्ञानां कर्मिणामपरमार्थसंन्यासिनां प्रेत्य शरीरपाताद्दूर्द्ध्वं न तु परमार्थसंन्यासिनां परमहंस
परिव्राजकानां केवलज्ञाननिष्ठानां क्वचिन्न हि केवलसम्यग्दर्शननिष्ठोऽविद्यादिसंसारबीजं नोन्मूलयति क

भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥ १२ ॥

दाचिदित्यर्थः ॥ परमार्थदर्शिन एवाशेषकर्मसंन्यासित्वं संभवत्यविद्याध्यारोपितत्वादात्मनि क्रियाकारकफ
लानां न त्वज्ञस्याधिष्ठानादीनि क्रियाकर्तृणि कारकाण्यात्मत्वेन पश्यतोऽशेषकर्मसंन्यासः संभवति ॥ १२ ॥

तर्हि परमार्थसंन्यासोऽपि विफलत्वान्नानुष्ठीयेतेत्याशंक्य तस्य मोक्षावसायित्वान्मैवमित्याह ॥ नहीति ॥ ननु परमार्थसंन्यास
वदविशेषादज्ञानां परमार्थसंन्यासोऽपि किं न स्यात् त्यागस्य सुकरत्वात्तत्राह ॥ परमार्थेति ॥ तस्य सम्यग्दर्शनादविद्यानिवृ
त्तौ तदारोपितक्रियाकारकादिनिवृत्तेरिति हेत्वर्थः ॥ विद्यावतः सर्वकर्मसंन्यासित्वसंभावनामुक्त्वा एवकारव्यावर्त्यं दर्शय
ति ॥ नत्विति ॥ अविदुषोऽशेषकर्मणां तद्धेतूनां च रागादीनां त्यागायोगे कारकेष्वधिष्ठानादिष्वात्मत्वदर्शनं हेतुमाह ॥

कथमधिष्ठानादीनां क्रियाकर्तृत्वं कथं वाऽविदुषस्तेषामात्मत्वधीरित्याशंक्यानंतरश्लोकचतुष्टयस्य तात्पर्यमाह तदेतदिति कर्मणां नामधिष्ठानादीनामप्रामाणिकत्वाशंकामादावुद्धरति पंचेति उत्तरत्रेत्यधिष्ठानादिषु वक्ष्यमाणेष्वित्यर्थः वस्तूनां तेषां एवं वैषम्यं दिदर्शयिषितं न हि चेतः समाधानादृते ज्ञातुं शक्येत सांख्यशब्दं व्युत्पादयति ज्ञातव्या इति आत्मा तत्पदार्थस्तत्पदार्थो ब्रह्म तयोरैक्यधीस्तदुपयोगिनश्च श्रवणादयः पदार्थास्ते संख्यायंते व्युत्पाद्यं तैः कृतांतशब्दस्य वेदांतविषयत्वं विभजते कृतमित्यादिना वेदांतस्य तत्त्वधीद्वारा कर्मावसानभूमित्वेनाकोपक्रमानुकूल्यं दर्शयति यावानिति उदपाने कूपादो

तदेतदुत्तरैः श्लोकैः दर्शयति पंचेमानि वक्ष्यमाणानि हे महाबाहो कारणानि निर्वर्तकानि निबोध मे मम इदमुत्तरत्र चेतः समाधानार्थं वस्तुवैषम्यप्रदर्शनार्थं च तानि पंचकारणानि ज्ञातव्यतया स्तौति सांख्ये ज्ञातव्याः पदार्थाः संख्यायंते यस्मिन् शास्त्रे तत्सांख्यं वेदांतः कृतांत इति तस्यैव विशेषणं कृतमिति कर्मोच्यते तस्यांतः कृतपरिसमाप्तिर्यत्र स कृ

पंचेमानि महाबाहो कारणानि निबोध मे सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणां ॥ १३ ॥

तांतः कर्मांत इत्यर्थः यावानर्थ उदपाने सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इत्यात्मज्ञाने संजाते सर्वकर्मणां निवृत्तिं दर्शयति अतस्तस्मिन्नात्मज्ञानार्थे सांख्ये कृतांते प्रोक्तानि कथितानि सिद्धये निष्पत्त्यर्थं सर्वकर्मणां तानि १३

तो यावानर्थः स्नानादिस्तावानर्थः समुद्रे संपद्यते अर्थो यथा कूपादिकृतं कार्यं सर्वं समुद्रेंऽतर्भवति तथा सर्वेषु वेदेषु कर्मार्थेषु यावत्फलं तावत् ज्ञानवतो ब्राह्मणस्य ज्ञानेंऽतर्भवति ज्ञानं प्राप्तस्य कर्तव्यानवशेषादित्यर्थः तत्रैव वाक्यांतरमनुक्रामति सर्वमिति उदाहृतवाक्ययोस्तात्पर्यमाह आत्मेति आत्मज्ञाने सति सर्वकर्मनिवृत्तावपि कथं वेदांतस्य कृतांतत्वमित्याशंक्याह अत इति तानि मद्वचनतो निबोधेति पूर्वेण संबंधः १३ श्रीः

कर्मार्थान्यधिष्ठानादीनि मानमूलत्वात्तज्ज्ञेयानीत्युक्तमिदानीं प्रश्नपूर्वकं विशेषतस्तानि निर्दिशति कानीत्यादिना ॥ प्रतीकमादाय व्याकरोति ॥ अधिष्ठानमिति ॥ उपाधिलक्षणो बुद्ध्यादिरूपोपाधिस्तल्लक्षणस्तत्स्वभावो बुद्ध्याद्यनुविधायी तद्धर्मा नात्मनि पश्यन्नुपहितस्तत्प्रधानद्रष्टत्वार्थः तत्र कार्यलिंगकमनुमानं सूचयति ॥ शब्दादीति ॥ ज्ञानेंद्रियाणि पंच कर्मेंद्रियाणि पंच म

कानीत्युच्यते ॥ अधिष्ठानमिच्छाद्वेषसुखदुःखज्ञानादीनामभिव्यक्तेराश्रयो धिष्ठानं शरीरं तथा कर्त्ता उपाधिलक्षणो देही भोक्ता करणं च श्रोत्रादिकं शब्दाद्युपलब्धये पृथग्विधं नानाप्रकारं द्वादशसंख्यं

अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधं ॥ विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमं ॥१४॥

विविधाश्च पृथग्चेष्टा वायवीयाः प्राणापानाद्याः दैवं चैव दैवमेव च अत्र तेषु चतुर्षु पंचमं पंचानां पूरणं आदित्यादि चक्षुराद्यनुग्राहकं ॥१४॥ श्रीरामचंद्राय नमः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥

नो बुद्धिश्चेति द्वादशसंख्यत्वं चेष्टाया विविधत्वं नानाप्रकारत्वं तदेव स्पष्टयति ॥ वायवीया इति ॥ पृथक्त्वमसंकीर्णत्वं न हि प्राणापानादिचेष्टानां मिथः संकरोस्ति दैवं विशदयति ॥ आदित्यादीति ॥१४॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीकृष्णः ॥

पंचानामधिष्टानादीनामुक्तानां सर्वकर्मसिद्ध्यर्थत्वं स्पष्टयति शरीरेति ननु जीवनकृतनिमिषोन्मेषादिकर्मांतरं साधारणमस्ति तत्कथं राशिद्वयकरणमिति तत्राह पञ्चेति अधिष्टानादीनां कर्ममात्रहेतुत्वं प्रतिज्ञाय शरीरादित्रिविधकर्महेतुत्वोक्तिरयुक्तेति शंकते नन्विति पूर्वापरविरोधं परिहरति नैषेति ननु जीवनकृतानि स्वाभाविकानि कर्माणि दर्शनादीनि विधिनिषेधवाह्यत्वान्न देहादिनिर्वर्त्यानीत्याशंक्याह तदंगतयेति तस्य देहादित्रयस्य प्रधानस्यांगं चक्षुरादि तन्निष्पाद्यत्वे

शरीरवाङ्मनोभिर्यत्कर्म त्रिभिरेतैः प्रारभते निर्वर्त्तयति नरः न्याय्यं वा धर्म्यं वा शास्त्रीयं विपरीतं वा अशास्त्रीयमधर्म्यं यच्चापि निमेषणचेष्टादि जीवनहेतुस्तदपि पूर्वकृतधर्माधर्मयोरेव कार्यमिति न्याय्यविपरीतयोरेव ग्रहणेन गृहीतं पंचैते यथोक्तास्तस्य सर्वस्यैव कर्मणो हेतवः कारणानि नन्वेतान्यधिष्टानादीनि सर्वकर्म

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ॥ न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः ॥ १५ ॥ श्रीराम

णां निर्वर्त्तकानि कथमुच्यते शरीरवाङ्मनोभिः कर्म प्रारभत इति नैष दोषः विधिप्रतिषेधलक्षणं सर्वकर्म शरीरादित्रयप्रधानं तदंगतया दर्शनश्रवणादि जीवनलक्षणं त्रिधैव राशीकृतमुच्यते शरीरादिभिरारभ्यत इति फलकालेपि तत्प्रधानैर्भुज्यते इति पंचानामेव हेतुत्वं न विरुध्यते ॥ १५ ॥ श्रीरामचंद्राय नमः ॥ श्रीरामायन्नमः ॥

न जीवनकृतं दर्शनादि प्रधानकर्मण्यंतर्भूतमिति त्रैविध्यमविरुद्धमित्यर्थः ॥ देहाद्यारभ्ये त्रिविधे कर्मणि सर्वकर्मांतर्भावेपि कथं पंचानामेवाधिष्टानादीनां तत्र हेतुत्वं फलोपभोगकाले कारणांतरापेक्षासंभवादित्याशंक्य जन्मकालभाविनो भोगकालभाविनश्च सर्वस्य कारणस्य तेष्वेवांतर्भावान्मैवमित्याह फलेति ॥ १५ ॥ श्रीरामायन मो नमः ॥

क्रियाकर्तृत्वमधिष्ठानादीनामापाद्याऽविदुषस्तेष्वेवात्मत्वदृष्टिमनुवदति ॥ तत्रेति ॥ तत्पदपरामर्शयोग्यं प्रकृतं सर्वं प्रतीकमादाय पूर्वेण सहाक्षरार्थं कथयति ॥ एवमिति ॥ अधिष्ठानादीनामुक्तरीत्या कर्तृत्वेऽन्यगतं कर्तृत्वमात्मनो यतोऽ॥

तत्रेति प्रकृतेन संबध्यते एवं यथोक्तैः पंचभिर्हेतुभिर्निर्वर्त्ये सति कर्मणि
तत्रैवं सति इति दुर्मतित्वस्य हेतुत्वेन संबध्यते तत्र तेष्वात्मानं अनन्यत्वेना

तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः॥

विद्यया परिकल्पितैः क्रियमाणस्य कर्मणो ह्यमेव कर्त्तेति कर्त्तारमात्मानं
केवलं शुद्धं यः पश्यति ॥ अविद्वान् ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥

ध्यारोप्य पश्यत्यतो दुर्मतिरात्मनि कर्तृत्वं पश्यन्नित्याह ॥ तत्रैवमिति ॥ कर्त्तारमित्यादिव्याचष्टे ॥ तत्रेत्यादिना ॥ ते
ष्वधिष्ठानादिषु तैरारोपितात्मभावैरित्यर्थः ॥ श्रीरामचंद्रायनमः ॥ श्रीकृष्णायनमः ॥ श्रीरामकृष्णायनमोनमः॥

अकर्त्तारमात्मानं कर्त्तारं पश्यतीत्यत्र प्रश्नद्वारा हेतुमाह ॥ कस्मादिति ॥ ननु शास्त्रसंस्कृतबुद्धिरेवातिरिक्तात्मवादी कर्त्तृत्वं तस्यानुमन्यते ॥ नासौ कर्तृत्वमात्मनि पश्यन्नपि भवत्यकृतबुद्धिस्तत्राह ॥ योपीति ॥ तस्यापि शास्त्रपूर्वकमाचार्योपदेशेन तदनुसारिन्यायैश्चानाहितबुद्धित्वादकृतबुद्धित्वं सिद्धमित्यर्थः ॥ कीदृश्यं आत्मनस्तत्त्वं याथात्म्यं कर्मणोपि तत्त्वमविद्याकृताधिष्ठानादिकृतत्वेनात्माऽस्पर्शित्वमात्मकर्मणोस्तत्त्वदर्शनाभावोऽतः शब्दार्थः दुष्टत्वं स्पष्टीकुर्वन् दुर्मतित्वं विवृणोति ॥ जन्मेति ॥ अ

कस्माद्धेदांताचार्योपदेशन्यायैरकृतबुद्धित्वादसंस्कृतबुद्धित्वाद्योपि देहादिव्यतिरिक्तात्मवाद्यन्यमात्मानं केवलं कर्त्तारं पश्यत्यसावप्यकृतबुद्धिरेवातोऽकृतबुद्धित्वान्न स पश्यत्यात्मनस्तत्त्वं कर्मणो वेत्यर्थोऽतो दुर्मतिः कुत्सिताऽत

पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६ ॥

त्वविपरीता दुष्टा जस्रं जन्ममरणप्रतिपत्तिहेतुभूता मतिरस्येति दुर्मतिः स पश्यन्नपि न पश्यति ॥ यथा तैमिरिकोऽनेकं चंद्रं यथा वा वाहन उपविष्टोऽन्येषु धावत्सु आत्मानं धावंतं ॥ १६ ॥ श्रीसीतारामचंद्रार्पणमोनमः ॥ श्रीः ॥ ॥

६ ॥ हंकर्तृत्वात्मदर्शनवतोपि नाविदुषस्तद्दर्शनमस्तीत्यत्र दृष्टांतमाह ॥ पश्येति ॥ तिमिरोपहतदृष्टिरनेकचंद्रं पश्यन्नपि तत्त्वतो न तं पश्यत्येवमविद्वानात्मानं कर्त्तारं पश्यन्नपि न पश्यति तत्त्वतो न तं पश्यतीत्यर्थः ॥ अधिष्ठानादिष्वविद्यासंबंधात्मनः स्वात्मनि तत्कृतक्रियारोपे दृष्टांतमाह ॥ यथा वेति ॥ अन्येषु वाहकेषु पुरुषेषु धावनकर्तृषु वाहने स्थितः ॥ आत्मानं धावनकर्त्तारमविवेकादभिमन्यते तथाधिष्ठानादिषु क्रियाकर्तृषु तत्कृतं स्वात्मानं कर्त्तारं मन्यमानो दुर्मतिरित्यर्थः ॥ १६ ॥ श्रीकृष्णाय नमः ॥

विपरीतदृष्टेर्दुर्मतित्वं दर्शयित्वा सम्यग्दृष्टेः सुमतित्वं प्रश्नपूर्वकमाह। कः पुनरित्यादिना। नाहं कर्तेत्यात्मनि कर्तृत्वप्रत्ययाभावे कु
त्र कर्तृत्वधीरित्याशंक्याह। एत इति। कथं तर्हि कर्तृत्वधीरात्मनीत्याशंक्याधिष्ठानादीनां तद्व्यापाराणां च साक्षित्वादित्याह। अहं त्वि
ति। आत्मनो न स्वतो क्रियाशक्तिमत्त्वमित्यत्र प्रमाणमाह। अप्राणो हीति। नापि तस्य स्वतो ज्ञानशक्तिमत्त्वमित्याह। अमना इति
उपाधिद्वयासंबंधे शुद्धत्वं फलितमाह। शुभ्र इति। कारणसंबंधादशुद्धिमाशंक्योक्तमक्षरादिति कार्यकारणयोरात्मास्पर्शित्वे

कः पुनः सुमतिर्यः सम्यक्पश्यतीत्युच्यते। यस्य शास्त्राचार्योपदेशन्यायसंस्कृतात्मनो न भवत्यहंकृतोऽहं कर्तेत्येवंल
क्षणो भावो भावना प्रत्ययः एत एव पंचाधिष्ठानादयोऽविद्ययात्मनि कल्पिताः सर्वकर्मणां कर्तारो नाहमहं तु तद्व्यापारा
णां साक्षिभूतो अप्राणो ह्यमनाः शुभ्रोऽक्षरात्परतः परः केवलोऽविक्रियः इत्येवं पश्यतीत्येतद्बुद्धिरंतःकरणं यस्या

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमांल्लोकान्न हंति न निबध्यते १७॥

त्मन उपाधिभूता न लिप्यते नानुशायिनी भवति इदमहमकार्षं तेनाहं नरके स्वर्गे वा गमिष्यामीत्येवं बुद्धिर्यस्य
न लिप्यते सोऽसु मतिः॥ स पश्यति हत्वापि स इमांल्लोकान् प्राणिन इत्यर्थः॥ न हंति हननक्रियां न करोति न नि
बध्यते नापि तत्कार्येणाधर्मफलेन संबध्यते

नपार्थक्ये सद्वितीयत्वमाशंक्य तयोरविद्याकल्पितवस्तुत्वान्मै
वमित्याह। केवल इति। जन्मादिसर्वविक्रियारहितत्वेन कौटस्थ्यमाह। अविक्रिय इति। बुद्धिर्यस्येत्यादि व्याचष्टे। बुद्धिरिति
नानुशायिनी नानुशयवती न क्लेशशालिनीत्यर्थः॥ द्वितीयपादस्याक्षरार्थमुक्त्वा वाक्यार्थमाह। इदमिति। पापंकर्मे
दमापरामृश्यते। लोकानां प्राणसंबंधाभावे कुतो हिंसेत्याशंक्याह। प्राणिन इति॥ श्रीसीतारामचंद्रायनमोनमः॥

विरुद्धार्थोक्त्यासक्तिरपिनयुक्तेतिशंकते नन्विति विरोधंपरिहरति नैषइति लौकिकदृष्टिमवष्टभ्यहत्वापीतिनिर्देशंविशदय
ति देहादीति तात्विकीदृष्टिंआस्थायनहंतीत्यादिनिर्देशमुपपादयति यथेति नाहंकर्त्ता किंतुकर्तृतद्व्यापारयोःसाक्षीक्रियाज्ञा
नशक्तिमदुपाधिद्वयनिर्मुक्तःशुद्धःसत्कार्यकारणासंबंधोऽद्वितीयोऽविक्रियइत्येवंपारमार्थिकदृष्टेर्यथार्थदर्शित्वंद्रष्टव्यं
हत्वापीत्येतन्नहंतीत्यादिश्चोभयंदृष्टिद्वयावष्टंभादुपपन्नमित्युपसंहरति तदुभयमिति केवलमेवात्मानंकर्त्तारंपश्यन्दुर्मेति

ननुहत्वापिनहंतीतिविप्रतिषिद्धमुच्यते ॥यद्यपिसक्तिर्नैषदोषोलौकिकपारमार्थिकदृष्ट्यपेक्षयातदुपपत्तेः
देहाद्यात्मबुद्ध्याहंताहमितिलौकिकींदृष्टिमाश्रित्यहत्वापीत्याह ॥यथार्थदर्शितांपारमार्थिकींदृष्टिमाश्रि॥
त्यनहंतिननिबध्यतइति ॥तदुभयमुपपद्यतएव ॥ननुअधिष्ठानादिभिःसंभूयकरोत्येवात्माकर्त्तारमा
त्मानंकेवलंत्विति केवलशब्दप्रयोगान्नैषदोषः आत्मनोऽविक्रियस्वभावत्वेऽधिष्ठानादिभिःसंहतत्वानु
पपत्तेः ॥ विक्रियावतोह्यन्यैःसंहननंसंहत्यवाकर्तृत्वंस्यात् ॥ ननुअविक्रियस्यात्मनःकेनचित्संहननम
स्तीतिनसंभूयकर्तृत्वमुपपद्यते ॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामचंद्रायनमोनमः ॥ ॥

दित्यत्रात्मविशेषणसमर्पककेवलशब्दसामर्थ्यादात्मनोविशिष्टस्यकर्तृत्वमितिशंकते नन्विति ॥आत्मनोवैशिष्ट्यायोगान्न
विशिष्टस्यापिकर्तृत्वमितिपरिहरति नैषइति ।अविक्रियस्वभावत्वेपिकथमात्मनोऽसंहतत्वमित्याशंक्याह ॥ विक्रियेति ॥ ॥
।अधिष्ठानादिभिरात्मनःसंहननेपिनकर्तृत्वमविक्रियाश्रयत्वव्याघातादित्याह संहत्यवेति संहतत्वानुपपत्तिंव्यक्तीकरोति
नत्विति ।असंहतत्वेफलितमाह इतिनेति ॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीसीतारामचंद्रायनमोनमः ॥श्रीरामः॥

कथं तर्हि केवलत्वमात्मनि केवलशब्दादुक्तं तदाह। ततइति। कर्तृत्वमात्मनोऽभ्युपपन्नं नास्याविक्रियत्वमुपेतीत्याशंक्याह। अवि
क्रियत्वं चेति। तत्र स्मृतिवाक्यानुदाहरति अविकार्योयमिति। नायं हंति न हन्यत इत्यादि वाक्यमादिशब्दार्थः उक्तवाक्यानामात्मा
विक्रियत्वे तात्पर्यं सूचयति। असकृदिति। निःकलं निःक्रियं शांतमित्यादिवाक्यं श्रुतावादिशब्दार्थः। यानि वाक्यानि तैरात्म
नोऽविक्रियत्वं दर्शितमिति योजना न्यायतश्च दर्शितमिति पूर्वेण संबंधः। न्यायमेव प्रदर्शयति। निरवयवमिति। न तावदात्मा

ततः केवलत्वमात्मनः स्वाभाविकमिति केवलशब्दोनुवादमात्रमविक्रियत्वं चात्मनः श्रुतिस्मृति
न्यायप्रसिद्धमविकार्योयमुच्यते गुणैरेव कर्माणि क्रियंते शरीरस्थोपि न करोतीत्याद्यसकृदुपपादि
तं गीताशास्त्रे तावच्छ्रुतिषु च ध्यायतीव लेलायतीवेत्येवमाद्यासु न्यायतश्च निरवयवमपरतंत्रमवि
क्रियमात्मतत्वमिति राजमार्गः। विक्रियावत्वाभ्युपगमेप्यात्मनः स्वकीयैव विक्रिया न स्वस्य भवितु
मर्हति नाधिष्ठानादीनां कर्माण्यात्मकर्तृकाणि स्युः॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ ॥

स्वतो विक्रियते निरवयवत्वादाकाशवत्नापि परतोऽसंगस्याकार्यस्य पराधीनत्वायोगादित्यर्थः॥ किंचात्मनः स्वनिष्ठा वा विक्रि
याऽधिष्ठानादिनिष्ठा वानाद्यः॥ स्वनिष्ठविक्रियानुपपत्तेरात्मनो दर्शितत्वादित्याशयेनाह॥ विक्रियावत्वेति। साचायुक्तेत्युक्त
मितिशेषः॥ द्वितीयं दूषयति। नेत्यादिना॥ श्रीसीतारामचंद्रायनमः॥ श्रीरामकृष्णायनमः॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥

अधिष्ठानादिकृतमपि तद्योगादात्मन्यागच्छतीत्याशंक्य तदागमनं वास्तवमाविद्यं वेति विकल्प्याद्यं दूषयति ॥ नहीति ॥ द्वितीयं निरस्यति ॥ यत्त्विति ॥ आत्मन्यविद्याप्रापितं कर्मनात्मीयमित्येतद्दृष्टांताभ्यां उपपादयति ॥ यथैत्यादिना ॥ आत्म

नहि परस्य कर्म परेणाकृतमागंतुमर्हति यत्तु विद्ययागामितंनतत्तस्य यथा रजतत्वं न शुक्तिकायाः यथा वा तलमलिनत्वं बालैर्गमितमविद्यया नाकाशस्य तथाधिष्ठानादिविक्रियापि तेषामेव नात्मनः तस्माद्युक्तमुक्तमहंकृतत्वबुद्धिलेपाभावे विद्वान्न हंति न बध्यत इति नायं हंति न हन्यत इति प्रतिज्ञाय न जायत इत्यादिना हेतुवचनेनाविक्रियत्वमात्मनः उक्त्वा वेदाविनाशिनमिति विदुषः कर्माधिकारनिवृत्तिं शास्त्रादौ संक्षेपत उक्त्वा मध्ये प्रसारितं तत्र तत्र प्रसंगं कृत्वेहोपसंहरति ॥ ॥

होपसंहरतीति संबंधः ॥

नोऽविक्रियत्वेन कर्तृत्वाभावे फलितमाह ॥ तस्मादिति ॥ ननु प्रागेवात्मनोऽविक्रियत्वं प्रतिपादितं तदिह कस्मादुच्यते तत्राह ॥ नायमिति ॥ शास्त्रादौ प्रतिज्ञाय हेतुपूर्वकं संक्षिप्योक्त्वा मध्ये तत्र तत्र प्रसंगं कृत्वा प्रसारितं नाकर्माधिकारनिवृत्तिमि

प्रतिज्ञातस्य हेतुनोपपादितस्यांते निगमनं किमर्थमित्याशंक्याह् शास्त्रार्थेति ॥ कर्माधिकारो विदुषो नेति स्थिते तस्य देहाभि
मानाभावे सत्यविद्योत्थसर्वकर्मत्यागासिद्धेरनिष्टमिष्टंमिश्रंचेति त्रिविधं कर्मफलं संन्यासिनां नेति प्रागुक्तं युक्तमेवेति ॥ प्र
कृतमुपसंहरति ॥ एवंचसतीति ॥ ये पुनरविद्वांसो देहाभिमानिनस्तेषां त्रिविधं कर्मफलं भवत्येवेति हेतुवचनसिद्धमर्थं नि
गमयति न द्विपर्ययाच्चेति ॥ अधिष्ठानादिकृतं कर्मनात्मकृतमविदुषामेव कर्माधिकारो देहाभिमानित्वेन तत्त्यागायोगा

शास्त्रार्थपिंडीकरणाय विद्वान्नहंतिन निबध्यत इति ॥ एवं च सति देहभृत्त्वाभिमानानुपपत्तावविद्याकृताशेषकर्म
संन्यासोपपत्तेः संन्यासिनामनिष्टादित्रिविधं कर्मणः फलं न भवतीत्युपपन्नं तद्विपर्ययाच्चेतरेषां भवतीत्येतच्चा
प्यपरिहार्यमित्येष गीताशास्त्रार्थ उपसंहृतः स एष सर्ववेदार्थसारो निपुणमतिभिः पंडितैर्विचार्य प्रतिपत्तव्य इ ॥
ति तत्र तत्र प्रकरणविभागेन दर्शितोऽस्माभिः शास्त्रन्यायानुसारेण ॥१७॥ श्रीसीतारामचंद्रायनमोनमः ॥

देहाभिमानाभावात्तु विदुषां कर्माधिकारनिवृत्तिरित्युपसंहृतमर्थं संक्षिप्याह इत्येष इति ॥ उक्तश्च गीतार्थो वेदार्थत्वादुपा
देय इत्याह ॥ स एष इति ॥ कथमयमर्थो वेदार्थः प्रतिपत्तुं शक्यते तत्राह ॥ निपुणेति ॥ भाष्यकृता मानयुक्तिभ्यां विभज्यानु
क्तत्वान्नास्यार्थस्योपादेयत्वमित्याशंक्याह ॥ तत्र तत्रेति ॥१७॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीकृष्णायनमोनमः

शावरभाष्य

शास्त्रार्थोपसंहारानंतर्यमथेत्युक्तं इदानीमिति प्रवर्त्तकोपदेशावस्थोक्ता कर्मणां येषु विदुषां नाधिकारोऽविदुषां चाधिकारस्तेषामित्यर्थः ज्ञानशब्दस्य करणव्युत्पत्त्या ज्ञानमात्रार्थत्वमाह ज्ञानमिति ज्ञेयशब्दस्यापि तद्वदेव ज्ञातव्यमात्रार्थत्वमाह तथेति उपाधिलक्षणत्वं तत्प्रधानत्वमुपहितत्वं तस्यावस्तुत्वार्थमविद्याकल्पितविशेषणमेत

अथेदानीं कर्मणां प्रवर्त्तकमुच्यते ज्ञानं ज्ञायतेऽनेनेति सर्वविषयमविशेषेणोच्यते तथा ज्ञेयं ज्ञातव्यं तदपि सामान्येनैव सर्वमुच्यते तथा परिज्ञातोपा

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ॥

धिलक्षणो विद्याकल्पितोपाधिर्भोक्ता इत्येतत्त्रयमेषामशेषेण सर्वकर्मणां प्रवर्त्तिका त्रिविधा त्रिः प्रकारा कर्मचोदना ॥ श्रीसीतारामचंद्राय नमो नमः ॥

देवत्रयं सर्वकर्मप्रवर्त्तकमित्याह एतदिति सर्वकर्मणां प्रवर्त्तकमित्यध्याहर्त्तव्यं चोदनेति क्रियायाः प्रवर्त्तकं वचनमिति भाष्यानुसारेण चोदनाशब्दार्थमाह प्रवर्त्तिकेति सर्वकर्मणामिति पूर्वेण संबंधः त्रैविध्यं ज्ञानादिना प्रागुक्तं कर्मणां चोदनेति विग्रहः ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीरामचंद्राय नमः श्रीकृष्णाय नमः ॥

तेषांसर्वकर्मप्रवर्त्तकत्वमनुभवेनसाधयति ज्ञानादीनामिति हानोपादानादीत्यादिनोपेक्षाविवक्षिता करणमित्या
देस्तात्पर्यमाह ततइति ज्ञानादीनांप्रवर्त्तकत्वादित्यर्थः उक्तेर्थेश्लोकभागमवतारयति इत्येतदिति बाह्यमंतस्थं
चद्विविधंकरणंकरणव्युत्पत्त्याकथयति करणमिति उक्तलक्षणंकर्मैवस्पष्टीकर्त्तुमाह कर्त्तुरिति स्वतंत्रःकर्त्ता

ज्ञानादीनांहित्रयाणांसन्निपातेहानोपादानाऽदिप्रयोजनःसर्वकर्मारंभःस्यात्ततःपंचभिरधिष्ठानादि
भिःआरब्धंवाङ्मनःकायाश्रयभेदेनत्रिधाराशीभूतंत्रिषुकरणादिषुसंगृह्यतइत्येतदुच्यतेकरणंक्रियतेऽ
नेनेतिबाह्यंश्रोत्राद्यंतस्थंबुद्ध्यादिकर्मेप्सिततमंकर्तुःक्रिययाव्याप्यमानंकर्त्ताकरणानांव्यापारयिताउपा

करणंकर्मकर्त्तेतित्रिविधःकर्मसंग्रहः॥१८॥

धिलक्षणइतित्रिविधःत्रिप्रकारःकर्मसंग्रहःसंगृह्यतेऽस्मिन्नितिसंग्रहःकर्मणःसंग्रहःकर्मसंग्रहः
कर्मैतेषुहित्रिषुसमवेतितेनायंत्रिविधःकर्मसंग्रहः॥१८॥ श्रीसीतारामचंद्रायनमः॥ श्रीरामायनमः

स्वातंत्र्यंचकारकाप्रयोज्यस्यतत्प्रयोक्तृत्वमित्याह कर्त्तेति कथमुक्तेत्रिविधेकर्मसंगृह्यतेतत्राह कर्मेति कर्मणो
हिप्रसिद्धंकारकाश्रयत्वमितिभावः॥१८॥ श्रीसीतारामचंद्रायनमः॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीः॥

अनंतरश्लोकदशकतात्पर्यमाह अथेति ज्ञानादिप्रस्तावानंतर्यमथशब्दार्थः ॥ इदानीं प्रस्तुतज्ञानाद्यवांतरभेदापे
क्षायामित्यर्थः तेषां गुणभेदात्त्रैविध्ये हेतुमाह गुणात्मकत्वादिति ॥ वक्तव्यो वक्ष्यमाणश्लोकनवकेनेति शेषः ॥ ए

अथेदानीं क्रियाकारकफलानां सर्वेषां गुणात्मकत्वात् सत्वरजस्तमोगुणभेदेन
त्रिविधो भेदो वक्तव्य इत्यारभ्यते ॥ ज्ञानं च कर्म च कर्म क्रिया न कारकं पारिभाषि

ज्ञानं कर्म च कर्त्ता च त्रिधैव गुणभेदतः ॥

कमीप्सिततमं कर्म कर्त्ता च निर्वर्त्तकः क्रियाणां कर्मणां त्रिधैवावधारणं गुण
व्यतिरिक्तजात्यंतराभावप्रदर्शनार्थं गुणभेदतः सत्वादिभेदेनेत्यर्थः ॥ ॥

वं स्थिते प्रथममवांतरभेदप्रतिज्ञा क्रियत इत्याह इत्यारभ्यत इति ॥ कर्त्तुरीप्सिततमं कर्मेति यत्परिभाष्यते तेन तन्मात्रं
कर्मशब्दवाच्यमित्याह नेति गुणातिरेकेण विधांतरं ज्ञानादिषु नेति निर्द्धारयितुमवधारणमित्याह गुणेति ॥ ॥

ज्ञानादीनां प्रत्येकं गुणभेदप्रयुक्ते त्रैविध्ये प्रमाणमाह प्रोच्यत इति ननु कापिलं पातंजलमित्यादिशास्त्रं विरुद्धार्थत्वाद
प्रमाणं कथमिह प्रमाणीक्रियते तत्राह यद्यपीति विषयविशेषे विरोधेपि प्रकृतेर्थे प्रामाण्यमविरुद्धमित्यर्थः य
द्यपि कापिलादयो गुणवृत्तविचारे गौणव्यापारस्य भोगादेर्निरूपणे च निपुणास्तथापि कर्यं तदीयं शास्त्रमत्र प्रमा

प्रोच्यते कथ्यते गुणसंख्याने कापिले शास्त्रे यद्यपि कापिलं गुणसंख्यानं शास्त्रं तथापि गुणभोक्तृविष
ये प्रमाणमेव परमार्थब्रह्मैकत्वविषये यद्यपि विरुध्यते तथापि ते हि कापिला गुणगौणव्यापारनिरूपणेऽभिमु

प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९ ॥

क्ता इति तच्छास्त्रमपि वक्ष्यमाणार्थस्तुत्यर्थत्वेनोपादीयत इति न विरोधो यथावद्यथान्यायं यथाशास्त्रं शृणु
तान्यपि ज्ञानादीनि तद्भेदजातानि च गुणभेदकृतानि शृणु वक्ष्यमाणेर्थे मनसः समाधिं कुर्वित्यर्थः ॥ १९ ॥ श्रीः

णीकृतमित्याशंक्याह नेहीति ज्ञानादिषु प्रत्येकमवांतरभेदो वक्ष्यमाणोर्थस्तस्य तंत्रांतरेपि प्रसिद्धिकथनं स्तुतिः
तादर्थ्येन कापिलादिमतोपादानमिहोपयोगीत्यर्थः तृतीयपादस्याविरुद्धार्थत्वं निगमयति नेति यथावदित्या
दिव्याचष्टे यथान्यायमिति ॥ १९ ॥ श्रीरामकृष्णायनमः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीकृष्णायनमः ॥

व्य

ज्ञानादीनांप्रत्येकंत्रैविध्यंज्ञातव्यंप्रतिज्ञायज्ञानत्रैविध्यार्थंश्लोकत्रयमवतारयति ॥ ज्ञानस्येति ॥ तत्रसात्विकंज्ञानमुपन्यस्यति
सर्वेति भूतानिकार्यकरणात्मकान्युपाधिजातानि ॥ अद्वितीयमखंडैकरसंप्रत्यगात्मभूतमबाधितंतत्वंज्ञेयत्वेन विवक्षित
मित्याह ॥ एकमिति ॥ विवक्षितमद्वैयत्वंसंक्षिपति ॥ कूटस्थमिति ॥ प्रतिदेहमविभक्तमित्युक्तंव्यनक्ति ॥ विभक्तेष्विति ॥ न

ज्ञानस्यतुतावत्त्रिविधत्वमुच्यते ॥ सर्वभूतेषुब्रह्मादिस्थावरांतेषुभूतेषुयेनज्ञानेनएकंभावंवस्तु
भावशब्दोवस्तुवाची एकमात्मवस्त्वित्यर्थः ॥ अव्ययंनव्येतीतिस्वात्मनाधर्मेणवाकूटस्थंनित्यमित्य
र्थः ॥ ईक्षतेयेनज्ञानेनपश्यतितंचभावंअविभक्तंप्रतिदेहंविभक्तेषुदेहभेदेषुव्योमवन्निरंतरमि

सर्वभूतेषुयेनैकंभावमव्ययमीक्षते ॥ अविभक्तंविभक्तेषुतत्ज्ञानंविद्धिसात्विकं २० ॥

त्यर्थः ॥ तत् अद्वैतात्मदर्शनंसात्विकंसम्यग्दर्शनंविद्धीतियानिद्वैतदर्शनान्यसम्यक्तानिराजसा
नितामसानिचेतिनसाक्षात्संसारोच्छित्तयेभवंति ॥ २० ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ ॥ ॥

ज्ञानमित्यादिव्याचष्टे अद्वैतेति ॥ द्वैतदर्शनान्यपिकानिचिद्भवंति ॥ सत्वनिर्वृत्तानिसंभवंतीत्याशंक्याह ॥ यानीति ॥ तेषाम
सम्यक्त्वेहेतुमाह ॥ राजसानीति ॥ २० ॥ श्रीरामचंद्रायनमः ॥ श्रीकृष्णायनमः ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीः ॥

प्रतिदेहमन्यत्वेनभिन्नानात्मनोयेनज्ञानेनजानातितत्ज्ञानंराजसमितिव्याचष्टे ॥भेदेनेति॥ पृथक्त्वं पृथग्विधत्वंचपुनरुक्तमि
त्याशंक्यहेतुहेतुमत्वेनविभागंविवक्षित्वाह ॥भिन्नेति॥ ज्ञानस्यज्ञानकर्तृत्वमयुक्तमित्याशंक्याह ॥सर्वेति॥ २१ ॥सक्तत्वमेव
व्यनक्ति ॥एतावानिति॥ एकस्मिन्कार्येज्ञानस्यसक्तत्वमेवदृष्टांतेनसाधयति ॥यथेत्यादिना॥ यन्निर्युक्तिकत्वंतदेवज्ञानस्या

पृथक्त्वेनतुभेदेनप्रतिशरीरमन्यत्वेनयत्ज्ञानंनानाभावान्भिन्नानात्मनःपृथग्विधान्पृथग्प्रकारान्भिन्नलक्षणानि
त्यर्थः ॥वेत्तिविजानातियत्ज्ञानंसर्वेषुभूतेषुज्ञानस्यकर्तृत्वासंभवाद्येनज्ञानेनवेत्तीत्यर्थः तत्ज्ञानंविद्धिराजसंरजोनि
र्वृत्तं ॥२१॥ यत्तुज्ञानंकृत्स्नवत्समस्तवत्सर्वविषयंएकस्मिन्कार्येदेहेवबहिर्वाप्रतिमादौसक्तं एतावानात्माईश्वरोवाना
तःपरमस्तीतियथानग्नक्षपणकादीनांतुशरीरांतर्वर्त्तीदेहपरिमाणोजीवईश्वरोवापाषाणदार्वादावर्च्चादिमात्रइत्ये

पृथक्त्वेनतुयत्ज्ञानंनानाभावान्पृथग्विधान् ॥वेत्तिसर्वेषुभूतेषुतत्ज्ञानंविद्धिराजसं ॥२१॥ यत्तु
कृत्स्नवदेकस्मिन्कार्येसक्तमहेतुकं ॥अतत्वार्थवदल्पंच तत्तामसमुदाहृतं ॥२२॥ श्रीरामायनमः

वंएकस्मिन्कार्येसक्तमहेतुकंहेतुवर्जितंअयुक्तिकमतत्वार्थवत्यथाभूतोर्थस्तत्वार्थःसोऽस्यज्ञेयभूतोस्तीति
तत्वार्थवदतत्वार्थवदहेतुकत्वादेवाल्पंचाल्पविषयत्वादल्पफलत्वाद्वातत्तामसमुदाहृतंतामसानांहिप्राणिनांअविवे
दृश्य　　　　किनांज्ञानमीदृशंउच्यते ॥२२॥ अथकर्मणांत्रैविध्यमुच्यते॥

भासत्वेकारणमित्याह ॥अहेतुकत्वादिति॥ स्वरूपतोविषयतश्चाभासत्वंफलतोवेत्याह ॥अल्पेति॥ तामसंज्ञानमुक्तल
क्षणमित्यत्रानुभवंप्रमाणयति ॥तामसानांहीति॥ ॥२२॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥श्रीरामचंद्रायनमः॥ ॥

त्रिविधं कर्मवक्तुमनंतरश्लोकत्रयमित्याह ॥ अथेति ॥ तत्र सात्विकं कर्म निरूपयति ॥ नियतमिति ॥ २३ ॥ राजसं कर्म निर्दिशति ॥ यत्तुइ
ति ॥ फलप्रेप्सुना कर्त्रा यत्कर्म क्रियते तद्राजसमित्युत्तरत्र संबंधः ॥ तत्वज्ञानवता निरहंकारेण साहंकारेण त्वज्ञेन क्रियते कर्मे
ति विवक्षां वारयति ॥ साहंकारेणेति ॥ तत्वज्ञानवता निरहंकारेण कृतं कर्मापेक्ष्य साहंकारेणाज्ञेन कृतमेतत् कर्मेति न विवक्ष्यते
चेत्तर्हि किमत्र विवक्षितमिति पृच्छति ॥ किं तर्हीति ॥ यो हि दुरितरहितः श्रोत्रियो लोकादनपेतस्तस्य यदहंकारवर्जितं कर्म तद

नियतं नित्यं संगरहितं आसक्तिवर्जितं अरागद्वेषतः कृतं रागप्रयुक्तेन द्वेषप्रयुक्तेन च कृतं रागद्वेषतः कृतं तद्विपरी
तमरागद्वेषतः कृतं अफलप्रेप्सुना फलं प्रेप्सतीति फलप्रेप्सुः फलतृष्णः तद्विपरीतेनाफलप्रेप्सुना कर्त्रा कृतं कर्म यत्त
त्सात्विकमुच्यते ॥ २३ ॥ यत्तु कामेप्सुना कर्मफलप्रेप्सुनेत्यर्थः साहंकारेण वा कर्म साहंकारेणेति न तत्वज्ञानापेक्षया किं
तर्हि लौकिकश्रोत्रियनिरहंकारापेक्षया यो हि परमार्थनिरहंकार आत्मवित्न तस्य कामेप्सुत्व बहुलायासकर्तृत्वप्राप्तिर

नियतं संगरहितमरागद्वेषतः कृतं ॥ अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते ॥ २३ ॥ यत्तु कामेप्सु
ना कर्म साहंकारेण वा पुनः ॥ क्रियते बहुलायासं तद्राजसमुदाहृतं ॥ २४ ॥ श्रीरामचंद्राय नमो नमः

स्ति सात्विकस्यापि कर्मणोऽनात्मवित्साहंकारः कर्त्तेति किमु तराजसतामसयोर्लोकेऽनात्मविदपि श्रोत्रियो निरहं
कार उच्यते निरहंकारोयं ब्राह्मण इति तस्मात्तदपेक्षयैव साहंकारेण चेत्युक्तं पुनः शब्दः पादपूरणार्थः क्रियते बहु
लायासं महता आयासेन निर्वर्त्यते तत्कर्म राजसमुदाहृतं ॥ २४ ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्री रामाय नमः

पेक्षयेदं साहंकारेण कृतं कर्मेत्युक्तमित्याह ॥ लौकिकेति ॥ ननु तत्वज्ञानवतो निरहंकारस्य कर्मकर्तृत्वमपेक्ष्य साहंकारेणेत्या
दि किं नेष्यते तत्राह ॥ यो हीति ॥ विशेषणांतरवशादेव तत्वविदो निवारितत्वान्न तदपेक्षमिदं विशेषणमित्यर्थः ॥ साहंकारस्यैव रा
जसे कर्मणि कर्तृत्वमित्येतत्कैमुतिकन्यायेन साधयति ॥ सात्विकस्येति ॥ न चात्मविदोऽन्यस्य निरहंकारत्वायोगात्कथं तदपेक्षया

॥गी॰भा॰॥
॥३६८॥

संप्रतितामसंकर्मोदाहरति॥ अनुबंधमित्यादिना॥ २५॥ इदानींकर्तुस्त्रैविध्यंब्रुवन्सात्विकंकर्तारंदर्शयति॥ मुक्तेति॥ संगो
नामफलाभिसंधिर्वाकर्तृत्वाभिमानोवानाहंवदनशीलः कर्त्ताहमितिवदनशीलोनभवतीत्यर्थः॥ धारणंधैर्यं॥ क्रियमाणस्य

अनुबंधंपश्चाद्भावियद्वस्तुसोनुबंधउच्यते तंचानुबंधंक्षयंयस्मिन्कर्मणिक्रियमाणेशक्तिक्षयोर्थक्षयोवा॥
स्यात्तंक्षयंहिंसांप्राणिनांपीडांचाऽनवेक्ष्यचपौरुषंपुरुषकारंशक्तोमीदंकर्मपरिसमापयितुमित्येवमात्मसाम
र्थ्यमित्येतान्यनुबंधादीन्यनवेक्ष्यपौरुषांतानिमोहादविवेकतः आरभ्यतेयत्कर्मतत्तामसमुच्यते॥ २५॥ इदा
नींकर्तृभेदउच्यते॥ मुक्तसंगोमुक्तः परित्यक्तः संगोयेनसमुक्तसंगः अनहंवादीनाहंवदनशीलः धृत्युत्साहस

अनुबंधंक्षयंहिंसामनवेक्ष्यचपौरुषं॥ मोहादारभ्यतेकर्मयत्तत्तामसमुच्यते॥ २५॥ मुक्तसंगोनहं
वादीधृत्युत्साहसमन्वितः॥ सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्तासात्विकउच्यते॥ २६॥ श्रीरामायनमः

मन्वितः धृतिर्धारणंउत्साहः उद्यमः ताभ्यांसमन्वितः संयुक्तोधृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः क्रि
यमाणस्यकर्मणः फलसिद्धावसिद्धौचसिद्ध्यसिद्ध्योर्निर्विकारः केवलंशास्त्रप्रमाणप्रयुक्तः फलरागादिनाऽयु
क्तः यः करोतिसनिर्विकारउच्यतेएवंभूतः कर्त्तायः ससात्विकउच्यते॥ २६॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु

कर्मणोयदिफलानभिसंधिस्तर्हिनानुष्ठानविश्रंभः संभवतीत्याशंक्याह॥ केवलमिति॥ फलरागादिनेत्यादिशब्देनकर्म
रागोगृह्यतेअयुक्तइतिपदछेदः॥ २६॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीरामचंद्रायनमः श्रीसीतारामचंद्रायनमः॥

॥आ॰गी॰॥
॥१८॥

॥शिव॥
॥३६८॥

राजसंकर्त्तारं कथयति रागीति ॥ कर्मविषयो रागः कर्मफलप्रेप्सुरिति फलरागस्य पृथक्कथनात् स्वाभिप्रायाप्रकटीकरणपूर्वकं परपीडनं परवृत्तिच्छेदनं तेन स्वार्थपरद्रव्यस्यार्थः ॥ २७ दीर्घसूत्रयितुं शीलमस्येति व्युत्पत्तिं गृहीत्वा विवक्षितमर्थमाह ॥

रागी रागोस्यास्तीति रागी कर्मफलप्रेप्सुः कर्मफलार्थी लुब्धः परद्रव्येषु संजाततृष्णः तीर्थादौ च स्वद्रव्यापरित्यागी हिंसात्मकः परपीडास्वभावः अशुचिर्बाह्यांतःशौचवर्जितः हर्षशोकान्वितः इष्टप्राप्तौ हर्षः अनिष्टप्राप्तौ इष्टवियोगे शोकः ताभ्यां हर्षशोकाभ्यां समन्वितः संयुक्तस्तस्यैव वा कर्मणः संपत्तिविपत्त्योर्हर्षशोकौ स्यातां ताभ्यां संयुक्तो यः कर्त्ता स राजसः परिकीर्तितः ॥ २७ ॥ अयुक्तो असमाहितचित्तः प्राकृतो अत्यंतासंस्कृ

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ॥ हर्षशोकान्वितः कर्त्ता राजसः परिकीर्तितः ॥ २७ ॥
अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ॥ विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते ॥ २८ ॥

तबुद्धिः प्राकृतः प्रकृतिपरवशः बालिशः स्तब्धः दंडवन्नमति कस्मैचित् शठः मायावी शक्तिगूहनकारी नैष्कृतिकः परोच्छेदनपरः अलसः अप्रवृत्तिशीलः कर्त्तव्येष्वपि विषादी सर्वदा अवसन्नस्वभावो दीर्घसूत्री च कर्त्तव्यानां दीर्घप्रसारणः यदद्य श्वो वा कर्त्तव्यं तन्मासेनापि न करोति यश्चैवंभूतः कर्त्ता स तामस उच्यते ॥ २८ ॥

कर्त्तव्यानामिति ॥ एवं क्रियमाणे सत्यनिष्टमिदं कथं विद्यापद्येत यदा पुनरेवं क्रियते तदा त्वनिष्टमेव संभावनोपनीतमिति चिंतापरंपरया मंथरप्रवृत्तिरित्यर्थः ॥ तदेव स्पष्टयति यदद्येति ॥ २८ ॥ श्रीरामचंद्राय नमः ॥ श्रीरामाय नमः

ज्ञानादीनां प्रसंगे कं त्रैविध्यमुक्त्वा वृत्तिमत्या बुद्धेस्तत्वृत्तेश्च धृत्याख्यायास्त्रैविध्यं सूचयति बुद्धेरिति सूत्रविवरणं प्रतिजानी

बुद्धेर्भेदं धृतेश्चैव गुणतः सत्वादिगुणतः त्रिविधं शृणु इति सूत्रोपन्यासः प्रोच्यमानं कथ्यमानमशेषेण निःशे

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु। प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥२९॥

षतो यथावत्पृथक्त्वेन विवेकतो हे धनंजय यद्दिग्विजये मानुषं दैवं च प्रभूतं धनमजयत्तेनासौ धनंजयोऽर्जुनः २९

ते प्रोच्यमानमिति। अर्जुनस्य धनंजयत्वं स्तुत्याद्यति। दिगिति ॥२९॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीकृष्णः ॥

तत्रादौ सात्विकीं बुद्धिं निर्दिशति ॥ प्रवृत्तिं चेति ॥ प्रवृत्तिराचरणमात्रमनाचरणमात्रं च निवृत्तिरिति किं नेष्यते तत्राह ॥ बंधे[illegible]ति ॥
यस्मिन्वाक्ये बंधमोक्षावुच्येते तस्मिन्नेव प्रवृत्तिनिवृत्त्योरुक्तत्वात्कर्ममार्गस्य बंधहेतुत्वान्मोक्षहेतुत्वाच्च संन्यासमार्गस्य
तावेवात्र ग्राह्यावित्यर्थः करणाकरणयोर्निर्विषयत्वायोगाद्विषयापेक्षामवतार्य योग्यं विषयं निर्दिशति ॥ कस्येति ॥ दृष्ट

प्रवृत्तिं प्रवर्त्तनं कर्ममार्गो बंधहेतुः निवृत्तिः संन्यासमार्गो मोक्षहेतुः बंधमोक्षसाहचर्यान्नु कार्याकार्ये लौकिके वा
शास्त्रीये वा कर्त्तव्याकर्त्तव्ये करणाकरणे इत्येतत्कस्य देशकालाद्यपेक्षया दृष्टादृष्टार्थानां कर्मणां भयाभये विभेत्य

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ॥ बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्विकी ॥ ३० ॥ श्रीः ॥

स्मादिति भयं तद्विपरीतमभयं भयं चाभयं च भयाभये दृष्टादृष्टयोर्भयाभययोः कारणे इत्यर्थः ॥ सहेतुकं बंधं
सहेतुकं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्विकी तत्र ज्ञानं बुद्धेर्वृत्तिः बुद्धिस्तु वृत्तिमती धृतिरपि वृत्तिविशेष एव बु

मनिष्टसाधनं भयमिष्टसाधनमभयमिति विभज्यते ॥ भयेति ॥ बंधादिमात्रज्ञानस्य बुद्ध्यंतरेपि संभवाद्विशेषणं सहेतु
कमिति ॥ ननु बुद्धिशब्दितस्य ज्ञानस्य प्रागेव त्रैविध्यप्रतिपादनात् ॥ किमिति बुद्धेरिदानीं त्रैविध्यं प्रतिज्ञाय प्रसाध्यते तत्राह
ज्ञानमिति ॥ तर्हि ज्ञानेन गतत्वान्न धृतिर्भुत्यादनीयेत्याशंक्याह ॥ धृतिरपीति ॥ विशेषशब्देन ज्ञानाद्व्यावृत्तिरिष्टा ॥ ३० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कार्याकार्ययोर्धर्माधर्माभ्यां पौनरुक्त्यं परिहरति ॥ पूर्वोक्त इति ॥ पूर्वश्लोके कार्याकार्यशब्दाभ्यां दृष्टादृष्टार्थानां कर्मणां
करणाकरणे निर्दिष्टे तयोरेवात्रापि ग्रहान्न धर्माधर्माभ्यामपूर्वपर्यायाभ्यां गतार्थतेत्यर्थः ॥ यावुद्धियया बुध्या वोद्धा
निर्णयेन न जानातीत्यर्थः ॥ ३१ ॥ धर्मशब्दो नपुंसकलिंगोप्यस्तीत्यभिप्रेत्य धर्ममित्युक्तं तमसावृताऽविवेकेन वेष्टिते

ययाधर्मं शास्त्रचोदितं अधर्मं च तत्प्रतिषिद्धं कार्यं चाकार्यमेव च पूर्वोक्ते एव कार्याकार्ये न यथा
वद्यथावत्सर्वतो निर्णयेन न प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥ अधर्मं वेदविरुद्धं धर्मं विहित

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ॥ अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥
अधर्मं धर्ममिति या मन्यते तमसावृता ॥ सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥

मिति या मन्यते विजानाति तमसावृता सती सर्वार्थान् सर्वानेव ज्ञेयपदार्थान् विपरीतांश्च विप
रीतानेव विजानाति बुद्धिः सा पार्थ तामसी ॥ ३२ ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीः ॥

त्यर्थः ॥ कार्यादीनुक्तानुक्तांश्च ग्रहीतुं सर्वार्थानित्युक्तं तद्व्याचष्टे ॥ सर्वानेवेति ॥ विपरीतांश्चेति चकारमवधारणे गृही
त्वा विपरीतानेवेत्युक्तं ॥ ३२ ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामचंद्राय नमः ॥

इदानीं धृतित्रैविध्यं मुत्पादयितुमादौ सात्विकीं धृतिं मुत्पादयति धृत्येति निर्दिष्टानां चेष्टानां कथं धृत्या धारणं तत्राह तात्विति
तदेवानुभवेन साधयति धृत्या हीति ध्रियतेऽनयेति धृतिः यत्नविशेषस्तया धृत्या धारयमाणा यथोपदिष्टाश्चेष्टाः शास्त्रम
तिक्रम्य नार्थांतरावगाहिन्यो भवंतीत्यर्थः धृतिमेव समाध्यविनाभूतत्वेन विशिनष्टि योगेनेति ननु धृते नियमेन समा

धृत्या यया अव्यभिचारिण्येतिव्यवहितेन संबंधः धारयते किं मनः प्राणेंद्रियक्रियाः ॥ मनश्च प्राणाश्चेंद्रियाणि च मनः प्राणें
द्रियाणि तेषां क्रियाः चेष्टाः ता उच्छास्त्रमार्गप्रवृत्तेर्धारयति धृत्या हि धार्यमाणा उच्छास्त्रविषया न भवंति योगेनस ॥
माधानेनाव्यभिचारिण्या नित्यं समाध्यनुगतये त्यर्थः ॥ एतदुक्तं भवति अव्यभिचारिण्या धृत्या मनः प्राणेंद्रियक्रियाः धा

धृत्या यया धारयते मनः प्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी ॥ ३३ ॥ यया
तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन ॥ प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥ श्रीरामायनमः ॥

रयमाणो योगेन धारयतीतीत्येवंलक्षणा धृतिः सा पार्थ सात्विकी ॥ ३३ ॥ यया तु धर्मकामार्थान्धर्मश्च कामश्चार्थ
श्च धर्मकामार्थाः तान् धर्मकामार्थान् धृत्या यया धारयते मनसि नित्यं कर्त्तव्यरूपानेव धारयतेऽर्जुन प्रसंगेन य
स्य यस्य धर्मादेर्द्धारणं प्रसंगः तेन प्रसंगेन फलाकांक्षी च भवति यः पुरुषस्तस्य सा धृतिः पार्थ राजसी ॥ ३४ ॥ श्रीः ॥

ध्यनुगतत्वं कथमुक्तक्रियाधारणोपयोगीत्याशंक्याह एतदिति उक्तक्रियाधारयमाणो योगेन ब्रह्मणि समाधानेनैकाग्र्ये
णाव्यभिचारिण्या विनाभूतया धृत्या धारयत्यन्यथा तदविनाभावाभावे नियमेन धारणासिद्धेरित्यर्थः ॥ ३३ ॥ राजसीं धृतिं दर्शय
ति यया त्विति तेषां धारणप्रकारमभिनयति मनसीति फलाकांक्षीति कस्य विशेषणं तत्राह मः पुरुष इति ॥ ३४ ॥ श्रीः ॥

तामसींधृतिंव्याचष्टे यथेति शोकंप्रियवियोगनिमित्तंसंतापंविषंणतामिंद्रियाणांग्लानिंविषयसेवाकुमार्गप्रवृत्तेरुपलक्षणमु
क्तंस्वप्नादिमदांतंसर्वमेवकर्त्तव्यतयात्मनोबहुमन्यमानोमनसिनियमेवकुर्वन्दुर्मेधानमुंचति किंतुधारयत्येवेतियोजना
३५ वृत्तमनूद्यानंतरश्लोकतात्पर्यमाह गुणेत्यादिना क्रियाकारकाणांगुणतस्त्रैविध्येनोक्तानंतरंफलस्यसुखस्यत्रैविध्यो

यथास्वप्नंनिद्रांभयंत्रासंशोकंसंतापंविषादमवसादंविषंणतांमदंविषयसेवामात्मनोबहुमन्यमानोम॥
नइवभवतितंमदमेवचमनसिनियमेवकर्त्तव्यरूपतयाकुर्वन्नविमुंचतिधारयत्येवदुर्मेधाकुत्सितमेधाः
पुरुषोयःतस्यधृतिःयासातामसीमता॥३५ गुणभेदेनक्रियाणांकारकाणांचत्रिधाभेदउक्तः अथेदानीं॥

यथास्वप्नंभयंशोकंविषादंमदमेवच॥नविमुंचतिदुर्मेधाधृतिःसापार्थतामसी॥३५॥सुखं
त्विदानींत्रिविधंशृणुमेभरतर्षभ॥अभ्यासाद्रमतेयत्रदुःखांतंचनिगच्छति॥३६॥श्रीकृष्णाय॰॥

तत्फलस्यचसुखस्यत्रिविधोभेदउच्यते सुखंत्विदानींत्रिविधंशृणुसमाधानंकुर्विंत्येतत्मेममभरत
र्षभ अभ्यासात्परिचयात् आवृत्तेः रमतेरतिंप्रतिपद्यतेयत्रयस्मिन्सुखानुभवेदुःखांतंचदुःखावसा
नंदुःखोपशमनंचनिगच्छतिनिःश्चयेनप्राप्नोति ३६॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥श्रीरामः॥

त्यवसरेसत्याह॥अथेदानीमिति हेयोपादेयभेदार्थंत्रैविध्यंसमाधानमेकाग्र्यंममवचनादितिशेषः यत्रेत्युभयत्रसंब॥
ध्यतेत्रिविधंसुखमितिपूर्वेणसंबंधः३६॥श्रीसीतारामचंद्रायनमः॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥श्रीकृष्णायनमः॥

तत्र सात्विकं सुखमादेयत्वेन दर्शयति। यत्तदिति। प्रथमसन्निपातं विभजते ज्ञानेति। कुतस्तस्य दुःखात्मकत्वं तत्राह। अत्यंतेति। दुः
खात्मकत्वे दृष्टांतो विषमिवेति। ज्ञानादिपरिपाकावस्था परिणामस्तस्मिन्सति ततो जातमिति योजना। तत्रैव हेत्वंतरमाह। आत्म
न इति। आत्मबुद्धिशब्दस्यार्थांतरमाह। आत्मविषयेति। अंतःकरणनैर्मल्याद्वा सम्यग्ज्ञानप्रकर्षाद्वा जातत्वादिति तच्छ

यत्तत्सुखमग्रे पूर्वं प्रथमसन्निपाते ज्ञानवैराग्यध्यानसमाध्यारंभेऽत्यंतायासपूर्वकत्वाद्विषमिव दुःखात्मकं भवति
परिणामे ज्ञानवैराग्यादिपरिपाकजं सुखममृतोपमं तत्सुखं सात्विकं प्रोक्तं विद्वद्भिः आत्मनो बुद्धिरात्मबुद्धिस्तस्याः
प्रसादो नैर्मल्यं सलिलवत्स्वच्छता ततो जातमात्मबुद्धिप्रसादजं। आत्मविषया वा आत्मालंबना बुद्धिरात्मबुद्धिस्तत

यत्तदग्रे विषमिव परिणामेऽमृतोपमं॥ तत्सुखं सात्विकं प्रोक्तमात्मबुद्धिप्रसादजं॥ ३७॥ विष
येंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमं॥ परिणामे विषमिव तत्सुखं राजसं स्मृतं॥ ३८॥ श्रीकृष्णः॥

कर्षाज्जातमित्येतत्तस्मात्सात्विकं तत्॥ ३७॥ विषयेंद्रियसंयोगाद्यत्सुखं जायते अग्रे प्रथमं प्रथमक्षणेऽमृ
तोपमं अमृतसमं परिणामे विषमिव बलवीर्यरूपप्रज्ञामेधाधनोत्साहहानिहेतुत्वादधर्मतज्जनितनरका
दिहेतुत्वाच्च परिणमे तदुपभोगविपरिणामांते विषमिव तत्सुखं राजसं स्मृतं॥ ३८॥ श्रीरामचंद्रायनमो नमः॥

त्वार्थः॥ ३७॥ राजसं सुखं हेयत्वाय कथयति॥ विषयेति॥ बलं संघातसामर्थ्यं वीर्यं पराक्रमकृतं यशः रूपं शरीरसौंदर्यं प्रज्ञाश्रु
तार्थग्रहणसामर्थ्यं मेधा गृहीतार्थस्याविस्मरणेन धारणशक्तिः धनं गोहिरण्यादि उत्साहः कार्ये प्रत्युपक्रमादि॥ एतेषां
नाशकत्वाद्वैषयिकं सुखं विषसममित्यर्थः॥ तत्रैव हेत्वंतरमाह॥ अधर्मेति॥ ३८॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु॥ ॥

तामसं सुखं त्यागार्थमेवोदाहरति यदग्रे चेति अनुबंधशब्दार्थमाह अवसानेति मोहनं मोहकरं तदुत्पत्तिहेतुमाह निद्रेति ३९॥
क्रियाकारकफलात्मनः संसारस्य प्रत्येकं सात्विकादिभेदेन त्रैविध्यमुक्त्वा संसारांतर्भूतमेव किंचिद्गुणत्रयास्पृष्टमपि क्वचिद्र
विष्यतीत्याशंक्याह अथेति संसारस्य सर्वस्यैव गुणत्रयसंस्पृष्टत्वं प्रकरणं अन्यद्वा प्राणी यत्रा प्राणिशब्देन प्रासिद्ध्यास्थाव
रादिग्रह्यते प्रकरणार्थमुपसंहृतमनुवदति सर्वेइति तस्यानेकार्थत्वेन हेयत्वं सूचयति क्रियेति निर्गुणादात्मनो वैलक्ष

यदग्रे चानुबंधे चावसानोत्तरकाले च सुखं मोहनं मोहकरं आत्मनो निद्रालस्यप्रमादोत्थं निद्रा चालस्यं च प्रमादश्च
तेभ्यः समुत्तिष्ठतीति निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ३९ अथेदानीं प्रकरणोपसंहारार्थं श्लोक आरभ्यते॥
न तदस्ति तन्नास्ति पृथिव्यां वा मनुष्यादि सत्वं प्राणिजातं अन्यद्वा प्राणिजातं दिवि देवेषु वा पुनः सत्वं प्रकृतिजैः प्र

यदग्रे चानुबंधे च सुखं मोहनमात्मनः निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं॥ ३९॥ न त
दस्ति पृथिव्यां वा दिवि देवेषु वा पुनः॥ सत्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः॥ ४०॥

कृतिजातैरेभिस्त्रिभिर्गुणैः सत्वादिभिर्विमुक्तं परित्यक्तं यत्स्याद्भवेन्न तदस्तीति पूर्वेणैव संबंधः सर्वः संसारः क्रि
याकारकफललक्षणः सत्वरजस्तमोगुणात्मकोऽविद्यापरिकल्पितो सन्मूलोनर्थ उक्तः वृक्षरूपकल्पन
याचोर्द्ध्वमूलमित्यादिना तं चासंगशस्त्रेण दृढेन छित्वा परं पदं परिमार्गितव्यमिति चोक्तं॥ ४०॥ श्रीरामायनमः॥

ण्यास्तु तस्य संसारस्य हेयतेत्याह सत्वेति अनर्थत्वाच्च तस्य त्याज्यत्वमनर्थकत्वं च तस्याविद्याकल्पितस्यावस्तुनो वस्तु
वद्भानादित्याह अविद्येति न केवलमष्टादशे संसारो दर्शितः किंतु पंचदशेपीत्याह वृक्षेति चकारादुक्तः संसारइत्य
नुकृष्यते संसारध्वस्तिसाधनं सम्यग्ज्ञानं च तत्रैवोक्तमित्याह असंगेति॥ ४०॥ श्रीरामचंद्रायनमः॥ श्रीकृष्णः॥

त्मका

वृत्तमनूद्यानंतरश्लोकतात्पर्यमाह। तत्रेति। उक्तो निवर्त्तयिषितः संसारः स तिसृभ्यः परामृश्यते। सर्वो हि संसारो गुणत्रया
त्मको न च गुणानां प्रकृत्यादीनां संसारकारणीभूतानां निवृत्तिर्युक्ता प्रकृतेर्नित्यत्वादित्याशंकायां स्वधर्मानुष्ठानात्त
त्त्वज्ञानोत्पत्त्या गुणानामज्ञानात्मकानां निवृत्तिर्यथा भवति तथा स्वधर्मजातं वक्तव्यमित्युत्तरग्रंथप्रवृत्तिरित्यर्थः। नत्त
द्वर्णप्रयुक्तधर्मजातानुपदेशे चोपसंहारप्रकरणप्रकोपः स्यादित्याह। सर्वश्चेति। उपसंहृते गीताशास्त्रार्थे यद्यपि

तत्र च सर्वस्य त्रिगुणात्मकत्वात् संसारकारणनिवृत्त्यनुपपत्तौ प्राप्तायां यथा तन्निवृत्तिः
स्यात्तथा वक्तव्यं सर्वश्च गीताशास्त्रार्थ उपसंहर्त्तव्य एतावानेव च सर्वो वेदस्मृत्यर्थः पुरु

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप। कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥ ४१

षार्थमिच्छद्भिरनुष्ठेय इत्येवमर्थं च ब्राह्मणक्षत्रियविशामित्यादिरारभ्यते॥ ॥श्रीः॥ ॥

सर्ववेदार्थः स्मृत्यर्थश्च सर्व उपसंहृतस्तथापि मुमुक्षुभिरनुष्ठेयमवशिष्टमस्ति वक्तव्यमित्याशंक्याह। एतावानिति
अनुष्ठेयपरिमाणनिर्द्धारणवदुक्तशंकानिवृत्तिः शास्त्रार्थोपसंहारश्चेत्येतदुभयं चकारार्थः। संप्रति वर्णचतुष्टयस्या
नुष्ठेयं धर्मजातमसंकीर्णमिति सूत्रमुपन्यस्यति। ब्राह्मणेति। श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु। श्रीरामचंद्रायनमः

उपनयनसंस्कारवत्वेसतिवेदाधिकारित्वंसममितित्रयाणांसमासकरणमितरेषामसमासेहेतुमाह॥ शूद्राणामिति
एकजातित्वमुपनयनवर्जितत्वैकर्मणामसंकीर्णत्वेनव्यवस्थापकंप्रश्नपूर्वकंप्रकटयति केनेत्यादिना॥ स्वभावप्र

ब्राह्मणश्चक्षत्रियश्चविट्चब्राह्मणक्षत्रियविशः तेषांब्राह्मणक्षत्रियविशांचशूद्राणांचशूद्रा
णामसमासकरणमेकजातित्वेसतिवेदेऽनधिकारात्परंतपकर्माणिप्रविभक्तानीतरेतरविभा
गेनव्यवस्थापितानिकेनस्वभावप्रभवैर्गुणैः स्वभावः ईश्वरस्यप्रकृतिस्त्रिगुणात्मिकामायासा
प्रभवोयेषांगुणानांतेस्वभावप्रभवाः तैः शमादीनिकर्माणिप्रविभक्तानिब्राह्मणादीनामथवा
ब्राह्मणस्वभावस्यसत्वगुणः प्रभवः कारणंतथाक्षत्रियस्वभावस्यसत्वोपसर्जनंरजः प्रभवः
वैश्यस्वभावस्यतमउपसर्जनंरजः प्रभवः शूद्रस्वभावस्यरजउपसर्जनंतमः प्रभवः प्रशांत्यैश्वर्येहा
मूढस्वभावदर्शनाच्चतुर्वर्णाना॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीरामचंद्रायनमः॥

प्रभवः

भवैर्गुणैरित्यस्यार्थांतरमाह॥ अथवेति॥ उक्तव्यवस्थायांकार्यदर्शनंप्रमाणयति॥ प्रशांतीत्यादिना॥ श्रीः॥

स्वभावशब्दस्यार्थांतरमाह ॥ अथवेति ॥ किमितिगुणाभिव्यक्तेरुक्तवासनाधीनत्वंतत्राह ॥ गुणेति ॥ ननुनास्तिगुणप्रादुर्भा
वस्यनिःकारणत्वंप्रकृतेर्गुणकारणत्वाभिधानादतआह ॥ स्वभावइति ॥ वासनांकारणमितिगुणव्यक्तेर्निमित्तकारण
त्वंविवक्ष्यते प्रकृतिस्तूपादानमितिभावः ॥ उक्तमुपसंहरत्येवमिति ॥ स्वभावप्रभवैःसत्वादिगुणैःब्राह्मणादीनांकर्मा

मथवाजन्मांतरकृतसंस्कारःप्राणिनांस्ववर्त्तमानजन्मनिस्वकार्यारंभमुखत्वेनाभिव्यक्तःस्वभावःसप्रभ
वोयेषांगुणानांतेस्वभावप्रभवाःगुणानांप्रादुर्भावस्यनिःकारणत्वानुपपत्तेः ॥ स्वभावःकारणमितिका
रणविशेषोपादानंएवंस्वभावप्रभवैःप्रकृतिप्रभवैःसत्वरजस्तमोभिर्गुणैःस्वकार्यानुरूपेणशमादीनि
कर्माणिप्रविभक्तानिब्राह्मणादीनांननुशास्त्रप्रविभक्तानिशास्त्रेणविहितानिब्राह्मणादीनांप्रशमा
दीनिकर्माणिकथमुच्यंतेसत्वादिगुणविभक्तानीतिनैषदोषःशास्त्रेणापिब्राह्मणादीनांसत्वादिगुणविशेषा
पेक्षयैवशमादीनिकर्माणिप्रविभक्तानिनगुणानपेक्षयेतिशास्त्रप्रविभक्तान्यपिकर्माणिगुणप्रविभक्तान्युच्यं

णिप्रविभक्तानीत्युक्तमाक्षिपति ॥ नन्विति ॥ शास्त्रस्यधर्माधर्मविभागहेतोःसत्वादिविशेषापेक्षयैवविभागज्ञापकत्वा
दुभयत्रविभागहेतुत्वोक्तिरविरुद्धेतिपरिहरति ॥ नैषइति ॥ ४१ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामायनमः

प्रविभक्तानि कर्माण्येव प्रश्नद्वारा विविच्य दर्शयति कानीत्यादिना ॥ अंतःकरणोपशमः शमः दमो बाह्यकरणोपरतिरि
त्युक्तं स्मारयति यथेति त्रिविधं तपः समदृष्टो दर्शितमित्याह तप इति शौचमपि बाह्यांतरभेदेन प्रागेवोक्तमित्याह शौ
चमिति क्षमा नामाकृष्टस्य ताडितस्य वा मनसि विकाररहित्यं ज्ञानं शास्त्रीयपदार्थज्ञानं विज्ञानं शास्त्रार्थस्य स्वानु

कानि पुनस्तानि कर्माणीत्युच्यंते ॥ शमदमौ यथा व्याख्याता शौचं तपो यथोक्तं शारीरादि शौचं व्याख्यातं क्षांतिः॥
क्षमा आर्जवं ऋजुतैव च ज्ञानं विज्ञानं उक्तं आस्तिक्यमस्ति स्वभावः श्रद्दधानता आगमार्थेषु ब्रह्मकर्म ब्राह्मण
जातेः कर्म ब्रह्मकर्म स्वभावजं यदुक्तं स्वभावप्रभवैर्गुणैः प्रविभक्तानीति तदेवोक्तं स्वभावजमिति ॥ ४२ शौर्यं

शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ॥ ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजं ॥ ४२॥
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं ॥ दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजं ॥ ४३॥

शूरस्य भावः तेजो प्रागल्भ्यं धृतिर्धारणं सर्वावस्थास्वनवसादो भवति यया धृत्योत्तंभितस्य दाक्ष्यं दक्षस्य भावः
सहसा प्रत्युत्पन्नेषु कार्येषु अव्यामोहेन प्रवृत्तिः युद्धे चाप्यपलायनं अपराङ्मुखीभावः शत्रुभ्यः दानं देयेषु मुक्त
हस्तता ईश्वरभावः प्रभुशक्तिप्रकटीकरणं ईशितव्यान्प्रति क्षात्रं कर्म क्षत्रजातेर्विहितं कर्म क्षात्रं स्वभावजं ॥ ४३॥

भवाज्ज्ञत्वापादनं ॥ त्रिधा व्याख्यातं स्वभावशब्दार्थमुपेत्याह ॥ यदुक्तमिति ॥ ४२ शूरस्य भावो विक्रमो बलवत्तरानपि परि
हर्तुं प्रवृत्तिः प्रागल्भ्यं परैरधर्षणीयत्वं महत्यामपि विपदि देहेंद्रियोत्तंभनी चित्तवृत्तिः धृतिरिति व्याचष्टे सर्वावस्था
स्विति ॥ दक्षस्य भावमेव विभजते ॥ सहसेति ॥ स्वभावजमुक्तं पूर्ववत् ॥ ४३ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीकृष्णः

शमादि परिचर्यांत कर्मणां विभज्योक्तानामभ्युदयं फलमादावुपन्यस्यति एतेषामिति स्वभावतो विहितत्वादेव मोक्षोपे
क्षामंतरेणानुष्ठानादित्यर्थः तत्र प्रमाणमाह वर्णा इति शेषशब्देन भुक्तकर्मातिरिक्तं कर्मानुशयशब्दितमुच्यते प्रश
कं देशादिभिर्विशिष्टशब्दः संबध्यते आदिशब्देन तद्यथा आम्रे फलार्थे निमित्ते छायागंधस्त्वनूत्पद्येते एवं धर्मं चर्य
माणमर्था अनूत्पद्यंते न धर्महानिर्भवतीति स्मृतिर्गृह्यते इत्थं चोक्तानां कर्मणां स्वर्गफलत्वं युक्तमित्याह पुराणे चेति उ

कृषिगोरक्ष्यवाणिज्यं कृषिश्च गोरक्ष्यं च वाणिज्यं च कृषिगोरक्ष्यवाणिज्यं कृषिर्भूमिविलेखनं गां रक्षतीति गोर
क्षः तस्य भावः गोरक्ष्यं पाशुपाल्यं वाणिज्यं वणिक्कर्म क्रयविक्रयादिलक्षणं वैश्यकर्म वैश्यजातेः कर्म वैश्य
कर्म स्वभावजं परिचर्यात्मकं शुश्रूषास्वभावं च कर्म शूद्रस्यापि स्वभावजं एतेषां जातिविहितानां कर्मणां सम्य

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजं ॥ परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं ॥ ४४ ॥

गनुष्ठितानां स्वर्गप्राप्तिः फलं स्वभावतः वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण
विशिष्टदेशजातिकुलधर्मायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यंते इत्यादिश्रुतिस्मृतिभ्यः पुराणे च
वर्णिनामाश्रमिणां च लोकफलभेदविशेषस्मरणात्कारणांतरात्त्विदं वक्ष्यमाणं फलं ॥ ४४ ॥ श्रीरामाय नमः ॥

त्कं हि ॥ यस्तु सम्यक्करोत्येवं गृहस्थः परमं विधिं तद्वर्णबंधमुक्तो सौ लोकानाप्नोत्यनुत्तमानिति ॥ यस्त्वेतां नियतश्चर्यां वान
प्रस्थश्चरेन्मुनिः ॥ स दहत्यग्निवद्दोषान् जयेल्लोकांश्च शाश्वतानिति च मोक्षाश्रमं यश्चरते तु विद्वान् शुचिः सुखं कल्पित
बुद्धियुक्तः ॥ अनिंधनज्योतिरिव प्रशांतः स ब्रह्मलोकं श्रयते द्विजातिरिति च स वै एते पुण्यलोका भवंतीति श्रुतिश्च कारार्थः

यदि पुनर्मोक्षायोक्तानि कर्माण्यनुष्ठीयेरन् तदा मोक्ष
फलत्वं तेषां सेत्स्यतीत्याह कारणांतरादिति ॥ ४४ ॥

तदेवकारणांतरंयन्मोक्षापेक्षयातेषामनुष्ठानंमोक्षोपायेषुशमादिषुसात्विकेषुब्राह्मणधर्मेषुक्षत्रियादीनामन
धिकारात्ब्राह्मणानामेवमोक्षोनक्षत्रियादीनामित्याशंक्याह॥स्वेस्वइति॥यथास्वकर्मण्यभिरतस्यशुद्धिद्वाराज्ञा
ननिष्ठायोग्यताप्रा॥सा॥प्राप्तज्ञानस्यमोक्षोपपत्तेर्ब्राह्मणातिरिक्तस्यापिज्ञानवतोमुक्तिरितिमत्वापूर्वार्द्धंव्याचष्टे
स्वेस्वइत्यादिना॥संसिद्धिशब्दस्यमोक्षार्थत्वंसंगृहीत्वास्वकर्मनिष्ठत्वमात्रेणतल्लाभेनादर्थ्येनसंन्यासादिविधाना

स्वेस्वेयथोक्तलक्षणभेदेकर्मण्यभिरतस्तत्परःसंसिद्धिंस्वकर्मानुष्ठानादशुद्धिक्षयेसतिकायेंद्रिया
णांज्ञाननिष्ठायोग्यतालक्षणांलभतेप्राप्नोतिनरोऽधिकृतःपुरुषःकिंस्वकर्मनिष्ठातएवसाक्षात्सं

स्वेस्वेकर्मण्यभिरतःसंसिद्धिंलभतेनरः॥स्वकर्मनिरतःसिद्धिंयथाविंदतितत्शृणु॥४५॥

सिद्धिं॥नकथंतर्हि॥स्वकर्मनिरतःसिद्धिंयथायेनप्रकारेणविंदतितच्छृणु॥४५॥श्रीरामायनमः॥

नर्थक्यमितिमन्वानःशंकते॥किमिति॥नतावन्मात्रेणसाक्षान्मोक्षोज्ञाननिष्ठायोग्यताचेतिपरिहरति॥नेति
तर्हिकथंस्वकर्मनिष्ठस्यसंसिद्धिरितिप्रतिज्ञेतिपृच्छति॥कथंतर्हीति॥उत्तरार्द्धेनउत्तरमाह॥स्वकर्मेति॥तच्छृणुतंप्र
कारमेकाग्रचेताभूत्वावधारयेसर्थः॥४५॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥श्रीरामचंद्रायनमोनमः॥

तमेवप्रकारंस्फोरयति। यतइति। यतःशब्दार्थंयस्मादित्युक्तंव्यक्तीकरोति। यस्मादिति। प्राणिनामुत्पत्तिर्यस्मादीश्वरात्तेषांचेष्टावायस्मा
दंतर्यामिणोयेनचसर्वंव्याप्तंकार्यस्यकारणातिरिक्तस्वरूपाभावात्तंस्वकर्मणाभ्यर्च्यमानवःसिद्धिंविंदतीतिसंबंधः। नहिब्राह्मणादीनां
यथोक्तकर्मनिष्ठयासाक्षान्मोक्षोलभ्यतेतस्यज्ञानैकलभ्यत्वात्। किंतुतन्निष्ठानांशुद्धबुद्धीनांकर्मसुफलमपश्यतामीश्वरप्रसा
दात्सादितविवेकवैराग्यवतांसंन्यासिनांज्ञाननिष्ठायोग्यतावतांज्ञानप्राप्त्यामुक्तिरित्यभिप्रेत्याह। केवलमिति। ४६। स्वधर्मानु

यतोयस्मात्प्रवृत्तिरुत्पत्तिश्चेष्टावायस्मादंतर्यामिणईश्वराद्भूतानांप्राणिनांस्याद्येनेश्वरेणसर्वमिदंजगत्ततंव्याप्तंस्वक
र्मणापूर्वोक्तेनप्रतिवर्णंतमीश्वरमभ्यर्च्यपूजयित्वाआराध्यकेवलंज्ञाननिष्ठायोग्यतालक्षणांसिद्धिंविंदतिमानवो।
मनुष्यः। ४६। यतएवमतः। श्रेयान्प्रशस्यतरःस्वोधर्मःस्वधर्मःविगुणोपीत्यपिशब्दोद्रष्टव्यःपरधर्मात्स्वनुष्ठिता

यतःप्रवृत्तिर्भूतानांयेनसर्वमिदंततं। स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवः। ४६। श्रेया
न्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात्। स्वभावनियतंकर्मकुर्वन्नाप्नोतिकिल्बिषं ४७।

त्स्वभावनियतंस्वभावेननियतंयदुक्तंस्वभावजमितितदेवोक्तंस्वभावनियतमितियथाविषजातस्यैवकृमेर्वि
षंनदोषकरंतथास्वभावनियतंकर्मकुर्वन्नाप्नोतिकिल्बिषंपापं। ४७। श्रीसीतारामचंद्रजीप्रसन्नोमस्तु। ।

ष्ठानस्यबुद्धिशुद्ध्यादिद्वारामोक्षावसायित्वात्तदनुष्ठानमावश्यकमित्याह। यतइति। ननुयुद्धादिलक्षणंस्वधर्मंकुर्वन्नपि
हिंसाधीनंपापंप्राप्नोति। तत्कथंस्वधर्मःश्रेयानितितत्राह। स्वभावेति। स्वकीयंवर्णाश्रमंनिमित्तीकृत्यविहितंस्वभावज
मित्यधस्तादुक्तमित्याह। यदुक्तमिति। तंनिग्रहात्मकमपिविहितंकर्मकुर्वन्पापंनाप्नोतीत्यत्रदृष्टांतमाह। यथेति। ४७।

गी॰भा॰
३७६

आ॰गी॰
१८

इतश्च विहितं कर्म दोषवदपि कर्त्तव्यं प्रकारांतरासंभवादित्युक्तानुवादपूर्वकं कथयति ॥ स्वभावेत्यादिना ॥ नहि कृमिर्विषजो विषनिमित्तं
मरणं प्रतिपद्यते ॥ तथायमधिकृतः पुरुषो दोषवदपि विहितं कर्म कुर्वन् पापं न प्राप्नोतीत्युक्तमित्यर्थः ॥ तर्हि दोषरहितमेव भिक्षा
टनादि सर्वैरनुष्ठीयतामतो न पापप्राप्त्याशंकेत्याशंक्याह ॥ परेति ॥ उक्तमित्यनुवर्त्तते ॥ नहि पापप्राप्तिशंकां परिहर्तुमकर्म निष्फल
मेव सर्वेषां स्यादित्याशंक्य ज्ञानाभावान्नैवमित्याह ॥ अनात्मेति ॥ पूर्ववदत्रापि संबंधः प्रकारांतरासंभवकृतं फलमाह ॥ अ

स्वभावनियतं कर्म कुर्वाणो विषजात इव कृमिः किल्बिषं नाप्नोतीत्युक्तं परधर्मश्च भयावह इति अ
नात्मज्ञश्च न हि कश्चिदकर्मकृत् क्षणमपि तिष्ठतीत्यतः सहजं कर्म कौंतेय सहजन्मनैवोत्पन्नं स॥
हजं किं कर्म हे कौंतेय सदोषमपि त्रिगुणत्वान्न त्यजेत् सर्वारंभा आरभ्यंत इत्यारंभाः सर्वकर्माणीत्ये

सहजं कर्म कौंतेय सदोषमपि न त्यजेत् सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८

तत्प्रकरणात् यः कश्चिदारंभः स्वधर्मः परधर्मश्च ते सर्वे सदोषा हि यस्मात् त्रिगुणात्मकत्वमत्र हेतुः॥
त्रिगुणात्मकत्वाद्दोषेण धूमेन सहजेनाग्निरिवावृताः ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीरामायनमः॥

शिव
३७६

तदिति ॥ सहजायत इति सहजं स्वभावनियतं नित्यं कर्म तद्धि हितत्वान्निर्दोषमपि हिंसात्मकतया सदोषमित्यत्र हेतुमाह ॥ त्रिगुणेति
सत्वादिगुणत्रैयाद्धिंसादिदोषवदपि कर्म विहितमत्याज्यमित्यर्थः ॥ कर्मणां दोषवत्त्वं प्रपंचयति ॥ सर्वेति ॥ आरंभशब्दस्य कर्मव्यु
त्पत्त्या स्वपरसर्वकर्मार्थत्वे कर्मणां प्रकृतत्वे हेतुमाह ॥ प्रकरणादिति ॥ दोषेणेत्यादि व्याचष्टे ॥ यः कश्चिदिति ॥ ते सर्वे दोषेणावृता इति
संबंधः सर्वकर्मणां दोषावृतत्वे हि शब्दोपात्तं यस्मादित्युक्तं हेतुमेवाभिनयति ॥ त्रिगुणात्मकत्वमिति ॥ श्रीरामचंद्रायनमः ॥

पारव्धत

स्वभावनियतस्यकर्मणोदोषवत्वात्त्यागद्वारापरधर्ममातिष्ठमानस्यापिनैवदोषाद्विमोकःसंभवतिनचपरधर्मोनुष्ठातुंश
क्यतेभयावहत्वान्नचतर्हिकर्मणोऽशेषतोऽननुष्ठानमेवास्त्वशेषकर्मत्यागायोगादतःसहजंकर्मसदोषमपिनत्याज्यमि
तिवाक्यार्थमाह॥सहजस्येति॥सहजंकर्मसदोषमपिनत्यजेदित्यत्रविचारमवतारयति॥किमिति॥नहिकश्चिदितिन्यायादितिशे
षः॥दोषोविहितनित्यत्यागेप्रत्यवायः॥संदिग्धस्यप्रयोजनस्यविचार्यत्वादुक्तसंदेहेप्रयोजनंपृछति॥किंचातइति॥तत्राद्यमनू॥

सहजस्यकर्मणःस्वधर्माख्यस्यपरित्यागेनपरधर्मानुष्ठानेनापिदोषान्नैवमुच्यतेभयावहत्वात्परधर्मोनचशक्यतेऽ
शेषतस्त्यक्तुमज्ञेनकर्मयतस्तस्मान्नत्यजेदित्यर्थः॥किमशेषतस्त्यक्तुमशक्यंकर्मेतिनत्यजेत्॥किंवासहजस्यकर्म
णस्त्यागेदोषोभवतीति॥किंचातोयदितावदशेषतस्त्यक्तुमशक्यमितिनत्याज्यंसहजंकर्म॥एवंतर्ह्यशेषतस्त्यागेगु
णएवस्यादितिसिद्धंभवति॥सत्यमेवमशेषतस्त्यागएवनोपपद्यतइतिचेत्॥किंनित्यप्रचलितात्मकःपुरुषोयथा
सांख्यानांगुणाःकिंवाक्रियैवकारकंयथाबौद्धानांपंचस्कंधाःक्षणप्रध्वंसिनः॥श्रीसीतारामचंद्रायनमोनमः॥

द्यफलंदर्शयतियदीति॥अशक्यार्थानुष्ठानस्यगुणत्वेनप्रसिद्धत्वात्प्रसिद्धंहिमहोदधिमगस्त्यस्यचुलुकीकृत्यपीतवतो
गुणवत्त्वंतद्वाह॥एवंतर्हीति॥अशेषकर्मत्यागस्यगुणत्वेपिप्रागुक्तन्यायेनतदयोगात्तस्याशक्यानुष्ठानतेतिशंकते॥स
त्यमिति॥नोद्यमेवविवृण्वन्नाद्यंविभजते॥किमिति॥श्रीरामचंद्रायनमः॥श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥श्रीः॥

सत्वादिगुणवदात्मनो नित्यंप्रचलितत्वेनाशेषतस्तेन कर्मत्यक्तुंनशक्यं नापि रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञानांक्षणध्वंसानांस्कंधानामिवक्रियाकारकभेदाभावात्कारकस्यैवात्मनः क्रियात्वमित्युक्ते कर्माशेषतस्त्यक्तुंशक्यं उभयथापिस्वभावभंगादित्याह ॥ उभयथेति ॥ पक्षद्वयानुरोधेनाशेषकर्मत्यागायोगेवैशेषिकश्चोदयति ॥ अथेति ॥ कदाचिदात्मासक्रियोनिःक्रियश्च कदाचिदितिस्थितेफलितमाह ॥ तत्रेति ॥ उक्तमेवपक्षंपूर्वोक्तपक्षद्वयात् विशेषदर्शनतोविशदयति ॥ अयंत्विति ॥ आ

उभयथापिकर्मणोऽशेषतस्त्यागोनभवत्यथतृतीयोपिपक्षोयदाकरोतितदासक्रियंवस्तुयदानकरोतितदानिःक्रियंवस्तुएतदेवतत्रैवंसतिशक्यंकर्माशेषतस्त्यक्तुमयंत्वस्मिन्पक्षेविशेषोननित्यप्रचलितंवस्तुनापिक्रियैवकारकंकिंतर्हिव्यवस्थितेद्रव्येत्वविद्यमानाक्रियोत्पद्यतेविद्यमानाचविनश्यतिशुद्धंद्रव्यंशक्तिमदेवतिष्ठतइत्येवमाहुःकाणादाःतदेवचकारकमित्यस्मिन्पक्षेकोदोषइत्यमेवदोषोयतस्त्वभागवतंमतमिदं ॥ श्रीरामचंद्रायनमोनमः॥

गमापायित्वेक्रियायास्तद्धेतोद्रव्यस्यकथंस्थायितेत्याशंक्याह ॥ शुद्धमिति ॥ क्रियाशक्तिमत्वेपिक्रियावत्वाभावेकथंकारकत्वंक्रियांकुर्वन्कारणंकारकमित्यभ्युपगमादित्याशंक्याह ॥ तदेवेति ॥ क्रियाशक्तिमदेवकारकंनक्रियाधिकरणंपरस्पराश्रयादित्यर्थः ॥ वैशेषिकपक्षेदोषाभावादस्तिसर्वैःस्वीकार्यतेत्युपसंहरति ॥ अस्मिन्निति भगवन्मतानुसारित्वाभावादस्यपक्षस्यत्याज्यत्वमितिदूषयति ॥ अयमेवेति ॥ श्रीसीतारामचंद्रायनमः॥ श्रीसीतारामचंद्रजीप्रसंन्नोनमः॥ श्रीः

भगवन्मताननुसारित्वमस्याप्रामाणिकमितिशंकते कथमिति भगवद्वचनमुदाहरन्परपक्षस्यतदनुगुणत्वाभावमाह यतइ
ति परेषामपिमतमेतदनुगुणमेवकिंनस्यादित्याशंक्याह काणादादीनांहीति भगवन्मताननुगुणत्वाभावेपिन्यायानुगुण
त्वेनदोषरहितंकाणादादीनांमतमुपादेयमेवनहिकाणादमतविरोधादुपेक्ष्यतेभगवन्मतमितिशंकते अभागवतत्वेपीति
न्यायवत्त्वमसिद्धमितिदूषयति उच्यतइति सर्वप्रमाणानुसारिणोमतस्यनतद्विरोधितेत्याक्षिपति कथमिति वैशेषिकम

कथंज्ञायतेयतआह भगवान्नासतोविद्यतेभावइत्यादिकाणादादीनांह्यसतोभावःसतश्चाभावइतीदंमतमभागवत
मभागवतत्वेपिन्यायवत्त्वेकोदोषइतिचेदुच्यतेदोषवत्त्विदंसर्वप्रमाणविरोधात्कथंयदितावत्द्व्यणुकादिद्रव्यंप्रागुत्पत्तेर
त्यंतमेवासत्सत्त्वमापद्यतेउत्पन्नंचस्थितंकंचित्कालंपुनरत्यंतमेवासत्त्वमापद्यते तथाचसत्यसदेवसज्जायते अ
भावोभावोभवति भावश्चाभावइति तत्राभावोजायमानःप्रागुत्पत्तेःशशविषाणकल्पःसमवाय्यसमवायिनिमित्ता
ख्यंकारणमपेक्ष्यजायतइतिनचैवमभावउत्पद्यतेकारणंचापेक्षतइतिशक्यंवक्तुमसतांशशविषाणादीनामदर्शना

तस्यसर्वप्रमाणविरोधंप्रकटयन्नादौतन्मतमनुवदति यदीति असतोजन्मसतश्चनाशइतिस्थितेफलितमाह तथाचेति
उक्तमेववाक्यंव्याकरोत्यभावइति सदेवासत्त्वमापद्यतइत्युक्तंव्याचष्टे भावश्चेति इतिमतमितिशेषः तत्रैवाभ्युपगमां
तरमाह तत्रेति प्रकृतंमतंसमन्यर्थःइत्यभ्युपगम्यतइतिशेषः परकीयमभ्युपगमंदूषयति नचेति एवमितिपरपरि
भाषानुसारेणेत्यर्थः अदर्शनादुत्पत्तेरपेक्षायाश्चेतिशेषः श्रीसीतारामचंद्रायनमः श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु

कथं तर्हि त्वन्मतेपि घटादीनां कारणापेक्षाणामुत्पत्तिर्न हि भावानां कारणापेक्षोत्पत्तिर्वियुक्तेति तत्राह भावेति घटादीना
मस्मत्पक्षे प्रागपि कारणात्मना सतामेवाव्यक्तनामरूपाणामभिव्यक्तिसामग्रीमपेक्ष्य पृथगभिव्यक्तिसंभवान्नकिंचि
दवद्यमित्यर्थः ॥ असत्कार्यवादे दोषांतरमाह किंचेति परमते मानमेयव्यवहारे क्वचिदपि विश्वासो न कस्यचिदिस
त्र हेतुमाह सत्सदेवेति न हि सत्तथैवेति निश्चितं तस्यैव पुनरसत्प्राप्तेरिष्टत्वान्न चासत्तथैवेति निश्चयस्तस्यैव स

द्भावात्मकाश्चैतु घटादय उत्पद्यमानाः किंचिदभिव्यक्तिमात्रकारणमपेक्ष्योत्पद्यंते इति शक्यं प्रतिपत्तुं ॥ किंच ॥ अ
सतश्च सद्भावे सतश्चासद्भावेनक्वचित्प्रमाणप्रमेयव्यवहारे विश्वासः कस्यचित्स्यात् सत्सदेवासदसदेवेति निश्चया
नुपपत्तेः ॥ किंच उत्पद्यत इति द्व्यणुकादेर्द्रव्यस्य च स्वकारणसत्तासंबंधमाहुः प्रागुत्पत्तेश्चासत्पश्चात् स्वकार
कव्यापारमपेक्ष्य स्वकारणैः परमाणुभिः स्वसत्तया च समवायलक्षणेन संबंधेन संबद्धं सत्कारणसमवेतं स
द्भवति ॥ तत्र च वक्तव्यं कथमसतः सत्कारणं भवेत्संबंधो वा केनचित् ॥ श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु ॥

त्वप्राप्तेरुपगमादतो यन्मानेन सदसदिति वा निर्णीतं तत्तथैवेति विश्वासाभावान्मानवैफल्यमित्यर्थः ॥ इतश्चासत्कार्य
वादो न युक्तिमानित्याह ॥ किंचेति ॥ तदेव हेत्वंतरं स्फोरयितुं परमतमनुवदत्युत्पद्यत इति परकीयवचनमेव व्याचष्टे ॥ प्रा
गिति ॥ संबद्धं सदित्यनेन कारणसंबंधे सति कार्यस्य सत्तासंबंधो भवतीत्युक्तं तदेव स्फोरयति ॥ कारणेति ॥ परमत
मेवमनुभाष्य दूषयति ॥ तत्रेति ॥ श्रीरामायनमः ॥ श्रीरामचंद्रायनमः ॥ श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु ॥

कार्यस्यासतोपि कारणं संभवति तस्य च कार्येण संबंधः सिध्यतीत्याशंक्याह नहीति असत्वादेवासतः संबंधासंभवे कारण
स्य सतोपि न तेन संबंधोनुमातुं शक्यते सदसतोः संबंधासंभवादित्यर्थः कार्यस्यासंतासत्वानभ्युपगमात्कारणसंबंधः
स्यादिति शंकते नन्विति सतामेव द्व्यणुकादीनां कारणसंबंधं शंकितं दूषयति नसंबंधादिति अनभ्युपगममेव विशदय
ति नहीति सदेव कारणं कार्याकारमापद्य कार्यव्यवहारं निर्वर्त्तयति इत्युपगमान्नास्ति संबंधानुपपत्तिरित्याशंक्याप

नहि वंध्यापुत्रस्य सत्ता संबंधो वा कारणं वा केन चित्प्रमाणतः परिकल्पयितुं शक्यं स्यात् ननु नैव वै॥
शेषिकैरभावस्य संबंधः कल्प्यते द्व्यणुकादीनां हि द्रव्याणां स्वकारणेन समवायलक्षणः संबंधः सता
मेवोच्यते इति न संबंधात्प्राक्तत्तानभ्युपगमात् नहि वैशेषिकैः कुलालदंडचक्रादिव्यापारात्प्राग्घ
टादीनामस्तित्वमिष्यते न च मृद एव घटाद्याकारप्राप्तिमिच्छंति॥ ततश्चासत एव संबंधः पारिशे
ष्यादिष्टो भवति न चासतोपि समवायलक्षणः संबंधो न विरुद्धः॥ श्रीरामचंद्रायनमः॥ ॥

राद्धांतान्नैवमित्याह नचेति कार्यस्य कारणसंबंधात्पूर्वं सत्वाभावे पारिशेष्यसिद्धमर्थं दर्शयति ततश्चेति तत्र
चानुपपत्तिरुक्तेति शेषः॥ संबंधिनोः सतोरेव संयोगोपि समवायः सदसतोः संभवति तस्य नित्यत्वादन्यतरसंबं
धाभावेपि स्थितेरावश्यकत्वादिति शंकते नन्विति॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु श्रीरामचंद्रायनमः॥ ॥

सदसतोर्मिथःसंबंधस्यादृष्टत्वान्नेतिनिराचष्टे नवंध्येति ॥घटादिप्रागभावस्यात्यंताभावाभावाद्वंध्यापुत्रादिविलक्षण॥
तयास्वकारणसंबंधःसिद्ध्यतीत्याशंक्याह घटादेरिति ॥उभयत्राभावस्वभावाविशेषेपिकस्यचित्कारणसंबंधोनेतरस्ये॥
तिविशेषेहेत्वभावान्नप्रागभावस्यकारणसंबंधःसंभवतीत्यर्थः॥घटादिप्रागभावस्यसप्रतियोगित्वंवंध्यापुत्रादेर्नैवमि
तिविशेषमाशंक्यदूषयति एकस्येति ॥प्रागभावस्येवप्रध्वंसादेरपिसप्रतियोगित्वाविशेषेस्वकारणसंबंधाविशेषःस्यादि

नवंध्यापुत्रादीनामदर्शनात्घटादेरेवप्रागभावस्यस्वकारणसंबंधोभवति नवंध्यापुत्रादेःअभावस्यतुल्य
त्वेपीतिविशेषोऽभावस्यवक्तव्यः॥ एकस्याभावोद्वयोरभावःसर्वस्याभावःप्रध्वंसाभावःप्रागभावःइत॥
रेतराभावोऽत्यंताभावइतिलक्षणतोनकिंचिद्विशेषोदर्शयितुंशक्यः॥असतिचविशेषेघटस्यप्रागभावए॥
वकुलालादिभिर्घटभावमापद्यतेसंबद्ध्यतेचभावेनकपालाख्येनस्वकारणेनसंबंधश्चसर्वव्यवहारयो
ग्यश्चभवति॥ नतुघटस्यैवप्रध्वंसाभावोऽभावत्वेसत्यपीति॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥

त्यर्थः॥प्रागभावप्रध्वंसाभावयोर्विशेषाभावेफलितमाह॥असतिचेति॥ कपालशब्दोघटकारणीभूतमृदवयवविषयःस
र्वोव्यवहारोघटाश्रितोजन्मनाशादिव्यवहारः प्रध्वंसाभावस्यघटस्यैवाभावत्वेसत्यपिनघटत्वमापाद्यतेनापिकारणेनसंबध्य
तेनचोत्पत्त्यादिव्यवहारयोग्योभवतीत्येतदयुक्तंप्रागभावेनास्यविशेषाभावादित्याह नत्विति॥असमंजसमित्यनेनेतिशब्दःसंब

असमंजसांतरमाह प्रध्वंसाद्यभावानामिति अन्योन्याभावात्यंताभाववादिपदार्थौ क्वचिदिति देशकालयोर्ग्रहणं व्य
वहारो जन्मादिरेव प्रागभावो नोत्पत्त्यादिव्यवहारयोग्योऽभावत्वात्प्रध्वंसादिवदित्यर्थः प्रागभावस्य घट भावानभ्युपगमा
दनुमानं सिद्धसाधनमिति शंकते नन्विति अभावस्य भावापत्त्यनभ्युपगमे भावस्यैव भावापत्तिरित्यनिष्टं स्यादिति दूष

प्रध्वंसाद्यभावानां न क्वचिद्व्यवहारयोग्यत्वं दृष्टं दृष्टं च प्रागभावस्यैव द्व्यणुकादिद्रव्याख्य
स्योत्पत्त्यादिव्यवहारार्हत्वमित्येतदसमंजसमभावत्वाविशेषाद्संतप्रध्वंसाभावयोरिव
ननु नैवास्माभिः प्रागभावस्य भावापत्तिरुच्यते भावस्यैव तर्हि भावापत्तिर्यथा घटस्यैव घटापत्तिः
पटस्यैव पटापत्तिः एतदप्यभावस्य भावापत्तिवदेव प्रमाणविरुद्धं सांख्यस्यापि यः परिणा
माख्यः सोऽप्यपूर्वधर्मोत्पत्तिविना प्रांगीकरणाद्वैशेषिकपक्षान्न विशिष्यते ॥ ॥ ॥

यति भावस्येति तस्य तदापत्तियोग्यत्वे दृष्टांतमाह यथेति भावस्य भावापत्तिरनिष्टेति दार्ष्टांतिकं स्पष्टयति एत
दपीति आरंभवादोक्तदोषं परिणामवादेपि संचारयति सांख्यस्येति धर्मः परिणामः असतोऽपूर्वपरिणामस्योत्प
त्तेः सतश्चापूर्वपूर्वपरिणामस्य नाशादसदसदेव सच्च सदेवेति व्यवस्थात्रापि दुर्घटेत्यर्थः ॥ श्रीरामचंद्राय नमः ॥ ॥

ननु कार्यकारणात्मना प्रागपि सदेवाव्यक्तं कारकव्यापाराद्व्यज्यते तेन व्यक्तव्यक्त्योर्जन्मनाशव्यवहारान्मतांतराद्विशेष
सिद्धिरत्राह ॥ अभिव्यक्तीति ॥ कारकव्यापारात्प्रागनभिव्यक्तिवदभिव्यक्तेः सत्त्वमसत्त्वं वा सत्त्वे कारकव्यापारवैयर्थ्याद्वि
षयप्रमाणविरोधः द्वितीये पक्षांतरवदसत्त्वं तासतस्तन्निर्वर्त्यत्वायोगे स एव दोषः कारकव्यापारादूर्ध्वं व्यक्तिवदव्यक्तेर
पि सत्त्वे स एव दोषः असत्त्वेपि सतोऽसत्त्वांगीकारान्मानमेयव्यवहारे न क्वापि विश्वासः सत्त्वदेवासत्त्वासदेवेत्यनिर्द्धा
रणादित्यर्थः ॥ सांख्यपक्षप्रतिक्षेपोपन्यासेन पक्षांतरमपि प्रतिक्षिप्तमित्याह ॥ एतेनेति ॥ कारणस्यैव कार्यरूपापत्तिरु

अभिव्यक्तितिरोभावांगीकरणेप्यभिव्यक्तितिरोभावयोर्विद्यमानाविद्यमानत्वनि
रूपणे पूर्ववदेव प्रमाणविरोधः ॥ एतेन कारणस्यैव संस्थानमुत्पत्त्यादीत्येतदप्ययुक्तं पा
रिशेष्यात्सदेकमेव वस्तु ॥ अविद्ययोत्पत्तिविनाशादिधर्मैरनेकधा विकल्प्यत इति
इदं भागवतं मतमुक्तं नासतो विद्यते भावो इत्यस्मिन् श्लोके सत्प्रत्ययस्याव्यभिचारा॥

त्पत्तिस्तस्यैव तद्रूपत्यागेन स्वरूपापत्तिर्नाश इत्येतदपि न ॥ पूर्वरूपे स्थिते नष्टे च परस्पररूपापत्तेरनुपपत्तेर्नैव प्राप्तं रूपं स्थिते
न नष्टे न वा स्प्रष्टुं शक्यमित्यर्थः ॥ आरंभवादे परिणामवादे चोत्पत्त्यादिव्यवहारानुपपत्तौ परिशेषायातं दर्शयति ॥ पारि
शेष्यादिति ॥ एकस्यानेकधा विकल्पानुपपत्तिमाशंक्याह ॥ अविद्ययेति ॥ अस्यापि मतस्य भगवन्मतानुरोधित्वाभावाद
विशिष्टता स्यादित्याशंक्याह ॥ इदमिति ॥ उक्तमेव भगवन्मतं विशदयति ॥ सत्प्रत्ययस्येति ॥ सदेकमेव वस्तु स्यादिति शेषः ॥

इतरेषां विकारप्रत्ययानां रजतादिधीवदर्थव्यभिचारादविद्ययात देवसद्वस्तु अनेकधा विकल्प्यत इत्याह व्यभिचाराच्चेति
इति श्लोके दर्शितमिति संबंधः । आत्मनश्चेदविक्रियत्वं भगवते ष्टं तर्हि सर्वकर्मत्यागोपपत्तेः सहजस्यापि कर्मणस्त्या
गसिद्धिरिति शंकते । कथमिति । किं कार्यकारणात्मकानां गुणानामविकल्पितानां कल्पितानां वा कर्मधर्मत्वेनेष्टं द्वि
धापि निःशेषकर्मत्यागोऽविदुषो विदुषो वा नाघट इत्याह । यदीत्यादिना । अविद्यारोपितमेव गुणाशब्दितकार्यकारणा

व्यभिचाराच्चेतरेषामिति कथं तर्ह्यात्मनोऽविक्रियत्वेनाशेषतः कर्मणस्त्याग उपपद्यते इति यदि वस्तुभूता
गुणा यदि वाऽविद्याकल्पितास्तद्धर्मः कर्म तदात्मन्यविद्याध्यारोपितमेवेत्यविद्वान्न हि कश्चित्क्षणमपि अशे
षतस्त्यक्तुं शक्नोतीत्युक्तं विद्वांस्तु विद्ययाऽविद्यायां निवृत्तायां शक्नोत्येवाशेषतः कर्म परित्यक्तुं । अविद्याध्यारो
पितस्य शेषानुपपत्तेः । न हि तैमिरिकदृष्ट्याध्यारोपितस्य द्वितीयचंद्रादेस्तिमिरापगमे पि शेषो वतिष्ठते । ए
वं च सतीदं वचनमुपपन्नं सर्वकर्माणि मनसेत्यादि स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः स्वक[र्]मणा
तमभ्यर्च्य सिद्धिं विंदति मानव इति च ॥ ४८ ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीसीतारामचंद्रायनमो नमः ॥

रोपहाराक कर्मेति शेषः द्वितीयं प्रत्याह । विद्वांस्त्विति । आरोपशेषवशाद्विदुषोपि नाशेषकर्मत्यागसिद्धिरित्याशंक्या
ह । अविद्येति । तामेवानुपपत्तिं दृष्टांतेन स्पष्टयति न हीति । विदुषोऽशेषकर्मत्यागे पांचमिकमपि वचोनुकूलमित्या
ह । एवं चेति । अविदुषः सर्वकर्मत्यागायोगे च प्रकृताध्यायस्थमेव वाक्यमनुकूलमित्याह । स्वे स्व इति । वाक्यांतरम
पि तत्रैवार्थे युक्तार्थमित्याह । स्वकर्मणेति ॥ ४८ ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीसीतारामचंद्रजीप्रसंन्नो मस्तु ॥

विदुषः सर्वकर्मत्यागेऽपि नाविदुषस्तथेत्युक्तमिदानीमुक्तमनूद्यानंतरश्लोकतात्पर्यमाह ॥ याकर्मजेति चकारोऽवधारणार्थोऽभिन्नक्रमो वक्तव्य इत्यत्र संबध्यते साधनान्युपदिश्य नैःकर्म्यसिद्धिं व्यपदिशति ॥ असक्तेति पुत्रादिविषये चेतसः संगाभावेऽपि तस्याः स्वाधीनत्वमाशंक्याह ॥ जितात्मेति ॥ असक्तिमुक्त्वा स्पृहाभावं वदता पुनरुक्तिरिष्टेया

याकर्मजा सिद्धिरुक्ता ज्ञाननिष्ठायोग्यतालक्षणा तस्याः फलभूता नैःकर्म्यसिद्धिः ज्ञाननिष्ठालक्षणा च वक्तव्येति श्लोक आरभ्यते असक्तबुद्धिरसक्ता संगरहिता बुद्धिरंतःकरणं यस्य सोऽसक्तबुद्धिः सर्वत्र पुत्रदारादिषु सक्तिनिमित्तेषु जितात्मा जितो वशीकृतः आत्मा अंतःकरणं यस्य स जितात्मा विगतस्पृहः विगता स्पृहा तृष्णा देहजीवितभोगेषु यस्मात्स विगतस्पृहः य एवंभूत आत्मज्ञः सः नैःकर्म्यसिद्धिं निर्गतानि कर्माणि यस्मा

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ॥ नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ४९ ॥

न्निष्क्रियब्रह्मात्मकसंबोधात्स निष्कर्मा तस्य भावो नैष्कर्म्यं नैष्कर्म्यं च तत्सिद्धिश्च सा नैष्कर्म्यसिद्धिः नैष्कर्म्यस्य वा निःक्रियात्मस्वरूपावस्थानलक्षणस्य सिद्धिर्निष्पत्तिस्तां नैष्कर्म्यसिद्धिं परमामुत्कृष्टां कर्मजसिद्धिविलक्षणां सद्योमुक्त्यवस्थानरूपां संन्यासेन सम्यग्दर्शनेन तत्पूर्वकेण वा सर्वकर्मसंन्यासेनाधिगच्छति प्राप्नोति तथा चोक्तं सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्त इति ॥ ४९ ॥ श्रीरामायनमः ॥

शंक्याह ॥ देहेति उक्तमनूद्य फलं लंभयति ॥ य एवमिति ॥ कर्मणां निर्गतौ हेतुमाह ॥ निःक्रियेति ॥ सम्यग्ज्ञानार्थत्वेन नैष्कर्म्यसिद्धिशब्दं व्याख्याय अर्थांतरमाह ॥ नैष्कर्म्यस्येति ॥ प्रकर्षमेव प्रकटयति ॥ कर्मजेति ॥ संन्यासस्य प्रकृतिस्थस्य सोऽस

म्यग्दर्शनसाधनत्वप्रसिद्धेरयुक्तं तादात्म्यमित्याशंक्य पक्षांतरमाह ॥ तत्पूर्वकेणेति ॥ संन्यासान्नैष्कर्म्यप्राप्तिरित्यत्र वाक्योपक्रमानुकूल्यमाह ॥ तथा चेति ॥ ४९ ॥

ज्ञानप्राप्तियोग्यतावतो जातसम्यग्धियस्तत्फलप्राप्तिरूपोक्तायां मुमुक्षायां वक्तव्यशेषो नास्तीत्याशंक्याह । पूर्वोक्तेनेति
क्रमात्स्वयं वक्ष्यत इत्युच्यते सिद्धिं प्राप्त इत्युक्तमेव कस्मादनूद्यते तत्राह । तदनुवाद इति । उत्तरमेव प्रश्नपूर्वकं स्फोरयति ॥

पूर्वोक्तेन कर्मानुष्ठानेनेश्वराभ्यर्चनरूपेण जनितां प्रागुक्तलक्षणां सिद्धिं प्राप्तस्योत्पन्नात्मविवेकविज्ञानस्य
केवलात्मज्ञाननिष्ठारूपा नैष्कर्म्यलक्षणा सिद्धिर्येन क्रमेण भवति तद्वक्तव्यमित्याह ॥ सिद्धिं प्राप्तः स्वकर्म
णा ईश्वरं समभ्यर्च्य तत्प्रसादजां कायेंद्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं प्राप्तः सिद्धिं प्राप्त इति त
दनुवादस्तूत्तरार्थः ॥ किं तदुत्तरं यदर्थोऽनुवाद उच्यते ॥ यथा येन प्रकारेण ज्ञाननिष्ठारूपेण ब्रह्म परमात्मानमा

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ॥ समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा ॥ ५० ॥

प्नोति तथा तं प्रकारं ज्ञाननिष्ठाप्राप्तिक्रमं मे मम वचनात् ॥ निबोध निश्चयेनावधारयेत्येतत् ॥ किं विस्तरेणने
त्याह । समासेनैव संक्षेपेणैव हे कौंतेय यथा ब्रह्म प्राप्नोति तथा निबोध इत्यनेन प्रकारेण या प्रतिज्ञाता ब्र
ह्मप्राप्तिस्तामिदंतया दर्शयितुमाह निष्ठा ज्ञानस्य या परेति निष्ठा पर्यवसानं परिसमाप्तिरित्येतत् ॥ ॥

किं तदित्यादिना ॥ ज्ञाननिष्ठाप्राप्तिक्रमस्याविस्तरेणोक्ते दुर्बोधत्वमाशंक्य परिहरति ॥ किमिति ॥ चतुर्थपादस्य पू
र्वेणाऽसंगतिमाशंक्याह ॥ यथेति ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीरामचंद्राय नमः ॥

निष्ठायाः सापेक्षत्वात्प्रतिसंबंधं निर्दिशति यस्येत्याह ॥ कस्येति ॥ या ब्रह्मज्ञानस्य परा निष्ठा सा प्रकृतस्य ज्ञानस्य निष्ठेत्याह ॥ ब्रह्मेति ॥ तस्य परा निष्ठा न प्रसिद्धेति कृत्वा साधनानुष्ठानाधीनतया साध्येति मत्वा पृच्छति ॥ कीदृशीति ॥ प्रसिद्धमात्मज्ञानमनुरुध्य ब्रह्मज्ञाननिष्ठासु ज्ञानेत्याह ॥ यादृशंइति ॥ तत्रापि प्रसिद्धिअप्रसिद्धेति शंकते ॥ कीदृगिति ॥ अर्थे नैव विशेषो हीति न्यायेनोत्तरमाह ॥ यादृशइति तस्मिन्नपि विप्रतिपत्तेरप्रसिद्धिमभिसंधाय पृच्छति ॥ कीदृशइति ॥ भगवद्वाक्यान्युपनिषद्वाक्यानि चाश्रित्य परिहरति ॥ यादृशइति

कस्य ब्रह्मज्ञानस्य या परा परिसमाप्तिः कीदृशी सा यादृशआत्मज्ञानं कीदृक्तत् यादृशआत्मा कीदृशोऽसौ यादृशो भगवतोक्तः उपनिषद्वाक्यैश्चन्यायतश्च ननु विषयाकारं ज्ञानं न विषयो नाप्याकारवानात्मेष्यते क्वचित् ॥ नन्वादित्यवर्णं भारूपं स्वयंज्योतिरित्याकारवत्त्वमात्मनः श्रूयते न तमोरूपप्रतिषेधार्थत्वात्तेषां वाक्यानां द्रव्यगुणाद्याकारप्रतिषेधे आत्मनस्तमोरूपत्वे प्राप्ते तत्प्रतिषेधार्थान्यादित्यवर्णमित्यादिवाक्यानि अरूपमिति चाविशेषतो रूपप्रतिषेधादविषयत्वाच्च ॥ श्रीरामचंद्रायनमः ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ ॥

न जायते म्रियते वेत्यादीनि वाक्यानि कूटस्थत्वमसंगत्वमित्यादिन्यायः ज्ञानस्य विषयाकारत्वादात्मनश्चाविषयत्वादनाकारत्वाच्च तदाकारज्ञानायोगादात्मप्रसिद्धावपि नात्मज्ञानप्रसिद्धिरिति शंकते ॥ नन्विति ॥ आकारवत्वमात्मनः श्रुतिसिद्धमिति सिद्धांती चोदयति ॥ नन्वादित्येति ॥ उक्तवाक्यानामन्यार्थत्वदर्शनेन पूर्ववादी परिहरति ॥ नेत्यादिना ॥ संग्रहवाक्यं प्रपंचयति द्रव्येति ॥ इतश्चाकारवत्वमात्मनो नास्तीत्याह ॥ अरूपमिति ॥ यदात्मनो विषयत्वाभावात्तद्विषयं ज्ञानं न संभवतीत्युक्तं तदुप

चरणयति ॥ तिविषयत्वेक्ति ॥

आत्मनोऽविषयत्वेऽश्रुतिमुदाहरति । नेत्यादिना । संदृशे सम्यग्दर्शनविषयत्वायास्यात्मनो रूपं न तिष्ठतीत्यर्थः । तदेव करणागो
चरत्वेनोपपादयति । नेति । शब्दादिशून्यत्वाच्चात्मा विषयो न भवतीत्याह । अशब्दमिति । आत्मनो विषयत्वाकारवत्वयोरभावे फ
लितमाह । तस्मादिति । ज्ञानस्यात्माकारत्वाभावे सत्यात्मज्ञानमिति व्यपदेशासिद्धिरित्येकदेशी शंकते । कथं तर्हीति । कत्रा
नुपपत्तिरित्याशंक्याह । सर्वं हीति । आत्मनोऽपि तर्हि विषयत्वेन ज्ञानस्य तदाकारवत्वं स्यादित्याशंक्याह । निराकारश्चेति । आ

नसंदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं । अशब्दमस्पर्शमित्याद्यैस्तस्मादात्माका
रं ज्ञानमित्यनुपपन्नं कथं तर्ह्यात्मज्ञानं सर्वं हि यद्विषयं ज्ञानं तत्तदाकारं भवति । निराकारश्चा
त्मेत्युक्तं ज्ञानात्मनोश्चोभयोर्निराकारत्वे कथं तद्भावनानिष्ठेति । नात्यंतनिर्मलत्वस्वच्छत्वसू
क्ष्मत्वोपपत्तेरात्मनो बुद्धेश्चात्मसमनैर्मल्याद्युपपत्तेरात्मचैतन्याकाराभासत्वोपपत्तिर्बु
द्ध्याभासं मनस्तदाभासानींद्रियाणींद्रियाभासश्च देहो । श्रीसीतारामचंद्राय नमः ॥

त्मनो विषयत्वराहित्यं नकारार्थः । आत्मवत्तत् ज्ञानस्यापि तर्हि निराकारत्वं भविष्यतीत्याह । ज्ञानेति । तच्छब्देनात्म
ज्ञानं गृह्यते तस्य भावना पौनःपुन्येनानुसंधानं तस्य निष्ठा समाप्तिरात्मनि साक्षात्कारदार्ढ्यं न चैतत्सर्वमात्मनो ज्ञान
स्य वाऽनाकारत्वे सिद्ध्यतीत्यर्थः । ज्ञानात्मनोः साम्योपन्यासेन सिद्धांती समाधत्ते नेत्यादिना । श्रीसीतारामाय नमः ॥

यथोक्तसाम्यानुसारादात्मचैतन्याभासव्याप्ताज्ञानपरिणामवती बुद्धिः साभासबुद्धिव्याप्तं मनः साभासमनोव्याप्तानींद्रिया
णि साभासेंद्रियव्याप्तः स्थूलो देहस्तत्र लौकिकभ्रांतिं प्रमाणयति ॥ अत इति ॥ आत्मदृष्टेर्देहमात्रे दृष्टत्वात्तत्र चैतन्याभास
व्याप्तिरिंद्रियद्वारा कल्प्यते ॥ इंद्रियेषु च तत्तद्दृष्टिदर्शनाच्चैतन्याभासवत्वं मनोद्वारा सिद्ध्यति ॥ मनसि चात्मदृष्टेश्चैतन्या
भासवत्वं बुद्धिद्वारा लभ्यते बुद्धौ चात्मदृष्टेरज्ञानद्वारा चैतन्याभाससिद्धिरित्यर्थः ॥ देहे लौकिकमात्मदर्शनं न्यायाभावादु

ऽतो लौकिकैर्देहमात्र एवात्मदृष्टिः क्रियते देहचैतन्यवादिनश्च लौकायतिकाश्चैतन्यविशिष्टः कायः पुरु
षइत्याहुः तथान्ये इंद्रियचैतन्यवादिनोऽन्ये मनश्चैतन्यवादिनोऽन्ये बुद्धिचैतन्यवादिनः ॥ ततोप्यंतरम
व्याकृताख्यमविद्यावस्थमात्मत्वेन प्रतिपन्नाः केचित्प्रकृतिवादिनः ॥ सर्वत्र हि बुद्ध्यादिदेहांतेषु आ
त्मचैतन्याभासता आत्मभ्रांतिकारणमित्यत आत्मविषयं ज्ञानं न विधातव्यं ॥ श्रीरामायनमः ॥ ॥

पेक्षितमित्याशंक्याह देहेति ॥ तथापि कथमिंद्रियाणां न्यायहीनमात्मत्वमित्याशंक्याह ॥ तथेति ॥ तथापि मनसो यदात्म
त्वं तन्न्यायशून्यमित्याशंक्याह ॥ अन्य इति ॥ बुद्धेरात्मत्वमपि न्यायोपेतमिति सूचयति ॥ अन्ये बुद्धीति ॥ देहादौ बुद्ध्यंते परमात्म
त्वबुद्धिर्नान्यत्रेति तन्नियमं वारयति ॥ ततोपीति ॥ तत्र हि साभासें तर्यामिणि कारणोपासकानामात्मधीरस्तीत्यर्थः ॥ बुद्ध्यादौ देहांते
लौकिकपरीक्षकाणामात्मत्वभ्रांतौ साधारणं कारणमाह ॥ सर्वत्रेति ॥ आत्मज्ञानस्य लौकिकपरीक्षकप्रसिद्धत्वादेव विधिवि

कथमपिदेहंकर्मभिःसादइस्ततइति ॥

ज्ञानस्यविधेयत्वाभावेकिंकर्त्तव्यंद्रष्टव्यादिवाक्यैरित्याशंक्याह ॥ किंतर्हीति ॥ आत्मज्ञानस्याविधेयत्वेप्रागुक्तमतःशब्दितं
हेतुंविवृणोति ॥ अविद्येति ॥ देहेंद्रियमनोबुद्ध्यव्यक्तैरुपलभ्यमानैःसहोपलभ्यतेचेतन्यंनान्यथातेषामुपलंभोऽजडत्वादि
त्यत्रविज्ञानवादिभ्रांतिंप्रमाणयति ॥ अतएवेति ॥ सर्वज्ञेयंज्ञानव्याप्तमेवज्ञायते ॥ तेनज्ञानातिरिक्तंनास्त्येववस्तुसंमतंहि
स्वप्नदृष्टंवस्तुज्ञानातिरिक्तंनास्तीति ॥ तेभ्रामयंतीत्यर्थः ॥ ज्ञानस्यापिज्ञेयत्वात्तुज्ञानवत्त्वंतरमेष्टव्यमित्याशंक्याह

किंतर्हिनामरूपाद्यनात्माध्यारोपणनिवृत्तिरेवकार्यानात्मचैतन्यविज्ञानं ॥ अविद्याध्यारोपितसर्वपदार्थाकारै
रेवविशिष्टतयागृह्यमाणत्वादतएवविज्ञानवादिनोबौद्धाविज्ञानव्यतिरिक्तंवस्त्वेवनास्तीतिप्रतिपन्नाःप्रमा
णांतरनिरपेक्षतांचस्वसंवेद्यत्वाभ्युपगमेन ॥ तस्मादविद्याध्यारोपणनिराकरणमात्रंब्रह्मणिकर्त्तव्यंनतु
ब्रह्मविज्ञानेयत्नोत्यंतप्रसिद्धत्वादविद्याकल्पितनामरूपविशेषाकारापहृतबुद्धित्वादत्यंतप्रसिद्धंसुविज्ञे
यमासन्नतरमात्मतत्वमप्यप्रसिद्धंदुर्विज्ञेयमतिदूरमन्यदिवचप्रतिभाति ॥ अविवेकिनां ॥ ॥

प्रमाणांतरेति ॥ ज्ञानस्यस्वेनैवज्ञेयत्वोपगमेनातिरिक्तप्रमापकनिरपेक्षतांचप्रतिपन्नाइतिसंबंधः ॥ ब्रह्मात्मनिज्ञा
नस्यसिद्धत्वेनाविधेयत्वेफलितमाह ॥ तस्मादिति ॥ यत्नोर्थभावनाब्रह्मणस्तत्तुज्ञानस्यचात्यंतप्रसिद्धत्वेकथंब्रह्मण्यन्यथा
प्रथालौकिकानामित्याशंक्याह ॥ अविद्येति ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ 1

यथाप्रतिभासं दुर्विज्ञेयत्वादिरूपमेव ब्रह्म किं न स्यादित्याशंक्याह । बाह्येति गुरुप्रसादः शुश्रूषया तोषितबुद्धेराचार्यस्य क
रुणातिरेकाद्येषतत्त्वं बुध्यतामिति निरवग्रहोऽनुग्रहः ॥ आत्मप्रसादस्त्वधिगतपदशक्तिवाक्यतात्पर्यश्रोतयुक्त्यनुसंधानादा
त्मनो मनसो विषयव्यावृत्तप्रत्यगेकाग्रतया प्रावण्यमिति विवेकः । आत्मज्ञानस्यात्मद्वारा प्रसिद्धत्वेवाक्योपक्रमं प्रमाण
यति । तथा चेति । आत्मनो निराकारत्वात्तस्मिन् बुद्धेरप्रवृत्तेः सम्यग्ज्ञाननिष्ठासुसंपाद्या नेति मतमुत्थापयति । केचित्त्वि

बाह्याकारनिवृत्तबुद्धीनां तु लब्धगुर्वात्मप्रसादानां नातः परं सुखं सुप्रसिद्धं सुविज्ञेयं सुतरां आसन्नतरमस्ति
तथा चोक्तं प्रत्यक्षावगमं धर्म्यमित्यादि केचित्तु पंडितंमन्या निराकारत्वादात्मवस्तुनोऽपैति बुद्धिरतो दुःसाध्या
सम्यग्ज्ञाननिष्ठेत्याहुः सत्यमेवं गुरुसंप्रदायरहितानामश्रुतवेदांतानामत्यंतबहिर्विषयासक्तबुद्धीनां स॥
म्यक्प्रमाणेष्वकृतश्रमाणां तद्विपरीतानां तु लौकिकग्राह्यग्राहकद्वैतवस्तुनि सत्त्वबुद्धिर्नितरां दुःसंपाद्या
त्मचैतन्यव्यतिरेकेण वस्त्वंतरस्यानुपलब्धेर्यथा चैतदेवमेव नान्यथेत्यवोचाम ॥ श्रीरामचंद्राय नमः ॥ ॥

ति ॥ बहिर्मुखानामंतर्मुखानां वा ब्रह्मणि सम्यग्ज्ञाननिष्ठा दुःसाध्येति विकल्प्याद्यमंगीकरोति । सत्यमिति । पूर्वपूर्व
विशेषणमुत्तरविशेषणहेतुत्वेन योजनीयं द्वितीयं दूषयति । तद्विपरीतानामिति । अंतर्निष्ठानां द्वैतविषये सम्यग्बु॥
द्धेरतिशयेन दुःसंपाद्यत्वे हेतुमाह । आत्मेति तद्व्यतिरेकेण वस्त्वंतरस्यासत्त्वं कथमित्याशंक्याह । यथा चेति । अद्वैतमे॥
व वस्तु द्वैतं त्वाविद्यं नान्यथा तात्त्विकमित्येतदेवमेव यथा स्यात्तथोक्तवंतो वयं यत्र तत्राध्यायेष्विति योजना ॥ ॥ ॥

अंतर्निष्ठानामद्वैतबुद्धीनां द्वैतेनास्ति सद्बुद्धिरित्यत्र भगवतोपि संमतिमाह। उक्तं चेति। परमतं निराकृत्य प्रकृतमुपसंहरन्नात्म
नो निराकारत्वे ज्ञानस्य तदालंबनत्वे किं कारणमित्याशंक्याह। तस्मादिति। नन्वात्मा कथंचित् ज्ञानक्रियाव्याप्यश्चेत्तस्य हेयादे
यान्यतरकोटिनिवेशः स्यात् स्वर्गादिवत् क्रियासाध्यत्वेनासिद्धत्वं नेत्याह। नहीति। आत्मत्वादेव प्रसिद्धत्वेन प्राप्तत्वादनात्म
वत्तस्य हेयादेयत्वायोगान्न क्रियासाध्यतेत्यर्थः। आत्मनश्चेदते क्रियामसिद्धत्वं तदा सर्वप्रवृत्तीनामभ्युदयनिःश्रेयसार्था
नामात्मार्थत्वायोगादर्थिनोऽभावे स्वार्थत्वं अप्रामाणिकं स्यादित्याह। अप्रसिद्धेरिति। ननु प्रवृत्तीनां स्वार्थत्वं देहादीनामन्य

उक्तं च भगवता यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरिति तस्माद्ग्राह्याकारभेदबुद्धिनिवृत्तिरेवात्मस्वरूपालंब
ने कारणं न ह्यात्मानामकस्य चित्कदाचिदप्रसिद्धः प्राप्यो हेय उपादेयो वाऽप्रसिद्धे हि तस्मिन्नात्मनि स्वार्थाः सर्वाः प्र
वृत्तयः व्यर्थाः प्रसज्येरन्न च देहाद्यचेतनार्थत्वं शक्यं कल्पयितुं न च सुखार्थं सुखं दुःखार्थं वा दुःखमात्मावगत्यवसा
नार्थत्वाच्च सर्वव्यवहारस्य तस्माद्यथा स्वदेहस्य परिच्छेदाय न प्रमाणांतरापेक्षा ततोऽप्यात्मनोऽन्तरतरत्वात्तदवग
तिं प्रति न प्रमाणांतराऽपेक्षेति

तमस्यार्थित्वेन तादर्थ्यादित्याशंक्य घटादिवदचेतनस्यानर्थित्वान्नैवमित्याह। न चेति
ननु प्रवृत्तीनां फलावसायितया सुखदुःखयोरन्यतरार्थत्वान्न स्वार्थत्वं तत्राह। न चेति। प्रवृत्तीनां सुखदुःखार्थत्वेपि तयोः
स्वार्थत्वासिद्धेरर्थित्वेनात्मासिद्ध्यतीत्यर्थः। किंच सर्वापेक्षान्यायादात्मावगत्यवसानः सर्वो व्यवहारो न चात्मन्यप्रसिद्धेय
ज्ञादिव्यवहारस्य तत् ज्ञानार्थत्वं तेनात्मप्रसिद्धिरेष्टव्येत्याह। आत्मेति। नन्वात्माप्रसिद्धोपि प्रमाणद्वारा प्रसिद्ध्यतीति यत् सि
द्ध्यति तत् प्रमाणादेवेति न्यायात्तत्राह। तस्मादिति। मानमेयादिसर्वव्यवहारस्यात्मावगत्यंतत्वोपगमात्। प्रागेव प्रमाणप्रवृ

आत्मावगतेरेव स्वाभाविकत्वे विवेकवतामारोपनिवृत्त्या ज्ञाननिष्ठा सुप्रसिद्धेत्युपसंहरति। आत्मेति। नन्वनाकारमेवानुमिमीमहे बुद्धिमिति वदतामनाकारमप्रत्यक्षमिच्छतां प्रागर्थावगतेरप्रसिद्धमेव ज्ञानं नेत्याह। येषामिति। सुखादिवन्नित्यानुभवगम्यं ज्ञानं नानुमेयं विषयावगत्यात्तदनुमितावितरेतराश्रयादिति भावः। इतश्च ज्ञानं प्रसिद्धमन्यथा तत्र जिज्ञासाप्रसंगान्न च ज्ञाने जिज्ञासा प्रसिद्धाप्रसिद्धे च तदयोगादित्याह। जिज्ञासेति। तदेव प्रपंचयति। अप्रसिद्धं चेदिति। दृष्टांतमेव व्याचष्टे। यथेति।

आत्मज्ञाननिष्ठा विवेकिनां सुप्रसिद्धेति सिद्धं येषामपि निराकारं ज्ञानमप्रत्यक्षं तेषामपि ज्ञानवशेनैव ज्ञेयावगतिरिति ज्ञानमत्यंतप्रसिद्धं सुखादिवदेवाभ्युपगंतव्यं जिज्ञासानुपपत्तेश्चाप्रसिद्धं चेत्ज्ञानं ज्ञेयवज्जिज्ञास्येत्‌ यथा ज्ञेयं घटादिलक्षणं ज्ञानेन ज्ञाता व्याप्तुमिच्छति। तथा ज्ञानमपि ज्ञानांतरेण ज्ञाता व्याप्तुमिच्छेत्। न चैतदस्त्यतोऽत्यंतप्रसिद्धं ज्ञानं ज्ञाताप्यत एव प्रसिद्ध इति॥ तस्माज्ज्ञाने यत्नो न कर्त्तव्यः॥ किंत्वनात्मबुद्धिनिवृत्तावेव तस्मात्ज्ञाननिष्ठा सुसंपाद्या॥ ५०॥ श्रीरामायनमः

दार्ष्टांतिकं विवृणोति। तथेति। इष्टापत्तिं निराचष्टे। न चेति। ज्ञानस्य ज्ञानांतरेण ज्ञेयत्वमेतच्छब्दार्थः। अनवस्थापत्तेरित्यर्थः। ज्ञाने जिज्ञासानुपपत्तौ फलितमाह। अत इति। प्रसिद्धेपि ज्ञाने ज्ञाने ज्ञातर्यात्मनि किमायातं तदाह। ज्ञातापीति। ज्ञानस्य विना ज्ञातारमपर्यवसानादित्यर्थः। ज्ञानस्य प्रसिद्धत्वे तत्र भावनापर्यायो विधिर्नास्तीत्याह। तस्मादिति। कुत्र तर्हि प्रयत्नाख्या भावनेत्याशंक्याह। किंत्विति। अविषये निराकारे स्वात्मनि ज्ञाननिष्ठायाः दुःसंपाद्यत्वाऽभावे फलितं निगमय

ब्रह्मज्ञानस्य परां निष्ठां प्रतिष्ठापितामनूद्य श्लोकांतरमवतारयितुं पृच्छति सेयमिति सेयं ब्रह्मज्ञानस्य परा निष्ठा समा
रोपिताः तद्धर्मे निवृत्तिद्वारा ब्रह्मणि परिसमाप्तिर्ज्ञानसंतानरूपोच्यते। साकार्या सुसंपाद्येति यदुक्तं तत्कथं केनोपायेने
तिप्रश्नार्थः पृष्टोपायभेदमुदाहरति बुध्येति अध्यवसायो ब्रह्मात्मत्वनिश्चयः मायारहितत्वं संशयविपर्ययशून्यत्वं

सेयं ज्ञानस्य परा निष्ठोच्यते कथं कार्येति बुद्ध्याध्यवसायात्मिकया विशुद्धया मायारहितया यु
क्तः संपन्नो धृत्या धैर्येणात्मानं कार्यकारणसंघातं नियम्य च नियमनं कृत्वा वशीकृत्य शब्दादी

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ॥ शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥५१॥

न् शब्दः आदिर्येषां तान् विषयांस्त्यक्त्वा सामर्थ्यात् शरीरस्थितिमात्रान् केवलान् मुक्त्वा ततोधि
कान् सुखार्थांस्त्यक्त्वा इत्यर्थः ॥ शरीरस्थित्यर्थत्वेन प्राप्तेषु रागद्वेषौ व्युदस्य च परित्यज्य ॥५१॥

शब्दादिसमस्तविषयत्यागे देहस्थितिरपि दुःस्थास्यादित्याशंक्याह सामर्थ्यादिति ॥ विषयमात्रत्यागे देहस्थित्यनुप
पत्तेर्ज्ञाननिष्ठासिद्धिप्रसंगादित्यर्थः ॥ देहस्थित्यर्थत्वेनानुज्ञातेष्वर्थेषु प्राप्तं रागादि ज्ञाननिष्ठाप्रतिबंधकं प्रव्युदस्यति
शरीरेति ॥ परित्यज्य विविक्तसेवी स्यादिति संबंधः ॥५१॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीरामचंद्राय नमः ॥ श्री ॥

बुद्धेर्वैशारद्यपत्वेन कार्यकरणनियमनं देहस्थितिहेत्वतिरिक्तविषयत्यागो देहस्थित्यर्थेष्वपि तेषु रागद्वेषवर्जनमिति उपायभेदे सिद्धे सत्युपायांतराण्यपि यत्नसाध्यानीत्याह ततइति चित्तैकाग्र्यप्रसादार्थं विविक्तसेवित्वं व्याकरोति अरण्येति निद्रादिदोषनिवृत्त्यर्थं लघ्वाशित्वं विशदयति लघ्वेति लघुपरिमितं हितं मेध्यं चाशितुं शीलमस्येति तयोश्चतैर्विशेषणयोस्तात्पर्यं विवृणोति विविक्तेति निद्रादीत्यादिशब्दादालस्यप्रमादादयो बुद्धिविक्षेपका विवक्षिताः वक्ष्यमाणयोर्ध्यान

ततः विविक्तसेवी अरण्यगिरिगुहादीन्विविक्तान्देशान्सेवितुं शीलमस्येति विविक्तसेवी लघ्वाशी लघ्वशनशीलः विविक्तसेवी लघ्वाशीनयोर्निद्रादिदोषनिवर्त्तकत्वेन चित्तप्रसादहेतुत्वात्तद्ग्रहणं यतवाक्कायमानसो वाक्च कायश्च मानसं च यतानि संयतानि यस्य ज्ञाननिष्ठस्य सज्ञाननिष्ठो यतिर्यतवाक्कायमानसः स्यात॥

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥५२॥

एवमुपरतसर्वकरणः सन्ध्यानयोगपरो ध्यानमात्मस्वरूपचिंतनं योग आत्मस्वरूपविषय एवैकाग्रीकरणं तौ ध्यानयोगौ परत्वेन कर्त्तव्यौ यस्य स ध्यानयोगपरो नित्यं नित्यग्रहणं मंत्रजपाद्यन्यकर्त्तव्यताऽभावप्रदर्शनार्थं वैराग्यं विरागभावो दृष्टादृष्टेषु विषयेषु वैतृष्ण्यं समुपाश्रितः सम्यगुपाश्रितो नित्यमेवेत्यर्थः॥५२॥

योगयोरुपायत्वेन विशेषणांतरं विभजते वाक्केति वागादिसंयमस्यावश्यकत्वद्योतनार्थं स्यादित्युक्तं संयतवागादिकरणग्रामस्यानायासेन कर्त्तव्यमुपदिशति एवमिति मंत्रजपादीत्यादिशब्देन प्रदक्षिणाप्रणामादयो योगप्रतिबंधका गृहीताः उक्तयोर्ध्यानयोगयोरुपायत्वेनोक्तं विरागभावं विभजते दृष्टेति सम्यक्त्वमेव व्यनक्ति नित्यमिति॥५२॥

ज्ञाननिष्ठस्ययतेर्विशेषणांतरंसमुच्चिनोति ॥ किंचेति ॥ नित्यंध्यानयोगपरत्वेसमुच्चितंकारणांतरंविवृणोति ॥ अहंकरणमिति
सामर्थ्यमात्रेबलशब्दादुपलभ्यमानेकिमितिविशेषवचनमित्याशंक्याह् ॥ स्वाभाविकत्वेनेति ॥ उक्तेर्थेप्रमाणमाह् ॥ ह
ष्टमिति ॥ वैराग्यशब्देनलब्धस्यापिकामत्यागस्यपुनर्वचनंप्रकृष्टत्वख्यापनार्थंअहंकारादित्यागेपरिग्रहप्राप्त्यभावा

किंच अहंकारंअहंकरणंअहंकारोदेहेंद्रियादिषुतंबलंसामर्थ्यंकामरागादियुक्तंनेतरच्छारीरादि
सामर्थ्यंस्वाभाविकत्वेनत्यागस्याशक्यत्वात्तुदर्पोहर्षानंतरभावीधर्मातिक्रमहेतुर्हृष्टोदृप्यतिदृप्तो
धर्ममतिक्रामतीतिस्मरणात्तंचकाममिच्छांक्रोधंद्वेषंपरिग्रहंइंद्रियमनोगतदोषपरित्यागेपिशारी

अहंकारंबलंदर्पंकामंक्रोधंपरिग्रहं ॥ विमुच्यनिर्ममःशांतोब्रह्मभूयायकल्पते ॥ ५३ ॥

रधारणप्रसंगेनधर्मानुष्ठाननिमित्तेनवाबाह्यःपरिग्रहःप्राप्तस्तंविमुच्यपरित्यज्यपरमहंसपरि
व्राजकोभूत्वादेहजीवनमात्रेपिनिर्गतममभावोनिर्ममोऽतएवशांतउपरतहर्षायासोयतिर्ज्ञा
ननिष्ठोब्रह्मभूयायब्रह्मभावायकल्पतेसमर्थोभवति ॥ ५३ ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीः

त्त्यागोक्तिरयुक्तेत्याशंक्याह् ॥ इंद्रियेति ॥ परिग्रहाभावेममत्वविषयाभावान्निर्ममत्वंकथमित्याशंक्याह् ॥ देहेति ॥ अहंकार
ममकाराभावेप्राप्तामंतःकरणोपरतिमनुवदति ॥ अतएवेति ॥ उक्तमनूद्यजीवन्नेवासौब्रह्मीभवतीतिफलितमाह् ॥ समर्थ
इति ॥ ज्ञाननिष्ठपदार्थूर्द्धसशब्दोद्रष्टव्यःब्रह्मणोभावनमनुसंधानपरिपाकपर्यंतंसाक्षात्करणंतदर्थमितियावत् ॥ ५३ ॥

अपेक्षितं पूरयन्नुत्तरश्लोकमवतारयति ॥ अनेनेति ॥ बुद्ध्या विशुद्धयेत्यादिरत्र क्रमः ब्रह्मप्राप्तो जीवन्नेव निवृत्ताशेषानर्थो निरतिशयानंदं ब्रह्मात्मत्वेनानुभवतीत्यर्थः ॥ अध्यात्मं प्रत्यगात्मा तस्मिन्प्रसादः सर्वानर्थनिवृत्त्या परमानंदाविर्भावः स लब्धो येन जीवन्मुक्तेन स तथा ॥ न शोचतीत्यादौ तात्पर्यमाह ॥ ब्रह्मभूतस्येति ॥ प्राप्तव्यपरिहार्याभावनिश्चयादित्यर्थः स्वभावानुवादमुपपादयति ॥ नहीति ॥ तस्याप्राप्तविषयाभावात् नापि परिहार्यापरिहारप्रयुक्तः शोकः परिहार्यस्यैवाभावादित्यर्थः

अनेन क्रमेण ब्रह्मभूतो ब्रह्मप्राप्तः प्रसन्नात्मा लब्धाध्यात्मप्रसादस्वभावो न शोचति किंचिदर्थवैकल्यमात्मनो वा वैगुण्यं चोद्दिश्य न शोचति न संतप्यते न कांक्षति नह्यप्राप्तविषयाकांक्षा ब्रह्मविद उपपद्यते ॥ अतो ब्रह्मभूतस्यायं स्वभावोऽनूद्यते न शोचति न कांक्षतीति न हृष्यतीति वा पाठः समः सर्वेषु भूतेषु आत्मौपम्येन सर्वेषु भूतेषु सर्वं

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ॥ समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ॥ ५४ ॥ ५४ ॥

दुःखं सुखं वा सममेव पश्यतीत्यर्थः ॥ नात्मसमदर्शनमिह तस्य वक्ष्यमाणत्वात् भक्त्या मामभिजानातीति य एवंभूतो ज्ञाननिष्ठो मद्भक्तिं मयि परमेश्वरे भक्तिं भजनं परामुत्तमां ज्ञानलक्षणां चतुर्थीं लभते चतुर्विधा भजंते मा

पाठांतरे तु रमणीयं प्राप्य न प्रमोदते तदभावादित्यर्थः विवक्षितं समदर्शनं विशदयति ॥ आत्मेति ॥ ननु सर्वेषु भूतेष्वात्मनः समस्य निर्विशेषस्य दर्शनमत्राभिप्रेतं किं नेष्यते तत्राह ॥ नात्मेति ॥ उक्तविशेषणवतो जीवन्मुक्तस्य ज्ञाननिष्ठा प्रागुक्तक्रमेण प्राप्ता सुप्रतिष्ठिता भवतीत्याह ॥ य एवंभूत इति ॥ श्रवणमनननिदिध्यासनाभ्यासवतः शमादियुक्तस्याभ्यस्तैः श्रवणादिभिर्ब्रह्मात्मन्यपरोक्षं मोक्षफलं ज्ञानं सिध्यतीत्यर्थः ॥ आर्त्तादिभक्तित्रयापेक्षया ज्ञानलक्षणा भक्तिश्च

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ॥ ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं ॥ ५५

भक्त्या

ननुसमाधिसाध्येनपरमौत्सुक्येनज्ञानेनकिमपूर्वमवाप्यतेतत्राह ॥ततइति ॥भक्त्यासमाधिजन्ययामांब्रह्माभिमुख्येनप्रत्यक्षतया
जानातिव्याप्नोतीत्यर्थः ॥तदेवज्ञानंभक्तिपराधीनंविवृणोति ॥यावानिति ॥आकाशकल्पत्वमनवच्छिन्नत्वमसंगत्वंचचैतन्य
स्वविषयसापेक्षत्वंप्रतिक्षिपति ॥अद्वैतंइति ॥येतुद्रव्यबोधात्मत्वमात्मनोमन्यंतेतान्प्रत्युक्तं ॥मात्रेति ॥आत्मनितन्मात्रेतिध

ततोज्ञानलक्षणयाभक्त्यामामभिजानातियावानऽहंउपाधिकृतविस्तरभेदोयश्चाहंविध्वस्तसर्वोपाधि
भेदःअभिमतःउत्तमःपुरुषआकाशकल्पस्तंमामद्वैतंचैतन्यमात्रैकरसंअजमजरममरमभयमनिध

भक्त्यामामभिजानातियावान्यश्चास्मितत्वतः ततोमांतत्वतोज्ञात्वाविशतेतदनंतरं ॥५५॥

नंतत्वतोभिजानातिततोमामेवंतत्वतोज्ञात्वाविशतेतदनंतरंमामेवनात्रज्ञानतदनंतरप्रवेशक्रियेभिन्ने
विवक्षितेज्ञात्वाविशतेतदनंतरमितिकिंतर्हिफलांतराभावात्ज्ञानमात्रमेव ॥श्रीकृष्णायनमोनमः ॥

र्मांतरमुपेत्यधर्मंधर्मित्वंप्रत्याह ॥एकरसमिति ॥सर्वविक्रियाराहित्योक्त्याकौटस्थ्यंआत्मनोव्यवस्थापयति ॥अजमिति ॥उक्तवि
क्रियाभावेनद्वैतज्ञानासंबंधंहेतुमाह ॥अभयमिति ॥तत्वज्ञानमनूद्यतत्फलंविदेहकैवल्यंलंभयति ॥ततइति ॥तत्वज्ञानस्यतस्मा
दनंतरंप्रवेशक्रियायाश्चभिन्नत्वंप्राप्तंप्रत्याह ॥मात्रेति ॥भिन्नत्वाभावेकागतिर्भेदोक्तेरित्याशंक्यौपचारिकत्वमाह ॥किंतर्हीति ॥प्रवे

गी॰टी॰प्र॰अ॰

ब्रह्मप्राप्तिरेव फलांतरमित्याशंक्य ब्रह्मात्मनोर्भेदाभावान्न ज्ञानातिरिक्ता तत्प्राप्तिरित्याह। क्षेत्रज्ञं चेति। ज्ञाननिष्ठया परया भ
क्त्या मामभिजानातीत्युक्तमाक्षिपति। नन्विति। विरुद्धत्वं स्फोरयितुं पृच्छति। कथमिति। विरोधस्फुटीकरणं प्रतिजानीते
उच्यत इति। तत्र ज्ञानस्योत्पत्तिरेव विषयाभिप्राप्तिरित्याह। यदेति। एवकारनिरस्यं दर्शयति। न ज्ञानेति। इत्यावयोः सिद्धमिति
शेषः। ज्ञानस्योत्पत्तेरेव विषयाभिव्याप्तित्वेपि कथं प्रकृते विरोधधीरित्याशंक्याह। अतश्चेति। विरुद्धमिति शेषः। शंकितं वि

क्षेत्रज्ञं चापि मां विद्धीत्युक्त्वा ननु विरुद्धमिदमुक्तं ज्ञानस्य या परा निष्ठा तया मामभिजानातीति कथं विरुद्धमिति चे
दुच्यते यदैव यस्मिन्विषये ज्ञानमुत्पद्यते ज्ञातुस्तदैव तं विषयमभिजानातीति विज्ञाते ति न ज्ञाननिष्ठां ज्ञानावृत्तिलक्षणा
मपेक्ष्यत इति अतश्च ज्ञानेन नाभिजानाति किंतु ज्ञानावृत्त्या तु ज्ञाननिष्ठयाभिजानातीति नैष दोषः ज्ञानस्य स्वात्मोत्प
त्तिपरिपाकहेतुयुक्तस्य प्रतिपक्षविहीनस्य यदात्मानुभवनिश्चयावसानत्वं तस्य निष्ठाशब्दाभिलापात् शास्त्रा
चार्योपदेशेन ज्ञानोत्पत्तिपरिपाकहेतुं सहकारिकारणं बुद्धिविशुद्धत्वाद्यमानित्वादिगणं चापेक्ष्य जनितस्य क्षेत्र
ज्ञपरमात्मैकत्वज्ञानस्य कर्त्रादिकारकभेदबुद्धिनिबंधनसर्वकर्मसंन्याससहितस्य स्वात्मानुभवनिश्चयरूपेण यदव
स्थानं सा परा ज्ञाननिष्ठेत्युच्यते

रोधं निरस्यति। नैष इति। उक्तमेव हेतुं प्रपंचयति। शास्त्रेति। यो हि शास्त्रानुमानाचार्यो
पदेशस्तेन ज्ञानोत्पत्तिराचार्यवान्पुरुषो वेदेति श्रुतेस्तस्याश्च परिपाकः संशयादिप्रतिबंधप्रध्वंसस्तत्र हेतुभूतमुपदेशस्यै
व सहकारिकारणं यद्बुद्धिशुद्ध्यादि तदपेक्ष्य तस्मादेवोपदेशात्तज्जनितं यदैक्यज्ञानं तस्य कारकभेदबुद्धिनिबंधनानि यानि स
र्वाणि कर्माणि तेषां संन्यासेन सहितस्य फलरूपेणात्मन्येव सर्वकल्पनारहिते यदवस्थानं सा ज्ञानस्य परा निष्ठेति व्यवह्रियते

यदि यथोक्ता परा ज्ञाननिष्ठा कथं तर्हि सा चतुर्थी भक्तिरित्युक्तेति तत्राह । सेयमिति । यथोक्तया भक्त्या भगवत्तत्त्वज्ञानं सिद्ध
तीत्याह । तयेति । तत्त्वज्ञानफलमाह । तदनंतरमिति । ज्ञाननिष्ठारूपाया भगवद्भक्तेस्तत्त्वज्ञानानतिरेकात्तत्फलस्य चाज्ञा
ननिवृत्तेस्तन्मात्रत्वाद्भेदोक्तेश्चौपचारिकत्वात्प्रकृतं वाक्यमविरुद्धमित्युपसंहरति । अत इति । औपदेशिकेकस्य ज्ञानस्य सर्व
कर्मसंन्याससहितस्य स्वरूपावस्थानात्मकस्य परमपुरुषार्थौपायिकत्वमित्यस्मिन्नर्थे मानमाह । अत्र चेति । तदेव शास्त्र

सेयं ज्ञाननिष्ठा आर्त्तादिभक्तित्रयापेक्षया परा चतुर्थी भक्तिरित्युक्ता तया परया भक्त्या भगवंतं तत्त्वतोऽभिजाना
ति तदनंतरमेव ईश्वरक्षेत्रज्ञभेदबुद्धिरशेषतो निवर्त्तते ऽतो ज्ञाननिष्ठालक्षणया भक्त्या मामभिजानाति । इति
वचनं न विरुध्यते अत्र च सर्वनिवृत्तिविधायि शास्त्रं वेदांतेतिहासपुराणस्मृतिलक्षणमर्थवद्भवति विदित्वा
व्युत्थायाथ भिक्षाचर्यं चरंति । न्यासमेषां तपसामतिरिक्तमाहुः न्यास एवात्यरेचयत् इति संन्यासः कर्मणां न्या
सो वेदानिमं लोकममुं च परित्यज्य त्यज धर्ममधर्मं चेत्यादाविह च दर्शितानि वाक्यानि न च तेषां वाक्यानामा
नर्थक्यं युक्तं न चार्थवादत्वं स्वप्रकरणस्थत्वात् ॥ श्रीरामचंद्राय नमः ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ ॥

मुदाहरति । विदित्वेत्यादिना । दर्शितानि वाक्यानि सर्वकर्माणि मनसेत्यादीनि । नन्वेषां वाक्यानामविवक्षितार्थत्वान्नास्ति
स्वार्थे प्रामाण्यमित्याशंक्याध्ययनविध्युपात्तत्वाद्वेदवाक्यानां तदनुरोधित्वाच्चेतरेषां नैवमित्याह । न चेति । तथापि सोरोदी
दित्यादिवन्न स्वार्थे मानतेत्याशंक्याह । न चार्थवादत्वमिति । श्रीसीतारामचंद्राय नमः । श्रीरामकृष्णाय नमः । श्रीरामाय नमः

द्वतश्च मुमुक्षोरपेक्षितमोक्षौपयिकज्ञाननिष्ठस्य संन्यासेऽधिकारेण कर्मनिष्ठायामित्याह प्रत्यगिति ज्ञाननिष्ठस्य कर्मनिष्ठावि
रुद्धेत्यत्र दृष्टांतमाह नहीति ज्ञाननिष्ठास्वरूपानुवादपूर्वकं कर्मनिष्ठया तस्याः सहभावित्वं विरुद्धमिति दार्ष्टांतिकमाह प्रत्य
गात्मेति कथं ज्ञानकर्मणोर्विरोधधीरित्याशंक्य कर्मणां ज्ञाननिवर्त्यत्वस्य श्रुतिस्मृतिसिद्धत्वादित्याह पर्वतेति अंतरवानु
भयोरेकधर्मिनिष्ठत्वेन सांकर्याभावसंपादकभेदवानित्यर्थः॥ ज्ञानकर्मणोरसमुच्चये फलितमुपसंहरति तस्मादिति त

स्मात्प्रत्यगात्माविक्रियस्वरूपनिष्ठत्वाच्च मोक्षस्य नहि पूर्वसमुद्रं जिगमिषोः प्रातिलोम्येन प्र
त्यक्समुद्रं जिगमिषुणा समानमार्गत्वं संभवति प्रत्यगात्मविषयप्रत्ययसंतानकरणा
भिनिवेशश्च ज्ञाननिष्ठा सा च प्रत्यक्समुद्रगमनवत्कर्मणा सहभावित्वेन विरुध्यते प
र्वतसर्षपयोरिवांतरवान्विरोधः प्रमाणविदां निश्चितस्तस्मात्सर्वकर्मसंन्यासेनैव ज्ञाननि
ष्ठा कार्येति सिद्धं स्वकर्मणा भगवतोऽभ्यर्चनभक्तियोगोस्तियस्य सिद्धिप्राप्तिः फलं ज्ञाननिष्ठा
योग्यता यन्निमित्ता च ज्ञाननिष्ठा मोक्षफलावसाना ॥५५॥ श्रीसीतारामचंद्राय नमः॥ ॥

र्हि ज्ञाननिष्ठयैव मोक्षसंभवात्स्वकर्मानुष्ठानसिद्धिरित्याशंक्याह स्वकर्मणेति तामेव सिद्धिप्राप्तिं विशिनष्टि ज्ञानेति ज्ञा
ननिष्ठायोग्यतायै स्वकर्मानुष्ठानं भगवदर्चनरूपं कर्त्तव्यमित्यर्थः ज्ञाननिष्ठायोग्यतापि किमर्थेत्याशंक्य ज्ञाननिष्ठासिद्ध्य
र्थेत्याह यन्निमित्तेति ज्ञाननिष्ठापि कुत्रोपयुक्तेत्याशंक्याह मोक्षेति ॥५५॥ श्रीरामचंद्राय नमः॥ श्रीरामचंद्राय नमः॥

स्वकर्मणा भगवदर्चनात्मनो भक्तियोगस्य परंपरया मोक्षफलस्य कार्यत्वेन विधेयत्वे विध्यपेक्षितां स्तुतिमवतारयति सभगव
दिति ज्ञाननिष्ठा कर्मनिष्ठे त्युभयं प्रतिज्ञायत त्रतत्रविभागेन प्रतिपादितं किमितीदानीं कर्मनिष्ठा पुनः स्तुत्या कर्तव्यत्वेनोच्यते
तत्राह शास्त्रार्थेति तत्रतत्रोक्तस्यैव कर्मानुष्ठानस्य प्रकरणवशादिहोपसंहारः सच शास्त्रार्थनिश्चयस्य दृढतां द्योतयतीत्यर्थः
यद्यपि कस्यचित्कर्मानुष्ठायिनो बुद्धिशुद्धिद्वारा कैवल्यं सिध्यति तथापि पापबाहुल्यात्कर्मानुष्ठायिनोपि कस्यचित् बुद्धिशुद्ध्य
भावेन कैवल्यासिद्धिरित्याशंक्याह सर्वकर्माणीति सर्वशब्दानुरोधादीश्वराराधनस्तुतिपरत्वेन श्लोकं व्याचष्टे प्रतिषिद्धान्य

सभगवद्भक्तियोगोऽधुनास्तूयते शास्त्रार्थोपसंहारप्रकरणे शास्त्रार्थनिश्चयदार्ढ्याय॥
सर्वकर्माणि प्रतिषिद्धान्यपि सदाकुर्वाणोनुतिष्ठन् मद्व्यपाश्रयोहं वासुदेव ईश्वरो व्यपा

सर्वकर्माण्यपि सदाकुर्वाणो मद्व्यपाश्रयः मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं॥५६॥

श्रयो यस्य स मद्व्यपाश्रयो मय्यर्पितसर्वात्मभाव इत्यर्थः सोपि ममेश्वरस्य प्रसादात्
अवाप्नोति शाश्वतं परं नित्यं वैष्णवं पदमव्ययं॥५६॥ श्रीसीतारामचंद्राय नमः॥ श्रीः॥

पीति॥ नित्यनैमित्तिकवदित्यपेरर्थः निषिद्धाचरणस्य प्रामाणिकत्वं व्यावर्त्तयति सदेति॥ अनुतिष्ठन्वैष्णवं पदमवाप्नो
तीति संबंधः पापकर्मकारिणो यथोक्तफलप्राप्तौ पापस्यापि मोक्षफलत्वमुपगंतव्यं स्यादित्याशंक्याह मद्व्यपाश्रय
इति तस्यैव तात्पर्यमाह मयीति तर्हि ज्ञानस्य मोक्षहेतुत्वमुपेक्षितमित्याशंक्याह॥ सोपीति प्रसादोनुग्रहः सम्यग्ज्ञानो
दयः परं पदनीयमुपनिषज्जात्पर्यगम्यं अव्ययमपक्षयरहितं॥५६॥ श्रीसीतारामचंद्राय नमः॥ श्रीरामकृष्णाय नमः॥

परमेश्वरप्रसादस्यैवंमाहात्म्यं यतः सिद्धमतस्तत्प्रसादार्थं भवता प्रयतितव्यमित्याह यस्मादिति भगवत्प्रसादात्प्रसादितसम्य
ग्ज्ञानादेवमुक्तिर्नकर्ममात्रादिति ज्ञानं विवेकबुद्धिः आश्रयशब्दार्थमाह अनन्येति ५७ किमतो भवतीतत्राह मच्चि

यस्मादेवं चेतसा विवेकबुद्ध्या सर्वकर्माणि दृष्टादृष्टार्थानि मयीश्वरे संन्यस्य यत्करोषि यदश्नासीत्युक्तन्या
येन समर्प्य मत्परोहं परो यस्य तव स त्वं मत्परः सन् बुद्धियोगं मयि समाहितबुद्धित्वं बुद्धियोगस्तं बुद्धियोगमु
पाश्रित्याश्रयोनन्यशरणत्वं मच्चित्तो मय्येव चित्तं यस्य तव स त्वं मच्चित्तः सततं सर्वदा भव ५७ मच्चित्तः सर्व
दुर्गाणि दुस्तराणि संसारहेत्वज्ञानादीनि मत्प्रसादात्तरिष्यसि अतिक्रमिष्यसि अथ चेद्यदि त्वं मदुक्तमहंकारा

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः । बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥ म
च्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि । अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ॥ ५८ ॥
यदहंकारमाश्रित्य न योत्स्य इति मन्यसे । मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९ ॥

त्संडितोहमिति न श्रोष्यसि न ग्रहिष्यसि ततस्त्वं विनंक्ष्यसि विनाशं गमिष्यसि ॥ ५८ ॥ इदं च त्वया न मंतव्यं
स्वतंत्रोहं किमर्थं परोक्तं करिष्यामीति यच्चेत्त्वमहंकारमाश्रित्य न योत्स्य इति युद्धं न करिष्यामीति मन्यसे चिंतय
सि निश्चयं करोषि मिथ्यैष व्यवसायो निश्चयस्ते तव यस्मात्प्रकृतिः क्षत्रस्वभावस्त्वां नियोक्ष्यति ॥ ५९ ॥ श्रीः ॥

तइति भीत्यापि प्रवर्त्तत इति मन्वानो विपर्यये दोषमाह ॥ अथ चेदिति ॥ ५८ ॥ स्वातंत्र्ये सति भीतेरवकाशो नास्तीत्याशं
क्याह ॥ इदं चेति ॥ ५९ ॥ श्रीः ॥

ईश्वरः सर्वाणि भूतानि प्रेरयति चेत्तर्हि मम केवलस्यार्थस्यापि पुरुषकारस्यानर्थक्यमित्याशंक्याह तमेवेति सर्वात्मना मनो
वृत्त्या वाचा कर्मणा चेत्यर्थः ईश्वरस्यानुग्रहात्तत्त्वज्ञानोत्पत्तिपर्यन्तादिति शेषः मुक्तास्तिष्ठंत्यस्मिन्निति स्थानं ६२ शास्त्रमुप
संहर्तुमिच्छन्नाह इति ते ज्ञानमिति ज्ञानं करणव्युत्पत्त्या गीताशास्त्रं यथेच्छसि तथा कुरु ज्ञानं कर्म वा यदिष्टं तदनुतिष्ठेत्यर्थः

तमेवेश्वरं शरणमाश्रयं संसारार्त्तिहरणार्थं गच्छ आश्रय सर्वभावेन सर्वात्मना हे भारत ततः तत्प्रसादादीश्वरा
नुग्रहात्परां प्रकृष्टां शांतिं परामुपरतिं स्थानं च मम विष्णोः परमं पदं प्राप्स्यसि शाश्वतं नित्यं ६२ इत्येतत्ते तु
भ्यं ज्ञानमाख्यातं कथितं गुह्यात् गोप्याद्गुह्यतरमतिशयेन गुह्यं रहस्यमित्यर्थः मया सर्वज्ञेनेश्वरेणाथ विचि
मृश्य विमर्शनमालोचनं कृत्वा एतद्यथोक्तं शास्त्रमशेषेण समस्तं यथोक्तं चार्थजातं यथेच्छसि तथा कुरु ६३

तमेव शरणं गच्छ सर्वभावेन भारत तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं ६२ इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ६३ सर्वगुह्यतमं भूयः शृणु मे परमं वचः इष्टोसि मे दृढमिति ततो वक्ष्यामि ते हितं ६४

भूयोपि मयोच्यमानं शृणु सर्वगुह्यतमं सर्वगुह्येभ्योत्यंतगुह्यतमं रहस्यं उक्तमप्यसकृद्भूयः पुनः शृणु मे मम परमं प्रकृ
ष्टं वचो वाक्यं न भयान्नाप्यर्थकारणाद्वा वक्ष्यामि किं तर्हि इष्टः प्रियोसि मे मम दृढं अव्यभिचारेणेति कृत्वा ततस्तेन का
रणेन वक्ष्यामि कथयिष्यामि ते तव हितं परं ज्ञानं ज्ञानप्राप्तिसाधनं तद्धि सर्वहितानां हिततमं ६४ त०

६३ गीताशास्त्रस्य पौर्वापर्येण विमर्शनद्वारा तात्पर्यार्थं प्रतिपत्तुमसमर्थं प्रत्याह भूयोपीति किमर्थं पुनः पुनरभि
दधातीत्याशंक्याह न भयान्नेति हितमिति साधारणनिर्देशे कथं परमित्यादि विशेषणमित्याशंक्याह तद्धीति ६४

शिव
३८१

तदेवप्रश्नद्वाराविवृणोति ॥ किंतदित्यादिना ॥ उत्तरार्द्धंव्याचष्टे तत्रेति ॥ एवमुक्तयारीत्यावर्त्तमानस्त्वंतस्मिन्नेववासुदेवे
भगवत्यर्पितसर्वभावोमामेवागमिष्यसीतिसंबंधः सत्यप्रतिज्ञाकरणेहेतुमाह ॥ यतइति ॥ इदानींवाक्यार्थंश्रेयो

किंतदित्याह ॥ मन्मनाभवमच्चित्तोभवमद्भक्तोभवमद्भजनोभवमद्याजीमद्यजनशीलोभवमांनमस्कुरु
नमस्कारमपिमामेवकुरुतत्रैवंवर्त्तमानोवासुदेवएवसर्वसमर्पितसाध्यसाधनप्रयोजनोमामेवएष्यसि

मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु ॥ मामेवैष्यसिसत्यंतेप्रतिजानेप्रियोसिमे ॥ ६५ ॥

आगमिष्यसिसत्यंतेतवप्रतिजानेसत्यांप्रतिज्ञांकरोम्येतस्मिन्वस्तुनीत्यर्थः ॥ यतःप्रियोसिमेएवंभगवतः
सत्यप्रतिज्ञत्वंबुध्वाभगवद्भक्तेरवश्यंभाविमोक्षफलमवधार्यभगवच्छरणैकपरायणोभवेदितिवाक्यार्थः ॥

र्थिनांप्रत्युपयोगित्वेनसंगृह्णाति ॥ एवमिति ॥ ६५ ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु

इतश्च त्वया युद्धान्न वैमुख्यं कर्त्तुमुचितमित्याह यस्मात्त्वेति स्वभावजेन स्वेन कर्मणा निबद्धस्त्वमिति संबंधः ६० इतोपि त्वया युद्धं कर्त्तव्यमेवेत्याह यस्मादिति अर्जुनशब्दस्योक्तार्थत्वे श्रुतिमुदाहरति अहश्चेति अहश्च कृष्णमहरर्जुनं च विवर्त्तेते रजसी वेद्याभिरित्यत्र किंचिदहस्तावत् कृष्णमस्वच्छं कलुषितमिव लक्ष्यते किंचित्पुनरहरर्जुनमतिस्वच्छं शुद्धस्वभाव

यस्माच्च स्वभावजेन शौर्यादिना यथोक्तेन कौंतेय निबद्धो निश्चयेन बद्धः स्वेनात्मीयेन कर्मणा कर्त्तुं नेच्छसि यत्कर्म मोहाद्विवेकतः करिष्यस्यवशोपि परवश एव तत्कर्म ६० यस्मात् ईश्वर ईशनशीलो नारायणः सर्वभूतानां सर्वप्राणिनां हृद्देशे हृदयदेशेर्जुन शुक्लांतरात्मस्वभावः विशुद्धांतःकरण इति अहश्च कृष्णमहरर्जुनं चेति दर्शनात् तिष्ठ

स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा कर्त्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत् ६० ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ६१ श्री

ति स्थितिं लभते स कथं तिष्ठतीत्याह भ्रामयन् भ्रमणं कारयन् सर्वभूतानि यंत्रारूढानि यंत्राण्यारूढानि अधिष्ठितानीवेतीवशब्दोऽत्र द्रष्टव्यो यथा दारुकृतपुरुषादीनि यंत्रारूढाणि मायावी पुरुषो भ्रामयति तथेश्वरः सर्वभूतानि मायाछद्मना भ्रामयंस्तिष्ठतीति संबंधः ६१

मुपलभ्यते एवमर्जुनशब्दस्य शुक्लशब्दपर्यायतया प्रयोगदर्शनादुक्तार्थत्वमुचितमित्यर्थः यंत्रारूढानीवेति कथमुच्यते तत्राह इवशब्द इति तदेव प्रपंचयति यथेति दारुमयानि यंत्राणि यथा लौकिको मायावी मायया भ्रामयन्वर्त्तते तथा ईश्वरोपि सर्वाणि भूतानि भ्रामयन्नेव हृदये तिष्ठतीत्यर्थः ६१

वृत्तमनद्यानंतरश्लोकतात्पर्यमाह सर्वकर्मयोगेति धर्मविशेषणादधर्मानुज्ञां वारयति ॥ धर्मेति ॥ ज्ञाननिष्ठेन मुमुक्षुणा धर्माधर्मयोस्त्याज्यत्वे श्रुतिस्मृती उदाहरति ॥ नाविरत इति ॥ मामेकमित्यादेस्तात्पर्यार्थमाह ॥ न मत्तोन्यदिति अर्जुनस्य क्षत्रियत्वादुक्तसंन्यासद्वारा ज्ञाननिष्ठायां मुख्यानधिकारेपि तं पुरस्कृत्याधिकारिभ्यस्तस्योपदिष्ट

सर्वकर्मयोगनिष्ठायाः परमरहस्यमीश्वरशरणतामुपसंहृत्याथेदानीं कर्मयोगत्यागनिष्ठाफलं सम्यग्दर्शनं सर्ववेदांतविहितं वक्तव्यमित्याह सर्वधर्मान्सर्वे च ते धर्माश्च सर्वधर्माः धर्मशब्देनात्राधर्मोपि गृह्यते नैःकर्म्यस्य विवक्षितत्वात् नाविरतो दुश्चरितात् हित्वा मुच्यते त्यज धर्ममधर्मं चेत्यादिश्रुतिस्मृतिभ्यः सर्वधर्मान्परित्यज्य संन्यस्य सर्वाणि कर्माणीत्येतत् मामेकं सर्वात्मानं सर्वभूतस्थं ईश्वरमच्युतं गुरुं जरामरण

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥ अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥

वर्जितमीशमहमेवेत्येवमेकं शरणं व्रज न मत्तोन्यदस्तीत्यवधारयेत्यर्थः ॥ अहं त्वा त्वामेवं निश्चितबुद्धिं सर्वपापेभ्यः सर्वधर्माधर्मबंधनरूपेभ्यो मोक्षयिष्यामीति स्वात्मभावप्रकाशीकरणेन उक्तं च नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता इत्यतो मा शुचः शोकं मा कार्षीः ॥ श्रीसीतारामचंद्रजीप्रसंन्नो मस्तु ॥

तत्वादविरोधमभिप्रेत्याह ॥ अहं त्वेति ॥ उक्तेर्थे दाशमिकं वाक्यमनुकूलयति ॥ उक्तं चेति ॥ ईश्वरस्य त्वदीयबंधननिरसनद्वारत्वस्यालयितत्वान्न ते शोकावकाशोस्तीत्याह ॥ अत इति ॥ श्रीसीतारामचंद्रजीप्रसंन्नो मस्तु ॥ श्रीरामायनमः

पूर्वापरालोचनातोगीताशास्त्रंव्याख्यायोपसंहृत्यतत्तात्पर्यार्थंनिर्द्धारितमितिविचारद्वारानिर्द्धारयितुंविचारमवतारयति
अस्मिन्निति॥किंशब्दार्थमेवत्रेधाविभजते॥ज्ञानमिति॥निमित्ताभावेसंशयस्याभासत्वान्ननिरस्यतेतिमत्वापृच्छति॥कुतइ
तितत्तदर्थावद्योतकानेकवाक्यदर्शनंतत्तन्निमित्तमित्याहयत्ज्ञात्वेति॥कर्मणामवश्यकर्त्तव्यत्वोपलंभात्तेभ्योपिनिःश्रे
यसप्राप्तिर्भातीत्याह॥कर्मण्येवेति॥तथापिसमुच्चयप्रापकंनास्तीत्याशंक्याह॥एवमिति॥सर्वांसामग्र्यांकार्यमवश्यंभा

अस्मिन्गीताशास्त्रेपरमंनिःश्रेयससाधनंनिश्चितंकिंज्ञानंकिंवाकर्माहोस्विदुभयमितिसंशयः॥कुतः॥यत्ज्ञा
त्वामृतमश्नुतेततोमांतत्त्वतोज्ञात्वाविशतेतदनंतरमित्यादीनिवाक्यानिकेवलज्ञानान्निःश्रेयसप्राप्तिंदर्शयंति
कर्मण्येवाधिकारस्तेकुरुकर्मैत्येवमादीनिकर्मणामवश्यकर्त्तव्यतांदर्शयंति॥एवंज्ञानकर्मणोःकर्त्तव्यतोपदे
शात्समुच्चितयोरपिनिःश्रेयसहेतुत्वंस्यादितिभवेत्संशयः॥किंपुनरत्रमीमांसाफलंनन्वेतद्देवेषामन्यतम
स्यपरमंनिःश्रेयससाधनत्वावधारणमतोविस्तीर्णतरंमीमांस्यमेतत्॥श्रीसीतारामचंद्रजीप्रसन्नोमस्तु॥

वीत्युपसंहरति॥इतिभवेदिति॥संदिग्धंसफलंचविचार्यमित्येवंस्थितेसति॥अफलंसंदिग्धमपिनविचार्यमितिबुध्यापृ
च्छति॥किंपुनरिति॥प्रत्येकंज्ञानकर्मणोःसमुच्चितयोर्वामुक्तिंप्रतिपरमसाधनतेत्यवधारणमेवविचारफलमितिपरिहर
ति॥नन्विति॥संदेहप्रयोजनयोर्विचारप्रयोजकयोर्भावाद्विचारद्वारापरममुक्तिसाधनंनिर्द्धारणीयमितिनिगमयति॥अ
तइति॥श्रीरामचंद्रायनमः॥श्रीसीतारामचंद्रायनमः॥श्रीसीतारामचंद्रायनमः॥श्रीसीतारामचंद्रजीप्रसन्नोमस्तु॥॥

एवं विचार्यमवतार्य सिद्धांतं संगृह्णाति। आत्मेति संग्रहवाक्यं विवृण्वन्नादावात्मज्ञानापोद्यामविद्यां दर्शयति। क्रियेति। आश्र
योत्पत्त्यानंदनादित्वमाह। यात्मनीति। तामेवाविद्यामनाद्यविद्योत्थामनर्थात्मिकां प्रपंचयति। ममेति। अनाद्यविद्याकार्यत्वा
त् प्रवाहरूपेणानादित्वमस्याः विवक्षितावशिनाष्टि। अनादीति। तत्कारणाविद्यानिवर्त्तकत्वमात्मज्ञानस्योपन्यस्यति
अस्याइति। ननु नेदमुत्पन्नं ज्ञानं निवर्त्तयति। अविरोधेनोत्पन्नत्वात् न चानुत्पन्नमलब्धात्मकस्यार्थक्रियाकारित्वाभा

आत्मज्ञानस्य तु केवलस्य निःश्रेयसहेतुत्वं भेदप्रत्ययनिवर्त्तकत्वेन कैवल्यफलावसानत्वात् क्रियाकारकफलभे
दबुद्धिरविद्याऽऽत्मनि नित्यप्रवृत्ता मम कर्म कर्त्ताहममुष्मै फलायेदं करिष्यामीतीयमविद्याऽनादिकालप्र
वृत्ता अस्या अविद्याया निवर्त्तकमयमहमस्मि केवलोऽकर्त्ताक्रियोऽफलो न मत्तोन्योऽस्ति कश्चिदित्येवंरूपमा
त्मविषयं ज्ञानमुत्पद्यमानं निःश्रेयसकारणं कर्मप्रवृत्तिहेतुभूतायाः भेदबुद्धेर्निवर्त्तकत्वात् तु शब्दः पक्षद्व
यव्यावृत्त्यर्थः। न केवलेभ्यः कर्मभ्यो न ज्ञानकर्मभ्यां समुदिताभ्यां निःश्रेयसप्राप्तिरिति पक्षद्वयं निवर्त्तयति
अकार्यत्वाच्च निःश्रेयसस्य कर्मसाधनत्वानुपपत्तिः। नहि नित्यं वस्तु कर्मणा ज्ञानेन वा क्रियते। श्रीरामायनमः

वात्तत्राह। उत्पद्यमानमिति। कथं तस्य कारणीभूताविद्यानिवर्त्तकत्वमित्याशंक्य कार्याविद्यानिवर्त्तकत्वदृष्टेरित्याह
कर्मेति। आत्मज्ञानस्येत्यादि संग्रहवाक्ये तु शब्दद्योत्यविशेषाभावात्तदानर्थक्यमाशंक्याह। तु शब्देति। पक्षद्वयव्यावर्त्त
कत्वमेवास्य स्फुटयति। नेत्यादिना। इतश्च कर्मासाध्यतामुक्तेरित्याह। अकार्यत्वाच्चेति। एष नित्यो महिमेति श्रुते
र्नित्यत्वेन मोक्षस्याकार्यत्वान्न तत्र हेत्वपेक्षेत्युपपादयति। नहीति। श्रीसीतारामचंद्रजी प्रसंन्नोमस्तु। श्रीरामाय॰

कर्मणा मोक्षो न क्रियते चेत्तर्हि केवलमपि ज्ञानं मुक्त्यनुपयुक्तमिति कुतस्तस्य तत्र हेतुत्वधीरिति शंकते ॥ केवलेति ॥ ज्ञानानर्थ
क्यं दूषयति ॥ नेति ॥ तदेव प्रपंचयति ॥ अविद्येति ॥ यदुक्तमविद्यानिवर्त्तकज्ञानस्य कैवल्यफलावसायित्वं दृष्टमिति तत्र दृष्टां
तमाह ॥ रज्ज्वादीति ॥ उक्ते विषये तमोनिवर्त्तकप्रकाशस्य कस्मिन्फले पर्यवसानं तत्राह ॥ निवर्त्तेति ॥ प्रदीपप्रकाशस्य सर्पभ्रम
निवृत्तिद्वारा रज्जुमात्रे पर्यवसानवदात्मज्ञानस्यापि तदविद्यानिवृत्त्यात्मकैवल्यावसानमिति दार्ष्टांतिकमाह ॥ तथेति ॥ ज्ञा
त्रादीनां ज्ञाननिष्ठाहेतूनां कर्मांतरे प्रवृत्तिसंभवात् कर्मसहितैव सा कैवल्यावसायिनीति चेन्नेत्याह ॥ दृष्टार्थानामिति ॥ क

केवलज्ञानमप्यनर्थकं तर्हि ॥ न ॥ अविद्यानिवर्त्तकत्वे सति दृष्टकैवल्यफलावसानत्वादविद्यातमोनिवर्त्तकस्य ज्ञानस्य
दृष्टं कैवल्यफलावसानत्वं रज्ज्वादिविषये सर्पाद्यज्ञानतमोमोहनिवर्त्तकदीपप्रकाशफलवत् निवर्त्तसर्पविकल्परज्जु
कैवल्यावसानं हि प्रकाशफलं तथा ज्ञानं दृष्टार्थानां च छिदिक्रियाग्निमंथनादीनां व्यापृतकर्त्रादिकारकाणां द्वैधीभा

अन्यत्र

वाग्निदर्शनादिफलादन्यफले कर्मांतरे वा व्यापारानुपपत्तिर्यथा तथा ज्ञाननिष्ठाक्रियायां दृष्टार्थायां व्यापृत
स्य ज्ञात्रादिकारकस्यैवात्मकैवल्यफलात् कर्मांतरे फलांतरे वा प्रवृत्तिरनुपपन्नेति न ज्ञाननिष्ठा कर्मसहितोपप
द्यते भुज्यग्निहोत्रादिक्रियावत्स्यादिति चेन्न ॥ श्रीसीताराम चंद्राय नमः ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥

र्मसाहित्यं ज्ञाननिष्ठाया दृष्टांतेन साधयन्नाशंकते ॥ भुजीति ॥ भुजिक्रियाया लौकिक्या वैदिक्याश्चाग्निहोत्रादिक्रियायाः सहानु
ष्ठानवदग्निहोत्रादिक्रियाया ज्ञाननिष्ठायाश्च साहित्यमित्यर्थः ॥ भुजिफले तृप्त्याख्ये प्राप्तेपि स्वर्गादौ तद्धेतोश्चाग्निहोत्रादेव
र्थित्वदृष्टेर्युक्तं तत्र साहित्यं न तथा मुक्तिफलज्ञाननिष्ठालाभे स्वर्गादौ तद्धेतौ वा कर्मण्यर्थित्वं ते न ज्ञाननिष्ठाकर्मणो न साहित्य
मिति परिहरति ॥ नेत्यादिना ॥ श्रीरामचंद्राय नमः ॥ श्रीरामकृष्णाय नमः ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीरामाय नमः ॥

संग्रहवाक्यं विवृणोति कैवल्येति ॥ ज्ञाने फलवति लब्धे फलांतरे तद्धेतौ वा नार्थितेत्यत्र दृष्टांतमाह ॥ सर्वत इति ॥ सर्वतः सर्वत्र संप्लुतं
व्याप्तमुदकमिति समुद्रोक्तिस्तत्फलं स्नानादि तस्मिन्प्राप्ते तडागादिनिर्माणक्रियायां तदधीने च स्नानादौ न कस्यचिदर्थित्वं त
था प्रकृतेपीत्यर्थः ॥ निरतिशयफले ज्ञाने लब्धे सातिशयफले कर्मणि नार्थित्वमित्येतत् दृष्टांतेन स्फुटयति ॥ नहीति ॥ कर्मणः
सातिशयफलत्वमुक्तमुपजीव्य फलितमाह ॥ तस्मादिति ॥ ज्ञानकर्मणोः साहित्यासंभवमपि पूर्वोक्तं निगमयति ॥ न चेति ॥ नहि प्र

कैवल्यफले ज्ञाने क्रियाफलार्थित्वानुपपत्तेः कैवल्यफले हि ज्ञाने प्राप्ते सर्वतः संप्लुतोदके प्राप्ते कू
पतडागादिक्रियाफलार्थित्वाभाववत् फलांतरे तत्साधनायां वा क्रियायामर्थित्वानुपपत्तिः न
हि राज्यप्राप्तिफले कर्मणि व्याप्तस्य क्षेत्रमात्रप्राप्तिफले व्यापार उपपद्यते तद्विषयं चार्थित्वं
तस्मान्न कर्मणोस्ति निःश्रेयससाधनत्वं न च ज्ञानकर्मणोः समुच्चितयोर्नापि ज्ञानस्य कैवल्य
फलस्य कर्मसाहाय्यापेक्षा अज्ञाननिवर्त्तकत्वेन च विरोधात् ॥ श्रीरामचंद्राय नमः ॥ ॥

काशतमसोरिव मिथो विरुद्धयोस्तयोः साक्षादेकस्मिन्फले साहित्यमित्यर्थः ॥ ननु ज्ञानमेव मोक्षं साधयद् आत्मसहायत्वेन क
र्मापेक्षते करणस्योपकरणापेक्षत्वात्तत्राह ॥ नापीति ॥ ज्ञानमुत्पत्तौ यज्ञाद्यपेक्षमपि नोत्पन्नं फले तदपेक्षं स्वोत्पत्तिनांतरीय
कत्वेन मुक्तेस्तन्मात्रायत्तत्वादित्यर्थः यदुक्तं इति कर्तव्यत्वेन ज्ञानं कर्मापेक्षमिति तत्राह ॥ अज्ञानेति ॥ ज्ञानस्याज्ञाननिवर्त्त
कत्वान्न तत्र कर्मणो विरुद्धतया सहकारित्वायोगान्न फले तदपेक्षेत्यर्थः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीकृष्ण ॥

कर्मणोपि ज्ञानवद्ज्ञाननिवर्त्तकत्वेकुतोविरुद्धत्वेत्याशंक्याह। नहीति। केवलस्यसमुच्चितस्यवाकर्मणोमोक्षेसाक्षाद्नन्वयेफ
लितमाह। अतइति। केवलंज्ञानंमुक्तिसाधनमित्युक्तंतन्निषेधयन्नाशंकते। नेत्यादिना। निषेध्यमनूद्यनञर्थमाह। यत्ताव
दितिनित्याकरणेप्रत्यवायप्राप्तेरितिहेतुंप्रपंचयति। यतइति। ज्ञानवतोपि नित्यानुष्ठानस्यावश्यकत्वान्नकेवलज्ञान
स्यकैवल्यहेतुत्वेत्यर्थः। कैवल्यस्यचनित्यत्वादित्यस्यव्यावर्त्यंदर्शयति नन्विति। यदिनित्यनैमित्तिककर्माणिश्रौता
न्यकरणेप्रत्यवायकराण्यवश्यानुष्ठेयान्येवतर्हितेभ्यः समुच्चितेभ्योऽसमुच्चितेभ्यश्चमोक्षोनेत्युक्तत्वात्केवलज्ञान

नहितमस्तमसोनिवर्त्तकं। अतः केवलमेवज्ञानंनिःश्रेयससाधनमितिसिद्धं नंनित्याकरणेप्रत्यवायप्राप्तेः
कैवल्यस्यचनित्यत्वात्। यत्तावत् केवलाज्ज्ञानात्कैवल्यप्राप्तिरित्येतदसत्। यतोनित्यानांकर्मणांश्रुत्युक्तानाम्
अकरणेप्रत्यवायोनरकादिप्राप्तिलक्षणःस्यात्। ननुएवंतर्हिकर्मभ्योमोक्षोनास्तीत्यनिर्मोक्षएवनैषदोषो।
नित्यत्वान्मोक्षस्यनित्यानांकर्मणामनुष्ठानात्प्रत्यवायाप्राप्तिःप्रतिषिद्धस्यचाकरणादनिष्टशरीरानुत्पत्तिः
काम्यानांचवर्ज्जनादिष्टशरीरानुत्पत्तिः वर्त्तमानशरीरारंभकस्यचकर्मणःफलोपभोगक्षयेपतितेस्मिं

स्यवाऽत्तद्धेतुत्वादनिबंधनामुक्तिर्न्नेतिसिद्धेदित्यर्थः कैवल्य छरीरेदेहांतरोत्पत्तौच्चकारणाभावादात्मनो।
स्यचेत्यादिव्याकुर्वन्ननिर्मोक्षप्रसंगंप्रतिदिशति। नैषइति। मुक्तेर्न्नित्यत्वेनायत्नसिद्धेर्नतदभावशंकेत्युक्तंप्रपंचयति
नित्यानामिति। काम्यकर्मवशादिष्टशरीरप्राप्तिंशंकित्वोक्तंकाम्यानामिति। आरब्धकर्मवशाद्देहांतरंनेत्याह। वर्त्तमाने
ति। तर्हिदेहांतरंशेषकर्मणास्यादित्याशंक्यकर्माशयस्यैकभविकत्वान्नेत्याह। पतितेस्मिन्निति। श्रीकृष्णायनमः। ।

रागादिनाकर्मांतरं ततो देहांतरं च भविष्यतीत्याशंक्याह ॥ रागादीनां चेति ॥ आत्मनः स्वरूपावस्थानमिति संबंधः ॥ अतीतासं
ख्यजन्मभेदेष्वर्जितस्य कर्मणो नानाफलस्यानारब्धस्य भोगेनाक्षयात्ततो देहांतरारंभादैकभविकत्वस्याप्रामाणिकत्वा
न्मुक्तेरयत्नसिद्धतेति चोदयति ॥ अतिक्रांतेति ॥ नोक्तकर्मनिमित्तं देहांतरं शंकितव्यमित्याह ॥ नेति ॥ नित्यनैमित्तिककर्मा
णि श्रौतान्यवश्यमनुष्ठेयानि तदनुष्ठाने च महानायासस्ततो दुःखोपभोगस्तस्योक्तानारब्धकर्मफलभोगत्वोपगमा
न्न ततो देहांतरमित्याह ॥ नित्येति ॥ नित्यादिना दुरितनिवृत्तावप्यविरोधान्न सुकृतनिवृत्तिस्ततो देहांतरमित्याशंक्याह ॥ सु
कृतस्य नित्यादेरन्यत्वेऽनारब्धत्वे च न्यायविरुद्धस्य तस्याऽसिद्धत्वात्ततो देहांतरायोगान्नित्यादेरनन्यत्वे च न तस्य क

रागादीनां चाकारणत्वात्स्वरूपावस्थानमेव कैवल्यमित्ययत्नसिद्धं कैवल्यमित्यतिक्रांतानेकजन्मांतरकृ
तस्य स्वर्गनरकादिप्राप्तिफलस्यानारब्धकार्यस्योपभोगानुपपत्तेः क्षयाभाव इति चेन्न नित्यकर्मानुष्ठा
नायासदुःखोपभोगस्य तत्फलोपभोगत्वोपपत्तेः प्रायश्चित्तवद्वापूर्वोपात्तदुरितक्षयार्थत्वं नित्यकर्म
णां अत आरब्धानां चोपभोगेनैव कर्मणां क्षीणत्वादपूर्वाणां च कर्मणामनारंभेऽयत्नसिद्धं कैवल्यमिति ॥

लांतरमिति मत्वा यथा प्रायश्चित्तमुपात्तदुरितनिबर्हणार्थं न फलांतरापेक्षं तथेदं सर्वमपि नित्यादिकर्मोपात्तपा
पापकरणार्थं तस्मिन्नेव पर्यवस्यन्न देहांतरारंभकमिति पक्षांतरमाह ॥ प्रायश्चित्तवदिति ॥ तथापि प्रारब्धवशाद्दे
वदेहांतरं शंक्यते ॥ नानाजन्मारंभकाणामपि तेषां यावदधिकारन्यायेन संभवादित्याशंक्याह ॥ आरब्धानां चेति ॥
पूर्वार्जितकर्मणामेवं क्षीणत्वेपि कानिचिदपूर्वकर्माणि देहांतरमारभेरन्नित्याशंक्याह ॥ अपूर्वाणां चेति ॥ श्री ॥

विनाज्ञानंकर्मणैवमुक्तिरितिपक्षंश्रुत्यवष्टंभेननिराचष्टेनेत्यादिना॥विद्यतेऽयनायेतिश्रुतेरितिसंबंधः एवकारार्थविव
रणंनेत्यादिभागंव्याकरोति॥अन्यइति॥यदाचर्मवदाकाशंवेष्टयिष्यंतिमानवाः तदादेवमविज्ञायदुःखस्यांतोभविष्य
तीतिश्रुतिमर्थतोनुवदति॥चर्मेति॥श्रोतार्थेस्मृतिंसंवादयति॥ज्ञानादिति॥किंचत्वदीयन्यायस्यानुग्राह्यमाणहीनत्वे
नाभासतयापुण्यकर्मणामनारब्धफलानांक्षयाभावेदेहांतरारंभसंभवान्नज्ञानंविनामुक्तिरित्याह॥अनारब्धेति॥न

॥ नतमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायविद्यायाअन्यःपंथाःमोक्षायनविद्यतइतिश्रु
तेश्चर्मवदाकाशवेष्टनासंभववद्विदुषोमोक्षासंभवश्रुतेः ज्ञानात्कैवल्यमाप्नोतीतिचपुराणस्मृतेरनार
ब्धफलानांपुण्यानांकर्मणांक्षयानुपपत्तेश्चयथापूर्वोपात्तानांदुरितानांअनारब्धफलानांसंभवस्तथापु
ण्यानामप्यनारब्धफलानांस्यात्संभवस्तेषांचदेहांतरमकृत्वाक्षयानुपपत्तौमोक्षानुपपत्तिःधर्माधर्महेतूनां
चरागद्वेषमोहानांअन्यत्रात्मज्ञानात्उच्छेदानुपपत्तेःधर्माधर्मोच्छेदानुपपत्तिःनित्यानांकर्मणांचपुण्यलोक
फलश्रुतेःवर्णाःआश्रमाश्चस्वकर्मनिष्ठाइत्यादिस्मृतेश्चकर्मक्षयानुपपत्तिः॥श्रीरामचंद्रायनमः॥ ॥

थाविधानांकर्मणांनास्तिसंभावनेत्याशंक्याह॥यथेति॥अनारब्धफलपुण्यकर्मभावेपिकथंमोक्षानुपपत्तिरित्याशं
क्याह॥तेषांचेति॥इतश्चकर्मक्षयानुपपत्त्यामोक्षानुपपत्तिरित्याह॥धर्मेति॥कर्मणापितृलोकइतिश्रुतिमाश्रित्यक
र्मक्षयेहेत्वंतरमाह॥नित्यानामिति॥स्मृत्यापियथोक्तमर्थंसमर्थयति॥वर्णाइतिप्रेत्यकर्मफलमनुभूयततःशेषेणवि
शिष्टजात्यादिभाजोजन्मप्रतिपद्यंतेइत्येतदादिशब्दार्थः॥श्रीसीतारामचंद्रायनमः॥श्रीसीतारामचंद्रायनमः॥ ॥

यत्तु नित्यानुष्ठानायासदुःखभोगस्य तत्फलभोगत्वमिति तदिदानीमनुवदति। येत्विति॥ नित्यान्यनुष्ठीयमानान्यायासपर्यंतानीति शेषः तथापि नित्यानां काम्यानामिव स्वरूपातिरिक्तं फलमाशंक्य विध्युद्देशेन तदश्रवणान्नैवमित्याह॥ नातिति॥ विध्युद्देशे फलाश्रुतेो तत्कामनायानिमित्तस्याभावान्न नित्यानि विधीयेरन्नित्याशंक्याह॥ जीवनादीति॥ न नित्यानां विध्यसिद्धिरिति शेषः अनुभाषितं दूषयति नेत्यादिना॥ तदेव विवृण्वन्निषेध्यमनूद्य तत्रार्थमाह॥ यदुक्तमिति॥ अप्रवृत्तानामित्यादिहेतुं व्यनक्ति॥ नहीति॥ कर्मांतरारब्धे देहे दुरितफलं नित्यानुष्ठानायासदुःखं भुज्यतां कानुपपत्तिरित्याशंक्याह॥ अन्यथेति॥ यदुक्तं

येत्वाहुर्नित्यानि कर्माणि दुःखरूपत्वात्पूर्वकृतदुरितकर्मणां फलमेव न तु तेषां स्वरूपव्यतिरेकेणान्यत्फलमस्ति अश्रुतत्वाज्जीवनादिनिमित्ते च विधानादिति न॥ अप्रवृत्तानां कर्मणां फलदानासंभवात् दुःखफलविशेषानुपपत्तिश्च स्यात् यदुक्तं पूर्वजन्मकृतदुरितानां कर्मणां फलं नित्यकर्मानुष्ठानायासदुःखं भुज्यत इति तदसत् नहि मरणकाले फलदानायानंकुरीभूतस्य कर्मणः फलमन्यकर्मारब्धे जन्मन्युपभुज्यत इत्युपपत्तिरन्यथा स्वर्गफलोपभोगाय अग्निहोत्रादिकर्मारब्धे जन्मनि नरककर्मफलोपभोगोपपत्तिः स्यात् तस्य दुरितदुःखविशेषफलत्वानुपपत्तेश्च अनेकेषु हि दुरितेषु संभवत्सु भिन्नदुःखसाधनफलेषु नित्यकर्मानुष्ठानायासदुःखमात्रफलेषु कल्प्यमानेषु॥

दुःखफलविशेषानुपपत्तिश्च स्यादिति तदुपपादयति॥ तस्येति॥ संभावितानि तावदनंतानि संचितानि दुरितानि नानादुःखफलानि यदि तानि नित्यानुष्ठानायासरूपदुःखतन्मात्रफलानि कल्प्येरंस्तदा तेष्वेव कल्प्यमानेषु सत्सु नित्यस्यानुष्ठितस्यायासमासादयतो यो दुरितकृतो दुःखविशेषो न तत्फलं दुरितफलानां दुःखानां बहुलत्वादतो नित्यं कर्माय थाविशेषितं दुरितकृतदुःखविशेषफलकमित्ययुक्तमित्यर्थः॥ श्रीसीतारामचंद्राय नमः॥ श्रीरामचंद्राय नमः॥

किंचनित्यानुष्ठानायासदुःखमात्रफलानिचेत्दुरितानिकल्प्यंतेतदाद्वंद्वशब्दितरागादिबाधस्यरोगादिबाधायाश्चदुरितनिमि
त्तत्वानुपपत्तिः॥सुकृतफलत्वस्यचासंभवादनुपपत्तिरेवोदीरितबाधास्यादित्याह॥द्वंद्वेति॥इतश्चनित्यानुष्ठानायासदुःखमेवदु
रितफलमित्ययुक्तमित्याह॥नित्येति॥दुःखमितिनशक्यतेकल्पयितुमितिपूर्वेणसंबंधः॥यदिचतत्फलंनतर्हिशिरसापाषाण
वहनादिदुःखंदुरितकृतंनचतत्कारणंसुकृतंदुःखस्यातत्कार्यत्वादतस्तदाऽऽकस्मिकंस्यादित्यर्थः॥नित्यानुष्ठानायासदुःख

द्वंद्वरोगादिबाधानिमित्तंदुःखमहेतुकंपुण्यहेतुकंवाकल्प्यंस्यान्नचतच्छक्यंनहिशक्यतेकल्पयितुंनित्यकर्मानुष्ठानाया
सदुःखमेवपूर्वोपात्तदुरितफलंनशिरसापाषाणवहनादिदुःखमिति॥अप्रकृतंचेदमुच्यतेनित्यकर्मानुष्ठानआया
सदुःखंपूर्वकृतदुरितफलमितिकथंअप्रसूतफलस्यहिपूर्वकृतदुरितस्यक्षयोऽनुपपत्तेर्नोपपद्यतइतिप्रकृतंत
त्राप्रसूतफलस्यकर्मणःफलंनित्यकर्मानुष्ठानायासदुःखमाहभवान्नप्रसूतफलस्येत्यथसर्वमेवपूर्वकृतंदुरि
तंतत्प्रसूतफलमेवेतिमन्यतेभवान्ततोनित्यकर्मानुष्ठानायासदुःखमेवफलमितिविशेषणमयुक्तं॥ ॥

मुपात्तदुरितफलमित्येतदप्रकृतत्वादयुक्तंवक्तुमित्याह॥अप्रकृतंचेति॥तदेवप्रपंचयितुंपृच्छति॥कथमिति॥तत्रादौप्रकृतमा
ह॥अप्रसूतेति॥तथापिकथमस्माकमप्रकृतवादित्वंतत्राह॥तत्रेति॥प्रसूतफलत्वमप्रसूतफलत्वमितिप्राचीनदुरितगतविशेषानु
पगमादविशेषेणसर्वस्यैवतस्यप्रसूतफलत्वान्नित्यानुष्ठानायासदुःखफलत्वसंभवान्नाप्रकृतवादितेतिशंकते॥अथेति॥पूर्वो
पात्तदुरितस्याविशेषेणारब्धफलत्वेविशेषणानर्थक्यमितिपरिहरति॥ततइति॥दुरितमात्रस्यारब्धफलत्वेनानारब्धफलस्यतस्यो

फलविशेषवचनवैयर्थ्यं॥

पूर्वोपात्तदुरितमारब्धफलं चेद्भोगेनैव तत्क्षयसंभवात्तन्निवृत्त्यर्थं नित्यकर्म न विधातव्यमिति दोषांतरमाह नित्येति इतश्च नि
त्यानुष्ठानायासदुःखं नोपात्तदुरितफलमित्याह किंचेति तदेव स्फोरयति कृतस्येति यथा व्यायामगमनादिकृतदुःखं ना
न्यस्य दुरितस्येष्यते तत्फलत्वसंभवात्तथा नित्यस्यापि श्रुत्युक्तस्यानुष्ठितस्यायासपर्यंतस्य फलानुगमादनुष्ठानायासदुः
खमेव चेत् फलं तर्हि तस्मादेव तद्दर्शनात्तस्य न दुरितफलत्वं कल्प्यं नित्यफलत्वसंभवादित्यर्थः दुःखफलत्वे नित्यानामन

नित्यकर्मविध्यानर्थक्यप्रसंगश्चोपभोगेनैव प्रसूतफलस्य दुरितकर्मणः क्षयोपपत्तेः किंच श्रुतस्य नि
त्यस्य दुःखं कर्मणश्चेत्फलं नित्यकर्मानुष्ठानायासादेव तत् दृश्यते व्यायामादिवत् तदस्मादन्यस्येति कल्प
नानुपपत्तिः जीवनादिनिमित्ते च विधानान्नित्यानां कर्मणां प्रायश्चित्तवत् पूर्वकृतदुरितफलत्वानुपपत्तिः
यस्मिन् पापकर्मणि निमित्ते यद्विहितं प्रायश्चित्तं न तस्य पापस्य तत्फलमथ तस्यैव पापस्य निमित्तस्य प्रायश्चित्त
दुःखं फलं जीवनादिनिमित्तमपि नित्यकर्मानुष्ठानायासदुःखं जीवनादिनिमित्तस्यैव तत्फलं प्रसज्येत ॥

नुष्ठानमेव श्रेयः स्यादित्याशंक्याह जीवनादीति नित्यानां दुरितफलत्वाऽनुपपत्तौ हेत्वंतरमाह प्रायश्चित्तवदिति दृष्टांतं प्र
पंचयति यस्मिन्निति तथा जीवनादिनिमित्ते विहितानां नित्यानां दुरितफलत्वासिद्धिरिति शेषः सत्यं प्रायश्चित्तं न निमि
त्तस्य पापस्य फलं किंतु तदनुष्ठानायासदुःखं तस्य पापस्य फलमिति शंकते अथेति प्रायश्चित्तानुष्ठानायासदुःखस्य नि
मित्तपापफलत्वे जीवनादिनिमित्तनित्याद्यनुष्ठानायासदुःखमपि जीवनादेरेव फलं स्यात् नोपात्तदुरितस्येति परिहरति ॥

प्रायश्चित्तदुःखस्य तन्निमित्तपापफलत्ववज्जीवनादिनिमित्तकर्मकृतमपि दुःखं जीवनादिफलमित्यत्र हेतुमाह ॥ नित्येति ॥ इतश्च
नित्यानुष्ठानायासदुःखमेवोपात्तदुरितफलमित्यपकर्षं वक्तुमित्याह ॥ किं चान्यदिति ॥ काम्यानुष्ठानायासदुःखमपि दुरितफलमि
त्युपगमात्प्रसंगस्येष्टत्वमाशंक्याह ॥ तथा चेति ॥ विहितानि तावन्नित्यानि न च तेषु फलं श्रुतं न च विना फलं विधिस्तेन दुरितनिव
र्हणार्थानि नित्यानीत्यर्थापत्त्या कल्प्यन्ते ॥ न च सा युक्ता काम्यानुष्ठानादपि दुरितनिवृत्तिसंभवादित्यर्थः ॥ किंच ॥ नित्यान्यनुष्ठा

नित्यप्रायश्चित्तयोर्नैमित्तिकत्वाविशेषात् किं चान्यन्नित्यस्य काम्यस्य चाग्निहोत्रादेरनुष्ठानायासदुःखस्य तुल्यत्वान्नि
त्यानुष्ठानायासदुःखमेव पूर्वकृतदुरितस्य फलं न तु काम्यानुष्ठानायासदुःखमिति विशेषो नास्तीति तदपि पूर्वकृत
दुरितफलं प्रसज्येत ॥ तथा च सति नित्यानामफलश्रवणात्तद्विधानान्यथानुपपत्तेश्च नित्यानुष्ठानायासदुःखं
पूर्वकृतदुरितफलमित्यर्थापत्तिकल्पना चानुपपन्ना एवं विधानान्यथानुपपत्तेरनुष्ठानायासदुःखव्यतिरिक्तफ
लत्वानुमानाच्च नित्यानां ॥ विरोधाच्च विरुद्धं चेदमुच्यते नित्यकर्मणानुष्ठीयमानेनान्यस्य कर्मणः फलं भुज्यत इत्यभ्यु
पगम्यमाने स एवोपभोगो नित्यस्य फलमिति नित्यस्य कर्मणः फलाभाव इति विरुद्धमुच्यते ॥ श्रीरामचंद्राय नमो नमः

नायासदुःखातिरिक्तफलानि विहितत्वात्काम्यवदित्यनुमानान्न तेषां दुरितनिवृत्त्यर्थतेत्याह ॥ एवमिति ॥ काम्यादिकर्मदृष्टांतयि
तुमेवमित्युक्तं ॥ स्वोक्तिव्याघाताच्च नित्यानुष्ठानात् दुरितफलभोगोक्तिः अयुक्तेत्याह ॥ विरोधाच्चेति ॥ तदेव प्रपंचयति ॥ विरुद्धं चेति ॥
इदं शब्दार्थमेव विशदयति ॥ नित्येति ॥ अन्यस्य कर्मणो दुरितस्येति यावत् ॥ स एवेति ॥ यदनंतरं यद्भवति तत्तस्य कार्यमिति नियमादित्यर्थः

दूतश्च नित्यानुष्ठाने दुरितफलभोगो न सिध्यतीत्याह। किं चेति। काम्यानुष्ठानस्य नित्यानुष्ठानस्य च यौगपद्ये नित्यानुष्ठानायासदुःखेन दु
रितफलभोगवत्काम्यफलस्यापि भुक्तत्वसंभवादिति हेतुमाह। तत्तंत्रत्वादिति। नित्यकाम्यानुष्ठानयोर्यौगपद्येपि नित्यानुष्ठाना
यासदुःखादन्यदेव काम्यानुष्ठानफलं कृतत्वादिति शंकते। अथेति। काम्यानुष्ठानफलं नित्यानुष्ठानायासदुःखाद्भिन्नं चेत्तर्हि
काम्यानुष्ठानायासदुःखं नित्यानुष्ठानायासदुःखं च मिथो भिन्नं स्यादित्याह। तदनुष्ठानेति। प्रसंगस्येष्टत्वमाशंक्य निराचष्टे। न चे
ति। दृष्टविरोधमेव स्पष्टयति। नहीति। आत्मज्ञानवदग्निहोत्रादीनां मोक्षे साक्षादन्वयो नेत्यत्रान्यदपि कारणमस्तीत्याह। किंचा

किंच। काम्याग्निहोत्रादावनुष्ठीयमाने नित्यमप्यग्निहोत्रादि तंत्रेणैवानुष्ठितं भवतीति तदायासदुःखेनैव काम्या
ग्निहोत्रादिफलमुपक्षीणं स्यात्। तत्तंत्रत्वात्। अथ काम्याग्निहोत्रादिफलमन्यदेव स्वर्गादि तदनुष्ठानायासदुःख
मपि भिन्नं प्रसज्येत न च तदस्ति दृष्टविरोधान्नहि काम्यानुष्ठानायासदुःखात्केवलं नित्यानुष्ठानायासदुःखं
भिन्नं दृश्यते किं चान्यदविहितमप्रतिषिद्धं च कर्म तत्कालफलं न तु शास्त्रचोदितं प्रतिषिद्धं वा तत्कालफलं भ
वेद्यदि स्यात्तदा स्वर्गादिष्वप्यदृष्टफलानां शासनेनोद्यमो न स्यात्॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु॥

न्यदिति। तदेव कारणं विवृणोति। अविहितमिति। कर्ममर्दनभोजनादि तच्छास्त्रेण विहितं निषिद्धं वा तदनंतरफलं तथानुभ
वादित्यर्थः। शास्त्रीयं कर्म तु नानंतरफलमानंतर्यस्याचोदितत्वादतो ज्ञाने दृष्टफलेनादृष्टफलं कर्म सहकारि भवति। नापि
स्वयमेव दृष्टफले मोक्षे कर्मप्रवृत्तिः क्षममिति विवक्षित्वाह। नचेति। शास्त्रीयस्याग्निहोत्रादेरपि फलानंतर्ये स्वर्गादीनामनंत
रमनुपलब्धिर्विरुध्येत। ततस्तेष्वपि तथाविधफलापेक्षया प्रवृत्तिरग्निहोत्रादिषु न स्यादित्याह। तदेति। श्रीरामचंद्राय नमः॥

किंच नित्यानामग्निहोत्रादीनां नादृष्टं फलं तेषामेव काम्यानां तत्फलं न चहेतुं विनायं विभागो भागीत्याह ॥ अग्निहोत्रादीनामिति ॥ फलकामित्वमात्रेणेति नस्यादिति पूर्वेण संबंधः यानि नित्यान्यग्निहोत्रादीनि यानि च काम्यानि तेषामुभयेषामेव कर्मस्वरूपविशेषाभावेपि नित्यानां तेषामनुष्ठानायासदुःखमात्रेण क्षयो न फलांतरमस्ति तेषामेव काम्यानामंगाद्याधिक्याभावेपि फलकामित्वमधिकारिण्यस्तीत्येतावन्मात्रेण स्वर्गादिमहाफलत्वमित्ययं विभागो न प्रमाणवानित्यर्थः ॥ उक्तविभागायोगे फलितमाह ॥ तस्माच्चेति ॥ काम्यवन्नि

दग्निहोत्रादीनामेव कर्मस्वरूपाविशेषेऽनुष्ठानायासदुःखमात्रेणोपक्षयः काम्यानां च स्वर्गादिमहाफलत्वमंगेतिकर्तव्यताद्याधिक्ये त्वऽसति तत्फलकामित्वमात्रेणेति न शक्यं कल्पयितुं तस्माच्च न नित्यानां कर्मणां अदृष्टफलाभावः कदाचिदप्युपपद्यते ॥ अतश्चाविद्यापूर्वकस्य कर्मणो विद्यैव शुभस्य वाऽशुभस्य वा क्षयकारणमशेषतो न नित्यकर्मानुष्ठानम विद्याकामबीजं हि सर्वमेव कर्म तथा चोपपादितमविद्द्विषयं कर्म विद्द्विषया च सर्वकर्मसंन्यासपूर्विका ज्ञाननिष्ठा ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीः ॥

त्यानामपि पितृलोकाद्यदृष्टफलवत्वे दुरितनिवृत्त्यर्थत्वायोगात् तादर्थ्येनात्मविद्यैवाऽभ्युपगंतव्येत्याह ॥ अतश्चेति ॥ शुभाशुभात्मकं कर्म सर्वमविद्यापूर्वकं चाशेषतस्तद्धितस्य क्षयकारणं विद्यैत्युपपद्यते न तु सर्वकर्माविद्यापूर्वकमिति सिद्धमित्याशंक्याह ॥ अविद्येति ॥ तत्र हि शब्देन योजितां युक्तिं दर्शयति ॥ तथेति ॥ इतश्चाविद्द्विषयं कर्मेत्याह ॥ विद्वदिति ॥ श्रीरामः

गी·भा·
२९९

अधिकारिभेदेननिष्ठाद्वयमित्यत्रवाक्योपक्रममनुकूलयतात्मनिकर्तृत्वंकर्मत्वंचारोपयन्नजानात्यात्मानमितिवदता कर्मोऽज्ञानमूलमितिदर्शितमित्याह उभाविति आत्मानंयाथातथ्येनजानन्नकर्तृत्वादिरहितोभवतीतिब्रुवताकर्मसंन्यासेज्ञानवतोधिकारित्वंसूचितमित्याह वेदेति निष्ठाद्वयमधिकारिभेदेनबोद्धव्यमित्यत्रैववाक्यांतरमाह ज्ञानेति नबुद्धिभेदंजनयेदित्यत्रचाविद्यामूलत्वंकर्मणःसूचयताकर्मनिष्ठाऽविद्वद्विषयानुमोदितेत्याह अज्ञानामिति यदुक्तंविद्वद्विषयासंन्यासपूर्विकाज्ञाननिष्ठेतितत्रतत्वविन्तुमहाबाहोगुणकर्मविभागयोरित्यादिवाक्य

उभौतौनविजानीतोवेदाविनाशिनंनित्यंज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनांअज्ञानांकर्मसंगिनांतत्वविन्तुमहाबाहोगुणकर्मविभागयोः गुणागुणेषुवर्त्ततइतिमत्वानसज्जतेसर्वकर्माणिमनसासंन्यस्यास्तेनैवकिंचित्करोमीतियुक्तोमन्येततत्वविद्योदनःकरोमीत्यारुरुक्षोःकर्मकारणमारूढस्ययोगस्यस्यशमएवकारणंउदारास्सर्वएवैतेज्ञानीत्वात्मैवमेमतमज्ञाःकर्मिणोगतागतंकामकामालभंतेअनन्याश्चिंतयंतोमांनित्ययुक्ताः

मुदाहरतितत्वविदिति तत्रैववाक्यांतरंपठति सर्वेति विदुषोज्ञाननिष्ठेत्यत्रैवपावमिकंवाक्यांतरमाह नैवेति तत्रैवार्थसिद्धमर्थंकथयति अज्ञइति मन्यतइतिसंबंधः अज्ञस्यचित्तशुद्ध्यर्थंकर्मशुद्धचित्तस्यकर्मसंन्यासोज्ञानप्राप्तौहेतुरित्यत्रवाक्यांतरमाह आरुरुक्षोरिति यथोक्तविभागेसाप्तमिकमपिवाक्यमनुगुणमित्याह उदाराइति एवंत्रयीधर्ममित्यादिनावामिकमपिवाक्यमविद्वद्विषयंकर्मेत्यत्रप्रमाणयति अज्ञाइति विदुषःसंन्यासपूर्विकाज्ञाननिष्ठेत्यत्रैवनावमिकंवाक्यांतरमाह अनन्याइति श्रीरामायनमोनमः

आ·गी·
१९

शिव
२९९

मामित्येतद्व्याचष्टे ॥ यथोक्तमिति ॥ तेषां सततयुक्तानामित्यादिद्वाभ्यामेकं वाक्यं तत्रैव प्रमाणयति ॥ ददामीति ॥ विद्यावत्तामेव भगवत्प्राप्तिनिर्देशादितरेषां तदप्राप्तिः सूचितेत्यर्थसिद्धमर्थमाह ॥ अर्थादिति ॥ ननु भगवत्कर्मकारिणां युक्ततमत्वात्कर्मिणोऽपि भगवन्तं यान्तीत्याशंक्याह ॥ भगवदिति ॥ येमत्कर्मकृदित्यादिन्यायेन भगवत्कर्मकारिणस्ते यद्यपि युक्ततमास्तथापि कर्मिणोऽज्ञाः सन्तो न भगवन्तं सहसा गन्तुमर्हन्तीत्यर्थः ॥ तेषामज्ञत्वे गमकं दर्शयति ॥ उत्तरोत्तरेति ॥ चित्तसमाधानमारभ्य फलत्यागपर्यन्तं वाक्यक्रमेणोत्तरोत्तरं विहितसाधनोपादानादभ्यासासमर्थस्य भगवत्कर्मकारित्वाभिधा

यथोक्तमात्मानमाकाशकल्पं अकल्मषमुपासते ददामि बुद्धियोगं तं येन मामुपयान्ति ते अर्थात्कर्मिणो अज्ञा उपयान्ति भगवत्कर्मकारिणो ये युक्ततमा अपि कर्मिणोऽज्ञास्ते उत्तरोत्तरहीनफलत्यागावसानसाधनाः अनिर्देश्याक्षरोपासकास्त्वद्वेष्टा सर्वभूतानामित्यध्यायपरिसमाप्त्युक्तसाधनाः क्षेत्राध्यायाद्यध्यायत्रयोक्तज्ञानसाधनाश्चयेतेषां ॥ श्रीकृष्णायनमः ॥

नाद्भगवत्कर्मकारिणामज्ञत्वं ज्ञातमित्यर्थः ॥ ये त्वक्षरमनिर्देश्यमित्यादिवाक्यावष्टम्भेन विद्वद्विषयत्वं संन्यासपूर्वकज्ञाननिष्ठाया निर्द्धारयति ॥ अनिर्देश्येति ॥ उक्तसाधनास्तेन ते संन्यासपूर्वकज्ञाननिष्ठायामधिक्रियेरन्निति शेषः ॥ किंच त्रयोदशे यान्यमानित्वादीनि चतुर्दशे च प्रकाशं च प्रवृत्तिं चेत्यादीनि पंचदशे च यान्यसंगत्वादीन्युक्तानि तैः सर्वैः साधनैः सहिता भवन्त्यनिर्देश्याक्षरोपासकास्ततोऽपि ते ज्ञाननिष्ठायामेवाधिक्रियेरन्नित्याह ॥ क्षेत्रेति ॥ श्रीरामचंद्रायनमः ॥

निष्ठाद्वयमधिकारिभेदेन प्रतिपाद्य ज्ञाननिष्ठानामनिष्टमिष्टं मिश्रमिति त्रिविधं कर्मफलं न भवति किंतु मुक्तिरेव क
र्मनिष्ठानां तु त्रिविधं कर्मफलं न मुक्तिरिति शास्त्रार्थविभागमभिप्रेतमुपसंहरति ॥ अधिष्ठानादीति ॥ यदुक्तमविद्याका
मबीजं सर्वं कर्मेति तन्न शास्त्रावगतस्य कर्मणोऽविद्यापूर्वकत्वानुपपत्तेरित्याक्षिपति ॥ अविद्येति ॥ दृष्टांतेन समाधत्ते

मधिष्ठानादिपंचकहेतुकसर्वकर्मसंन्यासिनामात्मैकत्वाकर्तृत्वज्ञानवतां परस्यां ज्ञाननिष्ठायां वर्त्तमा
नानां भगवत्तत्वविदामनिष्टादिकर्मफलत्रयं परमहंसपरिव्राजकानामेव लब्ध भगवत्स्वरूपात्मैकत्व
शरणानां न भवति ॥ भवत्येवान्येषामज्ञानां कर्मिणामसंन्यासिनामित्येष गीताशास्त्रोक्तस्य कर्त्त
व्यार्थस्य विभागः ॥ अविद्यापूर्वकत्वं सर्वस्य कर्मणोऽसिद्धमिति चेन्न ब्रह्महत्यादिवद्यद्यपि शास्त्र
शास्त्रावगतं नित्यं कर्म तथाप्यविद्यावत एव भवति ॥ यथा प्रतिषेधशास्त्रावगतमपि ब्रह्महत्यादिलक्ष
णं कर्मानर्थकारणमविद्याकामादिदोषवतो भवति ॥ अन्यथा प्रवृत्त्यनुपपत्तेः तथा नित्यनैमि
त्तिककाम्यान्यपीति व्यतिरिक्तात्मन्यज्ञाते नित्येषु कर्मसु प्रवृत्त्यनुपपन्नेति चेत् ॥ श्रीकृष्णाय नमः ॥

नेति ॥ तत्राभिमतां प्रतिज्ञां विभजते ॥ यद्यपीति ॥ उक्तं दृष्टांतं व्याचष्टे ॥ यथेति ॥ अविद्यादिमतो ब्रह्महत्यादिकर्मेत्यत्र हेतु
माह ॥ अन्यथेति ॥ दार्ष्टांतिकं संगृह्णाति ॥ तान्यविद्यादिमतो भवंतीत्यविद्यादिपूर्वकत्वं तेषामेषितव्यमित्यर्थः ॥ पारलौ
किकं कर्मणस्तु देहाद्यतिरिक्तात्मज्ञानं विना प्रवृत्त्ययोगात्कथं तेषामविद्यापूर्वकतेति शंकते ॥ व्यतिरिक्त इति ॥

तथेति
क

सत्यपि व्यतिरिक्तात्मज्ञाने पारमार्थिकात्मज्ञानाभावान्मिथ्याज्ञानादेव नित्यादिकर्मसु प्रवृत्तेर विद्यापूर्वकत्वं तेषामप्रतिहतमि
ति परिहरति ॥ नेत्यादिना ॥ कर्मणश्चलनात्मकत्वान्नात्मकर्तृकत्वं तस्य निःक्रियत्वाद्देहादिसंघातस्य तु सक्रियत्वात्तत्कर्मयु
क्तं तथापि संघातेऽहमभिमानद्वाराहं करोमीत्यात्मनो मिथ्याधीपूर्विका कर्माणि प्रवृत्तिर्दृष्टा तेनाविद्यापूर्वकत्वं तस्य युक्त
मित्यर्थः ॥ यदुक्तं देहादिसंघाते ऽहमभिमानस्य मिथ्याज्ञानत्वं तदाक्षिपति ॥ देहादीति ॥ अहंधियो गौणत्वे तत्पूर्वककर्मस्वपि
गौणत्वापत्तेरात्मनोऽनर्थाऽभावात्तन्निवृत्त्यर्थं हेत्वन्वेषणं न स्यादिति दूषयति ॥ नेति ॥ एतदेव प्रपंचयन्नादौ चोद्यं प्रपंचय

न्चलनात्मकस्य कर्मणोऽनात्मकर्तृकस्याहं करोमीति प्रवृत्तिदर्शनाद्देहादिसंघातेऽहंकारो गौणो न मिथ्येति
चेन्न तत्कार्येष्वपि गौणत्वसंबंधापत्तेरात्मीये देहादिसंघातेऽहंप्रत्ययो गौणो यथात्मीये पुत्रे आत्मा वै पुत्र
नामासीति लोके च मम प्राण एवायं गौरिति तद्वन्नैवमयं मिथ्याप्रत्ययस्तु स्थाणुपुरुषयोरगृह्यमाणविशेषयोः

ति ॥ आत्मीय इति ॥ तत्रत्र स्वयत्नं भेनदृष्टांतमाह ॥ यथेति ॥ दर्शितस्तु ते रात्मीये पुत्रेऽहंप्रत्ययो गौणो यथा संघातेष्वात्मीयेऽ
हंप्रत्ययस्तथा युक्त इत्यर्थः ॥ भेदधीपूर्वकत्वं गौणधियो लोके प्रसिद्धमित्याह ॥ लोके चेति ॥ लोकवेदानुरोधेनात्मीयसंघातेऽहं
धीरपि गौणी स्यादिति दार्ष्टांतिकमाह ॥ तद्वदिति ॥ मिथ्याधियोऽपि भेदधीपूर्वकत्वसंभवादात्मीये संघातेऽहंप्रत्ययो मिथ्यात्व
मेव किं न स्यादित्याशंक्याह ॥ नैवमिति ॥ भेदधीपूर्वकत्वाभावे कथं मिथ्याधीरुदेतीत्याशंक्याह ॥ मिथ्येति ॥ अधिष्ठानारोप्य
योर्विवेकाग्रहात्तदुत्पत्तिरित्यर्थः ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीरामचंद्राय नमः ॥ श्रीसीतारामचंद्रजीप्रसंन्नो मस्तु ॥

देहाद्यावहंधियो गौणतेति चोद्ये विवृते तत्कार्येष्वपीत्यादि परिहारं विवृणोति ॥ नेत्यादिना ॥ हेतुभागं विभजते ॥ यथेति ॥ सिंहो देवदत्त
इति वाक्यं देवदत्तः सिंह इवेत्युपमया देवदत्तं क्रौर्याद्यधिकरणं स्तोतुं प्रवृत्तं अग्निर्माणवक इत्यपि वाक्यं माणवकोऽग्निरिवेत्यु
पमया माणवकस्य पैङ्गल्याद्यधिकरणस्य स्तुत्यर्थमेव न तथा मनुष्योऽहमिति वाक्यस्याधिकरणस्तुत्यर्थता भातीत्यर्थः
देवदत्तमाणवकयोरधिकरणत्वं कथमित्याशंक्याह ॥ क्रौर्येति ॥ किंच गौणशब्दं तत्प्रत्ययं च निमित्तं कृत्वा सिंहकार्येन किंचिद्दे

न गौणप्रत्ययस्य मुख्यकार्यार्थत्वमधिकरणस्तुत्यर्थत्वाद्ध्युपमाशब्देन यथा सिंहो देवदत्तो
ग्निर्माणवक इति सिंह इवाग्निरिवेति क्रौर्यपैंगल्यादिसामान्ययोगाद्देवदत्तमाणवकाधिकरणस्तु
त्यर्थमेव ॥ न तु सिंहकार्यमग्निकार्यं गौणशब्दप्रत्ययनिमित्तं किंचित्साध्यते मिथ्याप्रत्ययका
र्यं त्वनर्थमनुभवति गौणप्रत्ययस्य विषयं च जानाति नैष सिंहो देवदत्तः स्यात् न वायमग्निरि
ति तथा गौणेन देहादिसंघातेनात्मना कृतं कर्म न मुख्येनाहंप्रत्ययविषयेणात्मना कृतं स्या ॥

वदत्तेन साध्यते ॥ नापि माणवकेन किंचिदग्निकार्यं मिथ्याधीकार्यं त्वनर्थमात्मानुभवत्यतो न देहाद्यहंधीर्गौणी स्यादित्याह ॥ नत्विति
इतोपि देहादौ नाहंधीर्गौणीत्याह ॥ गौणेति ॥ यो देवदत्तो माणवको वा गौण्या धियो विषयस्तं परो नैष सिंहो नायमग्निरिति जा
नाति ॥ नैवमविदुषात्मनः संघातस्य स्वस्यापि भेदे संघातस्यानात्मत्वं प्रत्येत्यतो न संघातेऽहंशब्दप्रत्ययो गौणा वित्यर्थः ॥
संघाते तयोर्गौणत्वे दोषांतरं समुच्चिनोति ॥ तथेति ॥ तथा सत्यात्मनि कर्तृत्वादिप्रतिभासासिद्धिरिति शेषः ॥ श्रीः ॥

गौणेन कृतं न मुख्येन कृतमित्युदाहरणेन स्फुटयति ॥ नहीति ॥ यद्यपि देवदत्तमाणवकाभ्यां कृतं कार्यं मुख्याभ्यां सिंहाग्निभ्यां न क्रि
यते तथापि देवदत्तगतक्रौर्येण मुख्यसिंहस्य माणवकनिष्ठपैङ्गल्येन मुख्याग्नेरिव च संघातगतेनापि जडत्वेनात्मनो मुख्यस्य किं
चित्कार्यं कृतं भविष्यतीत्याशंक्याह ॥ न चेति ॥ देहादावहंधियो गौणत्वायोगे हेत्वंतरमाह ॥ स्तूयमानाविति ॥ देवदत्तमाणव
कयोः सिंहाग्निभ्यां भेदधीपूर्वकं तद्व्यापारत्वाभाववदात्मनोपि मुख्यस्य संघाताद्भेदधीद्वारा तदीयव्यापाररहित्यमात्मनि
दृष्टं स्यादित्यर्थः ॥ व्यावर्त्यं दर्शयति ॥ न पुनरिति ॥ संघातेऽहंधियो मिथ्यात्वेपि न तत्कृतमात्मनि कर्तृत्वं किंत्वात्मीयज्ञा

न हि गौणसिंहाग्निभ्यां कृतं कर्म मुख्याभ्यां सिंहाग्निभ्यां कृतं स्यान्न च क्रौर्येण पैङ्गल्येन वा मुख्यसिंहाग्न्योः
कार्यं किंचित्क्रियते स्तुत्यर्थत्वेनोपक्षीणत्वात् स्तूयमानौ च जानीतो नाहं सिंहो नाहमग्निरिति न सिंहस्य क
र्म ममाग्नेश्चेति तथा च संघातजं कर्म न मम मुख्यस्यात्मन इति प्रत्ययो युक्ततरः स्यान्न पुनरहं कर्ता मम
कर्मेति ॥ येत्वाहुरात्मीयैः स्मृतीच्छाप्रयत्नैः कर्महेतुभिरात्मा करोतीति ॥ न तेषां मिथ्याप्रत्ययमूलत्वात् मि
थ्याप्रत्ययनिमित्तेष्टानिष्टानुभूतक्रियाफलजनितसंस्कारपूर्वका हि स्मृतीच्छाप्रयत्नादयः ॥

नेच्छाप्रयत्नैरस्य कर्तृत्वं वास्तवमिति मतमनुवदति ॥ येत्विति ॥ ज्ञानादिकृतमपि कर्तृत्वं मिथ्याधीकृतमेव ज्ञानादीनां
मिथ्याधीकार्यत्वादिति दूषयति ॥ न तेषामिति ॥ तदेव प्रपंचयति ॥ मिथ्येति ॥ मिथ्याज्ञानं निमित्तं कृत्वा किंचिदिष्टं किंचि
दनिष्टमित्यारोप्य तद्द्वारानुभूते तस्मिन्नेष्टा जिहासाभ्यां क्रियां निर्वर्त्य तयेष्टमनिष्टं च फलं भुक्त्वा तेन संस्कारेण तत्पू
र्वकाः स्मृत्यादयः स्वात्मनि क्रियां कुर्वंतीति युक्तं कर्तृत्वस्य मिथ्यात्वमित्यर्थः ॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥

अतीतानागतजन्मनोरिव वर्त्तमानेपि जन्मनि कर्तृत्वादिसंसारस्य वस्तुत्वमाशंक्याह ॥ यथेति ॥ विमतौ कालाववि द्याकृतसंसारवंतौ कालत्वाद्वर्त्तमानकालवदित्यर्थः ॥ संसारस्याविद्याकृतत्वे फलितमाह ॥ ततश्चेति ॥ तस्याविद्यत्वेन विद्यापोह्यत्वे हेत्वंतरमाह ॥ अविद्येति ॥ कुतोऽस्याविद्याकृतत्वं धर्माधर्मादिकृतत्वसंभवादित्याशंक्याह ॥ देहादीति ॥ आत्मनो धर्मादिकर्तृत्वस्याविद्यात्वान्नाविद्यां विना कर्मिणः देहाभिमानः संभवत्यतश्चात्मनः संघातेऽहमभिमानस्याविद्ययाविद्य

॥ यथास्मिन्जन्मनि देहादिसंघाताभिमानरागद्वेषादिकृतो धर्माधर्मौ तत्फलानुभवश्च तथाऽतीतेऽतीततरेपि जन्मनि अनादिरविद्याकृतः संसारोतीतोऽनागतश्चानुमेयस्ततश्च सर्वकर्मसंन्यासात् ज्ञाननिष्ठायां आत्यंतिकः संसारोपरम इति सिद्धमविद्यात्मकत्वाच्च देहाभिमानस्य तन्निवृत्तौ देहानुपपत्तेः संसारानुपपत्ति देहादिसंघाते आत्माभिमानोऽविद्यात्मको न हि लोके गवादिभ्योऽन्योहं मत्तश्चान्ये गवादय इति जानन् तेष्वऽहमिति प्रत्ययं मन्यते कश्चिदजानंस्तु स्थाणो पुरुषविज्ञानवद्विवेकतो देहादिसंघाते कुर्यादहमिति प्रत्ययं न विवेकतो जानन्यस्त्वात्मावै पुत्र नामासीति पुत्रेहं प्रत्ययः स तु जन्यजनकसंबंधनिमित्तो गौणो नत्वात्मना

मानतेत्यर्थः ॥ आत्मनो देहाद्यभिमानस्याविद्यात्वमन्वयव्यतिरेकाभ्यां साधयन्व्यतिरेकं दर्शयति ॥ नहीति ॥ अन्वयं दर्शयन्व्यतिरेकमनुवदति ॥ अजानन्निति ॥ पुत्रे पितुरहंधीवदात्मीये देहादावहंधीर्गौणी स्यादित्युक्तमनुवदति ॥ यस्त्विति ॥ तत्र दृष्टांतश्रुतौ गौणात्मविषयत्वमुक्तमंगीकरोति ॥ सत्विति ॥ श्रीरामायनमः ॥ श्रीरामचंद्रायनमोनमः ॥

नर्हि देहादावपि तथैव स्वकीये स्यादहंधीर्गौणी स्यादाशंक्याह ॥ गौणेनेति ॥ नहि स्वकीयेन पुत्रादिना गौणात्मना पितुर्भोजनादिकार्यं क्रियते तथा देहादेरपि गौणात्मत्वेन कर्तृत्वादिकार्यमात्मनो वास्तवं सिद्ध्यतीत्यर्थः ॥ गौणात्मना मुख्यात्मनो नास्ति वास्तवं कार्यमित्यत्र दृष्टांतमाह ॥ गौणेति ॥ नहि गौणसिंहेन देवदत्तेन मुख्यसिंहकार्यं क्रियते नापि गौणाग्निना माणवकेन मुख्याग्निकार्यं तथा देहादिना गौणात्मना मुख्यात्मनो न वास्तवं कर्तृत्वादिकं तु शक्यमित्यर्थः ॥ स्वर्गकामादिवाक्यप्रामाण्यादात्मनो देहाद्यतिरेकज्ञानात्स्य च केवलस्याकर्तृत्वान्न कर्तव्यं कर्म गौणैरेव देहाद्यात्मभिः संपाद्यते ॥ नहि मन्त्यैवश्रोतातिरेकज्ञाने देहाद्यात्मत्वमात्मनो मु

गौणे न भोजनादिवत्परमार्थकार्यं न शक्यते कर्तुं गौणसिंहाग्निभ्यां मुख्यसिंहाग्निकार्यवत् ॥ अदृष्टविषयचोदनाप्रामाण्यादात्मकर्तव्यं गौणैर्देहेंद्रियादिभिः क्रियत इति चेन्नाविद्याकृतात्मकत्वात्तेषां न गौणात्मानो देहेंद्रियादयः ॥ किंतर्हि मिथ्याप्रत्ययेनैवासंगस्यात्मनः संगादात्मत्वमापद्यंते तद्भावे भावात्तदभावेऽप्यभावात् ॥ अविवेकिनां ह्यज्ञानकाले बालानां दृश्यते दीर्घोऽहं गौरोऽहमिति देहादिसंघाते ऽहंप्रत्ययो ॥ श्रीरामचंद्राय नमः ॥ श्रीसीतारामचंद्राय नमः ॥

ख्यं युक्तमिति चोदयति ॥ अदृष्टेति ॥ न देहादीनामात्मत्वं गौणं तदीयात्मत्वस्याविद्यत्वेन मुख्यत्वादतो न गौणात्मभिरात्मकर्तव्यं कर्म क्रियते किंतु मिथ्यात्मभिरिति परिहरति ॥ नाविद्येति ॥ तदेव विवृण्वन्नञर्थं स्फुटयति ॥ न गौण इति ॥ कथं तर्हि देहादिविषयात्मप्रत्यय इत्याशंक्याविद्याकृतत्वादिहेतुं विभजते ॥ किंतर्हीति ॥ देहादीनामनात्मनामेव सतामात्मत्वं मिथ्याप्रत्ययकृतमित्यत्रान्वयव्यतिरेकावुदाहरति ॥ तद्भाव इति ॥ उक्तेऽन्वये शास्त्रीयसंस्काररहितानामनुभवं प्रमाणयति ॥ अविवेकिनामिति ॥ ॥

व्यतिरेकेऽपि दर्शितेशास्त्राभिज्ञानामनुभवमनुकूलयति ॥नत्विति॥ अन्वयव्यतिरेकाभ्यामनुभवानुसारिभ्यां सिद्धमुपसंहरति
तस्मादिति ॥ तत्कृत एव देहादावहंप्रत्यय इति शेषः ॥ किंच व्यवहारभूमौ भेदाग्रहस्य गुणत्वव्यापकत्वात्तस्य प्रकृतेऽभावान्न दे
हादावहंशब्दोऽहंप्रत्ययो गौणाविताह ॥ दृश्यमिति ॥ अदृष्टविषयचोदनाप्रामाण्यात्कर्तुरात्मनो देहादिव्यतिरेकोऽवधा
रणात्तस्य देहादावहमभिमानस्य गौणत्वमुक्तमनुवदति ॥ यात्विति ॥ श्रुतिप्रामाण्यस्य अज्ञातार्थविषयत्वान्मानांतर

ननु विवेकिनामन्योऽहं देहादिसंघातादिति ज्ञानवतां तत्काले देहादिसंघातेऽहंप्रत्ययो भवति ॥ तस्मान्मिथ्याप्रत्य
याऽभावेऽभावात्तत्कृत एव न गौणः पृथग्गृह्यमाणविशेषसामान्ययोर्हि सिंहदेवदत्तयोरग्निमाणवकयो
र्वा गौणप्रत्ययः शब्दप्रयोगो वा स्यान्नान्यगृह्यमाणसामान्यविशेषयोर्यथा शुक्तिरजतयोः यत्तूक्तं श्रुतिप्रामा
ण्यादिति न तत्प्रामाण्यस्यादृष्टविषयत्वात्प्रत्यक्षादिप्रमाणानुपलब्धे हि विषये स्वर्गोऽग्निहोत्रादिसाध्यसा
धनसंबंधे श्रुतेः प्रामाण्यं न प्रत्यक्षादिविषये ऽदृष्टदर्शनार्थविषयत्वात्प्रामाण्यस्य तस्मात् ॥ न दृष्टमिथ्या
ज्ञाननिमित्तस्याहंप्रत्ययस्य देहादिसंघाते गौणत्वं कल्पयितुं शक्यं ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥

सिद्धे व्यतिरिक्तात्मनि चोदनाप्रामाण्याभावान्न तदवष्टंभेन देहादावात्माभिमानस्य गौणत्वमुत्तरमाह ॥ न तदिति ॥
श्रुतिप्रामाण्यस्यादृष्टविषयत्वं स्फुटयति ॥ प्रत्यक्षादीति ॥ अज्ञातार्थज्ञापकं प्रमाणमिति स्थितेर्न ज्ञाते ऽर्थे श्रुतिप्रामा
ण्यमित्याह ॥ अदृष्टेति ॥ अज्ञातसाध्यसाधनसंबंधबोधिनः शास्त्रस्याऽतिरिक्तात्मन्यौदासीन्ये फलितमाह ॥ तस्मादिति
अन्वयव्यतिरेकाभ्यां दृष्टो मिथ्याज्ञाननिमित्तो देहादिसंघातेऽहंप्रत्ययस्तस्येति यावत् ॥ श्रीसीतारामचंद्राजी प्रसंन्नोम·

अन्यविषयत्वाच्चोदनायानातिरिक्तात्मनितद्विषयत्वेयुक्तमिदानींतद्विषयत्वांगीकारेपिनतन्निर्वोढुंशक्यमध्यक्षविरो
धादित्याह नहीति अपौरुषेयायाःश्रुतेरसंभावितदोषायाःमानांतरविरोधेपिप्रामाण्यमप्रत्याख्येयमित्यभिप्रेत्या
ह यदीति स्वार्थेबोधयंत्याःश्रुतेरविरोधापेक्षत्वाद्विरुद्धार्थवादित्वेतत्परिहान्याविवक्षितमर्थांतराविरुद्धंतस्याःस्वीक
र्तव्यंविरोधेतत्प्रामाण्यानुपपत्तेरित्याह तथापीति अविरोधमवधीर्यश्रुत्यर्थकल्पनानयुक्तेतिव्यावर्त्यमाह नत्विति
अविद्यावत्कर्तृकंकर्मेतित्वयोपगमादुत्पन्नायांविद्यायामविद्याया अभावेतदधीनकर्तुरभावादंतरेणकर्तारमनु

नहिश्रुतिशतमपिशीतोग्निरप्रकाशोवेतिब्रुवन्प्रामाण्यमुपैतियदिब्रूयात्शीतोऽग्निरप्रकाशोवेति
तथाप्यर्थांतरंश्रुतेर्विवक्षितंकल्प्यंप्रामाण्यान्यथानुपपत्तेः नतुप्रमाणांतरविरुद्धंस्ववचनविरुद्धंवाक
र्मणोमिथ्याप्रत्ययवत्कर्तृत्वात्कर्तुरभावेश्रुतेरप्रामाण्यमितिचेन्नब्रह्मविद्यायामर्थवत्वोपपत्तेःकर्म
विधिश्रुतिवत्ब्रह्मविद्याविधिश्रुतेरप्रामाण्यप्रसंगइतिचेन्नबाधकप्रत्ययानुपपत्तेः॥ श्रीः॥ ॥

ष्ठानासिद्धेःकर्मकांडाप्रामाण्यमित्यध्ययनविधिविरोधःस्यादितिशंकते कर्मणइति कर्मकांडश्रुतेर्विद्योदयात्पूर्वंव्याव
हारिकप्रामाण्यस्यतात्विकप्रामाण्याभावेपिसंभवाद्ब्रह्मकांडश्रुतेस्तुतात्विकप्रामाण्यस्यब्रह्मविद्याजनकत्वेनोपपन्न
त्वान्नाध्ययनविधिविरोधइतिपरिहरति नब्रह्मेति कर्मकांडश्रुतेस्तात्विकप्रामाण्याभावेब्रह्मकांडश्रुतेरपितदासिद्धिर
विशेषादितिशंकते कर्मेति उत्पन्नायाब्रह्मविद्यायाबाधकाभावेनप्रमाणत्वात्तत्हेतुश्रुतेस्तात्विकंप्रामाण्यमितिदूषय

॥ नवावकी ॥

ब्रह्मविद्यायाबाधकानुपपत्तिंदृष्टांतेनसाधयति॥यथेति॥देहादिसंघातवदित्यपेरर्थः॥लौकिकावगतेरिवात्मावगतेरपिफ
लाव्यतिरेकमुदाहरणेनस्फोरयति॥यथेति॥फलमज्ञाननिवृत्तिः॥कर्मविधिश्रुतिवदित्युक्तंदृष्टांतंविघटयति॥नचेति॥अ
नादिकालप्रवृत्तस्वाभाविकप्रवृत्तिव्यक्तीनांप्रतिबंधेनयागाद्यलौकिकप्रवृत्तिव्यक्तीर्जनयतिकर्मकांडश्रुतिस्तज्ज
ननंचचित्तशुद्धिद्वाराप्रत्यगात्माभिमुख्यप्रवृत्तिमुत्पादयति॥तथाचकर्मविधिश्रुतीनांपारंपर्येणप्रत्यगात्मज्ञाना

यथाचब्रह्मविद्याविधिश्रुत्यात्मन्यवगतेदेहादिसंघातेऽहंप्रत्ययोबाध्यतेतथात्मन्येवात्मावगतिर्नकदा
चित्केनचित्क्वचिदपिबाधितुंशक्याफलाव्यतिरेकादवगतेर्यथाग्निरुष्णःप्रकाशश्चेति॥नचकर्मविधिश्रु
तेरप्रामाण्यंपूर्वपूर्वप्रवृत्तिनिरोधेनोत्तरोत्तरापूर्वापूर्वप्रवृत्तिजननस्यप्रत्यगात्माभिमुख्यप्रवृत्त्युत्पादनार्थ
त्वान्मिथ्यात्वेप्युपायस्योपेयसत्यतयासत्यत्वमेवस्यात्॥यथार्थवादानांविधिशेषाणांलोकेपिबालोन्मत्तादी
नांपयआदौपाययितव्येचूडावर्द्धनादिवचनंप्रमाणं॥श्रीसीतारामचंद्रायनमः॥श्रीरामचंद्रायनमः॥ ॥

र्थत्वात्तात्विकप्रामाण्यसिद्धिरित्यर्थः॥नन्वेवमपिश्रुतेर्मिथ्यात्वादाभासवदप्रामाण्यमितिचेन्नेत्याह॥मिथ्यात्वेपीति
स्वरूपेणासत्यत्वेपिसत्योपेयद्वाराप्रामाण्यमित्यत्रदृष्टांतमाह॥यथेति॥मंत्रार्थवादेतिहासपुराणानांश्रुतेर्थेप्रामाण्या
भावेपिशेषिविध्यनुरोधेनप्रामाण्यवत्प्रकृतेपिश्रुतेःस्वरूपेणासत्यायाविषयसत्यतयासत्यत्वंततःप्रामाण्यमवि
रुद्धमित्यर्थः॥वाक्यस्यशेषिविध्यनुरोधेनप्रामाण्यंनालौकिकमित्याह॥लोकेपीति॥श्रीसीतारामचंद्रायनमः॥ ॥

कर्मकांडश्रुतीनामुक्तरीत्या परंपरया प्रामाण्येपि साक्षात्प्रामाण्यमुपेक्षितमित्याशंक्याह प्रकारांतरेति आत्मज्ञानोदया
त्प्रागवस्था प्रकारांतरं तत्र स्थितानां कर्मकांडश्रुतीनामज्ञातसंबंधबोध्यत्वेन साक्षादेव प्रामाण्यमिष्टमित्यर्थः ज्ञाना
त्पूर्वं कर्मश्रुतीनां व्यावहारिकप्रामाण्ये दृष्टांतमाह प्रागिति प्रतीचि कर्तृत्वस्याविद्यत्वेपि श्रुतिप्रामाण्यमप्रत्यूहमित्यु
क्तं संप्रति कर्तृत्वस्य प्रकारांतरेण पारमार्थिकत्वमुत्थापयति यत्विति स्वव्यापाराभावे सन्निधिमात्रेण कुतो मुख्यं क
र्तृत्वमित्याशंक्य दृष्टांतमाह यथेति स्वयमयुध्यमानत्वेपि कथं तत्फलवत्वमित्याशंक्य प्रसिद्धिवशादित्याह जित

प्रकारांतरस्थितानां च साक्षादेव प्रामाण्यसिद्धिः प्रागात्मज्ञानात् देहाभिमाननिमित्तप्रत्यक्षादिप्रामाण्यवत् ॥
यत्तु मन्यसे स्वयमव्याप्रियमाणोप्यात्मा सन्निधिमात्रेण करोति तदेव मुख्यं कर्तृत्वमात्मनो यथा राजा युध्य
मानेषु योधेषु युध्यत इति प्रसिद्धं स्वयमयुध्यमानोपि सन्निधानादेव जितः पराजितश्चेति तथा सेनापति
वन्नैव करोति क्रियाफलसंबंधश्च राज्ञः सेनापतेश्च दृष्टो यथा च ऋत्विक्कर्म यजमानस्य तथा देहादीनां
कर्म आत्मकृतं स्यात् तत्फलस्यात्मगामित्वात् यथा च भ्रामकस्य लोहभ्रामयितृत्वाद्व्यापृतस्यैव मुख्यमे
वकर्तृत्वं तथा चात्मन इति ॥ तदसत् ॥

इति कायिकव्यापाराभावेपि कर्तृत्वस्य मुख्यत्वे दृष्टांतमाह सेनापतिरिति तस्या
पि फलवत्वं राजवदविशिष्टमित्याह क्रियेति अन्यकर्मणान्यस्य सन्निहितस्य मुख्ये कर्तृत्वे वैदिकमुदाहरणमाह यथा चे
ति कथमृत्विजां कर्म यजमानस्येत्याशंक्याह तत्फलस्येति स्वव्यापारादृते सन्निधेरेवान्यव्यापारे हेतोर्मुख्यकर्तृत्वे दृष्टांतां
तरमाह यथा चेति क्रियां कुर्वन्कारणं कारकमित्यंगीकारविरोधान्नैतदिति दूषयति तदसदिति ॥ श्रीकृष्णायनमः ॥

गी·भा·
४०५

आ·गी·
२८

कारकविशेषविषयत्वेनांगीकारोपपत्तिरितिशंकते कारकमिति स्वव्यापारमंतरेणनकिंचिदपिकारकमितिपरिहरति न
राज्ञेति दर्शनमेवविशदयति राज्ञेति यथाराज्ञोयुद्धेयोधयितृत्वेनधनदानेनचमुख्यंकर्तृत्वंतथाफलभोगेपिमुख्यमेव
तस्यकर्तृत्वमित्याह तथेति यदुक्तमृत्विक्कर्मयजमानस्येतितत्राह यजमानस्यापीति स्वव्यापारादेवमुख्यंकर्तृत्वमि

अकुर्वतःकारकत्वप्रसंगात् कारकमनेकप्रकारमितिचेन्नराजप्रभृतीनांमुख्यस्यापिकर्तृत्वस्यदर्शनात्
राज्ञातावत्स्वव्यापारेणापियुध्यतेयोधानांचयोधयितृत्वेनधनदानेनचमुख्यमेवकर्तृत्वंतथाजयपराजय
फलोपभोगेनतथायजमानस्यापिधनत्यागेनदक्षिणादानेनचमुख्यमेवकर्तृत्वंतस्माद्व्याप्तस्यकर्तृत्वोप
चारोयंःसगौणइत्यवगम्यतेयदिमुख्यमेवान्यत्कर्तृत्वंस्वव्यापारलक्षणंनोपलभ्यतेराजयजमानप्रभृ
तीनांतदासन्निधिमात्रेणापिकर्तृत्वंमुख्यंपरिकल्प्येतयथाभ्रामकस्यलोहभ्रामणेननतथाराजयजमाना
दीनांस्वव्यापारोनोपलभ्यतेतस्मात्संनिधिमात्रेणकर्तृत्वंगौणमेव ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥

शिव
४०५

तिस्थितेफलितमाह तस्मादिति तदेवप्रपंचयति यदीति तर्हिसान्निधानादेवमुख्यंकर्तृत्वंराज्ञादीनामुपगतमि
तिनेत्याह नतथेति राज्ञादीनांस्वव्यापारवत्वेपूर्वोक्तंसिद्धमित्याह तस्मादिति श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥

राजप्रभृतीनां सन्निधेरेव कर्तृत्वस्य गौणत्वे जयादिफलवत्तस्यापि सिद्धं गौणत्वमित्याह तथा चेति पूर्वोक्तं हेतुत्वेन स्मारयति
नेति अन्यव्यापारेणान्यस्य मुख्यं कर्तृत्वाभावे फलितमुपसंहरति तस्मादिति कथं तर्हि त्वयात्मनि कर्तृत्वादि स्वीकृतं
नहि बुद्धेस्तदिष्टं कर्त्ता शास्त्रार्थवत्त्वादिति न्यायात्तत्राह भ्रांतीति कर्तृत्वाद्यात्मनि भ्रांतमित्येतदुदाहरणेन स्फुटयति

तथा च सति तत्फलसंबंधोपि गौण एव स्यान्न गौणेन मुख्यं कार्यं निर्वर्त्यते तस्माद्देहादेवैतद्धीयते देहा
दीनां व्यापारेणाव्यापृत आत्मा कर्त्ता भोक्ता च स्यादिति भ्रांतिनिमित्तं सर्वमेवोपपद्यते यथा स्वप्ने माया
यां चैवं न च देहाद्यात्मप्रत्ययभ्रांतिसंतानविच्छेदेषु सुषुप्तसमाध्यादिषु कर्तृभोक्तृत्वाद्यनर्थ उपलभ्य
ते तस्माद्भ्रांतिप्रत्ययनिमित्त एवायं संसारभ्रमो न तु परमार्थ इति सम्यग्दर्शनात्तस्यं तमेवोपरम इति सिद्धं ॥६६॥

यथेति मिथ्याज्ञानकृतमात्मनि कर्तृत्वादीत्यत्र व्यतिरेकं दर्शयति नचेति उक्तव्यतिरेकफलं कथयति तस्मादिति सं
सारमहाभ्रमस्याविद्याकृतत्वे सिद्धे परमप्रकृतमुपसंहरति सम्यगिति ॥६६॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु ॥ श्रीः ॥

शास्त्रतात्पर्यार्थविचारद्वारा निर्द्धार्यानंतरश्लोकमवतारयति ॥ सर्वमिति ॥ प्रकृते खल्वष्टादशाध्याये गीताशास्त्रार्थं सर्वं प्रति
पत्तिसौकर्यार्थमुपसंहृत्यांते च सर्वधर्मान्परित्यज्येत्यादौ विशेषतस्तस्य संक्षेपेणोपसंहारं कृत्वा संप्रदायविधिवचनस्या
वसरे सतीदानीमिति योजना ॥ किमिति विस्तरेणोपसंहृतः शास्त्रार्थः संक्षिप्योपसंह्रियते ॥ शास्त्रार्थेति ॥ संक्षेपविस्ताराभ्या

सर्वं गीताशास्त्रार्थमुपसंहृत्यास्मिन्नध्याये विशेषतश्चांते इह शास्त्रार्थदार्ढ्याय संक्षेपत उपसंहारं कृत्वा अथे
दानीं शास्त्रसंप्रदायविधिमाह ॥ इदं शास्त्रं ते तव हिताय मयोक्तं संसारविच्छित्तये अतपस्काय तपोरहिताय न वाच्य
मिति व्यवहितेन संबध्यते तपस्विने प्यभक्ताय गुरौ देवे च भक्तिरहिताय कदाचन कस्यांचिदवस्थायां न वाच्यं भ

इदं ते नातपस्काय नाभक्ताय कदाचन ॥ न चाशुश्रूषवे वाच्यं न च मां यो भ्यसूयति ॥ ६७ ॥

क्तस्तपस्वी अपि सन्न शुश्रूषुर्यो भवति ॥ तस्मै अपि न वाच्यं न च यो मां वासुदेवं मनुष्यं प्राकृतं मत्वाऽभ्यसूय
त्यात्मप्रशंसादिदोषाध्यारोपणेन ममेश्वरत्वमजानन्न सहते असावप्ययोग्यस्तस्मा अपि न वाच्यं भगवति भ
क्ताय तपस्विने शुश्रूषवे च वाच्यं अनसूयवे च वाच्यं शास्त्रमिति सामर्थ्याद्गम्यते ॥ श्रीसीतारामचंद्राय नमः ॥

मुक्तोर्थः सर्वेषां दृढतया बुद्धिमधिरोहतीत्यर्थः ॥ हिताय स्पेतदेव व्याचष्टे ॥ संसारेति ॥ कदाचनेति सर्वैः संबध्यते ॥ प्रतिषेध
सामर्थ्यसिद्धमर्थं कथयति ॥ भगवतीति ॥ श्रीसीतारामचंद्राय नमः ॥ श्रीसीतारामचंद्रजी प्रसन्नो मस्तु ॥ श्रीः

अर्थसिद्ध्यर्थं स्वसंतरमनुसृत्य मेधावित्वमंतर्भावयति। तत्रेति। विकल्पदर्शनात्तेषु उक्तेषु विशेषणेषु मेधावित्वमपि प्रवि
ष्टतीत्यर्थः। विकल्पपक्षे कथमधिकारिप्रतिपत्तिरिति तत्राह शुश्रूषेति। ताभ्यां युक्ताय भगवत्यसूयारहिताय तपस्विने वा च्यमि
ति संबंधः। तद्युक्ताय शुश्रूषाभक्तियुक्ताय भगवत्यसूयारहिताये सर्थः। तपस्वित्वं मेधावित्वं वा निरपेक्षमधिकारिविशेष

तत्र मेधाविने तपस्विने चेत्सनयोर्विकल्पदर्शनात् शुश्रूषाभक्तियुक्ताय तपस्विने तद्यु
क्ताय मेधाविने वा वाच्यं शुश्रूषाभक्तिवियुक्ताय न तपस्विने नापि मेधाविने वाच्यं भग
वति असूयकाय समस्तगुणवतेपि न वाच्यं गुरुशुश्रूषाभक्तिमते च वाच्यं इत्येष शास्त्र
संप्रदायविधिः॥ ६७॥ श्रीकृष्णायनमः॥ श्रीसीतारामचंद्रजी प्रसंन्नो मस्तु॥ ॥

णामिति शंकां भगवद्विषया सूयाराहित्ये तात्पर्यं सूचयति। भगवतीति। कस्मै तर्हि वाच्यमित्याशंक्य पूर्वोक्त सर्वगुण
संपन्नायेत्याह गुरुशुश्रूषेति। अनुक्तेतरविशेषणोपलक्षणार्थमुभयग्रहणं मेधाविनस्तपस्वित्वं नातीवापेक्षते सर्व
मन्यद्बाधकाभावादपेक्षितमेवेति भावः॥ ६७॥ श्रीरामचंद्रायनमः॥ श्रीसीतारामचंद्रायनमः॥ श्रीरामचंद्रायनमः॥

शास्त्रसंप्रदायप्रवृत्त्यर्थमुत्तरश्लोकप्रवृत्तिंदर्शयति संप्रदायेति यद्व्याख्यापको निर्दिश्यते परमत्वंग्रंथस्य निरतिशयपुरुषार्थसाधनत्वमित्याह परममिति गोप्यत्वमस्य रहस्यार्थविषयत्वात् यथोक्तसंवादस्य ग्रंथतोर्थतश्च भक्तेषु स्थापनेदृष्टंतमाह यथेति मयि वासुदेवे भगवत्यनन्यभक्ते त्वयि यथा मया ग्रंथोर्थतः स्थापितस्तथा भक्तेष्वन्येष्वपि यो ग्रंथमिमं स्थापयिष्यति तस्येदं फलमित्युत्तरेण संबंधः नाभक्तायेति भक्तेरधिकारिविशेषणत्वोक्तेर्मद्भक्तेष्विति पुनर्भक्तिग्रहणमनर्थक

संप्रदायस्य कर्त्तुः फलमिदानीमाह य इमं यथोक्तं परमं परं निःश्रेयसार्थं केशवार्जुनयोः संवादरूपं ग्रंथं गुह्यं गोप्यं मद्भक्तेषु मयि भक्तिमत्सु अभिधास्यति वक्ष्यति ग्रंथतोऽर्थतश्च व्याख्यापयिष्यतीत्यर्थः यथा त्वयि मया भक्तेः

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति ॥ भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥

पुनर्ग्रहणात्तद्भक्तिमात्रेण केवलेन शास्त्रसंप्रदाने पात्रं भवतीति गम्यते कथमभिधास्यतीत्युच्यते भक्तिं मयि परां कृत्वा भगवतः परमगुरोः शुश्रूषा मया क्रियत इत्येवं कृत्वेत्यर्थः तस्येदं फलं मामेवैष्यति मुच्यत एवात्र संशयो न कर्त्तव्य इत्याशंक्याह भक्तेरिति शुश्रूषादिसहकारिराहित्यं केवलशब्दार्थः यद्यपि मात्रशब्देन सूचितमेतत्तथापीतरेण स्फुटीकृतमित्यविरोधः प्रश्नपूर्वकमभिधानप्रकारमभिनयति कथमित्यादिना भगवति भक्तिकरणप्रकारं प्रकटयति भगवत इति यच्छब्दापेक्षितं पूरयति तस्येति मामेष्यत्येवेत्यत्र वयं गृहीत्वा व्याचष्टे मुच्यत एवेति ६ श्रीसीतारामचंद्रायनमः

ननुसर्वेषांमुक्तिसाधनानांध्यानस्यश्रेष्ठत्वात् ॥ तन्निष्ठस्यमुमुक्षोर्नास्तिविद्यासंप्रदानेप्रवृत्तिरितितत्राह ॥ किंचेति ॥ इतश्चविद्या
संप्रदानंमुमुक्षुणायथोक्तविशेषणवतेकर्त्तव्यमित्यर्थः ॥ वर्त्तमानेषुमध्येततोन्योनास्त्येवप्रियकृत्तमोनाप्यतीतेषुतादृ

किंच ॥ नचतस्माच्छास्त्रसंप्रदायकृतोमनुष्येषुमनुष्याणांमध्येकश्चिन्मेममप्रियकृत्तमोऽतिशयेनप्रियकृदन्यो

नचतस्मान्मनुष्येषुकश्चिन्मेप्रियकृत्तमः ॥ भवितानचमेतस्मादन्यःप्रियतरोभुवि ॥ ६९ ॥

नास्त्येवेत्यर्थः ॥ वर्त्तमानेषुनचभविताभविष्यत्यपिकालेतस्मात्द्वितीयोन्यःप्रियतरोभुविलोकेऽस्मिन् ॥ ६९ ॥

कृष्कश्चिदासीदितिशेषः ॥ तस्माद्विद्यासंप्रदायकर्तुःसकाशादित्यर्थः ॥ ध्याननिष्ठस्यश्रेष्ठत्वेपिस्वसंप्रदायप्रवक्तुः
श्रेष्ठतमत्वाद्भविताविद्यासंप्रदानेप्रवृत्तिरितिभावः ॥ ६९ ॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामायनमः ॥ ॥

संप्रदायप्रवक्तुः सर्वाधिकत्वंफलं सवक्ताविष्णुरित्युक्तोनसविश्वाधिदैवतमितिन्यायेनोक्तासंप्रत्यध्येतुर्विवक्षितंफलमाह योपीति यथोक्तस्यशास्त्रस्ययोप्यध्येतातेनेदंकृतंस्यादितिसंबंधः तदेवाह अध्येष्यतेचेति तेनेदंकृतमित्यत्रइदंशब्दार्थं विशदयति ज्ञानेति तेनाहमिष्टःस्यामितिसंबंधः चतुर्विधानांयज्ञानांमध्येज्ञानयज्ञस्यश्रेयान्द्रव्यमयाद्यज्ञात्ज्ञानयज्ञइतिविशिष्टत्वाभिधानात्तेनाहमिष्टःस्यामित्यध्ययनस्यस्तुतिरभिमतेत्याह विधीति पक्षांतरमाह फलेति फलविधिमेवप्रक

योपि अध्येष्यतेचपठिष्यतियइमंधर्म्यंधर्मादनपेतंसंवादरूपंग्रंथमावयोः तेनेदंकृतंस्यात्ज्ञानयज्ञेनविधिजपोपांशुमानसानांज्ञानयज्ञोमानसत्वात्विशिष्टतमइतिएतत्तेनज्ञानयज्ञेनगीताशास्त्राध्ययनंस्तूयतेफलविधिर्वा देवतादिविषयज्ञानयज्ञफलतुल्यमस्यफलंभवतीतितेनाध्ययनेनाहमिष्टःपूजितःस्यांभवेयंइतिमेममतिर्निश्चयः ॥७०॥

अध्येष्यतेचयइमंधर्म्यंसंवादमावयोः ज्ञानयज्ञेनतेनाहमिष्टःस्यामितिमेमतिः ॥७०॥

टयति देवतादीति यद्धिज्ञानयज्ञस्यफलंकैवल्यंतेनतुल्यमस्याध्येतुःसंपद्यतेतत्त्वदेवताद्यात्मलाभमित्यर्थः कथमध्ययनादेवसर्वात्मत्वंफलंलभ्यतेतस्मात्तत्सर्वमभवदितिहिश्रुतिस्तत्राह तेनेति तेनाध्येत्राज्ञानयज्ञतुल्येनाध्ययनेनभगवानिज्यतेतथाचतत्ज्ञानादुक्तंफलमविरुद्धमित्यर्थः ॥७०॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु ॥ श्रीरामचंद्रायनमोनमः ॥

प्रवक्तुरध्येतुश्च फलमुक्त्वा श्रोतुरिदानीं फलं कथयति अथेति ७१ आचार्येण शिष्याय यावदज्ञानसंशयविपर्यासं तावद
नेकधोपदेष्टव्यमिति दर्शयितुं भगवानर्जुनं प्रति पृष्टवानित्याह शिष्यस्येति प्रष्टुरभिप्रायं प्रकटयति तद्ग्रहण इति शि
ष्यश्चेदुक्तं यदि गृहीतुं नेष्टे तर्हि तं प्रत्यौदासीन्यमाचार्यस्योचितं तत्स्य मंदबुद्धित्वादित्याशंक्याह यत्नांतरमिति कच्चिदिति

अथ श्रोतुरिदं फलं श्रद्धावान् श्रद्दधानोऽनसूयश्चासूयावर्जितः सन्निमं ग्रंथं शृणुयादपि यो नरः अपिशब्दात्
किमुतार्थज्ञानवान्सोपि मुक्तः पापादशुभात् शुभान्प्रशस्तांल्लोकान्प्राप्नुयात्पुण्यकर्मणां अग्निहोत्रादिकर्मवतां ७१
शिष्यस्य शास्त्रार्थग्रहणाग्रहणविवेकबुभुत्सया पृच्छति तदग्रहणे ज्ञाने पुनर्ग्राहयिष्यामि सुपायांतरेणेति प्रष्टुरभि

श्रद्धावाननसूयश्च शृणुयादपि यो नरः सोपि मुक्तः शुभांल्लोकान्प्राप्नुयात्पुण्यकर्मणां ॥७१॥
कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा कच्चिदज्ञानसंमोहः प्रणष्टस्ते धनंजय ॥७२॥

प्रायो यत्नांतरं च स्थापयित्वा शिष्यः कृतार्थः कर्तव्य इत्याचार्यधर्मः प्रदर्शितो भवति कच्चित् किमेतन्मयोक्तं श्रुतं
श्रवणेनावधारितं पार्थ किं त्वया एकाग्रेण चेतसा एकचित्तेन किं वा प्रमादितं कच्चिदज्ञानसंमोहः अज्ञाननिमित्तः सं
मोहो विचित्तभावोऽविवेकता स्वाभाविकः किं नष्टः यदर्थोयं शास्त्रश्रवणायासस्तव मम चोपदेष्टृत्वायासः प्रवृत्तस्ते

तव धनंजय ॥७२॥
प्रशस्तप्रश्नं तमेव व्याचष्टे किमेतदिति द्वितीयं किंपदं पूर्वस्य व्याख्यानतया संबध्यते कच्चिदि
ति द्वितीयं प्रश्नं विभजते किं नष्ट इति मोहप्रणाशस्य प्रसंगं दर्शयति यदर्थ इति ७२ श्रीरामचंद्राय नमः श्रीरामः

प्रेमोपदिष्टविषयज्ञानस्याज्ञानसंदेहविपर्यासांतर्हितस्य दृष्टस्य भगवदनुग्रहात्प्रातिकथनेन भगवंतं परितोषयिष्यन्नर्जुनो ज्ञापितवानित्याह अर्जुन इति अज्ञानोत्थस्य विपर्यासाविवेकस्य नष्टत्वमेव स्पष्टयति समस्त इति स्वयंज्योतिषि प्रतीचि ब्रह्मण्यविद्याभ्रमं विद्यापनयति नाविदितं प्रकाशयतीति मत्वाह स्मृतिश्चेति स्मृतिलाभे किं स्यादिति चेत्तदाह यस्या इति मोहनाशे स्मृतिलाभे चासाधारणं कारणमाह त्वत्प्रसादादिति प्रकृतेन प्रश्नप्रतिवचनेन लब्धमर्थं कथयन्

नष्टो मोहोऽज्ञानजः समस्तसंसारानर्थहेतुः सागर इव दुस्तरः स्मृतिश्चात्मतत्वविषया लब्धा यस्या लाभात्सर्वहृदयग्रंथीनां विप्रमोक्षः त्वत्प्रसादान्मया त्वत्प्रसादसमाश्रितेन अच्युत दासेन अनेन मोहनाश प्रश्नप्रतिवचनेन सर्वेशास्त्रार्थज्ञानफलमेतावदेवेति निश्चितं दर्शितं भवति यदुताज्ञानसंमोहनाश आत्मस्मृतिलाभश्चेति

॥अर्जुन उवाच॥ नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत॥ स्थितोस्मि गतसंदेहः करिष्ये वचनं तव ७३

तथा च श्रुतौ अनात्मविच्छोचामीत्युपन्यस्य आत्मज्ञाने सर्वग्रंथिविप्रमोक्ष उक्तः भिद्यते हृदयग्रंथिः तत्र को मोहः कः शोक एकत्वमनुपश्यत इति च मंत्रवर्णः अथेदानीं त्वच्छासने स्थितोस्मि गतसंदेहो मुक्तसंशयः करिष्ये वचनं तवाहं त्वत्प्रसादात् कृतार्थो न मे कर्तव्यमस्तीत्यभिप्रायः ७३ श्रीसीतारामचंद्राय नमः श्रीराम्नाय॰

ति अनेनेति यदुक्तं स्मृतिप्रतिलंभादशेषतो हृदयग्रंथीनां विप्रमोक्षः स्यादिति तत्र प्रमाणमाह तथा चेति ज्ञानादज्ञानतत्कार्यनिवृत्तौ श्रुतसंतरमपि संवादयति भिद्यत इति भगवदनुग्रहादज्ञानकृन्मोहदाहस्यानंतरमात्मज्ञाने प्रतिलब्धे त्वदाज्ञाप्रतीतोहमित्युत्तरार्द्धं व्याकरोति अथेति तव वचनं करिष्येहमित्यत्र तात्पर्यमाह अहमिति ७३ श्रीरामाय नमः

शास्त्रार्थे समाप्ते सत्यस्यामवस्थायां संजयवचनं कुत्रोपयुक्तमिति तदाह ॥ परिसमाप्त इति ॥ वासुदेवस्य सर्वज्ञस्य सर्वेश्वरस्य कृतार्थस्य पार्थस्य पृथासुतस्यार्जुनस्य महात्मनोऽक्षुद्रबुद्धेः सर्वाधिकारिगुणसंपन्नस्य सम्यग्वादं संवादं गुरुशिष्यभावेन प्रश्नप्रतिवचनाभिधानमिमममनुक्रांतमद्भुतं विस्मयकरं रोमाणि हृष्यंति पुलकीभवंत्यनेनेति रोमहर्षणमाल्हादकरं यथोक्तं श्रुतवानस्मीत्याह ॥ इत्येवमिति ७४ ॥ प्रकृष्टं संवादं कथमश्रौषीरिति चेत्तत्राह ॥ तं चेति ॥ एतत्परं संवादपरत्वात्सु

परिसमाप्तः सकलशास्त्रार्थोऽथेदानीं कथासंबंधप्रदर्शनार्थं ॥ इत्येवमहं वासुदेवस्य पार्थस्य च महात्मनः संवादमिमं यथोक्तमश्रौषं श्रुतवानस्मि अद्भुतं अत्यंतविस्मयकरं रोमहर्षणं रोमांचकरं

संजय उवाच ॥ इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ॥ संवादमिममश्रौषमद्भुतं रोमहर्षणं ॥ ७४ ॥
व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परं ॥ योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयं ॥ ७५ ॥

॥ ७४ ॥ तं चेमं ॥ व्यासप्रसादात्ततो दिव्यचक्षुर्लाभात् श्रुतवानिमं संवादं गुह्यमहं परं योगं योगार्थत्वात्तं संवादमिमं योगमेव वा योगेश्वरात्कृष्णात्साक्षात् कथयतः स्वयं न परंपरातः ॥ ७५ ॥ श्रीः ॥

लिंगत्वेन नेतव्यमित्याह ॥ एतमिति ॥ परमपुरुषार्थोपायिकत्वात्परत्वं गुह्यमतिशयेन गुह्यं रहस्यमिति वा योगो ज्ञानं कर्म च तदर्थत्वादयं संवादो योग उक्तः ॥ अथवा चित्तवृत्तिनिरोधस्य योगस्यांगत्वादेष संवादो योग इत्याह ॥ संवादं इति ॥ योगानामीश्वरो योगेश्वरस्तदनुग्रहहेतुत्वाद्योगतत्फलयोस्ततः साक्षादव्यवधानेन श्रुतवान्न परंपरयेत्याह ॥ योगेश्वरादिति ॥ स्वयं स्वेन परमेश्वरेणातिरस्कृतज्ञानैश्वर्यरूपेण कथयतो व्याचक्षाणादित्यर्थः ॥ ७५ ॥ श्रीरामाय नमः ॥

यथोक्तंसंवादंभगवतःश्रुत्वाकिमुपेक्षसेनेत्याह राजन्निति पुण्यत्वंसाधयति श्रवणेनापीति ।७६ यत्तुविश्वरूपाख्यंरूपंसगु

हेराजन्धृतराष्ट्रसंस्मृत्यसंस्मृत्यसंवादमिममद्भुतं केशवार्जुनयोःपुण्यंश्रवणेनापिपापहरंश्रुत्वाहृष्यामिचमुहु

राजन्संस्मृत्यसंस्मृत्यसंवादमिममद्भुतं॥ केशवार्जुनयोःपुण्यंहृष्यामिचमुहुर्मुहुः॥७६॥
तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भुतंहरेः॥ विस्मयोमेमहान्राजन्हृष्यामिचपुनःपुनः॥७७॥

मुहुःप्रतिक्षणं॥७६॥ तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भुतंहरेर्विश्वरूपंविस्मयोमेमहान्राजन्हृष्यामिचपुनःपुनः॥७७॥

णमर्जुनायदर्शितवान्ध्यानार्थं॥ तदिदानींस्तौति॥ तच्चेति॥७७॥ श्रीसीतारामचंद्रजीप्रसंन्नोमस्तु॥ श्रीरामायनमः

द्द्योरपि कृष्णार्जुनयोर्नरनारायणयोः संवादस्य प्रामाण्यार्थं परममुत्कर्षं दर्शयति ॥ किंबहुनेति ॥ कथं सर्वेषां योगानामीश्वरो भगवानिति तत्राह ॥ तत्प्रभवत्वादिति ॥ सर्वो योगो ज्ञानं कर्म च तस्य वीजं शास्त्रीयज्ञानवैराग्यादि तद्धि भगवदधीनं ॥ तदनुग्रहविहीनस्य तद्योगात् ततो योगतत्फलयोर्भगवदनुग्रहायत्तत्वाद्भगवतो योगेश्वरत्वमित्यर्थः ॥ श्रीर्लक्ष्मीर्विजयः परमुत्कर्षः राज्ञो धृतराष्ट्रस्य पुत्रेषु विजयाशां शिथिलीकृत्य पांडवेषु जयप्राप्तिमेकां तिकीमुपसंहरति ॥ एवमिति ॥ उपायोपेयभावेन निष्ठाद्वयस्य प्रतिष्ठापितत्वात्कर्मनिष्ठापरंपरया ज्ञाननिष्ठाहेतुर्ज्ञाननिष्ठा तु साक्षादेव मोक्षहेतुरिति शास्त्रार्थमुपसंहर्तुमितीत्युक्तं ॥ कांडत्रयात्मकं शास्त्रं पद

किंबहुना यत्र यस्मिन्पक्षे योगेश्वरः सर्वयोगानामीश्वरस्तत्प्रभवत्वात्सर्वयोगवीजस्य कृष्णो यत्र पार्थो यस्मिन्पक्षे धनुर्द्धरो गांडीवधन्वा अर्जुनोस्ति तत्र श्रीस्तस्मिन्पांडवानां पक्षे विजयः ॥ तत्र एव भूतिः श्रियो विशेषविस्तारो विभूतिर्ध्रुवाऽ

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्द्धरः ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥ श्रीः ॥

व्यभिचारिणी नीतिर्न्यायइत्येवं मतिर्ममेति गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥ ७८ ॥ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां श्रीमच्छंकरभगवत्पादभाष्येऽष्टादशोध्याय ॥

वाक्यार्थगोचरं ॥ आदिमध्यांतषट्केषु व्याख्यया गोचरीकृतं ॥ १ संक्षेपविस्तराभ्यां यो लक्षणे रुपपादितः ॥ सोर्थोतिमेन संक्षिप्य लक्षणेन विवक्षितः ॥ २ गीताशास्त्रमहाऽर्णवोत्थममृतं वैकुंठकंठोद्भवं श्रीकंठापरनामवस्तु निकृतं निष्ठाद्वयं द्योतितं ॥ निष्ठा यत्र मतिप्रसादजननी साक्षात्कृतिं कुर्वती मोक्षे पर्यवसास्यति प्रतिदिनं सेवंतु चेतत्बुधाः प्राचामाचार्यपादानां पदवीमनुगच्छतां ॥ गीताभाष्ये कृता टीका टीकता पुरुषोत्तमं ॥ ७८ ॥ इति श्रीमद्भगवद्गीताभाष्ये श्रीमदानंदगीरीटीकायां अष्टादशोऽध्यायः ॥ १८ ॥ ॥

॥इतिश्रीमद्भगवद्गीताभाष्यंसानंदगिरीयटिप्पणंसमाप्तम्॥ ॥

[OrderDescription]
,CREATED=10.06.20 16:57
,TRANSFERRED=2020/06/11 at 15:10:05
,PAGES=825
,TYPE=STD
,NAME=S0003119
,Book Name=M-936-SHRIMDBHAJVDGEETA BHASYAM SANNDGIRI YDIPPNAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF

FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF

FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF

FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF

FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF

FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF

FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF

FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF

FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF

FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF

FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF

FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF

FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF

FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
,FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF

FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF

FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF

FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
,FILE383=00000383.TIF
,FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF
,FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF

FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF

FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF
,FILE417=00000417.TIF
,FILE418=00000418.TIF
,FILE419=00000419.TIF
,FILE420=00000420.TIF
,FILE421=00000421.TIF
,FILE422=00000422.TIF
,FILE423=00000423.TIF
,FILE424=00000424.TIF
,FILE425=00000425.TIF
,FILE426=00000426.TIF
,FILE427=00000427.TIF
,FILE428=00000428.TIF
,FILE429=00000429.TIF
,FILE430=00000430.TIF
,FILE431=00000431.TIF

FILE432=00000432.TIF
,FILE433=00000433.TIF
,FILE434=00000434.TIF
,FILE435=00000435.TIF
,FILE436=00000436.TIF
,FILE437=00000437.TIF
,FILE438=00000438.TIF
,FILE439=00000439.TIF
,FILE440=00000440.TIF
,FILE441=00000441.TIF
,FILE442=00000442.TIF
,FILE443=00000443.TIF
,FILE444=00000444.TIF
,FILE445=00000445.TIF
,FILE446=00000446.TIF
,FILE447=00000447.TIF
,FILE448=00000448.TIF
,FILE449=00000449.TIF
,FILE450=00000450.TIF
,FILE451=00000451.TIF

FILE452=00000452.TIF
,FILE453=00000453.TIF
,FILE454=00000454.TIF
,FILE455=00000455.TIF
,FILE456=00000456.TIF
,FILE457=00000457.TIF
,FILE458=00000458.TIF
,FILE459=00000459.TIF
,FILE460=00000460.TIF
,FILE461=00000461.TIF
,FILE462=00000462.TIF
,FILE463=00000463.TIF
,FILE464=00000464.TIF
,FILE465=00000465.TIF
,FILE466=00000466.TIF
,FILE467=00000467.TIF
,FILE468=00000468.TIF
,FILE469=00000469.TIF
,FILE470=00000470.TIF
,FILE471=00000471.TIF

FILE472=00000472.TIF
,FILE473=00000473.TIF
,FILE474=00000474.TIF
,FILE475=00000475.TIF
,FILE476=00000476.TIF
,FILE477=00000477.TIF
,FILE478=00000478.TIF
,FILE479=00000479.TIF
,FILE480=00000480.TIF
,FILE481=00000481.TIF
,FILE482=00000482.TIF
,FILE483=00000483.TIF
,FILE484=00000484.TIF
,FILE485=00000485.TIF
,FILE486=00000486.TIF
,FILE487=00000487.TIF
,FILE488=00000488.TIF
,FILE489=00000489.TIF
,FILE490=00000490.TIF
,FILE491=00000491.TIF

FILE492=00000492.TIF
,FILE493=00000493.TIF
,FILE494=00000494.TIF
,FILE495=00000495.TIF
,FILE496=00000496.TIF
,FILE497=00000497.TIF
,FILE498=00000498.TIF
,FILE499=00000499.TIF
,FILE500=00000500.TIF
,FILE501=00000501.TIF
,FILE502=00000502.TIF
,FILE503=00000503.TIF
,FILE504=00000504.TIF
,FILE505=00000505.TIF
,FILE506=00000506.TIF
,FILE507=00000507.TIF
,FILE508=00000508.TIF
,FILE509=00000509.TIF
,FILE510=00000510.TIF
,FILE511=00000511.TIF

FILE512=00000512.TIF
,FILE513=00000513.TIF
,FILE514=00000514.TIF
,FILE515=00000515.TIF
,FILE516=00000516.TIF
,FILE517=00000517.TIF
,FILE518=00000518.TIF
,FILE519=00000519.TIF
,FILE520=00000520.TIF
,FILE521=00000521.TIF
,FILE522=00000522.TIF
,FILE523=00000523.TIF
,FILE524=00000524.TIF
,FILE525=00000525.TIF
,FILE526=00000526.TIF
,FILE527=00000527.TIF
,FILE528=00000528.TIF
,FILE529=00000529.TIF
,FILE530=00000530.TIF
,FILE531=00000531.TIF

FILE532=00000532.TIF
,FILE533=00000533.TIF
,FILE534=00000534.TIF
,FILE535=00000535.TIF
,FILE536=00000536.TIF
,FILE537=00000537.TIF
,FILE538=00000538.TIF
,FILE539=00000539.TIF
,FILE540=00000540.TIF
,FILE541=00000541.TIF
,FILE542=00000542.TIF
,FILE543=00000543.TIF
,FILE544=00000544.TIF
,FILE545=00000545.TIF
,FILE546=00000546.TIF
,FILE547=00000547.TIF
,FILE548=00000548.TIF
,FILE549=00000549.TIF
,FILE550=00000550.TIF
,FILE551=00000551.TIF

FILE552=00000552.TIF
,FILE553=00000553.TIF
,FILE554=00000554.TIF
,FILE555=00000555.TIF
,FILE556=00000556.TIF
,FILE557=00000557.TIF
,FILE558=00000558.TIF
,FILE559=00000559.TIF
,FILE560=00000560.TIF
,FILE561=00000561.TIF
,FILE562=00000562.TIF
,FILE563=00000563.TIF
,FILE564=00000564.TIF
,FILE565=00000565.TIF
,FILE566=00000566.TIF
,FILE567=00000567.TIF
,FILE568=00000568.TIF
,FILE569=00000569.TIF
,FILE570=00000570.TIF
,FILE571=00000571.TIF

FILE572=00000572.TIF
,FILE573=00000573.TIF
,FILE574=00000574.TIF
,FILE575=00000575.TIF
,FILE576=00000576.TIF
,FILE577=00000577.TIF
,FILE578=00000578.TIF
,FILE579=00000579.TIF
,FILE580=00000580.TIF
,FILE581=00000581.TIF
,FILE582=00000582.TIF
,FILE583=00000583.TIF
,FILE584=00000584.TIF
,FILE585=00000585.TIF
,FILE586=00000586.TIF
,FILE587=00000587.TIF
,FILE588=00000588.TIF
,FILE589=00000589.TIF
,FILE590=00000590.TIF
,FILE591=00000591.TIF

FILE592=00000592.TIF
,FILE593=00000593.TIF
,FILE594=00000594.TIF
,FILE595=00000595.TIF
,FILE596=00000596.TIF
,FILE597=00000597.TIF
,FILE598=00000598.TIF
,FILE599=00000599.TIF
,FILE600=00000600.TIF
,FILE601=00000601.TIF
,FILE602=00000602.TIF
,FILE603=00000603.TIF
,FILE604=00000604.TIF
,FILE605=00000605.TIF
,FILE606=00000606.TIF
,FILE607=00000607.TIF
,FILE608=00000608.TIF
,FILE609=00000609.TIF
,FILE610=00000610.TIF
,FILE611=00000611.TIF

FILE612=00000612.TIF
,FILE613=00000613.TIF
,FILE614=00000614.TIF
,FILE615=00000615.TIF
,FILE616=00000616.TIF
,FILE617=00000617.TIF
,FILE618=00000618.TIF
,FILE619=00000619.TIF
,FILE620=00000620.TIF
,FILE621=00000621.TIF
,FILE622=00000622.TIF
,FILE623=00000623.TIF
,FILE624=00000624.TIF
,FILE625=00000625.TIF
,FILE626=00000626.TIF
,FILE627=00000627.TIF
,FILE628=00000628.TIF
,FILE629=00000629.TIF
,FILE630=00000630.TIF
,FILE631=00000631.TIF

FILE632=00000632.TIF
,FILE633=00000633.TIF
,FILE634=00000634.TIF
,FILE635=00000635.TIF
,FILE636=00000636.TIF
,FILE637=00000637.TIF
,FILE638=00000638.TIF
,FILE639=00000639.TIF
,FILE640=00000640.TIF
,FILE641=00000641.TIF
,FILE642=00000642.TIF
,FILE643=00000643.TIF
,FILE644=00000644.TIF
,FILE645=00000645.TIF
,FILE646=00000646.TIF
,FILE647=00000647.TIF
,FILE648=00000648.TIF
,FILE649=00000649.TIF
,FILE650=00000650.TIF
,FILE651=00000651.TIF

FILE652=00000652.TIF
,FILE653=00000653.TIF
,FILE654=00000654.TIF
,FILE655=00000655.TIF
,FILE656=00000656.TIF
,FILE657=00000657.TIF
,FILE658=00000658.TIF
,FILE659=00000659.TIF
,FILE660=00000660.TIF
,FILE661=00000661.TIF
,FILE662=00000662.TIF
,FILE663=00000663.TIF
,FILE664=00000664.TIF
,FILE665=00000665.TIF
,FILE666=00000666.TIF
,FILE667=00000667.TIF
,FILE668=00000668.TIF
,FILE669=00000669.TIF
,FILE670=00000670.TIF
,FILE671=00000671.TIF

FILE672=00000672.TIF
,FILE673=00000673.TIF
,FILE674=00000674.TIF
,FILE675=00000675.TIF
,FILE676=00000676.TIF
,FILE677=00000677.TIF
,FILE678=00000678.TIF
,FILE679=00000679.TIF
,FILE680=00000680.TIF
,FILE681=00000681.TIF
,FILE682=00000682.TIF
,FILE683=00000683.TIF
,FILE684=00000684.TIF
,FILE685=00000685.TIF
,FILE686=00000686.TIF
,FILE687=00000687.TIF
,FILE688=00000688.TIF
,FILE689=00000689.TIF
,FILE690=00000690.TIF
,FILE691=00000691.TIF

FILE692=00000692.TIF
,FILE693=00000693.TIF
,FILE694=00000694.TIF
,FILE695=00000695.TIF
,FILE696=00000696.TIF
,FILE697=00000697.TIF
,FILE698=00000698.TIF
,FILE699=00000699.TIF
,FILE700=00000700.TIF
,FILE701=00000701.TIF
,FILE702=00000702.TIF
,FILE703=00000703.TIF
,FILE704=00000704.TIF
,FILE705=00000705.TIF
,FILE706=00000706.TIF
,FILE707=00000707.TIF
,FILE708=00000708.TIF
,FILE709=00000709.TIF
,FILE710=00000710.TIF
,FILE711=00000711.TIF

FILE712=00000712.TIF
,FILE713=00000713.TIF
,FILE714=00000714.TIF
,FILE715=00000715.TIF
,FILE716=00000716.TIF
,FILE717=00000717.TIF
,FILE718=00000718.TIF
,FILE719=00000719.TIF
,FILE720=00000720.TIF
,FILE721=00000721.TIF
,FILE722=00000722.TIF
,FILE723=00000723.TIF
,FILE724=00000724.TIF
,FILE725=00000725.TIF
,FILE726=00000726.TIF
,FILE727=00000727.TIF
,FILE728=00000728.TIF
,FILE729=00000729.TIF
,FILE730=00000730.TIF
,FILE731=00000731.TIF

FILE732=00000732.TIF
,FILE733=00000733.TIF
,FILE734=00000734.TIF
,FILE735=00000735.TIF
,FILE736=00000736.TIF
,FILE737=00000737.TIF
,FILE738=00000738.TIF
,FILE739=00000739.TIF
,FILE740=00000740.TIF
,FILE741=00000741.TIF
,FILE742=00000742.TIF
,FILE743=00000743.TIF
,FILE744=00000744.TIF
,FILE745=00000745.TIF
,FILE746=00000746.TIF
,FILE747=00000747.TIF
,FILE748=00000748.TIF
,FILE749=00000749.TIF
,FILE750=00000750.TIF
,FILE751=00000751.TIF

FILE752=00000752.TIF
,FILE753=00000753.TIF
,FILE754=00000754.TIF
,FILE755=00000755.TIF
,FILE756=00000756.TIF
,FILE757=00000757.TIF
,FILE758=00000758.TIF
,FILE759=00000759.TIF
,FILE760=00000760.TIF
,FILE761=00000761.TIF
,FILE762=00000762.TIF
,FILE763=00000763.TIF
,FILE764=00000764.TIF
,FILE765=00000765.TIF
,FILE766=00000766.TIF
,FILE767=00000767.TIF
,FILE768=00000768.TIF
,FILE769=00000769.TIF
,FILE770=00000770.TIF
,FILE771=00000771.TIF

FILE772=00000772.TIF
,FILE773=00000773.TIF
,FILE774=00000774.TIF
,FILE775=00000775.TIF
,FILE776=00000776.TIF
,FILE777=00000777.TIF
,FILE778=00000778.TIF
,FILE779=00000779.TIF
,FILE780=00000780.TIF
,FILE781=00000781.TIF
,FILE782=00000782.TIF
,FILE783=00000783.TIF
,FILE784=00000784.TIF
,FILE785=00000785.TIF
,FILE786=00000786.TIF
,FILE787=00000787.TIF
,FILE788=00000788.TIF
,FILE789=00000789.TIF
,FILE790=00000790.TIF
,FILE791=00000791.TIF

FILE792=00000792.TIF
,FILE793=00000793.TIF
,FILE794=00000794.TIF
,FILE795=00000795.TIF
,FILE796=00000796.TIF
,FILE797=00000797.TIF
,FILE798=00000798.TIF
,FILE799=00000799.TIF
,FILE800=00000800.TIF
,FILE801=00000801.TIF
,FILE802=00000802.TIF
,FILE803=00000803.TIF
,FILE804=00000804.TIF
,FILE805=00000805.TIF
,FILE806=00000806.TIF
,FILE807=00000807.TIF
,FILE808=00000808.TIF
,FILE809=00000809.TIF
,FILE810=00000810.TIF
,FILE811=00000811.TIF

FILE812=00000812.TIF
,FILE813=00000813.TIF
,FILE814=00000814.TIF
,FILE815=00000815.TIF
,FILE816=00000816.TIF
,FILE817=00000817.TIF
,FILE818=00000818.TIF
,FILE819=00000819.TIF
,FILE820=00000820.TIF
,FILE821=00000821.TIF
,FILE822=00000822.TIF
,FILE823=00000823.TIF
,FILE824=00000824.TIF
,FILE825=00000825.TIF
,